ब्रह्मसूत्रशाङ्करभाष्यम्

(एकादशटीकासंयुतम्)

प्रो० योगेश्वरदत्तशर्मा (पाराशरः)

NAG PUBLISHERS

नाग प्रकाशक

ब्रह्मसूत्रशांकरभाष्यमिदं टीकाभिरेकादशभिः सह भागेष्वष्टसु प्रकाश्यते। सर्वासां टीकानां क्रम एवं व्यवस्थापितः। भामती-ऋजुप्रकाशिका- भाष्यभावप्रकाशिका- प्रदीप-ऋजुविवरण - तत्वदीपन- वार्त्तिक - पञ्चपादिका-पञ्चपादिकाविवरण-श्रीकण्ठभाष्य-शिवार्कमणिदीपिकाख्याः।

एतासां सर्वासां टीकानां केचिदंशाः प्रकाशिता आसन् केचिच्चाप्रकाशिताः। ते सर्वेऽशाः इतस्ततः प्रकाशितेभ्यो ग्रन्थेऽभ्योऽप्रकाशितेभ्यो ग्रन्थेभ्यो वा यथासम्भवं संकलय्यात्र व्यवस्थापिताः। अधुनापर्यन्तं सर्वा एताः टीकाः सममेव प्रकाशिताः आसन्। परमधुना प्रतिवर्णकं टीकैका पूर्वं सामग्र्येण प्रकाशिता।

तदनन्तरं द्वितीया टीका प्रारब्धा। आशास्यते च वेदान्तविषयाब्धिं प्रविविक्षूणां शोधकानां कृते प्रयास एष समर्द्धिकरो भविता।

ब्रह्मसूत्रशाङ्करभाष्यम्

(एकादशटीकासंयुतम्)

प्रो. योगेश्वरदत्तशर्मा (पाराशरः)

NAG PUBLISHERS

नाग पब्लिशर्स

ब्रह्मसूत्रशाङ्करभाष्यम्

(एकादशटीकासंयुतम्)

ब्रह्मसूत्रशाङ्करभाष्यम्

चतुर्थ खण्ड

वार्त्तिकम् — श्रीकण्ठभाष्यम् (ब्रह्मसूत्रस्य)

प्रदीपः — शिवार्कमणिदीपिका (श्रीकण्ठभाष्यस्य)

भामती

सम्पादकः

प्रो. योगेश्वरदत्तशर्मा (पाराशरः)

हिन्दू कालेज, दिल्ली विश्वविद्यालय

दिल्ली-110007

नाग पब्लिशर्स

11 ए. यू. ए. जवाहर नगर, दिल्ली-110007

भारत

This Publication has been brought out with the financial assistance from Rashtriya Sanskrit Sansthan, New Delhi.

नाग प्रकाशक

(१) 11ए/यू. ए. जवाहर नगर, दिल्ली-110007
टेलिफोन-3915883, 3967975, 3957440

(२) जलालपुर माफी (चुनार-मिर्जापुर) उ० प्र०

© प्रकाशक

ISBN : 81-7081-365-4 **(set)**
81-7081-510-X **(Vol IV)**

प्रथम संस्करण : 2002

मूल्य : 178.00

श्री सुरेन्द्र प्रताप द्वारा नाग प्रकाशक 11 ए० यू० ए०, जवाहर नगर, दिल्ली 110007 द्वारा प्रकाशित तथा जी. प्रिंट. प्रोसेस, 308/2 शहजादा बाग, दयाबस्ती दिल्ली द्वारा 110035 द्वारा मुद्रित। अक्षरयोजक ए० आर० प्रिंटर्स, डी-102 न्यू सीलमपुर, दिल्ली-110053।

विषयनुक्रमणिका

(अ०१ पा०१ सू० ५-११)
अथ ईक्षत्यधिकरणम

शाङ्करभाष्यम्	१६६१-१६६७
वार्त्तिकम्	१६६८-१६८१
प्रदीपः	१६८२-१७०७
भामती	१७०८-१७१४
श्रीकण्ठभाष्यम्	१७१५-१७१७
शिवार्कमणिदीपिका	१७१८-१७२९

(अ०१ पा०१ सू० १२-१९)
अथ आनन्दमयाधिकरणम्

शाङ्करभाष्यम्	१७३०-१७३६
वार्त्तिकम्	१७३६-१७५३
प्रदीपः	१७५४-१७७६
भामती	१७७७-१७७९
श्रीकण्ठभाष्यम्	१७८०-१७८३
शिवार्कमणिदीपिका	१७८४-१८१७

(अ०१ पा०१ सू० २०-२१)
अथ अन्तरधिकरणम्

शाङ्करभाष्यम्	१८१८-१८१९
वार्त्तिकम्	१८२०-१८२४
प्रदीपः	१८२५-१८२९
भामती	१८३०-१८३३
श्रीकण्ठभाष्यम्	१८३४-१८३५
शिवार्कमणिदीपिका	१८३६-१८३७

(अ०१ पा०१ सू०२२)
अथ आकाशाधिकरणम्

शाङ्करभाष्यम् १८३८-१८३९
वार्त्तिकम् १८४०-१८४४
प्रदीप: १८४५-१८४९
भामती १८५०-१८५१
श्रीकण्ठभाष्यम् १८५२-१८५२
शिवार्कमणिदीपिका १८५३-१८६९

(अ०१ पा०१ सू०२३)
अथ प्राणाधिकरणम्

शाङ्करभाष्यम् १८७०-१८७१
वार्त्तिकम् १८७२-१८७४
प्रदीप: १८७५-१८७८
भामती १८७९-१८८०
श्रीकण्ठभाष्यम् १८८१-१८८१
शिवार्कमणिदीपिका १८८२-१८८२

(अ०१ पा०१ सू०२४-२७)
अथ ज्योतिश्चरणाधिकरणम्

शाङ्करभाष्यम् १८८३-१८८६
वार्त्तिकम् १८८७-१८९४
प्रदीप: १८९५-१८९७
भामती १८९८-१९०२
श्रीकण्ठभाष्यम् १९०३-१९०४
शिवार्कमणिदीपिका १९०५-१९२१

(अ०१ पा०१ सू० २८-३१)
अथ प्रर्तदनाधिकरणम्

शाङ्करभाष्यम् १९२२-१९२६
प्रदीप: १८२७-१९३१
वार्त्तिकम् १९३२-१९३७
भामती १९३८-१९४०

श्रीकण्ठभाष्यम् १९४१-१९४३
शिवार्कमणिदीपिका १९४४-१९५३

(अ०१ पा०२ सू०१-८)
अथ सर्वत्रप्रसिद्धाधिकरणम्

शाङ्करभाष्यम् १९५४-१९५८
वार्त्तिकम् १९५९-१९६५
प्रदीपः १९६६-१९७४
भामती १९७५-१९७८
श्रीकण्ठभाष्यम् १९७९-१९८४
शिवार्कमणिदीपिका १९८५-२०२०

(अ०१ पा०२ सू० ९-१०)
अथ अत्रधिकरणम्

शाङ्करभाष्यम् २०२१-२०२१
वार्त्तिकम् २०२२-२०२३
प्रदीपः २०२४-२०२६
भामती २०२७-२०२८
श्रीकण्ठभाष्यम् २०२९-२०३१
शिवार्कमणिदीपिका २०३२-२०४२

(अ०१ पा०२ सू० ११-१२)
अथ गुहाधिकरणम्

शाङ्करभाष्यम् २०४३-२०४५
वार्त्तिकम् २०४६-२०५०
प्रदीपः २०५१-२०५३
भामती २०५४-२०५५
श्रीकण्ठभाष्यम् २०५६-२०५७
शिवार्कमणिदीपिका २०५८-२०६२

(अ०१ पा०२ सू०१३-१७)
अथ अन्तराधिकरणम्

शाङ्करभाष्यम् २०६३-२०६५
वार्त्तिकम् २०६६-२०७०

	२०७१-२०७३
प्रदीपः	२०७४-२०७७
भामती	२०७८-२०७९
श्रीकण्ठभाष्यम्	२०८०-२०९०
शिवार्कमणिदीपिका	

(अ०१ पा०२ सू० १८-२०)
अथ अन्तर्याम्याधिकरणम्

	२०९१-२०९३
शाङ्करभाष्यम्	२०९४-२०९७
वार्त्तिकम्	२०९८-२१०१
प्रदीपः	२१०२-२१०३
भामती	२१०४-२१०५
श्रीकण्ठभाष्यम्	२१०६-२११२
शिवार्कमणिदीपिका	

(अ०१ पा०२ सू० २१-२३)
अथ अदृश्यत्वाधिकरणम्

	२११३-२११६
शाङ्करभाष्यम्	२११७-२१२२
वार्त्तिकम्	२१२३-२१२७
प्रदीपः	२१२८-२१३०
भामती	२१३१-२१३१
श्रीकण्ठभाष्यम्	२१३२-२१४१
शिवार्कमणिदीपिका	

(अ०१ पा०२ सू० २४-३२)
अथ वैश्वानराधिकरणम्

	२१४२-२१४५
शाङ्करभाष्यम्	२१४६-२१५२
वार्त्तिकम्	२१५३-२१५७
प्रदीपः	२१५८-२१६०
भामती	२१६१-२१६३
श्रीकण्ठभाष्यम्	२१६४-२१७३
शिवार्कमणिदीपिका	

अथ ईक्षत्यधिकरणम् ।

सू० ५-११॥

शाङ्करभाष्यम्

एवं तावद् वेदान्तवाक्यानां ब्रह्मात्मावगतिप्रयोजनानां ब्रह्मात्मनि तात्पर्येण समन्वितानामन्तरेणापि कार्यानुप्रवेशं ब्रह्मणि पर्यवसानमुक्तम्। ब्रह्म च सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिनाशकारणमित्युक्तम्। साङ्ख्यादयस्तु परिनिष्ठितं वस्तु प्रमाणान्तरगम्यमेवेति मन्यमानाः प्रधानादीनि कारणान्तराण्यनुमिमानास्तत्परतयैव वेदान्तवाक्यानि योजयन्ति। सर्वेष्वेव तु वेदान्तवाक्येषु सृष्टिविषयेष्वनुमानेनैव कार्येणव कारणं लिलक्षयिषितम्। प्रधानपुरुषसंयोगा नित्यानुमेया इति साङ्ख्या मन्यन्ते। काणादास्त्वेतेभ्य एव वाक्येभ्य ईश्वरं निमित्तकारणमनुमिमते, अणूंश्च समवायिकारणम्। एवमन्येऽपि तार्किका वाक्याभासयुक्त्याभासावष्टम्भाः पूर्वपक्षवादिन इहोत्तिष्ठन्ति। तत्र पदवाक्यप्रमाणज्ञेनाचार्येण वेदान्तवाक्यानां ब्रह्मावगतिपरत्वदर्शनाय वाक्याभासयुक्त्याभासप्रतिपत्तयः पूर्वपक्षीकृत्य निराक्रियन्ते। तत्र साङ्ख्याः प्रधानं त्रिगुणमचेतनं जगतः कारणमिति मन्यमाना आहुः-यानि वेदान्तवाक्यानि सर्वज्ञस्य सर्वशक्तेर्ब्रह्मणो जगत्कारणत्वं दर्शयन्तीत्यवोचः, तानि प्रधानकारणपक्षेऽपि योजयितुं शक्यन्ते। सर्वशक्तित्वं तावत् प्रधानस्यापि स्वविकारविषयमुपपद्यते। एवं सर्वज्ञत्वमप्युपपद्यते। कथम्? यत्तु ज्ञानं मन्यसे, स सत्त्वधर्मः; "सत्त्वात्सञ्जायते ज्ञानम्" (गी० १४/१७) इति स्मृतेः। तेन च सत्त्वधर्मेण ज्ञानेन कार्यकरणवन्तः पुरुषाः सर्वज्ञा योगिनः प्रसिद्धाः। सत्त्वस्य हि निरतिशयोत्कर्षे सर्वज्ञत्वं प्रसिद्धम्। न केवलस्याकार्यकरणस्य पुरुषस्योपलब्धिमात्रस्य सर्वज्ञत्वं किञ्चिज्ज्ञत्वं वा कल्पयितु शक्यम्। त्रिगुणत्वातु प्रधानस्य सर्वज्ञानकारणभूतं सत्त्वं प्रधानावस्थायामपि विद्यत, इति प्रधानस्याचेतनस्यैव सतः सर्वज्ञत्वमुपचर्यते वेदान्तवाक्येषु। अवश्यं य। त्वयापि सर्वज्ञं ब्रह्माभ्युपगच्छता सर्वज्ञानशक्तिमत्त्वेनैव सर्वज्ञत्वमुपगन्तव्यम्। न हि सर्वविषयं ज्ञानं कुर्वदेव ब्रह्म वर्तते। तथाहि-ज्ञानस्य नित्यत्वाद् ज्ञानक्रियां प्रति स्वातन्त्र्यं ब्रह्मणो हीयेत। अथानित्यं तदिति ज्ञानक्रियाया उपरमेतापि ब्रह्म, तदा सर्वज्ञानशक्तिमत्त्वेनैव सर्वज्ञत्वमापतति। अपिच प्रागुत्पत्तेः सर्वकारकशून्यं ब्रह्मेष्यते त्वया। नच ज्ञानसाधनानां शरीरेन्द्रियादीनामभावे ज्ञानोत्पत्तिः कस्यचिदुपपन्ना।।

अपिच प्रधानस्या चानेकात्मकस्य परिणामसंभवात्कारणत्वोपपत्तिर्मृदादिवत्, नासंहतस्यैकात्मकस्य ब्रह्मण इति।

ईक्षतेर्नाशब्दम्।।५।। न साङ्ख्यपरिकल्पितंएवं प्राप्त इदं सूत्र भारभ्यते। चेतनं प्रधानं जगतः कारणं, शक्यं वेदान्तेप्वाश्रयितुम्। अशब्दं हि तत्। कथमशब्दत्वम्? ईक्षतेः–ईक्षितृत्वश्रवणात्कारणस्य। कथम्? एवं हि श्रूयते–''सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्'' (छान्दो० ६।२।१) इत्युपक्रम्य ''तदैक्षत वहु स्यां प्रजायेयेति तत्तेजोऽसृजते'' (छा० ६।२।३) ति। तत्रेदंशब्दवाच्यं नामरूपव्याकृतं जगत्प्रागुत्पत्तेः सदात्मनाऽवधार्य तस्यैव प्रकृतस्य सच्छब्दवाच्यस्येक्षणपूर्वकं तेजःप्रभृतेः स्रष्टृत्वं दर्शयति। तथान्यत्र–''आत्मा वा इदमेक एवाग्र आसीत्। नान्यत्किंचन मिषत्। स ईक्षत लोकान्नु सृजा इति। स इमाँल्लोकानसृजते'' (ऐत० १।१।१) तीक्षापूर्विकामेव सृष्टिमाचष्टे। क्वचितु षोडशकलं पुरुषं प्रस्तुत्याह–''स ईक्षाचक्रे। स प्राणमसृजते'' (प्रश्न० ६।३) ति। ईक्षतेरिति च धात्वर्थनिर्देशोऽभिप्रेतः, यजतेरितिवत्, न धातुनिर्देशः। तेन ''यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायत'' (मुण्ड० १।१।९) इत्येवमादीन्यपि सर्वत्रेश्वरकारणपराणि वाक्यान्युदाहर्तव्यानि।।

यत्तूक्तं सत्त्वधर्मेण ज्ञानेन सर्वज्ञं प्रधानं भविष्यतीति, तन्नोपपद्यते। न हि प्रधानावस्थायां गुणसाम्यात्सत्त्वधर्मो ज्ञानं संभवति। ननूक्तं सर्वज्ञानशक्तिमत्त्वेन सर्वज्ञं भविष्यतीति, तदपि नोपपद्यते। यदि गुणसाम्ये सति सत्त्वव्यपाश्रयां ज्ञानशक्तिमाश्रित्य सर्वज्ञं प्रधानमुच्येत, कामं रजस्तमोव्यपाश्रयामपि ज्ञानप्रतिबन्धकशक्तिमाश्रित्य किञ्चिज्ज्ञमुच्येत। अपिच नासाक्षिका सत्त्ववृत्तिर्जानातिनाऽभिधीयते। न चाचेतनस्य प्रधानस्य साक्षित्वमस्ति। तस्मादनुपपन्नं प्रधानस्य सर्वज्ञत्वम्, योगिनां तु चेतनत्वात्सत्त्वोत्कर्षनिमित्तं सर्वज्ञत्वमुपपन्नम् इत्यनुदाहरणम्। अथ पुनः साक्षिनिमित्तमीक्षितृत्वं प्रधानस्य कल्प्येत, यथाग्निनिमित्तमयःपिण्डादेर्दग्धृत्वम्, तथा सति यन्निमित्तमीक्षितृत्वं प्रधानस्य, तदेव सर्वज्ञं मुख्यं ब्रह्म जगतः कारणमिति युक्तम्। यत्पुनरुक्तं ब्रह्मणोऽपि न मुख्यं सर्वज्ञत्वमुपपद्यते, नित्यज्ञानक्रियत्वे ज्ञानक्रियां प्रति स्वातन्त्र्यासंभवादिति, अत्रोच्यते–इदं तावद्भवान्प्रष्टव्यः–कथं नित्यज्ञानक्रियत्वे सर्वज्ञत्वहानिरिति। यस्य हि सर्वविषयावभासनक्षमं ज्ञानं नित्यमस्ति, सोऽसर्वज्ञ इति विप्रतिषिद्धम्। अनित्यत्वे हि ज्ञानस्य, कदाचिज्जानाति कदाचिन्न जानातीत्यसर्वज्ञत्वमपि स्यात्। नासौ ज्ञाननित्यत्वे दोषोऽस्ति। ज्ञाननित्यत्वे ज्ञानविषयः स्वातन्त्र्यव्यपदेशी नोपपद्यत इति चेत् न, प्रततौष्ण्यप्रकाशेऽपि सवितरि दहति प्रकाशयतीति स्वातन्त्र्यव्यपदेशदर्शनात्। ननु सवितुर्दाह्यप्रकाश्यसंयोगे सति दहति प्रकाशयतीति व्यपदेशः स्यात्, नतु ब्रह्मणः प्रागुत्पत्तेर्ज्ञानकर्मसंयोगोऽस्तीति विषमो दृष्टान्त, न; असत्यपि कर्मणि सविता प्रकाशत इति कर्तृत्वव्यपदेशदर्शनात्, एवमसत्यपि ज्ञानकर्मणि ब्रह्मणः ''तदैक्षते'' ति कर्तृत्वव्यपदेशोपपत्तेर्न वैषम्यम्। कर्मापेक्षायां तु ब्रह्मणीक्षितृत्वश्रुतयः सुतरामुपपन्नाः।।

किं पुनस्तत्कर्म–यत्प्रागुत्पत्तेरीश्वर- ज्ञानस्य विषयो भवतीति? तत्त्वान्यत्वाभ्यामनिर्वचनीये नामरूपे अव्याकृते व्याचिकीर्षिते इति ब्रूमः। यत्प्रसादाद्धि योगिनामप्यतीतानागतविषयं प्रत्यक्षं ज्ञानमिच्छन्ति योगशास्त्रविदः, किमु वक्तव्यं तस्य नित्यसिद्धस्येश्वरस्य सृष्टिस्थितिसंहृतिविषयं नित्यज्ञानं भवतीति।।

यदप्युक्तम्-प्रागुत्पत्तेर्ब्रह्मणः शरीरादिसम्बन्धमन्तरेणेक्षितृत्वमनुपपन्नम्-इति,न तच्चोद्यमवतरति; सवितृप्रकाशवद्ब्रह्मणो ज्ञानस्वरूपनित्यत्वे ज्ञानसाधनापेक्षानुपपत्तेः। अपिचाविद्यादिमतः संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिः स्यात्, न ज्ञानप्रतिबन्धकारणरहितस्येश्वरस्य। मन्त्रौ चेमावीश्वरस्य शरीराद्यनपेक्षतामनावरणज्ञानतां च दर्शयतः–''न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च'' (श्वेता० ६।८) ति। ''अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स श्रृणोत्यकर्णः। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्'' (श्वेता० ३।१९) इति च।।

ननु–नास्ति तावज्ज्ञानप्रतिबन्धकारणवानीश्वरादन्यः संसारी; ''नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति विज्ञाते'' (बृह० ३।७।२३) इति श्रुतेः तत्र किमिदमुच्यते संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिः नेश्वरस्य–इति, अत्रोच्यते–सत्यं नेश्वरादन्यः संसारी, तथापि देहादिसङ्घातोपाधिसंबन्ध इष्यत एव घटकरकगिरिगुहाद्युपाधिसम्बन्ध इव व्योम्नः तत्कृतश्च शब्दप्रत्ययव्यवहारो लोकस्य दृष्टो घटच्छिद्रं करकादिच्छिद्रमित्यादिराकाशाव्यतिरेकेऽपि, तत्कृता चाकाशे घटाकाशादि-भेदमिथ्याबुद्धिर्दृष्टा तथेहापि देहादिसङ्घातोपाधिसम्बन्धाविवेककृतेश्वरसंसारिभेदमिथ्याबुद्धिः। दृश्यते चात्मन एव सतो देहादिसंघातेऽनात्मन्यात्मत्वाभिनिवेशो मिथ्याबुद्धिमात्रेण पूर्वेण। सति चैवं संसारित्वे देहाद्यपेक्षमीक्षितृत्वमुपपन्नं संसारिणः।।

यदप्युक्तम्–प्रधानस्यानेकात्मकत्वान्मृदादिवत्कारण- त्वोपपत्तिर्नासंहतस्य ब्रह्मण–इति, तत्प्रधान-स्याशब्दत्वेनैव प्रत्युक्तम्। यथा तु तर्केणापि ब्रह्मण एव कारणत्वं निर्वोढुं शक्यते, न प्रधानादीनाम्, तथा प्रपञ्चयिष्यति–''न विलक्षणत्वादि'' (ब्र० २।१।४) त्यादिना।।५।।

अत्राह–यदुक्तम्–नाचेतनं प्रधानं जगत्कारणम्; तदीक्षितृत्व श्रवणात् इति तदन्यथाप्युपपद्यते; अचेतनेऽपि चेतनवदुपचारदर्शनात्। यथा प्रत्यासन्नपतनतां नद्याः कूलस्यालक्ष्य कूलं पिपतिषतीत्यचेतनेऽपि कूले चेतनवदुपचारो दृष्टः, तद्वदचेतनेऽपि प्रधाने प्रत्यासन्नसर्गे चेतनवदुपचारो भविष्यति–''तदैक्षते'' ति। यथा लोके कश्चिच्चेतनः स्नात्वा भुक्त्वा चापराह्णे ग्रामं रथेन गमिष्यामीतीक्षित्वाऽनन्तरं तथैव नियमेन प्रवर्तते, तथा प्रधानमपि महदाद्याकारेण नियमेन प्रवर्तते।

तस्माच्चेतनवदुपचर्यते। कस्मात्पुनः कारणाद् विहाय मुख्यमीक्षितृत्वमौपचारिकं कल्प्यते? ''तत्तेज ऐक्षत'' ''ता आप ऐक्षन्त'' (छान्दो० ६।२।३,४) ति चाचेतनयोरप्यप्तेजसोश्चेतनवदुपचारदर्शनात्। तस्मात्सत्कर्तृकमपीक्षणमौपचारिकमिति गम्यते; उपचारप्राये वचनादिति।।

एवं प्राप्त इदं सूत्रमारभ्यते– *गौणश्चेन्नात्मशब्दात्*।।६।। यदुक्तम्–प्रधानमचेतनं सच्छब्दवाच्यम्, तस्मिन्नौपचारिक ईक्षतिरप्तेजसोरिव–इति, तदसत्; कस्मात्? आत्मशब्दात्। ''सदेव सोम्येदमग्र आसीदि''त्युपक्रम्य ''तदैक्षत'' ''तत्तेजोऽसृजत'' (छान्दो० ६।२।१,३)इति च तेजोऽबन्नानां सृष्टिमुक्त्वा तदेव प्रकृतं सदीक्षितृ तानि च तेजोऽबन्नानि देवताशब्देन परामृश्याह–''सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि'' (छान्दो० ६।३।२)इति।।?

तत्र यदि प्रधानमचेतनं गुणवृत्त्येक्षितृ कल्प्येत, तदेव प्रकृतत्वात् सेयं देवतेति परामृश्येत,न तदा देवता जीवमात्मशब्देनाभिदध्यात्। जीवो हि नाम चेतनः शरीराध्यक्षः प्राणानां धारयिता; तत्प्रसिद्धेर्निर्वचनाच्च। स कथमचेतनस्य प्रधानस्यात्मा भवेत? आत्मा हि नाम स्वरूपम्। नाचेतनस्य प्रधानस्य चेतनो जीवः स्वरूपं भवितुमर्हति। अथ तु चेतनं ब्रह्म मुख्यमीक्षितृ परिगृह्यते, तस्य जीवविषय आत्मशब्दप्रयोग उपपद्यते।।

तथा ''स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो'' (छान्दो० ६।१४।३) इत्यत्र स आत्मामेति प्रकृतं सदणिमानमात्मानमात्मशब्देनोपदिश्य ''तत्त्वमसि श्वेतकेतो'' इति चेतनस्य श्वेतकेतोरात्मत्वेनोपदिशति।।

अप्तेजसोस्तु विषयत्वादचेतनत्वम्; नामरूपव्याकरणादौ च प्रयोज्यत्वेनैव निर्देशात्। न चात्मशब्दवत् किंचिन्मुख्यत्वे कारणमस्ति, इति युक्तं कूलवद् गौणत्वमीक्षितृत्वस्य। तयोरपि च सदधिष्ठितत्वापेक्षमेवेक्षितृत्वम्। सतस्त्वात्मशब्दान्न गौणमीक्षितृत्वमित्युक्तम्।।६।।

अथोच्येताचेतनेऽपि प्रधाने भवत्यात्मशब्दः; आत्मनः सर्वार्थकारित्वात्, यथा राज्ञः सर्वार्थकारिणि भृत्ये भवत्यात्मशब्दो ममात्मा भद्रसेन इति। प्रधानं हि पुरुषस्यात्मनो भोगापवर्गौ कुर्वदुपकरोति राज्ञ इव भृत्यः सन्धिविग्रहादिषु वर्तमानः। अथवैक एवात्मशब्दश्चेतनाचेतनविषयो भविष्यति; भूतात्मेन्द्रियात्मेति च प्रयोगदर्शनात्, यथैक एव ज्योतिःशब्दः क्रतुज्वलनविषयः। तत्र कुत एतदात्मशब्दादीक्षतेरगौणत्वमिति? अत उत्तरं पठति– *तन्निष्ठस्य मोक्षोपदेशात्*।।७।।

न प्रधानमचेतनमात्मशब्दालम्बनं भवितुमर्हति; ''स आत्मे'' ति प्रकृतं सदणिमानमादाय ''तत्त्वमसि श्वेतकेतो'' इति चेतनस्य श्वेतकेतोर्मोक्षयितव्यस्य तन्निष्ठामुपदिश्य ''आचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये'' (छान्दो० ६।१४।२)इति मोक्षोपदेशात्।।

यदि ह्यचेतनं प्रधानं सच्छब्दवाच्यं तदसीति ग्राहयेन्मुमुक्षुं चेतनं सन्तमचेतनोऽसीति, तदा विपरीतवादि शास्त्रं पुरुषस्यानर्थायेत्यप्रमाणं स्यात्। न तु निर्दोष शास्त्रमप्रमाणं कल्पयितुं युक्तम्। यदि चाज्ञस्य सतो मुमुक्षोरचेतनमनात्मानमात्मेत्युपदिशेत्प्रमाणभूतं शास्त्रम्, स श्रद्दधानतयाऽन्धगोलाङ्गूलन्यायेन तदात्मदृष्टिं न परित्यजेत, तद्व्यतिरिक्तं चात्मानं न प्रतिपद्येत, तथा सति पुरुषार्थाद्विहन्येता अनर्थं च ऋच्छेत्।।

तस्माद्यथा स्वर्गाद्यर्थिनोऽग्निहोत्रादिसाधनं यथाभूतमुपदिशति, तथा मुमुक्षोरपि "स आत्मा तत्त्वमसि श्वेतकेतो" इति यथाभूतमेवात्मानमुपदिशतीति युक्तम्। एवञ्च सति तप्तपरशुग्रहणमोक्षदृष्टान्तेन सत्याभिसन्धस्य मोक्षोपदेश उपपद्येत; अन्यथा ह्यमुख्ये सदात्मतत्त्वोपदेशे "अहमुक्थमस्मीति विद्यादि" (ऐ० आर० २।१।२।६) तिवत्सम्पन्मात्र- मिदमनित्यफलं स्यात्। तत्र मोक्षोपदेशो नोपपद्येत। तस्मान्न सदणिमन्यात्मशब्दस्य गौणत्वम्।।

भृत्ये तु स्वामिभृत्यभेदस्य प्रत्यक्षत्वादुपपन्नो गौण आत्मशब्दो ममात्मा भद्रसेन इति। अपि च क्वचिद् गौणः शब्दो दृष्ट, इति नैतावता शब्दप्रमाणकेऽर्थे गौणी कल्पना न्याय्या; सर्वत्रानाश्वासप्रसङ्गात्।।

यत्तूक्तम्—चेतनाचेतनयोः साधारण आत्मशब्द क्रतुज्वलनयोरिव ज्योतिःशब्दः—इति, तन्न; अनेकार्थत्वस्यान्याय्यत्वात्। तस्माच्चेतनविषय एव मुख्य आत्मशब्दश्चेतनत्वोपचाराद् भूतादिषु प्रयुज्यते भूतात्मेन्द्रियात्मेति च। साधारणत्वेऽप्यात्मशब्दस्य न प्रकरणमुपपदं वा किञ्चिन्निश्चायकमन्तरेणान्यतरवृत्तिता निर्धारयितुं शक्यते। नचात्राचेतनस्य निश्चायकं किंचित् कारणमस्ति। प्रकृतं तु सदीक्षितृ। संनिहितश्चेतनः श्वेतकेतुः। न हि चेतनस्य श्वेतकेतोरचेतन आत्मा संभवतीत्यवोचाम। तस्माच्चेतनविषय इहात्मशाब्दा इति निश्चियते। ज्योतिःशब्दोऽपि लौकिकेन प्रयोगेण ज्वलन एव रूढः, अर्थवादकल्पितेन तु ज्वलनसादृश्येन क्रतौ प्रवृत्तः, इत्यदृष्टान्तः।।

अथवा—पूर्वसूत्र एवात्मशब्दं निरस्तसमस्तगौणत्वसाधारणत्वशङ्कतया व्याख्याय ततः स्वतन्त्र एव प्रधानकारणनिराकरणहेतुर्व्याख्येयः—"तन्निष्ठस्य मोक्षोपदेशादि" ति। तस्मान्नाचेतनं प्रधानं सच्छब्दवाच्यम्।।७।।

कुतश्च न प्रधानं सच्छब्दवाच्यम्—*हेयत्वावचनाच्च*।।८।। यद्यनात्मैव प्रधानं सच्छब्दवाच्यं "स आत्मा तत्त्वमसी"तीहोपदिष्टं स्यात्, स तदुपदेशश्रवणादनात्मज्ञतया तन्निष्ठो मा भूदिति मुख्यमात्मानमुपदिदिक्षुस्तस्य हेयत्वं ब्रूयात्। यथाऽरुन्धतीं दिदर्शयिषुस्तत्समीपस्थां स्थूलां ताराममुख्यां प्रथममरुन्धतीति ग्राहयित्वा तां प्रत्याख्याय पश्चादरुन्धतीमेव ग्राहयति, तद्वन्नायमात्मेति ब्रूयात्। न चैवमवोचत् सन्मात्रात्मावगतिनिष्ठैव हि षष्ठप्रपाठकपरिसमाप्तिदृश्यते।।

च-शब्दः प्रतिज्ञाविरोधाभ्युच्चयप्रदर्शनार्थः। सत्यपि हेयत्ववचने प्रतिज्ञाविरोधः प्रसज्येत।

कारणविज्ञानाद्धि सर्वं विज्ञातमिति प्रतिज्ञातमा ''उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति कथं नु भगवः स आदेशो भवतीति तथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्। एवं सोम्य स आदेशो भवती'' (छा० ६।१।१,३) इति वाक्योपक्रमे श्रवणात्। न च सच्छब्दवाच्ये प्रधाने भोग्यवर्गकारणे हेयत्वेनाहेयत्वेन वा विज्ञाते भोक्तृवर्गो विज्ञातो भवति; अप्रधानविकारत्वाद् भोक्तृवर्गस्य। तस्मान्न प्रधानं सच्छब्दवाच्यम्।।८।।

कुतश्च न प्रधानं सच्छब्दवाचम्– *स्वाप्ययात्*।।९।। तदेव सच्छब्दवाच्यं कारणं प्रकृत्य श्रूयते–''यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवती'' (छा० ६।८।१) ति। एषा श्रुतिः स्वपितीत्येतत् पुरुषस्य लोकप्रसिद्धं नाम निर्वक्ति। स्वशब्देनेहात्मोच्यते यः प्रकृतः सच्छब्दवाच्यस्तमपीतो भवति, अपिगतो भवतीत्यर्थः। अपिपूर्वस्यैतेर्लयार्थत्वं प्रसिद्धम्; प्रभवाप्ययावित्युत्पत्तिप्रलययोः प्रयोगदर्शनात्। मनःप्रचारोपाधिविशेषसंबन्धादिन्द्रियार्थान् ग्रहन् स्तद्विशेषा पन्ना जीवो जागर्ति। तद्वासनाविशिष्टः स्वप्नानृपश्यन् मनःशब्दवाच्यो भवति। स उपाधिद्वयोपरमे सुषुप्तावस्थायामुपाधिकृतविशेषाभावात् स्वात्मनि प्रलीन इवेति ''स्वं ह्यपीतो भवती''-त्युच्यते। यथा हृदयशब्दनिर्वचनं श्रुत्या दर्शितम्–''स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृद्ययमिति तस्मादेहृदयमिती'' (छा० ८।३।३)ति। यथा वाऽशनायोदन्याशब्दप्रवृत्तिमूलं दर्शयति श्रुतिः–''आप एव तदशितं नयन्ते तेज एव तत्पीतं नयत'' (छा० ६।८।३,५) इति च, एवं स्वमात्मानं सच्छब्दवाच्यमपीतो भवतीतीममर्थं स्वपितिनामनिर्वचनेन दर्शयति। न च चेतन आत्माऽचेतनं प्रधानं स्वरूपत्वेन प्रतिपद्येत। यदि पुनः प्रधानमेवात्मीयत्वात्स्वशब्देनैवोच्येत, एवमपि चेतनोऽचेतनमप्येतीति विरुद्धमापद्येत। श्रुत्यन्तरं च–''प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम्'' (बृह० ४।३।२१) इति सुषुप्तावस्थायां चेतनेऽप्ययं दर्शयति। अतो यस्मिन्नप्ययः सर्वेषां चेतनानाम्, तच्चेतनं सच्छब्दवाच्यं जगतः कारणम्, न प्रधानम्।।९।।

कुतश्च न प्रधानं जगतः कारणम्– *गतिसामान्यात्*।।१०।।

यदि तार्किकसमय इव वेदान्तेष्वपि भिन्ना कारणावगतिरभविष्यत्–क्वचिच्चेतनं ब्रह्म जगतः कारणम्, क्वचिदन्यदेवेति, ततः कदाचित् प्रधानकारणवादानुरोधेनापीक्षत्यादिश्रवणमकल्पयिष्यत्। न त्वेतदस्ति। समानैव हि सर्वेषु वेदान्तेषु चेतनकारणावगतिः। ''यथाऽग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो

लोकाः'' (कौ० ३।३) इति। ''तस्माद्वा एतस्मादात्मन आकाशः संभूत'' (तै० २।१) इति। ''आत्मन एवेदं सर्वम्'' (छा० ७।२।६।१) इति। 'आत्मन एष प्राणो जायत'' (प्र० ३।३) इति चात्मनः कारणत्वं दर्शयन्ति सर्वे वेदान्ताः। आत्मशब्दस्य चेतनवचन इत्यवोचाम। महच्च प्रामाण्यकारणमेतत् यद् वेदान्तवाक्यानां चेतनकारणत्वे समानगतित्वं चक्षुरादीनामिव रूपादिषु। अतो गतिसामान्यात् सर्वज्ञं ब्रह्म जगतः कारणम्।।१०।।

कुतश्च सर्वज्ञं ब्रह्म जगतः कारणम्?–*श्रुत्वाच्च*।।११।। स्वशब्देनैव च सर्वज्ञ ईश्वरो जगतः कारणमिति श्रूयते श्वेताश्वतराणां मन्त्रोपनिषदि सर्वज्ञमीश्वरं प्रकृत्य ''स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः'' (श्वे० ६।९) इति। तस्मात्सर्वज्ञं ब्रह्म जगतः कारणम्, नाचेतनं प्रधानम्, अन्यद्वा–इति सिद्धम्।।११।।

इति शाङ्करभाष्यम् पञ्चममीक्षत्यधिकरणम् समाप्तम्।

वार्तिकम्

एवं तावत् वेदान्तानामप्रतिपादकत्वान्यपरत्वनिष्प्रयोजनत्वलक्षणमप्रामाण्यं परिहृतम्–''तत्तु समन्वयादि''ति। संम्प्रत्यनुवादकत्वलक्षणाप्रामाण्यपरिहारार्थमारम्भः–''ईक्षतेर्नाशब्दमि''ति।।

यद्वा–एवं तावत्–''सत्यं ज्ञानमनन्तं ब्रह्म'' ''तस्माद्वा एतस्मादात्मन आकाशः संभूतः'' ''यतो वा इमानि भूतानि जायन्ते'' ''सदेव सोम्येदमग्र आसीत्'' तदैक्षत बहु स्यां प्रजायेय तत्तेजोऽसृजत'' ''सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति'' ''स आत्मा तत्त्वमसी'' त्यादिवेदान्तवाक्यानां ब्रह्मावगतिप्रयोजनानां तात्पर्येण तदवगतिजननसमर्थानां कार्यान्वयं विनैव ब्रह्मबोधकत्वमुक्तम्। तथाच प्रतिज्ञातस्य ब्रह्मणः सर्वज्ञत्वसर्वशक्तित्वाभ्यां जगदुत्पत्तिस्थितिनाशकारणत्वेन लक्षितस्य शास्त्रप्रमाणकत्वमखण्डितं सिद्धं भवति। सिद्धे च शास्त्रप्रमाणके सर्वज्ञे सर्वशक्तौ जगदुत्पत्त्यादिकारणे ब्रह्मणि तस्य सद्रूपत्वमर्थसिद्धं भवति; असत उक्तरूपेण जगदुत्पत्यादिहेतुत्वानुपपत्तेः कारणत्वस्य सत्त्वनियतत्वात्, असतस्तुच्छत्वात्, ''कुतस्तु सोम्यासतः सज्जायेते''ति श्रुत्यैव स्पष्टतयाऽसत्कारणत्वस्य निराकृतत्वाच्च। अतः सन्देहाभावाद् न तस्य सद्रपत्वं पृथग् विचारणीयम्, चिद्रूपत्वानन्दरूपत्वे तु विचारणीये; सन्देहसत्त्वात्।।

ननु–''शास्त्रयोनित्वादि''त्यनेन ब्रह्मणः सर्वज्ञत्वे सिद्धे कथं चिद्रूपत्वेऽपि सन्देह इति–चेत्, न; वक्ष्यमाणरीत्या परकल्पिते प्रधाने जडेऽपि सर्वज्ञत्वशङ्कासंभवात् तावता ब्रह्मणस्तदाशङ्का निवृत्तिं विना चिद्रपत्वासिद्धेः, अतस्तच्चिद्रूपत्वसिद्ध्यर्थमर्थाच्च वेदान्तानामनुवादकत्वलक्षणाप्रामाण्य परिहारार्थमेतदधिकरणम्–''ईक्षतेर्नाशब्दमि''ति।। आनन्दरूपत्वसिद्ध्यर्थ च–''आनन्दमयोऽभ्या-सादि'' त्यधिकरणं भविष्यति; तदधीनसिद्धिकत्वाद् विषयप्रयोजनयोः। यदि हि जगत्कारणस्य ब्रह्मणश्चिद्रपत्वं सिद्ध्यति, तदा चिद्रूपस्यात्मनस्तदैक्यं सिद्ध्यति; अन्यथा जडाजडयोरैक्यानुपपत्तेर्विषयाभावात् शास्त्रानारम्भ एव स्यात्। एवं तदानन्दरूपत्वाभावे परमानन्दावाप्तिलक्षणप्रयोजनासिद्ध्या शास्त्रानारम्भ एव स्यात्। तदेतच्छास्त्रारभस्य पुनराक्षेपेणाधिकरणद्वयं प्रवर्तते।।

तत्रैवं तावदत्र सन्दिह्यते—किमुक्तलक्षणं सर्वज्ञं सर्वशक्तिकं च ब्रह्माचेतनम्, किं वा चेतनमिति। तदर्थमेवं विचारयितव्यम्—ब्रह्मणो यत् श्रुति-स्मृति-न्यायैस्सर्वैः—''शास्त्रयोनित्वादि''त्यत्र सिद्धं सर्वज्ञत्वम्—सर्वविषयज्ञानकत्वम्, किं वा सवितृप्रकाशवत् सर्वसाक्षिज्ञानैकस्वरूपत्वमिति। तदर्थमेतद्र विचारणीयम्—किं सत्त्ववृत्तीनामग्न्यौष्ण्यवत् स्वाभाविकं ज्ञानत्वम्, किं कदाचित्, दहतीति वदन्योपाधिकमिति। अन्योपाधिकृतत्वेऽप्येतद् विचारणीयम्—किं ''तदैक्षत बहु स्यां प्रजायेये'' त्यादिश्रुतौ श्रूयमाणं जगत्कर्तुरीक्षणं भाक्तम्, किं वा मुख्यमिति। एते पक्षाः सहैव विचारयिष्यन्ते। तत्र यदि पूर्वकोटीनां सिद्धिः, तदा ब्रह्मणोऽचेतनत्वात् साङ्ख्यानुमानसिद्धप्रधानस्य तथात्वात् तदेव जगत्कारणमनुमानसिद्धं प्रधानाख्यं ब्रह्म वेदान्तैरूपासनार्थमनूद्यते इति न शास्त्रविषयसिद्धिः। तन्निराकरणेनोत्तरकोटीनां सिद्धौ च विषयसिद्धिः।

तदेतद् दर्शयितुं यस्मिन् शास्त्रे प्रतिपक्षिणो यथा वा प्रवर्तन्ते, तान् तथैव दर्शयति भाष्यकार— *साङ्ख्यादयस्तु परिनिष्ठितं वस्तु प्रमाणान्तरगम्यमेवेति मन्यमानाः प्रधानादीनि कारणान्तरा कारणान्तराण्यनुमिमानास्तत्परतयैव वेदान्तवाक्यानि योजयन्ति। सर्वेष्वेव तु वेदान्तवाक्येषु सृष्टिविषयेष्वनुमानेनैव कार्येणैव कारणं लिलक्षयिषितम्—इति*।। तैरिति शेषः। तेषामवान्तरमतभेदमाह— *प्रधानपुरुषसंयोगा नित्यानुमेया इति साङ्ख्या मन्यन्त इति*।। प्रधानपुरुषसंयोगानां बहुत्वं च पुरुषबहुत्वादिति मन्तव्यम्। आदिशब्दपरिगृहीतवाद्यन्तरमत-मुपन्यस्यति— *काणादास्त्वेतेभ्य एव वाक्येभ्य ईश्वरं निमित्तकारणमनुमिमते, अणूंश्च समवायिकारणमिति*। वाच्यवाचकयोरविनाभावात् शब्दप्रमाणस्य तन्मतेऽनुमानेऽन्तर्भावाद् धूमेनेव वह्निं जगत्कारणवाचकश्रुतिवाक्यैरीश्वरं निमित्तकारणम्=तत्कर्तारमनुमिमते वैशेषिकाः। ते तमनुमाय च तद्व्यापारविषयं कार्यसजातीयसमवायिकारणं त्रसरेणोरवयवाः, सावयवाः, महदारम्भकत्वात्, कपालादिवत्—इत्यनुमानान्तरैश्चतुर्विधपरमाणूननुमिमत इत्यर्थः। एवमन्येऽपि=विज्ञानशून्यवादिप्रभृतय इत्यर्थः। इहोत्तिष्ठन्ति=इह शास्त्रेषत्थिता भवन्तीत्यर्थः। तत्र=तेषां व्युत्थाने सतीत्यर्थः। आचार्येण=सूत्रकारेणेत्यर्थः। *निराक्रियन्ते*।। यथावसरमिति शेषः। ननु—यदि नामोक्तरीत्या पूर्वपक्षवादिनां वाक्याभासयुक्त्याभासप्रतिपत्तीनां यथावसरमस्मिन् शास्त्रे निराकरणमिष्टम्; तन्निराकरणमन्तरा वेदान्तानां ब्रह्मावगतिपरत्वस्य दर्शयितुमशक्यत्वात्, अस्मिन्नधिकरणे तु कस्य पूर्वपक्षिणो वाक्याभासयुक्त्याभासप्रतिपत्तिनिराकरणम्? तत्राह— *तत्र साङ्ख्याः प्रधानं त्रिगुणमचेतनं जगतः कारणमिति मन्यमाना आहुरिति*।। तत्र=तेषु पूर्वपक्षवादिषु मध्य इत्यर्थः।।

अत्र केचिद् व्याख्यातारो हि 'उत्तिष्ठन्ती'ति भाष्यं दृष्ट्वा वैशेषिकादयोऽपि साङ्ख्यवदस्मिन्नधिकरणेऽचेतनजगदुपादानवादान्तर्गतत्वात् पूर्वपक्षिणो भवन्तीत्यभिप्रायेण भाष्यं योजयन्ति।।

तद् न साधुः अग्रे पूर्वपक्षभाष्ये साङ्ख्यानामिवान्येषां मतानुपन्यासात्, सिद्धान्तसूत्रैश्च साङ्ख्यमतवन्मतान्तरानिराकरणात्। न च–उपलक्षणपरे सूत्रभाष्ये मतान्तरस्य निराकरणे भविष्यतः, अचेतनोपादानपक्षनिविष्टत्वेन समानयोगक्षेमत्वात्तस्येति–वाच्यम्; अचेतनोपादानवादित्वेऽपि तेषां प्रकृतसंशयकोट्यस्पर्शित्वात् समानयोगक्षेमत्वासिद्धेः। न ह्युक्तलक्षणस्य ब्रह्मणश्चेतनाचेतनत्वविकल्पे प्रधानवत् परमाण्वादीनामन्तर्भावः संभवति; सर्वज्ञत्वादिगुणसंभावनाया अभावात् तेषाम्। प्रधानस्य तु सत्त्वगुणयोगेन तत्संभावनोपपत्तिं पूर्वपक्षे दर्शयिष्यामः। "ता आप ऐक्षन्ते"तिवदुपचारात् परमाण्वादिष्वपि सर्वज्ञत्वं संभावयिष्यतीति चेत्, न; उपचारस्यापि गुणयोगापेक्षणात्, "ता आप ऐक्षन्ते"त्यादौ ब्रह्मकारणकापां ब्रह्मण इव चेतनत्वाद् अबादिभावापन्नत्वात् कार्यकारणयोरभेदेनोपचारोपपत्तिः, प्रधानकारणिकानामपि सत्त्वगुणस्य ज्ञानपरिणतिसत्त्वात् तदभिन्नस्य प्रधानस्य तत्कार्यस्य चाबादेरूपचारोपपत्तिः, न तथा परमाण्वादिषु जगदुपादानेषु तत्कार्येषु च जलादिषु तन्मत उपचारे किञ्चिद् निमित्तमस्ति। अतो नोपचारकल्पनयापि तन्मते तत्संभावनोपपत्तिः। एतेन–उक्तलक्षणं ब्रह्म किं निमित्तकारणमेव, किं वोपादानमपि? यदा तु निमित्तमेव, तदा परमाण्वादि उपादानान्तरं भविष्यतीति संशयान्तरं कृत्वा तद्वादानां पूर्वपक्षेऽन्तर्भाव इति–अपास्तम्; सूत्रभाष्याभ्यामत्र ब्रह्मण उपादानत्वस्यासाधनात्, चेतनमात्रस्यैव साधितत्वात्, "जन्माद्यस्य यत" इत्यनेन तदुपादानत्वस्य साधितत्वाच्चात्रापि पुनस्तत्साधने पौनरुक्त्यापत्तेः। न च–निमित्तत्वामात्रं जन्मादिसूत्रे साधितम्, अत्र तु तदुपादानत्वमिति न पौनरुक्त्यमिति–वाच्यम्; निमित्तत्वमात्रसाधन आदिग्रहणवैयर्थ्यापत्तेः, लक्षणासिद्धेश्च, अतिव्याप्त्यव्याप्त्योरुक्तत्वात्। तत्र श्रुतिसिद्धं ब्रह्म, लक्षणमात्रत्वेन तत्सूत्रितम्, न तु परीक्षितम्, इह तु तत् परीक्ष्यते; अतो न पौनरुक्त्यमिति चेत्, न; एवमपि "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादि"त्यनेन पौनरुक्त्यावश्यकत्वात्। तस्मात् यथाव्याख्यातमेव भाष्यं गमयितव्यम्॥

प्रकृतमनुसरामः। तत्र=साङ्ख्यमते कार्यानुमेयं त्रिगुणं प्रधानमचेतनम्, तदेव सर्ववेदान्तैर्जगत्कारणमुच्यते। यानि हि वेदान्तवाक्यानि सर्वज्ञस्य सर्वशक्तेर्ब्रह्मणो जगत्कारणत्वं तात्पर्येण प्रदर्शयन्तीत्युच्यते भवता–"तत्तु समन्वयादि"ति, न तैर्वाक्यैर्भवदभिमतं सर्वस्यात्मभूतं चेतनं ब्रह्म प्रदर्श्यते। किं तर्हि? कार्यानुमेयं त्रिगुणमचेतनं प्रधानाख्यं ब्रह्म तैरनूद्यते; वक्ष्यमाणरीत्या तस्य सर्वज्ञत्वादिसंभवात्। तथाच भवदभिमतब्रह्मणोऽशब्दत्वाद् न शास्त्रप्रमाणकत्वसिद्धिः। कथं पुनः कार्यानुमेयं त्रिगुणं प्रधानमचेतनं प्रधानम्? कथं वा वेदान्तवाक्यैस्तदनूद्यत इति? उच्यते; लोके तावत् सर्वे भावाः कार्यभूताः सुखदुःखमोहान्विता अचेतनाश्च दृश्यन्ते। तथाहि–मैत्रदारेषु पद्मावत्यां मैत्रस्य सुखं दृश्यते; तं प्रति तस्याः सत्त्वगुणोद्रेकात्। तत्सपत्न्याश्च दुखम्; तां प्रति तस्या रजोगुणोद्रेकात्,

तामविन्दतश्चैत्रस्य मोहः, तं प्रति तस्यास्तमोगुणोद्रेकात्, इति सुखदुःखमोहजनकत्वात् त्रिगुणात्मिका, अत एवाचेतना च पद्मावतीत्यध्यवसीयते। एतया सर्वे भावा व्याख्याता द्रष्टव्याः। यद्धि यदन्वितं नियमेन लोके दृष्टम्, तत् तस्योपादानमित्यध्यवसीयते। तथाहि नियमेन मृदन्वितो घटो दृष्ट इति मृत् तस्योपादानमित्यध्यवसीयते। सुखदुःखमोहान्वितं जगद् नियमेन दृश्यते, सुखदुःखमोहात्मकं च त्रिगुणं प्रधानम्, इत्यनुमानात् प्रधानस्य जगदुपादानत्वसिद्धिः। ननु—विषयेभ्यः सुखदुःखादिकं जायमानमपि बुद्धौ जायते। तथाच बुद्धेरेव सुखदुःखाद्यात्मकत्वम्, न विषयाणामिति—चेत्, न; विषयाणामेवेन्द्रियादिद्वारा बुद्ध्यभेदं प्राप्य सुखदुःखादिरूपेण परिणामादिति साङ्ख्यसिद्धान्तात्, अन्यथा विषयाणां तदहेतुत्वापत्तेः निमित्तस्य साङ्ख्यैः कारणत्वानभ्युपगमात्, उपादानमात्रस्यैव कारणत्वाङ्गीकारात्। तथाचोक्तम्—''निमित्तम् प्रयोजकम्; प्रकृतीनां परिणामभेदस्तु तत्संनिकर्षादि''ति। तस्मात् जगतः सुखदुःखमोहात्मकत्वात् सिद्धमनुमानात् प्राधानिकत्वमिति। एवं च सति तदेव त्रिगुणमचेतनमनुमानसिद्धं स्वकार्यं प्रति स्वतन्त्रत्वात् प्रधानम्; सर्वकार्यान्वयाच्च ब्रह्म जगत्कारणवादिनीभिः श्रुतिभिरनूद्यत इति युक्तम्। ननु—''एष सर्वेश्वरः'' ''सर्वस्य वशी सर्वस्येशानः'' ''एष विधारणः'' ''सन्मूलाः सोम्येमाः प्रजास्सदायतनाः सत्प्रतिष्ठा'' ''यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः'' ''तदैक्षत बहु स्यां प्रजायेये'' त्यादिभिः श्रुतिभिः सर्वशक्तिसमन्वितं सर्वेश्वरं सर्वज्ञं ब्रह्म जगत्कारणमुच्यते, साङ्ख्यानुमानसिद्धं तु त्रिगुणमचेतनं प्रधानम्। न च तस्मिन् सर्वशक्तित्वादिगुणयोगः संभवति; तस्य चेतनधर्मत्वेन लोकप्रसिद्धत्वात, महाभागधेयेषु चेतनावत्सु योगिषु तद्धर्मदर्शनात्, अतो भिन्नविषयत्वाद् नानुमानसिद्धस्यानुवादकत्वं श्रुतीनामिति—चेत् मैवम्; अनुमानसिद्धेऽपि प्रधाने सर्वशक्तित्वादिसंभवात्। तथाहि—

कारणात् सर्वकार्यस्य तन्नियन्तृत्वकारणात्।
सत्त्वयोगात् प्रधानं स्यात् सर्वज्ञं सर्वशक्ति च॥

यत् त्वयोक्तम्—सर्वशक्तित्वादिगुणविशिष्टजगत्कारणब्रह्मप्रतिपादकश्रुतीनां नानुमानसिद्ध-प्रधानानुवादकत्वम्; तद्गुणानां तत्रासंभवात्—इति, तन्न; तत्रापि सर्वशक्तित्वादेः संभवात्। प्रधान हि सर्वकार्योपादानत्वेन सर्वकर्तृत्वात् सर्वशक्ति, तन्नियन्तृ च; उपादानेन मृदादिना घटादेर्नियमदर्शनात्। अत एव सर्ववशित्वम्, सर्वेश्वरत्वं च तस्य; कार्यस्य कारणवशेन वर्तनात्। स्वकार्ये प्रतीशितृत्वात् प्राधान्यम्। सर्वज्ञत्वमपि तस्य सत्त्वगुणभेदात्, सत्त्वस्य सर्वज्ञानकर्तृत्वात्, ''सत्त्वात् सञ्जायते ज्ञानम्''इति स्मृतेः, सर्वज्ञानकर्तृत्वस्यैव सर्वज्ञत्वात्, नित्यचैतन्यमात्रस्य तत्वेऽतिप्रसङ्गात्। अत उपपद्यते श्रुतीनामनुमानसिद्धानुवादकत्वमिति। तदेतत्सर्वमाह—*यानि वेदान्तवाक्यानीत्यादिना*।। ननु—उक्तं चेतनेष्वेव महाभागधेयेषु योगिषु सर्वज्ञत्वादिधर्मः प्रसिद्धः, नाचेतनेषु मृदादिकारणेष्विति, तत्राह—*तेन

च सत्त्वधर्मेण ज्ञानेनेति*।। चकारोऽवधारणे। व्याख्याव्याख्येयभावेन तृतीयात्रयं समानाधिकृतं द्रष्टव्यम्। मृदादिषु तमसा सत्त्वस्याभिभवाद् न ज्ञानगुणपरिणाम इत्यभिप्रायः। ननु–चिन्मात्रस्वभावत्वात् पुरुषस्य स्वतस्तस्य सर्वज्ञत्वप्रसिद्ध्युपपत्तेर्न सत्त्वोत्कर्षनिमित्तं तदिति, नेत्याह–*न केवलस्याकार्यकरणस्येति*।। अतिप्रसङ्गादिति भावः। ननु–भवतु नाम सत्त्वोत्कर्षः सर्वज्ञत्वम्, तथापि सर्गाद्यकाले प्रधानस्य तन्नोपपद्यते; गुणत्रयसाम्यावस्थाया एव प्रधानत्वाभ्युपगमात्, सत्त्वोत्कर्षदशायां तु प्रधानत्वव्याहतेरिति–चेत्, तत्राह–*त्रिगुणत्वात् प्रधानस्येति*।। तत्काले सर्वज्ञानपरिणामाभावेऽपि तच्छक्तिकत्वात् तस्यापि सत्त्वशक्तिशक्ययोरभेदमुपचर्य वेदान्तेषु तत्सर्वज्ञत्वमुच्यत इत्यर्थः। ननु–मुख्यार्थे संभवत्युपचारो न युक्तः, मन्मते च ब्रह्मणोऽस्ति तत्; ज्ञानत्वेन मुख्यार्थसंभवादिति, नेत्याह–*अवश्यं त्वयापीति*।। कुत इति चेत्, तत्र वक्तव्यम्–किं नित्य सर्वविषयज्ञानकत्वात् ब्रह्म सर्वज्ञमुच्यते, किं वा नित्यज्ञानत्वात्। नाद्यः; सर्गाद्यकाले तत्कारणशरीराद्यभावेन तदनुपपत्तेर्ब्रह्मणः सर्वज्ञत्वानुपपत्तेरित्याह–*न हीति*।। नापि द्वितीय इत्याह–*तथाहि–ज्ञानस्य नित्यत्वादिति*।। तथाच–''तदैक्षत बहु स्यां प्रजायेये''त्यादिश्रुतिव्याकोप इत्याशयः। अथ ज्ञानक्रियायां ब्रह्मणः स्वातन्त्र्यश्रुतिपरिहाराय ज्ञानं जन्यमभ्युपेतव्यम्, तर्हि जन्यस्यानित्यत्वेन कदाचिदुपरमसंभवात् तत्काले तच्छक्तिसत्त्वेनैव ब्रह्मणः सर्वज्ञत्वमायातमित्याह–*अथानित्यमित्यादिना*।। न हीत्यनेनोक्तप्रथमपक्षस्यैव विवरणम्। *अपिच प्रागुत्पत्तेरित्यादि*।। एतेन–सत्त्ववृत्तेर्ज्ञानत्वमन्यचैतन्योपाधिकमेव; स्वतो जडायास्तस्याः स्वविषयप्रकाशकत्वासंभवाद् ज्ञानत्वानुपपत्तेः। यदुपाधिकं च तस्या ज्ञानत्वम्, तदेव मुख्यं ज्ञानं श्रुतौ श्रूयत इति–अपास्तम्; तज्ज्ञानं प्रति ब्रह्मणः स्वातन्त्र्यानुपपत्तेरुक्तत्वात्, प्रदीपादिवद् जडस्यापि विज्ञानस्य विषयप्रकाशकत्वोपपत्तेर्मख्यज्ञानत्वाविरोधात्, विरोधे वा तस्यैवोपचरितस्य श्रुत्या गृहीतत्वात्, अन्यथा प्रत्ययार्थस्य स्वातन्त्र्यस्य बाधापत्तेरिति। इतश्च चेतनं ब्रह्म जगत्कारणत्वेन न वेदान्तैः प्रतिपाद्यते, तस्यासंहतत्वेन तत्कारणत्वासंभवात्, प्रधानस्य तु त्रिगुणताकत्वेन संहतत्वात् तदुपपत्तेस्तदेव वेदान्तैरनूद्यत इत्याह–*अपिच प्रधानस्य चेति*।। चकारोऽवधारणार्थोऽनेकात्मकस्येत्यनेन सम्बध्यते। तस्माद् न ब्रह्मणः शब्दवत्त्वमस्तीति।।

एवं प्राप्ते ब्रूमः–*ईक्षतेर्नाशब्दम्*इति।।५।। न चेतनं ब्रह्म अशब्दम्=वेदान्ताप्रतिपाद्यं भवितुमर्हति। कुतः? ईक्षतेः=ईक्षितृत्वेन तेषु श्रुतत्वादित्यर्थः।। यद्वा–न वेदान्तेषु श्रूयमाणं जगत्कारणम् अशब्दं परपरिकल्पितं नित्यानुमेयं प्रधानं भवितुमर्हति। कुतः? ईक्षतेः=ईक्षितृत्वेन तेषु श्रुतत्वादिति पूर्ववत्।। यद्वा–''अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्। अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यत'' इति मन्त्रपठितमशब्दम्, न परपरिकल्पितमचेतनं प्रधानं भवितुमर्हति,

ईक्षतेरिति पूर्ववत्।। यद्वा—न्यायद्वयप्रदर्शकमेतत् सूत्रम्। तथाहि—न साङ्ख्यपरिकल्पितमचेतनं प्रधानं जगतःकारणं भवितुमर्हति, वेदान्तेष्वश्रुतत्वात्। न वेदान्तश्रुतं जगत्कारणम्, साङ्ख्यपरिकल्पितं भवितुमर्हति, ईक्षतेरिति पूर्ववत्। नच—तस्याश्रुतत्वेऽप्यनुमानात् सिद्धिरिति—वाच्यम्; अनुमानस्य जगत्कारणसामान्यगमकत्वेऽपि विशेषागमकत्वादित्युक्तम्—''जन्माद्यस्य यत''इत्यत्र। वक्ष्यते चाविरोधलक्षणे। तदेतेषां सूत्रव्याख्यानानामन्तिमं व्याख्यानमनुसृत्य भाष्यकार आह—*न साङ्ख्यपरिकल्पितं प्रधानमचेतनं जगत्कारणम्, शक्यं वेदान्तेष्वाश्रयितुमिति*।। युगपत्साध्यद्वयनिर्देशः। तत्र न साङ्ख्यपरिकल्पितं प्रधानमचेतनं जगतः कारणमिति प्रथमहेतौ साध्यनिर्देशः। तत्र शक्यं वेदान्तेष्वाश्रयितुमिति द्वितीयहेतावनुपङ्गेन तन्निर्देश इति द्रष्टव्यम्। सूत्रापेक्षितं पूरयन् प्रथमप्रतिज्ञायां हेतुमाह—*अशब्दं हि तदिति*।। भिन्नवाक्यत्वं मा भूदित्यभिप्रेत्यासिद्धोऽयं हेतुरित्याशङ्कामुत्थाप्य द्वितीयप्रतिज्ञायां हेतुमाह—*कथमशब्दत्वम्? ईक्षतेः, ईक्षितृत्वश्रवणात् कारणस्येति*।। तदेव प्रश्नपूर्वकं वेदान्तेषु दर्शयति—*कथमित्यादिना*।। तत्र=छान्दोग्यषष्ठप्रपाठक इत्यर्थः। प्रधानस्यैव सच्छब्दवाच्यस्योक्तरीत्या गौणमीक्षणं भविष्यति। तथाच प्रधानेऽप्युपपद्यत इयं श्रुतिरित्याशङ्क्य ''गौणश्चेन्नात्मशब्दात्''इति वक्ष्यमाणन्यायं सूत्रयन् तत्समानार्थकं श्रुत्यन्तरमुदाहरति—*तथाऽन्यत्रेति*।। ऐतरेयक इत्यर्थः। ममात्मा भद्रसेन इतिवदात्मनः सर्वार्थकारिणि प्रधान आत्मशब्दोऽपि गौणो भविष्यतीत्याशङ्कायाम्—''तन्निष्ठस्य मोक्षोपदेशादि''ति सूत्रोपात्तन्यायं सूचयन् श्रुत्यन्तरमुदाहरति—*क्वचित्तु षोडशकलं पुरुषां प्रस्तुत्याहेति*।। प्रश्नोपनिषदि हि—''इहैवान्तःशरीरे सोम्य स पुरुषो यस्मिन्नेताः षोडश कलाः प्रभवन्तीति। स ईक्षाञ्चके कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति। स प्रमाणसृजत प्राणात् श्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु नाम चे''ति पठ्यते। न चेहेक्षणपुरुषशब्दयोर्गौणत्वसंभावनापि कर्तुं शक्यत इत्यभिप्रायः। हेतोर्व्यधिकरणत्वेन स्वरूपासिद्धिं वारयति—*ईक्षतेरिति चेति*।। विषयिणा धातुना विषयमुपलक्ष्यैष निर्देशः कृत इत्यभिप्रायः। दृष्टा चैषा लक्षणाऽन्यत्रापीत्याह—*यजतेरितिवदिति*।। ननु—एवं तर्हि सूत्रकारेण किमितीक्षतेरीक्षितृत्वादिति वा साक्षादीक्षणनिर्देशं परित्यज्य लक्षणया तन्निर्देशः कृत इति—चेत, न; सर्वेषु वेदान्तेषु जगत्कारणस्य श्रुतज्ञानमात्रपरिग्रहार्थमित्याह—*तेन यस्सर्वज्ञ इति*।। लक्षणया धात्वर्थनिर्देशकरणेनेत्यर्थः।।

वस्तुतस्तु—नात्र लक्षणाऽग्रहेऽपि कश्चिद् दोषः, शब्दस्यापि स्वाभिधेयचेतनव्याप्यत्वेन हेतुत्वोपपत्तेः। अत एवाग्रेऽपि सूत्रकारस्तस्यैव गौणत्वमाशङ्क्य—''आत्मशब्दादि'' त्यात्मशब्दमेव हेतुं

वक्ष्यति, तस्यापि तदाशङ्कायां ''तन्निष्ठस्य मोक्षोपदेशादि''ति, तद्वदिहापीक्षतिधातोरेव हेतुत्वसंभवादनुपपत्तेरभावादिति।।

सूत्राक्षराणि व्याख्याय तदाशयं प्रकटीकुर्वन् पूर्वोक्तमेव चोद्यमतिक्रमेणानूद्य दूषयति– *यत्तूक्तमित्यादिना–।। यदुक्तं भवता–सत्त्वधर्मेण ज्ञानेन प्रधानं सर्वज्ञं भविष्यति–इति, तदसत्; प्रधानावस्थायां सत्त्वपरिणामस्य ज्ञानस्याभावात्, गुणत्रयसाम्यावस्थाया एव प्रधानत्वाभ्युपगमात्।।

यदप्युक्तम्–तस्यामवस्थायां तदभावेऽपि सत्त्वगुणसमाश्रयां ज्ञानशक्तिमादाय सर्वज्ञं प्रधानमिति व्यपदेशो भविष्यति–इति, तदपि मन्दम्; तमोगुणस्य तदभिभवशक्तिमाश्रित्याज्ञं प्रधानमसर्वज्ञं चेत्यपि व्यपदेशप्रसङ्गात्। नचैवं जगत्कारणे ब्रह्मणि कुत्रचित् श्रुतौ स्मृतौ वाऽसर्वज्ञत्वाज्ञत्वादिव्यपदेशोऽस्ति; सर्वज्ञत्वेनैव सर्वत्र तद्व्यपदेशात्। तस्मादसदेतत्–प्रधानमेव जगत्कारणं ज्ञानशक्तिमत्तया सर्वज्ञमिति श्रुतौ व्यपदेश इति।

इतोऽपि न प्रधानस्य सर्वज्ञत्वम्। यतो नसाक्षिका सत्त्ववृत्तिर्जानातिनाऽभिधीयते; त्वयापि ससाक्षिकाया एव तस्या ज्ञानत्वाङ्गीकारात्, अन्यथा जडायास्तस्या घटादिवत् विषयप्रकाशकत्वानुपपत्तेः। नच–प्रदीपवद् जडत्वेऽपि तस्या विषयप्रकाशकत्वमविरुद्धमिति–वाच्यम्; प्रदीपादेश्चित्प्रकाशलक्षणज्ञानजननद्वारैव विषयप्रकाशकत्वाङ्गीकारात्, साक्षात् तदभावात्, ज्ञानस्यापि ज्ञानान्तरजननेन तदङ्गीकारेऽनवस्थाप्रसङ्गात्, विषयप्रकाशानुपपत्तेश्च। तस्मात् चैतन्यसाक्षिकैव सत्त्ववृत्तिर्ज्ञानमिति सिद्धम्। एवञ्च सति यत्साक्षिकतया सत्त्वशक्तेर्ज्ञानत्वम्, जपोपाधिकमिव स्फटिकस्य लौहित्यम्, तदेव जपालौहित्यवद् मुख्यं ज्ञानम्, सर्वज्ञं च। नच प्रधानं तथा, येन तस्य तत्साक्षिकत्वं भवेत्; अचेतनत्वात्। तस्मादनुपपन्नं प्रधानस्य सर्वज्ञत्वम्।।

यदपि योगिनां सत्त्वोत्कर्षनिमित्तं सर्वज्ञत्वं दृष्टमित्युक्तम्, तदपि तेषां चेतनत्वात् तत्साक्षित्वेनैव सर्वज्ञत्वमित्युपपन्नम्। ननु–अग्निनिमित्तमयःपिण्डस्य दग्धृत्ववत् साक्षिनिमित्तमेव प्रधानस्येक्षितृत्वं भविष्यति; प्रलयकालेऽपि जीवानां चेतनत्वात् तत्साक्षित्वोपपत्तेः सेश्वरसाङ्ख्यनये चेश्वरस्यैव तत्साक्षित्वोपपत्तेरिति–चेत्, एवं तर्हि प्रधानस्य स्वतन्त्र्यव्याहतेरस्मन्मतप्रसङ्गः। अपिच यन्निमित्तं प्रधानस्य सर्वज्ञत्वं कल्पनीयम्, तदेव मुख्यं सर्वज्ञं जगतः कारणमस्तु–इत्युक्तम्, किमुपचारकल्पनेन? गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय इति न्यायाद् मुख्ये संभवति गौणकल्पनानुपपत्तेः। ननु–न ब्रह्मणोऽपि मुख्यं सर्वज्ञत्वमस्ति; नित्यज्ञानत्वेन ज्ञानक्रियां प्रति स्वातन्त्र्यासंभवादित्युक्तत्वात्, प्रकृतिप्रत्ययार्थयोरेकगौणत्वकल्पनपक्षयोः प्रकृत्यर्थगौणत्वकल्पनपक्षस्यैवोचितत्वात्, प्रत्ययार्थस्य

स्वातन्त्र्यस्य प्राधान्येन बाधकल्पनानुपपत्तेरित्यत्युक्तमिति–चेत्, न; प्रकृतिप्रत्ययार्थयोरुभयोरपि ब्रह्मणि संभवात् सर्वज्ञत्वोपपत्तेः।।

तथाहि–किं ब्रह्मणो नित्यज्ञानत्वे सर्वदा सर्वविषयकं ज्ञानं न संभवति, इति सर्वज्ञत्वं गौणं स्यादित्युच्यते, किं वा तज्ज्ञानं प्रति स्वातन्त्र्यं न संभवतीति प्रत्ययार्थबाधात् तद्गुणमिति। नाद्यः; दत्तोत्तरत्वात्। यस्य हि ब्रह्मणः सर्वविषयावभासलक्षणमविनाशिज्ञानमस्ति, तत् कथमसर्वज्ञं स्यात्? नित्यतादृशज्ञानवत्त्वस्य सर्वज्ञत्वसाधकत्वात्। अनित्यज्ञानत्वपक्षे हि कदाचित् तदसंभवादसर्वज्ञत्वापत्तिः स्यात्, नायं नित्यज्ञानपक्षेऽस्ति। अतो विरुद्धभाषणामेतत्–सर्वदा सर्वावभासलक्षणस्यात्मनोऽसर्वज्ञत्वम्–इति।। न ज्ञाननित्यत्वे सर्वविषयज्ञानानुपपत्तिं ब्रूमः, किं तर्हि? तद्विषयस्वातन्त्र्यव्यपदेशो नोपपद्यत इत्युक्तमिति–चेत्, न; प्रततौष्ण्यप्रकाशेऽपि सवितरि दहति तपति प्रकाशयतीति स्वातन्त्र्यव्यपदेशवद् नित्यचैतन्यस्वभावकेऽप्यात्मनि तत्स्वातन्त्र्यव्यदेशोपपत्तेः। यथाहि प्रततौष्ण्यप्रकाशस्वभावस्यापि सवितुस्तत्तत्पटादिसंयोगात् तदवच्छिन्नौष्ण्यप्रकाशवपेक्ष्य दहनादिक्रियायां स्वतन्त्रकर्तृत्वं व्यपदिश्यते–सविता दहति, तपति, प्रकाशयति चेति। तत् कस्य हेतोः? आकाशस्येव * कर्णशष्कुलीसंयोगावच्छिन्ननभस औष्ण्यादिलक्षणदहनाद्यभिन्नस्यापि सवितुर्विषयसंयोगावच्छेदेन तत्कर्तृत्वोपपत्तेः। केवलौष्ण्यप्रकाशयोः स्वाभिन्नत्वेन स्वतोऽजायमानत्वेऽपि विषयसंयोगावच्छिन्नाकारेण जायमानत्वात्। अत एव विवक्षितविवेकेनौष्ण्यादिसंयोगमेव दहनादिक्रियामाहुः केचित्। तन्न युक्तम्; श्रोत्रेऽपि तथात्वप्रसङ्गात्। तस्मात् नित्यचैतन्यस्वभावस्याप्यात्मनोऽविद्याविषयसम्बन्धात् तदवच्छिन्नचैतन्यं प्रति स्वातन्त्र्योपपत्तेस्तद्व्यपदेशोऽविरुद्ध इति। ननु–सवितुर्दाह्यप्रकाश्यसम्बन्धस्य विद्यमानत्वात् तदवच्छिन्नदहनादिक्रियां प्रति स्वातन्त्र्यव्यपदेशोपपत्तिः, ब्रह्मणस्तु प्रागुत्पत्तेर्ज्ञानकर्मसंयोगाभावाद् न ज्ञानक्रियां प्रति स्वातन्त्र्योपपत्तिः। अतो विषमो दृष्टान्त इति–चेत्, कोऽभिप्रायः? किम्–''तदैक्षते''त्यत्र कर्मणोऽश्रूयमाणत्वेनाविवक्षितकर्मत्वादीक्षणं प्रति कर्तृत्वव्यपदेशो ब्रह्मणो नोपपद्यत इति वैषम्यं चोद्यते, किं वेक्षतेः सकर्मकत्वेन कर्मापेक्षायां वस्तुगत्या कर्मैव तत्काले नासीदिति वैषम्यम्, किं वा सत्यपि तत्कालेऽपि कर्मणि नित्यशुद्धस्य ज्ञानस्य तत्सम्बन्धो नोपपद्यत इति वैषम्यमिति। तत्र नाद्यः; अविवक्षितेऽपि कर्मणि सविता प्रकाशत इति सवितुः प्रकाशकर्तृत्वव्यपदेशदर्शनात् तद्वदविवक्षितेऽपि ज्ञानकर्मणि ब्रह्मणः–''तदैक्षते''ति तत्कर्तृत्वव्यपदेशोपपत्तेरवैषम्यात्। नापि द्वितीयः; कर्मापेक्षायां त्वीक्षतेः सकर्मकत्वेन सुतरां ब्रह्मणः सविता प्रकाशयतीतिवदीक्षितृत्वश्रुतीनामुपपत्तेः, अव्याकृतनामरूपयोस्तत्त्वान्यत्वाभ्यामनिर्वचनीय-

योर्व्याचिकीर्षितयोरेव तत्काले तत्कर्मणो: सत्त्वात्। एतेन–तृतीयविकल्पोऽपि–निरस्त:; पारमार्थिकसम्बन्धासंभवेऽप्यनिर्वचनीयाभ्यां ताभ्यां मिथ्यासम्बन्धोपपत्ते:। नच मिथ्याविषयसम्बन्धेन चैतन्यस्य शुद्धताव्याहतिरित्यसकृदवोचाम। अपिच यत्प्रसादवत्त्वेन योगिनामतीतानागता-दिसर्वविषयप्रत्यक्षमिच्छन्ति योगशास्त्रविद:। तथाचाहु:–"तत: प्रत्यक्चेतना-वगमोऽप्यन्तरायाभावश्च" "भक्तिविशेषादावर्जित ईश्वरस्तमनुगृह्णाति ज्ञानवैराग्यादिने"त्यादि, किमु वक्तव्यं तस्य नित्यसिद्धस्येश्वरस्य जगत्सर्गविषयं नित्यं ज्ञानं भवतीति। न ह्यकिञ्चनो लोकेऽन्यानधनिनो धनदानेन धनिन: करोतीति दृष्टम्। तस्मात् साहसमात्रमेतत्–यद् ब्रह्म न सर्वज्ञमिति। एतेन–सर्गाद्यकाले ब्रह्मण: शरीराद्यभावात् कथमीक्षितृत्वमिति–अपास्तम्; सवितृप्रकाशवद् ब्रह्मणो नित्यज्ञानस्वरूपत्वेन ज्ञानसाधनापेक्षानुपपत्ते:। न ह्यविद्याप्रतिबद्धज्ञानस्य संसारिणो ज्ञानोत्पत्तये शरीराद्यपेक्षावद् नित्यमलुप्तदृष्टेर्ब्रह्मणस्तत्प्रतिबन्धकारणरहितस्य ज्ञानोत्पत्त्यर्थं पिष्टपेषणवत् शरीराद्यपेक्षा युज्यते। शरीराद्यनपेक्षामनावरणतां च भगवत: परमेश्वरस्येमौ मन्त्रौ दर्शयत:–"न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे"ति। "अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षु: स शृणोत्यकर्ण:। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्"इति। यद्यपि वेदान्तनये नास्ति जीवेशयो: परमार्थतो भेद:, तथाच नैतद्व्यतिरेकप्रदर्शनं युज्यते; तथापि घटाकाशमहाकाशयोरिव तयो: प्राक् प्रबोधाद् देहादिकार्यकरणसङ्घाताद्युपहितत्वानुपहितत्वकृतभेदप्रदर्शनोपपत्तेरयमदोष:; आकाशे मिथ्याबुद्धिवत् शरीराद्यात्मताभिमानकृतजीवेशमिथ्याभेदबुद्धेरपि दृश्यमानत्वात्। यथा चैतत्, तथोक्तमेवाधस्तात्; वक्ष्यते च–"दृश्यते चात्मन एच सतो देहादिसङ्घातेऽनात्मन्यात्मत्वाभिनिवेशो मिथ्याबुद्धिमात्रेण पूर्वेणे"ति भाष्ये। तत्रात्मन एव सत:=स्वयंप्रकाशैकस्वभावस्यैव ब्रह्मात्मन इत्यर्थ:। देहादिसङ्घातेऽनात्मन्यात्मताभिनिवेशस्यैव मिथ्याबुद्धित्वात् कथं तस्यैव तद्धेतुत्वम्? अत आह– *पूर्वेणेति*।। पूर्वपूर्वमिथ्याबुद्धेरुत्तरोत्तरमिथ्याबुद्धिहेतुत्वादयमदोष इत्यभिप्राय:। मात्रग्रहणेन नानाद्यविद्योपादानादिकारणान्तरं वार्यते; सिद्धान्तहाने:, किं तर्हि? वस्तुकारणतानिरासेनाभिनिवेशस्यानिर्वचनीयत्वं स्थाप्यत इति द्रष्टव्यम्। एवं च सति जीवस्येश्वराभिन्नत्वेऽपि भ्रान्तत्वाद् देहाद्यपेक्षमीक्षितृत्वमुपपन्नम्।

यदप्युक्तम्–प्रधानस्य त्रिगुणत्वेन संहतत्वात् संहतजगत्कारणत्वोपपत्ति:, नासंहतस्य चिदेकरसस्य ब्रह्मण:–इति, तदपि न; असंहतस्याप्यविद्यया कारणत्वोपपत्ते:। पारमार्थिककार्य-कारणभावे ह्ययं दोष: स्यात्। न चैतदस्तीत्युपरिष्टाद् निवेदयिष्यते। प्रधानस्य संहतस्यापि यथा न

कारणत्वम्, तथाऽशब्दत्वेनैव हेतुना प्रदर्शितम्। न च–अश्रुतत्वेऽपि तर्केण तद्धेतुत्वं सेत्स्यतीति–वाच्यम्; तर्कस्य विशेषाविषयत्वादित्युक्तत्वात्, तर्केण तत्कारणत्वस्य निर्वोढुमशक्यत्वात्। यथाचैतत्, तथा वक्ष्यति च सूत्रकारः– ''न विलक्षणत्वादि'' त्यादिना॥५॥

गौणश्चेन्नात्मशब्दात्॥६॥ अत्राह साङ्ख्यः–यदुक्तं भवता–नाचेतनं प्रधानं जगत्कारणम्, तदीक्षितृत्वश्रवणात्–इति, तन्न; अन्यथापि तदीक्षितृत्वश्रवणोपपत्तेः, अचेतनेऽपि लोके चेतनवदुपचारदर्शनात्। तद्यथा–लोके प्रत्यासन्नपतनं कूलस्यालक्ष्य भवत्यचेतनेऽपि कूले चेतनवदुपचारात्–कूलं पिपतिषतीति, एवं लोकानुसारित्वाद् वैदिकप्रयोगस्याचेतनेऽपि प्रधाने प्रत्यासन्नसर्गे चेतनवदुपचारो वेदे भविष्यति–''तदैक्षते''ति। अथ किमत्रोपचारे बीजमुच्यते? यथा कश्चित् चेतनः स्नात्वा भुंक्त्वां चाऽपराह्णे ग्रामं गमिष्यामीतीक्षित्वाऽनन्तरं नियमेन तथैवालोचनानुसारेण प्रवर्तते, एवं प्रधानमपि प्रतिसर्गाद्यकाले नियमेन महदाद्याकारेण प्रवर्तते, इति भवत्येतच्चेतनसादृश्यं प्रधाने चैतन्योपचारे बीजम्। ननु–मुख्ये संभवति नोपचारः कल्प्येत, सत्यम्; न चास्मिन् वाक्येऽप्तेजसोरीक्षितृत्वं श्रूयमाणं मुख्यं कल्पयितुं शक्यते; तयोर्जडत्वस्य सर्वपक्षसिद्धत्वात्। एवं च सति तयोरौपचारिक ईक्षितृत्वे निश्चिते तदीक्षितृत्वं मुख्यं वा गौणं वेति संशये ''विशये प्रायदर्शनादि''ति न्यायेन गौणत्वप्रायदर्शनेन तदपि गौणमिति निश्चीयते। अतो न मुख्येक्षणसंभवोऽस्ति। तस्मात् ''तत्तेज ऐक्षत'' ''ता आप ऐक्षन्ते'' त्युपचारप्रायसहपाठात् ''तदैक्षते''ति सतोऽपीक्षणप्रतिपादक ईक्षतिशब्दो गौण एव भविष्यतीति–चेत्, नैतदेवम्; न प्रायदर्शनेनेक्षतेर्गौणत्वमध्यवसातुं शक्यते। संशये सत्येव हि प्रायदर्शनमर्थनिर्णायकम्, नान्यथा; शूद्रप्रायजनसङ्घनिविष्टस्य ब्राह्मणत्वेन निश्चितस्यापि शूद्रत्वनिश्चयप्रसङ्गात्। तद्यथा–''वत्सानालभेते''त्यत्र किमयमालभतिः–''वायव्यं श्वेतमालभेते''तिवद् यज्यर्थः, किं वा स्पर्शार्थ इति संशये वायव्यवाक्यवदत्र द्रव्यदेवतासम्बन्धाश्रयत्वेन यागार्थत्वकल्पनानुपपत्तेर्गोदोहनादिसंस्कारकर्मसंनिधिपाठात् संस्कारकर्मवचनः सन् स्पर्शमात्रार्थ इति निश्चीयते। न च तद्वदिह सतो जगत्कर्तुश्चेतनत्वे सन्देहोऽस्ति, येनेक्षतिशब्दस्य तत्र गौणमुख्यत्वसन्देहोऽपि स्यात्। कुतः पुनर्नास्ति सतश्चेतनत्वे सन्देह इति? उच्यते; आत्मशब्दात्। यतः प्रसिद्धवद् जीवमात्मत्वेन स्वयं व्यपदिशति–''सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी''ति, अतोऽवसीयते–चेतनमेव सदीक्षितृ–''तदैक्षते''त्यनेनोच्यते। यदि हि प्रधानमचेतनं गौणेक्षितृ सच्छब्दवाच्यम्–''तदैक्षते''त्यत्र

कल्प्येत, तर्हि तदेव प्रकृतत्वात्–''सेयं देवते''ति परामृश्येत। नच साऽचेतना सती चेतनं जीवमात्मशब्देन व्यपदेष्टुं शक्नोति; विरोधात्। आत्मशब्दो हि स्वरूपापरपर्याय:। न च चेतनमचेतनस्य स्वरूपं पारमार्थिकं संभवति; अपारमार्थिकतदङ्गीकारे चास्मन्मतप्रवेश:। न च–जीवशब्देनाचेतनमेव प्राधानिकं किञ्चिदभिधीयतामिति–वाच्यम्; कार्यकरणसङ्घाताध्यक्षे प्राणानां धारयितरि चेतन एव जीवशब्दस्य रूढत्वात्, धात्वर्थयोगाच्च। तस्माद् नासावचेतनस्य प्रधानस्यात्मा स्वरूपं भवितुमर्हति। अथ–''तदैक्षते''त्यत्र मुख्यमेव चेतयितृ सद् ब्रह्माभिधीयते, तस्य जीव आत्मशब्दप्रयोग उपपद्यते। अपि च यथा सत आत्मतया जीवो व्यपदिश्यते, एवं जीवस्याप्यात्मतया सद् व्यपदिश्यते। तद्यथा–''स एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो'' इति। अत्र प्रकृतं सल्लक्षणमणिमानमात्मानामात्मशब्देन–''स आत्मे''त्युपदिश्य ''तत्त्वमसि श्वेतकेतो'' इति चेतनस्य श्वेतकेतोरात्मत्वेन तमेवोपदिशति। अपिच जीवशब्दवदात्मशब्दोऽपि चेतन एव रूढ:। ततोऽपि प्रधाने नात्मशब्दो घटते। तस्माद् मुख्यमेव सत ईक्षितृत्वम्, न गौणम्।।

नचैवमप्तेजसोरपि तथात्वप्रसङ्ग:, तयोरीक्षणविषयत्वेनाचेतनत्वावधारणात्, नामरूपव्याकरणादौ च तत्प्रयोज्यत्वेनैवतयो र्निर्देशात्, आत्मशब्दवद् मुख्यग्रहे कारणाभावाच्च। अत: कूलवद् गौणमेव तयोरीक्षितृत्वम्; सदधिष्ठितत्वापेक्षत्वात्।।६।।

अत्राह पुन: साङ्ख्य:–यदुक्तं जीवसतो: परस्परात्मत्वव्यपदेशात् सत ईक्षणं मुख्यमिति निश्चीयते, अत: सन्देहाभावात् प्रायदर्शनं न गौणत्वप्रयोजकम्–इति, तद् न युक्तम्; साध्यसमत्वात्। यो ह्यात्मशब्दो मुख्येक्षितृत्वे सतो हेतु: कृत:, सोऽपि गौणो मुख्यो वेति सन्दिग्ध:; तस्याप्युभयत्र लोके प्रयोगदर्शनात्। दृश्यते च लोके राज्ञोऽनात्मन्यपि सर्वार्थकारिण्यमात्ये भद्रसेन आत्मशब्दोपचार:–ममात्मा भद्रसेन इति, आत्मनि तु ममात्मा सुखीत्यादिप्रयोग: सुप्रसिद्ध एव। प्रकृते च प्रधानस्यापि स्वभोक्तरि जीवे संभवत्यात्मव्यपदेशो जायाया इव भर्तरि, जीवस्य च स्वभोग्ये प्रधाने भर्तुरिव जायायाम्। तस्मात् सन्दिग्धत्वेन साध्यसमत्वादयमहेतु: सदीक्षतेर्मुख्यत्व इति।।

एवं प्राप्ते पठति सूत्रकार:–*तन्निष्ठस्य मोक्षोपदेशात्*।।७।। भवेदेवं परस्परस्मिन् परस्परयोर्जीवसतोरात्मव्यपदेशो गौणो मुख्यो वेति सन्दिग्ध:–यदि तदात्मज्ञाननिष्ठस्य तप्तपरशुग्रहणमोक्षदृष्टान्तेन सत्याभिसन्धस्य मोक्षोपदेशो न भवेत्। उपदिश्यते च सदहमस्मीतिसत्याभिसन्धस्य तदात्मनिष्ठत्वेन मोक्ष:। न च सत आत्मत्वोपचारपक्षे तदात्मज्ञानिन: सत्याभिसन्धत्वमुपपद्यते; मिथ्यात्मवेदित्वात्। अत एव न तन्निष्ठस्य मोक्ष:; अतत्त्वात्। तस्मादात्मशब्दस्य मुख्यत्वे सन्देहाभावाद् न साध्यसमत्वमिति।।

अथोच्येतेति पूर्वपक्षभाष्यम्। आत्मेति सत्यात्मप्रयोगमात्रोदाहरणमादाय प्रवृत्तमिति द्रष्टव्यम्; उपलक्षणार्थत्वादात्मशब्दस्य। प्रधानेऽपि मुख्यत्वमभिप्रेत्याह– *अथवैक एवेति*।। तत्तद्वस्तुस्वरूपमात्रवचनत्वादात्मशब्दस्येत्यभिप्रायः। *यथैक एव ज्योतिःशब्द इति*।। ''अथैष ज्योतिरि''त्यत्र ज्योतिःशब्दस्य क्रतुनामधेयत्वं दृष्टम्, लोके च ज्वलनादिनामधेयत्वं सुप्रसिद्धमिति।

अहमुक्थमस्मीति विद्यादितिवदिति।। उक्थं नाम बृहतीसहस्रात्मकं शस्त्रं महाव्रताख्ये कर्मणि शस्यते। तत्संपन्नप्राणाश्चोक्थ्यमित्युच्यते। तत्र तदक्षरसङ्ख्यादिना साम्येनात्मानमुक्थ्यमस्मीति वेदनलक्षणं सम्पदुपासनमैतरेयके विहितम्। तच्च क्रियात्वाद् हिरण्यगर्भप्राप्तिलक्षणानित्यफलकम्, तद्वदेव सद् ब्रह्माहमस्मीति सतोऽमुख्यात्मत्वे सम्पदादिरूपमनित्यफलं च स्यादित्यर्थः। भवत्वेवम्, ततः किमिति? अत आह– *तत्र मोक्षोपदेशो नोपपद्यतेति*।। *अनेकार्थत्वस्यान्याय्यत्वादिति*।। अयमभिप्रायः—यद्यपि स्वरूपापरपर्याय आत्मशब्दो दृश्यते; तथाप्यचेतनस्य जगतश्चेतनमेवाधिष्ठानत्वात् स्वरूपम्, नान्यत्। यथा चैतत् तथा– ''तदनन्यत्वमारम्भणशब्दादिभ्य'' इत्यत्र वक्ष्यते। तथाच भूतात्मा, इन्द्रियात्मेत्यादिप्रयोगोऽप्युपचारादुपपन्नः। एवं च तदुपपत्तौ न नानार्थकल्पनाऽन्याय्या कर्तव्या भवति, अत्यन्तं च चेतने प्रसिद्धिर्बाधिता च न भवति, ''यच्चाप्तोति यदादत्ते यच्चात्ति विषयानिह। यच्चास्य सन्ततो भावस्तदात्मेति प्रकीर्तित'' इति स्मृतिरिपि न बाधिता भवेत्। अतश्चेतन एवात्मशब्दो मुख्यः, नाचेतनेऽपीत्युपसंहरति– *तस्मादिति*।। अस्तु वाऽऽत्मशब्दः स्वरूपपरत्वेन चेतनाचेतनसाधारणः, तथापि– ''स आत्मे''त्यत्रात्मशब्दस्याचेतनपरत्वं नावधारयितुं शक्यमित्याह– *साधारणत्वेऽप्यात्मशब्दस्येति*।। ननु—चेतनपरत्वनिश्चायकमपि तर्हि किञ्चिद् नास्तीत्यत आह– *प्रकृतं त्विति*।। प्रकरणाद्येवास्मन्मते नियामकमस्तीत्यभिप्रायः। *अर्थवादकल्पितेनेति*।। ''एतानि वाव तानि ज्योतींषि य एतस्य स्तोमा'' इत्याद्यर्थवादः।।

एवं तावद् आत्मशब्दस्य गौणत्वसाधारणत्वशङ्काद्वयनिरासपरतया ''तन्निष्ठस्य मोक्षोपदेशादि''ति सूत्रं व्याख्याय सम्प्रति प्रसिद्ध्यादिविरोधस्य स्पष्टत्वेन तच्छङ्कयोरनुदयात् स्वतन्त्रहेत्वन्तरप्रदर्शनपरमेतत् सूत्रमित्याह– *अथवेति*।।७।।

सूत्रान्तरमवतारयति– *कुतश्चेति*।। अयमत्र किमोऽर्थः—ननु—श्रुत्यन्तरेषु मुख्यात्मग्रहार्थं शाखाचन्द्रन्यायेनान्नमयादिकोशोपदेशवदत्रापि सच्छब्दवाच्यप्रधानात्मोपदेशो मुख्यब्रह्मग्रहार्थ भविष्यति, अतोऽनुपपत्तेरभावात् सच्छब्दवाच्यमचेतनं प्रधानमेव, न चेतनं ब्रह्म—इति। अस्यामाशङ्कायां पठति– *हेयत्वावचनाच्च*।।८।। सूत्रं तु सुष्टु व्याख्यातं भाष्येण। भाष्यं सुगमम्।।८।।

सूत्रान्तरमवतारयितुं पृच्छति–कुतश्चेति*।। *स्वाप्ययात्।*।।९।। तस्मिन्नेव श्वेतकेतुब्राह्मणे जगत्कारणं ब्रह्म प्रकृत्य श्रूयते–''यत्रैतत्पुरुषः स्वपितिनाम सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवती''ति। अस्यार्थः–हे सोम्य श्वेतकेतो, यत्र=यस्यां स्वापावस्थायाम्, एतत्पुरुषः=एष कार्यकरणसङ्घाताध्यक्षः सर्वप्रत्यक्षसिद्धः पुरि शयनात् शरणाद्वा पुरुषः स्वपितिनामा भवति, तदा=तस्यामवस्थायाम्, सतेति तृतीया सल्लक्षणेन प्रकृतेन ब्रह्मरूपेण सम्पन्नो भवति=जाग्रत्स्वप्नयोरविद्याकामकर्मकृतं जैवं रूपं परित्यज्य सद्रूपेणावस्थितो भवतीत्यर्थः। कथमन्यरूपेणान्यस्याव्रस्थानमिति? नेत्याह–*स्वमपीतो भवति*।। स्वम्=आत्मानमेव अपीतः=लयं गतः, मिथ्यासंसारलयेन प्राज्ञो भवतीत्यर्थः। तथाच सल्लक्षणब्रह्मस्वरूपस्यात्मत्वाद् नान्यरूपेणान्यस्य सम्पत्तिरित्याशयः। उक्तश्रुत्यर्थमविश्वसन्तं प्रति स्वपितिनामनिर्वचनेन तत्संभावयन्नाह–*स्वं ह्यपीतो भवतीति*।। यस्मादयं सल्लक्षणमात्मानं जीवभावपरित्यागलक्षणलयेन गतो भवति सैन्धवखिल्य इव खिलभावपरित्यागेन स्वयोनिमुदकम्, तस्मादेनं पुरुषं स्वपितीत्याचक्षते लौकिकाः। लौकिकं ह्यस्य लोक एतन्नाम, अतस्तदात्मत्वे नासंभावना कार्येति श्रुतेराशयः। तदेतत् स्वाप्ययलक्षणं स्वपितीति नामनिर्वचनं पुरुषस्य सल्लक्षणं प्रकृतं ब्रह्मात्मेति प्रदर्शनार्थं श्रुत्या कृतम्, तत् तस्याचेतनप्रधानत्वे नैव घटते। न ह्यचेतनं चेतनस्यात्मा भवति; विरोधादित्युक्तम्। ननु–स्वशब्दस्यात्मात्मीयवचनत्वात् कथमत्रात्मवचन एव स्वशब्द इति निश्चीयते? तदनिश्चये वाऽऽत्मीये प्रधानेऽपि चेतनस्य तत्काले गमनविरुद्धमिति–चेत्, न; अपीतेर्लयार्थत्वेन तन्निर्णयोपपत्तेः। लयो हि द्विधा भवति–एकः कार्यस्य कारणे, यथा घटादीनां मृदादिषु; एकस्तूपाधिविलयेन स्वरूपे, यथा घटाकाशस्य घटोपाधिलये महाकाशे। अत्र तु जीवस्याकार्यत्वं श्रुतिस्मृतिन्यायप्रसिद्धमिति वक्ष्यते। अतो न कारणत्मतालक्षणो लयः, इति द्वितीयोऽवशिष्यते। स चात्मन्येव संभवति, नात्मीये; स्थित्यप्ययसमभिव्याहारिस्वशब्दस्याप्ययवचनत्वनिश्चयौचित्यात्। एतदेवाभिप्रेत्य भगवान् सूत्रकारः–''स्वाप्ययादि''ति सूत्रयामास। तदेतद् भाष्यकारोऽप्याह–*स्वशब्देनेहात्मोच्यत इत्यादिना*। *मनःशब्दवाच्यो भवतीति*।। ''एवमेव खलु सोम्य तन्मन'' इति ''मन्वानो मनः'' इति श्रुत्यन्तरात्।।

केचित्तु–मनःशब्दलक्ष्यो भवतीति–व्याकुर्वन्ति। स्वपितिनामनिर्वचनलक्षणार्थवाद-भूतार्थवादताप्रदर्शनार्थं तत्सदृशार्थवादान्तरप्रदर्शनं भाष्ये–यथा हृदयशब्दनिर्वचनमित्यादि*।। इतोऽपि न स्वशब्दः स्वात्मीयपरः; निश्चितार्थश्रुत्यन्तरविरोधादित्याह–*श्रुत्यन्तरं चेति*।।९।।

गतिसामान्यात्।।१०।। इतोऽपि चेतनमेव ब्रह्म जगतः कारणम्; यतः सर्वोपनिषत्सु समैव चेतनकारणत्वावगतिरेकरूपैव जायत इति दृश्यते। इदं च तद्विवक्षायां महत्कारणमित्यभिप्रायः। तदेतद् भाष्यकार आह– *यदि तार्किकसमय इत्यादिना*।।१०।।

श्रुतत्वाच।।११।। यद्यपि सर्वत्रेश्वर एव जगत्कारणं श्रुतम्; तथापि श्वेताश्वतराणां मन्त्रोपनिषदि–''मायां तु प्रकृतिं विद्यान्मायिंन तु महेश्वरम्'' इति स्वशब्देनैव कारणत्वमभिहितम्, अन्यत्र तु सदादिसाधारणशब्देन। अत इममेव विशेषमुपलभ्य–''श्रुतत्वाच्चे''ति जगाद। चकारस्तु हेतून् समुच्चिनोति। तदेतदाह– *स्वशब्देनैवेति*।।११।।

इति वार्तिकम् पञ्चममीक्षत्यधिकरणम् समाप्तम्।।

प्रदीपः

तद्देवम्– **कार्यान्वयं विना सिद्धरूपे ब्रह्मणि मानता।**
पुरुषार्थे स्वयं तावद्वेदान्तानां प्रसाधिता॥

चतुःसूत्र्या हि ब्रह्मजिज्ञासां प्रतिज्ञाय जगत्कारणत्वेन शास्त्रयोनित्वेन सर्ववेदान्ततात्पर्यविषयत्वेन च सिद्धं ब्रह्म जिज्ञास्यमिति परमार्थगत्योपपादितम्। तदत्र ''जन्माद्यस्य यत'' इति सूत्रप्रतिपाद्यं जगत्कारणं भृगुवल्लीपौर्वापर्यपर्यालोचनेनानन्दरूपं ब्रह्मैव। तत्रैव च तत्त्वमस्यादिवाक्यानामपि परमं तात्पर्यमिति पूर्व व्युत्पादितम्। परन्तु ''तत्त्वमसी''ति महावाक्योपक्रमे ''सदेव सोम्येदमग्र आसीदि''ति केवलसद्रूपेणैवोपादानकारणस्योपक्रमात् सत्तायाश्चासद्वैलक्षण्यमात्ररूपतया चिद्रूपातिरिक्ताया अचेतन एव परिसमाप्तेर्जगत्कारणमचेतनं प्रधानमेवेति गम्यते। सति चैवं ''सन्मूलास्सोम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठाः'' ''तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छे''त्याद्याः श्रुतयः कारणस्य सद्रूपस्यानुमानिकत्वं प्रदर्शयन्त्योऽप्युपपद्यन्ते। नहि वेदान्तमात्रगम्यं ब्रह्मानुमानस्यापि वेद्यम्। शास्त्रयोनित्वं ह्यचेतनस्य कारणत्वेनाप्युपपन्नम्। तथाच जीवे प्रधानात्मतयोपासनविधाने वेदान्तानां तात्पर्यमिति जिज्ञास्यं ब्रह्म प्रधानमेव; व्यापकत्वात्, न तु प्रत्यगभिन्नं ब्रह्मेति साङ्ख्याः प्रत्यवतिष्ठन्ते। सति चैवं ''तत्तु समन्वयादि''ति सूत्रोपात्तः समन्वयहेतुः प्रत्यगभिन्ने ब्रह्मणि नोपक्रमानुगुण इति तस्यैव शास्त्रयोनित्वादिकं सर्वमुपपन्नमिति पूर्वपक्षोत्थानात् पूर्वाधिकरणसिद्धान्ताक्षेपादाक्षेपिकी सङ्गतिः पूर्वाधिकरणेनास्य सिद्धा भवति। ''सदवे सोम्येदमग्र आसीदि''ति वेदान्तवाक्यानामेवात्र ब्रह्मणि समन्वयसंभवासम्भवविचारात् शास्त्राध्यायादिसङ्गतयोऽप्यर्थसिद्धा एव। तथाच प्रधानम्, जगत्कारणतया वेदान्तगम्यम्, कारणवाक्यघटकसदादिविशेष्यपदगम्यत्वात्; यद् यत्पदघटितवाक्यघटकविशेष्यपदगम्यम्, तत् तद्वाक्यप्रतिपाद्यम्–यथा आचार्यः पूज्यतम इति वाक्यघटकाचार्यपदवाच्यः पूज्यतयोक्तवाक्यविषय इति सदनुमानेन ब्रह्मकारणताक्षेपोऽत्र क्रियते। आक्षेपफलं तु जीवस्य प्रधानतयोपास्यत्वसिद्धिरेव॥

अयमाशयः–सत्यपदेन हि कारणस्याचेतनत्वं छान्दोग्य उपदिश्यते। मुण्डकेऽपि ''यः सर्वज्ञः सर्वविदि''ति सर्वज्ञत्वबोधनद्वारा ज्ञानक्रियाकर्तृत्वयोग्यत्वं ज्ञानक्रियाशक्तिमत्त्वं कारणस्यावश्यकमिति

प्रतिपाद्यते। सर्वज्ञस्यास्य ''तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायत'' इत्युपादानकारणत्वमपि तु बोधितमिति परिणामस्वभावमेव यत्किंचित् कारणतया विवक्ष्यत इति विज्ञायते। परिणममानं च सर्वज्ञं च प्रधानमेव भवितुमर्हति, न तु प्रत्यगभिन्नं ब्रह्म, यतस्तद् न परिणमते; निरवयवत्वात्, नापि सर्वज्ञम्; नित्यस्यानित्यस्य वा ज्ञानस्य जनकत्वेन सार्वदिकसर्वज्ञत्वस्य साधनसंभवात्। नहि नित्यं जन्यते, न वाऽनित्यं सर्वदा तज्जन्यम्, इति प्रधानकारणतावाद एव युक्त इति साङ्ख्यानां पूर्वपक्षनिष्कर्षः। अत्रायं भामतीकाराणां संग्रहश्लोकः–

'ज्ञानक्रियाशक्त्यभावाद् ब्रह्मणोऽपरिणामिनः।

न सर्वशक्तिविज्ञाने, प्रधाने त्वस्ति संभवः॥

इति। न केवलं साङ्ख्या एवात्र पूर्वपक्षिणः, किन्तु काणादादयोऽपि परमात्मनिमित्तकारणतामात्राभिमानिनः। निमित्तकारणमात्रत्वे हि परमात्मनस्तत्रैव जीवस्य सुषुप्तौ लयप्रतिपादनादिकं ''तत्त्वमसी''ति मुख्यब्रह्मभावोपदेशश्चासङ्गतः स्यात्, इति संसारिव्यतिरिक्तेश्वरपरत्वमेव सर्वेषां वेदान्तानाम्। सति चैवमानुमानिकत्वात्तस्य न शास्त्रैकसमधिगम्यत्वम्, न वा कर्मकाण्डोपासनाकाण्डादीनां तत्त्वमसिवाक्येनैकवाक्यतेति प्रत्यगभिन्नब्रह्मपरत्वं वेदान्तानामसाम्प्रतम्। अत्र हि मते ''यः सर्वज्ञः सर्वविद्'' इत्यादिकं सुतरामुपपद्यते। ''बहु स्यां प्रजायेये''ति सर्वभावोपदेशस्तु राजकार्योन्मुखस्य मन्त्रिणो राजा स्यामिति सङ्कल्पवद् निमित्तकारणास्यैवेश्वरस्य प्रपञ्चोन्मुखां प्रवृत्तिमेवाभिप्रैति, न तु परमार्थगत्या तद्भावम्। नहि विलक्षणयोः कार्यकारणयोरुपादानोपादेयभावः; अन्यथा कथं कुलालोऽपि न घटोपादानतामर्हति? ''यतो वे''ति पञ्चम्यपि हेतुत्वमात्रमेव प्रतिपादयति, च तूपादानत्वमित्यद्वैतिनामपि सम्मतम्। कथमन्यथा निमित्तकारणान्तरशङ्का वार्येत? तथाचेश्वरः सृजामीति संकल्प्य तत्तदुपादानं समवायि कारणं परमाण्वादिकं योजयति, येन घटादिकमविद्यमानं कार्यमारम्भयति, इति न परिणामवादो न वा विवर्तवादो युक्तः, किन्त्वारम्भवाद एव युक्तः। 'क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वाद् घटवद्' इत्यनुमानसिद्धजीवान्यकारणानुवादपराण्येव वेदान्तवाक्यानीति पूर्वपक्षनिष्कर्षः। द्वैतसम्प्रदायानुसारिणोऽपि प्रायेण योगसम्प्रदायवत् काणादादिवादमेवानुसरन्ति सत्कार्यवादप्रक्रियावर्जमिति तेऽप्यन्नार्थतः पूर्वपक्षिण एव भवन्ति। सर्वानिमान् पूर्वपक्षप्रकाराम् निर्देष्टुकामः सङ्गतिसूचनार्थ वृत्तमनुवदति–*एवं तावदिति*॥

अत्र प्रथमवाक्येन समन्वयाधिकरणार्थोऽनूद्यते। तेन च शास्त्रयोनित्वद्वितीय-वर्णकार्थोऽप्यनूदितप्रायः; शास्त्रायोनित्वसमन्वयार्थत्वात् समन्वयाधिकरणस्य। द्वितीयेन तु

शास्त्रयोनित्वसूत्रप्रथमवर्णकार्थो ''जन्माद्यस्ये'' तिसूत्राथश्चानूद्यते; शास्त्रयोनित्वप्रथमवर्णकस्य जन्मादिसूत्रसूचितसर्वज्ञत्वद्रढीकरणार्थत्वात्। तदेवं त्रिसूत्र्यर्थसूचनेन प्रत्यगभिन्नं ब्रह्मैव वेदान्ततत्त्वमित्यवगमात् तस्य च प्रमाणान्तरासिद्धस्यान्यथाऽन्यथा विप्रतिपद्यमानस्य विचारनिर्णेयताऽपिज्ञापितेति चतुःसूत्रसारोऽत्र सङ्कलितः। तत्र 'वेदान्तवाक्यानामि'त्यनेन समन्वयाधिकरणविषयवाक्यम्, 'ब्रह्मात्माावगतिप्रयोजनानामि'त्यनेन विनापि क्रियासम्बन्धं सप्रयोजनत्वेन सिद्धेऽपि वस्तुनि प्रामाण्यसंभवाद् न विधिशेषतयैव ब्रह्मविवक्षेति सयुक्तिकसिद्धान्तपक्षः, 'ब्रह्मात्मनि तात्पर्येण समन्वितानामि'त्यनेन कर्मोपासनावाक्यानामवान्तरवाक्यत्वमेव, न स्वार्थ एव पर्यवसानेन निराकाङ्क्षता, इति तत्त्वमस्यादिमहावाक्यानुसारेणैव वेदार्थनिर्णयो युक्त इति सिद्धान्ताभिमतयुक्तिविशेषसूचनम्, 'अन्तरेणापि कार्यानुप्रवेशमि'ति वाक्येन निरसनीयः प्रतिपत्तिविधिविषयतया ब्रह्म विवक्ष्यत इति वृत्तिकारानुसारी पूर्वपक्षश्च संगृहीतः। अनेन च सर्वोऽपि समन्वयाधिकरणार्थः प्रायेण संगृहीत एव। अत्र 'ब्रह्मात्मनि' इति ब्रह्मस्वरूप आत्मनीत्यर्थकब्रह्मात्मपदयोरुभयोरपि प्रयोगेण न ब्रह्मणो मोक्षरूपस्य प्राप्यत्वोत्पाद्यत्वविकार्यत्वादिसाध्यत्वयोग इति विचारपरम्परापि सङ्कलितैव, इति न लेशतोऽपि समन्वयाधिकरणभाष्यं परित्यक्तम्। अत्र विपरीतक्रमेण वृत्तानुवादेनायमाशयो द्योत्यते—यत् समन्वयाधिकरणादि प्रतिपाद्यं शास्त्रैकगम्यमेव ब्रह्मस्वरूपं ''जन्माद्यस्य यत'' इति सूत्रेण लिलक्षयिषितम्॥ तच्च जन्मादिसूत्रं तटस्थलक्षणपरमेवेत्यङ्गीकार एव युज्यते, न तु कारणत्वस्वरूपलक्षणत्वपरम्। तत्र च ब्रह्मैवोपादानकाराणमपीति स्वीकार एव प्रत्यगभेदस्य संभवात् तटस्थलक्षणमपि कारणत्वमभिन्ननिमित्तोपादानत्वरूपमेव, न तु केवलं निमित्तत्वम्, न वा हेतुत्वमेव। ततश्च जन्मादिसूत्रं प्रधानतया जीवकारणतानिरासार्थमपि साङ्ख्यवैशेषिकादिसिद्धान्त-पक्षस्याप्यनुषङ्गतो निरासपरमेव, इत्यानुषङ्गिकं साङ्ख्यवैशेषिकादिमतनिरासमेव प्रपञ्चयितुमिदमधिकरणमिति फलति। सर्वथा तु जन्मादिसूत्रे साङ्ख्यादिमतनिरासस्याप्यानुषङ्गिकत्वं समन्वयाधिकरणमेवोपजीव्य भवति, इति समन्वयाधिकरणशेष एवास्मिन्नधिकरणेऽभिधीयत इत्याक्षेपसङ्गतिरेवात्रेति न दोषः। वृत्तमनूद्य पूर्वोक्ताक्षेपसङ्गतिसूचनपूर्वकं साङ्ख्याभिमतं पूर्वपक्षं निर्दिशति—*साङ्ख्यादयस्त्विति*॥

अत्र तुशब्देन समन्वयाधिकरणसिद्धान्तो निरस्यते, तेन चाक्षेपसङ्गतिः सूचिता भवति। साङ्ख्याः कपिला निरीश्वरसाङ्ख्याः, चेतनानपेक्षाचेतनकारणतावादिन इति यावत्॥

इमान्यत्र साङ्ख्यसूत्राणि ''सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः। प्रकृतेर्महान् महतोऽहङ्कारोऽहङ्कारात्तन्मात्राण्युभयमिन्द्रियम्, तन्मात्रेभ्यः स्थूलभूतानि पुरुष इति पञ्चविंशतिर्गुणाः।

पूर्वभावित्वे द्वयोरेकतरस्य हानेऽन्यतरयोगः। न कर्मण उपादानत्वायोगात्। ईश्वरासिद्धेः। मुक्तात्मनः प्रशंसोपासासिद्धस्य वा। तत्संनिधानादधिष्टातृत्वं मणिवत्। विशेषकार्येष्वपि जीवानाम्। सिद्धरूपबोद्धृत्वाद्वाक्यार्थोपदेशः। अन्तःकरणस्य तदुज्ज्वलितत्वाल्लोहवदधिष्ठातृत्वम्। चिदवसानो भोगः। सौक्ष्म्यात्तदनुपलब्धिः। कार्यदर्शनात्तदुपलब्धिः। हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्। तद्धाने प्रकृतिः पुरुषो वा। कार्यात् कारणानुमानं तत्साहित्यात्।'' इति।।

एतर्हि सूत्रैः मूलप्रकृत्यादीनि पञ्चविंशतितत्त्वान्येव प्रामाणिकानि। तत्रान्ताकरणं मुख्यमधिष्ठातृ। चैतन्यं पुरुषस्तु संनिधानमात्रेण, प्रकृतिरेव तु परिणामिकारणम्। तच्चानुमानैकगम्यम्। प्रकृतिपुरुषातिरेकेण नित्यपदार्थान्तरमीश्वरादिरूपमप्रामाणिकम्। वेदान्तवाक्यानि सिद्धपुरुषोपासनाविधिपराणि तत्स्तुतिपराणि वा। चिच्छक्तिरेव जीवस्य भोक्तृत्वं नाम। कर्तृत्वं तु जीवस्यान्तःकरणोपाधिसम्बन्धनिबन्धनमेव। मूलकारण प्रकृतिस्सत्त्वरजस्तमसां साम्यावस्थैव। सर्व च कार्यजातं सुखदुःखमोहान्वितत्वात् सुखादिशक्तिरूपसत्त्वादिसाम्यावस्थारूपप्रकृत्युपादानकमेव संभवति, न तु विलक्षणस्वभावपुरुषोपादानकम्। तथाच जगदुपादानं वेदान्तबोधितमपि प्रधानमेव मूलप्रकृतिपदवाच्यं भवितुमर्हति, न तु चेतनम्; तस्यापरिणामशक्तित्वात्। तदयमत्रानुमानप्रयोगः—महदादिकम्, स्वोपहितत्रिगुणात्मकवस्तूपादानकम्, कार्यत्वात्; शिलामध्यस्थप्रतिमावत्, तैलवच्च। अयमेवाशायस्तत्त्वकौमुदीकारादिभिरपि प्रकटीक्रियते—''भेदानां परिमाणात् समन्वयाच्छक्तितः प्रवृत्तेश्च। कारणकार्यविभागादविभागद्वैश्वरूप्यस्य'' ''कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च। परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषादि''त्यादौ।।

अत्र भेदाः, त्रिगुणात्मकाव्यक्तकारणवन्तः, परिमितत्वात्, सुखदुःखमोहान्वितत्वात्, तच्छक्त्यधीनोत्पत्तिकत्वाद्वा, घटादिवदिति कार्यपक्षकान्यनुमानानि, अव्यक्तम्, महदादिकारणम्, तदनुकूलशक्तिमत्त्वात्, घटादिविभागाधिष्ठानत्वाद्वेत्याद्यव्यक्तपक्षकानुमानप्रयोगाश्च सूच्यन्ते। एतर्हि अनुमानैर्न निर्गुणं ब्रह्मानुमातुं शक्यते। अचेतनमपि प्रधानं स्वीयत्रिगुणपरिणामवशाद् जलवत् परिणमते। यथा हि जलं तत्तद्गुणान्वयविशेषावलम्बनेन नारिकेलबिल्वतिन्दुकामलककपित्थादिफलरसभावं प्राप्नोति वारिदविमुक्तस्य तस्यैकरूपत्वेऽपि, एवं सत्त्वरजस्तमोगुणानामेकरूपत्वेऽप्येकैकगुणाश्रयनिबन्धनेन विशेषेणानेकात्मभावः। तथाच गुणत एव प्रधानं परिणमते, न स्वरूपतः, इति गुणानां प्रधानेन सर्वदाऽविविक्तत्वात् प्रधानपरिणमतावादव्यवहारः। अत्र सलिलदृष्टान्तेन चेतननिरपेक्षता परिणामार्थ सूच्यते। नहि वारिदमुक्तं जलं नारिकेलादिषु रसान्तररूपेण कोऽपि चेतनः परिणमयतीति प्रत्यक्षमिदम्। आनुमानिकत्वात्तु कारणस्य श्रुतीनामपि तदनुवादेनैव पर्यवसानं स्वीकर्तव्यम्।

वेदस्वतःप्रामाण्यं तु धर्म एव, न तु कारणेऽपि। साङ्ख्यसूत्रादिकमपि वेदमूलकत्वेनैव प्रमाणम्; स्मृतित्वात्। अत एव ''आप्तवचनं प्रमाणमि''त्यत्राप्तवचनेन–शाक्यभिक्षुकादीनां निरास उपपद्यते। ''तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छे''त्यादिश्रुतयोऽपि सत्पदेन कारणमनुमेयं प्रतिपादयन्ति, न तु चेतनस्वरूपबोधकज्ञानादिपदेन। सति चैवं ''सदेव सोम्येदमग्र आसीदि''त्युपक्रमवाक्येनापि प्रधानमेव कारणमुपस्थाप्यते। तदुपस्थापनेनैव वेदान्तानां पर्यवसानम्। ''तत्त्वमसी''त्यादिकं तु स्तावकमेव मुक्तानाम्, इति न वेदान्तानां प्रत्यगभिन्नब्रह्मस्वरूपनिरूपणपरतया प्रामाण्यम्, इति शास्त्रयोनित्वं ब्रह्मणो न युक्तम्। ब्रह्मपदेन हि वेदान्तेषु व्यापकं प्रधानमेव विवक्ष्यते; न तु जीवैकतार्हं चेतनं किमपि कारणस्वरूपम्। तथाच जीवस्य प्रधानैक्योपासनमेव श्रुतितात्पर्यविषयः, न तु ब्रह्मैक्यज्ञानमिति फलभेदात् साङ्ख्यानां प्रत्यवस्थानमिदमाक्षेपमुखेनात्र निरसितुं प्रवृत्तिः। तदेव निरीश्वरसाङ्ख्यमतरीत्या पूर्वपक्षमुपस्थापयितुं तदीयं मतं सङ्ग्रहेण निर्दिशति– *परिनिष्ठितमित्यादिना*।। परिनिष्ठितं वस्तु=कारणस्वरूपम्। *प्रमाणान्तरगम्यमेवेति*। वेदान्तातिरिक्तप्रमाणगम्यमेवेत्यर्थः। तथाव वेदान्तानां कार्यान्वयं विना प्रामाण्यस्यौचित्येऽपि सिद्धं कारणस्वरूपं ब्रह्मवेति निर्णयो न युक्तः; मानान्तरागम्यत्वात्तस्य, किन्तु प्रधानकारणवाद एव युक्त इति भावः। अनेन–वेदान्तगम्यं सिद्धं वस्तु प्रधानमेव, न ब्रह्म, येन जीवैकताऽद्वैतिनामभिमतेति ब्रह्मकारणतावादाक्षेपः। *प्रधानादीनि*।। प्रधानं महत्त्वम्, अहङ्कारम्, पञ्च तन्मात्राणि चानुमिन्वामा इत्यर्थः। इमान्यत्र सूत्राणि–''स्थूलात् पञ्चतन्मात्रस्य। ब्राह्मान्तराभ्यां तैश्चहंकारस्य। तेनान्तःकरणस्य। तेन प्रकृतेरि''ति। यद्यत् सूक्ष्मत्वाद् विद्यमानमपि नोपलभ्यते, सर्वं तत्तत्कार्यत एवानुमेयमिति भावः। *तत्परतयैवेति*। वेदान्तवाक्यानामन्यथाऽन्यथानयनेनान्यत् कारणं चेतनादिस्वरूपमिति यन्मन्यते, तदिदमयुक्तमिति बोधनार्थतयैव साङ्ख्यस्मृतीनां प्रवृत्तत्वाद् अन्यपराणां मन्त्राणामन्यार्थत्वभ्रमनिरासेनार्थविशेषपरत्वव्यवस्थापनार्थ मन्त्रार्थवादोद्धारेण प्रवृत्तानां मन्वादिस्मृतीनामिव श्रुतितात्पर्यनिर्णायकत्वमपि स्वीकर्तव्यम्; अन्यथा तत्प्रवृत्तिवैयर्थ्यापत्तेः। परीक्षाशास्त्रोपदेशशास्त्रयोरूपदेशशास्त्रस्यैव प्राबल्यात् वेदान्तानां ब्रह्मपरताव्यवस्थापकन्यायापेक्षया साङ्ख्यस्मृतिप्राबल्यमेव स्वीकर्तव्यमिति तु हृदयम्। तथाच वेदान्तानां प्रत्यगभिन्नब्रह्मपरताव्यवस्थापनमन्यथासिद्धमपि स्मृतिविरुद्धत्वादप्रमाणमित्याक्षेपाभिप्रायः। –*वेदान्तवाक्यानि योजयन्ति*। ''आप्तवचनं प्रमाणमि''ति साङ्ख्या वेदवाक्यान्याप्याप्तवचनत्वेनैव प्रमाणानि मन्यन्ते, न त्वपौरुषेयत्वेन। तथाच वेदान्ताः, प्रमाणान्तरापेक्षाः, सिद्धवस्तुपरत्वात्, लौकिकवाक्यान्तरवदित्यनुमाने पौरुषेयत्वं नोपाधिरिति–'न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वं ब्रह्मण' इति भाष्यमप्यनुपपन्नमिति सूच्यते। यतोऽर्थं बुद्ध्वा शब्दरचनेति न्यायेनैव

वेदान्तवाक्यान्यपि प्रवृत्तानि, इत्यनुमानावगतार्थबोधकत्वं वेदान्तानां भूषणमेव, न तु दूपणमिति भावः। वेदान्तवाक्यानां वााक्यत्वेनैव हेतुनाऽनुवादकत्वं न केवलमनुमानगम्यम्, किन्तु स्पष्टमपीति सूचयन्नाह–*सर्वेष्वेवेति*।। "तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छे"त्यादिवेदान्तवाक्येष्वित्यर्थः। शुङ्गेनेति कार्येणेत्यर्थः। अनुमानेनैव=हेतुनैव। हेतुस्वरूपमाह–*कार्येणैवेति*।। कार्यरूपेणानुमानेनैवेत्यर्थः। तादात्म्येन कार्यस्य हेतुत्वाभिप्रायेणेदं भाष्यम्। प्रधानमिव पुरुषोऽपि तत्संयोगोऽपि वाऽनुमीयत एवेति न दोष इति तन्मताद् न वेदान्तवाक्यानि कुत्रापि सिद्धे वस्तुनि प्रमाणान्तरनिरपेक्षाणीति निरूपयितुं साङ्ख्यानां मतमत्रोपस्थापयति–*प्रधानेति*।। प्रकृतिरनुमेयेति पूर्वमेव विवेचितम्। पुरुषोऽपि तु तन्मतेऽनुमेय एव। अत एवेदं सूत्रम्–संहतपरार्थत्वात् पुरुषस्ये"ति। प्रकृतिपुरुषयोस्संयोगो नाम संनिधानमात्रेण पुरुषाधिष्ठितत्वमेव प्रकृतेः। प्रकृतेः पुरुषसंनिधानमपि कारणमचेतनम्, चेतनाधिष्ठितमेव कार्यकारि, अचेतनकारणत्वात् मृदादिवदित्यनुमानेनैव गम्यते। अहं जानामीत्यादिप्रत्यक्षप्रतीतिरेतन्मते नात्मानं विषयीकरोति, किन्त्वन्तःकरणादिकमेव, इति नात्मविषयकत्वेनास्य प्रत्यक्षस्य वैशेषिकमत इव प्रमाण्यम्, इति नात्मप्रत्यक्षतावादो युक्तः। तथाच जीवस्वरूपबोधकत्वेनापि वेदान्तानां प्रामाण्यं स्वीकर्तव्यमेवेति "अथात आदेशो नेति"त्यादिकं शरीरादिनिषेधेनानुमेयात्मस्वरूपबोधनार्थमेव प्रवृत्तमिति भावः।।

ननु–एतन्मते "तदैक्षते"ति कारणस्येक्षितृत्वादिकम्, आत्मशब्देन व्यपदेशादिकं च श्रुतौ गौणं कल्पनीयं भविष्यति। कारणं हि मृदाद्यधिष्ठानं चेतनमेव दृष्टम्, इति दृष्टानुसारेणाधिष्ठानमपि चेतनमेव कल्पनीयम्। तत्रैव च श्रुतेरपि तात्पर्यमूरीकर्तव्यम्। अधिष्ठातृत्वं हि क्रियाविशेषोत्पादने कारणेन सम्बन्धं विना संनिधानमात्रेण न संभवति। न ह्यधिष्ठानस्यैव सतश्चेतनस्योपादानकारणत्वं कुत्रापि दृष्टम्। अतो वेदान्तानामनुमानगम्यकारणस्वरूपपरत्वेन प्रामाण्यमित्यत्र न साङ्ख्यमताद्विशेषः, एवमात्माऽपि शरीरादिव्यतिरिक्तो न प्रत्यक्षः, किन्त्वनुमेय एवेत्यत्रापि न विशेषः, न वा चेतनं नोपादानकारणमित्यत्रापि; तथापि निमित्तकारणं तु चेतनमीश्वरपदाभिधेयं सर्वज्ञं सर्वशक्तिस्वरूपमनुमेयमेवेति काणादानां मतमुपस्थापयति–*काणादास्त्विति*।। एते हि संसारिव्यतिरिक्तेश्वरकारणवादिनः शास्त्रयोनित्वसूत्रे जन्मादिसूत्रे च निरस्तप्राया अपि वेदान्तानामनुमानापेक्षं सिद्धे वस्तुनि प्रामाण्यमिति साङ्ख्यप्रत्यवस्थानमवसरं प्राप्य पुनरुत्तिष्ठन्ति, इति तेषामपि मतमत्रोपस्थाप्यते। एतेभ्य एव वाक्येभ्यः="सदेव सोम्येदमग्र आसीत्" "तदैक्षते"त्यादिरूपेभ्यो वेदान्तवाक्येभ्यः। ईश्वरम्=संसारिव्यतिरिक्तं चेतनम्। निमित्तकारणम्=निमित्तकारणमात्रं नोपादानकारणमपि। कार्यम्, स्वन्यूनपरिमाणद्रव्यान्तरारब्धम्, कार्यत्वादित्यनुमानेन परमाणव एव समसवायिकारणतया मन्यन्त इति नेश्वर एवोपादानकारणमपि,

न वा प्रधानं कार्याधिकपरिमाणमुपादानकारणमिति न केवलमद्वैतमतस्य, किन्तु साङ्ख्यमतस्याप्यत्र प्रतिरोधः। तदिदमाह– *अणूंश्चेति*।। ''समाना प्रकृतिर्द्वयोरि''ति वेदान्तिनां साङ्ख्यानां च प्रकृतिपरिणामवादे साम्यं वर्तते केषांचन दृष्ट्या, काणादादीनां तु न तत्रापि साम्यमिति महदन्तरं काणादमताद्वैतमतयोरिति निष्कर्षः। अत्र साङ्ख्याः सेश्वरा निरीश्वराश्चेति द्विविधाः। एवं तार्किका अपि वैशेषिका नैयायिकाश्च। तत्र साङ्ख्यपदं योगिनां काणादपदं नैयायिकानां चोपलक्षणम्। यतो योगिनोऽपि नेश्वरमभिन्ननिमित्तोपादानकारणं मन्यन्ते, एवं नैयायिका अपीति तेऽप्यत्र पूर्वपक्षिण एवेत्यर्थसिद्धमेवेदमित्याह– *एवमन्येऽपीति*।। तार्किकाः=युक्तिप्राधान्यवादिनः सेश्वराः साङ्ख्याः नैयायिकाश्च बौद्धाश्च। *वाक्याभासयुक्त्याभासेति*।। ''सदेव सोम्येदमग्र आसीदि''ति वाक्यमात्रं ''तदैक्षते''त्याद्यसहकृतं साङ्ख्यानामवष्टम्भः, ''तदैक्षत'' ''स एषोऽणिमे''त्यादिवाक्यमात्रं काणादादीनाम्, ''असदेवेदमग्र आसीदि''त्यादिकं तु बौद्धानाम्। इदं च सर्वमवान्तरवाक्यमन्यशेषं चेति न मुख्यं वाक्यम् इति वाक्याभासमात्रम्; अपर्यवसितार्थबोधकत्वादिति भाावः। जडम् जडप्रकृतिकम्, कार्यत्वात्, इत्यनुमानं साङ्ख्यानां श्रुतिबाधितम्, एवं नैयायिकानामपीति तेषां युक्त्याभासमात्रम्, न तु सा युक्तिः; श्रुत्यननुगृहीतत्वादिति भावः। अनेन च साङ्ख्यानां वेदार्थव्याख्यानमपव्याख्यानम्, इति साङ्ख्यस्मृतिरप्यपस्मृतिरेवेति सूच्यते। यथा चैतत्तथाऽविरोधाध्याये स्पष्टीभविस्यति। तथाच वेदान्तानामनुमानागम्यसंसार्यभिन्नाभिन्ननिमित्तोपादानस्वरूपबोधन एव तात्पर्यात् तस्य च प्रमाणान्तरागम्यत्वाद् अपौरुषेयत्वेनैव वेदान्तप्रामाण्यं कर्मकाण्डप्रामाण्यमिव स्वीकर्तव्यम्, इत्यनुमानादीनां तत्पदवाच्यार्थसमर्पण एवोपयोगाद् नानुमानाभासगम्यप्रधानकारणतावादादिकं युक्तम्, इति सिद्धान्तपक्षोपक्षेपोऽत्राभासपादाप्रयोगेण सूच्यते। वाक्याभासयुक्त्याभासौ अवष्टम्भो येषामिति बहुव्रीहिसमासनिष्पन्नमिदं पदम्–वाक्याभासयुक्त्याभासावष्टम्भा इति। पूर्वपक्षवादिनः=निरस्यकोटि-वादिनः। एतेषां कोटिरत एव निरस्या, यतो वाक्याभासादिमूलेति सूचनार्थमेव वाक्याभासेति विशेषणम्। *उत्तिष्ठन्तीति*।। मृतप्राया अपि सिद्धान्तनिरासकमतान्तरावलम्बनेनानुमानप्राधान्यवादावसरलाभेन प्राप्तजीविताः प्रत्यवतिष्ठन्त इति भावः। ननु–साङ्ख्यादयोऽपि वेदान्तवाक्यमेव स्वमतोप बृंहणायावत्रम्बन्ते। तत्र च कर्तृकर्मादिकारकविशिष्टक्रियाबोधकपदसमुदायस्यैव वाक्यत्वात् ''सदेव सोम्येदमग्र आसीदि''त्यादीनामेकैकेषामपि वाक्यत्वाविशेषात् कथं साङ्ख्यादयो वाक्याभासमेवावलम्बन्ते, न प्रमाणवाक्यमिति शङ्कानिरासपूर्वकमीक्षत्यधिकरणप्रयोजनं साङ्ख्यादिमतनिरासं निर्दिशति– *तत्रेति*।। पदम्*सुबन्ततिडन्तरूपम्, वाक्यम्=तत्समुदायरूपम्, प्रमाणम्=प्रत्यक्षानुमानागमादिप्रमाणस्वरूपं च विजानता आचर्येण=बादरायणाचार्येणेत्यर्थः। तथाच मतान्तरावलम्बिनां वाक्याभासज्ञानमेव, न तु वाक्यरूपप्रमाणज्ञानम्। अवान्तरवाक्यं हि वाक्यैकवाक्यतायोग्यं पारिभाषिकपदत्वाभावेऽपि पदस्थानीयत्वाद् न मुख्यप्रमाणतामर्हति, इति

वाक्यैकदेशमात्रवलम्बनेन साङ्ख्यादीनां प्रत्यवस्थानं निर्मूलमेवेति भावः। वेदान्तवाक्यानाम्=तत्त्वमस्यादिमहावाक्यानां तदेकदेशानां ''सदेव सोम्येदमग्र आसीदि''त्यादीनां च। ब्रह्मावगतिपरत्वप्रदर्शनाय=ब्रह्मणोऽवगतिः प्रयोजनं यस्येति बहुव्रीहिसमासः, ब्रह्मसाक्षात्काररूपप्रयोजनोपयोगित्वप्रदर्शनाय। साङ्ख्यादिमतरीत्या वेदान्तवाक्यानां विवरणे तु न ब्रह्मावगतिरूपं प्रयोजनं सेत्स्यति, इति साङ्ख्यादिनिरास इति भावः। तदिदं यथावसरं निरसनीयं साङ्ख्यमतमुपक्षिपति- *तत्रेति*।। जगत्कारणे विषये। ननु-अद्वैतमतेऽपि प्रधानस्य प्रकृतिपदवाच्यस्य परिणामिकाराणत्वस्वीकारात् साङ्ख्यमताविशेष इत्यत आह- *प्रधानं त्रिगुणमिति*।। तथाचाद्वैतमते विवरणरीत्या स्वावृतब्रह्माश्रितत्वेनैव प्रकृतेः परिणामिकारणत्वाद् भामतीमतरीत्या प्रकृतेर्निमित्तकारणत्वस्यैव स्वीकारेण परिणामिकारणत्वस्यास्वीकारात् त्रिगुणत्वेऽपि प्रकृतेरावरणशक्तेरपि स्वीकाराच्च न साङ्ख्यमतादविशेषः, इति न दोषः। जगतः सुखदुःखमोहान्वितत्वेन त्रिगुणप्रधानकारणतावश्यकत्वेऽपि चैतन्यस्य जगत्यनन्वयाद् न चेतनकारणत्वपक्षो युक्तिसह इति सूचनार्थमाह- *अचेतनमिति*।। तथाच ''न विलक्षणत्वादस्य तथात्वं च शब्दादि''ति सूत्राभिप्रायप्रदर्शनार्थमत्राचेतनपदम्। तेन च ब्रह्मकारणतावादाक्षेपो ज्ञाप्यते। मन्यमानाः=मननेनानुमानाख्येनानुमिन्वाना इत्यर्थः। अत्रानुमिन्वानाः, वेदान्तवाक्यानि प्रधानकारणपक्षे योजयितुं शक्यन्त इति वदन्तीति योजनयाऽनुमानाधीनमेव वेदवाक्यप्रामाण्यम्, इति वेदान्तानां सिद्धे वस्तुनि प्रमाणान्तरापेक्षत्वमिति च साङ्ख्यसिद्धान्तः सूच्यते। वेदान्तवाक्यानि-''न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च'' ''यस्सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः। तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते'' ''यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ती''त्यादीन्येव विवक्षितानीति 'सर्वज्ञस्य' 'सर्वशक्तेः' 'ब्रह्मण' इति पदैर्ज्ञाप्यते। 'प्रधानकारणपक्षेऽपि-प्रधानस्यापि' इत्यपिशब्दद्वयमप्यवधारणर्थकम्। अत एव ब्रह्मकारणतानिरास उत्तरत्रोपपद्यते। अत्र प्रथमवाक्ये स्वाभाविकी क्रियाशक्तिर्या बोधिता, सा हि निष्क्रियत्वाद् ब्रह्मणो न संभवति, प्रधानस्य तु विकारात्मना परिणाममानत्वात् संभवतीति निरूपयति- *सर्वशक्तित्वमिति*।। सर्वज्ञत्वं चेतनधर्मः प्रधानस्य ब्रह्मण इव प्रत्यनसाधनीय इति मत्वा सूचीकटाहन्यायेन द्वितीयमपि सर्वशक्तित्वं प्रथमतो विवृणोति। एवं यथा प्रधानस्यैव सर्वशक्तित्वम्, तथा प्रधानस्यैव सर्वज्ञत्वं ''यः सर्वज्ञ'' इति श्रुतिबोधितमिति शेषः। ननु-ब्रह्मण एव चेतनत्वात् सर्वज्ञत्वं भविष्यति, न तु प्रधानस्याचेतनस्येति स्थिते कथमिदं साहसं यत् प्रधानस्यैव सर्वज्ञत्वम्, न तु ब्रह्मण इत्याक्षिपति- *कथमिति*।। प्रधानस्यैव सर्वज्ञत्वं संभवति; त्रैगुण्यादिति भावः। ब्रह्मणि सर्वज्ञत्वं बाधितमिति निरूपयिष्यन् प्रथमं प्रधाने सर्वज्ञत्वं समन्वयीकरोति- *यत्त्विति*।। न हि ज्ञानं चेतनधर्मः; तस्य सत्त्वपरिणामरूप-

स्यान्तःकरणवृत्तिपदाभिधेयस्य वाऽचेतनधर्मत्वस्यैवाद्वैतिभिरपि स्वीकारात्। तथाच प्रधानपरिणामान्तःकरणस्येव सात्त्विकावस्थामाश्रित्य प्रधानस्यापि ज्ञातृत्वं संभवत्येव; अन्यथा ''तदैक्षते''ति ईक्षणात्मकवृत्तिविशेषोऽपि मायापरिणामरूपो बाधितः स्यात्। न ह्यन्तःकरणपरिणामरूपां मायापरिणामरूपां वा वृत्तिमतिरिच्य प्रमाणजन्यं ज्ञान नाम वस्त्वन्तरमद्वैतिनोऽपि स्वीकर्तुमर्हन्ति। न हि चैतन्यरूपः पुरुष एव जन्यज्ञानम्। न हि स्वस्यैव स्वाश्रयत्वेन ज्ञत्वव्यवहारो भवति। तथाच पुरुषस्य चैतन्यरूपस्य वृत्त्यात्मनाऽपरिणममानत्वात् सत्त्वस्यैव तथा परिणममानत्वाच्च सात्त्विकं प्रधानमेव सर्वज्ञम्, न तु चैतन्यमात्रामिति साङ्ख्यानां मतम्। तदिदं सर्वमभिप्रेत्य तन्मरं संगृह्णाति-* स सत्त्वधर्म इति*।। सत्त्वधर्म एव ज्ञानमित्यत्र भगवद्गीताऽद्वैतिनामपि प्रमाणमेव प्रमाणमित्याह-*सत्त्वादिति*।। न केवलं स्मृतिः, किन्तु लोकप्रसिद्धरपि तत्र प्रमाणमित्याह-*तेन चेति*।। सात्त्विकानां सर्वज्ञत्वव्यपदेशो हि सत्त्वधर्मो ज्ञानमिति स्वीकार एवोपपद्यते, इति वृत्तिविशेष एव ज्ञानम्, न तु चैतन्यम्, तस्यासत्त्वधर्मत्वादिति भावः। ननु-सत्यं सत्त्वपरिणाम एव वृत्तिः, तथापि न वृत्तिमात्रं ज्ञानम्, किन्तु वृत्तिप्रतिफलितचैतन्यमेव; तस्यैव प्रकाशत्वात्, वृत्तेरप्रकाशकत्वाच्च। तथाच वृत्तिप्रतिफलितचैतन्यमेव जन्यज्ञानमिति तस्य परस्पराध्यासाच्चेतनपुरुषधर्मत्वमेव स्वीकर्तव्यमित्यत आह-*न केवलस्येति*।। ज्ञानाश्रयत्वं हि पुरुषस्य ज्ञानकर्तृत्वेनैव वक्तव्यम्। तत्र पुरुषो न कर्ता करणादिसम्बन्धाभावादित्याह- *अकार्यकरणस्येति*।। ततश्च न ज्ञानं पुरुषधर्मः। अन्तःकरणात्मनोस्तु विवेकाग्रहमात्रेणैव बन्धः, न तु परस्पराध्यासेनापि। न हि बिम्बप्रतिबिम्बभावोऽप्यध्यासनिबन्धनः। तथाचात्मन्यन्तःकरणस्योभयोरुभयत्र वा प्रतिबिम्बेनैवाहमादिव्यवहाराद् नाध्यासनिबन्धनमपि सर्वज्ञत्वं ब्रह्मणः संभवतीति भावः। तदिदमाह-*उपलब्धिमात्रस्येति*।। न हि ज्ञानमेव ज्ञानाश्रयो भवति। ज्ञानस्यैव ज्ञानाश्रयत्वं हि मीमांसकमतरीत्या ज्ञानस्य ज्ञानरूपात्मपरिणामित्वेन, श्रीविशिष्टाद्वतादिमत इव नित्यधर्मभूतज्ञानाश्रयत्वेन वाऽद्वतमत इव तादात्म्याध्यासेन वा स्यात्। तत्रान्तिमं मतं पूर्वमेव निरस्तम्, द्वितीयमते तु नित्यत्वात् तस्य जन्यत्वासंभवेन ''ऐक्षते''ति जन्यत्वावगमो विरुद्धयते, प्रथममतं त्वात्मन एव परिणामेऽनित्यत्वापत्त्या न युक्तम्, इत्यगत्या सर्वज्ञत्वादिकं प्रधान एव कथञ्चन कल्पनीयम्। तच्च कथमिति चेत्, तत्राह-*त्रिगुणत्वात् प्रधानस्य सर्वज्ञानकारणभूतं सत्त्वं प्रधानावस्थायामपि विद्यत इति*।। सर्वज्ञानशक्तिमत्त्वेनैव सर्वज्ञत्वम्, ज्ञानशक्तिस्तु सत्त्वगुण एवेति प्रधान एव तद्युज्यते, न तु ब्रह्मणीति निष्कर्षः। अद्वैतिनामपि सर्वज्ञानशक्तिमत्त्वेनैव सर्वज्ञत्वं वक्तव्यमित्याह-*वेदान्तवाक्येष्विति*।। अवश्यम्=नियतम्। न ह्यन्यथा सर्वज्ञत्वोपपत्तिरिति भावः।

तदेव विशदयति- *न हीति*।। किं ब्रह्मणः सर्वदा ज्ञानक्रियाकर्तृत्वेन सर्वज्ञत्वम्, उत कदाचिदेव तत्कर्तृत्वेन। आद्ये ज्ञानं नित्यं वा, उतानित्यक्रियारूपं वा। नाद्ये प्रथम इत्याह- *तथाहि ज्ञानस्य नित्यत्वादिति*।। नाद्ये द्वितीय इत्याह- *अथानित्यमिति*।। क्रियाया जन्यायाः प्रागभावजन्यत्वेन सार्वदिकत्वासंभवात्। एतेन-द्वितीयोऽपि-परास्तः, इत्यगत्या सर्वज्ञानशक्तिमत्त्वेनैव सर्वज्ञत्वमद्वैतिभिरपि वक्तव्यमिति भावः। ननु-अस्तु सर्वज्ञानशक्तिमत्त्वेनैव सर्वज्ञत्वम्, एवमपि न कथं ब्रह्मकारणतावादायोग इत्यत आह- *अपिचेति*।। यद्यपि मतद्वयेऽपि सर्वज्ञानशक्तिमत्त्वेनैव सर्वज्ञत्वं मन्यते; तथापि साङ्ख्यमत एव तदुपपद्यते, नाद्वैतमते। ज्ञानशक्तित्वं हि ज्ञानसूक्ष्मावस्थावत्त्वमेव। तच्चाद्वैतमतेऽन्तःकरणवत्त्वम्, साङ्ख्यमते सत्त्वगुणवत्त्वम्। तत्राद्वैतमते सृष्टेः प्राक् सर्वज्ञस्यान्तःकरणानङ्गीकारात्, परामर्थगत्या सर्वज्ञस्य सर्वदाऽन्तःकरणशून्यत्वाच्च न विकल्पसहं सर्वज्ञत्वम्। साङ्ख्यमते तु सर्वदा सत्त्वगुणवत्त्वात्तदुपपन्नमिति विशेष इत्याह- *प्रागुत्पत्तेः सर्वकारकशून्यमिति*।। परिणामिकारणमन्तःकरणम्, ब्राह्मज्ञानकरणचक्षुरादिकं च ब्रह्मणो नास्तीति न तस्य सर्वज्ञत्वसंभव इति भावः। ननु-अद्वैतमते सृष्टेः प्राक् मायावत्त्वं ब्रह्मणः स्वीक्रियते, अन्तःकरणपरिणाम इव मायापरिणामोऽपि वृत्तिर्ज्ञानक्रियापदवाच्याऽद्वैतिनामभिमतैव। तथाच मायावत्त्वेनैव सर्वज्ञत्वं ब्रह्मणोऽपि संभवतीति न विनिगमनाविरह इत्यह आह- *न च ज्ञानसाधनानां शरीरेन्द्रियादीनामभाव इति*।। अन्तःकरणवृत्तिव्यतिरिक्ते जन्यज्ञाने न प्रमाणम्। तत्तु शरीरेन्द्रियाद्यपेक्षमेव, न मायामात्रेण। ईश्वरसर्वज्ञत्वं हि न वृत्त्यपेक्षम्, किन्तु तत्तद्विषयसम्बद्धचैतन्यमात्रत्वमिति पक्षस्यैवाद्वैतिनां मुख्यत्वात्। अत एव सिद्धान्तलेशसंग्रहादौ तेनैव पक्षेणेश्वरसर्वज्ञत्वपक्षोपसंहार उपपद्यते। तथाच नान्तःकरणाद्यभावेऽपि मायामात्रेण सर्वज्ञत्वोपपादनं युक्तम्; मायापरिणामपक्षे हि माया यद्यप्युपादानकारणं स्यात्, न निमित्तकारणमिति सर्वकारकाभावात् सर्वज्ञत्वोपपादनमशक्यम्; अन्यथा सृष्टिस्थितिसंहाराणां परस्परविरुद्धानां सकृदेवापत्तिः, प्रमायाः सर्वदाऽविशेषादिति भावः। ननु-मायावत्त्वेन ब्रह्मणः सर्वज्ञत्वं न बाधितम्; तस्या एव स्वतःपरिणामिकारणताया दोपविधया निमित्तकारणतायाश्चाद्वैतिभिः स्वीकारात्, धर्माधर्माद्यपेक्षमेवेश्वरस्य स्रष्टृत्वादिकमिति न सकृदेव सृष्ट्याद्यापत्तिः, सिद्धान्तलेशसंगृहीतान्तिमपक्षे तु सर्वकारकवत्त्वेन सर्वज्ञत्वं सुतरामुपपद्यते; सृष्टे प्रागपि सर्वेषां कारकाणां सूक्ष्मरूपमायात्मना ब्रह्मसम्बन्धात्। तथाच न कथं ब्रह्मणः सर्वज्ञत्वं सर्वशक्तिकत्वं चेत्यत आह- *अपिच प्रधानस्य चानेकात्मकस्येति*।। यद्यपि ब्रह्मणः सर्वज्ञत्वं सर्वशक्तित्वं च नानुपपन्नम्; तथापि तस्य कारणत्वमुपादानत्वरूपमप्यद्वैतिनो मन्यन्ते, उपादानत्वं तु परिणममानत्वेनैवान्यत्र दृष्टम्, नान्यथा। तच्च सावयवस्यैव, न निरवयवस्य, इति ब्रह्मण उपादानत्वासंभवः। परिणामिकारणतानिरासोऽयं विवर्तोपादनतावादनिरासस्याप्युपलक्षणम्। न ह्यनेकात्मकत्वं विना विवर्तोपादानमपि दृष्टम्,

अनिर्वचनीयवाददृष्ट्यापि शुक्त्याद्यवच्छिन्नचैतन्यानामनेकात्मकानामेव विवर्तदर्शना दित्याह– *इतीति*।। इतिशब्दः प्रकारवाची युक्त्यन्तरस्यापि समुच्चायक इति भावः। तथाच–न ब्रह्मकारणतावादो युक्तः, किन्तु प्रधानकारणतावाद एव।।

अत्राधिकरणे समालोचनीयानि विषयवाक्यानि छान्दोग्यषष्ठाध्यायगतानि पूर्वपक्षिणां सिद्धान्तिनां च दृष्टयेमानि–

''येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति कथं नु भगवः स आदेशो भवतीति।।३।। यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्।।४।। ५-६-८।। प्रथमः खण्डः। सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्। तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायते।।१।। कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथमसतः सज्जायेतेति सत्त्वेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्।।२।। तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत तत्तेज ऐक्षत बहु स्यां प्रजायेयेति तदपोऽसृजत। तस्माद्यत्र क्वच शोचति स्वेदते वा पुरुषस्तेजस एव तदध्यापो जायन्ते। ता आप ऐक्षन्त बह्वयः स्याम प्रजायेमहीति ता अन्नमसृजन्त तस्माद्यत्र क्वच वर्षति तदेव भूयिष्ठमन्नं भवत्यद्भ्य एव तदध्यन्नं जायते।।४।। द्वितीयः खण्डः। तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्यण्डजं जीवजमुद्भिज्जमिति।।१।। सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति। तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति सेयं देवतेमास्तिस्रो देवता अनेनैव जीवेनात्मनाऽनुप्रविश्य नाम रूपे व्याककरोत।।२।। तासां त्रिवृतं त्रिवृतमेकैकामकरोद्यथा नु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति।।४।। तृतीयः खण्डः। चतुर्थः खण्डः। पञ्चमः खण्डः। षष्टः खण्डः। सप्तमः खण्डः। उद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाच स्वप्नान्तं मे सोम्य विजानीहीति। यत्रैतत्पुरुषः स्वपिति नाम सताा सोम्य तदा संपन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवति।। १ ।। २ ।। ३ ।। ४ ।। तस्य क्व मूलं स्यादन्यात्राद्भ्योऽद्भिः सोम्य शुङ्गेन तेजोमूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमास्सदायतनास्सत्प्रतिष्ठा यथा नु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृदेकैका भवति तदुक्तं पुरस्तादेव भवत्यस्य सोम्य पुरुषस्य प्रयतो वाङ् मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्।।६।। स एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येति होवाच।।८।। अष्टमः खण्डः।। नवमः खण्डः।। दशमः खण्डः। एकादशः खण्डः।। द्वादशः खण्डः।। त्रयोदशः खण्डः।। यथा सोम्य पुरुषं गान्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत् स यथा प्राङ् वोदङ् वा प्रत्यङ् वा प्रध्मायीताभिनद्धाक्ष आनीतोऽभिन्न विसृष्टः।।१।। तस्य यथाऽभिनहनं प्रमुच्य प्रब्रूयादेतां दिशं गान्धारा

एतां दिशं ब्रजेति स ग्रामाद् ग्रामं पृच्छन् पण्डितो मेधावी गान्धारानेवोपसंपद्येतैवमेवाहाचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्योऽथ संपत्स्य इति।।२।। स एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येति होवाच।।३।। चतुर्दश: खण्ड:। पुरुषं सोम्योपतापिनं ज्ञातय: पर्युपासते जानासि मां जानासि मामिति तस्य यावन्न वाङ् मनसि संपद्यते मन: प्राणे प्राणस्तेजसि तेज: परस्यां देवतायां तावज्जानाति।।१।। अथ यदाऽस्य वाङ् मनसि संपद्यते मन: प्राणे प्राणस्तेजसि तेज: परस्यां देवतायामथ न जानाति।।२।। स एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येति होवाच।।३।। पञ्चदश: खण्ड:।।.........स यथा तत्र नादाह्येतैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति तद्धास्य विजज्ञौ तद्धास्य वि जज्ञाविति ।।३।। षोडश: खण्ड:।। इति षष्ठ: प्रपाठक:—इति।।

एषु—''सत्त्वेव सोम्येदमग्र आसीत्'' ''तत्तेज ऐक्षत ता आप ऐक्षन्त'' ''तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ'' इति द्वितीयखण्डाष्टमखण्डगतानि वाक्यानि पूर्वपक्षबीजानि। अत्र द्वितीयखण्डे सद्विद्याया उपक्रम:, अष्टमखण्डे समाप्ति:। नवमादिखण्डास्तु अष्टमखण्डस्यैव शेषभूता:, यतस्तदर्थस्याभ्यास एव क्रियते। तथाचोपक्रमोपसंहारैकरूप्यमेकं पूर्वपक्षे लिङ्गम्। सिद्धान्ते तु—उपक्रमोपसंहारैकरूप्याभ्यासापूर्वताफलार्थवादोपपत्तय: षडपि लिङ्गानीति निष्कर्ष:।।

तत्र द्वितीयखण्डद्वितीयवाक्यं विषय:। तस्य तत्तृतीयवाक्यानन्वयापत्त्या चेतनपरत्वमिति प्रथमसूत्रार्थ:। तृतीयवाक्य एव तेजसोऽपीक्षितृत्वाम्ननात् तुरीयेन वाक्येनाचेतनेक्षणस्यैवोपसंहाराच्च-चेतनेक्षितृत्वमेव गाणं प्रकरणार्थ इति द्वितीयसूत्रांशेन शङ्का तृतीयखण्डने देवतायाश्चेतनाया एवेक्षितृत्वस्याम्नानात्, ''अनेन जीवेनात्मने''ति कारणस्य स्वरूपं चेतनो जीव इति प्रतिपादनाच्च चेतनकारणतावाद एव युक्त इति तत्परिहारश्च क्रियते, इत्युपक्रममधिकृत्य चर्चा। उपसंहारदृष्ट्या तु यद्यपि न तत्रेक्षितृत्वमाम्नातम्, तथाप्यै''तदात्म्यमिदं सर्वमि''ति जीवतादात्म्योपदेशो वर्तते, इति तस्य चेतनकारणतायामेवोपपत्तिरिति प्रतिभाति। तथाचोपसंहारोऽपि न प्रधानकारणतावादस्यानुगुण इत्यपि द्वितीयसूत्रेण प्रतिपाद्यते, अथवा तृतीयसूत्रेण प्रतिपाद्यते। तुरीयसूत्रं तु तृतीयसूत्रस्यैवोपबृंहणरूपं न विशिष्यार्थान्तरं बोधयति। पञ्चमसूत्रं तु ''सता सोम्य तदा संपन्नो भवती''ति वाक्येऽपि तस्यैव सतोऽनुवर्तनात् तस्य चाष्टमखण्डस्थस्य जीवलयाधिष्ठानचेतनविवक्षायामेव तात्पर्यस्य युक्तत्वाद् उपसंहारस्य वस्तुगत्या चेतनपरत्वमेवेति बोधनार्थमित्युपक्रमोपसंहारैकरूप्यनिरासपरम्। षष्ठसप्तमसूत्रे तूपनिषदन्तरवाक्यैकवाक्यता चेतनकारणतायामेव स्वरसेति सूचनार्थे इति विवेक:। तथाच ''सदेवे''त्यादिवाक्यसन्दर्भस्य प्रधानकारणवादे नानुकूल्यम्, इति ''तत्तु समन्वया''दिति सुष्ठु सूत्रितम्।

यतः पौर्वापर्यपर्यालोचनायां चेतनकारणतावाद एव सद्विद्याप्रतिपाद्य इति गम्यते। इदमेवाभिप्रेत्योक्तं भामत्याम्–

पौर्वापर्यपरामर्शाद्यदाम्नायोऽञ्जसा वदेत्।
जगद्बीजं तदेवेष्टम्, चेतने स च आञ्जसः॥

इति। ''सत्त्वेव सोम्येदमग्र आसीदि''ति वाक्यांशमात्रमालोच्य यदि प्रधानमेव जगत्कारणं मन्यते, तर्हि प्रधानं न जगत्कारणम्, सदेवेत्यादिवाक्यघटकसदादिपदाप्रतिपाद्यत्वादिति प्रत्युमानम्। तत्र हेत्वसिद्धिशङ्कावारणार्थं तु–प्रधानम्, सदादिपदाप्रतिपाद्यम्, सदेववाक्यघटकेक्षत्यनन्वयित्वादित्यनुमानान्तरम्, इत्यनुमानद्वयविवक्षापरम्–''इक्षतेर्नाशब्दमि''ति सूत्रमिति भगवत्पादाभिमतोऽर्थः॥

''तदैक्षते''तिवाक्यं यद्यपि वाक्यान्तरम्; तथापि तत्पदार्थस्य सापेक्षत्वेन सद्वाक्येनैकवाक्यतैव सति संभवे स्वीकर्तव्येति वाक्यैकवाक्यतामभिप्रेत्य सद्वाक्यघटकत्वमीक्षतिपदस्य विवक्षितम्। ''तत्तेज ऐक्षते''त्यत्र तत्पदस्य तु सद्वाक्येनैकवाक्यता न संभवति, भिन्नार्थत्वात्, इति न तेजःपदस्यापि चेतनपरत्वसंभवः। यद्यपीक्षत्यनन्वयस्समानः; तथापि तेजःपदेनापि तदभिमानिदेवताया एव परामर्शाद् न दोषः। इदं सर्वमभिप्रेत्याह–*न साङ्ख्यपरिकल्पितमिति*॥ अत्राशब्दपदस्य हेतुपरत्वम्, प्रधानपदमध्याह्रियते, नशब्दार्थापेक्षितप्रतियोगिजगत्कारणांशश्चाकृष्यते। अथवाऽशब्दपदस्य साध्यहेतूभयपरत्वम्। तथाच–प्रधानम्, अशब्दम्=कारणवाक्याप्रतिपाद्यम्, अशब्दत्वात्, तद्घटकसदादिपदाप्रतिपाद्यत्वादिति सूत्रार्थः। अयमेवार्थो भगवत्पादाभिमतः, यतः–'साङ्ख्यपरिकल्पितमचेतनम्, जगतः कारणं न शक्यं वेदान्तेष्वाश्रयितुमि'ति कारणवाक्याप्रतिपाद्यत्वमेव साध्यते। युक्तं चैतत् प्रधानस्यापि प्रकृत्यव्यक्तमायादिपदबोध्यत्वस्य भगवत्पादैरप्युत्तरत्र वर्णनात् प्रधानकारणतायास्तेषामपि संमतत्वाद् न कारणत्वनिषेधमात्रे तात्पर्यं संभवति; अन्यथा हि स्वपक्षविघातः स्यात्। तथाच सद्विद्यादिप्रतिपाद्यत्वनिषेध एव तात्पर्यम्, न कारणत्वमात्रनिषेध इति फलति। सौत्रमशब्दपदं हेतुपरमपीति सूचयन्नाह–*अशब्दं हि तदिति*॥ हिशब्दो हेतुपरः; अत्राशब्दत्वहेतुनाऽशब्दत्वसाधनेऽपि न हेतुसाध्ययोरैक्यम्; सदादिवाक्याप्रतिपाद्यत्वस्य साध्यत्वात्, सदादिविशेष्यपादर्थत्वाभावस्य हेतुत्वाच्चेति न दोषः। ननु–साङ्ख्यमते प्रधानस्यापि सद्रूपत्वात्, कथं सदादिपदाप्रतिपाद्यत्वमित्याशयेन शङ्कते–*कथमशब्दत्वमिति*॥ कथमाक्षेपे। अशब्दत्वं न संभवतीत्यर्थः। अत्र प्रधानम्, अशब्दम्, अनीक्षितृत्वादिति नशब्दस्य काकाक्षिन्यायेनेक्षतिनान्वयस्वीकारेण यद्यपि परिहारः कर्तुं, शक्यते; तथापि ऐक्षतपदं न स्वावाक्य एवाम्नायते, किन्तु सतः कारणत्वप्रतिपादके वाक्यान्तर एवेति

वस्तुस्थित्यनुसारेण स्ववाक्यघटकस्येक्षतेरेवाभावाद् ईक्षत्यनन्वयित्वं नाशब्दत्वसाधनमितिशङ्कान्तरमपि वारितं स्यादित्यभिप्रेत्य प्रकारान्तरेण व्याचष्टे- *ईक्षतेः=ईक्षितृत्वश्रवणात् कारणस्येति*।। यदि सदेवेतिवाक्ये ऐक्षतपदं नास्ति, तर्हि तत्र कारणत्वमपि नोपक्षिप्यत इति कथं सदादिवाक्यमवलम्ब्य प्रधानकारणतावादोत्थितिरिति साङ्ख्यैर्वक्तव्यम्। तत्र यदि "तदैक्षते"तिवाक्यगततत्पदार्थस्यैव सत्पदार्थत्वात् वाक्यैकवाक्यतामभिप्रेत्य स्वपक्षोत्थितिः, तर्हि तद्धटकेक्षत्यन्वययोग्य एव सत्पदार्थो विवक्षणीयः। नच प्रधानमचेतनं तदन्वययोग्यमिति न सदादिपदार्थत्वं तस्येति भावः। तथाच-सत्पदम्, न प्रधानपरम्, तदनन्वयीक्षतिपदसमानाधिकरणत्वादिति हेतुविवक्षायामपि तुल्यवित्तिवेद्यतया प्रधानाशब्दत्वमपि फलतीति न विरुद्धम्। इदमेव विशदयति- *एवं हि श्रूयत इत्यादिना-दर्शयतीत्यन्तेन*।। अत्र- "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमि"त्युपक्रम्य- "तदैक्षत बहु स्यां प्रजायेय तत्तेजोऽसृजते"ति श्रूयत इति योजनया पूर्वोक्तैकवाक्यता सूच्यते। तस्यैव सत्पदवाच्यस्येति योजना। ननु- "तत्तेजोऽसृजते"ति तत्पदवाच्यार्थस्यैव स्रष्टृत्वं श्रयते, न सत्पदवाच्यार्थस्येति शङ्कायामाह- *प्रकृतस्येति*।। तच्छब्दस्योपस्थितपरामर्शित्वनियमात् सत्पदार्थस्यैवोपस्थितत्वाच्च तत्पदार्थोऽपि सत्पदार्थ एवेति भावः। *तेजःप्रभृतेः स्रष्टृत्वमिति*।। तेजःप्रभृतिकर्मकस्रष्टृत्वमित्यर्थः। यद्यपि "तत्तेज ऐक्षते"त्यादौ तेजआदिनैवाबादिसृष्टिः प्रतिपाद्यते; तथापि तेजःपदस्यापि तदभिमानिसत्पदार्थपरमात्मपरत्वात् सत एवाबादिस्रष्टृत्वमपीति न विरोधः। तथाच तेजआदीनामवान्तरकारणत्वेऽपि मुख्यं कारणत्वं सत्पदार्थस्यैव; "तदभिध्यानादेव तु तल्लिङ्गात् स" इति न्यायादिति भावः।।

सूत्राणां न्यायप्रदर्शनपरत्वाद् ईक्षतिशब्दघटितानि तदर्थज्ञत्वादिघटितानि वैतरेयादिवाक्यान्यपि प्रकृताधिकरणविषयवाक्यानीत्यभिप्रेत्याह- *तथान्यत्रेति*।। "आत्मा वा इदमेक आसीद् नान्यत्किञ्चन मिषत्। स ईक्षत लोकान्नु सृजा" इति वाक्यस्थात्मपदस्य गौण्या वृत्त्या प्रधानपरत्वशङ्कानिराकरणं यद्यपि तृतीयसूत्रेणैव भविष्यति, सद्विद्यायां'स्तत्त्वमसी'ति महावाक्येनेवात्रत्यात्मशब्दस्यापि "कोऽयमात्मे"ति प्रक्रम्य "प्रज्ञानं ब्रह्मे"ति महावाक्येनोपसंहारात् "अमृतः समभवदि"ति तन्निष्ठस्य मोक्षोपदेशाच्च; तथापि प्रकृताधिकरणविषयत्वं तु न हीयते। न हि सर्वसूत्रसमन्वयेनैवाधिकारणविषयता नाम। सूत्रान्तराबाध्यमान एकैकसूत्रारूढो न्यायोऽपि सन्न्याय एवेति हि वस्तुस्थितिः। यदि तु कश्चन-आत्मपदस्याप्यनेकार्थत्वादचेतनपरत्वं मन्यते, तर्हि तद्दृष्ट्या प्रथमसूत्रविषयत्वमपि न विरुद्धम्। इदमेवाभिप्रेत्याह- *इतीक्षापूर्विकामेव सृष्टिमाचष्ट इति*।।

एतेन- "षोडशकलं भरद्वाज पुरुषं वेत्थे"त्युपक्रम्य प्रवृत्तानि- "इहैवान्तःशरीरे सोम्य स पुरुषो यस्मिन्नेताः षोडश कलाः प्रभवन्तीति। स ईक्षांचक्र" इत्यादिप्रश्नोपनिषद्वाक्यान्यपि-व्याख्यातानि।

तत्रापि पुरुषशब्देन यद्यपि चेतनस्यैव प्रतीतिः, नाचेतनस्य, एवम्–''तान् होवाचैतावदेवाहमेतत्परं ब्रह्मे''ति महावाक्येन ''अविद्यायाः पर परं तारयसी''ति मोक्षफलेन चोपसंहारश्च वर्तत इति पूर्वतनवाक्यसादृश्यमेव सर्वात्मनापि। षोडशकलाश्च प्रश्नोपनिषदि प्रतिपादिताः प्राण-श्रद्धा-ख-वायुज्योतिरप्-पृथिवीन्द्रिय-मनोऽन्न-वीर्य-तपोमन्त्र-कर्म-लोक-नामानि। यत्तु भामत्यां प्रागादिदिशाः, पृथिव्यन्तरिक्षद्युलोक-समुद्राः, अग्नि-सूर्य-चन्द्रमो-विद्युतः, प्राण-चक्षुः-श्रोत्र-वाचश्च षोडशकला इति छान्दोग्यमनुसृत्य वर्णितम्, तदिदं गुणोपसंहारन्यायेनैकत्वमुभयोरपि मत्वेति न विरोधः। अधिकं कल्पतरौ व्यक्तम्।।

न केवलमीक्षतिशब्दघटितान्येव वाक्यानि विषयः, किन्तु तदर्थबोधकशब्दघटितानि सर्वाणि। तेन च–''यः सर्वज्ञः सर्वविदि''त्यादिमुण्डकवाक्यान्यपि प्रकृताधिकरणविषय इत्याह–*ईक्षतेरिति च धात्वर्थनिर्देश इति*।। शब्दमात्रस्याशब्दत्वाद्धेतुत्वासंभवात् तदर्थविवक्षैव युक्तेति भावः। *यजतेरितिवदिति*।। पूर्वमीमांसायां सप्तमे लक्षणे सूत्रम्–''इतिकर्तव्यताविधेर्यजतेः पूर्ववत्त्वम्'' इति। आख्यातार्थो भावनाऽशत्रयवती साध्यं साधनमितिकर्तव्यता चेति। अत्र सर्वत्रांशत्रयान्वये वक्तव्ये ''सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम'' इति वाक्यविहितसौर्ययाग इतिकर्तव्यतायाः स्वप्रकरणेऽविधानेऽपि वैकृतेनाङ्गेनेतिकर्तव्यतायाः पूर्तिरिति व्यवस्थापनार्थमिदं सूत्रम्। यजतेः सौर्ययागस्य विषय इतिकर्तव्यताविधेः पूर्ववत्त्वमिति सूत्रार्थः। अत्र सौर्ययागविधायके वाक्ये यजतिपदं नास्ति, एवमपि द्रव्यदेवतासम्बन्धात्तद्रनुमानं स्वीक्रियते। तथाचात्र सूत्रे यजतिपदेनानुमानिकयागस्यापि यजतिपदस्य तदर्थपरत्वमूरीकृत्य यथा वर्ण्यते, तद्वत प्रकृतेऽपि सर्वत्र कारणवाक्येषु ईक्षतिपदाभावेऽपि तदर्थकशब्दान्तरसत्त्वमादायापि विषयवाक्यत्वं मन्यत इति भावः। अत्र दृष्टान्ते सोर्ययाग इव प्रत्यक्षयजतिघटितवाक्यान्तराण्यपि विकृतियागपराणि यदि सन्ति, तर्हि तदर्थोऽपि विवक्ष्यत एव, इति दर्ष्टान्तिकेऽपि ईक्षतिशब्दघटितवाक्यम्, तदघटितमपि तदर्थकशब्दघटितं च विषयो भवितुमर्हतीति न दोषः। न हि दृष्टान्तेऽपि यजिधातोः सेतिकर्तव्यताकत्वम्, किन्तु तदर्थस्यैव। तथाच–''यः सर्वज्ञः सर्वविदि:ति वाक्यमपि प्रकृताधिकरणविषयः।।

यद्यप्य''दृश्यत्वादिगुणको धर्मोक्ते''रित्यधिकरणेऽक्षरविद्याया न प्रधानपरत्वं संभवतीति व्यवस्थापितम्, इति तेनैव गतार्थत्वाद् न सर्वज्ञवाक्ये तदन्तःपातिनि प्रधानपरत्वशङ्का समुन्मिषति; तथापि तत्र ''यः सर्वज्ञ'' इत्यादीनां प्रधानपरत्वासंभवं सिद्धवत्कृत्यैवाक्षरस्य ब्रह्मत्वं व्यवस्थापितम्। इदं च प्रधानस्यापि सर्वज्ञत्वमति वादे न संभवतीति प्रधानस्य सर्वज्ञत्वाद्यसंभवोऽत्र स्थिरीक्रियत इत्येतदधिकरणमुपजीव्यैव तदधिकरणप्रवृत्तिरिति मन्तव्यम्। तदेवं चेतनान्वयीक्षणराहित्याद् न प्रधानं जगत्कारणमिति सूत्रार्थः पर्यवसन्नं। ननु–ब्रह्म न जगतः कारणम्; स्वानन्वयीक्षतिशब्दसमानाधिकरण-

सदादिपदाप्रतिपाद्यत्वादिति तेनैव हेतुना ब्रह्मणोऽपि जगत्कारणत्वनिषेधात् कथं सूत्रस्य ब्रह्मकारणतायामपि स्वारस्यम्। न हि निर्विशेषं नित्यज्ञानादिकर्तृ भवतीति पूर्वमेवोक्तम्। वस्तुतस्तु–प्रधानस्यैव ज्ञानानुकूलशक्तिमत्त्वेन सर्वज्ञत्वादिकं संभवतीति पूर्वमुक्तत्वाद् न प्रधानकारणतानिरासे तात्पर्यसंभव इति पूर्वोक्तमनुवदति– *यत्तूक्तमिति*।। परिहरति– *तन्नोपपद्यत इति*।। सत्त्वपरिणामो हि ज्ञानं तदैव भवति, यदि सत्त्वगुणांशस्याधिक्यम्, वृद्धिर्वा। तथाच वधर्ममानावस्थसत्त्वगुणस्यैव ज्ञानाकारेण परिणममानत्वात् प्रधानावस्थायां च तादृशसत्त्वगुणस्यैवाभावाद् न ज्ञानशक्तिमात्रेणापीक्षितृत्वं सर्वज्ञत्वादिकं वा प्रधानस्य युक्तमिति भावः। ननु–सत्त्वगुणवत्त्वमात्रेणैव सर्वज्ञत्वमिति शङ्कते– *ननूक्तमिति*।। सर्वज्ञानशक्तिमत्त्वेन= सत्त्वगुणवत्त्वमात्रेणेत्यर्थः। तदपि नोपपद्यत इत्याह– *काममिति*।। साम्यावस्थायामपि सत्त्वगुणस्य ज्ञानात्मना परिणामे तदानीं तमोगुणपरिणाममोहादिकमपि स्यादिति विरुद्धयोर्ज्ञानमोहयोरपि समावेशापत्त्या सर्वं वाक्यं सावधारणमिति न्यायसिद्धं सर्वज्ञत्वमात्रं कारणस्य विरुद्ध्येयत। सति चैवमक्षरपदेनाचेतनप्रधानविवक्षापि न बाधिता स्यादित्यदृश्यत्वाधिकरणमसङ्गतं स्यादिति भावः। *किञ्चिज्ज्ञमुच्येतेति*।। अज्ञमुच्येतेत्यस्याप्युपलक्षणम्। तथाचाचेतनमज्ञं किञ्चिज्ज्ञं सर्वज्ञं चेति विरुद्धं स्यादिति भावः। इष्टापत्तिशङ्कायां दूषणान्तरमाह– *अपि चेति*।। *नासाक्षिकेति*।। अन्तःकरणाविद्योपहितचैतन्यसम्बन्धं विनेत्यर्थः। प्रमातृचैतन्याश्रितं वृत्त्यविच्छन्नं चैतन्यमेव हि ज्ञानं नाम, न त्वचेतनघटादिसमाश्रितसत्त्वधर्मोऽपि। तथाच सर्वज्ञानानुकूलशक्तिमत्त्वेनापि सर्वज्ञत्वं चेतनस्यैव भवति, नाचेतनस्येति सत्त्वगुणवत्त्वेऽपि प्रधानस्येक्षितृत्वं सर्वज्ञत्वं वा नोपपद्यते, अद्वैतमते तु अविद्योपहितचैतन्यस्य जीवाधिष्ठानेश्वरचैतन्यस्यैव वा साक्षित्वात् ईश्वरसर्वज्ञत्वं न विरुद्धम्। तदेतदाह– *न चाचेतनस्येति*।। *साक्षित्वमिति*।। ''साक्षाद् द्रष्टरि संज्ञायामि''ति पाणिनिसूत्रेण चेतनस्यैव साक्षित्वं प्रतिपादितमिति भावः। एतेन–योगिनोऽपि–व्याख्याताः; विवृद्धसत्त्वगुणावस्थायामेव योगित्वात्, द्रष्टत्वाच्च। ननु–प्रधानविशिष्टस्यैव ब्रह्मणः सर्वज्ञत्वं भवतापि वक्तव्यम्। तथाच भवन्मतरीत्यापि प्रधानकारणत्वेन ब्रह्मकारणात्ववत् ब्रह्मसर्वज्ञत्वेन तदध्यस्तप्रधानस्यापि सर्वज्ञत्वव्यपदेशो न विरुद्धः; परस्पराध्यासादित्याशयेन शङ्कते– *अथेति*।। तादात्म्यकृतमन्यस्यान्यधर्मवत्त्वमित्यत्र दृष्टान्तः– *यथाग्निनिमित्तमिति*।। अथो दहतीत्यत्रायस्त्वेन प्रतीयमानस्य लोहस्य दग्धृत्वमग्निसम्बन्धाधीनमेव, नायस्त्वकृतमिति युक्तम्, प्रकृते तु सत्पदेन साक्षिणः प्रधानस्य चान्यतरस्य ग्रहणसंभव ऐक्षतपदस्य मुख्येक्षणपरत्वं यस्य ग्रहणे, तस्यैव सत्पदेनापि ग्रहणमिति वैषम्यम्, न हि अयःपदेनाग्नेरपि प्रतीतिर्दृष्टान्ते संभवतीति वैषम्यमित्यभिप्रायेण समाधत्ते– *तथा सतीति*।। साक्षिसम्बन्धनिमित्तस्यैवेक्षणस्य विवक्षणे सति। यन्निमित्तम्=यादृश साक्षिनिमित्तकम्। प्रधानस्य=सत्पदार्थतया कल्प्यमानस्य प्रधानस्याचेतनस्य। तदेव=साक्षिरूपम्। *सर्वज्ञं

मुख्यं ब्रह्मेति*।। मुख्यं सर्वज्ञं ब्रह्मेति योजना। *कारणमिति*।। कारणवाक्यगतसदादिपदबोध्यमित्यर्थः। *युक्तमिति*।। गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय इति न्यायादिति भावः।।

अयमाशयः–अध्यासो द्विविधः–सोपाधिको निरुपाधिकश्च। तत्रैव सोपाधिकाध्यासः, यत्राधिष्ठानस्य स्वासाधारणशब्देन प्रतीतिः, यथा पीतः शङ्खः अयो दहतीत्यादौ; निरुपाधिकाधयासस्तु तत्रैव, यत्राधिष्ठानस्याधिष्ठानाध्यस्तसाधारणेदम्पदेन प्रतीतिः, यथेदं रजतमित्यादौ। सदेवेत्यत्र सत्पदेन ब्रह्मप्रधानसाधारण्यमभिप्रेत्यात्र निरुपाधिकाध्यासो यदि स्वीक्रियते, तर्हि प्रधानोपहितं चैतन्यं साक्ष्येव सत्पदार्थ इत्यवश्यमूरीकर्तव्यम्, न तु प्रधानमात्रम्। तथाच साक्षिण ईक्षितृत्व एव पर्यवसानम्। वस्तुतस्तु–''समारोपस्य रूपेण विषयो रूपवान् भवेत्। विषयस्तु तु रूपेण समारोपो न रूपवाानि''ति भामत्युक्त्या साक्षिधर्म ईक्षितृत्वमध्यासेनापि नोपपादयितुं शक्यते, इति न प्रधानस्येक्षितृत्वविवक्षा संभवदुक्तिका। भामत्यां तु हैरण्यगर्भमतमास्थाय शङ्कापरिहारौ व्याख्यातौ। तन्मते हि ईश्वरनिमित्तकारणतामात्रस्य स्वीकारात् तदभिन्ननिमित्तोपादानत्वस्यास्वीकारात् सर्वज्ञादिपदेनेश्वरविवक्षैव क्रियते, न प्रधानविवक्षा, इति न प्रधानकारणतापूर्वपक्षोपपादकता संभवति। एतेन योगिमतमपि–व्याख्यातम्; तत्रापि ''क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः'' इति सूत्रलक्षितस्येश्वरस्यैव निमित्तकारणत्वं सर्वज्ञत्ववादिकं चेति ''यः सर्वज्ञ'' इत्यादावीश्वरविवक्षायामैकमत्यात्, केवलमभिन्ननिमित्तोपादानतायामेव विवादाच्च। ननु–ब्रह्मणोऽद्वैतमतरीत्या सर्वज्ञत्वासंभवात् कथं सत्पदेन तस्य परामर्श इति शङ्कामनुवदति– *यत्पुनरुक्तमिति*।। *नित्यज्ञानक्रियत्वे*।। जानात्यर्थो हि ज्ञानं धात्वर्थत्वात् क्रियेति वक्तव्यम्। क्रिया च नित्येति च व्याहतमिदम्। अथापि नित्यत्वे ज्ञानस्य तत्कर्तृत्वासंभवात् सर्वज्ञत्वमीक्षितृत्वं वा ब्रह्मणो नोपपन्नमिति भावः। *स्वातन्त्र्यासंभवादिति*।। कर्तृत्वासंभवादित्यर्थः। अद्वैतमते ज्ञानं द्विविधं मुख्यमौपचारिकं च। आद्यं चैतन्यमात्रं नित्यम्, द्वितीयं तु वृत्तिः, वृत्त्यवच्छिन्नं चैतन्यं वा। तत्राद्ये केवलचैतन्यरूपत्वस्यैव स्वीकारात्, सर्वदातात्म्यापन्नचैतन्यरूपत्वमेव सर्वज्ञत्वम्, ईश्वरसाक्षिभास्यानां न वृत्तिभास्यत्वम्, जीवसाक्षिभास्येष्वेव वृत्तिस्वीकारादिति नित्यज्ञानक्रियत्वेऽपि न कथमपि सर्वज्ञत्वहानिरित्यभिप्रायेण समाधातुं पृच्छति– *इदं तावदिति*।। ज्ञानानित्यत्वे खल्वसर्वज्ञत्वापत्तिः, न तु तन्नित्यत्व इत्याह– *अनित्यत्वे हीति*।। असौ=असर्वज्ञत्वम्। दोष इति विशेष्याभिप्रायेण पुंलिङ्गम्। ननु–ज्ञानास्य नित्यत्वे कथं सर्वज्ञ इति कर्तृत्वव्यपदेश इति शङ्कामनुवदति– *ज्ञाननित्यत्व इति*।। चैतन्यरूपज्ञानस्यैव सर्वज्ञ इत्यादौ ज्ञाधात्वर्थत्व इत्यर्थः। *स्वातन्त्र्यव्यपदेशो नोपपद्यत इति*।। अजन्यत्वेन तस्य तत्कर्तृत्वासंभवादिति भावः। ननु–घटं जानामीत्यादिस्थले कथं ज्ञानक्रियां प्रति जीवस्य स्वातन्त्र्यम्? यदि घटाकारवृत्तेर्जन्यत्वात्

तदवच्छिन्नस्यापि चैतन्यस्य जन्यत्वमौपचारिकं स्वीक्रियते, तर्हि प्रकृतेऽपि विनापि वृत्तिं सर्वविषयाणां जन्यत्वात् तदवच्छिन्नत्वेन चैतन्यस्य जन्यत्वं संभवतीति न स्वातन्त्र्यव्यपदेशानुपपत्तिः, विषयावच्छिन्नप्रकाशानित्यत्वेनैव हि सवितुरपि प्रकाशयितृत्वस्यापि व्यपदेशः। तथाच कर्मसम्बन्धस्योभयत्र समानत्वात् नेक्षितृत्वाद्यनुपपत्तिरित्यभिप्रायेण समाधत्ते- *प्रततौष्ण्य-प्रकाशेऽपि*।। नित्यप्रकाशेऽपीत्यर्थः। स्वातन्त्र्यव्यपदेशदर्शनात्=कर्तृत्वव्यपदेशदर्शनादित्यर्थः।। ननु-''यस्सर्वज्ञ'' इत्यत्र कर्मसम्बन्धेन स्यातन्त्र्यव्यपदेशेऽपि ''तदैक्षते''त्यत्र तदभावात् कथं तदुपपत्तिरित्याशयने शङ्कते- *नन्विति*।। *न तु ब्रह्मणः प्रागुत्पत्तेरिति*।। ''तदैक्षते''त्यादिवाक्य इति शेषः। तथाच तदैक्षतेत्यादीनां न ब्रह्मपरत्वसंभव इति। कर्माविवक्षायामपि सविता प्रकाशत इति व्यपदेशदर्शनात् तदैक्षतेत्यादीनामपि न ब्रह्मपरत्वानुपपत्तिरित्याशयेन समाधत्ते- *नेति*।। प्रकाशत इति तेप्रत्ययस्याख्यातस्य कर्तृबोधकत्वस्योपपत्त्यर्थ यथा प्रकाशकर्तृत्वं सवितुः प्रकाशस्वभावस्यापि स्वीक्रियते, तद्वदत्रापीति भावः। ''तदैक्षते''त्यादिवाक्यविषय एव-''ननु सवितुर्दाह्यप्रकाश्यसंयोग'' इत्यादिशङ्काग्रन्थाप्रवृत्तिः, न तु यस्सर्वज्ञ इत्यादिस्थल इति पूर्वोक्तमेवार्थम्-''एवमसति ज्ञानकर्मणि ब्रह्मणः-''तदैक्षत'' इति कर्तृत्वव्यपदेशोपपत्तेः'' इत्यत्र ''तदैक्षत''वाक्यप्रयोगेण विशदयति। यदि तु-तदैक्षतेत्यादावपि कर्मपदानुकर्षेण व्याख्या विवक्ष्यते, तदा तु न दोषलेशोऽपीत्याह- *कर्मापेक्षायां त्विति*।। ऐक्षतेत्यस्य सकर्मकधातुत्वादित्यादिः। अनुकर्षयोग्यं कर्मानुकर्षति- *तत्त्वान्यत्वाभ्यामिति*।। *अनिर्वचनीये इति च*।। ''सदेव सोम्येदमग्र आसीत्'' इतीदंतादात्म्यापन्नं सदिति प्रतिपाद्य ''एकमेवाद्वितीयमि''ति सतोऽद्वितीयत्वबोधनेन सत्तादात्म्येन प्रतीयमानं द्वितीयं वस्तु मिथ्येति ज्ञापनात् सदैक्षतैत्यत्रेक्षणकर्म मिथ्याभूतं नामरूपात्मकं जगदेवेति निश्चीयत इति भावः। *नामरूपे इति*।। ''नामरूपे व्याकरवाणी''त्युत्तरत्र नामरूपयोरेव व्याकरणाम्नानादिति भावः। *अव्याकृते इति*।। ईक्षणकाले व्याकरणाभावाद् अव्याकृतत्वोक्तिः। ननु-अव्याकृतयोर्नामरूपयोरीक्षणकर्मत्वं न संभवतीत्यत आह- *व्याचिकीर्षिते इति*।। तथाच व्याचिकीर्षितावस्थाव्याकृतनामरूपयोर्व्याचिकीर्षितत्वाकारेण जन्यत्वात् ईषणाद्युपपत्तिरिति फलति। *ब्रूम इति*।। अद्वैतमतेऽपि चैतन्यस्यौपाधिकं जन्यत्वं स्वीक्रियत इति स्वमतविशदीकरणार्थमिदम्। ईश्वरस्य सर्वज्ञत्वं योगिनामपि सम्मतमित्याह- *यत्प्रसादादिति*।। यो ह्यन्यान् सर्वज्ञकल्पयति, स सर्वज्ञ इत्यवश्यमूरीकर्तव्यम्। अयं चार्थः-''तद्धेतुव्यपदेशाच्चे''त्यनन्तराधिकरणगुणसूत्रन्यायतो लभ्यते। अत्रानुसन्धेयं योगसूत्रम्-''ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्चे''ति। ''भक्तिविशेषादावर्जित ईश्वरस्तमनुगृह्णाति ज्ञानवैराग्यादिने''ति तद्भाष्यकाराः। यत्तु-ईश्वरः, न ज्ञानकर्ता, शरीरेन्द्रियादिशून्यत्वात्, घटादिवदिति पूर्वपक्षिणामनुमानम्, तत्र यदि यत्र यत्र ज्ञानकर्तृत्वम्, तत्र तत्र शरीरेनिद्रयादिमत्त्वमिति व्यतिरेकव्याप्तिर्मन्यते, तर्हि अविद्यादिमत्त्वं वोपाधिः;

शरीरेन्द्रियादिमत्त्वरूपव्यापकव्याप्यत्वस्य ज्ञानकर्तृत्वरूपव्याप्याव्यापकत्वस्य च सत्त्वेन साध्यव्यापकत्वस्य पक्षे साधनाव्यापकत्वस्य च विद्यमानत्वात्। व्यतिरेकव्याप्तिस्थले हि साध्यव्यापकत्वमित्यत्र साध्यपदेन व्यापकस्यैव विवक्षेत्याद्यन्यत्र विस्तृतम्। तदिदं सर्वमभिप्रेत्याह– *अपिचाविद्यादिमत इति*।। *ज्ञानप्रतिप्रतिबन्धकारणरहितस्येश्वरस्येति*।। साक्षिणोऽज्ञानेनानावरणस्यैवाद्वैतमते स्वीकारादिति भावः। श्रुतिबाधान्यथानुपपत्त्यापि प्रकृतोपाधिदोषं व्यवस्थापयति– *मन्त्रौ चेमाविति*।। तथाच बाधोन्नीतत्वात् सन्दिग्धोपाधित्वेऽपि दूषणत्वमपरिहार्यमिति भावः। शरीराद्यनपेक्षत्वे मन्त्रः– *न तस्य कार्यं करणं च विद्यत इति*।। कार्यं शरीरम्, करणमिन्द्रियम्। स एवानावरणज्ञानतायाम्– *स्वाभाविकी ज्ञानबलक्रिया चेति*।। अत्र ज्ञानस्य स्वाभाविकत्ववर्णनाद् अनावरणस्वभावताऽवगम्यते। मन्त्रान्तरमाह– *अपाणिपाद इति*।। ननु–अद्वैतमते जोवेश्वरयोरभेदाभ्युपगमाद् जीवः शरीराद्यपेक्षः, ईश्वरस्तदनपेक्ष इति कथं वक्तुं शक्यते। तथाच साङ्ख्यमत इव तत्रापि जीवातिरिक्तेश्वराङ्गीकारायोगात्, जीवस्य चाकारणत्व उभयसम्मते कथञ्चन–सदैक्षतेत्यादीनां प्रधानपरत्वमेव स्वीकर्तव्यम्, नेश्वरपरत्वमित्याशयेन शङ्कते– *नन्विति*।। ईश्वरादन्यः संसारी नास्तीति योजना। अद्वैतमत इति शेषः। समाधत्ते– *अत्रोच्यत इति*।। अत्र=अस्यां शङ्कायाम्। उच्यते=प्रत्युच्यत इत्यर्थः। सत्यमित्यर्धाङ्गीकारः। तथाचाद्वैतमते नेश्वरादन्यः संसारी वर्तते, वर्तते चेति भावः। कथमिदं न विरुद्धमिति शङ्कायामपि तदेव वाक्यं समाधानम्। सत्यं परमार्थत ईश्वरादन्यः संसारी नास्तीति तदर्थः। तथाचाद्वैतमतेऽपि कल्पितस्य जीवेश्वरभेदस्य स्वीकारात् जीवेश्वरयोर्भेदव्यपदेशस्तत्र तत्र न कथमपि विरुद्ध इति भावः। जीवेश्वरभेदस्यापारमार्थिकत्वमिवशब्दप्रयोगेण सूचयन्नमुमेवार्थमाह– *तथापीति*।। इष्यत एव। वस्तुगत्या नेष्यत इति भावः। वस्तुतोऽभेदेऽप्यौपाधिकभेदे दृष्टान्तमाह– *घटेति*।। करक इति मध्यनालो घटिकाविशेषः। शब्दप्रत्ययव्यवहारो दृष्टः–शब्दभेदः, प्रत्ययभेदः, व्यवहारभेदश्च दृष्ट इत्यर्थः। शब्दविशिष्टः प्रत्ययः शब्दप्रत्ययः, शब्दप्रत्ययविशिष्टो व्यवहारः शब्दप्रत्ययव्यवहार इति विभागः। अन्यत्राप्यन्यव्यवहारो मिथ्याबुद्धिमात्रेण बहुशो दृष्ट इत्युपपादयति– *तथेहापीत्यादिना–संसारिण इत्यन्तेन*।। तथाच–वृत्त्यनेपेक्षमीश्वरद्रष्टृतायाः पूर्वोक्तरीत्या संभवात् ब्रह्मण एव सर्वज्ञत्वादिकम्, न प्रधानस्येति सिद्धम्। इतः परमवशिष्यते कथमनेकात्मत्वाभावाद् ब्रह्मणः कारणत्वम्? किन्त्वनेकात्मकस्य प्रधानस्यैव कारणत्वमिति शङ्का परिहरणीयेति, अतस्तामनुवदति– *यदप्युक्तमिति*।। इयं हि शङ्का यदि प्रधानकारणतावादस्याप्यत्र, संग्रहयोग्यता तदानीमेव संभवति, न तु तस्य संभव इति पूर्वमेव विवेचितम्। यथा चानेकात्मकत्वाभावेऽपि ब्रह्मकारणत्वोपपत्तिः, तथा द्वितीयाध्याये व्यक्तीभविष्यतीति नेह प्रपञ्चयत इत्याह– *तत्

प्रधानस्याशब्दत्वेनैवति*।। समन्वयाध्यायत्वादस्याध्यायस्य समन्वयविचार एवात्र प्रकृत:, न तु विरोधपरिहारोऽपि। तथाच प्रधानस्याशब्दत्वमात्रस्यात्र साधनाद् नात्रावशिष्यते कापि शङ्का परिहरणीया। तर्हि का वा गतिर्विरोधस्येति शङ्कायामविरोधाध्याये सा व्यक्तीकरिष्यत इत्याह-*यथा तु तर्केणापीत्यादिना*।। *इत्यादिनेति*।। आदिपदेन-''कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वे''त्यधिकरणस्यापि ग्रहणम्, यत्रैकात्मकस्यापि ब्रह्मण: कारणत्वं व्यवस्थापयिष्यत इति ध्येयम्।।

इयमत्र सूत्रयोजना-प्रधानम्, न जगत्कारणम्, अशब्दत्वात्; प्रधानम् अशब्दम्, ईक्षत्यनन्वयित्वात्; शब्द:, न प्रधानपर:, तदनन्वयीक्षतिपदवत्त्वादिति वा। अत्राशब्दपदेन प्रधानस्य ग्रहणमिति तु प्रकृताधिकरणेनैवाशब्दत्वस्य साधयिष्यमाणत्वाद् न संभवति। तथाचोत्तरत्रानुमानिकादिशब्देन प्रधानग्रहणेऽपि नात्र तद्ग्रहणं युक्तमिति मन्तव्यम्। एतेन-यस्मिन् शब्द एव प्रमाणं न भवति तदशब्दम्, आनुमानिकं प्रधानमित्यर्थ इति श्रीभाष्यकाराणां विवरणं चिन्त्योपपत्तिकम्। ब्रह्म, नाशब्दम्, नावाच्यम्, ईक्षते:, ईक्षणीयत्वेनाम्नानादिति श्रीमदानन्दतीर्थानां विवरणं तु शास्त्रयोनित्वे निर्णीते पुनरशब्दत्वशङ्काया अनवसरात् सगुणब्रह्मणोऽवाच्यत्वस्य केनाप्यनङ्गीकाराच्चानवसरमेव।।

श्रीशुद्धाद्वैतमते तु-कार्यप्रतिपादकानि वेदान्तवाक्यानि प्रथमपादार्थ:। तेन च सच्चिदानन्दरूपेणाकाशवायुतेजोवाचकघटितानि वाक्यानि षड्विधानि निर्णीयन्ते-अन्यत्रान्यवाचकान्यपि वेदान्तेषु भगवद्वाचकानीति। तत्र ''जन्माद्यस्य यत''इत्यनेन सद्रूपत्वं निर्णीतम्, अनेनाधिकरणेन चिद्रूपत्वं निर्णीयते। ज्ञानस्य सप्तद्वारत्वात्सप्त सूत्राणि। अत्र ब्रह्मण: स्वत: सर्वव्यवहारातीतस्यापि स्वेच्छया प्रमाणविषयत्वं व्यवस्थाप्यते। तथाच ब्रह्म नाशब्दम्=सर्वप्रमाणावेद्यं न भवति; लोकसृष्टिद्वारा व्यवहार्यो भविष्यामीतीक्षितृत्वादिति सूत्रार्थ:। अत्रेक्षतेरिति न धातुनिर्देश:, किन्तु तदर्थनिर्देश इति समानम्। अत एव-''मम त्वन्यदपि स्फुरति। सूत्रव्याख्याने यदुक्तम्-ईक्षतेरिति धात्वर्थनिर्देशो लक्षणया विषयिणा विषयलक्षणादिति-यथा यजतेरिति, तदपि फल्गिव''ति प्रकाशकारा:। यत्तु-स्वार्थप्रत्यायकस्यैव धातोर्निर्देशस्य सूत्रकाराशयगोचरतेति, न ह्यत्र स्वार्थप्रत्यायकधातुर्हेतुतामर्हति; अपक्षधर्मत्वात्, इति तदर्थपरत्वमेव स्वीकर्तव्यम्। अत्राशब्दपदेन प्रमाणावेद्यस्य प्रतियोगिविधया समर्पणं हि पूर्वतनेषु सूत्रेषु ब्रह्मण: प्रमाणान्तरावेद्यत्वस्याव्यवस्थापनाद् रूपभेदेन प्रमाणावेद्यत्वतद्वेद्यत्वयोरत्राप्रसङ्गात्, ब्रह्मणो ज्ञानरूपत्वव्यवस्थापने प्रमाणान्तरावेद्यत्वनिषेधस्यानवसराच्च न सोपपत्तिकम्। न ह्यद्वैतिनोऽश्रौतत्वं प्रधानस्य साधयन्ति, किन्तु कारणवाक्यमहातात्पर्याविषयत्वम्। न ह्यद्वैतिन: कारणमेव ब्रह्म जिज्ञास्यमिति मन्यन्ते, किन्तु तदुपलक्षितमेव, इतीक्षितृत्वादिकं सगुणे कारणेऽद्वैतिनां दृष्ट्या न कथमप्यनुपपन्नमिति दिक्।।५।।

अथ द्वितीयसूत्रमवतारयन्नाह– *अत्राहेति*।। अत्र=प्रधानेक्षितृत्वविषये। *आह*।। पूर्वपक्षीति शेषः। तत्=ईक्षितृत्वम्। अन्यथापि=प्रधानस्य सदादिपदार्थत्वेऽपि। उपपद्यते=साधयितुं शक्यते। कथम्? अचेतनेऽपि चेतनवदुपचारदर्शनात्। यथाऽद्वैतिभिरूपचाराद् ब्रह्मणि ईक्षितृत्वं मन्यते, एवं प्रधानस्याप्यौपचारिकमीक्षितृत्वं संभवति। तथाचोभयत्र समान उपचारे कथमीक्षतिरशब्दत्वसाधकः स्यादिति भावः। अचेतनेऽपि चेतनवदुपचारस्थलं निर्दिशति– *यथेति*।। प्रत्यासन्नपतनताम्=पतनोन्मुखताम्। ननु– एवमपि समान उपचारे कथं प्रधानस्यैव सदादिपदबोध्यत्वं मन्यत इत्याशङ्कते– *कस्मात् पुनरिति*।। मुख्यमीक्षितृत्वम्=मुख्यकल्पमीक्षितृत्वम् यदि मायिकवृत्त्यवच्छिन्नचैतन्याश्रयत्वेन ज्ञातृत्वम्। विषयतादात्म्यापन्नचैतन्यरूपत्वेनैव ज्ञातृत्वे तु चैतन्यस्यैव ज्ञानत्वात् मुख्यमीक्षितृत्वम्। अत्र मते जन्यत्वमात्रमौपचारिकम्, न तु ज्ञानत्वमपीति मन्तव्यम्। तथाच केवलेक्षितृत्वे मुख्येऽपि सकर्मकेक्षितृत्वस्यौपचारिकत्वात् समान उपचार इति मन्तव्यम्। *कल्प्यते*।। कूलस्येव प्रधानस्यैव प्रत्यासन्नसर्गत्वमत्रेतिव्यवस्थापकप्रमाणाभावाद् मतद्वयेऽपि कल्पनायां समानायामप्यप्रामाणिकी प्रधानेक्षितृत्वकल्पनेति भावः। अचेतनस्यैव प्रत्यासन्नसर्गतोक्तप्रकरणार्थ इति द्वितीयतृतीयखण्डगतयोः "तत्तेज ऐक्षत" "ता आप ऐक्षन्त" इति वाक्ययोरचेतनप्रत्यासन्नसर्गपरयोर्दर्शनेनावगम्यते, इति प्रधानेक्षितृत्वकल्पनैव प्रामाणिकी, न ब्रह्मकारणत्वकल्पना; "यत्प्राये श्रूयते यच्च तत्तादृगवगम्यते। भाक्तप्राये श्रुतमिदं ततो भाक्तं प्रतीयत" इति न्यायादित्यभिप्रायेण समाधत्ते– *तत्तेज ऐक्षतेति*।। *अचेतनयोरपि*।। अचेतनयोरेवेत्यर्थः। *उपचारप्राये वचनादिति*।। अन्यथा हि अद्वैतिनां दृष्ट्याऽऽनन्दमयस्यापि जीवत्वमिति न स्यादिति भावः। इदं सूत्रम्=प्रक्रियमाणं सूत्रम्।।

सूत्राकारं निर्दिशति– *गौणश्चेन्नात्मशब्दादिति*।।६।। पूर्वोक्तां शङ्कामनुवदति– *यदुक्तमिति*।। *तदसत्*।। प्रधानसम्बन्ध्येवेक्षतिरिति न संभवतीत्यर्थः। आत्मशब्दादिति सौत्रस्यात्मपदस्यार्थद्वयं वर्तते– स्वरूपशब्दादिति, आत्मशब्दादिति च। तत्र प्रथममर्थमभिप्रेत्याह– *आत्मशब्दादिति*।। सति चैतन्यस्वरूपबोधकात् शब्दादित्यर्थः। तदनन्तरखण्डे हि "अनेन जीवेनात्मने" इति जीवः सत आत्मत्वेन विवक्ष्यते। तच्चाचेतनस्य सत्पदार्थत्वेऽनुपपन्नमिति तत्पदार्थोऽपि चेतन एव स्वीकर्तव्य इति भावः। तदेव विव्रियते– *तत्र यदीत्यादिना– उपपद्यत इत्यन्तेन*।। द्वितीयमर्थं गृहीत्वा व्याचष्टे– *तथेत्यादिना– उपदिशतीत्यन्तेन*।। सत्पदार्थस्य श्वेतकेतोश्चेतनस्यात्मत्वमुपदिशति प्रकरणमिदम्। इदं च तस्यापि चेतनत्व एवोपपद्यत इति भावः।।

"यत्प्राये श्रूयते यच्चे" इति न्यायो हि द्वितीयावादिवाक्यविषयः, न तु प्रथमवाक्यविषयः;

अतोऽण्तेजसोरचेतनविषयत्वेऽपि न विरोध इत्याह- *अप्तेजसोस्त्विति*।। *विषयत्वात्*।। ईक्षणकर्मत्वेन प्रथमं श्रवणादिति भावः। तदेतदाह- *नामरूपेति*।। वस्तुतस्तु तत्रापि तेजोऽधिष्ठानस्य सत एवेक्षितृत्वमिति न लेशतोऽपि विरोधः। व्यक्तं चैतत्-''तदभिध्यानादेव तु तल्लिङ्गात् सः'' ''अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्'' इत्यादावित्याह- *तयोरपि चेति*।। नन्वेवं सति-''सदेवे''त्यत्रापि सदधिष्ठानस्य तदभिमानिदेवताया वैवैक्षितृत्वं तेजआदाविव युक्तमित्याशङ्क्य समाधत्ते- *सतस्त्वात्मशब्दादिति*।। आत्मन एवाधिष्ठानत्वेन तत्समानाधिकरणस्य सतोऽप्यधिष्ठानान्तरकल्पनाया न संभवः। ''पुरुषाद् न परं किञ्चित् सा काष्ठा सा परा गतिरि''तिकठवल्ल्यादिवचनादिति भावः।।

अत्र सूत्रेऽनुसन्धेयानि वाक्यानि सद्विद्याप्रकरणगतानि-द्वितीयखण्डगतं ''तत्तेजोऽसृजते''त्यादिकं पूर्वपक्षे, सिद्धान्ते तु ''सेय देवते''त्यादितृतीयखण्डगतवाक्यसमुदायः, आत्मशब्दघटितानि नवकृत्वोऽभ्यस्तानि-''स एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो''इति वाक्यान्यष्टमादिखण्डान्तिमवाक्यानि च। एतस्यात्मनो भाव ऐतदात्म्यम्। अयमपि प्रयोगो भवितृपरः। एतदात्मकं जगदित्यैतदात्म्यपदार्थ इति कल्पतरुः।।

सूत्रार्थस्तु-ईक्षतिः गौण इति चेत्, न; ईक्षितुरात्मशब्देन परामर्शात्, अथवा चेतनस्वरूपत्वपरामर्शादिति। अत्र पूर्वपक्षिणा 'सदादिपदम्, न प्रधानपरम्, तदनन्वयीक्षत्यन्वयित्वादि'ति सिद्धान्तिनामनुमाने हेत्वसिद्धौ शङ्कितायाम्, प्रधानम्, सदन्वितेक्षत्यनन्वयि, तदन्वितात्मशब्दावाच्यत्वात्, इति हेत्वसिद्धिवारणमनेन क्रियत इति पूर्वसूत्रेण सङ्गतिः।।

श्रीभाष्यमतेऽपीदं समानमेव, परन्तु-निर्विशेषे ब्रह्मणीक्षितृत्वाद्यसंभवात् सगुण एव तत्संभवाद् नाद्वैतमतोपयोगीदमधिकरणमिति तु तदभिप्रायः। अद्वैतमतेऽपि तु सगुणब्रह्मण ईश्वरस्यैव कारणतायाः स्वीकारात्, निर्विशेषकारणतायामपि पूर्वोक्तविधया सर्वतादात्म्यापन्नचैतन्यरूपत्वस्येक्षितृत्व-स्याविरोधाच्च न कोऽपि विरोधः।।

श्रीमदानन्दतीर्थास्तु-गौण आत्मा जीवः, वाच्यः, दृश्यत्वादिति शङ्कायामात्मशब्दस्यात्र श्रूयमाणत्वात् तस्य चानुपचरितस्य परमात्मन्येव संभवात् परमात्मैवेक्षणीयः, न जीव इति सूत्रमिदं व्याचक्षते। अत्र प्रथमसूत्रविषयवाक्यानां जीवपरत्वं यदि शङ्क्यते, तर्हि नोपपन्नम्; तेषां जीवात्मपरतायाः कैरप्यनङ्गीकारेण शङ्काया एवासंभवात्, द्वैतमते जीवात्मनां परमात्मत्वाभावेऽप्यात्मत्वस्य

स्वीकारेणात्मशब्देनोक्तशङ्कानिरासासंभवाच्च। जीवात्मन्यप्यात्मशब्दः केवल आनन्दतीर्थैर्बहुषु स्थलेषु प्रयुज्यते। तद्यथा–''मात्रास्पर्शास्त्वि''तिगीताव्याख्यावसरे–''न त्वात्मनः सुखदुःखादिः संभवति'', ''यद्यात्मनः स्वतः स्युः, सुषुप्तावपि स्युः।'' ''अत आत्मनो देहाद्यात्मभ्रम एव दुःखकारणम्'' इति। एवं ''नासतो विद्यते भाव'' इति श्लोकव्याख्यावसरेऽपि–''आत्मा नित्य'' इत्युक्तम्। किमात्मैव नित्यः, आहोस्विदन्यदपि अन्यदपि। तत्किमित्याह–*नासत इति*।। असतः कारणस्य सतो ब्रह्मणश्चाभावो न विद्यते; ''प्रकृतिः पुरुषश्चैव नित्यौ कालश्च सत्तमे''ति श्रीविष्णुपुराणवचनादि''ति। अत्रात्मशब्दो न ब्रह्मपर इति विशदमेव। केवलं स्थालीपुलाकन्यायेनेदमुदाहृतम्। सूत्रकारोऽपि–''एवं चात्माकात्स्र्न्यम्'' इत्यत्रात्मशब्देन जीवमेवाभिप्रैतीति तेऽपि तु मन्यन्त एव। तथाचात्मशब्दः परमात्मन्येव मुख्य इति नेदं सङ्गतम्। यद्यत्रौपचारिक एवात्मा विवक्ष्यते, तर्हि बहुतरश्रुतिविरोधः; बहुषु श्रुतिषु तैरुदाहृतास्वपि जीवेऽप्यात्मशब्दप्रयोगात्। ''गुहां प्रविष्टावात्मानौ ही''ति भगवदंशे जीवेऽप्यात्मशब्दप्रयोगोऽप्यत्रानुसन्धेयः।।

श्रीवल्लभाचार्यास्तु–गोणः=सगुणमेव ब्रह्मेति चेत्, तन्न; आत्मशब्दादिति सूत्रं व्याचक्षते। एतन्मतं तु ब्रह्मणः प्रक्रान्तस्याशब्दमित्यादिनपुंसकशब्दपरामृष्टस्य पुंलिङ्गेन गौणपदेन विशेषणं न स्वरसम्। एवम्–''नात्मा श्रुतेर्नित्यत्वाच्च ताभ्य'' इति सूत्रादावात्मशब्दो जीवेऽपि प्रयुज्यत इत्यात्मशब्दस्य न हेतुत्वं सगुणतानिषेधे। गौणपदस्य गौण्या वृत्त्या गम्येऽर्थे प्रसिद्धस्य सगुणपरत्वकल्पनायोगः, सगुणत्वस्यैव प्रमाणान्तरवेद्यत्वसाधकत्वेन प्रमाणान्तरवेद्यत्वसमर्थनस्य पूर्वसूत्रोक्तार्थसाधनेऽनुपयोगः, स्वतन्त्रार्थान्तरविवक्षायां तु वाक्यविशेषसमन्वयपादेऽत्र न सङ्गतिः, ईक्षत्यधिकरणगुणसूत्रत्वानुपपत्तिश्चेत्याद्यनुसन्धेयम्। तथाच प्रधानकारणताशङ्कानिरासपरतयैवेदं सूत्रं विवरणीयम्। अङ्गीकृतं ह्येवमेव शुद्धब्रह्मपरिणामितासिद्धान्तव्यवस्थापनपरैर्भास्कराचार्यैरपि विवरणमस्य सूत्रस्य। शुद्धाद्वैतमते हि निर्गुणब्रह्मपरिणामितायाः स्वीकारात् तस्य चेक्षितृत्वादीनां मुख्यानामसंभवात् प्रधानकारणतावादेन बहुधा साम्यं वर्तते, इति तन्निराकरणमेवात्र प्रतिपिपादयिषितम्, न तु तन्निर्गुणत्वम, इति भास्कराचार्याणां पद्धतिः कुतो वाऽत्र नाद्रियत इति चिन्तनीयमिदम्। तदिदं सिद्धम्–यत् प्रधानम्, न सदादिपदार्थः, तदन्वितात्मपदार्थत्वाभावादित्येवोक्तसूत्रार्थः समुचित इति।।६।।

ननु–आत्मशब्दोऽपीक्षतिरिव गौणः सन् प्रधानपरामर्शको भवत्विति शङ्कायामप्यात्मशब्दादित्येव समाधानम्; शब्दपदस्याभिधावृत्त्या बोधक एव बहुशो दर्शनादिति यद्यपि भवति; तथापि प्रकारान्तरेणापि समाधातुं तृतीयं सूत्रमित्यवतारयति– *अथोच्येतेति*।। आत्मनः

सर्वार्थकारित्वात्=आत्मापेक्षिताशेषकार्यकारित्वात्। आत्मा हि निस्सङ्गो न कर्ता, किन्तु चिन्मात्रत्वाद्वोक्तैव, इति तद्वोक्तृत्वं प्रधानादिकर्तृत्वाधीनमेव, इति मुख्यमीक्षणकर्तृत्वं यदा प्रधानस्यैव, तदाऽऽत्मशब्देनापि तद्ग्रहणं न विरुद्धमिति भावः। तदेतदाह- *प्रधानं हीति*॥ अथवाऽऽत्मशब्दोऽचेतनेऽपि न विरुद्ध इत्याह- *अथवेति*॥ तत्र दृष्टान्तमाह- *यथैक एव ज्योतिरिति*॥ पूर्वपक्षमुपसंहरति- *तत्रेति*॥ उत्तरं पठति=उत्तरात्मकं सूत्रं पठतीत्यर्थः। *तन्निष्ठस्येति*॥ तन्निष्ठस्य=सन्निष्ठस्य, सद्भावमापन्नस्य मोक्षोपदेशात्=मुक्तत्वोपदेशादिति सूत्रार्थः। आत्मपदार्थः, नाचेतनम्, मुक्तात्मस्वरूपत्वात्। न हि मुक्तात्माऽचेतनं भवितुमर्हतीति सौत्रानुमानप्रयोगः। तदेतदाह- *न प्रधानमित्यादिना- मोक्षोपदेशादित्यन्तेन*॥ अप्रयोजकताशङ्कां निरस्यति- *यदि हीत्यादिना- ऋच्छेदित्यन्तेन*॥ ननु- ''तत्त्वमसी''त्यादिवाक्यं केवलमर्थवादरूपम्, न स्वार्थपरम्; ''आम्नायस्य क्रियार्थत्वादि''ति न्यायादित्याशङ्क्याह- *तस्माद्यथेत्यादिना- उपपद्येतेत्यन्तेन*॥ सिद्धार्थानामपि स्वार्थे प्रामाण्यव्यवस्थापनादिति भावः। ''तत्त्वमसी''त्यादीनामप्युपासनापरत्वेन प्रतिपत्तिविधिशेषतयैवान्वय इति शङ्कायामाह- *अन्यथेति*॥ सिद्धार्थे प्रामाण्याभाव इत्यर्थः। सम्पदुपासनापरत्वे दोषमाह- *अनित्यफलं स्यादिति*॥ ननु- अनित्यफलानि बहून्युपासनानि शास्त्रे प्रतिपाद्यन्त इति प्रकृतेऽपि तथात्वेऽपि न दोष इति शङ्कायामाह- *तत्रेति*॥ ''तत्त्वमसी''त्यादीनां नित्यमोक्षोपदेशपरत्वं न स्यादिति भावः। निगमयति- *तस्मादिति*॥ सदणिमनि=सदेवेत्यादिप्रस्तुते सूक्ष्मे *आत्मशब्दस्य न गौणत्वम्*॥ नाचेतने प्रधाने आत्मशब्दप्रवृत्तिः; प्रकरणादितात्पर्यग्राहकप्रमाणविरोधादिति भावः। यत्त्वात्मशब्दस्यान्यत्राचेतनादिपरत्वम्, तदपि तदनुगुणप्रकरणाद्यधीनमेवेत्याह- *भृत्य इत्यादिना- निश्चीयत इत्यन्तेन*॥

तदेवं शङ्कोत्तरत्वेनोक्तं सूत्रं व्याख्यातम्। साम्प्रतं स्वातन्त्र्येण प्रधाननिरासपरत्वमुक्तसूत्रस्येत्याह- *अथवेति*॥ प्रथमव्याख्यायामनुमानादावात्मशब्दस्य स्थाने सत्पदप्रयोगमात्रे विशेषः; अन्यत्सर्वं समानम्॥७॥

इतः परं सूत्रचतुष्टयं पूर्वपक्षनिरासकस्वतन्त्रहेतुपरमिति सर्वसम्मतमिदम्। प्रायेण श्रीवल्लभाचार्या अत्राधिकरणे श्रीमदानन्दतीर्थमतमेवानुसरन्ति। तत्र ''हेयत्वावचनाच्चे''ति सूत्रमात्मशब्दस्य ''तैत्तिरीयेऽन्नमयादावनात्मन्यपि प्रयोगात् प्रधानपरत्वेऽपि तदविरोध इति शङ्कावारणार्थम्। शङ्कावारणप्रकारस्तु- अन्नमयादिस्थल आत्मशब्दप्रयोगेऽपि न तस्य मुख्यमात्मत्वं स्वीक्रियते; ततोऽन्यस्य निरूपणात्, अत्र तु सतोऽन्यद् न निरूपितम्, इति न तद्दृष्टान्ततासंभव इति। तथाच सत्पदार्थः चेतन एव, पर्यवसितावगतिविषयात्मपदार्थत्वादित्यनुमानप्रयोगोऽत्र विवक्षितः। तदेतत् सर्वं स्थूलारुन्धतीन्यायप्रदर्शनपूर्वकं भाष्यकार आह- *यद्यनात्मैवेत्यादिना*॥

ननु–षष्ठप्रपाठकसमाप्तिरचेतनप्रधाननिष्ठैव भवतु, का क्षतिरिति शङ्कायामप्येतदेव सूत्रं समाधानमित्याह– *च शब्दः प्रतिज्ञाविरोधेति*।। ''येनाश्रुतमि''त्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञानिर्वाहार्थ तत्परत्वं न समुचितम्। नहि प्रधानज्ञानेन जीवानामपि तदकार्याणां ज्ञानं भवितुमर्हतीति साङ्ख्यानामपि मतमिति भावः। तदेतदाह– *न च सच्छब्दवाच्य इत्यादिना*।। *अप्रधानविकारत्वादिति*।। प्रधानविकारत्वाभावादित्यर्थः। भोक्तृवर्गस्य नित्यत्वेन विकारत्वमेव न संभवति, सुतरामचेतनप्रधानविलक्षणस्य तद्विकारत्वम्; अन्यथा ''न विलक्षणत्वादि''तिशङ्काया एवासंभवादिति भावः।।८।।

स्वाप्ययात्।।९।। जीवस्य सत्पदार्थे लयः प्रतिपाद्यमानस्तस्य चेतनत्वं गमयति। न हि चेतनस्याचेतनभावो भवति; तद्भावस्यैव लयत्वात्। तथाच सत्पदार्थः, चेतनः, जीवलयाधारत्वादिति सौत्रो न्यायो वेदितव्यः। ननु–अद्वैतमतेऽपि जीवस्य नित्यत्वात् कथं लय इत्याशङ्कायामाह– *मनःप्रचारेति*।। व्यक्तं चैतत् ''चराचरव्यापश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वादि''त्यत्र। स्वपितिनामनिर्वचनपरस्य तस्यार्थवादत्वेऽपि वक्ष्यमाणदेवताधिकरणात् स्वार्थेऽपि तात्पर्यमिति भावः। अत्र स्वशब्दस्यात्मपरत्वेनैकं व्याख्यानम्, स्वीयपरत्वेनापरं व्याख्यानम्। तत्र प्रथमपक्षानुसारेणाह– *एवं स्वमात्मानमिति*।। द्वितीयपक्षानुसारेणाह– *यदि पुनरिति*।।९।।

गतिसामान्यात्।।१०।। गतेः=तात्पर्यस्य, सामान्यात्=एकरूपत्वात्। सर्वेषु चेतनकारणताया ऐकरूप्यावगमादित्यर्थः। वेदान्तानां ह्यपौरुषेयाणां व्यवस्थितं प्रामाण्यम्, इति वैरूप्यप्रसङ्गो न युक्तः। येषां तु मते कारणमनुमानादिप्रमाणान्तरगम्यम्, तन्मते तु न व्यवस्थितं प्रामाण्यम्; ''तर्काप्रतिष्ठानादि''ति न्यायादिति भावः। तदेतदाह– *यदि तार्किकसमय इति*।। तर्कप्रधानसाङ्ख्यादिसिद्धान्त इत्यर्थः। अत्र तार्किकपदप्रयोगेण भामत्युक्तरीत्याऽणुकारणवादादि-निराकरणेऽप्यधिकरणतात्पर्यमवगम्यते। यद्यप्यत्र–''ईक्षतेर्नाशब्दम्'' ''गौणश्चेन्नात्मशब्दादि''त्यादीनां सर्वेषां सूत्राणामणुकारणवादनिरासेऽपि न तात्पर्यम्; काणादादिभिरात्मशब्दादीनामणुषु प्रवृत्तिरित्याद्यनङ्गीकारात्; तथापि वृत्तिकारमतेऽनन्तराधिकरणे ''कामाच्च नानुमानापेक्षे''त्येकेन सूत्रेण प्रधानवादस्यापि प्रसङ्गाद् निरासवद् एकेन ''गतिसामान्यादि''ति सूत्रेणाणुकारणवादस्यापि प्रसङ्गाद् निरासाद् न किमपि भामतीमतेऽपि विरुद्धम्। एतेन–साङ्ख्यपदपरित्यागेनात्र तार्किकपदप्रयोगेऽपि बीजम्–सूचितम्। अमुमेवाशयं विशदयति भाष्यकारः– *क्वचित् चेतनं

ब्रह्म–क्वचिदन्यदेवेति*।। यदि वार्तिकोक्तरीत्याऽचेतनप्रधानकारणवादनिरास एव तात्पर्यम्, तर्हि कथमत्र–क्वचिदन्यदेवेति मतान्तरस्य परामर्शो भाष्यकाराणाम्?

समानगतित्वम्=गतिसामान्यम्; उपक्रमाद्यवगततात्पर्यमिति यावत्। *चक्षुरादीनामिवेति*।। व्यवस्थितप्रामाण्यादिति शेषः।।१०।।

न केवलं तात्पर्यग्राहकलिङ्गावसेयं चेतनकारणत्वम्, किन्तु श्रौतमपीत्याह सूत्रकारः– *श्रुतत्वाच्चेति*।।११।। उत्तरमीमांसायां श्रुतिशब्देन रूढपदानां ग्रहणम्, पूर्वमीमांसायां तु करणत्वादिबोधकतृतीयादिविभक्तेरित्यन्यत्र स्पष्टम्।।११।।

इति प्रदीप पञ्चममीक्षत्यधिकरणम् समाप्तम्।।*

भामती

ब्रह्मजिज्ञासां प्रतिज्ञाय जन्माद्यस्य यत इत्यादिना तत्तु समन्वयादित्यन्तेन सूत्रसन्दर्भेण सर्वज्ञे सर्वशक्तौ जगदुत्पत्तिस्थितिविनाशकारणे प्रामाण्यं वेदान्तानामुपपादितम्। तच्च ब्रह्मणीति परमार्थतो न त्वद्यापि ब्रह्मण्येवेति व्युत्पादितम्। तदत्र सन्दिह्यते। तज्जगदुपादानकारणं किं चेतनमुताचेतनमिति। अत्र च विप्रतिपत्तेः प्रतिवादिनां विशेषनुपलम्भे सति संशयः। तत्र च प्रधानमचेतनं जगदुपादानकारणमनुमानसिद्धमनुवदन्त्युपनिषद इति सांख्याः। जीवाणुव्यतिरिक्तचेतनेश्वरनिमित्ताधिष्ठिताश्चतुर्विधाः परमाणवो जगदुपादानकारणमनुमितमनुवदन्तीति काणादाः। आदिग्रहणेनाभावोपादानत्वादि ग्रहीतव्यम्। अनिर्वचनीयानाद्यविद्याशक्तिमच्चेतनोपादानं जगदागमिकमिति ब्रह्मविदः। एतासां च विप्रतिपत्तीनामनुमानवाक्यानुमानवाक्याभासा बीजम्।

तदेव विप्रतिपत्तेः संशये किं तावत्प्राप्तम्? तत्र

ज्ञानक्रियाशक्त्यभावाद् ब्रह्मणोऽपरिणामिनः।
न सर्वशक्तिविज्ञाने प्रधाने त्वस्ति सम्भवः॥

ज्ञानक्रियाशक्ती खलु ज्ञानक्रियाकार्य्यदर्शनोन्नेयसद्भावे। न च ज्ञानक्रिये चिदात्मनि स्तः, तस्यापरिणामित्वादेक्तवाच्च। त्रिगुणे च प्रधाने परिणामिनि सम्भवतः। यद्यपि च साम्यावस्थायां प्रधाने समुदाचरद्वृत्तिनी क्रियाज्ञाने न स्तः, तथाप्यव्यक्तेने शक्त्यात्मना रूपेण सम्भवत एव। तथा च प्रधानमेव सर्वज्ञं च सर्वशक्ति च, न तु ब्रह्म। स्वरूपचैतन्यं त्वस्यावृत्तिकमनुपयोगि जीवात्मनामिवास्माकम्। न च स्वरूपचैतन्ये र्त्तृत्वम्, अकार्य्यत्वात्तस्य। कार्य्यत्वे वा न सर्वदा सर्वज्ञता। भोगापवर्गलक्षणपुरुषार्थद्वयप्रयुक्तानादिप्रधानपुरुषसंयोगनिमित्तस्तु महदहङ्कारादिक्रमेणाचेतनस्यापि चेतनानधिष्ठितस्य प्रधानस्य परिणामः सर्गः। दृष्टं चाचेतनं चेतनानधिष्ठितं पुरुषार्थे प्रवर्त्तमानम्। यथा वत्सविवृद्ध्यर्थमचेतनं क्षीरं प्रवर्त्तते। 'तदैक्षत बहुस्यां प्रजायेयेति' इत्याद्याश्च श्रुतयोऽचेतनेऽपि चेतनवदुपचारात् स्वकार्य्योन्मुखत्वमादर्शयन्ति। यथा कूलं पिपतिषतीति।

यत्प्राये श्रूयते यच्च तत्तादृगवगम्यते।
भाक्तप्राये श्रुतमिदमतो भाक्तं प्रतीयते।।

अपि चाहुर्वृद्धाः–'यथाऽग्रयप्राये लिखितं दृष्ट्वा वदन्ति भवेदयमग्रयः' इति, तथेदमपि 'ता आप ऐक्षन्त' 'तत्तेज ऐक्षत' इत्याद्युपचारप्राये श्रुतम्। तदैक्षतेत्यौपचारिकमेव विज्ञेयम्। अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरणवाणीति च प्रधानस्य जीवात्मत्वं जीवार्थकारितयाह। यथा हि भद्रसेनो राजार्थकारी राज्ञा भद्रसेनो ममात्मेत्युपचर्य्यते। एवं तत्त्वमसीत्याद्याः श्रुतयो भाक्ताः सम्पत्त्यर्था वा द्रष्टव्याः। स्वमपीतो भवतीति च निरुक्तं जीवस्य प्रधाने स्वकीयेऽप्ययं सुषुप्तावस्थायां ब्रूते। प्रधानांशतमःसमुद्रेके हि जीवो निद्राणस्तमसीव मग्नो भवति। यथाहुः–'अभावप्रत्ययालम्बना वृत्तिर्निद्रा' इति। वृत्तीनामन्यासां प्रमाणादीनामभावस्तस्य प्रत्ययः कारणं तमस्तदालम्बना निद्रा जीवस्य वृत्तिरित्यर्थः। तथा सर्वज्ञं प्रस्तुत्य श्वेताश्वतरमन्त्रोऽपि 'स कारणं करणाधिपाधिपः' इति प्रधानाभिप्रायः। प्रधानस्यैव सर्वज्ञत्वं प्रतिपादितमधस्तात्। तस्मादचेतनं प्रधानं जगदुपादानमनुवदन्ति श्रुतय इति पूर्वः पक्षः। एवं काणादादिमतेऽपि कथञ्चिद्योजनीयाः श्रुतयः। अक्षरार्थस्तु ''प्रधानकारणपक्षेऽपि'' इति ''प्रधानस्यापि'' इति अपिकारावेवकारार्थौ। स्यादेतत्–सत्त्वसम्पत्त्या चेदस्य सर्वज्ञताऽथ तमःसम्पत्त्याऽसर्वज्ञतैवास्य कस्मान्न भवतीत्यत आह *तेन च सत्त्वधर्मेण ज्ञानेन* इति। सत्त्वं हि प्रकाशशीलं निरतिशयोत्कर्षं सार्वज्ञयबीजम्। यथाहुः–'निरतिशयं सार्वज्ञ्यवीजम्' इति। यत् खलु सातिशयं तत् क्वचिन्निरतिशयं दृष्टं, यथा कुवलामलकविल्वेषु सातिशयं महत्त्वं व्योम्नि परममहति निरतिशयम्। एवं ज्ञानमप्येकद्विबहुविषयतया सातिशयमित्यनेनापि क्वचिन्निरतिशयेन भवितव्यम्। इदमेव चास्य निरतिशयत्वं यद्विदितसमस्तवेदितव्यत्वम्। तदिदं सर्वज्ञत्वं सत्त्वस्य निरतिशयोत्कर्षत्वे सम्भवति। एतदुक्तं भवति–यद्यपि रजस्तमसी अपि स्तः, तथापि पुरुषार्थप्रयुक्तगुणवैषम्यातिशयात् सत्त्वस्य निरतिशयोत्कर्षे, सार्वज्ञ्यं कार्य्यमुत्पद्यत इति। प्रधानावस्थायामपि तन्मात्रं विवक्षित्वाऽविवक्षित्वा च तमः कार्यं प्रधानं सर्वज्ञमुपचर्य्यत इति। अपिभ्यामवधारणस्य व्यवच्छेद्यमाह *न केवलस्य* इति। नहि किञ्चिदेकं कार्य्यं जनयेदपि तु बहूनि। चिदात्मा चैकः, प्रधानन्तु त्रिगुणमिति तत एव कार्य्यमुत्पत्तुमर्हति, न चिदात्मन इत्यर्थः। तवापि च योग्यतामात्रेणैव चिदात्मनः सर्वज्ञताभ्युपगमौ न कार्य्ययोगादित्याह–*त्वयाऽपि* इति। न केवलस्याकार्य्यकारणस्येत्येतर्त्सिहावलोक्तिन प्रपञ्चयति *प्रागुत्पत्तैः इति*। *अपि च प्रधानस्य इति* चस्त्वर्थः।

एवं प्राप्त उच्यते–नाम रूप प्रपञ्च लक्षणकार्य्यदर्शनादेतत्कारणमात्रवदिति सामान्यकल्पनायामस्ति प्रमाणं, न तु तदचेतनं चेतनमिति वा

विशेषकल्पनायामस्त्यनुमानमित्युपरिष्टात्प्रवेदयिष्यते। तस्मान्नामरूपप्रपञ्चकारणभेदप्रमायामाम्नाय एव भगवानुपासनीयः। तदेवमाम्नायैकसमधिगमनीये जगत्कारणे–

पौर्वापर्य्यपरामर्शाद् यदाम्नायोऽञ्जसा वदेत्।
जगद्बीजं तदेवेष्टं चेतने च स आञ्जसः॥

तेषु तेषु खल्वाम्नायप्रदेशेषु तदैक्षतेत्येवंजातीयकैर्वाक्यैरीक्षितुः कारणाज्जगज्जंन्माख्यायते इति, न च प्रधानपरमाण्वादेरचेतनस्येक्षितृत्वमाञ्जसम्। सत्त्वांशेनेक्षितृ प्रधानं तस्य प्रकाशक्तत्वादिति चेत्। न; तस्य जाडयेन तत्त्वानुपपत्तेः। कस्तर्हि रजस्तमोभ्यां सत्त्वस्य विशेषः? स्वच्छता। स्वच्छं हि सत्त्वम्। अस्वच्छे च रजस्तमसी। स्वच्छस्य च चैतन्यबिम्बोद्ग्राहितया प्रकाशत्वव्यपदेशो नेतरयोरस्वच्छतया तद्ग्राहित्वाभावात्। पार्थिवत्वे तुल्य इव मणेर्बिम्बोद्ग्राहिता न लोष्ठादीनाम्। ब्रह्मणस्त्वीक्षितृत्वमाञ्जसम। तस्याम्नायतो नित्यज्ञानस्वभावत्वविनिश्चयात्। नन्वत एवास्य नेक्षितृत्वं; नित्यस्य ज्ञानस्वभावभूतस्येक्षणस्याक्रियात्वेन ब्रह्मणस्तत्प्रति निमित्तभावाभावात्। अक्रियानिमित्तस्य च कारणत्वनिवृत्तौ तद्व्याप्तस्य तद्विशेषस्य कर्तृत्वस्य निवृत्तेः। सत्यं ब्रह्मस्वभावश्चैतन्यं नित्यतया न क्रिया, तस्य त्वनवच्छिन्नस्य तत्तद्विषयोपधानभेदावच्छेदेन कल्पितभेदस्यानित्यत्वं कार्य्यत्वं चोपपद्यते। तथा चैवंलक्षणे ईक्षणे सर्वविषये ब्रह्मणः स्वातन्त्र्यलक्षणं कर्तृत्वमुपपन्नम्। यद्यपि च कूटस्थनित्यस्यापरिणामिन औदासीन्यमस्य वास्तवं तथाप्यनाद्यनिर्वचनीयाविद्यावच्छिन्नस्य व्यापारवत्त्वमवभासत इति कर्तृत्वोपपत्तिः। परैरपि च चिच्छक्तेः कूटस्थनित्याया वृत्तीः प्रति कर्तृत्वमीदृशमेवाभ्युपेयम्। चेतन्यसामानाधिकरण्येन ज्ञातृत्वोपलब्धेः। न हि प्रधानिकान्यन्तर्बहिष्करणानि त्रयोदश सत्त्वप्रधानान्यपि स्वयमेवाचेतनानि तद्वृत्तयश्च स्वं वा परं वा वेदितुमुत्सहन्ते। नो खल्वन्धाः सहस्रमपि पान्थाः पन्थानं विदन्ति। चक्षुष्मता चैकेन चेद् वेद्यते, स एव तर्हि मार्गदर्शी स्वतन्त्रः कर्त्ता नेता तेषाम्। एवं बुद्धिसत्त्वस्य स्वयमचेतनस्य चितिबिम्बसंक्रान्त्या चेदापन्नं चैतन्यस्य ज्ञातृत्वम्, चितिरेव ज्ञात्री स्वतन्त्रा, नान्तर्बहिष्करणान्यन्धसहस्रप्रतिमान्यस्वतन्त्राणि। न चास्याश्चितेः कूटस्थनित्याया अस्ति व्यापारयोगः। न च तदयोगेऽप्यज्ञातृत्वं व्यापारवतामपि जडानामज्ञत्वात्। तस्मादन्तः करणवर्त्तिनं व्यापारमारोप्य चितिशक्तौ कर्तृत्वाभिमानोऽन्तःकरणे वा चैतन्यमारोप्य तस्य ज्ञातृत्वाभिमानः। सर्वथा भवन्मतेऽपि नेदं स्वाभाविक क्वचिदपि ज्ञातृत्वमपि तु साव्यावहारिकमेवेति परमार्थः। नित्यस्यात्मनो ज्ञानं परिणाम इति च भेदाभेदपक्षमपाकुर्वद्भिरपास्तम्। कूटस्थस्य नित्यस्यात्मनोऽव्यापारवत एव भिन्नं ज्ञानं धर्म इति चोपरिष्टादपाकरिष्यते। तस्माद्वस्तुतोऽनवच्छिन्नं चैतन्यं तत्त्वान्यत्वानिर्वचनीयाव्याकृतव्याचिकीर्षितनामरूपविषयावच्छिन्नं सज्ज्ञानं कार्य्यं तस्य कर्त्ता ईश्वरो

ज्ञाता सर्वज्ञः सर्वशक्तिरिति सिद्धम्। तथा च श्रुतिः–

'तपसा चीयते ब्रह्म ततोऽन्नमभिजायते।
अन्नात्प्राणो मनः सत्त्वं लोकाः कर्मसु चामृतम्॥
यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः।
तस्मादेतद् ब्रह्म नामरूपमन्नं च जायते'॥ इति।

तपसा ज्ञानेन अव्याकृतनामरूपविषयेण चीयते तद्व्याचिकीर्षावद्भवति। यथा कुविन्दादिरव्याकृतं पटादि बुद्धावालिख्य चिकीर्षति। एकधर्मवान् द्वितीयधर्मोपजननेन उपचित उच्यते। व्याचिकीर्षायां चोपचये सति ततो नामरूपमन्नमदनीयं साधारणं संसारिणां व्याचिकीर्षितमभिजायते। तस्मादव्याकृताद् व्याचिकीर्षिताद् अन्नात्प्राणो हिरण्यगर्भो ब्रह्मणो ज्ञानक्रियाशक्त्यधिष्ठानं जगत् सूत्रात्मा साधारणो जायते। यथाऽव्याकृताद् व्याचिकीर्षितात् पटाद् अवान्तरकार्य्यं द्वितन्तुकादि। तस्माच्च प्राणाद् मनआख्यं सङ्कल्पविकल्पादिव्याकरणात्मकं जायते। ततो व्याकरणात्मकात् मनसः सत्यशब्दवाच्यान्याकाशादीनि जायन्ते। तेभ्यश्च सत्याख्येभ्योऽनुक्रमेण लोका भूरादयः। तेषु मनुष्यादिप्राणिनो वर्णाश्रमक्रमेण कर्माणि धर्माधर्मरूपाणि जायन्ते। कर्मसु चामृतं फलं स्वर्गनरकादि। तच्च स्वनिमित्तयोर्धर्माधर्मयोः सतोर्न विनश्यतीत्यमृतं यावद्धर्माधर्मभावीति यावत्। यः सर्वज्ञः सामान्यतः सर्वविद्विशेषतो यस्य भगवतो ज्ञानमयं तपो धर्मो नायासमयम्। तस्माद् ब्रह्मणः पूर्वस्मादेतत्परं कार्य्यं ब्रह्म। किञ्च नामरूपमन्नं च ब्रीहियवादि जायत इति। तस्मात् प्रधानस्य साम्यावस्थायामनीक्षितृत्वात्, क्षेत्रज्ञानां च सत्यपि चैतन्ये सर्गादौ विषयानीक्षणात्, मुख्यसम्भवे चोपचारस्यान्याय्यत्वात्, मुमुक्षोश्चायथार्थोपदेशानुपपत्तेः, मुक्तिविरोधित्वात्तेजः प्रभृतीनाञ्च मुख्यासम्भवेनोपचाराश्रयणस्य युक्तिसिद्धत्वात्, संशये च तत्प्रायपाठस्य निश्चायकत्वात्, इह तु मुख्यस्यौत्सर्गिकत्वेन निश्चये सति संशयाभावाद्, अन्यथा किरातशतसङ्कीर्णदेशनिवासिनो ब्राह्मणायनस्यापि किरातत्वापत्तेः, ब्रह्मैवेक्षित्रनाद्यनिर्वाच्याविद्यासचिवं जगदुपादानं, शुक्तिरिव समारोपितस्य रजतस्य, मरीचय इव जलस्यैकश्चन्द्रमा इव द्वितीयस्य चन्द्रमसः। न त्वचेतनं प्रधानपरमाण्वादि। अशब्दं हि तत्। न च प्रधानं परमाणवो वा तदतिरिक्तसर्वज्ञेश्वराधिष्ठिता जगदुपादानमिति साम्प्रतम्, तेषां भेदेन कार्य्यत्वात्। कारणात्कार्याणां भेदाभावात्। कारणज्ञानेन समस्तकार्यपरिज्ञानस्य मृदादिनिदर्शनेनागमेन प्रसाधितत्वात्। भेदे च तदनुपपत्तेः। साक्षाच्च 'एकमेवाद्वितीयं' 'नेह नानास्ति किञ्चन' 'मृत्योः स मृत्युमाप्नोति' इत्यादिभिर्बहुभिर्वचोभिर्ब्रह्मातिरिक्तस्य प्रपञ्चस्य प्रतिषेधाच्चेतनोपादानमेव जगद्

भुजङ्ग इवारोपितो रज्जूपादान इति सिद्धान्तः। सदुपादानत्वे हि सिद्धे जगतस्तदुपादानं चेतनमचेतनं वेति संशय्य मीमांस्येत। अद्यापि तु सदुपादानत्वमसिद्धमित्यत आह *तत्रेदंशब्दवाच्यम् * इत्यादि * दर्शयति * इत्यन्तेन। तथापीक्षिता पारमार्थिकप्रधानक्षेत्रज्ञातिरिक्त ईश्वरो भविष्यति, यथाहुर्हैरण्यगर्भा इत्यतः श्रुतिः पठिता 'एकमेवाद्वितीयम्' इति, 'बहु स्याम्' इति च चेतनं कारणमात्मन एव बहुभावमाह। तेनापि कारणाच्चेतनादभिन्नं कार्यमवगम्यते। यद्यप्याकाशाद्या भूतसृष्टिस्तथापि तेजोबन्नानामेव त्रिवृत्करणस्य विवक्षितत्वात् तत्र तेजसः प्राथम्यात् तेजः प्रथममुक्तम्। एकमद्वितीयं जगदुपादानमित्यत्र श्रुत्यन्तरमपि पठति *तथान्यत्र* इति। ब्रह्म चतुष्पादष्टाशफं षोडशकलम्। तद्यथा, प्राची प्रतीची दक्षिणोदीचीति चतस्रः कला ब्रह्मणः। प्रकाशवान् नाम प्रथमः पादः। तदर्द्धं शफः। तथा पृथिव्यन्तरिक्षं द्यौः समुद्र इत्यपराश्चतस्रः कला द्वितीयः पादोऽनन्तवान्नाम। तथाग्निः सूर्यश्चन्द्रमा विद्युदिति चतस्रः कलाः, स ज्योतिष्मान्नाम तृतीयः पादः। प्राणश्चक्षुः श्रोत्रं वागिति चतस्रः कलाः स चतुर्थ आयतनवान्नाम ब्रह्मणः पादः। तदेवं षोडशकलं षोडशावयवं ब्रह्मोपास्यमिति। स्यादेतत्। ईक्षतेरिति श्तिपा धातुस्वरूपमुच्यते, न चाविवक्षितार्थस्य धातुस्वरूपस्य चेतनोपादानसाधनत्वसम्भव इत्यतआह "ईक्षतेः" इति। धात्वर्थनिर्देशोऽभिमतः, विषयिणा विषयलक्षणात्। प्रसिद्धा चेयं लक्षणेत्याह *यजतेरितिवत् इति*। *यः सर्वज्ञः* इति सामान्यतः, *सर्ववित्* इति विशेषतः। सांख्यीयं स्वमतसमाधानमुपन्यस्य दूषयति। "यत्तूक्तं सत्त्वधर्मेण" इति। पुनः सांख्यमुत्थापयति *ननूक्तम् इति*। परिहरति। *तदपि इति*। समुदाचरद्वृत्ति तावन्न भवति सत्त्वं, गुणवैषम्यप्रसङ्गेन साम्यानुपपत्तेः। न चाव्यक्तेन रूपेण ज्ञानमुपयुज्यते, रजस्तमसोस्तत्प्रतिबन्धस्यापि सूक्ष्मेण रूपेण सद्भावादित्यर्थः। अपि च चैतन्यप्रधानवृत्तिवचनो जानातिर्न चाचेतने वृत्तिमात्रे दृष्टचरप्रयोग इत्याह *अपि च नासाक्षिका इति*। कथं तर्हि योगिनां सत्त्वांशोत्कर्षहेतुकं सर्वज्ञत्वमित्यत आह *योगिनां तु इति*। सत्त्वांशोत्कर्षो हि योगिनां चैतन्यचक्षुष्मतानुपकरोति नान्धस्य प्रधानस्येत्यर्थः। यदि तु कापिलमतमपहाय हैरण्यगर्भमास्थीयेत तत्राप्याह *अथ पुनः साक्षिनिमित्तम् इति*। तेषामपि हि प्रकृष्टसत्त्वोपादानं पुरुषविशेषस्यैव क्लेशकर्मविपाकाशयापरामृष्टस्य सर्वज्ञत्वं, न तु प्रधानस्याचेतनस्य। तदपि चाद्वैतश्रुतिभिरपास्तमिति भावः। पूर्वपक्षबीजमनुभाषते *यत् पुनरुक्तं ब्रह्मणोऽपि इति*। चैतन्यस्य शुद्धस्य नित्यत्वेऽप्युपहितं सदनित्यं, कार्यमाकाशमिव घटावच्छिन्नमित्यभिसन्धाय परिहरति *इदं तावद्भवान् इति*। *प्रततौष्ण्यप्रकाशे सवितरि*। इत्येतदपि विषयावच्छिन्नप्रकाशः कार्यमित्येतदभिप्रायम्। वैषम्यं चोदयति। *ननु सवितुः इति* किं वास्तवं कर्माभावमभिप्रेत्य वैषम्यमाह भवान्? उत तद्विवक्षाभावम्? तत्र यदि तद्विवक्षाभावं, तदा प्रकाशयतीत्यनेन मा भूत् साम्यं, प्रकाशत इत्यनेन त्वस्ति। नह्यत्र कर्म विवक्षितम्। अथ च प्रकाशस्वभावं प्रत्यस्ति स्वातन्त्र्यं

सवितुरिति परिहरति *नासत्यपि कर्मणि इति*। असत्यपीत्यविवक्षितेऽपीत्यर्थः। अथ वास्तवं कर्माभावमभिसन्धाय वेषम्यमुच्यते, तत्र, असिद्धत्वात् कर्माभावस्य, विवक्षितत्वाच्चात्र कर्मण इति परिहरति *कर्मापेक्षायां तु इति*। यासां सति कर्मण्यविवक्षिते श्रुतीनामुपपत्तिस्तासां सति कर्मणि विवक्षिते सुतरामित्यर्थः। *यत्प्रसादात् इति*। यस्य भगवत ईश्वरस्य प्रसादात्तस्य नित्यसिद्धस्येश्वरस्य नित्यं ज्ञानं भवतीति किमु वक्तव्यमिति योजना। यथाहुर्योगशास्त्रकाराः। ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च' इति। तद्भाष्यकाराश्च भक्तिविशेषादावर्जित ईश्वरस्तमनुगृहति ज्ञानवैराग्यादिनेति *सवितृप्रकाशवद् इति*। वस्तुतो नित्यस्य कारणानपेक्षां स्वरूपेणोक्त्वा व्यतिरेकमुखेनाप्याह *अपि चाविद्यादिमतः* इत्यादि। आदिग्रहणेन कामकर्मादयः संगृह्यन्ते। *न ज्ञानप्रतिबन्धकारणरहितस्य इति*। संसारिणां वस्तुतो नित्यज्ञानत्वेऽप्यविद्यादयः प्रतिबन्धकारणानि सन्ति, न तु ईश्वरस्याविद्यारहितस्य ज्ञानप्रतिबन्धकारणसम्भव इति भावः। न तस्य कार्यमावरणाद्यपगमो विद्यते, अनावृतत्वादिति भावः। ज्ञानबलेन क्रिया। प्रधानस्य त्वचेतनस्य ज्ञानबलाभावाज्जगतो न क्रियेत्यर्थः। अपाणिर्ग्रहीता, अपादो जवनो वेगवान् विहरणवान् अतिरोहितार्थमन्यत्। स्यादेतत्–अनात्मनि व्योम्नि घटाद्युपाधिकृतो भवत्वच्छेदविभ्रमः, न तु आत्मनि स्वभावसिद्धप्रकाशे स घटत इत्यत आह। *दृश्यते चात्मन एव सतः इति*। *अभिनिवेशः* मिथ्याभिमानः। *मिथ्याबुद्धिमात्रेण पूर्वेण इति*। अनेनानादिता दर्शिता। मात्रग्रहणेन विचारासहत्वेन निर्वचनीयता निरस्ता। परिशिष्ट निगदव्याख्यातम्।।५–६।।

तन्निष्ठस्य मोक्षोपदेशाद् इति शङ्कोत्तरत्वेन वा स्वातन्त्र्येण वा प्रधाननिराकरणार्थ सूत्रम्, शङ्का च भाष्ये उक्ता।।७।।

स्यादेतद्–ब्रह्मैव ज्ञीप्सितं, तच्च न प्रथमं सूक्ष्मतया शक्यं श्वेतकेतुं ग्राहयितुमिति तत्सम्बद्धं प्रधानमेव स्थूलतयाऽऽत्मत्वेन ग्राह्यते श्वेतकेतुररुन्धतीमिवातीव सूक्ष्मां दर्शयितुं तत्सन्निहितां स्थूलतारकां दर्शयतीयमसावरुन्धतीति। अस्यां शङ्कायामुत्तरम् *हेयत्वावचनाच्च* इति सूत्रम्। चकारोऽनुक्तसमुच्चयार्थः। तच्चानुक्तं भाष्य उक्तम्।।८।।

अपि च जगत्कारणं प्रकृत्य स्वपितीत्यस्य निरुक्तं कुर्वती श्रुतिश्चेतनमेव जगत्कारणं ब्रूते। यदि स्वशब्द आत्मवचनस्तथापि चेतनस्य पुरुषस्याचेतनप्रधानत्वानुपपत्तिः। अथात्मीयवचनस्तथाप्यचेतने पुरुषार्थतयाऽऽत्मीयेऽपि चेतनस्य प्रलयानुपपत्तिः। न हि मृदात्मा घट आत्मीयेऽपि पाथसि प्रलीयतेऽपि त्वात्मभूतायां मृद्येव। न च रजतमनात्मभूते हस्तिनि प्रलीयते, किन्त्वात्मभूतायां शुक्तावेवेत्याह *स्वाप्ययात्*।।९।।

गतिसामान्यात्। गतिरवगतिः। *तार्किकसमय इव इति*। यथा हि तार्किकाणां समयभेदेषु परस्परपराहतार्थता, नैवं वेदान्तेषु परस्परपराहतिः, अपि तु तेषु सर्वत्र जगत्कारणचैतन्यावगतिः समानेति। *चक्षुरादीनामिव रूपादिषु इति*। यथा हि सर्वेषां चक्षू रूपमेव ग्राहयति, न पुना रसादिकं कस्यचिद्दर्शयति कस्यचिद्रूपम्। एवं रसनादिष्वपि गतिसामान्यं दर्शनीयम्।।१०।।

श्रुतत्वाच्च। तदैक्षतेत्यत्र ईक्षणमात्रं जगत्कारणस्य श्रुतं न तु सर्वविषयम्। जगत्कारणसम्बन्धितया तु तदर्थात् सर्वविषयमवगतं श्वेताश्वतराणां तूपनिषदि सर्वज्ञ ईश्वरा जगत्कारणमिति साक्षादुक्तमिति विशेषः।।११।।

इति भामति पञ्चममीक्षत्यधिकरणम् समाप्तम्।

श्रीकण्ठभाष्य

उक्तस्य ब्रह्मलक्षणस्य प्रधानेऽतिव्यापितमाशङ्क्यचाह–

।।सू॰।। ईक्षतेर्नाशब्दम्।।५।।

छान्दोग्ये श्रूयतेऽस्य विषयः। 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेये' त्यादि । इह पूर्वभवितया सकलस्य प्रपञ्चस्य कारणत्वेन श्रूयमाणं सदिति वसतु ब्रह्म प्रधानं वेति सन्देहः। प्रधानस्यैव जगत्कारणत्वं युक्तम्। 'अजामेकां लोहितशुक्लकृष्णां वह्वीं प्रजां जनयन्तीं सरूपा'मिति श्रुत्यन्तरे श्रवणात्। अत्र हि बहुप्रजाजनकत्वं लोहितादिवर्णानुमितरजस्सत्त्वतमोरूपायास्याङ्ख्यप्रकृतेरवगम्यते। तदानुगुण्येनात्रापि सच्छब्दवाच्यं जगत्कारणं प्रधानमेव। रजस्सत्वयोगादस्य क्रियाज्ञानशक्तिसम्बन्धोऽपि युज्यते। येन जगत्कारणत्वसिद्धिः। अचेतनस्य प्रधानस्य जगदाकारपरिणामो युक्तो न चेतनस्य परमेश्वरस्य कूटस्थस्य। कारणविकृतिरूपत्वात्परिणामस्य। ततो न्यायतः श्रुतितश्च प्रधानमेव जगत्कारणं सत्पदवाच्यमिति प्राप्ते ब्रूमः। अशब्दमानुमानिकं प्रधानं नजगत्कारणं सच्छब्दवाच्यं वस्तु। अपि तु ब्रह्मैव चेतनम्। ईक्षतिश्रवणात्' तदैक्षत बहु स्यां प्रजायेये'ति। न ह्यचेतने प्रधाने चेतनधर्म इक्षतिस्सम्श्रवति। यदुक्तं 'बह्वीं प्रजां जनयन्ती'मिति श्रवणात् साङ्ख्यप्रकृतेरत्र जगत्कारणत्व'' मिति तदसङ्गतम्। 'चमसवदविशेषा'दिति (ब्र॰ १. ४. ५.) सूत्रे हि परमेश्वरकारणिकाया एव प्रकृतेर्बहुप्रजाजनकत्वमित्युपपादयिष्यामः। 'रजस्सत्वरूपतया क्रियाज्ञानशक्तिसम्बन्धः प्रधानस्ये-ति यदुक्तं तदयुक्तम्। त्रिगुणात्मिकायाः प्रकृतेस्तमः पार्थक्येन रजस्सत्वयोगाभावात्। न च तमस्यश्रिभूते रजस्सत्त्वयोरूद्रेके ज्ञानक्रियासम्बन्धः प्रधानस्येति वाच्यम्। सत्वरजस्तमसां साम्यावस्था प्रकृतिरित्यङ्गीकारात्। 'कूटस्थस्य परमेश्वरस्य जगदाकारेण परिणामो विकरणे हेतु' रिति यदभाणि तदज्ञानविलसितम्। नामरूपविभागानर्हसूक्ष्मचिदचिच्छक्तिविशिष्टस्य परमेश्वरस्य कारणत्वं नामरूपविभागार्हस्थूलचिदविच्छक्तिविशिष्टस्य कार्यत्वमिति वदतामस्माकं तत्प्रसङ्गभयाश्रावात्। ननु, 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं' मित्यादिना सद्रूपं वस्तु निर्विशेषमेवावधारणादवगम्यते कारणावस्थमेतत्कथं सूक्ष्मप्रपञ्चविशिष्टमित्युच्यत इति चेन्न।

सदेवेत्यवधारणेन न विशेषनिषेध: किंत्वसत्कारणत्वनिषेध: 'असद्वा इदमग्र आसीत् ततो वै सदजायते'ति श्रवणादसत्कारणत्वस्य भ्रान्तिप्रसक्तिसत्वात्। किं च'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीय' मित्यत्र कथं निर्विशेषत्वं ब्रह्मण:। 'आसीदिति हि क्रियाविशेष:। 'अग्र'इति हि कालविशेष:। 'एकमेवे' त्यवधारणमधिष्ठात्रन्तरनिषेधपरम्। 'अद्वितीय'मिति जगदुपादानत्वमुच्यते। अत एव सर्वज्ञमनन्तशक्तिविशिष्टं च। कथं सर्वज्ञत्वसर्वशक्तित्वविशेषमन्तरेण जगदुभयकारणत्वं ब्रह्मणो भवति। अथवा प्रकृतिप्रत्ययात्मकस्य सत्पदस्य नैकवस्तुपरत्वं युक्तम्। प्रकृत्या प्रत्येन च सत्पदस्य वस्तुद्वयप्रतिपादनपरत्वात्। तथा ह्यभियुक्तसूक्ति:–'शक्ति:शिवश्च सच्छब्दप्रकृतिप्रत्ययोदितौ। तौ ब्रह्मसामरस्येन समस्तजगदात्मकौ।।' इति। स्थूलसूक्ष्मचिदचित्प्रपञ्चरूपशक्तिविशिष्ट: परमेश्वर एव कार्यकारणरूपस्सत्पदविषय इति निर्णय:।।

पुनराशङ्क्य परिहरति–

सू०।। गौणश्चेन्नात्मशब्दात्।।६।।

ईक्षतेश्चेतनधर्मस्याचेतने प्रधाने योगाभावाच्चेतनमेव परं ब्रह्म सत्पदवाच्यं कारणमिति प्रतिपादितम्। तदसङ्गतमेव। 'तत्तेज ऐक्षत ता आप ऐक्षन्ते' त्यादिष्वचेतनेऽपीक्षतिर्यथा गौण: श्रूयते तथा प्रधानेऽपि गौण इति चेन्न। चेतनवाचिन आत्मशब्दात् 'सदेव सोम्येदमग्र आसी'दित्यारभ्य उपसंहारे'स आत्मा तत्त्वमसी'ति श्रवणात्। तेज:प्रभृतिषवपि न गौणमीक्षतिश्रवणंतत्तदात्मतया परमेश्वरस्य चेतनस्यानुवृत्ते:।।

नन्वीक्षतिश्रवणं गौणमभ्युपेत्याप्यचेतनं प्रधानं सद्रूपं जगत: कारणमिति वक्तुं न शक्यम्। तस्य वेतनत्ववादिन आत्मशब्दादिति नियपितम्। श्रवतु नात्मशब्दस्याचेतनं प्रधानमर्थ इति। भवति तु चेतनस्य जीवस्यात्मशब्दवाच्यत्वं मुख्यम्। ततो जीव एव चेतनो जगत्कारणं सद्रूपमित्यत आह–

सू०।। तन्निष्ठस्य मोक्षोपदेशात्।।७।।

सत्पदवाच्यतत्त्वनिष्ठस्य मोक्ष उपदिश्यते'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य' इति। तस्मात्प्रधानं जीवश्च नात्र सत्पदविषय:। प्रधानकारणवादिनां साङ्ख्यानामपि तन्निष्ठस्य मोक्षो नाभिमत: त्याज्यत्वात्। न च जीवनिष्ठस्य। निषेधात् 'शिव एको ध्येयश्शिवंकरस्सर्वमन्यत्परित्यज्ये'ति।।

पुनरपि स्पष्टयति हेतुं प्रधाननिराकरणे–

सू०॥ हेयत्वावचनाच्च॥८॥

यदि प्रधानमेवात्र विवक्षितं तदाऽस्य हेयत्वमेवोच्येत 'तत्त्वमसी'ति मोक्षहेतुतया ध्येयत्वमुच्यते। ततो न प्रधनामिति युक्तम्।

किं च प्रधानपक्षे विरोध इत्याह–

सू०॥ प्रतिज्ञाविरोधात्॥९॥

इतश्च न प्रधानं सत्पदवाच्यम्। एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधात्। सत्पदवाच्यतत्त्वज्ञानेन तत्कार्यतया सकलचेतनाचेतनवस्तुविज्ञानं श्वतीति 'येनाश्रुतं श्रुतं भवती' त्यादिना प्रतिज्ञायते। प्रधानकारणत्वे विरुद्धमेतत्। चेतनस्य प्रधानकारणत्वायोगात्। प्रधाने कारणे ज्ञाते जाड्यविकारास्पदं तत्कार्यमिदं सर्वं ज्ञायते। यथा मृदि ज्ञातायां तत्कार्यं घटादिकम्॥

अतः कोऽत्र विरोध इत्याशङ्क्याह–

***सू॰ ॥ स्वाप्ययात्॥१०॥**

इतश्च न प्रधानं सच्छब्दवाच्यम्। 'स्वप्रान्तं में सोम्य विजानीहि यत्रैतत्पुरुषस्स्वपितिनाम सता सोम्य तदा सम्पन्नो श्रवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते' इति जीवस्य चेतनस्य सता सम्पन्नस्य स्वाप्ययवचनात्। अप्ययः प्रलयः अचेतने प्रधाने चेतनस्य लयो युक्तः। ततो न प्रधानं सदित्युच्यते॥

सच्छब्देन परमेश्वर एव प्रतिपाद्यते न प्रधानमित्याह–

***सू॰ ।गतिसामान्यात्॥११॥**

यथास्यामुपनिषदि सत्पदस्य परमेश्वरवाचित्वेन गतिः तथा श्रुत्यन्तरेऽपि समाना 'पुरुषो वै रुद्रस्सन्महो नमो नम' इत्यादौ। अतः सत्पदवाच्यः परमेश्वर एव॥ व्यक्तमेवास्यामुपनिषद्यात्मनः सर्वोत्पत्तिः श्रूयत इत्याह–

॥ सू॰ ॥ श्रुतत्वाच्च ॥१२॥

अत्रापि ' आत्मतः प्राण आत्मत आकाश'इत्यारभ्य' आत्मत एवेदं सर्व'मिति श्रूयते। ततो जगत्कारणत्वेन सत्पदवाच्यं ब्रह्मैव न प्रधानमिति सिद्धम्॥

श्री कण्ठभाष्यम् समाप्तम्

शिवार्कमणिदीपिका

पूर्वाधिकरणे सर्वेषां वेदान्तानां तात्पर्यलिङ्गवत्त्वेन ब्रह्मणि प्रामाण्यं सिद्धवदुपन्यस्तम्। तदनुपपन्नम्। सद्विद्यायाः प्रधानपरत्वादित्येवंरूपा समन्वयाधिकरणेनाक्षेपिकी सङ्गतिः प्रथमाध्यायगतसर्वाधिकरणसाधारणाग्रिमाधिकरणपूर्वपक्षोपन्यासेन स्फुटीभविष्यतीति तामपहाय तत्फलभूतां प्रमाणमुखेन लक्षणप्रदर्शनानन्तरं तत्परीक्षा कर्तव्येत्यवसरलक्षणामतिव्याहायसप्तमिदं लक्षणमनुपपन्नमित्याक्षेपिकीं वा लक्षणनिरूपणेन सङ्गतिं दर्शयन्नुत्तराधिकरणमवतार-**यति उक्तस्येति** ॥ **सू॥ ईक्षतेर्नाशब्दम्** ॥५॥ सद्विद्यैवास्याधिकरणस्य विषयः। न सर्वाणि कारणवाक्यानि। आत्मपुरुषशिवशम्भ्वादिपदयुक्तकारणवाक्यानां सत्तासामान्यवाचिसत्पदयुक्तायाः सद्विद्याया इव पूर्वपक्षे प्रधानपरत्वकल्पकाभावात्। न च सद्विद्यायाः प्रधानपरत्वमेव तत्कल्पकम्। कल्पभेदेन प्रधानपरमेश्वरयोरुभयोरपि जगत्कारणत्वसम्भवेन कारणपरात्मपुरुषशिवशम्भ्वादिश्रुत्यन्यथा-भावकल्पनायां बीजाभावादित्यभिप्रेत्य विशेषयति-**छान्दोग्य इति।** ईक्षणस्य मुख्यत्वासम्भवसम्भवौ संशयबीजमितिभिप्रेत्य संशय दर्शयति-**इहेति। लोहितादिवर्णानुमितेति।** अनुमितशब्दोऽत्र लक्षितवचनः। सुखदुः खमोहात्मकत्वोन्नेयसत्त्वरजस्तमोरूपस्य जगतस्तथाभूतेनैव कारणेन भाव्यमित्युदाहृतश्रुतेः प्रकृतिपरत्वसिद्ध्यनुकूलन्यायोऽप्येनेन विशेषणेन सूचितः। **साङ्खयप्रकृतेरिति।** साङ्खयोक्तयुक्तिकल्पितप्रकारायाः प्रकृतेरित्यर्थः। **तदानुगुण्येनेति।** साङ्खयाः खल्वचेतना प्रकृतिश्चेतनाधिष्ठिता जगत्सृष्ट्यादिव्यापारे स्वयमेव प्रवर्तते सैव च बन्धमोक्षयोर्हेतुरिति वदन्तः स्वानुमानसिद्धां प्रकृतिं कारणवाक्यान्यनुवदन्तीति कल्पयन्तिः। तदानुगुण्यं सद्विधायाँ दृश्यते तत्र मृत्पिण्डाद्यचेतनदृष्टान्तास्तावद- चेतनकारणत्वकल्पनानुगुणाः। 'तत्तेजोऽसृजत' ति सृष्टौ स्वातन्त्र्यप्रतिपादनं चेतनाधिष्ठितं तदचेतनं कारणमिति कल्पनानुगुणम्। चेतनाचेतनशकुनिबन्धनदृष्टान्तोक्तिपूर्वकं 'प्राणबन्धनं हि सोम्य मन' इत्येतत् 'तावदेव चिरं यावन्न विमोक्ष्य' इत्येतच्च तदेवाचेतनं पुरुषस्य बन्धमोक्षयोर्हेतुरिति कल्पनानुगुणम्। 'अन्नेन सोम्य शुङ्गेने' त्यादिकमनुमानसिद्धकारणानुवादकत्वकल्पनानुगुणम्। ननु चेतनानधिष्ठितस्याचेतनस्य स्वयमेव

क्वचिदपि प्रवृत्तिर्न सम्भवति। अचेनतस्य पञ्चकृत्यानुगुणसङ्कल्पवत्त्वरूपं तत्कर्तृत्वमपि न सम्भवति। तथा च कुतो लक्षणस्यातिव्याप्तिरित्याशङ्क्याह-**रजस्सत्वेति।** अयं भाव:। लघुस्सत्वगुण: प्रकाशकार्य:। चलो रजोगुण: प्रवर्तनकार्य:। गुरुस्तमोगुण: नियमनकार्य:। तत्र सत्त्वमक्रियत्वात्प्रकाशाख्यज्ञानवृत्तिरूपकार्यजनने स्वयमेवाप्रवर्तमानं चलो रजोगुणस्तत्र प्रवर्तयति। तच्च गुरुणा तमसा नियम्यमानं भोजकादृष्टानुसारेण कस्यचिदेवार्थस्य प्रकाशे प्रवर्तयति। न सर्वत्र। स्वयं च रजोगुणश्चलस्वभावोऽपि तमसा नियम्यमान: क्वचिदेव व्याप्रियते। एवं सत्वरजोवृत्तितया त्रिगुणात्मकप्रकृतिधर्मयोरेव ज्ञातृत्वकर्तृत्वयोर्विवेकाग्रहेण चेतनधर्मत्वव्यवहार:। तथा च स्वाभाविकज्ञातृत्वकर्तृत्वयुक्ताया: प्रकृते: पञ्चकृत्यानुकूलसङ्कल्पवत्त्वरूपं निमित्तत्वं जगदाकारपरिमाणक्रियावत्त्वरूपमुपादानत्वं चोपपद्यत इत्यस्त्येव तत्र लक्षणस्यातिव्याप्ति:। न चाचेतनं स्वयं क्रियाशक्तिमदपि चेतनाधिष्ठितमेव प्रवर्तत इति नियम:। वत्ससिवृद्ध्यर्थमूधस्स्थपयस्स्वयमेव क्षरणदर्शनेन तद्वत्प्रकृतेरपि पुरुषस्य भोगापवर्गार्थं तत्र कार्ये प्रवृत्त्युपपत्ते:। यद्यपि गुणसाम्यावस्थारूपायां प्रकृतावन्त:कारणरूपे तद्विकार इव व्यक्ते ज्ञानक्रिये न स्त:। तथाप्यव्यक्तेन शत्यात्मना रूपेण तस्यामपि ते स्त एवेति। **अचेतनस्येति।** प्रकृतिविशिष्टस्य परमेश्वरस्योपादानत्वसमर्थने च स्वत: परिणामिन्या: प्रकृतेरुपादानत्वं द्वारान्तरापेक्षतया शीघ्रं बुद्धिमारोहतीति जगदुपादानतया प्रतिपाद्यमानं सत्पदवाच्यं वस्तु प्रकृतिरेवेत्यङ्गीकर्तु युक्तमिति भाव:। **ततो न्यायत: श्रुतितश्चेति।** सुखदु:खमोहात्मकत्वेन प्रकृते: कार्यानुरूप्यं मृत्पिण्डाद्यचेतनदृष्टानतानुगुण्यं कार्यलिङ्गकानुमानप्रदर्शनानुगुण्यं परमेश्वरस्य परिणामित्वासम्भवश्च न्याय:। श्रुति 'रजामेका' मित्यादि:। ननु, 'चमसवदविशेषात्' (ब्र॰ १. ४. ५ सू॰) रचनानुपपत्तेश्च नानुमानम्। (ब्र॰ २. २. १ सू॰) न विलक्षणत्वादस्य तथात्वं च शब्दात्। (ब्र॰ २. १. ४ सू॰) अदृश्यत्वादिगुणको धर्मोक्ते: (ब्र॰ १. २. २१ सू॰) प्रकृतिश्च प्रतिज्ञादृष्टानतानुपरोधात्। (ब्र॰ १. ४. २४ सू॰) इत्यधिकरणेषूदाहृतश्रुतिन्यायावलम्बपूर्वपक्षा: परिहरिष्यन्ते। श्रुतावनुमानोपन्यासस्य गति: समन्वयाधिकरणे प्रदर्शितैव। किमालम्बनोऽत्र पूर्व: पक्ष:। उच्यते। 'फलमत उपपत्ते:। (ब्र॰ ३. २. ३५ सू॰) पुरुषार्थोऽतश्शब्दादिति बादरायण' (ब्र॰ ३. ४. १ सू॰) इत्याद्यधिकरणवत्सिद्धान्तोपक्रमं पूर्वपक्षमध्यमिदमधिकरणं न तु समन्वयाधिकरणवत् उन्नीतपूर्वपक्षम्। अतोऽसिमन्नधिकरणे सिद्धान्तयुक्तिव्याख्यानारम्भ एव कर्तव्ये शिष्यबुद्ध्यनुग्रहार्थमधिकरणान्तर- पूर्वपक्षश्रुतिन्यायविशेषान् कंचित्प्रकृत्यधिकरणन्यायोपमर्दकशङ्काविशेषं चावलम्ब्य पूर्वपक्षोऽपि कश्चित्प्रदर्शित:। एतदधिकरणपूर्वपक्षस्तु द्वितीयसूत्रावतारिकायां प्रदर्शयिष्यते। सौत्रमशब्दपदं पक्षभूतप्रधाननिर्देशकं कुर्वन् सद्विद्याया: तद्विषयत्वं वदत: पूर्वपक्षिण: कथं तदशब्दमित्याशङ्क्य

व्याचष्टे-**अशब्दमानुमानिकमिति**। 'अशब्द' मित्यनेन शब्दरहितत्वं नोच्यते। किं तु शब्देतरानुमानप्रमाणवत्त्वम्। तत्र नञः पर्युदासार्थत्वस्य मत्वर्थीयाच्प्रत्ययान्तत्वस्य चाङ्गीकारादिति भावः। सौत्रस्य नञो निषेध्यमध्यहृत्य साध्यं दर्शयति-**न जगत्कारणं सत्पदवाच्यं वस्त्विति**।' अपि तु ब्रह्मैव चेतन'मिति पर्यवसानलभ्यार्थप्रदर्शनम्। ईक्षतिपद' मिक्श्तिपौ धातुनिर्देश' इति विहितधातुनिर्देशकप्रत्ययान्तमीक्षिधातुपरमित्यभिप्रेत्य व्याचष्टे-**ईक्षतिश्रवणादिति**। ननु, ईक्षिधातूपात्तमीक्षणलिगमेवात्र साध्यसाधकं कथमीक्षिधातौ तदसाधके पञ्चम्या हेतुत्वनिर्देशः। उच्यते। ईक्षणमपि न साक्षात्साध्यसाधकं विरुद्धत्वादपक्षनिष्ठत्वाच्चकिं तु सत्पदविषये श्रूयमाणं चेतनासाधारणं मुख्यमीक्षणमचेतनस्य प्रधानस्य तद्विषयतायां नोपपद्यत इत्येवमनुपपद्यमानतया। एवं तत्साधकत्वमीक्षतिधातोरप्यविशिष्टम्। न हि प्रधानस्योदाहृतसत्पदविषयत्वे तद्विषये श्रूयमाण ईक्षतिधातुः मुख्य उपपद्यते। एवमनुपपद्यमानतया साधकत्वे द्वयोरप्यविशिष्टे।प्रथमोपस्थितशब्दानुपपत्तिलङ्घने कारणाभावादीक्षतिधातुरेव हेतूकृतः। यद्वा सूत्रभाष्ययोरीक्षतिशब्दाभ्यां तद्वाच्यमीक्षणं लक्षणीयम्। अत एवाग्रिमभाष्ये 'चेतचनधर्म ईक्षति-रित्युक्तम। पूर्वस्मिन्पक्षे तु तत्र चेतनधर्मशब्देन चेतनधर्मवाचित्वं लक्षणीयम्। ननु, सत्वगुणवृत्तिविशेषरूपमीक्षणं तत्प्रधान एवं सम्भवतीत्याशङ्क्याह-**न हीति**। जडपरिमाणरूपायाः सत्ववृत्तेः स्वयं चिद्रूपत्वं न सम्भवति। किं तु स्वच्छतया चित्प्रतिबिम्बोपाधित्वेन ज्ञानव्यपदेशमात्रं तत्र भाक्तमिति भावः। पूर्वपक्ष्युदाहृतश्रुतिं वक्ष्यमाणपरिहारस्मारणेन सङ्गमयति-**यदुक्तमित्यादिना**। क्रियाज्ञानशक्तियोगात्प्रकृतेरुपादानत्वं *पञ्चकृत्यकारित्वं* चोपपद्यत इति यदुक्तं तदनूद्य दूषयति- **रज इति। . त्रिगुणात्मिकाया इति**। शक्यात्मना क्रियाज्ञानयोगस्तावन्नोपादानकर्तृत्वनिर्वाहकः। मृत्पिण्डकुलालयोः क्रियाज्ञानव्यत्त्यभावे घटनिष्पत्त्यदर्शनादिति व्यत्त्यात्मना प्रकृतेस्तद्योगमुप-पाद्यातिव्याप्तिस्समर्थनीया। न च तदुपपादनं शक्यम्। तमो विना केवलं रजस्सत्वयोः प्रकृतावुद्रेकानङ्गीकारादिति भावः। तदङ्गीकारमाशङ्क्य परिहरित-**तमसीति। सत्वेति**। सत्वरजस्तमसां साम्यावस्था प्रकृतिः वैषम्यावस्था महदहङ्कारादिविकृतिरिति हि साङख्यानामभ्युपगमः। तथा च 'सदेव साम्येदमग्र आसीदेकमेवाद्वितीय' मिति श्रुतिप्रतिपादितमूलकारणत्वेन शङ्क्यमानायां प्रकृतेर्गुणवैशम्यं न सम्भवतीति भावः। प्रा 'ड ही' त्यादिभाष्येण प्रकृतेर्मुख्यज्ञानस्यासम्भव उक्तः। इदानीं तस्याः सत्ववृत्तिरूपगौणज्ञानस्याप्यसम्भव उक्त इति भेदः। परमेश्वरस्य परिणामित्वासम्भवदोषं प्रकृत्यधिकरणवक्ष्यमाणन्यायस्मरणेन परिहरति-**कूटस्थस्येत्यादिना**। द्वारान्तरापेक्षमपि पारमेश्वरमेवोपादानत्वं सद्विद्याप्रतिपाद्यमभ्युपगन्तव्यम्। ईक्षतिलिङ्गानुरोधादिति भावः।

अपृथक्सिद्धकार्यावस्थाश्रयत्वं ह्युपादानत्वम्। तत्पारमेश्वरमाश्रयान्तरनैरपेक्ष्यात्प्रबलं प्रकृतं तत्सापेक्षत्वा दुर्बलमिति विपरीतन्यायोऽपि प्रकृत्यधिकरणे प्रदर्शयिष्यते। ननु जगत्कारणस्य ब्रह्मणो विशिष्टरूपत्वे तदेव सद्विद्यागतकासत्पदवाच्यमभ्युपगन्तव्यम्। तत्र युज्यते। सकलभेदवस्तुप्रत्याख्यानार्थावधारण-विरोधात्तदनुरोधेन तस्याखण्डविशेष्यमात्रपरताया वक्तव्यत्वादिति तटस्थशशङ्कते-**नन्विति।** न तावदिह 'सदेवे' त्यवधारणविरोधः। तस्य श्रुत्यन्तरापातदर्शनजन्यभ्रान्तिप्रसक्ता-सत्कारणत्वनिषेधार्थत्वादित्याह-**सदेवेति। ननु सदिति** निर्देशेनैवासत्कारणत्वनिषेधो लभ्यते किमवधारणेनेत्याशङ्क्याह-**किं चेति।** तस्मिन्नेव वाक्ये अस्तिक्रियारूपायाः सत्तायाः कालविशेषस्य च निर्देशेन सकलविशेषनिषेधस्यानुपपन्नतया सदितिनिर्देशलभ्यासत्कारणत्वव्यावृत्त्यनुवादेन तद्दार्ढ्यार्थत्वमेवावधारणस्य वक्तव्यम्। तेन सदसद्विषयश्रुत्योर्बलाबलावधारणं लभ्यते। न च 'तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतस्सज्जातं कुतस्तु खलु सौम्यैवं स्यादिति होवाच कथमसतः सज्जायेते'त्यग्रिमवाक्ये स्पष्टमसद्वादिनिराकरणात् तेनैव तयोर्बलाबलावधारणं लभ्यत इत्यवैयर्थ्यार्थमवधारणस्यान्यविशेधकत्वं वक्तव्यमिति वाच्यम्। 'न चतुस्त्रिंशदिति ब्रूयात् षड्विशतिरित्येव ब्रूया' दित्यत्रेवावधारणर्थस्यैव स्पष्टीकरणमित्युपपत्तेः। अवाक्यभेदार्थं तत्र तथाभ्युपगम इत्येतदिहापि तुल्यमिति भावः। एवं चैकमेवेत्यत्राप्येकत्वोक्तिः सिद्धस्यैवाधिष्ठात्रन्तरनिषेधस्यावधारणेन स्थिरीकरणमित्याह-**एकमेवेति।** 'अद्वितीय' मित्यनेनोपादानान्तरनिषेधेन ब्रह्मण एवं सकलजगदुपादानत्वमुच्यत इत्याह-**अद्वितीयमिति।** एवं च 'एकमेवाद्वितीय' मिति विशेषणद्वयं ब्रह्मणः सकलजगत्कर्त्रुपादानरूपत्वप्रतिपादनेन निर्वाहकतया तस्य सर्वज्ञत्वं सर्वशक्तिकत्वं चाक्षिपत् विशेषान्तरस्यापि प्रापकं न तु कस्यचिदपि विशेषस्य निषेधकमित्याह-**अत एवेति।** सत्पदस्य सविशेषपरतायां पदान्तरसामर्थ्यपर्यालोचनापर्यन्तं न गन्तव्यम्। तत्सामर्थ्यपर्यालोचनयैव सिद्ध्यतीत्याह-**अथवेति।** प्रकृत्यंशेन सत्ता प्रत्ययांशेन तदाश्रयश्चोच्यत इति सत्पदस्य विशिष्टपरत्वमवर्जनीयमित्यर्थः। तत्र विशेषणीभूता सत्ता चिच्छक्तिरेवेत्यभियुक्तसम्मत्या दर्शयति-**तथेति।** तौ शक्तिशिवौ विशेषणविशेष्यभूतौ विशिष्टरूपेण ब्रह्म न तु विशेषणमात्रं विशेष्य मात्रं वेत्यर्थः। अभियुक्तसम्मतिसिद्धमर्थं निष्कृष्य दर्शयति-**स्थूलेति। पुनराशङ्क्येति।** पूर्वसूत्रे वाचनिकशङ्कापरिहाराभावेऽपि किञ्चिदभिप्रायशङ्कापरिहारो विवक्षितोऽस्तीत्यभिप्रेत्य पुनश्शब्दः।।सू।। **गौणश्चेन्नात्मशब्दात्**।।६।। **तदसङ्गतमेवेति।** न हि परमेश्वरस्य धर्म ईक्षणम्। तस्य निर्विकारत्वात्। किं तु परिणामिन्याश्चिच्छक्तेर्धर्मः। न च परमेश्वरे चिच्छक्तेरिव तद्धर्मस्यापि व्यपदेशो मुख्यः। तथा सति सकलचिदचिच्छरीकके तस्मिन् शक्तेरिव सुखी दुःखीत्यादिव्यपदेशस्यापि मुख्यत्वप्रसङ्गात्। तथा

च परमेश्वरेऽपि मुख्यमीक्षणं न सम्भवतीत्येवकाराभिप्रायः। ननु, प्रधाने परमेश्वरे च मुख्येक्षणासम्भवे कुतः प्रधान एवेक्षतेरमुख्यवृत्तिः प्रायपाठादित्याह-**तत्तेज इति।** 'तत्तेज ऐक्षते' त्यादिषु अचेतनगते कार्यौन्मुख्ये खल्वीक्षणस्य गौणत्वम्। तथैवात्रापि गौणत्वमभ्युपगन्तुं युक्तं तत्प्रायपाठात्। चेतनधर्मस्याचेतनधर्मत्वोपचाराश्रयणे तत्प्रायपाठभङ्गप्रसङ्गादिति भावः। एवं च यद्यपि प्रायपाठमात्रं स्थानप्रमाणरूपमीक्षतिश्रुतेर्मुख्यत्वभञ्जकं न भवति। तथापि पक्षद्वेऽपि मुख्यत्वभङ्गाविशेषे सति क्वचिदमुख्यवृत्त्याश्रयणे तन्नियामकं भवितुमर्हतीति तात्पर्यम्। एतेन सत्पदवाच्चे 'सेयं दे वतैक्षते'ति चेतनवाचिनो देवतापदस्य 'तत्सत्यं स आत्मे' त्यात्मपदस्य च श्रवणात् न तदचेतनं प्रधानमिति शङ्का निरस्ता। देवताशब्दस्येंद्रादिषु देवेषु चेतनेष्विव सूक्तहविःप्रतियोगिषु ग्रावसोमलतादन्तहनूप्रभृतिष्वचेतनेष्वपि प्रयोगदर्शनेनात्मशब्दस्य चेतनेषु देवमनुष्यादिष्विवाचेतनेषु स्वभावशरीरादिष्वपि प्रयोगदर्शनेन चानिर्णायकतया तयोरप्यचेतनेक्षणप्रायपाठानुसारेण 'हन्ताहमिमास्तिस्रो देवता' इति तेजः प्रभृत्यचेतनपरदेवतापदप्रायपाठानुसारेण चाचेतनविषयत्वपर्यवसानात्। **चेतनवाचिन इति।** इहात्मशब्दस्य शरीरपरत्वकल्पनायां चेत नवर्गमात्रेण स्वभावपरत्वकल्पनायामचेतनवर्गमात्रेणान्वयस्य सर्वशब्दस्य चेतनाचेतनान्यतरपरत्वेन सङ्कोचस्य वा प्रसङ्गेनासङ्कुचितसर्वान्वयसिद्ध्यर्थं तस्य चेतनवाचितामाश्रित्य सकलचेतनाचेतनात्मभूत-परमेश्वरपरत्वमभ्युपगन्तुं युक्तमिति भावः। उपक्रमगतसामान्यशब्दस्य औपसंहारिकैर्विशेषपर्यवसानं युक्तमिति प्रकृतसाध्ये साक्षाद्धेतूभवनक्षमस्याप्यात्मशब्दादितिहेतोस्तद्धतुभूतेक्षतिविषय-गौणत्वशङ्कानिराकरणहेतुत्वेनोपन्यासस्यैव शङ्कात्र पूर्वपक्षावलम्बनत्वात् प्राधान्येन निराकरणीयेति द्योतनायाचेतनेक्षणप्रायपाठोऽप्यसिद्ध इत्याह-**तेजः-प्रभृतिष्विति।** 'बहु स्या' मिति प्राग्वर्णितबहुभवनसङ्कल्पानुसारेण 'तदात्मनं स्वयमकु-रूते'ति श्रुत्यन्तरानुसारेण च स्थूलप्रपञ्चविशिष्टतया कार्यत्वयोग्यस्य परमेश्वरस्य 'तत्तेजोऽसृजत' 'तदपोऽसृजते' तिवाक्यगतयोस्तत्तत्कार्यान्तर्यामिपर्यन्तयोरप्तेजश्शब्दयोर्वाच्यत्वेनानुवृत्तेस्तत्रैव 'तत्तेज ऐक्षत' 'ता आप ऐक्षन्ते' ति वाक्यगतयोस्सर्वनाम्नोरप्तेजश्शब्दयोश्च वृत्तिरिति भावः। एवं च चिच्छक्तेर्धर्मस्येक्षणस्य यद्यपि तद्धर्मिण्युपचारस्स्यात्। तथापि स एवोपचारः प्रायपाठानुसारेण तदैक्षतेत्यत्रापि ग्राह्यः। वस्तुतस्तु तस्य तत्र मुख्य एव व्यपदेशः। परिणामिपरिणामयोश्चिच्छक्तीक्षणयोरनन्यत्वात् चिच्छक्तेश्च साक्षात्परमेश्वरधर्मत्वात्। यदि च तयोर्भेदः स्यात् तथापि जीवेष्विव परमेश्वरेऽपि मुख्य एवेक्षणव्यपदेशः। न हि 'चैत्र ईक्षत' इत्यादिव्यपदेशो न मुख्यः। न हि तावता तदीयच्छिक्तेर्धर्मस्येक्षणस्य साक्षाद्धर्मत्वम्। प्रत्युत चिच्छक्तिरूपं चैत्रस्य ज्ञानमीक्षत इत्यादिव्यपदेश एव मुख्यः। कुत एवमिति चेत्

शब्दस्वाभाव्यात्। के चिच्छब्दास्साक्षात्प्रवृत्तिनिमित्तवन्तमपहाय सम्बन्धान्तरेण तद्वति मुख्या भवन्ति। यथा धनवच्छब्दो धनं बिभ्रतं भृत्यमपहाय तत्स्वामिनि मुख्यो भवति। ननु, जैवी चिच्छक्तिस्स्वयं चेतना न भवतीति तद्धर्मेणेक्षणेन तदाश्रय ईक्षणवान्भवतीति युज्यते। पारमेश्वरी तु स्वयमपि चेतनेति कथं तदीयेनेक्षणेन परमेश्वरस्येक्षणवत्वम्। तथा सति जीवचिच्छक्तेरिव तस्या अप्यचेतनत्वप्रसङ्गादिति चेन्न। स्वामिधनं बिभ्रत: कस्यचिद्भृत्यस्य स्वयमपि धनवत्त्ववत्पारमेश्वरेक्षणरूपपरिणामविशेषवत्या एव तदीयचिच्छक्ते स्वेक्षणरूपपरिणामान्तरत्वसम्भवात्। एतेन चिच्छक्तिधर्मैरीक्षणै: परमेश्वरस्ये क्षणवत्त्वे जीवधर्मैस्सुखदु:खादिभिस्तद्वत्त्वमपि स्यात्। जीवानां चिच्छक्तेश्चेतनानन्तरत्वाविशेषात् अयुतसिद्धत्वेन परमेश्वराश्रितत्वाविशेंषाच्चेत्यपि शंङ्का निरस्ता। समवायवादिनां घटादिषु कलादिषु च रूपसमवायसत्त्वाविशेषेऽपि रूपिनीरूपव्यवस्थावत् रूपिरूपयोरयुतसिद्धत्वाविशेषेऽपयाधारत्वाधेयत्वव्यवस्थावच्च पारमेश्वरचिच्छक्तिधर्माणामीक्षणाविशेषाणां जीवधर्माणां सुखदु:खादीनां च तथातथानुभवव्यवहारप्रयोजकसम्बन्धविशेषसदसत्त्वाभ्यां पारमेश्वरत्वतदभावव्यवस्थोपपत्ते:। यद्यप्येवं सतीक्षणविषयस्याचेतनेक्षणप्रायपाठस्यासिद्धावपि देवतापदविषयस्याचेतनपरदेवतापदप्रायपाठस्य नासिद्धि:। तथापि श्रुतिलिङ्गविरोधिप्रायपाठमात्रमसाधकमिति न दोष:। उत्तरसूत्रमवतारयितुमाशङ्कते- **नन्विति। आत्मशब्दवाच्यत्वमिति।** आत्मशब्दप्रतिपाद्यत्वं जीवस्य मुख्यं भवतीत्यर्थ:। तथापि प्राकृतं सर्वं प्रत्यात्मत्वं जीवस्य न सम्भवतीति चेन्मा सम्भवात्। न हि तदत्र प्रतिपाद्यते। तथा हि–न ताव 'दैतदात्म्यमिदं सर्व'मित्यनेन तत्प्रतिपाद्यंते। तस्यत तद्धितयत्प्रत्यार्थवत्त्वाय सर्वमिदं प्रकृतसद्रूपात्मसम्बन्धीत्येतदर्थपरत्वात्। नापि स आत्मेत्यनेन तत्प्रतिपाद्यते। तत्र 'सर्वस्ये'ति विशेषणाश्रवणात् प्राचीनवाक्यगतस्य सर्वपदस्यान्वयित्वात्। अन्यान्वयिनोऽप्यपेक्षायां सत्यां कथञ्चिदन्वयस्स्यात्। 'सहस्रं देयमपरिमितं देय' मित्यत्र सहस्रस्येवापरिमितवाक्येन चापरिमितशब्दोक्तबहुत्ववदात्मशब्दोक्ते:। चेतन: प्रतियोग्यपक्षे: चेतनाचेतनसाधारणेन सच्छब्देनोपक्रमस्य विशेषपर्यवसानाकाङक्षायां 'स आत्मे' त्युत्त्यैव चेतनरूपविशेषपर्यवसानलाभात्। नन्वेवं ' स आत्मे'त्युक्तयै स जगत्करणभूत आत्मा क इत्याकाङक्षायां 'तत्त्वमसी' त्युपसंहारात् संबोध्यश्वेतकेतुरेव स आत्मेति पर्यवस्येत्। तथा च बहुभवनसङ्कल्परूपमीक्षणं तेजस्स्रष्ट्टत्वादिकं च तदनुभवबाधितं च तदनुभवबाधितं तेन बोद्धुमशक्यमिति चेन्न। सर्गाद्यकालवृत्तान्तस्यानेकजनमव्यवहितस्य विस्मरणयोग्यतया बाधावताराभावात्। ' बहूनि मे व्यतीतानि जन्मानि तव चार्जुन। तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतपे'ति गीतोक्तरीत्या शिष्यस्मृत्यगोचरस्यापि तद्वृत्तान्तस्य सर्वज्ञेन गुरूणा बुद्ध्योपदेष्टुं शक्यत्वात्।। सू।। **तन्निष्ठस्य मोक्षोपदेशात्।।७।।**

तस्मान्न प्रधानं जीवश्चेति प्रधानपरत्वशङ्कानिराकरणार्थयुत्त्यन्तरपरेणैवानेन सूत्रेण आत्मश्रुत्याद्यविरोधमूलजीवपरत्वशङ्कानिराकरणमपि लभ्यत इत्यभिप्रेत्य जीवपरत्वशङ्कासूत्रावतारिकायां दर्शिता। न तु सूत्रस्य तादर्थ्यमभिप्रेत्येति सूचयितुं जीवपरत्वशङ्कानिराकरणस्यान्वाचयसिद्धत्वं चकारेण प्रदर्शितम्। एतत्सूत्रनिवर्त्या प्रधानपरत्वशङ्का त्वेवं द्रष्टव्या। ईक्षतिवदात्मशब्दोऽपि गौणोऽस्तु। 'ममात्मा भद्रसेनोऽयं 'मम प्राण इदं धनं' 'मम चक्षुरयं पुत्र' इत्यादिष्वात्मादिशब्दानां गौणप्रयोगदर्शनात्। जीवानां सकलपुरुषार्थनिर्वाहकस्य प्रधानस्य तान्प्रति तथा व्यपदेशयोग्यत्वा त्सन्मूलास्सोम्ये माः सर्वाः प्रजा' इति तत्रत्यवाक्यानुसारे 'णैतदात्म्यमिदं सर्व' मित्यत्र सर्वशब्दस्य जीवसामस्त्यपरत्वोपपत्तेरिति। ननु प्रकृतिज्ञानान्मोक्षं साङ्ख्या मन्यन्ते। यदाहुः-'रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्तात्। पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः।। प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति। या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य।' इति । अत आह-**साङ्ख्यानामपीति।** अयमाशयः। सूत्रे' तन्निष्ठस्ये 'त्यनेन तद्वेदनमात्रं नोच्यते किंतु स्वात्मतया तदुपासनम्। कुतः श्रुतौ' तत्त्वमसी 'ति श्वेककेतुं प्रतिसत आत्मतामुपदिश्य' आचार्यवान्पुरुषो वेदे 'ति तद्वेनोपायमुक्त्वा ' तस्य तावदेव चिर' मित्यादिना तद्वेदनवतः पुरुषस्य तावानेव विलम्बः यावत्प्रारब्धकर्माधीनशरीरान्न विमोक्ष्यते। अथ तद्विमोक्षान्नतरं ब्रह्म सम्पद्यत इ 'त्यस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्ये' ति वाक्यान्तरावगतशरीरविमोक्षपूर्वकब्रह्मसम्पत्तिरुपफलश्रवणात् तस्य च वेदनस्य 'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातं तद्धास्य विजज्ञा' वित्युपक्रमोपसंहारानुसारेण विज्ञातरूपत्वावमात् श्रवणमननानन्तरं पठितस्य विज्ञानस्य 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदित' मित्यादिश्रुत्यन्तरानुसारेणोपासनरूपत्वावगमात्। यद्यपि साङ्ख्यमते संसारिदशायां बुद्ध्याकारमापद्य संसरन्त्यां प्रकृतावसङ्गोदासीनसाक्षिरूपस्य पुरुषस्य स्वात्मतया वेदनं भ्रान्तिरूपमस्ति। 'पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तका' इति वचनोक्तं सावधिफलं तदुपासनमपयस्ति। तथापि मोक्षफलं स्वात्मतया तदुपासनं नास्ति प्रत्युत संसारात्प्रकृतिविविक्तत्वेनासंसारिस्वभावस्वात्मदर्शनमेव तन्मते मोक्षजनकम्। यदाहुः- तस्मान्न बध्यते नापि मुच्यते नापि संसरति कश्चित्। संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः। रूपैस्सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः। सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण।। एवं तत्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्। अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्।। तेन निवृत्तप्रसवामर्थवशात्सप्तरूपविनिवृत्ताम्। प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः ।।'' इति। तस्मात्साङ्ख्यमतेऽपि नास्ति प्रकृतिनिष्ठस्य मोक्ष इति। एतेन 'तत्त्वमसी' त्यादि' र्ममात्मा भद्रसेन'

इत्यादिवदुपचारावलम्बनोऽर्थवादस्सांसारिकफलविशेषाय तादात्म्यदृष्ठिविधिर्वेति शङ्कापि निरस्ता। तद्वेदनस्य मोक्षरूपफलसंङ्कीर्तनात्। ननु तर्हि: तत्त्वमसी'ति जगत्कारणस्य जीवस्योपासनं मोक्षहेतुत्वेनोपदिश्यतामित्याशङ्क्याह-**न चेति।** निषेधात् मुक्तयर्थ शिवातिरिक्तस्योपास्यत्व-निषेधादित्यर्थ:। तन्निषेधपरमथर्वशिखावाक्यमुदाहरति' **शिव एक इति।** उत्तरसूत्रमवतारयति-**पुनरपीति।** : तत्त्वमसी'ति न तत्त्वदृष्ट्या सत आत्मत्वोपदेश:। किं तु स्थूलारुन्धतीन्यायेन। ततश्च प्रधानस्य सत्पदवाच्यत्वेऽपि सत आत्मत्वोपदेशो न विरुधयत इत्याशङ्कानिराकरणेन पूर्वहेतुस्पष्टीकरणार्थ हेतुमाहेत्यर्थ। **स्पष्टयतीति।** स्पष्टं तत्करोतिण्यन्तात्पचाद्यच्प्रत्यय:।।सू।। **हेयत्वावचनाच्च।।८।। यदीति।** यदीह गुरु स्थूलारून्धतीन्यायमन्वसरिष्यत्तदा मोक्षयितव्य: श्वेतकेतुस्तन्निष्ठो माभूदिति स्थूलताराया अरून्धत्यात्मतामिव सत: स्वात्मतां हेयत्वेनावक्ष्यत्। न तु त-द्वचनमस्ति। तदात्मत्व एवोपदेशपरिसमापितदर्शनात्। तस्मान्नात्र स्थूलारून्धतीन्यायानुसरणमस्तीति भाव:। पूर्वसूत्रे तच्छब्द: समस्तोऽप्यपेक्षावशादिहानुषक्तष्षष्ठ्यन्तो विपरिणम्यते। ततश्च तस्य सदात्मत्वस्य हेयत्वावचनादिति सूत्रार्थ:। चकार: पूर्वसूत्रेणैकीकरणार्थ:। न केवलं तन्निष्ठस्य मोक्षोपदेशात्प्रधानं न सत्पदवाच्यम्। किं तु तद्धेयत्वावचनसमुच्चितादिति तदर्थ:। उत्तरसूत्रमवतारयति- किंचेति। पूर्वसूत्रोक्तहेतुवत्सूत्रान्तरोक्तहेतुस्पष्टीकरणार्थो न भवत्ययं प्रतिज्ञाविरोध:। किं तु प्रधानपक्षनिराकरणे स्वतन्त्रहेतुरित्यभिप्राय:।। सू।। **प्रतिज्ञाविरोधात् ।।९।। सर्वविज्ञानेति।** 'येनाश्रुतं श्रुतं भवती' त्यादिप्रतिज्ञा तावत्सर्वविज्ञानविषया। श्रुतादिपदानामर्थसङ्कोचे कारणाभावात्। 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञात' मित्यादिश्रुत्यन्तरैकार्थ्याच्चेति भाव:। ननु, ब्रह्मपक्ष इव प्रधानपक्षेऽपि कार्यकारणाभेदात् प्रधानविज्ञानेनं तत्कार्यमहदहङ्कारादिसर्वविज्ञानप्रतिज्ञोपपद्यते। मृद्धटादिदृष्टान्तानुरोधेन तस्यास्सकार्यविषयत्वादित्याशङ्क्याह-**सत्पदवाच्येति। सकलेति। ननु प्रतिज्ञाया:** सकलचेतनाचेतनवस्तुविज्ञानविषयत्वं कुतोऽवसीयते। सत्कार्यसर्ववस्तुविज्ञानविषयत्वं खलु मृद्धटादिदृष्टान्तानुरोधात् अवसीयते। न च 'सन्मूला: सोम्येमा' प्रजा' इति तत्रत्यवाक्ये प्रजाशब्दोदितानां चेतनानामपि सत्कार्यत्वमुक्तमिति सत्कार्यसर्वविज्ञानविषयैव प्रतिज्ञा सकलचेतनाचेतनवस्तुविज्ञानविषया पर्यवस्येदिति वाच्यम्। तत्र प्रजाशब्दस्य साङ्ख्यमते चेतनाधिष्ठितदेहादिकार्यविषयत्वोपपत्ते:। अन्यथा सन्मूलवाक्योक्तस्य जीवकारणत्वस्यैव हेतूकरणसम्भवे तत्तदवगमाधीनाधिगमस्य प्रतिज्ञाविरोधस्य हेतूकरणायोगादिति चेत्। उच्यते। सर्वविज्ञानप्रतिज्ञा तावदसङ्कोचन्यायानुरोधेन सकलवस्तुविज्ञानविषया प्रतीयते। सा

दृष्टान्तबलात्तत्कार्यसर्वविज्ञानविषया भवन्त्यपि सूक्ष्मसकलचिदचिद्वस्तुविशिष्टब्रह्मरूपे श्रुत्यन्तरप्रतिपन्ने कारणे सत्पदवाच्येऽङ्गीक्रियमाणे सर्वमपि चिदचिदात्मकं वस्तु स्थूलरूपविशिष्टतया सत्कार्यकोटावन्तर्भवतीति असङ्कोचेन यथा प्रतीता तथैवोपपद्यते। साङ्ख्याभिमते स्वतन्त्रप्रधानरूपे कारणे तद्वाच्येऽङ्गीक्रियमाणे तु चेतनवर्गस्य तत्कार्यत्वाभावादसङ्कुचितसर्ववस्तुविषयत्वेन प्रतीता सा विरुध्यत इति भाष्याभिप्रायः। सूत्रान्तरमवतारयितुमाशङ्कते-प्रधाने कारण इति। यद्यपि जडमात्रविषयत्वेन प्रतिज्ञा सङ्कोच्यत इति शङ्कासमकालमेव निर्मिमित्तः सङ्कोचो न युक्त इति दोषः स्फुरति तथापि स एव दोषः सूत्रान्तरावतारिकाव्याजेन स्फोरितः। अत एव नैतस्याशशङ्काया निवर्तनमग्रे क्रियते ॥ इतश्च न प्रधान' मिति पूर्वहेतुदाढर्यं सिद्धं कृत्वा स्वाप्ययो हेत्वन्तरत्वेन व्याख्याते सू ॥ स्वाप्ययात्॥१०॥

सद्विद्याप्रकरणे स्वपितिनामनिर्वचनं श्रूयते। तस्यार्थः। :स्वप्नान्तं सुषुप्तं मे मत्तः प्रतिपादयतो विजानीहीति शब्दस्य इत्युवाचेति पूर्वेण सम्बन्धः। इदं शिष्यावधानार्थमुद्दालकस्य वचनम्। तदीयसुषुप्तिप्रतिपादनप्रकारो 'यत्रैत' दित्यादिः। यत्र यदा पुरूषः पुरुषस्य एतत्स्वपितिनाम स्वपितीत्येव तन्नाम भवति। यदवस्थापन्नं लोकः स्वपितीत्याचक्षत इति यावत्। तदा सता 'सदेव सोम्ये'ति प्रकृतेन सम्पन्नस्सङ्गतो भवति। अपिपूर्व इतिर्लयार्थः। पुरुषः स्वशरीरके ब्रह्मणि लीनो भवतीत्यर्थः। अपीतेस्सकर्मकत्वाद्द्वितीया। तस्मादेव स्वाप्ययरूपप्रवृत्तिनिमित्तादेनं स्वपितीत्याचक्षते लौकिका इति। यद्यपि स्वपिधातोर्निष्पन्नः स्वपिति शब्दो न तु स्वशब्दोपपदादपीतेः तथाप्यशनायादिनिर्वचनवदर्थवादरूपमिदं निर्वचनम्। अत्र 'स्वमपीतो भवती'ति स्वाप्ययवचनात्प्रधानं सत्पदवाच्यं न भवतीति हेतुसाध्ययोजनां दर्शयति-**इतश्चेत्यादिना। स्वाप्ययवचनादित्यन्ते न।** ननु इण् गता'विति धातोरुत्पन्नोऽप्येतिशब्दः प्राप्तिमात्रमाचष्टे। न तु लयमित्याशङ्क्याह- **अप्यय इति।** अपिपूर्व इतिर्लयार्थः। ' प्रभवाप्यया' वित्युत्पत्तिलययोः प्रयोगदर्शनादिति भावः। ननु, प्रधाने सत्पदवाच्येऽपि स्वाप्ययवचनमुपपद्यते। न च तस्य स्वशब्दवाच्यत्वायोगः। स्वशब्दस्यात्मीयपरत्वोपपत्तेः। न चाकारणे प्रधाने जीवस्य लयो न सम्भवतीति वाच्यम्। बह्मण्यपि तदसम्भवतौल्यात्। न ह्यनादेर्जीवस्य ब्रह्म कारणं न वा जीवस्य घटादिवल्लयस्ससम्भवति। तस्य हि लय उच्यमानो जीवत्वावस्थाप्रहाणेन कारणावस्थापत्तिरूपो वाच्यः। न च जीवस्सुषुप्तौ जीवत्वमपहाय ब्रह्मभावमापद्यत इति युज्यते। प्रबोधे जीवान्तरोत्पत्तेर्वक्तव्यत्वेन स एव तु 'कर्मानुस्मृतिशब्दविधिभ्य' इत्यधिकरणविरोधप्रसङ्गात्। स्यादेतत्। ज्ञानादिवृत्तिप्रसरानुकूलचिच्छक्ति-विकासावस्था जीवस्य कार्यावस्था। तदवस्थाप्रहाणेन चिच्छक्तिसङ्कोचावस्थापन्ने स्वस्वरूपेऽवस्थानं

तस्य लयः। स तु सुषुप्तौ सम्भवतीति। एवं 'तर्हि स्वमपीतो भवती' त्यत्र स्वशब्दः चिच्छक्तिसङ्कोचरूपसूक्ष्मावस्थापन्नजीवस्वरूपामात्रपर इति स्वशब्दसच्छब्दयोरैकार्थ्यत्यागात्स्वशब्दस्य ब्रह्मपरत्वमिव प्रधानपरत्वमपिनानुपपन्नम्। अथोच्येत स्वपदस्यावश्यं सत्पदेनैकार्थ्यं वक्तव्यम्। 'सता सोम्य तदा सम्पन्नो भवति सति सम्पद्य न विदु' रित्युपक्रमोपसंहारमध्यगतस्य स्वाप्ययवाक्यस्य तदनपेक्षितार्थान्तरपरत्वायोगात्। स्वस्यात्मीयवाचित्वेन प्रधानपरत्वे जीवस्याकारणे तत्र लयोऽनुपपन्न इति तस्य जीवशरीरकब्रह्मावाचित्वं सत्पदस्य ब्रह्मविपायत्वं चाङ्गीकृत्य तस्य तदैकार्थ्यमुपपादनीयम्। न च कार्यकारणानन्यत्ववादिनां जीवादन्यब्रह्म तस्य न कारणं किं तु सूक्ष्मं जीवस्वरूपमेवेति ब्रह्मण्यपि तस्य लयोऽनुपपन्न इति वाच्यम्। 'यत्रैतत्पुरुषः स्वपिति नामे' त्यत्र जीववाचितया प्रस्तुतस्य पुरुषशब्दस्यापि स्थूलरूपापन्नजीवशरीरकब्रह्मपरत्वाभ्युपगमात्। तथा च ज्ञानविकासरूपस्थूलावस्थाविशिष्टजीवशरीरकं ब्रह्म तद्राहित्यरूपसूक्ष्मावस्थाविशिष्टजीवशरीरकं सत्स्वात्मन्यन्तर्भवतीति स्वाप्ययवाक्यार्थो घटत इति। नैतद्युक्तम्। तत्सम्पत्तिविषयोपक्रमोपसंहारमध्यनिविष्टस्वाप्ययवाक्यगतस्वपदस्य तदनपेक्षितार्थान्तरपरत्वं हि वक्तुमनुचितम्। न त्वर्थान्तरपरत्वमात्रम्। तथा च सत्पदवाच्यप्रधानसम्पत्त्यनन्तरं जीवः सूक्ष्मावस्थं स्वस्वरूपमप्येतीति चिच्छक्तिसङ्कोचरूपसूक्ष्मावस्थापत्तिवर्णनस्य 'सति सम्पद्य न विदुः सति सम्पत्स्यामह' इति 'सत आगत्य न विदुः सत आगच्छामह' इति प्रतिपादयिष्यमाणवेदनाभावोपयोगितया 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत' इत्यत्र ब्रह्मसम्पत्त्यनन्तरं सत्यसङ्कल्पत्वाद्यभिनिष्पत्तिवर्णनस्य 'जक्षन्क्रीडन्नममाण' इत्याद्यग्रिमसन्दर्भ-प्रतिपादयिष्यमाणयथाकामभोगोपादकतयैवापेक्षित्वात् स्वपदसत्पदयोर्जीवप्रधानपरत्वेनार्थभेदेऽपि नान्वयवैकल्यम्। तस्मात्स्वपदसत्पदयोरैकार्थ्ये नियमनमुयुक्तम्। अप्येतृपरस्य पुरुषपदस्य ब्रह्मपर्यन्तत्वकल्पनमप्ययुक्तमेव। 'यत्रैतत्पुरुषस्स्वपितिनाम तस्मादेनं स्वपिरीत्याचक्षत' इत्युपक्रमोपसंहारयोर्लौकिकस्य स्वपितिव्यवहारस्यानुवादात्। तस्य च ब्रह्मपर्यन्तत्वव्युत्पत्त्यनभिज्ञ-जनसाधारणस्य ब्रह्मविषयत्वायोगात् तस्य ब्रह्मपर्यन्तत्वे 'स यथा शकुनि' रित्याद्यग्रिमवाक्येन वर्ण्यमानस्याप्येतुरत्यन्तपारतन्त्र्यस्य 'सति सम्पद्य न विदुस्सत आगम्य न विदु' रित्यग्रिमखण्डयोरुच्यमानस्याज्ञानस्य च तत्रानन्वयप्रसङ्गाच्च। तस्मात्सत्पदस्य प्रधानविषयत्वेऽपि स्वाप्ययवचनमुपपद्यत इत्याशङ्क्याह-**अचेतने प्रधान इति**। अयमाशयः। 'यत्रैतत्पुरुषः स्वपिति-नामे' त्युपक्रमः 'स्वमपीतो भवती' तिपर्यन्तः सन्दर्भः स्वपितिनामनिर्वचनार्थवादोपस्कृतं स्वाप्ययं निरूपयितुं प्रवृत्त इत्युपक्रमोपसंहाराभ्यामवसीयते। तत्र यदि सत्सम्पत्तिवाक्यं स्वाप्ययवाक्यस्य

स्वविरणरूपतावगमनेनस्वपदस्य सद्विषयताज्ञापनार्थं न स्यात् तदा तत्प्रकृतानुपयुक्तं स्यात्। न च स्वाप्ययकारणत्वेन तदुपयोगः। सुषुप्तिदशायां जीवस्य ज्ञानसङ्कोचो भवतीत्युक्ते तत्र कारणाकाङ्क्षायास्सत्सम्पत्तिवचननिवर्तनीयाया अनुदयात्। न हि नित्यानपायिचिच्छक्ति-मतस्स्वप्रजागरयोरिहास्म्यहमित आगत इति जानतः सुषुप्तिदशायां कुतस्तदवेदनमिति ज्ञानसङ्कोचोक्तिनिवर्तनीयसङ्कोचकारणाकाङ्क्षवदिह स्वारसिकतदाकाङ्क्षोदेति । सत्सम्पत्तिवाक्य-साफल्यार्थं कथञ्चित्तदाकाङ्क्षोत्थाप्यत इत्यपि न जीवमात्रपरत्वप्रसक्तिमतस्स्वपदस्य तद्विशेशितसद्विषयत्वज्ञापनार्थं तदित्यन्यथासिद्धफलसम्भवे विफलकत्वापादनायोगात्। 'स्वाप्नानतं मे सोम्य विजानीही'ति सुषुप्तिवृत्तान्तस्य सर्वस्यापि वक्तव्यत्वेन प्रतिज्ञातत्वात् तदृशायां सति सत्सम्पत्तिरपयुक्तेति चेन्न। स्वाप्ययविषयोपक्रमोपसंहारमध्ये तदुक्तेरनुपयोगात्। अनन्तरमेव 'स यथा शकुनि' रित्यादिना तदुक्तेश्च। तस्मात्सत्सम्पत्तिवाक्यस्य स्वाप्ययविषयोपक्रमोपसंहार-मध्यनिवेशनसामर्थ्येन स्वपदसत्पदयोरैकार्थ्यावश्यम्भावे सति जीवस्याकारणे प्रधाने लयानुपपत्तेस्तस्य सत्पदवाच्यत्वे स्वाप्ययवचनमनुपपन्नमिति युक्तमेव। न चैवं तस्य ब्रह्मण्यपि लयोऽनुपन्नः। तदकारणत्वाविशेषात्। अतस्सूक्ष्मावस्थे स्वस्मिन्नेव तस्य लयो वक्तव्यस्यादिति वाच्यम्। जीवशरीरकस्य ब्रह्मणः तद्वारेणापृथक्सिद्धतदाश्रयतया स्थूलावस्थजीवं प्रति सूक्ष्मावस्थजीवस्येव ब्रह्मणोऽपि तदुपादानकारणत्वेन तत्र तस्य लयोपपत्तेः। न चैवमत्यन्तभिन्नयोः जीवब्रह्मणोः कार्यकारणभावे कार्यकारणानन्यत्वसिद्धान्तभङ्गप्रसङ्गः। न ह्यनन्यत्वं भेदाभावः। किंतु दण्डदेवदत्तवत्कदाचिदपि पृथगवस्थितेरभावः। स तु जीवब्रह्मणोर्भेदसत्त्वेऽपि नीलघटवदयुतसिद्धत्वान्न हीयते। नीलघटयोरयुतसिद्धिर्गुणगुणिभावेन। इह शरीरशरीरिभावेनेति विशेषः। आरम्भणाधिकरणेऽप्येवमेव कार्यकारणानन्यत्वं भाष्यकृदुपपादयिष्यतीति तत्रैवायमर्थः प्रपञ्चयिष्यते। एवं जीवमात्रस्य ब्रह्मणि लयसमर्थन एव 'सत्ता सम्पन्नः स्वमपीतः' 'प्राणबन्धनं हि सोम्य मनः' 'सति सम्पद्य सत आगम्ये' त्यत्राप्ययस्थानयोः भेदव्यपदेशाः सङ्गच्छन्ते। प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तर' मित्यादिश्रुत्यन्तरैकार्थ्यमप्युपपद्यते। न हि तत्रापि सम्परिष्वक्तशब्दस्य ब्रह्मपर्यन्तत्वं वक्तुं शक्यम्। 'सुषुप्त्युत्क्रान्त्योर्भेदेने'ति (ब्र० १-३-४२) सूत्रेण प्राज्ञेनात्मना सम्परिष्वक्तयोर्भेदस्य समर्थयिष्यमाणत्वात्। ननु, यदि भिन्नेऽपि ब्रह्मणि जीवस्य लयः तर्हि प्रधानेऽप्यस्तु। तस्यापि ब्रह्मण इव जीवद्वारा तदवस्थाश्रयत्वकल्पनेन तदुपादानत्वोपपादनसम्भवादिति चेन्न। चेतनस्य ब्रह्मणः श्रुतिसिद्धेन जीवं प्रति शरीरित्वेन तदयुतसिद्धाश्रयतया 'यथा सुदीप्तात्पावकाद्विस्फुलिङ्गास्सहस्रशः प्रभवन्ते सरूपाः। तथाक्षराद्विविधास्सोम्य भावाः प्रजायन्ते तत्र

चैवापियन्ति' इत्यादिश्रुतिसिद्धं तदुपादानत्वमुपपादयितुं शक्यम्। न त्वचेतनस्य प्रधानस्येति विशेषात्। तस्माद्युक्तस्स्वाप्ययादिति हेतुरिति। उत्तरसूत्रमवतारयति-**सच्छब्देनेति**॥ सत्पदस्यास्य तत्प्रकरणपठितैरीक्षत्यादिहेतुभिरिव श्रुत्यन्तरगतेन व्याख्यानेनापि स एव तेन प्रतिपाद्योऽवसीयत इत्युत्तरसूत्रेण दर्शयतीत्यर्थः ॥ सू॥ **गतिसामान्यात् ॥११॥**

इति शिवार्कमणिदीपिका इतीक्षत्यधिकरणम् समाप्त्।

अथ आनन्दमयाधिकरणम्।

सू० १२–१९॥*

शाङ्करभाष्यम्

"जन्माद्यस्य यतः" इत्यारभ्य "श्रुतत्वाच्च"इत्येवमन्तैः सूत्रैर्यान्युदाहृतानि वेदान्वाक्यानि, तेषां सर्वज्ञः सर्वशक्तिरीश्वरो जगतो जन्मस्थितिलयकारणमित्येतस्यार्थस्य प्रतिपादकत्वं न्यायपूर्वकं प्रतिपादितम्। गतिसामान्योपन्यासेन च सर्वे वेदान्ताश्चेतनकारणवादिन इति व्याख्यातम्, अतः परस्य ग्रन्थस्य किमुत्थानमिति? उच्यते–द्विरूपं हि ब्रह्मावगम्यते–नामरूपविकारभेदोपाधिविशिष्टम्, तद्विपरीतं च सर्वोपाधिविवर्जितम्। "यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्" (बृह० ४।५।१५) "यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमाऽथ यत्तान्यत्पश्यत्यन्यच्छृणोत्यनद्विजानाति तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम्" (छान्दो० ७।२४।१) "सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन् यदास्ते" निष्फलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् अमृतस्य परं सेतुं दग्धेन्धनभिवामलम्। (तै० आ० ३।१२।७) "नेति नेती" (बृ० २।३।६)ति "अस्थूलमनणु" (बृ० ३।८।८) "न्यूनमन्यत्। स्थानं संपूर्णमन्यत्"इति चैवं सहस्रशो विद्याविद्याविषयभेदेन ब्रह्मणो द्विरूपतां दर्शयन्ति वाक्यानि। तत्राविद्यावस्थायां ब्रह्मण उपास्योपासकादिलक्षणः सर्वो व्यवहारः। तत्र कानिचिद् ब्रह्मण उपासनान्यभ्युदयार्थानि, कानिचित्क्रममुक्त्यर्थानि, कानिचित्कर्मसमृद्ध्यर्थानि। तेषां गुणविशेषोपाधिभेदेन भेदः। एक एव तु परमात्मेश्वरस्तैस्तैर्गुणविशेषैर्विशिष्ट उपास्यो यद्यपि भवति; तथापि यथागुणोपसानमेव फलानि भिद्यन्ते; "तं यथा यथोपासते तदेव भवती"ति श्रुतेः, "यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवती" (छा० ३।१४।१) इति च। स्मृतेश्च–"यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्। तं तमेवैति कौन्तेय सदा तद्भवभावितः॥" (गी० ८।६) इति। यद्यप्येक आत्मा सर्वभूतेषु स्थावरजङ्गमेषु गूढः; तथापि चित्तोपाधिविशेषतारतम्यादात्मनः कूटस्थनित्यस्यैकरूपस्याप्युत्तरोत्तरमाविष्कृतस्य तारतम्यमैश्वर्यशक्तिविशेषैः श्रूयते–"तस्य य आत्मानमाविस्तरां वेद" (ऐ० आ० २।३।२।१)इत्यत्र। स्मृतावपि–"यद्याद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा। तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवम्॥" (गी० १०।४१) इति। यत्र यत्र

विभूत्याद्यतिशयः, स स ईश्वर इत्युपास्यतया चोद्यतो। एवमिहाप्यादित्यमण्डले हिरण्मयः पुरुषः सर्वपाप्मोदयलिङ्गात्पर एवेति वक्ष्यति। एवम् ''आकाशस्तल्लिङ्गात्'' (ब्र० १।१।२२) इत्यादिषु द्रष्टव्यम्। एवं सद्योमुक्तिकारणमप्यात्मज्ञानमुपाधिविशेषद्वारेणोपदिश्यानमप्यविवक्षितोपाधिसंबन्धविशेषं परापरविषयत्वेन संदिह्यमानं वाक्यगतिपर्यालोचनया निर्णेतव्यं भवति। यथेहैव तावत्–''आनन्दमयोऽभ्यासाद्र''इति। एवमेकमपि ब्रह्मापेक्षितोपाधिसंबंधं निरस्तोपाधिसंबंधं चोपास्यत्वेन ज्ञेयत्वेन च वेदान्तेषूपदिश्यत इति प्रदर्शयितुं परो ग्रन्थ आरम्भयते। यच्च ''गतिसामान्यादि''इत्यचेतनकारणनिकारणमुक्तम्, तदपि वाक्यान्तराणि ब्रह्मविषयाणि व्याचक्षाणेन ब्रह्मविपरीतकारणनिषेधेन प्रपञ्च्यते।

तैत्तिरीयकेऽन्नमयं प्राणमयं मनोमयं विज्ञानमयं चानुक्रम्याम्नायते–''तस्माद्वा एतस्माद्विज्ञानमयात्। अन्योऽन्तर आत्मानन्दमय'' (तै० २।५) इति। तत्र संशयः–किमिहानन्दमयशब्देन परमेव ब्रह्मोच्यते यत्प्रकृतम् ''सत्यं ज्ञानमनन्तं ब्रह्म'' (तै० २।१) इति, किंवाऽन्नमयादिवद् ब्रह्मणोऽर्थान्तरमिति किं तावत्प्राप्तम्? ब्रह्मणोऽर्थान्तरममुख्य आत्मानन्दमयः स्यात्। कस्मात्? अन्नमयाद्यमुख्यात्मप्रवाहपतितत्वात्। अथापि–स्यात्सर्वान्तरत्वादानन्दमयो मुख्य एवात्मेति, न स्यात्प्रियाद्यवयवयोगा, च्छारीरत्वश्रवणाच्च। मुख्यश्चेदात्मानन्दमयः स्यात्, न प्रियादिसंस्पर्शः स्यात्। इह तु ''तस्य प्रियमेव शिर'' इत्यादि श्रूयते। शारीरत्वं च श्रूयते–''तस्यैष एव शारीर आत्मा। यः पूर्वस्य''इति। तस्य पूर्वस्य विज्ञानमयस्यैष एव शारीर आत्मा य एष आनन्दमय इत्यर्थः। न च सशरीरस्य सतः प्रियाप्रियसंस्पर्शो वारयितुं शक्यः। तस्मात्संसार्येवानन्दमय आत्मेत्येव। प्राप्ते इदमुच्यते–

***आनन्दमयोऽभ्यासात्*॥१२॥**

पर एवात्मऽऽन्दमयो भवितुमर्हति। कुतः? अभ्यासात्। परस्मिन्नेव ह्यात्मन्यानन्दशब्दो बहुकृत्वोऽभ्यस्यते। आनन्दमयं प्रस्तुत्य ''रसो वै सः'' (तै० २।६।) इति तस्यैव रसत्वमुक्त्वोच्यते–''रसं ह्येवायं लब्ध्वाऽऽनन्दी भवती'' इति, ''को ह्येवान्यात्क; कः प्राण्यात्, यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयाति'' (तै० २।७) ''सैषानन्दस्य मीमांसा भवति'' ''एतमानन्दमयमात्मानमुपसंक्रामति'' ''आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन'' इति (तै० २।८,९) ''आनन्दो ब्रह्मेति व्यजानात्'' (तैत्ति० ३।६)इति च। श्रुत्यन्तरे च ''विज्ञानमानन्दं ब्रह्म'' (बृ० ३।९।२८)इति ब्रह्मण्येवानन्दशब्दो दृष्टः। एवमानन्दशब्दस्य बहुकृत्वो ब्रह्मण्यभ्यासादानन्दमय आत्मा ब्रह्मेति गम्यते। आनन्दमयस्य यत्तूक्तमन्नमयाद्यमुख्यात्मप्तवाहपतितत्वादानन्दमयस्याप्य-

मुख्यत्वम्मिति, नासौ दोषः; सर्वान्तरत्वात्। मुख्यमेव ह्यात्मानमुपदिदिक्षु शास्त्रं लोकबुद्धिमनुसरत् अन्नमयं शरीरमनात्मानमत्यन्तमूढानामात्मत्वेन प्रसिद्धमनूद्य मूषानिषिक्तद्रुतताम्रादिप्रतिमावत्ततोऽन्तरं ततोऽन्तरमित्येवं पूर्वेण पूर्वेण समानमुत्तरमुत्तरमनात्मानमात्मेति ग्राहयत् प्रतिपत्तिसौकर्यापेक्षया सर्वान्तरं मुख्यमानन्दमयमात्मानमुपदिदेशेति श्लिष्टतरम्। यथाऽरुन्धतीनिदर्शने बह्वीष्वपि तारास्वमुख्यास्वरुन्धतीषु दर्शितासु याऽन्त्या प्रदर्श्यते, सा मुख्यैवारुन्धती भवति, एवमिहाप्यानन्दमयस्य सर्वान्तरत्वान्मुख्यमात्मत्वम्।। यत्तु ब्रूषे—प्रियादीनां शिरस्त्वादिकल्पनाऽनुपपन्ना मुख्यस्यात्मन—इति, अतीतानन्तरोपाधिजनिता सा न स्वाभाविकीत्यदोषः। शारीरत्वमप्यानन्दमयस्यान्नमयादिशरीरपरम्परया प्रदर्श्यमानत्वात्, न पुनः साक्षादेव शारीरत्वं संसारिवत्, तस्मादानन्दमयः पर एवात्मा।।१२।।

विकारशब्दान्नेति चेन्न प्राचुर्यात्।।१३।।

अत्राह—नानन्दमयः पर आत्मा भवितुमर्हति। कस्मात्? विकारशब्दात्। प्रकृतिवचनादयमन्यः शब्दो विकारवचनः समधिगतः; आनन्दमय इति मयटो विकारार्थत्वात्। तस्मादन्नमयादिशब्दवद्विकारविषय एवानन्दमयशब्द इति—चेत्, न; प्राचुर्यार्थेऽपि मयटः स्मरणात्। ''तत्प्रकृतवचने मयट'' (पा० ५।४।२१)इति हि प्रचुरतायामपि मयट् स्मर्यते। यथाअन्नमयो यज्ञ इत्यन्नप्रचुर उच्यते, एवमानन्दप्रचुरं ब्रह्मानन्दमय उच्यते। आनन्दप्रचुरत्वं च ब्रह्मणो मनुष्यत्वादारभ्योत्तरस्मिन्नुत्तरस्मिन् स्थाने शतगुण आनन्द इत्युक्त्वा ब्रह्मानन्दस्य निरतिशयत्वावधारणात्। तस्मात्प्राचुर्यार्थे मयट्।।१३।।

तद्धेतुव्यपदेशाच्च।।१४।।

इतश्च प्राचुर्यार्थे मयट्; यस्मादानन्दहेतुत्वं ब्रह्मणो व्यपदिशति श्रुतिः—''एष ह्येवानन्दयाति'' इति। आनन्दयतीत्यर्थः। यो ह्यन्यानानन्दयति, स प्रचुरानन्द इति प्रसिद्धं भावति। यथा लोके योऽन्येषां धनिकत्वमापादयति, स प्रचुरधन इति गम्यते, तद्वत्। तस्मात् प्राचुर्यार्थेऽपि मयटः संभवादानन्दमयः पर एवात्मा।।१४।।

मान्त्रवर्णिकमेव च गीयते।।१५।।

इतश्चानन्दमयः पर एवात्मा। यस्मात्—''ब्रह्मविदाप्नोति परम्'' इत्युपक्रम्य ''सत्यं ज्ञानमनन्तं ब्रह्म'' (तै० २।१) इत्यस्मिन्मन्त्रे यत्प्रकृतं ब्रह्म सत्यज्ञानानन्तविशेषणैर्निधारितम्, यस्मादाकाशादिक्रमेण स्थावरजङ्गमानि भूतान्यजायन्त, यच्च भूतानि सृष्ट्वा तान्यनुप्रविश्य गुहायामवस्थितं सर्वान्तरम्, यस्य विज्ञानाय ''अन्योऽन्तरं आत्माऽन्योऽन्तर आत्मे''इति प्रक्रान्तम्, तन्मान्त्रवर्णिकमेव ब्रह्मेह गीयते—''अन्योऽन्तर आत्मानन्दमयः'' (तै० २।५) इति। मन्त्रब्राह्मणयोश्चैकार्थत्वं युक्तम्;

अविरोधात्। अन्यथा हि प्रकृतहानाप्रकृतप्रक्रिये स्याताम्। न चान्नमयादिभ्य इवानन्दमयादन्योऽन्तर आत्माभिधीयते। एतन्निष्ठैव च ''सैषा भार्गवी वारुणी विद्या'' (तै० ३।६)। तस्मादानन्दमयः पर एवात्मा॥१५॥

***नेतरोऽनुपपत्ते*॥१६॥**

इतश्चानन्दमयः पर एवात्मा। नेतरः। इतर ईश्वरादन्यः संसारी जीव इत्यर्थः। न जीव आनन्दमयशब्देनाभिधीयते। कस्मात्? अनुपपत्तेः॥ आनन्दमयं हि प्रकृत्य श्रूयते–''सोऽकामयत। बहु स्यां प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा। इदं सर्वमसृजत। यदिदं किञ्चे'' (तै० २।६)इति। तत्र प्राक्शरीराद्युत्पत्तेरभिध्यानम्, सृज्यमानानां च विकाराणां स्त्रष्टुरव्यतिरेकः, सर्वविकारसृष्टिश्च न परस्मादात्मनोऽन्यत्रोपपद्यते॥१६॥

***भेदव्यपदेशाच्च*॥१७॥**

इतश्च नानन्दमयः संसारी। यस्मादानन्दमयाधिकारे–''रसो वै सः। रसंह्येवायं लब्ध्वाऽनन्दीभवती'' (तै० २।७)ति जीवानन्दमयौ भेदेन व्यपदिशति। नहि लब्धैव लब्धव्यो भवति। कथं तर्हि ''आत्मान्वेष्टव्यः'' ''आत्मलाभान्न परं विद्यते'' इति श्रतिस्मृती, यावता न लब्धैव लब्धव्यो भवतीत्युक्तम्। बाढम्; तथाप्यात्मनोऽप्रच्युतात्मभावस्यैव सतस्तत्त्वानवबोधनिमित्तो मिथ्येव देहादिष्वनात्मस्वात्मत्वनिश्चयो लौकिको दृष्टः। तेन देहादिभूतस्यात्मनोऽप्यात्माऽनन्विष्टोऽन्वेष्टव्योऽलब्धो लब्धव्योऽश्रुतः श्रोतव्योऽमतो मन्तव्योऽविज्ञातो विज्ञातव्य इत्यादिभेदव्यपदेश उपपद्यते। प्रतिषिध्यत एव तु परमार्थतः सर्वज्ञात्परमेश्वरादन्यो दृष्टा श्रोता वा ''नान्योऽतोऽस्ति द्रष्टा'' (ब्र० ३।७।२३)इत्यादिना। परमेश्वरस्त्वविद्याकल्पिताच्छारीरात्कर्तुर्भोक्तुर्विज्ञानात्माख्यादन्यः। यथा मायाविनश्चर्मखड्गधरात्सूत्रेणाकाशमधिरोहतः स एव मायावी परमार्थरूपो भूमिष्ठोऽन्यः, यथा वा घटाकाशादुपाधिपरिच्छन्नादनुपाधिपरिच्छिन्न आकाशोऽन्यः। ईदृशं च विज्ञानात्मपरामात्मभेदमाश्रित्य ''नेतरोऽनुपपत्तेः'' ''भेदव्यपदेशाच्च''त्युक्तम्॥१७॥

***कामाच्च नानुमानापेक्षा*॥१८॥**

आनन्दमयाधिकारे च ''सोऽकामयत बहु स्यां प्रजायेय'' (तै० २।६)इति कामयितृत्वनिर्देशान्नानुमानिकमपि साङ्ख्यपरिकल्पितमचेतनं प्रधानमानन्दमयत्वेन कारणत्वेन वाऽपेक्षितव्यम्। ''ईक्षतेर्नाशब्दम्'' (ब्र० १।१।५) इति निराकृतमपि प्रधानं पूर्वसूत्रोदाहृतां कामयितृत्वाश्रुतिमाश्रित्य प्रसङ्गात्पुनर्निराक्रियते गतिसामान्यप्रपञ्चनाय॥१८॥

***अस्मिन्नस्य च तद्योगं शास्ति*॥१९॥**

इतश्च न प्रधाने जीवे वाऽऽनन्दमयशब्दः। यस्मादस्मिन्नानन्दमये प्रकृत आत्मनि प्रतिबुद्धस्यास्य

जीवस्य तद्योगं शास्ति। तदात्मना योगस्तद्योगः, तद्भावापत्तिः। मुक्तिरित्यर्थः। तद्योगं शास्ति शास्त्रम्–"यदा ह्येवष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवति। यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते। अथ तस्य भयं भवती" (तै० २।७) इति॥ एतदुक्तं भवति–यदैतस्मिन्नानन्दमयेऽल्पमप्यन्तरमतादात्म्यरूपं पश्यति, तदा संसारभयान्न निवर्तते। यदा त्वेतस्मिन्नान्दमये निरन्तरं तादात्म्येन प्रतितिष्ठति, तदा संसारभयान्निवर्तत इति। तच्च परमात्मपरिग्रहे घटते, न प्रधानपरिग्रहे जीवपरिग्रहे वा। तस्मादानन्दमयः परमात्मेति स्थितम्॥१९॥

इदं त्विह वक्तव्यम्–"स वा एष पुरुषोऽन्नरसमयः। तस्माद्वा एतस्मादन्नरसमयायदन्योऽन्तर आत्मा प्राणमयः" तस्माद् अन्योऽन्तरं आत्मा मनोमयः, तस्माद् अन्योऽन्तर आत्मा विज्ञानमयः (तै० २।१, २, ३, ४) इति च विकारार्थे मयट्प्रवाहे सत्यानन्दमय एवाकस्मादर्धजरतीयन्यायेन कथमिव मयटः प्राचुर्यार्थत्वं ब्रह्मविषयत्वं चाश्रीयत इति? मान्त्रवर्णिकब्रह्माधिकारादिति चेत्, न; अन्नमयादीनामपि तर्हि ब्रह्मत्वप्रसङ्गः॥ अत्राह–युक्तमन्नमयादीनामब्रह्मत्वम्; तस्मात्तस्मादान्तरस्यान्तरस्यान्यस्यान्यस्यात्मन उच्य- मानत्वाद्र, आनन्दमयात्तु न कश्चिदन्य आन्तर आत्मोच्यते, तेनानन्दमयस्य ब्रह्मत्वम्; अन्यथा प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गादिति॥

अत्रोच्यते–यद्यप्यन्नमयादिभ्य इवानन्दमयादन्योऽन्तर आत्मेति न श्रूयते; तथापि नानन्दमयस्य ब्रह्मत्वम्, यत आनन्दमयं प्रकृत्य श्रूयते–"तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः। आनन्द आत्मा। ब्रह्म पुच्छं प्रतिष्ठा" (तै० २।५)इति। तत्र यद् ब्रह्म मन्त्रवर्णे प्रकृतम्–"सत्यं ज्ञानमनन्तं ब्रह्म"इति, तदिह "ब्रह्म पुच्छं प्रतिष्ठा"इत्युच्यते। तद्विजिज्ञापयिषयैवान्नमयादय आनन्दमयपर्यन्ताः पञ्च कोशाः कल्प्यन्ते। तत्र कुतः प्रकृतहानाऽप्रकृतप्रक्रियाप्रसङ्गः? नन्वानन्दमयस्यावयवत्वेन "ब्रह्म पुच्छं प्रतिष्ठा" इत्युच्यते, अन्नमयादीनामिव "इदं पुच्छं प्रतिष्ठा"इत्यादि। तत्र कथं ब्रह्मणः स्वप्रधानत्वं शक्यं विज्ञातुम्? प्रकृतत्वादिति ब्रूमः। नन्वानन्दमयावयवत्वेनापि ब्रह्मणि विज्ञायमाने न प्रकृतत्वं हीयते, आनन्दमयस्य ब्रह्मत्वादिति। अत्रोच्यते; तथा सति तदेव ब्रह्मानन्दमय आत्माऽवयवी, तदेव च ब्रह्म पुच्छं प्रतिष्ठावयव इत्यसामञ्जस्यं स्यात्। अन्यतरपरिग्रहे तु युक्तं "ब्रह्म पुच्छं प्रतिष्ठे"इत्यत्रैव ब्रह्मनिर्देश **आश्रयितुम्**; ब्रह्मशब्दसंयोगात्, नानन्दमयवाक्ये; ब्रह्मशब्दसंयोगाभावादिति। अपिच "ब्रह्म पुच्छं प्रतिष्ठे" इत्युक्त्वेदमुच्यते–"तदप्येष श्लोको भवति। असन्नेव स भवति। असद् ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद। सन्तमेनं ततो विदुरिति" (तै० २।६)। अस्मिंश्च श्लोकेऽननुकृष्यानन्दमयं ब्रह्मण एव भावाभाववेदनयोर्गुणदोषाभिधानाद् गम्यते "ब्रह्म पुच्छं प्रतिष्ठे"

इत्यत्र ब्रह्मण एव स्वप्रधानत्वमिति। न चानन्दमयस्यात्मनो भावाभावशङ्का युक्ता; प्रियमोदादिविशेषस्यानन्दमयस्य सर्वलोकप्रसिद्धत्वात्।। कथं पुन: स्वप्रधानं सद् ब्रह्माआनन्दमयस्य पुच्छत्वेन निर्दिश्यते-''ब्रह्म पुच्छं प्रतिष्ठा'' इति? नैष दोष:; पुच्छवत्पुच्छम्, प्रतिष्ठा परायणमेकनीडं लौकिकस्यानन्दजातस्य ब्रह्मानन्द इत्येतदनेन विवक्ष्यते, नावयवत्वम्; ''एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती''(बृह० ४।३।३२)इति श्रुत्यन्तरात्। अपि च आनन्दमयस्य ब्रह्मत्वे प्रियाद्यवयवत्वेन सविशेषं ब्रह्माभ्युपगन्तव्यम्, निर्विशेयं तु ब्रह्म वाक्यशेषे श्रूयते; वाङ्मनसयोरगोचरत्वाभिधानात्-''यतो वाचो निवर्तन्ते अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्नो बिभेति कुतश्चने ति'' (तै० २।९) अपि च आनन्दप्रचुर इत्युक्तेऽपि दु:खास्तित्वमपि गम्यते; प्राचुर्यस्य लोके प्रतियोग्यल्पत्वापेक्षत्वात्। तथा च सति ''यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा''(छा० ७।२४।१)इति। भूम्नि ब्रह्मणि तदयतिरिक्ताभावश्रुतिरुपरुध्येत। प्रतिशरीरं च प्रियादिभेदादानन्दामयस्यापि भिन्नत्वम् ब्रह्म तु न प्रतिशरीरं भिद्यते; ''सत्यं ज्ञानमनन्तं ब्रह्म''(तैत्ति० २।१)इत्यानन्त्यश्रुते:, ''एको देव: सर्वभूतेषु गूढ: सर्वव्यापी सर्वभूतान्तरात्मा''(श्वे० ६।११) इति च श्रुत्यन्तरात्। न चानन्दमयस्याभ्यास: श्रूयते, प्रातिपदिकार्थमात्रमेव हि सर्वत्राभ्यस्यते-''रसो वै स:, रसं ह्येवायं लब्ध्वाऽनन्दी भवति को ह्येवान्यात्क: प्राण्यात् यदेष आकाश आनन्दो न स्यात्।'' ''सैपानन्दस्य मीमांसा भवति''। ''आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति'' (तै० २।७।८।९) ''आनन्दो ब्रह्मेति व्याजानात्'' (तै० ६।६)इति च। यदि च आनन्दमयशब्दस्य ब्रह्मविषयत्वं निश्चितं भवेत्, तत उत्तरेष्वानन्दमात्रप्रयोगेप्वानन्दमयाभ्यास: कल्प्येत। न त्वानन्दमयस्य ब्रह्मत्वमस्ति प्रियशिरस्त्वादिभिर्हेतुभिरित्यवोचाम। तस्माच्छ्रुत्यन्तरे ''विज्ञानमानन्दं ब्रह्म'' (बृ० ३।९।२८) इत्यानन्दप्रातिपदिकस्य ब्रह्मणि प्रयोगदर्शनात्। ''यदेष आकाश आनन्दो न स्यात्''इत्यादिर्ब्रह्मविषय: प्रयोग न त्वानन्दमयाभ्यास इत्यवगन्तव्यम्। यस्त्वयं मयडन्तस्यैवानन्दशब्दस्याभ्यास:- 'एतमानन्दमयमात्मानमुपसंक्रामती' (तै० २।८)इति, न तस्य ब्रह्मविषयत्वमस्ति; विकारात्मनामेवान्नमयादीनामनात्मनामुपसंक्रमितव्यानां प्रवाहे पतितत्वात्। नन्वानन्दमयस्योपसंक्रमितव्यस्यान्नमदिवदब्रह्मत्वे सति नैव विदुषो ब्रह्मप्राप्ति: फलं निर्दिष्टं भवेत्। नैप दोषा आनन्दमयोपसंक्रमणनिर्देशेनैव पुच्छप्रतिष्ठाभूतब्रह्मप्राप्ते: फलस्य निर्दिष्टत्वात्,। ''तदप्येष श्लोको भवति। यतो वाचो निवर्तन्ते'' इत्यादिना च प्रपञ्चयमानत्वात्। या त्वानन्दमयसंनिधाने ''सोऽकामयत वहु स्यां प्रजायेयेती''यं श्रुतिरुदाहृता, सा ''ब्रह्म पुच्छं प्रतिष्ठा''इत्यनेन संनिहिततरेण ब्रह्मणा सम्बध्यमाना नानन्दमयस्य ब्रह्मतां प्रतिबोधयति। तदपेक्षत्वाच्चोत्तरस्य ग्रन्थस्य ''रसो वै स'' इत्यादेर्नानन्दमयविषयता।। ननु-''सोऽकामयत''इति ब्रह्मणि पुंलिङ्गनिर्देशो नोपपद्यते। नायं दोष:;

''तस्माद्वा एतस्मादात्मन आकाशः संभूत'' इत्यत्र पुंलिङ्गेनाप्यात्मशब्देन ब्रह्मणः प्रकृतत्वात्। या तु भार्गवी वारुणी विद्या ''आनन्दो ब्रह्मेति व्यजानाद'' इति, तस्यां मयडश्रवणात् प्रियशिरस्त्वाद्यश्रवणाच्च युक्तमानन्दस्य ब्रह्मत्वम्। तस्मादणुमात्रमपि विशेषमनाश्रित्य न स्वत एव प्रियशिरस्त्वादि ब्रह्मण उपपद्यते। नचेह सविशेषं ब्रह्म प्रतिपिपादयिषितम्; वाङ्मनसगोचरातिक्रमश्रुतेः। तस्मादन्नमयादिष्विवानन्दमयेऽपि विकारार्थ एव मयड् विज्ञेयो न प्राचुर्यार्थः, सूत्राणि त्वेवं व्याख्येयानि—''ब्रह्म पुच्छं प्रतिष्ठा''त्यत्र किमानन्दमयावयवत्वेन ब्रह्म विवक्ष्यत, उत स्वप्रधानत्वेनेति। पुच्छशब्दादवयवत्वेनेति प्राप्त उच्यते—*आनन्दमयोऽभ्यासात्*।। आनन्दमय आत्मेत्यत्र ''ब्रह्म पुच्छं प्रतिष्ठा''इति स्वप्रधानमेव ब्रह्मोपदिश्यते; अभ्यासात्। ''असन्नेव स भवती''इत्यस्मिन्निगमनश्लोके ब्रह्मण एव केवलस्याभ्यस्यमानत्वात्। *विकारशब्दान्नेति चेन्न प्राचुर्यात्*।। विकारशब्देनावयवशब्दोऽभिप्रेतः। पुच्छमित्यवयवशब्दान्न स्वप्रधानत्वं ब्रह्मण इति यदुक्तम्, तस्य परिहारो वक्तव्यः। अत्रोच्यते—नायं दोषः; प्राचुर्यादप्यवयवशब्दोपपत्तेः। प्राचुर्यं प्रायापत्तिः अवयवप्राये वचनमित्यर्थः। अन्नमयादीनां हि शिरआदिषु पुच्छान्तेष्ववयवेषूक्तेष्वानन्दमयस्यापि शिरआदीन्यवयवान्तराण्युक्त्वाऽवयवप्रायापत्त्या ''ब्रह्म पुच्छं प्रतिष्ठा''इत्याह, नावयवविवक्षया। यत्कारणमभ्यासादिति स्वप्रधानत्वं ब्रह्मणः समर्थितम्। *तद्धेतुव्यपदेशाच्च*।। सर्वस्य हि विकारजातस्य सानन्दमयस्य कारणत्वेन ब्रह्म व्यपदिश्यते—''इदं सर्वमसृजत। यदिदं किञ्च''(तै० २।६)इति। न च कारणं सद् ब्रह्म स्वविकारस्यानन्दमयस्य मुख्यया वृत्त्याऽवयव उपपद्यते। अपराण्यपि सूत्राणि यथासंभवं पुच्छवाक्यनिर्दिष्टस्यैव ब्रह्मण उपपादकानि द्रष्टव्यानि।।१९।।

इति शाकंरभाष्यम् षष्ठमानन्दमयाधिकरणम्।।

वार्तिकम्

जिज्ञास्यत्वेन सूत्रितस्य ब्रह्मणो ''जन्माद्यस्य यत'' इत्यादिभिः ''श्रुतत्वाच्चे''त्यन्तैः सूत्रैरेव जिज्ञासितत्वात् किमपरमवशिष्यते, यदर्थमुत्तरग्रन्थसन्दर्भस्यारम्भः? इत्यग्रिमग्रन्थसमन्वयाद्यर्थं सन्दर्भप्रवृत्तिमाक्षिपति– *जन्माद्यस्य यत इत्यारभ्येति*।। किमुत्थानम्=किमर्थमुत्थानमित्यर्थः। यद्यप्यस्याधिकरणस्य जिज्ञास्यस्य ब्रह्मण आनन्दरूपसाधकत्वाद् अत्रेयमाशङ्का न युक्ता, किं तर्हि–''अन्तस्तद्धर्मोपदेशादि''त्यादावेव; तथापि वाक्यविशेषमुदाहृत्य जीवो वा परो वेति सन्दिह्य वृत्तिकारेण विचारस्यात्र कृतत्वात् तदनुसारेण प्रथमं प्रस्थितेन भाष्यकारेणात्रैवेयमाशङ्का कृतेति न दोषः। तत्पक्षेऽस्याशङ्काया अत्रैवोत्थानसंभवात्। अस्मत्पक्षे त्वियमाशङ्का तत्रैव बोद्धव्या; ''यस्य येनाभिसम्बन्धो दूरस्थस्यापि तस्य सः'' इति वृद्धवचनात्। अग्रिमग्रन्थस्य प्रयोजनं दर्शयितुं कल्पिताकल्पितरूपभेदेन ब्रह्मणो द्वैविध्यं श्रुतिस्मृतिप्रसिद्धं दर्शयति– *उच्यत इत्यादिना*।। भवतु विद्याविद्यावस्थाभेदतो ब्रह्मणो द्वैरूप्यम्। ततः किमति? अत आह– *तत्राविद्यावस्थायामिति*।। तत्र=विद्याविद्यावस्थाभेदे सिद्ध इत्यर्थः। विद्याविद्यावस्थायर्मध्य इति वार्थः। उपास्याभेदे कथमुपासनानां भेद इति? इत्राह– *तेषामिति*।। तथापि तेषां फलभेदो न स्यात्; एकोपास्यपरितोषकरत्वादिति, तत्राह– *एक एव तु परमात्मेश्वर इति*।। क्रतुः=संकल्पः उपासनमिति यावत्। एक एव चेत् सर्वभूतान्तरात्मा, कथं तस्योत्कृष्टत्वनिकृष्टत्वादिभेदेन रूपेण भूतेषूपलब्धिः स्यादिति? तत्राह– *यद्यप्येक एवेति*।। श्रुतौ तथा स्मृतौ। तथापि प्रकृते किमायातम्? तत्राह– *एवमिहापीति*।। तथाच तेन रूपेण ब्रह्मैव पुनः सन्दिग्धं तत्र तत्र जिज्ञास्यते, इति तज्जिज्ञासाया असमाप्तत्वादुपपन्नोऽग्रिमो ग्रन्थ इत्याशयः। एवमपि समन्वयाध्याये पुनः परमतनिराकरणं किमर्थम्? तत्राह– *यच्चेति*।। अत्रोच्यते–

ननु–साधनचतुष्टयसंपन्नेन सर्वतो व्यावृत्सुनैकरूपब्रह्मण एव जिज्ञास्यत्वेन प्रतिज्ञातत्वात् तस्य चोपासनायामनधिकारात् कथं द्विरूपं हि ब्रह्मावगम्यत इत्यादिनाऽग्रिमविचारकलापस्तं प्रति समर्थ्यते? अथैवं मन्यसे–साधनचतुष्टयसंपन्नं प्रति ब्रह्मज्ञानाय वेदान्तवाक्यानां विचारे प्रतिज्ञाते केन वाक्येन विद्याविषयो ब्रह्म प्रतिपाद्यते, केन वाऽविद्याविषय इति विवेकायाविद्याविषयोऽपि ब्रह्म तं प्रति

प्रतिपाद्यते, ज्ञात्वा फलाय धर्मविचारार्थिनं प्रत्यधर्मवाक्यविचारवदिति–चेत्, न; वैषम्यात्। तत्र हि धर्मचिकीर्षाऽधर्मजिहासयोरुभयोरपि स्वातन्त्र्येणोभयविचारप्रयोजकत्वाद् जिज्ञासितेऽपि धर्मे न तदाकाङ्क्षोपरमः, अतः सोऽपि जिज्ञास्यः, अत्र तु पूर्वमेव परित्यक्तसर्वैषणस्य ब्रह्मज्ञानमात्रमाकाङ्क्षोर्जिज्ञासिते तस्मिन्, सर्वाकाङ्क्षाशान्तेर्हातव्यादेरभावाद् न जिज्ञासायां किञ्चिदेव शिष्यते; "यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोकः एकत्वमनुपश्यतः। यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं शोक एकत्वमनुपश्यतः। यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येदि"ति श्रुतेः। अतस्तं प्रति निर्णायकवाक्यान्येव विचार्य ब्रह्मदर्शनं कार्यम्, न तु सगुणब्रह्मविचारावसरः। न च–सगुणनिर्गुणवाक्यविवेकायैव तद्विचार इति–वाच्यम्; पूर्वमेवाचार्यस्य तद्विवेकसिद्धेः, शिष्यस्यापि विदितपदपदार्थस्य तद्भेदसिद्धेः, अन्यथा कर्मकण्डस्यापि तद्भेदसिद्ध्यर्थं विचारप्रसक्तेः। तच्च प्रत्युक्तमानन्तर्यार्थाथशब्दव्याख्यानावसरे। उपासनाया ज्ञानसहकारित्वं तु निराकृतम्–"तत्तु समन्वयादि"त्यत्र; "तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत" इति श्रुतिविरोधात्। तस्मात् सगुणवाक्यविचारः सूत्रकारस्य निरर्थकः; अप्रसक्तचिन्तनत्वादिति–चेत्, नैष दोषः; अधिकारतारतम्यात् तच्चिन्तनोपपत्तेः। तरतमभावेन ह्यधिकारो भिद्यते। कथम्? इत्थम्; तीव्रो मध्यो मन्दश्चेति तदधिकारस्त्रिधा भिद्यते। सोऽपि तीव्रतीव्रतरतीव्रतमत्वादिक्रमेण त्रेधा भिद्यते। एवं यत्राभिन्नोऽधिकारः, तत्र येषां तीव्रतीव्रतरतीव्रतमरूपेण विवेकवैराग्यादिलक्षणाधिकारः संपन्नः, न तेषां ब्रह्मविचारादन्यत् किञ्चिदपेक्षितम्; तावतैव फलसिद्धेः कृतकृत्यत्वात्। येषां मध्य-मध्यतर-मध्यतम-मन्द-मन्दतर-मन्दतमरूपेणोक्ताधिकारः, तेषां निर्गुणे झटिति चित्तसमाधानस्य कर्तुमशक्यत्वात्, "श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः"। "नायमात्मा बलहीनेन लभ्यो न च प्रमादादि"त्यादिश्रुतेस्तदर्थं सगुणब्रह्मनिरूपणमपेक्षितमिति तेषामर्थं तत्करणमुचितम्। तदुक्तम्–"निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः। ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणै"रिति। न च–तद्विचारस्याप्रतिज्ञातत्वात् कथं तत्करणमिति–वाच्यम्; ब्रह्मप्रमाणादिविचारप्रतिज्ञावत् सगुणब्रह्मविचारप्रतिज्ञानस्याप्युक्तरीत्याऽर्थसिद्धत्वात्। यद्वा–देवासुरादीन् प्रति प्रजापतेर्द इत्युपदेशवदेक एव ब्रह्मशब्दः प्रतिज्ञासूत्रे शिष्याशयानुसारेणोभयविधं ब्रह्मोपस्थापयति, तीव्राद्यधिकारिणं प्रति निर्गुणम्, मन्दादिकं प्रति तु सगुणमिति न काचिदनुपपत्तिः।

ननु–एवं सत्येकेनाधिकारिणा न सर्वं शारीरकमध्येतव्यं स्यात्, नैष दोषः; सगुणनिर्गुणवाक्यानां प्रत्यध्यायं प्रतिपादं न व्यामिश्रणेन विचारणात्, मण्डूकप्लुतिवद् मध्यतः परित्यागेन तत्करणे

क्रमभङ्गाद् विहितशारीरकश्रवणानुपपत्तेः, अनपेक्षितत्वेऽपि ब्राह्मणादेरश्वमेधादिविचारवत् सर्वाधिकारिणां सर्वविचारोपपत्तिरित्यास्तामयं चर्चः।। प्रकृतमनुसरामः।।

***आनन्दमयोऽभ्यासात्*।।१२।।**

प्रथमं तावदयं विचारः–किं सतो जगत्कारणस्य परमात्मनश्चिन्मयत्ववद् आनन्दमयत्वमप्यस्ति, आहो न। तदर्थं चायं विचारः–किं तैत्तिरीयकेऽन्नमयं प्राणमयं मनोमयं विज्ञानमयं चानुक्रम्य "तस्माद्वा एतस्माद्विज्ञानमयात्। अन्योऽन्तर आत्माऽऽनन्दमय" इति विज्ञानमयस्यान्तरात्मत्वेन श्रूयमाणानन्दमयः परमात्मा, किं वा जीवात्मेति। तदर्थमप्येवं विचारणीयम्–किमानन्दमय इत्यत्र मयट् चातुराश्रम्यमित्यादिवत् स्वार्थतद्रूपाद्यर्थः, किं वा विकारार्थ इति। यदि विकारार्थता, तत्र यद्यपि न जीवः साक्षादानन्दविकारः; तदजत्वश्रुतिस्मृतिव्याकोपात्; तथापि तदुपाधेर्बुद्ध्यादेरानन्दविकारत्वाद् औपाधिकस्यैव जीवत्वाद् भवति विशिष्टरूपेणानन्दविकारः; "सर्व आत्मानो व्युच्चरन्ती"ति श्रुतेः, एकदेशेन जीवस्य साक्षाद्विकारत्वाभ्युपगमाद्वोभयथाऽपि जीव एवास्मिन् वाक्य आनन्दमयः, न ब्रह्म; तस्य कार्योपाधिकत्वाभावेनोपाधितोऽपि तद्विकारत्वानुपपत्तेः। तथाच स्वप्रधानत्वात् तस्यैव ज्योतिःशब्देन ज्योतिष्टोमाभ्यासावद्र आनन्दशब्देनान्तिमवाकयेऽभ्यासोऽनानन्दत्वेऽप्युपासनार्थं कृतकरो भवतीति न ब्रह्मण आनन्दत्वे किञ्चित्कारणमस्ति।।

ननु–ब्रह्मण अनानन्दत्वे कथं जीवोऽप्यानन्दविकारः स्यात्? नैष दोषः; आनन्दमयशब्दस्य जीवपरत्वसिद्धेः प्रकृतेरन्यार्थत्वाद् न स्वार्थपरत्वमस्ति, इत्युपचारेणापि ब्रह्मण आनन्दशब्दाभिधेयत्वोपपत्तेरिति मन्यते। कथमुपचारः? निःर्दुखावस्थत्वादिति ब्रूमः। जीवावस्थायां हि बुद्धिधर्मसम्बन्धाद् दुःखम्, न ब्रह्मावस्थायाम्; सर्वदुःखकारणबुद्धितत्कृतधर्माधर्म-शरीरद्वयसंयोगाभावात्। अत एव जीवस्यापि सुषुप्तिकाले निर्दुःखब्रह्मसंपत्तेः सुखभोक्तृत्वमुपवर्ण्यते श्रुत्यन्तरे–"आनन्दभुक् चेतोमुख" इति, तद्दशायां कार्यकरणाभावाद् यथार्थतः सुखभोक्तृत्वमुपपद्यते। तस्माद् निर्दुःखत्वगुणसाम्यमात्रेणानन्दमयावयवभूतानन्दपदं ब्रह्मणि तत्कारण उपपद्यते, इति नानन्दरूपत्वसिद्धिः। अभ्यासस्त्वन्यपर एवेत्युक्तम्।।

अथ–आनन्दमयपदे मयट् स्वार्थिकश्चातुराश्रम्यमितिवत, किं वा ताद्रूप्यार्थश्चिन्मयमित्यादिवत्। ताद्रूप्येऽपि मयटः प्रसिद्धेः"श्चिन्मयं जगत्" "सर्वं विष्णुमयं जगत्" "चिदिहास्तीह चिन्मात्रमिदं चिन्मयमेव च। नारायणमयं धीराः पश्यन्ति परमार्थिनः। जगद् धनमयं लुब्धाः कामुकाः कामिनीमयम्।" इत्यादिश्रुतिस्मृतिलोकप्रयोगस्य तत्र दर्शनात्। पाणिनिना विकारप्राचुर्ययोरेव मयटो विधानात् तद्विरोधेन स्वार्थताद्रूप्ययोरपि मयडर्थत्वकल्पनमयुक्तमिति चेत्, न; विकारादाविव

स्वार्थादावप्यविगानेन तत्प्रयोगस्य दृष्टत्वेन वार्तिककारादिभिस्तदङ्गीकारात्, सूत्रस्योपलक्षणत्वात्, ''सूत्रेष्वेव हि यद् वृत्तं तद् वृत्तौ तच्च वार्तिक'' इति न्यायात्, तद्विद्भिस्त्रिमुनिव्याकरण उत्तरोत्तरप्रामाण्याङ्गीकाराच्च, अन्यथा श्रुतिस्मृतिलोकेष्वविगीततत्प्रयोगविरोधापत्तेः। पाणिनिना तन्नियमविवक्षायामपि नास्मन्मते तद्विरोधोऽस्ति; भूमशब्दवद् निरतिशयानन्दे प्राचुर्यार्थस्य तस्य प्रयोगसंभवात्। यथा हि–''स भूमा यत्र नान्यत् पश्यती''त्यत्र भूमाानन्दे ब्रह्मणि ''बहोर्लोपो भू च वहोः'' इति मनिन्प्रत्ययान्तस्य बहुत्वार्थे स्मृतस्य भूमशब्दस्य निरतिशयार्थत्वं विवक्षित्वा प्रयोगः, तद्वत् प्राचुर्यार्थस्य मयटस्तस्मिन्निरतिशयार्थत्वं विवक्षित्वा ब्रह्मणि प्रयोगोपपत्तिरिति न काचिदनुपपत्तिः। एतदेवाभिप्रेत्य सूत्रकारोऽपि वक्ष्यति–''विकारशब्दान्नेति चेन्न प्राचुर्यादि''ति। एवं च सति वक्ष्यमाणरीत्या यदि प्रकृते मयटः स्वार्थताद्रूप्याद्यर्थत्वसिद्धिः, तदा–''सत्यं ज्ञानमनन्तं ब्रह्मे''ति प्रकृतं मान्त्रवर्णिकं ब्रह्मैवानन्दमयपदेनोच्यते, इति तस्य स्वप्रधानस्य प्रकरणिनोऽभ्यासादानन्दरूपत्वसिद्धिरिति। अतः संभूयैतेषां पक्षाणां विचारः प्रवर्तते। किं तावत् प्राप्तम्?

न ब्रह्म चिन्मयवदानन्दमयम्; यतो जीव एवास्मिन् वाक्येऽमुख्य आत्माऽऽनन्दमयपदेनाभिधीयते, न मुख्यः परमात्मा। तदपि कस्मात्? अन्नमयाद्यमुख्यात्मप्रवाहपतितत्वात्। ननु–अमुख्यप्रवाहपातेऽपि यथा सत ईक्षणं मुख्यमवधृतम्, तद्वदत्राप्यमुख्यान्नमयाद्यात्मप्रवाहपातेऽप्यानन्दमयस्य मुख्यात्मत्वं भविष्यतीति–चेत्, न; तद्वदत्र मुख्यत्वावधारणकारणाभावात्। तत्र ह्यात्मशब्दो मुख्यत्वावधारणे कारणमुक्तम्। न चात्र मुख्यत्वावधारणे किञ्चित् कारणमुपलभ्यते। अतो वैषम्यात्–''विशये प्रायदर्शनादि''ति न्यायेनात्राध्यवसीयते। एतेन–पूर्वोक्ताधिकरणयोः प्रत्युदाहरणसङ्गतिरुक्ता–भवति; पूर्वसिद्धान्ताक्षेपेण पूर्वपक्षप्रवर्तनात्। अथाप्यानन्दमयस्य सर्वान्तरत्वश्रवणाद् मुख्यात्मत्वावधारणकारणमस्तीति चेत्, न; विकारार्थे मयटो विरोधात्, चतुर्णामान्तरत्वे प्रकृतेऽपि सर्वान्तरत्वाध्यवसानासंभवात्॥

ननु–मयटोऽपि नानार्थत्वस्य दर्शितत्वाद् विकारार्थत्वमानन्दमयपदे सन्दिग्धम्, अतो न तेन सर्वान्तरत्वाध्यवसानं विरुध्यते; वैपरीत्यादिति–चेत्, न; अन्नमयादिषु तद्विकारार्थत्वनिश्चयादत्रापि ''विशये प्रायदर्शनादि''ति न्यायेन तद्विकारार्थत्वनिश्चयोपपत्तेः। अस्ति च मयटो विकारार्थत्वे कारणान्तरमानन्दमयस्य प्रियाद्यवयवययोगश्रवणम्; ''तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्ष'' इत्यादि, शारीरत्वश्रवणं वा; ''तस्यैष एव शारीर आत्मा यः पूर्वस्ये''ति। एतेन–आनन्दमयस्य प्रियाद्यवयवयोगः काल्पनिक एव, न पारमार्थिक इति–अपास्तम्; सशरीरस्य

प्रियादियोगावश्यकत्वात्, "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ती"ति श्रुतेः। तस्माद् मयटो विकारार्थत्वात् संसार्येवात्माऽऽनन्दमयत्वेनाभिधीयते। तथाच न ब्रह्मण आनन्दमयत्वसिद्धिरिति।।

एवं प्राप्ते पठति सूत्रकारः- *आनन्दमयोऽभ्यासादिति*।।१२।। आनन्दमयोऽत्र परमात्मा भवितुमर्हति। आनन्दमयशब्दश्च प्रातिपदिकार्थमात्रपरः। कुतः? अभ्यासात्। यदि हि प्रकृतः परमात्माऽऽनन्दरूपः, आनन्दमयशब्दश्च प्रातिपादिकार्थमात्रपरः, तदा तस्यैव प्रकृतस्यानन्दमयस्यानन्दशब्देन बहुकृत्वोऽभ्यास उपपद्यते; अन्यथाऽन्यत् प्रकृतम्, अन्यच्चाभ्यस्यत इति जरद्रववाक्यवत् श्रुतेरप्रामाण्यमेव प्रसज्येत। कुत आनन्दमय एवानन्दपदेनाभ्यस्यत इति? उच्चयते; आनन्दमयं प्रस्तुत्य-"रसो वै स" इति तस्येवानन्दमयस्य रसत्वमुक्त्वोच्यते श्रुत्या-"रसं ह्येवायं लब्ध्वाऽनन्दी भवति। को ह्येवान्यात् कः प्राण्यात्। यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयाति"। "सैषाऽऽनन्दस्य मीमांसा भवति"। "एतमानन्दमयमात्मानमुपसंक्रामति"। "आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन"। "आनन्दो ब्रह्मेति व्यजानादि"त्येवमादि। तस्माद् बहुवारमानन्दशब्देनानन्दमयस्याभ्यासादानन्द एवानन्दमयशब्देनाभिधीयते। "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त" इत्यादिब्रह्मलक्षणलक्षित्वाच्च, "आनन्दो ब्रह्मेति व्याजानादि"त्युपसंहाराच्च। अपि च श्रुत्यन्तरेऽपि "विज्ञानमानन्दं ब्रह्मे"ति ब्रह्मण्येवानन्दशब्दो दृष्टः। अतोऽप्यानन्दात्मा ब्रह्मानन्दमयपदेनोच्यते। इतोऽप्यानन्दात्मकं ब्रह्मानन्दमयपदवाच्यम्; यत आनन्दमयस्य प्रियादिकं शिरआद्यवयवत्वेन निर्दिश्य-"आनन्द आत्मे"त्यानन्दमात्मत्त्वेन निर्दिशति श्रुतिः। यो हि यस्य स्वरूपम्, स तस्यात्मा भवति; स्वरूपपर्यायत्वादात्मशब्दस्येत्युक्तत्वात्। अत एवान्नरसमयस्य-"अयमात्मे"ति शरीरमेवात्मत्वेन निर्दिशति। एतेन-यदुक्तमन्नमयाद्यमुख्यात्मप्रवाहपतितत्वादानन्दमयोऽपि न मुख्य आत्मेति, तदपि-प्रत्युक्तम्; सर्वान्तरत्वनिर्देशाच्च। न च-चतुर्णामेवान्नमयादीनामनात्मनां मूढैरात्मत्वेन भ्रान्त्या परिगृहीतानामन्तरतमत्वेन निर्दिष्टस्याप्यानन्दमयस्य न सर्वान्तरत्वसिद्धिरिति-वाच्यम्; तत उत्तरस्यान्तरमस्यानिर्देशात् तस्यैव सर्वान्तरत्वसिद्धेः। न ह्यलौकिकः पदार्थः स्वोहगम्य इत्यसकृदवोचाम। अतो यद् यथा श्रुतिप्रमाणेन वेद्यते, तत् तथैवावगन्तव्यम्। श्रुतिश्च-विज्ञानमयादन्तरतमत्वेनानन्दमयं निर्दिश्य तृप्तीभूता न तदन्तरतममन्यत् किञ्चिदुपदिशति। तस्मात् तदतिरिक्ते सर्वान्तरे प्रमाणाभावात् तस्यैव सर्वान्तरतमत्वेन मुख्यात्मत्वमध्यवस्यामः। न च विज्ञानादन्तरतमं मूलकारणादन्यत् सर्ववेदान्तेषु क्वचिदपि संभावयितुं शक्यते। मूलकारणं चाज्ञातं ब्रह्मेत्युक्तम्। युज्यते चैतत्। सर्वश्रुतिषु बुद्धेरन्तरत्वेन परमात्मनो निर्देशात्, तस्यास्तदुपलब्धि-स्थानत्वात्।।

"योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः" "अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति। ईशानो भूतभव्यस्य न ततो विजुगुप्सते" "परमात्मा हृदि स्थितः"। "तद् हृदयमित्याचक्षत" इत्याद्याः सर्वश्रुतयः। अत्रापि–"यो वेद निहितं गुहायाम्" इति हृदयगुहायामेव निहितस्य सत्यादिलक्षणस्य ब्रह्मणो वेदनमुक्तम्। एतच्च "मान्त्रवर्णिकमेव च गीयत" इति सूत्रव्याख्यानावरे स्पष्टीकरिष्यामः। यदपि–प्रियशिरस्त्वाद्यवयवयोग आनन्दमयस्य मुख्यात्मत्वेऽनुपपन्न–इत्युक्तम्, तदप्यतीतानन्तरबुद्ध्याद्युपाधिकृतमेव तत्कल्पनमित्यपि मान्त्रवर्णिकसूत्रे स्पष्टीकृत्य दर्शयिष्यामः। एतेन–शारीत्वमप्यानन्दमयस्यान्नमयादिपरम्परया प्रदर्श्यमानत्वेनोपाधिना वा, "यस्य पृथिवी शरीरम्" इतिवत् शरीरान्तर्यामित्वेन वा व्यपदिश्यते, न साक्षात्; तस्य संसारिवत् शरीर आत्माभिमानासंभवादिति–व्याख्यातम्॥

***विकारशब्दान्नेति चेन्न प्राचुर्यात्*॥१३॥**

स्यादेतत्–शारीरत्वादिकमानन्दमयस्य न साक्षात्, यद्यानन्दमयपदेन परमात्माऽभिधीयेत। न चैतदस्ति। कुतः? विकारशब्दात्। आनन्दमयशब्दो हि प्रकृते विकारमभिधत्ते। तदपि कुतः? प्रायदर्शनादित्युक्तत्वात्। स वा एष पुरुषोऽन्नरसमयः प्राणमयो मनोमयो विज्ञानमय इति हि विकारशब्दाः, एतेषां संनिधाने चानन्दमयस्य पतितत्वात् कथमकस्मात् प्रकृतिवचनत्वमस्य? "मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोरि"ति प्रकृते विकारार्थे मयटो विधानात्। तस्मादन्नरसमयादिशब्दवद् विकारविषय एवायमानन्दमयशब्दः, न प्रकृतिवचनत्वेनानन्दार्थः सन् परमात्मानमभिधत्ते। तथाच साक्षादेवानन्दमयस्य प्रियाद्यवयवयोगः शारीरत्वं च, इति नातीतानन्तरविज्ञानमयोपाधिकृतं तत्कल्पनमिति–चेत्, न; प्राचुर्यात्=प्राचुर्यार्थत्वादित्यर्थः। यदि हि भवतां पाणिनिवचनबलाद् विकारवचन एव मयड् आनन्दमय इत्यत्र, न प्रकृतिवचन इति दुराग्रहः, अस्तु नामैवम्, तथापि प्राचुर्यार्थ एव मयट् भविष्यति; विकारवत् प्राचुर्येऽपि–"तत्प्रकृतवचने मयडि"ति मयटोऽनुशिष्टत्वात्। तथाच यथाऽन्नमयो यज्ञ इत्यन्नप्रचुरो यज्ञ उच्यते, एवमानन्दमय इत्यानन्दप्रचुरं ब्रह्मोच्यते, इति न किञ्चिदनुपपन्नम्॥

ननु–आनन्दप्रचुरत्वे ब्रह्मणो दुःखलवसंभावनापि स्यात्; प्रचुरत्वस्य ह्रस्वत्वादेरन्यदीर्घत्वाद्यपेक्षत्ववद् अन्यन्यूनत्वापेक्षत्वादिति–चेत्, सत्यम्; अनिर्वचनीयस्य सर्वस्याल्पत्वापेक्षायां तत्प्रचुरत्वोपपत्तेः; तत्रैव निरतिशयप्राचुर्यविश्रान्तेः। तथाच श्रुत्यन्तरे–"यो वै भूमा तत्सुखम्। नाल्पे सुखमस्ती"ति। तथाच निरतिशयबहुत्वार्थभूमशब्दवद् निरतिशयप्राचुर्यार्थमयटोऽपि तत्रोपपत्तिरिति। एतेन–ब्रह्मणि दुःखलवसंभावनापि–प्रयुक्ता; न हि समानाधिकृताल्पत्वमपेक्ष्यैव प्राचुर्य कस्यचिद्विवक्ष्यत इति नियमोऽस्ति, नापि विरोधिन

एवाल्पत्वमपेक्ष्य; असमानाधिकृतविरोध्यल्पत्वापेक्षयापि तत्प्रयोगदर्शनात्, सर्वप्रपञ्चस्य ब्रह्मण्येवाध्यस्तत्वात् तदभिप्रायेण तत्प्रयोगेऽप्यविरोधाच्च। तस्मात् यत्किञ्चिदेतत्। अपिच इतोऽपि प्राचुर्यार्थे मयट्, आनन्दमयश्च परमात्मा; यतो ब्रह्मानन्दस्य निरतिशयप्राचुर्यविवक्षणार्थमानन्दमीमांसा प्रवर्तते-"सैषाऽऽनन्दस्य मीमांसा भवती"त्यादिना; अन्यथाऽप्रकृतार्थत्वात् तन्मीमांसाऽकालकुसमवत् स्यात्। तदेतदभिप्रेत्य भगवान् भाष्यकार आह-"आनन्दप्रचुरत्वं च ब्रह्मणो मनुष्यत्वादारभ्योत्तरोत्तरस्मिन् स्थाने शतगुण इत्युक्त्वा ब्रह्मानन्दस्य निरतिशयत्वावधारणात्। तस्मात् प्राचुर्यार्थे मयट्-इति। एतेन-प्रायदर्शनाद्विकारार्थे मयडिति-प्रत्युक्तम्। अपि च प्रायदर्शनमप्यसिद्धम्; प्राणमयमनोमयविज्ञानमयशब्दानां प्रकृतिविषयत्वात्। प्राणमयादिशब्देन हि प्राणादिकोशो विवक्षित:; तद्वृत्तीनां तदवयवत्वेनोपन्यासात्। न च प्राणादिरेव प्राणादिविकार:। तस्मात् प्रकृतिवचन एव तत्रापि मयट्। सूत्रकारस्तु प्राचुर्यार्थमभ्युपेत्यापि समाहितवान्। तस्मात् प्रियशिरस्त्वादिश्रवणातीतानन्तरोपाधिनिमित्तत्वात् सिद्ध: परमात्माऽऽनन्दमय इति।।१३।।

***तद्धेतुव्यपदेशाच्च*।।१४।।**

भावप्रधानो निर्देश:। इतश्च निरतिशयप्रचुरानन्दो मयटाऽभिधीयते; यत: सर्वानन्दहेतुत्वमानन्दमयस्य व्यपदिशति श्रुति:-*"एष ह्येवानन्दयाती"ति*।। दैर्घ्यं छान्दसम्। यो ह्यन्यान् सर्वानानन्दयति, स सर्वापेक्षया प्रचुरानन्द इति गम्यते, यथा-यो यं धनिकं करोति, स तदपेक्षया प्रचुरधनो दृष्ट:, तद्वत्। तस्मादप्यानन्दरूप: परमात्माऽऽनन्दमयपदेनाभिधीयत इति।।१४।।

***मान्त्रवर्णिकमेव च गीयते*।।१५।।**

इतोऽपि परमात्मैवानन्दमय:; यस्माद् मन्त्राभिहितमेव ब्रह्मास्मिन् वाक्य आनन्दमयत्वेन गीयते-व्याख्यायत इत्यर्थ:। कथं तत्? उच्यते। "ब्रह्मविदाप्नोति परम्" इति ब्राह्मणेन सूत्रिते-किंलक्षणं तद् ब्रह्म? कुत्र वा तद् ब्रह्म जानाति पुमान्? का वा तद्विद: परावाप्तिरित्यत्यपेक्षायां क्रमेण तदाकाङ्क्षापूरणाय मन्त्रोऽभिधीयते-"तदेषाऽभ्युक्ता। सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चिते"ति। किंलक्षणं ब्रह्मेत्यपेक्षायाम्-"सत्यं ज्ञानमनन्तं ब्रह्मे"ति मन्त्रपादेन तत्स्वरूपावधारणं कृतम्। कुत्र वा तद् ब्रह्म जानाति पुमान्? इत्यस्योत्तरम्-"यो वेद निहितं गुहायां परमे व्योमन्" इति द्वितीयमन्त्रपादेन। परमे=उत्कृष्टे, व्योमन्=व्योम्नि, हृदयपुण्डरीककोशाभ्यान्तराकाशे, गुहायाम्=बुद्धौ, तया ब्रह्मण: संवरणात्, निहितम्-प्रतिष्ठितम्; तत्प्रत्यक्तया, तदन्तर्यामित्वेन, तत्साक्षित्वेन चेत्यर्थ:। का वा तद्विद: परावाप्तिरित्यस्योत्तरमुत्तरार्ध:। इत्थम्भावे समानाधिकरणे च तृतीयाद्वयम्। स:=उक्तलक्षणब्रह्मात्मवित, विपश्चिता ब्रह्मणा=ज्ञानैकरूपब्रह्मस्वरूपेणात्मना, सह=युगपत्,

कामान्=ज्ञानसाध्यान् सर्वान् कामान् मोदप्रमोदादिरूपेण मनुष्यत्वादारभ्य ब्रह्मलोकान्तेषु प्रसिद्धान्, अश्नुते=व्याप्नोतीत्यर्थः; "यावानर्थ उदपाने सर्वतः सम्प्लुतोदके। तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः।" इति भगवद्वचनात्। एवं मन्त्रेणाभिहिते, भवति पुनस्तत्राशङ्का–कथं पुनरनेकानर्थसंकुलायां बुद्धौ तादृशं ब्रह्म निष्कृाज्ञष्या ज्ञज्ञतुं शक्यते? यावता बुद्ध्यात्मनो देहाद्यात्मतो निष्कर्षो दुर्लभः, दूरत एव तदन्तर्यामिणो निष्कर्ष इति तदन्तर्यामित्वेन बुद्धिगुहायां तस्यावस्थानमेव किंप्रमाणकम्? कथं वा ज्ञानरूपेण ब्रह्मात्मनाऽऽनन्दरूपाान् कामान् व्याप्नोति? न ह्यन्यरूपेणान्यस्य मुख्या व्याप्तिः संभवतीत्युक्तमधस्तात्, वक्ष्यते च। तान्येतान्याशङ्कापदानि क्रमेण निराकर्तुमध्यारोपापवादन्यायेन–"तस्माद्वा एतस्मादात्मन आकाशः संभूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नात् पुरुष" इति तस्मादेव ब्रह्मण आकाशादिक्रमेणान्नमयादिलक्षणपुरुषस्योत्पत्तिमुक्त्वा–"स वा एष पुरुषोऽन्नरसमय" इत्यादिना तत्तदात्मग्रहपरित्याजनेन विज्ञानमयस्यात्मत्वं प्रापय्य ततो विनिष्कृष्य तदन्तरतमं मान्त्रवर्णिकमेव ब्रह्मानन्दमयत्वेन प्रियाद्यवयवत्वेन च ब्राह्मणेन गीयते। तत्राध्यारोपापवादन्यायेन तज्ज्ञानप्रकारस्य प्रदर्शनात् प्रथमाशङ्का निराकृता, द्वितीया च प्रियाद्यवयवत्वप्रदर्शनेन। प्रियादयो ह्यानन्दविशेषा बुद्धिवृत्तिविशेषरूपाः कामसंकल्पादिवत् प्रतीयन्ते। न चानानन्दात्मिकाया बुद्धेर्वृत्तयः प्रियमोदादयः स्वत आनन्दरूपा भवितुमर्हन्ति; "यो वै भूमा तत्सुखम्, नाल्पे सुखमस्ती"ति श्रुत्यन्तरात्। अतो यद्बिम्बोद्ग्राहितया अनानन्दा अपि बुद्धिवृत्तयो भवत्यानन्दाः, सोऽस्त्यन्यो बुद्धेरन्तरतम इति श्रुत्यर्थविश्वसायनुमाननिर्देशाद् भवति तदन्तरतमसद्भावप्रमाणाभावादन्यनिवृत्तिः। अत एव प्रियमोदादीनां विज्ञानमयधर्मत्वेऽप्यानन्दांशं विवक्षित्वा घटकरकाद्याकाशानां महाकाशवयवत्ववदानन्दमयावयवत्वेन निर्देशः कृतः निर्भेद्यस्यानन्दमयस्य स्वतोऽवयवयोगाभावात्, भावे वा तेषामेव निर्देशः स्यात्, न परोपाधीना प्रियमोदादीनामिति। अत एव–"एष ह्येवानन्दयाती"ति तद्धेतुव्यपदेशोऽप्येवं सत्युपपन्नतरो भवति। एतेन–तृतीयाशङ्कापि–निरस्ता; ब्रह्मण एव सर्वानन्दरूपत्वात् प्रियमोदादिलक्षणसर्वकामानां तदवयवत्वेन निर्देशात्, "एतस्यैवान्यानि भूतानि मात्रामुपजीवन्ती"ति श्रुत्यन्तराच्चनावृतब्रह्मरूपेण सर्वकामव्याप्तिसिद्धेरिति। तस्मात् सम्यगभिहितमाचार्येण–मान्त्रवर्णिकमेव ब्रह्मानन्दमयत्वेन गीयत इति। तदेतत्सर्वमभिप्रेत्य भाष्यकारोऽप्याह– *यस्मादित्यादिना*।। ननु–अन्नमयादिवदयमप्यमुख्य एवात्मा न सर्वान्तरः; तदवयवत्वेन ब्रह्मणो निर्देशात्–"ब्रह्म पुच्छं प्रतिष्ठे"ति, अन्यथैकस्यैवावयवावयवित्वानुपपत्तेरिति–चेत्, नेत्याह– *न चान्नमयादिभ्य इवेति*।। ननु–आनन्दमयादन्यस्यान्तरात्मनोऽनभिधानेऽपि तदवयवत्वेन ब्रह्मणो निर्देशबलादेव सोऽवसीयताम् न; निर्भेदस्यापि 'राहोः शिर' इतिवदुपचारात् तदवयवावयवित्वेन निर्देशोपपत्तेः। तदुपचारस्त्वतीतानन्तरोपाध्यपेक्षयेत्यसकृदुक्तत्वात्,

अन्यथा तवापि मते तदन्तरात्मनस्तत्पुच्छत्वेन निर्देशानुपपत्तेः, अन्नमयादिषु पुच्छत्वेन निर्दिष्टस्य तथात्वदर्शनात्, प्रतिष्ठापदस्यापि पुच्छपदसामानाधिकरण्यादधिष्ठानार्थकत्वानुपपत्तेः। उपचारकल्पनाया अविशिष्टत्वेऽपि तव मते प्रक्रमभङ्गः, पुच्छपदवैयर्थ्यम्, अवयवत्वेन श्रुतस्य स्वप्राधान्यकल्पनम्, आनन्दमयस्य स्वप्राधान्येन सर्वान्तरत्वश्रवणबाधश्चेत्येवमादीनि बहूनि दूषणानि, अस्मन्मते त्वेकस्यैवावयवावयवित्वकल्पनामात्रमिति महान् विरोधः। यदा तु नामरूपबीजभूतमव्यक्ताख्यमानन्दमयात् परमात्मनो निष्कृष्य "ब्रह्म पुच्छं प्रतिष्ठे"त्यनेन विवक्ष्यते; "पादोऽस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवी"ति श्रुत्यन्तरात्, तदा तदुपचारकल्पनाऽपि नास्ति। अपि च त्वयाप्यानन्दस्य ब्रह्मत्वं विवक्षता तदुपचारः कल्पनीयः; "आनन्द आत्मे"त्यानन्दमयावयवत्वेनानन्दस्य निर्देशात्, अन्यथा तदेवानन्दात्मकं ब्रह्मानन्दमयस्यात्मा पुच्छमन्तरात्मा चेति विरुद्धम्; अन्यत्वानन्यत्वयोरेकत्र विरोधात्। न हि स एव तदात्मा सन् तस्मादन्योऽन्तर आत्मा भवति। अथ उक्तदोषपरिहाराय ब्रह्मानन्दरूपमिति वक्तव्यम्, तन्न; तद्रूपत्वे ब्रह्मणोऽभ्यासादेः कारणस्योक्तत्वात्। अपिच–इतोऽपि नानन्दमयादन्योऽन्तरा आत्माऽस्ति; यत एतद्विषयतयैव "भार्गवी वारुणी"ति समाख्याता ब्रह्मविद्या परिसमाप्तेत्याह–*एतन्निष्ठैव च भार्गवी वारुणी विद्येति*।। तथाहि–तत्र हि भृगुवल्ल्याम्–"अधीहि भगवो ब्रह्मे"त्युपक्रम्य–"अन्नं प्राणमि"त्यादिना शरीरादिकं ब्रह्मविद्यासाधनत्वेनोपदिश्य–"यतो वा इमानि भूतानि जायन्त" इत्यादिना ब्रह्मलक्षणमभिधाय "तद्विजिज्ञासस्वे"ति ब्रह्मजिज्ञासायामधिकारिणं विनियुज्य–"स तपोऽतप्यत। स तपस्तप्त्वा अन्नं ब्रह्मेति व्यजानादि"त्यादिनाऽन्नप्राणमनोविज्ञानानि ब्रह्मग्रहेण ग्राहयित्वा क्रमेण तदपोह्य च, "स तपस्तप्त्वा आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्ती"ति आनन्दात्मन्येव विद्यां परिसमाप्य–"सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिते"त्युपसंहरति श्रुतिः। ततोऽप्यध्यवसीयते–नानन्दमयादन्तरतमोऽन्योऽस्तीति। अन्यथा विज्ञानादिवत् ततोऽपि निष्कृष्य ब्रह्मावक्ष्यद् आनन्दस्यानन्दमयत्वाभावे। तस्मादानन्दमय एव परमात्मा।।१५।।

स्वपक्षं साधयित्वा विपक्षे दोषमभिधित्सन्नाह सूत्रप्रकारः– ***नेतरोऽनुपपत्तेः*।।१६।।** नानन्दमयो जीवो भवितुमर्हति। कुतः? तथा सति जगत्कर्तृत्वाद्यनुपपत्तेः। एवं हि आनन्दमयं प्रस्तुत्य श्रूयते–"सोऽकामयत बहु स्यां प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा। इदं सर्वमसृजत। यदिदं किञ्चे"ति। तत्र यद्यानन्दमयपदेन जीवोऽभिधीयेत, तर्हि शरीराद्युत्पत्तेः प्राक् तस्य सृज्यमानानां विकाराणामालोचनम्, तेषां स्त्रष्टुरव्यतिरेकः, सृष्टिश्च श्रूयमाणा नोपपद्येत। तस्माद् न जीवोऽत्रानन्दमयपदवाच्यः।।१६।।

***भेदव्यपदेशाच्च*॥१७॥** इतश्च नानन्दमयपदवाच्यः संसारी, यत आनन्दमयाद् लब्धृलब्धव्यभावेन तद्भेदं व्यपदिशति शास्त्रम्। "रसो वै सः। रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति" इति हि शास्त्रमानन्दमयस्य रसत्वमुक्त्वा तल्लाभेन जीवस्यानन्दितां दशां दर्शयद् एकस्य लब्धृलब्धव्यभावानुपपत्तेरर्थात् तयोर्भेदं परिशिनष्टि। तस्मादपि न जीव आनन्दमयः। स्यादेतत्–यदि लब्धा लब्धव्यो न भवति; तयोर्भेदात्, हन्त तर्हि–"आत्माऽन्वेष्टव्यः" "आत्मलाभाद् न परं किञ्चिदि"ति श्रुतिस्मृती नोपपद्येयाताम्; अन्विष्टान्वेष्टव्यादिभावस्य भेदसापेक्षत्वादिति चेत्, सत्यं भेदोऽपेक्ष्यते। अस्ति च जीवब्रह्मणोः पारमार्थिकभेदाभावेऽपि मिथ्याज्ञाननिबन्धनो भेदः। अतस्तमादाय श्रुतिस्मृत्योरूपपत्तिः। न च–एवं सति परमार्थत एव तयोर्भेदः किं न स्यादिति–वाच्यम्; "नान्योऽतोऽस्ति द्रष्टे"त्यादितत्प्रतिषेधविरोधात्। न च–एवमनिर्वचनीयद्रष्टुः परमेश्वरादभेदे परमेश्वरस्याप्यनिर्वचनीयत्वप्रसङ्गः स्यादिति–वाच्यम्; रजतादिव शुक्तेः, सूत्रेणाकाशमधिरोहतः खड्गचर्मधरात् पुरुषादिव भूमिष्ठस्य मायाविनः, उपाधिपरिच्छिन्नाद् घटाकाशादिव तदनवच्छिन्नमहाकाशस्यानिर्वचनीयजीवस्वरूपात् पारमार्थिकेश्वरस्वरूपस्य भिन्नत्वात्। न ह्यनिर्वचनीयस्वरूपं परमार्थस्वरूपादभिन्नम्; तदभेदमन्तरेणात्मलाभाभावाभावात्। अतः परमार्थस्वरूपमपि न तदभिन्नं भवितुमर्हति; तमन्तरेणैव तस्य स्वत आत्मलाभात्। ईदृशं चाविद्यकं भेदं विज्ञानात्मपरमात्मनोराश्रित्य "नेतरोऽनुपपत्तेः" "भेदव्यपदेशाच्चे"ति सूत्रद्वयमिति बोद्धव्यम्। एवं यत्र तत्र सूत्रकारेण तयोरग्रे भेदोपन्यासः क्रियते, तत्र तत्रायमेव न्यायो बोद्धव्य इति॥१७॥

स्यादेतत्–मा भूदत्रानन्दमयशब्दवाच्यो जीवः, अनुमानसिद्धं त्रिगुणात्मकं प्रधानं तु तद्वाच्यं भविष्यति; अविरोधात्। तथाहि–बुद्धितत्त्वस्य महतः साक्षादुपादानत्वाद् भवति प्रधानं तदन्तरतमात्मा, सत्वगुणस्य च तदवयवस्य सुखात्मकत्वाद् भवत्यानन्दप्रचुरम्। अत एवानन्दशब्दशब्दस्य तत्राभ्यासोऽप्युपपद्यते। तद्धेतुव्यपदेशोऽपि तस्यैव सर्वानन्दहेतुत्वात्। मान्त्रवर्णिकत्वमपि ब्रह्मलक्षणयोगात्, ज्ञानशब्दस्य करणव्युत्पत्त्याऽधिकरणव्युत्पत्त्या वा तत्रोपपत्तेः। अतः प्रधानमेवास्त्वानन्दमयशब्दवाच्यमिति॥ अत्रोत्तरं पठति सूत्रकारः– ***कामाच्च नानुमानापेक्षा*॥१८॥** अनुमीयत इत्युनुमानम्=प्रधानम्। अपेक्षेति संभावनां ब्रूमः। नानन्दमयवाक्ये परकल्पितप्रधानसंभावना कर्तव्या। कुतः? कामश्रुतेः। "सोऽकामयत बहु स्यामि"त्यानन्दमयाधिकारे कामः श्रूयते। न चाचेतनस्य प्रधानस्य काम उपपद्यते। अत एव न तस्य मान्त्रवर्णिकत्वम्, ज्ञानशब्दस्य भावे प्रसिद्धत्वाच्च। "तस्माद्वा एतस्मादात्मन" इति तस्यात्मत्वश्रवणाच्च। यद्यपी'क्षतेर्नाशब्दमि'त्यनेन तस्य जगत्कारणत्वप्रतिषेधाद् नात्र पुनः प्रसरो युक्तः; तथाप्यस्मदभिहितरीत्या प्रधानस्य ग्रहप्रसक्तौ पूर्वसिद्धन्यायोऽप्याक्षिप्तः स्यादिति मत्वा–"कामाच्च

नानुमानापेक्षे''तीह सूत्रितम्। भाष्यकारेण तु पूर्वोपात्तन्यायस्यैव चेतयितृत्वलक्षणस्यात्रापि सूत्रणात् प्रसङ्गाद् गतिसामान्यप्रपञ्चनमेवेत्युक्तमिति समञ्जसम्।।१८।।

***अस्मिन्नस्य च तद्योगं शास्ति*।।** विशदमस्य भाष्यम्।।१९।।

अत्रैवं सुमार्गेणाधिकरणे निर्व्यूढे किमर्थम्–''इदं त्विह वक्तव्यम्'' इत्यादिभाष्यमकालकुसुमन्यायेन प्रवर्तते?

अत्र केचिद् वर्णयन्ति–एतच्चैकदेशिमतं भाष्यकारेण दूषयितुमुपवर्णितम्, सम्प्रति तन्मतं स्वमतपरिग्रहाय दूषयति–*इदन्त्विह वक्तव्यमित्यादिना*।। अस्मिन्नेवार्थे भाष्यतात्पर्यं वक्तुमेवं विचारमवतारयन्ति। एष तावदुत्सर्गः, यत्–

ब्रह्म पुच्छं प्रतिष्ठेति ब्रह्मशब्दात् प्रतीयते।
विशुद्धं ब्रह्म, विकृतं त्वानन्दमयशब्दतः।।

ब्रह्म पुच्छं प्रतिष्ठेत्यस्मिन् वाक्ये प्रयुज्यमानब्रह्मशब्दाद् विशुद्धं ब्रह्म प्रतीयते, आनन्दमयशब्दाच्चनन्दविकारो यः कश्चिदर्थः। तत्रैवं सति पुच्छशब्दसमभिव्याहाराद् अन्नमयादिषु च पुच्छशब्दस्यावयवार्थत्वे प्रयोगाद् इहापि तत्परत्वात् तत्समानाधिकरणं ब्रह्मपदमपि स्वार्थपरित्यागेन कथञ्चिदवयवपरं व्याख्यायताम्; आनन्दमयपदं वाऽन्नमयादिविकारवाचिप्रायपठितं विकारवाचि वा, कथाञ्चित् प्रचुरानन्दवाचि वा ब्रह्मण्यप्रसिद्धं कयाचिद् वृत्त्या ब्रह्मणि व्याख्यायताम्, आनन्दपदाभ्यासेन च ज्योतिःपदेनेव ज्योतिष्टोम आनन्दमयो लक्ष्यताम्; उतानन्दमयपदं विकारार्थमस्तु, ब्रह्मपदं च ब्रह्मण्येव स्वार्थेऽस्तु, आनन्दपदाभ्यासश्च स्वार्थे, पुच्छपदमात्रमवयवप्रायलिखितमधिकरणपरतया व्याख्यायतामिति कृतबुद्धय एवात्र विदाङ्कुर्वन्तु। तत्र–

प्रायपाठपरित्यागो मुख्यत्रितयलङ्घनम्।
पूर्वस्मिन्, उत्तरे पक्षे प्रायपाठस्य बाधनम्।।

मयड् विकारे मुख्यः, ब्रह्मशब्दः परब्रह्मणि मुख्यः, अभस्यमानानन्दशब्दश्च प्रकृत्यर्थ एव मुख्यः, न मयडर्थे, इति पूर्वस्मिन् पक्ष एतत्त्रितयलङ्घनं स्यात्, आनन्दमयपदस्यान्नमयादिविकारप्रायपाठपरित्यागश्च स्यात्। उत्तरपक्षे तु पुच्छशब्दस्यावयवप्रायपाठस्यैव बाधनम्, अनुगुणं तु मुख्यत्रितयमिति। ननु–यथा पूर्वपक्षे

मयट्श्रुतिबाधः, एवं सिद्धान्तेऽपि पुच्छश्रुतिबाध स्यादिति–चेत्, मैवम्; पुच्छपदं हि बालधौ मुख्यं सदानन्दमयावयवे गौणमेव, इति मुख्यशब्दार्थलङ्घनमवयवपरतायामधिकरणपरतायां च तुल्यम्। अवयवप्रायलेखबाधश्च विकारप्रायलेखबाधेन तुल्यः। तस्माद् मुख्यत्रितयलङ्घनादसाधीयान् पूर्वः पक्षः, मुख्यत्रयानुगुण्येन तूत्तरपक्षो युक्तः। अपि चान्तरत्वमन्नमयाद्यपेक्षया, ब्रह्मणस्त्वान्तरत्वमानन्दमयादर्थादवगम्यते, इति न तस्य श्रुत्यानुक्तिर्दोषाय। एवं च सत्यन्नमयादिवदानन्दमयस्य प्रियाद्यवयवयोगो युक्तः, वाङ्मनसागोचरे तु परब्रह्मण्युपाधिमन्तर्भाव्य प्रियाद्यवयवयोगः, प्राचुर्यं च न व्याख्यायताम्। तथाच मान्त्रवर्णिकस्य ब्रह्मणा एव–''ब्रह्म पुच्छं प्रतिष्ठे''ति स्वप्रधानस्याभिधानात् तस्यैवाधिकारो नानन्दमयस्येति। ''सोऽकामयते''त्याद्या अपि श्रुतयो ब्रह्मविषया नानन्दमयविषया इत्यर्थसंक्षेपः–इति।।

अत्र वदामः–यो भवता सिद्धान्तपक्षसिद्धये प्रथमं बीजावापः कृत, एष तावदुत्सगः–''ब्रह्म पुच्छं प्रतिष्ठेति ब्रह्मशब्दात् प्रतीयते। विशुद्धं ब्रह्म, विकृतं त्वानन्दमयशब्दत'' इति, स तावदनुपपन्न। कुतः? कमलासनादिषु ब्रह्मशब्दप्रसिद्धेरुक्तत्वात्, प्रकरणोपपदनिरपेक्षब्रह्मशब्दाद् योगेन विशुद्धब्रह्मप्रत्ययानुपपत्तेस्तदौत्सर्गिकत्वासिद्धेः, ''ब्रह्मविदाप्नोति परम्'' इति विशुद्धब्रह्मप्रकरणे सत्यपि पुरुषपदसमभिव्याहारलक्षणवाक्येन तद्बाधात् प्रकरणेन तद्विशेषणानुपपत्तेः, विकारार्थ इव स्वार्थताद्रूप्यप्राचुर्यार्थेष्वपि मयटो दर्शनाद् आनन्दमयशब्दाद् विकारार्थप्रतीतेरौत्सर्गिकत्वस्याप्यसिद्धेः। न च–अन्नमयादिविकारप्रायपाठात् तत्प्रतीतेरौत्सर्गिकत्वसिद्धिरिति–वाच्यम्; प्राणमयादौ मयटो विकारार्थत्वासंभवेन स्वार्थिकत्वाद् विकारप्रायपाठाभावेन तदसिद्धेः, स्वार्थप्रायपाठेन तत्स्वार्थिकत्वस्यैवावधारणाद् वैपरीत्यसिद्धेश्च।।

यदप्युक्तम्–यद्यपि प्राणमयादेर्न प्राणविकारत्वमस्ति; तथापि प्राणाद्युपाध्यवच्छिन्नस्यात्मनोऽस्ति प्राणादिविकारत्वं घटाकाशस्येव घटविकारत्वम्, अतोऽस्ति तत्रापि मयटो विकारार्थत्वम्–इति, तदपि मन्दम्; न ह्युपाधेर्विकारत्व उपधेयस्य विकारत्वं भवति; तथा सति तद्विकारत्वस्य तदुपाधित्वासिद्धेः, सिद्धे वाऽन्नरसमयेऽपि तथात्वप्रसङ्गाद् दृष्टान्तासिद्धेश्च। नहि घटाकाशस्य जन्यत्वप्रसिद्धावपि तद्विकारत्वप्रसिद्धिरस्ति लोके। नापि तस्मिन्नर्थे घटमय आकाश इति प्रयोगोऽस्ति। तस्माद् न प्राणाद्यवच्छिन्नत्वेऽप्यात्मनः प्राणादिविकारत्वम्; तदुपाधेः प्राणादेस्तद्विकारत्वाभावात्, प्रायार्थे न कदाचिदात्मनि प्रयोगः स्यात्, श्रुत्यन्तरे तत्र तत्र तदर्थत्वावधारणात्। ''सोऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः'' ''प्राणमयः काममयः क्रोधमयो हर्षमयः'' इत्यादि। न च तत्रापि तदर्थत्वं

सन्दिग्धम्; "समानः सन्" "ध्यायतीव लेलायतीवे"त्यादिश्रुत्यैव तत्र मयटस्तदर्थत्वावधारणात्। तस्मादसदेतत्–यद् विकारप्रायपाठादानन्दमय इत्यत्र मयटो विकारार्थत्वमौत्सर्गिकमिति।।

एतेन–आनन्दमयपदं चान्नमयादिविकारवाचिप्रायपठितं विकारवाचि वा, कथञ्चित्प्रचुरानन्दवाचि वा ब्रह्मण्यप्रसिद्धमिति–यदुक्तम्, तदप्यपास्तम्; मयटः प्रकृते स्वार्थिकत्वेन तदन्यतरार्थत्वविवक्षाया अभावात्, प्राचुर्यार्थत्वविवक्षायामपि बहुत्वापरपर्यायस्य भूमशब्दवद् ब्रह्मणि प्रयोगोपपत्तेरुक्तत्वात्, चिन्मयमिति श्रुतिषु शुद्धे ब्रह्मणि मयटः प्रयोगस्य दर्शितत्वात् तस्मिन् तदप्रसिद्ध्यक्तेरयुक्तत्वाच्च।।

एतेन–यदुक्तम–"प्रायपाठपरित्यागो मुख्यत्रितयलङ्घनम्। पूर्वस्मिन्, उत्तरे पक्षे प्रायपाठस्य बाधनम्"–इति, तत्प्रयुक्तम्; विकारार्थ इव प्राचुर्यार्थेऽपि मयटो मुख्यत्वस्य दर्शितत्वात्, तथा ब्रह्मशब्दस्य कमलासनादौ मयटोऽपि प्रकृत्यर्थ एव वर्तनात्, आनन्दपदाभ्यासस्यापि स्वार्थ एव स्वीकरणाद् मुख्यत्रितयलङ्घनाभावात्। प्रायपाठपरित्यागस्तवैव मते, नास्मन्मत इत्युक्तम्; प्राणमयादिष्वपि स्वार्थ एव मयटो दर्शितत्वत्। अपिच मुख्यत्रितयलङ्घनमपि तव मते भवति। पुच्छशब्दस्य तावद् मुख्यार्थपरित्याग एकः। न च–पुच्छशब्दस्य लाङ्गूले मुख्यत्वात् प्रकृते तदसंभवात् तवापि मते लाक्षणिकः स इति–वाच्यम्; कटिदेशादधोदेशमात्रस्यैव पुच्छत्वेन प्रसिद्धत्वात्, तदवयवत्वादेव लाङ्गूलेऽपि तत्प्रयोगात्; अन्यथा पुरुषपिण्डे लाङ्गूलाभावात् शिरआद्यवयवान्तरवत्–"इदं पुच्छं प्रतिष्ठे"तीदन्त्वेन तन्निर्देशानुपपत्तेः। अप्रसिद्धे हि लक्षणया परशब्दप्रयोगे "अग्निर्माणवक" इतिवत् स्वनाम्नोल्लिख्य तस्मिन् तत्प्रयोगः स्यात्, न प्रसिद्धवदिदन्त्वेनोल्लिख्य। तस्माद् यत्किञ्चिदेतत्।।

"सोऽकामयते"ति पुंलिङ्गबाधो द्वितीयः, अभ्यासबाधश्च तृतीयः। अभ्यासो नाम–येन शब्देन यदुपात्तम्, तस्यैव शब्दस्य तस्मिन्नेवार्थे पुनः पुनरावृत्तिः। यथा "समिधो यजति तनूनपात यजती"ति यजत्यभ्यासः। लोके च–अहो रमणीया अहो रमणीयेत्यादिः। न चात्र ब्रह्मशब्देनोपात्तस्यानन्दपदावृत्त्योक्तलक्षणाभ्यासो भवति।।

ननु–"यदेष आकाश आनन्दो न स्यादि"त्यत्रानन्दपदेनैवोपात्ते ब्रह्मण्यग्रे तत्पदावृत्तिलक्षणोऽभ्यासस्तस्मिन् युक्त इति–चेत्, सत्यम्; एवं सत्यानन्दपदस्यैव तस्मिन्नर्थे तात्पर्य गमयेत् तदभ्यासः, न "ब्रह्म पुच्छं प्रतिष्ठे"ति ब्रह्मपदस्य। न ह्यन्यपदस्याभ्यासोऽन्यपदस्य स्वार्थपरत्वगमकः; वैयधिकरण्यात्, अतिप्रसङ्गाच्च। तथाच–"आनन्दमयोऽभ्यासादि"ति तस्मिन्नर्थे हेतूपन्यासोऽयुक्ततर एव स्यात्, अस्मन्मते त्वानन्दमयशब्दस्यानन्दपदेन प्रत्यभिज्ञातुं शक्यत्वाद्

युक्तस्तदभ्यास:। दृष्टश्च लोक एकदेशेन संप्रत्यय:; भीमो भीमसेन:, भीमा सत्यभामेति। वेदे च ज्योति:शब्देन ज्योतिष्टोमाभ्यासो दर्शित एव। तस्मात् त्वत्पक्षा एव मुख्यत्रितयलङ्घनम्, प्रायपाठबाधनं च, नास्मत्पक्षे। तथाच स एव श्लोको वैपरीत्येन पठनीय:-

प्रायपाठपरित्यागो मुख्यत्रितयलङ्घनम्।
उत्तरे, पूर्वपक्षे तु नैव कस्यापि बाधनम्॥-इति॥

यदप्युक्तम-आनन्दमयपदस्य ब्रह्मार्थत्वे "ब्रह्म पुच्छमि"ति न समञ्जसम्। न हि तदेवाक्यव्यवयवश्चेति युक्तम्-इति, तदप्यसत्; सगुणब्रह्मण एवान्नप्राणादिकोशचतुष्टयात्मकस्य पुच्छत्वेन निर्देशोपपत्ते:। "पादोऽस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवि" "ऊर्ध्वमूलोऽवाक्शाख:" "ऊर्ध्वमूलमध:शाखम्" इत्यादिश्रुतिस्मृतिभ्याम्। मुख्यब्रह्मत्वेऽपि 'राहो: शिर' इतिवदुपचारेण तदुपपत्तेश्च। न ह्यत्र परमार्थत आनन्दमयस्य ब्रह्मणोऽवयवावयविभावोऽस्ति। अपिच-"अङ्गुष्ठमात्र: पुरुषो मध्य आत्मनि तिष्ठति। ईशानो भूतभव्यस्य न ततो विजुगुप्सत" इत्यादवङ्गुष्ठमात्रत्वादे: परोपाधे: कल्पनवदत्राप्यतीतानन्तरोपाधिवशाद् द्रुतताम्रस्येव मूषानिषिक्तस्य तदाकारत्वम्, आकाशावच्छिन्नस्येव तेजसोऽङ्गुल्यादौ प्रतिफलितस्य ऋजुवक्रादिभाव:, दिविष्ठस्येव सूर्यस्य जले कम्पादि:, शुक्तेरिव रजताध्यासकालीनतद्व्यवहारादि: परमात्मनोऽपि शुद्धस्यानन्दमयस्य बुद्ध्यावारोहार्थम् "तस्य प्रियमेव शिर" इत्यादिनाऽवयवावयविभाव: कल्प्यते। तथाच श्रुत्यन्तरम्-"स्वाच्छरीरात् प्रवृहेन्मुञ्जदिवेषीकामि"ति। अपिच त्वयापि ब्रह्मणोऽवयवत्वश्रवणमौपचारिकं वाच्यम्, तद्वरं स्वप्रधानतया श्रुतस्यानन्दमयस्यावयवित्वश्रवणमेवौपचारिकमस्तु। युज्यते चैतत्; प्रियादेर्विज्ञानमयधर्मत्वस्य दर्शितत्वात्। तस्माद् यत्किञ्चित् तत्॥

यदुक्तम्-पुच्छशब्दस्याधारार्थत्वे प्रतिष्ठत्येतदप्युपपन्नं भवति। आनन्दमयस्यान्तरत्वमन्न मयाद्यपेक्षया, ब्रह्मणस्त्वान्तरत्वमानन्दमयस्याधिष्ठानत्वान्यथानुपपत्त्यैवावगम्यत इति न श्रुत्योक्तम्-इति, तदपि न; तथा सति पुच्छप्रतिष्ठाशब्दयो: समानार्थत्वेन पौनरुक्त्यप्रसङ्गात् 'प्रतिष्ट्त्ये'तदप्युपपन्नमित्युक्तेरयुक्तत्वात्। अपिच यदि प्रतिष्ठाशब्दोऽधिष्ठानत्वपर: तर्हि सर्वत्र तद्बलादेवान्तरतमार्थसिद्धेरानन्दमयादिवान्नमयादिभ्योऽपि पृथक् तन्निर्देशवैयर्थ्यापत्ति:। अत्रैव तदर्थत्वकल्पने पुच्छशब्दवदत्रापि प्रायपाठबाध:, पौनरुक्त्यं चोक्तमेव। प्रियाद्यवयवयोगश्चानन्दमये न साक्षात्; तेषां बुद्धिधर्मत्वादि त्युक्तत्वात्। अतो यदुक्तम्-एवं च सत्यन्नमयादिवदानन्दमयस्य

प्रियाद्यवयवयोगो युक्तः—इति, तदत्युक्तमेव भावति। अपिचानन्दमयस्य स्वप्रधानतया पुंलिङ्गान्ततया निर्दिष्टस्य "सोऽकामयते"ति सर्वनाम्ना पुंलिङ्गान्तेन तदा निर्देशो युक्ततरो भवति; अन्यगुणतया निर्दिष्टस्य भिन्नलिङ्गान्तस्य ब्रह्मणो भिन्नलिङ्गान्तेन तेन निर्देशकल्पने सर्वनामश्रुतिः सर्वात्मना कदर्थिता स्यात्। अतो यदप्युक्तम्—मान्त्रवर्णिकस्य ब्रह्मण एव "ब्रह्म पुच्छं प्रतिष्ठे"ति स्वप्रधानस्याभिधानात् तस्यैवाधिकारः, नानन्दमयस्य; "सोऽकामयते"त्याद्या अपि श्रुतयो ब्रह्मविषयाः, नानन्दमयविषया इति, तद् मन्दभाषणमेव। न हि ब्रह्मशब्दसामान्यदर्शनमात्रात् श्रुतिलिङ्गवाक्यप्रकरणस्थानानामेकदैव वाक्यकोविद्भिर्भङ्गो युक्तः। दर्शितश्च तेषां विरोधः। तत्र श्रुतिस्तावत् पुच्छपुंलिङ्गश्रुती, लिङ्गं च सर्वनाम्नः प्रधानतयोपात्तपरामर्शसामर्थ्यम्, वाक्यं च पुच्छब्रह्मशब्दयोः सामानाधिकरणम्, प्रकरणं च स्वप्रधानतयोपात्तस्यानन्दमयस्य, अवयवस्थाने च ब्रह्मशब्दः पठित इत्येतानि प्रमाणानि तव मते विरुद्धानि भवन्ति, नास्मन्मते किमपीति दर्शितम्। तस्माद् नैवंव्याख्यासमादरो वरः॥

का तर्हि भाष्यस्य गतिः? उच्यते; नैतद् भाष्यं स्वोक्तव्याख्यानदूषणेन स्वमतपरिग्रहार्थे प्रवृत्तम्; पूर्वव्याख्यानस्यैव स्वमतत्वात्, मतान्तरपरिग्रहे चोक्तविरोधापत्तेः, सूत्रविरोधापत्तेश्च। तद्विरोधाङ्गीकारे च भाष्यत्वव्याहतिः; "सूत्रार्थो वर्ण्यते यत्र पदैस्सूत्रानुकारिभिरि"त्यादिना भाष्यलक्षणस्य दर्शितत्वात्॥

यदुक्तम्—वेदसूत्रयोर्विरोधे "गुणे त्वन्याय्यकल्पने" ति सूत्राण्येवान्यथा व्याख्येयानि भाष्यकारेण—इति, तदपि प्रत्युक्तम्; श्रुतिविरोधाभावस्योक्तत्वाच्च, वैपरीत्यात्, वार्तिकलक्षणप्रसङ्गाच्च, दुरुक्तचिन्ताया अपि भाष्यान्तर्भावे वार्तिकवैयर्थ्यापत्तेः। तथाच "त्रितयनिबद्धं शास्त्रम्" इति स्मरणव्याहतिः। तस्माद् यथाऽद्वैतैकत्वं नदीसमुद्रनिदर्शनेन वृक्षनिदर्शनेन च कार्यकारणात्मना, एवमन्नमयादिविकृताविकृतरूपेण पञ्चधा विभज्य ज्ञेयत्वेनोपास्यत्वेन चास्मिन् वाक्ये प्रकृतं ब्रह्म निर्दिश्यते। तत्रान्नमयादि विज्ञानमयान्तं रूपचतुष्टयं ब्रह्मणः समुद्रस्यैव बुदुदादि, वृक्षस्येव शाखादि परमार्थिकत्वेऽपि विकृतम्; मयटो विकारार्थत्वात्, आनन्दमयरूपं तु पूर्ववत् सावयवमपि सर्वान्तरत्वेन सर्वकारणत्वादधिकृतम्, मयट् च प्राचुर्यार्थे श्रुतः। अतो ज्ञेयत्वेनोपक्रान्तं सत्यज्ञानादिरूपं सर्वकारणमविकृतं यद् ब्रह्म "ब्रह्मविदाप्तोति परम्" इति, स चानन्दमय एवेत्यनेनाधिकरणेनावधार्यत इति मन्यते॥

अधिकरणं चास्मद्रीत्यैव यथाश्रुतं व्याकरोति, न तन्मतेनेदमधिकरणं यथाश्रुतं भवतीत्याह भगवान् भाष्यकार— *इदं त्विह वक्तव्यमित्यादिना*॥ यदि हि नामादीनामिवाब्रह्मरूपाणां सावयवानां विकाराणामन्नमयादीनां ज्ञानप्रकरणं भित्त्वा ब्रह्मदृष्ट्योपासनमङ्गीकृतं भवता, कथमिव

सावयवत्वोपासाप्रतीकत्व-मयट् प्रत्ययाभिधेयत्वाविशेषेऽप्यकस्मात् तत्रैवाप्रामाणिकं मयटः प्राचुर्यार्थत्वमविकृतब्रह्मविषयत्वं च कल्पयित्वाऽऽनन्दमयस्याविकृतब्रह्मरूपत्वं सामञ्जस्येन गृहीतं भवेत्? अविकृतमान्त्रवर्णिकब्रह्मप्रकरणात् तत्कल्पनमिति चेत्, एवं तर्ह्यन्नमयादेरपि तत्प्रकरणपठितत्वाद् अविकारत्वप्रसङ्गः। तेभ्योऽन्तरतमनिर्देशाद् युक्तं तेषां विकारत्वम्, आनन्दमयस्य तु तदश्रवणाद् अविकारत्वम्; अन्यथा प्रकृतहानाप्रकृतप्रक्रिये स्यातामिति चेत्, न; सावयवस्याविकृतत्वानुपपत्तेः। यदि प्रकृतहानाप्रकृतप्रक्रियाभ्यां विभेषि, अस्तु तर्हि तव मते ''ब्रह्म पुच्छं प्रतिष्ठे''त्यत्र स्वशब्देनोपात्तस्य ब्रह्मणो मान्त्रवर्णिकत्वम्; तद्विजिज्ञासयैवान्नमयादीनां पञ्चकोशानां तद्विकाराणामुपास्यत्वोपपत्तेः, उपासनासहितज्ञानस्यैव तव मते मोक्षजनकत्वाङ्गीकाराच्च। तथाच न तव प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गः।।

ननु—आनन्दमयावयवत्वेन निर्दिष्टस्य ब्रह्मणः कथं स्वप्रधानत्वं शक्यं ज्ञातुम्, नैष दोषः; अन्यावयवत्वेन पठितस्यापि ब्रह्मणः प्रकृतत्वादेव स्वप्राधान्योपपत्तेः। अन्यथा प्रकृतहानाप्रकृतप्रसक्तिर्दुर्वाराऽऽपतेदेव। न च—आनन्दमयस्य ब्रह्मत्वोक्तेस्तदवयवत्वेऽपि तत्प्राधान्येन तत्प्रसक्तिरिति—वाच्यम्; प्रकृतस्यैव ब्रह्मणोऽवयवावयव्युभयरूपत्वानुपपत्तेः, अन्यतरस्य ब्रह्मत्वकल्पने त्वानन्दमयस्य तव मते तदयुक्तत्वोक्तेः स्वशब्दोपात्तस्यैव ब्रह्मत्वावधारणं युक्तम्। ''असन्नेव स भवति। असद् ब्रह्मेति वेद चेदि''ति मन्त्रवर्णोपेतस्यैव प्रत्यभिज्ञानाच्च युज्यते स्वप्रधानत्वम्। स्वप्रधानस्यान्यपुच्छत्वानुपपत्तिरिति चेत्, तदुपचारात् तदुपपत्तेः। उपचारबीजं च भाष्ये स्पष्टम्। अपिच तव मते प्रियाद्यवयवस्य पारमार्थिकत्वात् सविशेषमेव ब्रह्मानन्दमयः सावयवत्वेनोपास्यत्वेन च स्यात्, न निर्विशेषम्; तस्य श्रुतिस्मृतिभ्यां निरवयवत्वावधारणात्, उपास्यत्वप्रतिषेधाच्च। न च—एवमस्त्विति—वाच्यम्; वाक्यशेषविरोधात्, ''यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान न विभेति कुतश्चने''ति वाक्यशेषे निर्विशेषब्रह्मणोऽभिधानात्। न च—प्राचुर्यार्थे मयटः कल्प्यमानेऽपि सविशेषत्वमानन्दमयस्य परिहर्तुं शक्यते भवता; प्राचुर्यस्य लोके प्रतियोग्यल्पतापेक्षत्वाद् दुःखाल्पत्वस्यापि संभवात्। तथाच न निर्विशेषत्वम्; ''यत्र नान्यत् पश्यति नान्यद्विजानाति स भूमे''तिश्रुत्यन्तरविरोधात्। अपिच प्रियादिविशिष्टस्यानन्दमयस्य प्रतिशरीरं प्रियादिभेदः स्यात्, ब्रह्म तु न भिद्यते, ''सत्यं ज्ञानमनन्तमि''त्यनन्तत्वश्रुतेः, ''एको देवः सर्वभूतेषु गूढ'' इति श्रुत्यन्तराच्च। न च आनन्दमयस्याभ्यासः श्रूयते, येन तस्य प्राधान्यात् प्रकृतब्रह्मत्वं स्यात्, प्रातिपदिकमात्राभ्यासात्। न चानन्दमयशब्दस्य ब्रह्मविषयत्वनिश्चयं विना ज्योतिःशब्देन ज्योतिष्टोमाभ्यासवद् आनन्दशब्देन तदेकदेशभूतेन तदभ्यासः कर्तुं शक्यते; तेनैव तस्य ब्रह्मविषयत्वकल्पने चान्योन्याश्रयप्रसङ्गः।

प्रियशिरस्त्वादिभिर्हेतुभिरानन्दमयशब्दस्याब्रह्मविषयत्वमित्यवोचाम। तस्मात्–''विज्ञानमानन्दं ब्रह्मे''ति श्रुत्यन्तरे ब्रह्मण्यानन्दप्रातिपदिकस्य प्रयोगदर्शनादत्रापि पुच्छत्वेन निर्दिष्टब्रह्मविषय एवानन्दशब्दस्याभ्यास:, न त्वानन्दमयविषय इत्यवगन्तव्यम्। योऽपि– ''एतमानन्दमयमात्मानमुपसंक्रामती''त्यानन्दमयशब्दस्याभ्यास:, सोऽप्युक्तरीत्या विकारविषय एव, न ब्रह्मविषय इत्यवगन्तव्यम्; विकारात्मनामेवान्नमयादीनामनात्मनामुपसंक्रमितव्यानां प्रवाहे तस्य पतितत्वात्। ननु–आनन्दमयोपसंक्रमणादधिकफलस्यानिर्देशाद् आनन्दमयस्याब्रह्मत्वे विदुषो नैव ब्रह्मप्राप्तिफलं निर्दिष्टमिति–चेत्, नैष दोष:; आनन्दमयोपसंक्रमणादधिकफलानिर्देशेनैव तत्पुच्छप्रतिष्ठाभूतब्रह्मप्राप्तेर्निर्दिष्टत्वात्, ''यतो वाचो निवर्तन्त'' इति मन्त्रेण तस्या एव प्रपञ्च्यमानत्वात्, ''सोऽकामयते''त्यादिश्रवणमपि नपुंसकेन निर्दिष्टब्रह्मविषयमेव, पुंलिङ्गानिर्देशस्यापि–''तस्माद्वा एतस्मादात्मन'' इति पुंलिङ्गात्मशब्दस्य प्रकृते ब्रह्मणि श्रवणात् तदपेक्षया यथाकथञ्चिदुपपत्ते:, भार्गवीवारुणीविद्यायां तु आनन्दस्यैव ब्रह्मत्वं विज्ञापितम्, नानान्दमयस्य; मयडश्रवणात्, प्रियशिरस्त्वाद्यश्रवणाच्च। तस्माद् न विशेषमनाश्रित्य स्वतो निर्विशेषस्य ब्रह्मणोऽणुमात्रमपि प्रियशिरस्त्वाद्युपपद्यते। न चास्मिन् वाक्ये सविशेषं ब्रह्म प्रतिपिपादयिषितम्; ''यतो वाचो निवर्तन्ते। अप्राप्य मनसा सहे''ति वाङ्मनसागोचरत्वश्रवणविरोधात्। तस्मात् तव मतेऽन्नमयादिष्विवानन्दमयेऽपि विकारार्थ एव मयट् स्यात्, न प्राचुर्यार्थ:। न च–एवमस्त्विति–वाच्यम्; त्वया तदनभ्युपगमात्। अभ्युपगमे वा सूत्रेषु लक्षणापत्त्या तद्विरोधापत्तेरित्याह–*सूत्राणि त्वेवं व्याख्येयानीति*।। एवंशब्दपरामृष्टं व्याख्यानप्रकारं दर्शयति–*ब्रह्म पुच्छमित्यादिना*।। तथाच सूत्रेषु लक्षणापत्तिर्दोष इत्यभिप्राय:। अस्य पक्षस्य पूर्वोक्तदूषणगणेन हेयत्वादेव नास्मिन् सर्वाणि सूत्राणि योजितानीति द्रष्टव्यम्।।१९।।

इति वार्तिकम् षष्ठमानन्दमयाधिकरणम् समाप्तम्।।

प्रदीपः

एतावता प्रपञ्चेन सद्रूपत्वं चिद्रूपत्वं च जगत्कारणस्य व्यवस्थापितम्, इतः परमानन्दरूपत्वमपि व्यवस्थापीयम्, येन–"अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्। आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयमि"ति सिद्धान्तो व्यवस्थापयितुं शक्यते। तदर्थमधिकरणान्तरम्– *आनन्दमयोऽभ्यासादिति*।। यत्तु कार्येण कारणानुमानम्, तत्तु सामान्यतः सद्रूपेणैव, न तु विशेषरूपेण। अत एव "जन्माद्यस्य यत" इति सूत्रस्यानुमानपरत्वनिरास उपपद्यते; तत्र जन्मादिसूत्रविषयवाक्येन "यतो वा इमानि भूतानि जायन्त" इत्यादिना तात्पर्यगत्या चेतनब्रह्मविवक्षायामपि शब्दतस्तच्चेतनत्वं नावधार्यते। शास्त्रयोनित्वसूत्रेण तद् ज्ञातमपि सर्वज्ञत्वस्य प्रधानसाधारण्यात् चेतनत्वं कारणस्य सन्दिग्धमेवावगम्यते। ईक्षत्यधिकरणेन तु तदवधारितमिति वृत्तार्थसंग्रहः। तदेतदाह–*जन्माद्यस्य यत इत्यादिना–व्याख्यातमित्यन्तेन*।। *किमुत्थानमिति*।। किमिति निमित्तपर्यायः। किमर्थमित्यर्थः। यतः–एवं सद्योमुक्तिकारणमप्यात्मज्ञानमुपाधिविशेषद्वारेणोपदिश्यमानमप्यविवक्षितोपाधिसम्बन्धविशेषं परापरविषयत्वेन सन्दिह्यमानं वाक्यगतिपर्यालोचनया निर्णेतव्यं भवति; यथैहैव तावत्–आनन्दमयोऽभ्यासादिति, ततो नास्याधिकरणस्य वेयर्थ्यमित्युक्ताशङ्काया न संभव इति समाधानग्रन्थार्थः। यद्यानन्दमयाधिकरणं न प्रवर्तेत, तर्हि सगुणमेव ब्रह्म वेदान्तार्थः, न त्वद्वितीयमिति स्यात्। अनेन त्वधिकरणेन कारणवाक्यानामप्यद्वितीय एव ब्रह्मणि पर्यवसानमिति व्यवस्थाप्यते; यतः–"यतो वे"त्यादीनामपि "आनन्दो ब्रह्मेति व्यजानादि"त्यानन्दरूपे ब्रह्मण्येव पर्यवसानमिति निष्कर्षः। तथाचाध्यारोपापवादन्यायेन वेदान्तानां ब्रह्मस्वरूपबोधनार्थं प्रवृत्तत्वात् सगुणवाक्यान्यध्यारोपविधयाऽपवादविधया च निर्गुणवाक्यानि प्रवर्तन्त इति वस्तुस्थितिः। तत्राध्यारोपविधया ब्रह्मबोधकानामपि वाक्यानां न सर्वथा वैयर्थ्यम्; क्रममुक्त्याद्युपयोगित्वात्, इति ह्यद्वैतिनां मर्यादा। तत्र कोष्ठशोधनिकया तत्तद्वाक्यार्थनिर्णयार्थमुपरितनग्रन्थ इति निष्कर्षः। तदेतदाह–*द्विरूपं हीति*।। द्विस्वरूपमित्यर्थः। नामरूपोपाधिविशिष्टम्=सगुणम्। तद्विपरीतमित्यादि=निर्गुणमित्यर्थः। तत्र सगुणब्रह्मणोऽपि वेदान्तप्रतिपाद्यत्वमेव, न तार्किकमत इवानुमानगम्यत्वमिति सिद्धान्ताात् तदुभयानुगुणानि प्रमाणानि संगृह्णाति–*यत्र

हीत्यादिना—वाक्यानीत्यन्तेन*।। द्विरूपताम्=स्वभावद्वयम्। न तु ब्रह्मद्वयमित्यर्थः। अध्यारोपापवादविधया द्विरूपतेति यावत्। तत्र सगुणवाक्यान्यध्यारोपविधयैव प्रवृत्तानि, न तु वस्तुगत्येत्यादिनिर्धारणं हि साधनचतुष्टयसम्पत्तिं विना न सम्भवति। अन्यथा हिरण्यगर्भादिलोकप्राप्तेरपि मुक्तित्वशङ्का स्यात्। अत एव देवतानां ब्रह्मविद्याधिकारविचारः सप्रयोजनः। न हि विना साधनचतुष्टयसम्पत्तिं ब्रह्मलोकान्तवैराग्यं वा सगुणवाक्येष्वध्यारोपन्याये विश्वासो वा स्यात्। साधनचतुष्टयसम्पन्नोऽपि हि तत्पदवाच्यार्थ तत्पदलक्ष्यार्थमेवं त्वम्पदवाच्यार्थ त्वम्पदलक्ष्यार्थ च सम्यक् समालोच्यैव तत्त्वमस्यादिमतवाक्यार्थमधिगन्तुं शक्नोति, इति सगुणवाक्यानामपि विचारोऽद्वितीयब्रह्मजिज्ञासायामेव प्रस्तुतायामपि नानुपपन्नः।। एतेन—अद्वैतमते ब्रह्ममीमांसायां न सगुणवाक्यानां विचारस्य सङ्गतिरिति—परास्तम्। अधिकं वार्तिके न्यायरक्षामणौच व्यक्तम्।।

वस्तुतस्तु—विचारावस्थायामधिगतसाधनचतुष्टयस्यापि व्यवहारदशाऽनुवर्तत एव। तथाच यावद्ब्रह्मसाक्षात्कारं चित्तशुद्ध्याद्यर्थ सगुणोपासनान्यपि कर्तव्यान्येव; निष्कामभावनयाऽनुष्ठीय- मानानां कर्मणामपि ज्ञानोत्पत्त्यादावुपयोगस्य विद्यमानत्वात्। सगुणोपासनमपि हि निर्गुणब्रह्म- साक्षात्कारस्य साधनमेव श्रवणादिकमिव। तदुक्तम—''वशीकृते मनस्येषां सगुणब्रह्मशीलनात्। तदेवाविर्भवेत्साक्षादपेतोपाधिकल्पनम्।।'' इति। इयान् विशेषः—यद्विनाऽपि सगुणोपासनमत्रैव केचिद् ब्रह्मभावं विनैवोत्क्रान्तिं प्राप्नुवन्ति, केचन तु कार्यब्रह्मणोपासनेन प्राप्तेन सह। तदुक्तम्—''कार्यात्यये तदध्यक्षेण सहातः परमभिध्यानादि''ति। तथाच साधनचतुष्टयसम्पन्नानामपि केषाञ्चन सगुणोपासन- मपि परम्परया मोक्षोपयोग्येव। सर्वेषां दृष्ट्या सार्थक्यं तु मनननिदिध्यासनादीनामपि नास्ति; श्रवणमात्रेणापि केषाञ्चन साक्षात्कारस्य मोक्षसाधनस्य संभवात्। सर्वथा तु सगुणवाक्यानामपि केषाञ्चन विचारो ब्रह्मसाक्षात्कारात् पूर्व न निरुपयोग इति मन्तव्यम्। तत्र=सगुणनिर्गुणयोः। अविद्यावस्थायाम्= अज्ञानावस्थायाम्। ब्रह्मसाक्षात्कारपूर्वक्षण इति यावत्। ब्रह्मणः=निर्गुणब्रह्मणः। सम्बन्धषष्ठी। अविद्यावस्थायामित्यनेन सम्बन्धः। अथवा ब्रह्मणः=सगुणब्रह्मणः। उपस्योपासकादि- लक्षणो व्यवहार इत्यनेन सम्बन्धः। तत्र=उपासनेषु। अभ्युदयार्थानि=जन्यफलार्थानि। क्रममुक्त्यर्थानि=अपुनरा- वृत्तियोग्यब्रह्मलोकफलकानि। उपास्यस्य वस्तुगत्याऽभेदेऽपि गुणभेदाद् भेद इत्याह—*एक एवेत्यादिना*।। विचार्यमाणान्युपासनापराणि वाक्यानि कानीत्यत आह— *एवमिहापीति*।। ब्रह्ममीमांसायां प्रथमाध्यायप्रथमपाद इत्यर्थः। ननु—उपासनाप्रकरणबहिर्भूतानां सगुणवाक्यानां कथं प्रामाण्यम्? यद्युपाधिसम्बन्धाविवक्षया, तर्हि तत्र किं मानमिति? अत आह—*एवं सद्योमुक्तीति*।।

आत्मज्ञानप्रकरणाम्नातानामपि निषेधापेक्षितप्रतियोगिविधयैवान्वयाद् न दोष इति भावः। इहैव=प्रकृत आनन्दमयाधिकरण एव। अत्रात्मज्ञानमिति ज्ञानशब्दप्रयोगाद् निर्गुणोपासनं मोक्षसाधनमिति पक्षायोगः सूच्यते; उपास्यनिर्गुणताया आयोगात्। तथाचैकदेशिमते निर्गुणप्रकरणगतानां सगुणवाक्यानां नान्वयसंभव इति निष्कर्षः।।

एतेन—एकदेशिमतेनैवावतरणिकायाः प्रवृत्तिरिति विवरणम्—चिन्त्योपपत्तिकम्। न ह्यानन्दमयाधिकरण आनन्दप्रचुरस्य परमात्मनो विवक्षेति विवक्षेति वृत्तिकारसिद्धान्तेऽविवक्षितोपाधिविशेषत्वं संभवति। एवं चाविवक्षितोपाधिविशेषस्यानन्दात्मनः पुच्छस्य ब्रह्मण एवोक्ताधिकरणनिर्णेत्वं फलति। एकदेशिमते तु—उपास्यत्वेन ज्ञेयत्वेनेति पृथगुपदेशो नोपपद्यते। ननु—''ईक्षतेर्नाशब्दमि''त्यादिनाऽचेतनकारणवादनिरासात् कथमुत्तरत्राचेतना-काशादिकारणताशङ्कापरिहारयोरुत्थानमित्याशङ्कयाह—*प्रपञ्च्यत इति*।। तथाच न्यायविशेषव्यवस्थापनद्वारा विस्तरार्थमेव तदधिकरणानां प्रवृत्तिरिति भावः।।

तत्तिरीयक इत्यादिना विषयवाक्यसंग्रहः। किमिहेत्यादिसंशयप्रदर्शनम्। ब्रह्मणोऽर्थान्तर-मित्यादिना पूर्वपक्षः। पर एवात्मानन्दमय इत्यादिना सिद्धान्तः। इदं चैकदेशिमतेन। किमर्थ वा तदानुवादः? उत्तरत्र स्वतन्त्रं भाष्यकाराणां तन्निरासश्चेत्युपरि स्पष्टीकरिष्यते। अयं चैकदेशी वृत्तिकरोऽद्वैतमतानुयायी, न तु भेदसत्यत्वपक्षानुयायीति ''भेदव्यपदेशाच्चे''ति सूत्रभाष्यांशत एव ज्ञायते; अन्यथा तत्रत्यशङ्कोत्तरयोरसम्बद्धप्रलापित्वापत्तेः। ''आनन्दमयोऽभ्यासादि''ति सूत्र आनन्दमयपदप्रयोगात् तत्रैव निर्णयः क्रियत इति प्रतीत्या—''तस्माद्वा एतस्माद्विज्ञानमयात्। अन्योऽन्तर आत्मानन्दमय'' इति वाक्यगतानन्दमयपदमेव प्रधानतो विषय इति गम्यते, न तु पुच्छं ब्रह्मेति तदाशयः। *ब्रह्मणोऽर्थान्तरमिति*।। अन्यत्वेनान्यत्वेन ब्रह्मणो निर्देशाद् यदि पुच्छं ब्रह्मैव प्रधानम्, तर्हि ततोऽर्थान्तरत्वमानन्दमयस्यावश्यमूरीकर्तव्यम्। यतो नात्र जीवाभेदेन ब्रह्मोपदेश इति भावः। *अमुख्य आत्मेति*।। अमुख्यत्वे कारणमन्यत्वेनोपदेश एवान्नमयादिस्थले दृश्यते हेयत्ववचनात्। अत्रापि पूर्वपक्षिणां मते हेयत्वमेवानन्दमयस्य मन्यत इति युक्तमुख्यत्वमानन्दमयस्य। एतेन—''हेयत्वावचनाच्चे''त्यस्य प्रत्युदाहरणसङ्गत्यानन्द-मयाधिकरणमिति—सूच्यते। *अन्नमयाद्यमुख्यात्मप्रवाहपतितत्वादिति*।। यद्यप्यन्नमयादीनाममुख्यत्वं पूर्वस्य पूर्वस्य हेयत्वोपदेशाधीनमेव, न तु मयडन्तपदप्रतिपाद्यत्वमात्रेण। न चानन्दमयस्य हेयत्वमुपदिश्यते; तथापि मयडन्तपदप्रतिपाद्यत्वेनैव हेयत्वमपि

कल्पनीयमित्यभिप्रायेणोक्तग्रन्थप्रवृत्तिः। तथाच—आनन्दमयः, अमुख्यात्मा, मयडन्तपदप्रतिपाद्यत्वात्, सावयवत्वात्, शारीरत्वाच्च; अन्नमयादिवत्, इति पूर्वपक्षन्यायः।।

ननु—निर्दिश्यमानान्यत्वप्रतियोगित्वम्, असर्वान्तरत्वं ऽपाधिरित्याशयेन शङ्कते—*अथापि स्यादिति*।। *सर्वान्तरत्वादानन्दमयस्येति*।। अनेनासर्वान्तरत्वस्य पक्षे साधनाव्यापकत्वं ज्ञाप्यते। तथाच—आनन्दमयः, मुख्यात्मा, सर्वान्तरत्वात्, यन्नैवं तन्नैवमिति सिद्धान्तिनां शङ्कोपोद्बलको न्यायः। अनेन च पूर्वानुमानेऽप्रयोजकत्वमपि सूच्यते।। ननु—सर्वान्तरत्वं न मुख्यात्मतायां लिङ्गम्; भूमविद्यायाममुख्यात्मनि प्राणेऽपि सर्वान्तरत्वस्य दर्शनेन व्यभिचारादित्यभिप्रायेण समाधत्ते—*न स्यादिति*।।

ननु—प्राणस्य न सर्वान्तरत्वम्, किन्तु भूम्न एवेति न तत्र व्यभिचार इत्यतो दूषणान्तरमाह—*प्रियाद्यवयवयोगादिति*।। आदिशब्देन ब्रह्मणो ग्रहणम्। तथाच—आनन्दमयः, न परमात्मा, परमात्मावयवकत्वात्, यो यदवयवकः, स ततो भिद्यते; यथा पटस्तन्तुभ्य इति नानन्दमयस्य मुख्यात्मत्वमिति भावः। ननु—अनुमानद्वये किं प्रबलमित्यतः सर्वान्तरत्वानुमानाद् द्वितीयानुमानमेव प्रबलम्; यतः स्वरूपासिद्धः सर्वान्तरत्वहेतुरिति सूचयन्ननुमानान्तरमाह—*शारीरत्वश्रवणाच्चेति*।। अनेन च ''तस्यैष एव शारीर आत्मे''ति वाक्यार्थः संगृह्यते। तस्य च पूर्वतनपर्यायेषूक्रमिष्यमाणात्मपरत्वमेव दृष्टम्—यथा प्राणमयपर्यायान्ते श्रूयमाणेन तेन मनोमयः, तत्पर्यायान्तर्गतेन तेन विज्ञानमयस्ततोऽन्यः, तत्पर्यायान्तर्गतेन तेन ततोऽन्य आनन्दमयः, एवमानन्दमयपर्यायान्तर्गतेनापि तेन ततोऽन्य एव कश्चनात्मा विवक्ष्यत इत्यकामैरपि स्वीकर्तव्यम्, इति न सर्वान्तरत्वमानन्दमयस्येति स्वरूपासिद्धं सर्वान्तरत्वमिति सिद्धान्ताभिमतयोजनायां यद्यपि शारीरत्वं नानन्दमयस्य; तथापि वृत्तिकाराभिमतयोजनायामानन्दमयस्यैव शारीरत्वमिति भावः। तदेतदाह—*तस्य पूर्वस्येत्यादिना*।।

वृत्तिकारा हि—''तस्यैष एव शारीर आत्मा यः पूर्वस्ये''तिवाक्यस्यानन्दमय-पर्यायमात्रगत'तस्यपूर्वस्य 'पदयोः सामानाधिकरण्येनान्वयं स्वीकृत्य—आनन्दमय एव शारीर आत्मेति व्याचक्षणाः सर्वान्तरत्वमानन्दमयस्यैवेति मन्यन्ते, इति तन्मतरीत्या न स्वरूपासिद्धिरिति मन्वानं प्रत्यपि पूर्वोक्तमेव समाधानम्—*प्रियाद्यवयवयोगात् शारीरत्वश्रवणाच्चेति*।। अत्र प्रियाद्यवयकत्वं स्वतन्त्रो हेतुः। तथाच—आनन्दमयः, न मुख्यात्मा, प्रियादिमत्त्वात्। मुख्यात्मा हि न प्रियाद्यवयवकः, ''अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशत'' इति श्रुतेः। कल्पितं प्रियादिमत्त्वं न विरुद्धमिति मन्वानं प्रति व्यावहारिकमेव प्रियादिमत्त्वं

विवक्षितमत्रेति सूचयितुमाह– *शारीत्वश्रवणाच्चेति*।। तथाच शारीरत्वे सति प्रियादिमत्त्वं नाशारीरिगतं कल्पितं भवति, इति न दोष इति भावः। तदेतद् द्वितीयपक्षानुसारेण प्रियाद्यवयवयोगादित्यादि स्वयमेव व्याचष्टे भाष्यकारः– *मुख्यश्चेदित्यादिना–शक्य इत्यन्तेन*।। अत्र प्रथमः पक्षः पुच्छंब्रह्मवादस्य पूर्वपक्षत्वेन, द्वितीयस्तु जीवप्रकरणेनैवोपनिषदः समाप्तिरिति विवेकः। तस्मात्=प्रियाद्यवयवयोगादेरित्र्थः। संसारी=अमुख्यः।।

एवं प्राप्ते=आनन्दमयोऽमुख्य आत्मेति शङ्कायाम्। *इदमिति*।। आनन्दमयोऽभ्यासादित्यनेनाभेदान्वयः। तथा चानन्दमयोऽभ्यासादित्याकारं सूत्रमित्यर्थः। उच्यते=पठ्यत इत्यर्थः। आनन्दमयः, परमतात्पर्यविषयः, अभ्यस्यमानत्वादिति सूत्रार्थः। अभ्यासस्य तात्पर्यग्राहकप्रमाणत्वात् तदनुसारेणैव तात्पर्यनिर्णयो युक्तः। आनन्दशब्देन हि बहुकृत्वोऽभ्यासो ब्रह्मणोऽत्र प्रकरणे दृश्यते। न हि पुच्छे ब्रह्मण्यानन्दशब्द इति कुत्रापि दृष्टम्। तथाच पुच्छब्रह्मातिरिक्त आनन्द आनन्दमयपदस्यैव स्वार्थे मयडङ्गीकारेण प्रवृत्तिर्युक्ता, इति नाभ्यासरूपहेत्वसिद्धिरेकदेशिनां मत इति भावः। तदेतदाह– *पर एवात्मेति*।।

रसो वै स इति।। स इति पुंलिङ्गेनानन्दमयस्यैव निर्देशो युक्तः, न तु नपुंसकस्य पुच्छस्य ब्रह्मण इति भावः। *सैषानन्दस्येति*।। पुच्छब्रह्मवादे तस्यानन्दवत्ताया अप्रस्तुतत्वात् आनन्दमीमांसेयमाकाण्डताण्डवमेव स्यात्, आनन्दमयपरमात्मतावादे तु प्रचुरानन्दत्वात् तस्य तन्मीमांसा सावसरा।।

ननु–"आनन्दो ब्रह्मेति व्याजानादि"त्यादौ पुंलिङ्गेनानन्दपदेन ब्रह्मण आनन्दरूपत्वमेव ज्ञायते, नानन्दवत्त्वमित्यत आह– *श्रुत्यन्तरे चेति*।। तथाच श्रुत्यन्तराविरोधार्थमानन्दमयत्वमेव ब्रह्मणः, न त्वानन्दरूपत्वमात्रमिति भावः। नित्यधर्मभूतज्ञानविशेषत्वादानन्दस्य तस्य ब्रह्मणाभेदाद् आनन्दो ब्रह्मेत्यपि न विरुद्धम्, प्रत्युतानुकूलमेव; "आनन्दं ब्रह्मणः" "आनन्दो ब्रह्मे"ति निर्देशद्वयस्यापि सामञ्जस्यादिति तु हृदयम्।।

तदेवमानन्दमयपरमात्मताऽभ्यासेन साधिता, सम्प्रति तदमुख्यात्मतासाधनहेतूनां निरासः कर्तव्य इत्येकैकं तदनूद्य दूषयितुमुपक्रमते– *यत्त्विति*।। आनन्दमयस्यैव सर्वान्तरत्वमुपपादयति– *मुख्यमेवेति*।। मूषा=निष्कासमृन्मयी प्रतिकृतिः। मृन्मयप्रतिकृतौ ताम्रादिरसानां निषेके हि तदाकाराऽन्तस्ताम्रमयी प्रतिकृतिर्भवति। तत्र प्रथमं मृन्मय्यां प्रतिमाबुद्धिः, अनन्तरं तदनन्तरनिष्कास विशेषमय्यां ततस्ताम्रप्रतिकृतौ प्रतिमाबुद्धिर्यथा क्रियते, तद्वदत्रापि शरीरादिक्रमेणानन्दमये ब्रह्मबुद्धिः समाप्यते, न ततोऽप्यन्तरतमः कश्चिदुपदिश्यते, इति सर्वान्तरत्वमानन्दमयस्यैवेति भावः।

सर्वान्तरमिति।। आनन्दमयादन्यस्यात्मनोऽनुपादेशादिति भाव:। ननु–भूमविद्यायां भूय:प्रश्नपरम्पराशैलीपरित्यागेन शैल्यन्तरावलम्बनेन–"एष तु वा अतिवदती"ति प्राणादन्यस्मिन्नेवात्मनो मुख्यस्य समापनं यथा दृश्यते, तथाऽत्रापि–"ब्रह्म पुच्छं प्रतिष्ठे"ति वाक्येनैवोपदेशसमाप्तिरिति न सर्वान्तरत्वमानन्दमयस्येति श्लिष्टमित्यत आह–*श्लिष्टतरमिति*।। सत्यं शैल्यन्तरेणाप्युपदेश: श्लिष्टो भूमविद्यास्थले; पृथक् "एष तु वा अतिवदती"ति स्पष्टं तदामननात्, प्रकृते तु अन्नमयादिस्थल इव किञ्चित् पुच्छं वक्तव्यमित्येव "ब्रह्म पुच्छं प्रतिष्ठे"ति वाक्यं प्रवृत्तमिति शैल्यन्तरानवलम्बनाद् आनन्दमये सर्वान्तरत्वमेव श्लिष्टतरम्, न तु पुच्छब्रह्मणीत्याशय:। ननु–प्रियाद्यवयवयोगात् सर्वान्तरत्वमसिद्धमित्युक्तमिति पूर्वोक्तमनुवदति–*प्रियादीनामिति*।। *अतीतेति*।। पूर्वतनामुख्यात्मनां सावयवत्वात् तदुपहितत्वेनानान्दामयसयपि तदौपाधिकमेव, न व्यावहारिकमिति कल्पितं प्रियादिमत्त्वं न मुख्यात्मत्वविरोधीति भाव:। नन्वेवं सति–"तस्यैष एव शारीर आत्मे"ति शारीरत्वश्रवणमनुपपन्नं पूर्वोक्तरीत्येत्यत आह–*शारीरत्वमपीति*।। तस्याप्यौपाधिकत्वमिति भाव:। यथाच न जीवप्रकरणमिदम्, तथा मान्त्रवर्णिकसूत्रे व्यक्तीभविष्यतीति परमात्मनोऽपि निरूपणमवश्यमत्र कर्तव्यम्। सति चैवं पुच्छब्रह्मवादपूर्वपक्षेऽपि शारीरत्वं पुच्छब्रह्मण औपाधिकमित्यवश्यं स्वीकर्तव्यम्, अस्माभिस्तु प्रियाद्यवयवकत्वमप्यौपाधिकं मन्यते, तत्रापि मते पुच्छत्वं गौणमेवेति तु न विशेष इति निष्कर्ष:। तथाचानन्दमयो मुख्य एवात्मेत्युपसंहरति–*तस्मादिति*।।१२।।

ननु–सर्वान्तरत्वमिदं लिङ्गमेव, लिङ्गं तु श्रुत्यपेक्षया दुर्बलम्। अस्ति चात्रानन्दमयस्याामुख्यात्मतायां मयडन्तश्रुति:, इति कथं सर्वान्तरत्वेनानन्दमयस्य ब्रह्मत्वमित्याशङ्क्य समाधत्ते सूत्रकार:–*विकारशब्दान्नेति चेन्न प्राचुर्यादिति*।।१३।। विकारशब्दात्=विकारवाचकशब्दात्, मयडन्तश्रुतेरिति यावत्। न=न सर्वान्तरत्वलिङ्गकल्प्यं मुख्यात्मत्वम्, इति चेत्=इति शङ्कायाम्, न=न युक्तम्; लिङ्गस्याव्यभिचारित्वात् तस्यैव प्राबल्यमिति भाव:। कथमिदम्? अत आह–*प्राचुर्यादिति*।। मयटो विकारप्राचुर्यान्यतरसाधारण्याद् न श्रुतिविरोध आनन्दमयब्रह्मत्वेऽपीति भाव:। प्राचुर्यादित्यस्य प्राचुर्यशब्दादित्यर्थ:। अत्र मयट् स्वार्थ इत्येकं मतम्, प्राचुर्य इत्यपरम्। पक्षद्वयेऽपि मुख्यात्मन्यानन्दमयशब्दस्य प्रवृत्तिर्न बाधिता। तत्र प्रथमपक्षो न युक्त:; मयट्प्रत्ययवैयर्थ्यादित्यभिप्रायेण विकारशब्दादित्यंशं विवृणुते–*प्रकृतिवचनादिति*।। मयट्प्रत्ययवैयर्थ्यापत्तेरिति भाव:। सति चैवं "तत्प्रकृतवचने मयडि"ति प्राचुर्यार्थकत्वं कथं न भवतीति चेत्, प्राचुर्यस्य स्वसमानाधिकरणविजातीयाल्पतानिरूपकत्वेन विकारार्थतोऽविशेषात्, इति स्पष्टं विकारार्थत्वमेव

स्वीकर्तव्यमित्याह–*मयटो विकारार्थत्वादिति*।। *अन्नमयादीति*।। अन्नमयशब्दः शरीरपरो मयटो विकारार्थत्वेनैव निर्वहणीयः। एवं प्राणमयमनोमयविज्ञानमयशब्दा अपि; तत्प्रायपाठादिति भावः। समाधते–*प्राचुयार्थेऽपीति*।। सत्यं प्रकृत्यर्थे न मयट्, प्राचर्यार्थे तु स कथमपि न विरुद्धः। ननु–अन्नमयादावपि तर्हि तदापत्तिरित्यत आह–*अन्नमयो यज्ञ इति*।। न ह्यन्नमयशब्दे सर्वत्र विकारार्थ इति नियमः, तत्रापि प्राचुर्येऽन्यत्र मयटः श्रवणात्। तत्र प्रकरणानुसारिणी व्यवस्थैव युक्ता। प्राणमयादिशब्दे तु प्राणादिविकारत्वाभावात् तदवच्छिन्नस्याज्ञत्मनाः प्राणप्राचुर्यमेव विवक्षणीयमिति तत्प्रायपाठोऽप्यानन्दमयपदे प्राचुर्यार्थत्वपक्ष एव स्वरस इति भावः। आनन्दमीमांसासार्थक्यमप्यानन्दमय इत्यत्र मयटो विकारार्थत्वे विरुद्धम्। सा हि मीमांसा मनुष्यानन्दमारभ्य ब्रह्मानन्दपर्यन्तं गोचरयति; तत्रानन्दविकारस्यैवानन्दमयपदार्थत्वे तन्मीमांसैव निरर्थिका। अतोऽपि प्राचुर्यार्थ एव मयट।।१३।

ननु–आनन्दमीमांसेयमानन्दमय इत्यत्र मयटः प्राचुर्यार्थे न लिङ्गम्; अन्यथा भवन्मतरीत्या प्राणमयादावपि प्राचुर्यस्यैव विवक्षणाद् विज्ञानादिमीमांसापि समापद्येत। संभवति हि विज्ञानतारतम्यमपि मनुष्यत्वादारभ्य। परमार्थतस्तु जीवात्मनो न प्राणादिप्राचुर्यम्, न प्राणादिरूपत्वं वा वर्तते, इति तद्विकारत्वमेव स्वीकर्तव्यम्। तद्विकारत्वं नाम तत्सम्बन्धाधीनं विकारत्वमेव, न तु जन्यत्वमिति न कोऽपि दोषः। तथाचानन्दमय इत्यत्र मयटः प्राचुर्यार्थत्वे किं गमकमिति? अत आह सूत्रकारः–*तद्धेतुव्यपदेशाच्चेति*।।१४।। तस्यानन्दस्य हेतुत्वव्यपादेशादिति भावप्रधानो निर्देशः। आनन्दमयमेव प्रकृत्य सर्वेषामानन्दाहेतुत्वेन व्यपदिशति श्रुतिः–''रसो वै सः। रसं ह्येवायं लब्ध्वाऽऽनन्दीभवती''त्यादिः। अत्र स इति पुंलिङ्गेनानन्दमयस्यैव परामर्श इति भावः। प्राचुर्यार्थेऽपि=प्राचुर्यार्थ एव।।१४।।

ननु–''रसो वै स'' इति विशेष्यप्राधान्यादेव स इति पुंशब्दः, इति तदन्यथानुपपत्त्याऽऽनन्दमयस्य नानन्दहेतुत्वम्, किन्तु पुच्छब्रह्मण एव; तस्यैवोपक्रान्तस्योपसंहृतस्य च परामर्शयोगादित्यत आह सूत्रकारः–*मान्त्रवर्णिकमेव च गीयत इति*।।१६।। मान्त्रवार्णिकं ब्रह्मौवानन्दमयशब्देनोपसंहृत्य तद्विषय एव ''तदप्येष श्लोका भवति''ति श्लोकस्य प्रवृत्तत्वात् तदारभ्य प्रवृत्तस्य सर्वस्य सन्दर्भस्यानन्दमयविषयत्वमेव युक्तम्; श्लोकानां पूर्वतनपर्यायेष्ववयविविषयकत्वेन प्रकृतेऽपि तथैव स्वीकरणीयत्वेन पुच्छब्रह्मरूपावयविषयत्वस्यासंभवादिति भावः। अथवा ''ब्रह्मविदाप्नोति परमि''ति ब्रह्मण एव प्रक्रमेण मान्त्रवर्णिकस्य ब्रह्मण एव प्रकरणम्, न जीवस्येति स्वीकरणीयत्वाद् न जीवपूर्वपक्षतासंभव

इति भाव:। मान्त्रवर्णिकमेव="सत्यं ज्ञानमनन्तं ब्रह्मे"ति मन्त्रवर्णाधिगतं ब्रह्मव गीयते="तस्माद्वा एतस्मादात्मन" इत्यारभ्य ब्रह्मवल्ल्या सर्वथाऽपि प्रतिपाद्यते, न तु जीवो वा पुच्छं ब्रह्म वेत्यर्थ:।।

अत्र ह्यधिकरणे सर्वाऽपि ब्रह्मवल्ली भृगुवल्ली च प्रायेण विषय:। तत्र "ब्रह्मविदाप्नोति परम्" इति ब्राह्मणम्। "सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चिते"ति मन्त्र:। तत्र प्रथमपादेन सत्यज्ञानादिरूपेण "ब्रह्मणा विपश्चिते"त्यानन्दमयरूपेण च प्रस्तुतं ब्रह्मैवानन्दमयान्तवाक्यै: शरीरादिपरम्परया प्रदर्श्यते, इति मान्त्रवर्णिकत्वमानन्दमयस्यैव। तत्र "तस्माद्वा एतस्मादि"त्यादिकारण वाक्यं सत्यत्वमनन्तत्वं च प्रतिपादयति। चिद्रूपत्वं तु विपश्चिताशब्देनैव प्रतिपादितम्। गुहापदार्थनिरूपणार्थ कोशचतुष्टयम्। तन्निहितब्रह्मनिरूपणार्थमानन्दमयपर्याय:। तस्यैव ब्रह्मण आनन्दमयत्वाद्युपन्यासार्थमुत्तर: सन्दर्भ:।।

ननु–मन्त्रब्राह्मणयोर्नैकार्थत्वनियम:; तद्विरोधेनपि–"इमामगृभ्णन् रशनामृतस्ये" त्यादिब्राह्मणदर्शनादित्यत आह– *मन्त्रब्राह्मणयोश्चेति*।। *अविरोधादिति*।। औत्सर्गिकमेकार्थत्वमिति भाव:। ननु–एवं सत्यन्नमयादीनामपि मान्त्रवर्णिकत्वाद् मुख्यात्मत्वं स्यात्, यदि तत्र केनापि कारणेन न मुख्यात्मत्वम्, तर्हि प्रकृतेऽपि कथं तथा न स्यादित्याशङ्क्याह– *न चान्नमयादिभ्य इवेति*।। सत्यमन्नमयादिष्वमुख्यात्मत्वम्; ततोऽन्यस्योपदेशात्, न चानन्दमयपर्यायानन्तरं पर्यायान्तरं प्रवृत्तमिति भाव:। न केवल ब्रह्मवल्ली, किन्तु भृगुवल्ल्यप्यानन्दमयब्रह्मतायामेवानुकूलेत्याह– *एतन्निष्ठैवेति*।। आनन्दमयनिष्ठैवेत्यर्थ:। ब्रह्मवल्ल्यामिव भृगुवल्ल्यामपि पञ्चैव पर्याया वर्तन्ते। तत्र भृगुवल्ल्या: पञ्चमपर्यायेण ब्रह्मोपदेशसमाप्ते: श्रुत्यैवावगमात् पञ्चमस्थानत्वसाम्येन ब्रह्मवल्ल्या अप्यानन्दमयेनैव समाप्तिरित्यवश्यं वक्तव्यम्; अन्यथा 'पुच्छं ब्रह्मेति व्यजानादि'ति कथं भृगुवल्ली न प्रवृत्ता?।।१६।।

एवं तावद् आनन्दमयब्रह्मतायां निमित्तमुक्तम्। इत: परं सूत्रद्वयेन जीवस्यानन्तरेण सूत्रद्वयेन प्रधानस्य च नानन्दमयत्वमिति पूर्वपक्षनिरास: क्रियते। तत्र प्रधानपक्षस्योत्तरत्रा सूत्रकारैरेव निरासाद् अनुमीयते आनन्दमयत्वं प्रधानस्येति पूर्वपक्षोऽपि विवक्षित इति। कथमस्य पक्षस्योत्थानमिति तु "कामाच्चे"ति सूत्रविवरणावसरे व्यक्तीकरिष्यते।।

नेतरोऽनुपपत्ते:।।१६।। इतर:=जीव। न=नानन्दमय:। अनुपपत्ते:=असंभवादिति सूत्रार्थ:। "सोऽकामयते"ति प्राक् शरीराद्युत्पत्तेरनुध्यानम्–"बहु स्यां प्रजायेये"ति, सृज्यमानानां स्रष्टुरव्यतिरेक:–"इदं सर्वमसृजते"ति सर्वविकारसृष्टिरिति सम्बन्ध:। तत्र=उक्तावाक्येष्वित्यर्थ:।।१६।।

भेदव्यपदेशाच्च।।१७।। नेतर इत्यनुषज्यते, इतरः, नानन्दमयः; व्यपदिश्यमानानन्दमयभेदानुयोगित्वात्, इति सूत्रार्थः। अत्र भेदोपदेशादिति सूत्रयितव्ये भेदव्यपदेशादिति सूत्रणात् भेदस्य प्रमाणान्तरसिद्धत्वेन न श्रुतितात्पर्यविषयत्वमिति सूच्यते। न हि कुत्रापि सूत्रेषु भेदस्योपदेशः सूत्र्यते। अमुमेवार्थमाशङ्कासमाधानाभ्यां विशदयति। एतेन–अत्रोक्ताशङ्कापरिहारयोः सूत्रानारूढत्वशङ्कापि–परास्ता। वृत्तिकाराणामप्ययमेव सिद्धान्तः; भेदाभेदवादिभिरपि तैः भेदे परं बाध्यत्वस्य स्वीकारात्। अनेनैव सन्दर्भेणावगम्यते–यद्र वृत्तिकारा इमेऽप्यद्वैत्येकदेशिन एव, न मातन्तरावलम्बिन इति। वार्तिकमते तु–अद्वैतसिद्धान्तः स्वाभिमत एव भाष्यकारैरत्र प्रतिपाद्यत इति। उत्तरत्र चेदं स्पष्टीकरिष्यते।।१७।।

कामाच्च नानुमानापेक्षा।।१८।। अनेन सूत्रेण प्रधानकारणवादः परिह्रियते। ननु–''ईक्षतेर्नाशब्दमि''त्यादावेव प्रधानकारणवादनिरासात् कथमत्र पुनरप्युत्थानमिति–चेत्, कैश्चन भाष्यकारैरव्यक्तपरतायास्तत्र स्वीकारेण तन्निराकरणार्थ पुनरपि निषेधात्। तथाचेक्षत्यधिकरणस्य प्रधानकारणवादनिरासे न तात्पर्यम्, किन्तु ब्रह्मणो वेदान्तवेद्यत्वसमर्थन एवेति मतदृष्ट्यापि प्रधानकारणवाादनिरासार्थमिमे सूत्रे इति मन्तव्यम्। वस्तुतस्तु–सत्त्वगुणपरिणामित्वादानन्दस्य सत्त्वगुणोत्कर्षतारतम्येनैव मानुषाद्यानन्दस्यापि साङ्ख्यमते स्वीकारात् कथञ्चनात्मशब्दादीनां गौणत्वादिनोपपत्तेश्च पुनरपि तद्वादोत्थानम्। अधिक वार्तिके व्यक्तम्। इदं च वृत्तिकारमतेनैव। स्वमते तु न प्रधानकारणवादनिरासोऽनेन सूत्रेणेत्यवगन्तव्यम्। कामात्=कामयितृत्वश्रवणात्। अनुमानापेक्षा=अनुमानस्य प्रधानस्य, अपेक्षा संभवनाऽपि। नेति सूत्रार्थः। ईक्षितृत्वं सत्त्वगुणापेक्षया, कामपितृत्वं रजोगुणापेक्षयेति वक्तव्यत्वात् तत्तद्रगुणाधिक्यावस्थायां प्रधानत्वस्यैव भङ्गापत्तिरिति भावः।।१८।।

अस्मिन्नस्य च तद्योगं शास्ति।।१९।। अस्मिन्=आनन्दमये। अस्य=जीवस्य। तद्योगम्=तद्भावम्। शास्ति=उपदिशति, शास्त्रमिति शेषः। तदेव शास्त्रं निर्दिशति–*यदेति*।। एतस्मिन्नित्यानन्दमयस्य परामर्शो द्वितीयवाक्ये, न तु प्रतिष्ठाया मतान्तरोक्तरीत्या; एतस्यामित्यापत्तेः। जीवपरिग्रह वा–जीवस्य जीवभावो हि बन्ध एव, न मुक्तिरित्यभयप्राप्तिवचनस्य नोपपत्तिरिति जीवपक्षनिरासः।।१९।।

इदं त्विह वक्तव्यमित्यादिना भाष्यकाराः पूर्वतनमतं निरस्य स्वमतं पुच्छब्रह्मवादं स्थापयन्तीति भामत्यादीनां सर्वेषामेतावत्पर्यन्तमुपलब्धानां विवरणानां प्रस्थानम्। वार्तिक तु–आनन्दमयब्रह्मतावाद एव भाष्यकाराणां हृदयम्, 'इदं त्विह वक्तव्य'मित्यादिना तु वृत्तिकारमते पुच्छब्रह्मप्राधान्ये

पर्यवसानं स्यात्, तच्च सूत्राक्षराननुगुणमिति मन्यते। यदा तु—आनन्दमयस्य प्रियशिरस्त्वादिविशिष्टस्योपासनमेव विवक्ष्यते, न ज्ञेयब्रह्मस्वरूपमपि प्रकृते विवक्ष्यत इति मन्यते, तर्हि वृत्तिकारमते पुच्छब्रह्मवादपर्यवसानापत्तिः। तत्रोपासनाज्ञानसमुच्चयवादमङ्गीकृत्यैव खलु आनन्दमयपदेन ब्रह्म विवक्ष्यते। अतो ज्ञेयं ब्रह्मैवानन्दमयपदेनैव समर्प्यत इति भाष्यकाराणां मतमिति वार्तिककाराः। तथाच वृत्तिकारमतनिरसन उक्तग्रन्थस्य तात्पर्येऽपि आनन्दमयब्रह्मतायां वार्तिककारा विप्रतिपद्यन्ते। न चायं पक्षो भाष्यकाराणाम्, इति पुच्छब्रह्मवादसमर्थनार्थमेव—'इदं त्विह वक्तव्य'मित्यादिसन्दर्भः। न ह्येवं सति भाष्ये तत्र तव मत इत्याद्यध्याहारादिदोषोऽप्यात्मानं लभते। तैत्तिरीयवार्तिककारादयोऽपि पुच्छब्रह्मवादमेवादरणीयं मन्यन्ते॥

यत्तु—आनन्दमयब्रह्मतावाद एव स्वारस्यम्, न पुच्छब्रह्मवादे; ''प्रायपाठपरित्यागो मुख्यत्रितयलङ्घनम्। उत्तरे, पूर्वपक्षे तु नैव कस्यापि बाधन''मिति, तदिदं प्रौढिवादमात्रम्; यतः ''प्रायपाठपरित्यागो मुख्यत्रितयलङ्घनम्। पूर्वस्मिन्, उत्तरे पक्षे प्रायपाठस्य बाधन''मिति भामत्यर्थ एव श्लिष्टतरः॥

तथाहि—आनन्दमयब्रह्मतावादे हि मयटो मुख्यविकारार्थत्वत्यागः, ब्रह्मशब्दस्य मुख्यब्रह्मपरत्वत्यागः, आनन्दशब्दस्यानन्दमयपरत्वस्वीकारेण मुख्यप्रकृत्यर्थत्याग इति त्रितयलङ्घनम्, पुच्छब्रह्मतावादे तु पुच्छपदमात्रे लक्षणा। अपरं सर्वं समानमिति पुच्छशब्दप्रायपाठमात्रबाध इति भामतीसारः। वार्तिककारास्तु—ब्रह्मशब्दस्य कमलासनादावपि प्रसिद्धेः प्रकरणाद्यभावे विशुद्धब्रह्मणो न बोध इति वदन्तो ब्रह्मशब्दस्यापि विशुद्धे ब्रह्मणि मुख्यत्वं न परित्यजन्ति; अनेकार्थस्यापि तस्य निरूढलक्षणया ब्रह्मण्यपि मुख्यत्वाविरोधात्। ततश्च ब्रह्मशब्दमुख्यार्थतापरित्यागस्तदवस्थ एव। एतेन—मयडर्थोऽपि—व्याख्यातः; प्रायपाठावगतविकारार्थत्वपरित्यागात्। तथाच मयटः प्राचुर्यस्याप्यर्थत्वेऽपि प्रकरणप्रायपाठाद्यवगतमुख्यार्थान्तरपरित्यागात् द्वितीयोल्लङ्घनमपि दूषणमेव। यथा च प्राचुर्यार्थत्वेऽपि ब्रह्मण्यप्रसिद्धमानन्दमयपदम्, तथा ''कथञ्चित्प्रचुरानन्दवाचि वा ब्रह्मण्यसिद्धमि''ति भामत्यां व्यक्तम्। अत एव वार्तिककाराणां सूत्राशयविरुद्धमपि मयटः स्वार्थत्वमेव सम्मतम्। आनन्दशब्दस्य प्रकृतिमात्रशक्तस्यानन्दप्रचुरविवक्षाऽपि तु दूषणमेव, न च स्वार्थ एवात्र मयट्; प्राचुर्यादिति सूत्रविरोधापत्तेः। यथा च प्राणमयादावपि मयटो विकारार्थत्वमेव, तथाऽन्यत्र व्यक्तम्। एतेन—प्रायपाठपरित्यागोऽपि—व्याख्यातः; न ह्यानन्दमयस्य ब्रह्मणः कटिदेशाधोभागाख्यमपि पुच्छं संभवति; इति पुच्छवत् पुच्छमिति विवरणमेवोभयसम्मतम्; आनन्दमयब्रह्मवादिनां वार्तिककाराणां मतेऽपि ब्रह्मनिर्विशेषताया एव स्वीकारात्, तस्य सावयवत्वासंभवात्। अतीतानन्तरोपाधिप्रयुक्तैव हि सावयवत्वकल्पना तन्मतेऽपि। इयान्

विशेषः–स्वप्राधान्यसिद्धयर्थमधिष्ठानत्वविवक्षाऽत्र मन्यते। यथा चात्र न प्रतिष्ठापदवैयर्थ्यम्, तथा न्यायरक्षामणौ व्यक्तम्। अयं च प्रायपाठ आनन्दमयब्रह्मतावादेऽपि समान एव।।

एतेन–पुच्छशब्दमुख्यार्थबाध एकः, ''सोऽकामयते''ति पुंलिङ्गबाधो द्वितीयः, अभ्यासबाधस्तृतीय इति मुख्यत्रितयलङ्घनं पुच्छब्रह्मवाद एवेति–परास्तम्, दत्तोत्तरत्वात्, ''तस्यैष एव शारीर आत्मे''त्यात्मशब्देन पुंलिङ्गेनानन्दमयपदापेक्षयाऽव्यवहितेन निर्दिष्टस्यैव ''सोऽकामयते''त्यत्र परामर्शेन पुंलिङ्गाविरोधात्, ''असन्नेव स भवती''त्यादिवाक्यशेषे ब्रह्मशब्दाभ्यासस्यैव विद्यमानत्वेनानन्दाभ्यासस्यापि–''रसो वै स'' इति पुच्छब्रह्मविषयीकरणप्रवृत्तरसानन्दादिशब्दघटितस्य पुच्छब्रह्मविषयकत्वस्यैव युक्तत्वेनाभ्या- सावाधाच्च। वस्तुतस्तु–''तदात्मानं स्वयमकुरुत। तस्मात् तत्सुकृतमुच्यत इति। यद्वै तत् सुकृतम्, रसो वै सः।'' इत्यत्रोपक्रमे नपुंसकेनैव तच्छब्देन मन्त्रान्तरस्य प्रवृत्तत्वात् ''रसो वै स'' इत्यादौ पुच्छब्रह्मण एव परामर्शो युक्तः, ''रसो वै स'' इति पुंलिङ्गं तु रसशब्दापेक्षया; अन्यथा आनन्दमयशब्दे यदि स्वार्थ एव मयट्, तर्हि रसो वै स'' इति वितथमापद्येत। पुच्छब्रह्मवादे तूत्तरत्र रसानन्दादिशब्देन पुच्छब्रह्मण एव विवक्षेति ज्ञापनार्थत्वात् तत्सार्थक्यमित्यभ्यासबाधो मतान्तर एव, न पुच्छब्रह्मवादे। नामैकदेशे खलु नामग्रहणम् न त्वेकदेशमात्रग्रहणे; भीम-भामा-ज्योतिरादिकं तु नामैकदेश एव, आनन्दमय इति तु न नाम, इति कथमानन्दपदेनानन्दमयप्रत्यभिज्ञा, इत्यानन्दमयब्रह्मतावादेऽभ्यास एवासत्कल्पः। तथाच सुष्ठूक्तं भामतीकारैरेकदेशिमतनिरासेन स्वमतव्यवस्थापनार्थमेव–''इदन्त्विह वक्तव्यमित्यादि भाष्य''मिति॥ व्याख्यान्तरनिरासो हि भाष्यकाराणां बहुशो दृश्यते। तद्यथा–''लोके येष्वर्थेषु प्रसिद्धानि पदानि, तानि सति संभवे तदर्थान्येवे''त्यादिशाबरभाष्यं भवदासादिवृत्तिकारमतनिरासायेति।।

तदयं निष्कर्षः–आनन्दमयाधिकरण एकदेशिमतं भाष्यमतमिति मतद्वयम्। तत्र वृत्तिकाराणां सिद्धान्तो भाष्यकाराणां पूर्वपक्षः, वृत्तिकाराणां पूर्वपक्षो भाष्यकाराणां सिद्धान्तः। तत्रानन्दमयो जीव इति भाष्यकाराणां मतम्, स परमात्मेति वृत्तिकाराणां मतम्। वृत्तिकारमतेऽपि निर्विशेषमेवानन्दमयपदार्थः, परं तु तदुपास्यम्, भाष्यकाराणां तु मते तद्र ज्ञेयमिति विवेकः। तत्र वृत्तिकारा भेदाभेदवादिनः, भाष्यकारा अपि। तत्र प्रथममते भेदस्य सत्यस्यापि बाध्यत्वम्, द्वितीयमते तु मिथ्याभूतस्य तस्य बाध्यत्वमिति।।

प्रकृतमनुसरामः। *इदं त्विह वक्तव्यमिति*। इद=आनन्दमयब्रह्मतावादे। इदम्=वक्ष्यमाणम्। वक्तव्यम्=प्रतिवक्तव्यमित्यर्थः। कथमिवेत्याक्षेपे। प्राचुर्यार्थत्वं समाश्रीयत इवेति कथमिति सम्बन्धः। प्राचुर्यार्थत्वाश्रयणसंभावनापि न संभवतीत्यर्थः। मयटो मुख्यविकारार्थत्वपरित्यागाख्यं प्रथमं

मुख्योल्लङ्घनमनेन वाक्येन विवक्ष्यते। सर्वान्तरत्वादानन्दमयो मुख्यात्मेति शङ्कामनुवदति- *मान्त्रवर्णिकेत्यादिना-प्रसङ्गादितीत्यन्तेन*।।

अत्रोच्यत इत्यादिना-कुतः प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्ग इत्यन्तेन पुच्छब्रह्मवादोपक्षेपः। *तदिहेति*।। साक्षाच्छब्देन प्रत्यभिज्ञानमेकदेशेन प्रत्यभिज्ञानापेक्षया दुर्बलमिति ब्रह्मशब्दघटितवाक्यस्यैव विषयत्वम्, ब्रह्मशब्दाभ्यासस्यैव हेतुत्वं चेति भावः। स्वशब्दादिव स्वपर्यायशब्दादपि प्रत्यभिज्ञानं न विरुद्धम्, इति-आनन्दपदाभ्यासोऽपि नात्र विरुद्धः। *पच्च कोशा इति*।। तत्र प्रथममते चत्वारः कोशाः विज्ञानमयान्ताः, भाष्यमते त्वानन्दमयान्ताः पञ्च कोशा इति विवेकः। पुच्छशब्दविरोधमस्मिन् मते शङ्कते-*नन्विति*।। *कथं स्वप्रधानत्वमिति*।। पुच्छशब्दस्यावयववाचित्वात् प्राधान्यासंभव इत्यर्थः। मान्त्रवर्णिकत्वं ब्रह्मण एव, नानन्दमयस्येति पुच्छवाक्यस्यैव प्राधान्यमित्याह-*नन्वित्यादिना-संयोगाभावादित्यन्तेन*।। अनेन-सौत्रानन्दमयपदस्य तत्पर्यायगतपुच्छवाक्यपरत्वं ज्ञाप्यत इति विषयव्यवस्था क्रियते। *अपिचेत्यादिना-स्वप्रधानत्वमित्यन्तेन सौत्राभ्यासहेतुसमन्वयो व्यवस्थाप्यते। ततश्च आनन्दमयपर्यायानन्तरप्रथमश्लोको व्याख्यातः।।

पुच्छशब्दविरोधमाशङ्क्य परिहरति-*कथं पुनरित्यादिना-इति श्रुत्यन्तरादित्यन्तेन*।। पुच्छपदस्य गौण्या वृत्त्याऽधिष्ठानपरत्वमिति भावः। आनन्दमीमांसा हि यद्यप्यानन्दप्राचुर्यमेव बोधयति, ''स एको ब्रह्मण'' इत्यन्तेन। तथाच तत्र ब्रह्मण इत्यनेनानन्दमयस्य विवक्षायामपि न दोषः; तस्य मुख्यब्रह्मत्वाभावात्। अत एव बृहदारण्यके-''स एको ब्रह्मलोक आनन्द'' इत्यनन्तरम''प्यत ऊर्ध्व विमोक्षाय ब्रूही''ति जनकस्य याज्ञवल्क्यं प्रति प्रश्न उपपद्यते, इति ''यतो वाचो निवर्तन्त'' इति वाक्यान्यथानुपपत्त्याऽपि पुच्छमेव ब्रह्म प्रधानमित्याह-*अपि चानन्दमयस्य ब्रह्मत्व इति*।। मयटः प्राचुर्यार्थत्वेऽपि नानन्दमयमुख्यात्मतेत्याह-*अपि चानन्दप्रचुर इति*।। प्रतियोग्यल्पत्वापेक्षत्वात्=स्वसमानाधिकरणस्वल्पस्वविरोधिसत्तःनियतत्वादित्यर्थः; ब्राह्मणमयो ग्राम इति शूद्राद्यल्पताभिप्रायेण प्रयोगादिति भावः। अस्तु ब्रह्मण्यपि दुःखाल्पत्वमिति शङ्कायामाह-*यत्र नान्यदिति*।। प्रियमोदादिशिरस्कत्वं प्रियमोदादीनामन्तः करणवृत्तिविशेषरूपाणां पुरुषभेदेन भेदादानन्दमयभेदमपि गमयेत्, इति एकस्मिन्नद्वितीये च ब्रह्मणि तेऽपि विरुद्धा इत्याह-*प्रतिशरीरमिति*।। आनन्दमयब्रह्मतायां सौत्राभ्यासरूपहेत्वसंभवमाह-*न चानन्दमयस्येति*।। *प्रातिपदिकार्थमात्रमिति*।। नामैकदेश एव नामग्रहणम्, न शब्दमात्रैकदेश इति नानन्दाभ्यासोऽप्यमानन्दमयाभ्यास इति भावः। अस्तु शब्दसामान्यैकदेशेऽपि शब्दप्रत्यभिज्ञानम्, एवमपि आनन्दपदाभ्यासः कथमानन्दमयब्रह्मतायां साधकः? यदिआनन्दमयस्य ब्रह्मत्वादिति मन्यते,

तर्हि परस्पराश्रयता–आनन्दमयब्रह्मतायामानन्दाभ्यासो ब्रह्मभ्यासः, तस्य ब्रह्माभ्यासतायामानन्दमयस्य ब्रह्मतेत्याह- *यदि चेति*।। वस्तुतस्तु आनन्दाभ्यासो ब्रह्मशब्दाभ्यास एव पर्यायत्वादित्याह-तस्माच्छ्रुत्यन्तर इति।। "सोऽकामयते"ति पुंलिङ्गतच्छब्दस्य पुच्छब्रह्मण्युपपत्तिमाह- *तस्माद्वा एतस्मादिति*।। इदम्-"तस्यैष एव शारीर आत्मा" इत्यानन्दमयपर्यायगतात्मपदस्याप्युपलक्षणम्; "तस्माद्वा एतस्मादात्मन" इत्यात्मशब्देनोपक्रम्यात्मशब्देनैवोपसंहारात्।। ननु-भृगुवल्ल्यां पञ्चमस्थान आनन्दस्योपदेशात् स्थानसाम्याद् आनन्दमयोऽपि ब्रह्मैवेति शङ्कयामाह- *या त्विति*।। *मयडश्रवणादिति*।। कारणमुखेन भृगुवल्ल्यां ब्रह्मोपदेशः, ब्रह्मवल्ल्यां तु कार्यमुखेनेति हि वस्तुस्थितिः। तथाच भृगुवल्ल्यां मयडश्रवणं ब्रह्मवल्ल्यां तच्छ्रवणं च मयडन्तस्थेल विकारस्यान्यत्राविकारस्य कारणस्य ग्रहणमिति सूचयतीति भिन्नविषयत्वाद् न स्थानसाम्येन निर्णयो युक्त इति भावः।।

सूत्राणि त्विति।। वक्तव्यं चात्र बहु-वेदान्तरक्षामणेर्द्वितीये भागे यत्र केवलमानन्दमयाधिकरणस्य चर्चा, तत्र विशदीकृतं "लोके येष्वर्थेष्वि"ति शाबरभाष्यविवरणपरवार्तिकाद्यवलम्बेन। पुच्छब्रह्मवादानुगुणसूत्रव्याख्यानप्रकारस्त्वेवम्-(१) *आनन्दमयोऽभ्यासात्*।। आनन्दमयपर्यायगतपुच्छवाक्यम्, ब्रह्मपरम्; अभ्यस्यमानब्रह्मानन्दादिशब्दघटितवाक्यशेषवत्त्वात्। (२) *विकारशब्दान्नेति चेन्न प्राचुर्यात्*।। पुच्छशब्दश्रवणाद् न प्रधानत्वमिति चेत्, न; प्राचुर्यात्। पूर्व प्रचुरं तथा प्रयोगाद् अतीतानन्तरोपाधिप्रयुक्तत्वादित्यर्थः। (३) *तद्धेतुव्यपवदेशात्*।। सानन्दमयविकारहेतुत्वनिर्देशात् ब्रह्मव प्रधानम्। (४) *मान्त्रवर्णिकमेव च गीयते*।। पुच्छब्रह्मण एव मान्त्रवर्णिकस्य गीयमानत्वात् तदेव प्रधानम्। (५) *नेतरोऽनुपपत्तेः*।। नानन्दमयः परमात्मा; अनुपपत्तेः। (६) *भेदव्यपदेशात्*।। भेदविरुद्धोपदेशात्, प्रपञ्चमिथ्यात्वोपदेशादिति यावत्। (७) *कामाच्च नानुमानापेक्षा*।। भृगुवल्लीगतानन्दसाधर्म्याद् आनन्दमयपरमात्मतेति न संभवतीत्यर्थः। (८) *अस्मिन्नस्य च तद्योगं शास्ति*।। पुच्छब्रह्मण्यानन्दमयस्य तद्भावं शास्तीत्यर्थः।।

अधिकं तु अद्वैतदीपिकायां वेदान्तरक्षामणौ चानन्दमयाधिकरणे व्यक्तम्, येन द्वैतविशिष्टाद्वैताभिमतयोजनाप्रकारः, तत्राद्वैतिनां वक्तव्यं च विशदीभवेत्। अन्ये सर्वेऽप्याचार्या आनन्दमयब्रह्मतावादिन एव। केवलं श्रीकण्ठाचार्या अव्यक्तस्यानन्दमयपदार्थत्वमिति पक्षान्तरमप्यवलम्बन्त इति विशेषः। तत्र तु तन्मतेऽपि ''ब्रह्म पुच्छं प्रतिष्ठे''त्यस्यैव ब्रह्मसमर्पकत्वमद्वैतमत इव समानम्। इयान् विशेषः– यत् सगुणः सदाशिवस्तेषां ब्रह्मपदार्थः, अद्वैतिनां तु निर्विशेषमिति। इदमत्र हृदयम्–अन्नरसमयशब्दमात्रे विकारार्थत्वम्, अन्यत्र तु स्वार्थो वा

प्राचुर्य वेति केचनाचार्याः। श्रीवल्लभाचार्यानुयायिनः सर्वत्र न विकारार्थः, किन्तु प्राचुर्यार्थ एवेति। अद्वैतिनस्तु सर्वत्र विकारोऽर्थ इति मन्यन्ते। तत्र मतान्तरेषु–विज्ञानमयानन्दमयशब्दयोर्विकारार्थत्वशङ्कैव यदि नास्ति, कथं तर्हि "विकारशब्दादिति चेदि"ति सौत्रशङ्काया उत्थितिः? ततश्च विज्ञानमयपर्यन्तं विकारार्थत्वम्, केवलमानन्दमयपदे प्राचुर्यार्थत्वमिति वा वक्तव्यम्, अथवा सर्वत्र विकारार्थत्वमिति। तत्र विज्ञानमयान्तानां विकारार्थत्वम्, आनन्दमयमात्रे तत्परित्यागो न युक्तः। प्राणादितादात्म्यापन्नं हि चैतन्यं प्राणादितादात्म्याध्यासनिबन्धनत्वात् तद्विशिष्टस्य चैतन्यस्य प्राणादित एवागतमिति कृत्वा "तत आगत" इति सूत्रात् प्राणादिमयमिति व्यवह्रियत इति ब्रह्मविद्याभरणकारादयः। तथा हि–

"ननु–आनन्दशब्दाद्विकारार्थको मयण्ण प्राप्नोति; "मयड्वैतयोर्भाषायामभक्ष्याच्छदनयो"रिति सूत्रेण विकारावयवयोरर्थयोर्भाषायामेव मयड्विधानात्, "नित्यं वृद्धशरादिभ्य" इति सूत्रेण तदनन्तरपठितेन वृद्धेभ्यः शरादिभ्यश्च शरधर्ममृत्कुटीतृणसोमबल्बजेत्येवंरूपेभ्यो भाषायामेव तयोरर्थयोर्नित्यं विधानात्। ततश्च "द्वयचश्छन्दसी"ति सूत्रेण प्राणमनश्शब्दयोरेव विकारार्थे मयड् भविष्यति, न तु अन्नरस-विज्ञानानन्दशब्देभ्यः। ततश्चान्नमयादिशब्दवदित्येतदनुपपन्नमिति–चेत्, उच्यते; "नित्यं वृद्धशरादिभ्य" इति सूत्रे नित्यग्रहणाच्छन्दसि विकारावयवयोरर्थयोर्मयड् भविष्यति।। तद्धि न वृद्धेभ्यः शरादिभ्यश्च नित्यत्वसिद्ध्यर्थम्; पुनर्विधानबलादेव नित्यत्वसिद्धेः। न च–"नित्यमेकाच" इति व्याकरणान्तरम्, स्रङ्यमित्यादि तदुदाहरणम्, योगविभागेन तदर्थसङ्ग्रहणमिति–वाच्यम्; तथा सति शरादिगणे मृद्ग्रहणमनर्थकं स्यात्। ततस्तदेव व्याकरणान्तरानुसारेण सर्वेषामेकाचामुपलक्षणं सत् शरादित्वादेवैकाज्भ्यो मयड् नित्यं सम्पादयिष्यति। अतोऽतिरिच्यमानं नित्यग्रहणं भाषायां नित्यमेव, छन्दसि तूदाहरणानुसारेण यथासम्भवं विकल्पेन मयड् भवतीति ज्ञापयति।। ननु–एवमपि वृद्धेभ्यः शरादिभ्यश्च छन्दसि मयटो ज्ञापकं भविष्यति, ततश्चानन्दशब्दस्य वृद्धत्वात् ततोऽस्तु नाम, विज्ञानशब्दे तु कथमिति–चेत्, उच्यते; अन्नरसमयशब्दे तावद्विकारार्थ एव मयडवश्यं स्वीकर्तव्यः। "अन्नात्पुरुष" इति पूर्ववाक्यनिर्दिष्टान्नप्रभवत्वं रसद्वारकमिति व्युत्पादनार्थं हि "स वा एष पुरुषोऽन्नरसमय" इति वाक्यम्। तत्र च नित्यग्रहणबलादेव मयट् सम्पादनीयः। अतस्तत् सामान्यापेक्षं ज्ञापकं भविष्यति–छन्दसि वृद्धेभ्यश्चावृद्धेभ्यश्च व्यवस्थितविकल्पेन मयड् भविष्यतीति। ततश्च विज्ञानमयेऽपि नित्यग्रहणेनैव मयड् भविष्यति। अथवा "तत आगत" इत्यधिकारे "हेतुमनुष्येभ्योऽन्यतरस्यां रूप्य" इति सूत्राद्धेतुग्रहणेऽनुवर्तमाने "मयट् चे"ति सूत्रम्। ततश्चायमर्थः–अपादानपञ्चम्यन्ताद्वस्तुगत्या

हेतुप्रतिपादकाच्छब्दादागत इत्यर्थे मयड् भवति, ततश्चान्नरसाद्धेतेरागतोऽन्नरसमय इति। एवं विज्ञानानन्दशब्दाभ्यामपि मयड् दृष्टव्यः। न च—अन्नमय इत्यादौ भृगुवल्ल्युक्तानामाधिदैविकानां कोशानां अन्नप्राणमनोविज्ञानानन्दशब्दैः प्रत्यभिज्ञानात्तद्विकारत्वं स्वीकृत्यन्नाद्धेतोरागत इति तद्धितविग्रहे ''ज्ञनिकर्तुः प्रकृति''रिति सूत्रेण पञ्चमीं स्वीकृत्य मयडन्तता वक्तव्या। ततश्चागत इत्यस्योत्पन्न इत्यर्थः पर्यवस्यति। न च तदुत्पन्नस्तस्मान्मुख्यया वृत्त्या आगत हति वक्तुं शक्यत इति—वाच्यम्; पाणिनिसूत्र आगतत्वादिकं लोकबुद्ध्यनुसारेण गौणमुख्यसाधारणं विवक्षितम्। अत एव ''ध्रुवमपायेऽपादानमि''ति सूत्रे प्रागनभिव्यक्तं कार्य व्यक्तीभवत् कारणाद्विश्लिष्यत इवेति, चोरादिभ्यश्चोत्पद्यमानं भयं तेभ्यो विश्लिष्टमिव भवतीति लोकबुद्ध्यनुसारेण ''ध्रुवमपायेऽपादानमि''ति सूत्रेणैव तेभ्योऽपायं वैवक्षिकमादाय चोरादीनामपादानसंज्ञा भवतीति ''भीत्रार्थानां भयहेतुरि''त्यादिसूत्राणि महाभाष्ये प्रत्याख्यातानि। कारणाच्च कार्यस्यागतत्वं लोकप्रसिद्धमेव। श्रुतावपि कुतो जात इत्यर्थे ''कुत एतदागादि''ति प्रश्नो दृश्यते। ततश्च स्वोपजन-भूतात् स्रूघ्नादेरेव यदा मुख्यमागमनं विवक्षितम्, तदैव स्रूघ्नात् स्वोपजनभूतादागतः स्रूघ्नमय इत्यादावेव ''तत आगत'' इत्यधिकारपठितेन ''मयट् चे''तिसूत्रेण मयट्प्रत्ययः, न तूपादानभूतादुत्पत्तौ विकारस्य विवक्षितायां मयडिति निर्बन्धो निर्मूल एव। अत एव कवयः प्रयुञ्जते—''पित्र्यमंशमुपवीतलक्षणं मातृकं च धनुरूर्जितं दधदि''ति। अत्र हि ''तत आगत'' इत्यधिकारपठितेन ''पितुर्यच्चे''ति सूत्रेण पित्र्यमिति। न हि अत्र मुख्यमागमनमुपवीतस्य विवक्षितम्; असम्भवात्, अपि तु पितृब्राह्मण्यप्रयुक्तत्वमात्रम्। एवं मातृकमित्यत्रापि आगताधिकारीयेण ''ऋतष्ठञि''ति सूत्रेण ठञ्प्रत्ययो द्रष्टव्यः। अयं श्लोको जामदग्न्यविषयः। ततश्च ''मयट् चे''ति सूत्रेणाप्यन्नरसमयविज्ञानमयानन्दमयशब्दा विकारार्थपर्यवसिताः, प्राणमयमनोमयशब्दयोस्तु विकारार्थत्वे न काचिदनुपपत्तिः''—इति ब्रह्मविद्याभरणम्।।

अथात्र भाष्यवृत्तिकारमतयोर्विशिष्य बलाबलनिर्णयार्थं न्यायरक्षामणेरंशः कश्चन सङ्गृह्यते। स यथा—

ननु—यथावृत्ति आनन्दमयब्रह्मवादो भाष्यकृता किमिति नाङ्गीकृत्य इति—चेत्; अत्राहुः (१) आनन्दमयो ब्रह्मेति न युज्यते—अन्नमयादिगतविकारार्थमयट्प्रायपठितेन मयटा तस्य विकारत्वावगमात्, (२) शिरःपक्षाद्यवयवयोगात्, (३) पुच्छत्वेन निर्दिष्टाद्र ब्रह्मणस्तस्य व्यतिरेकप्रतीतेः, (४) अन्नमयादिपर्यायेषु प्रधानानां तत्तपर्यायगतश्लोकविषयत्वदर्शनेन

स्वपर्यायगतश्लोकाविषयस्य तस्याप्राधान्यात्, (५) ''तस्यैष एव शारीर आत्मा यः पूर्वस्ये''त्यन्नमयादीनामिव तस्याप्यात्मान्तरश्रवणात्, (६) ''अन्नमयप्राणमयमनोमयविज्ञान-मयानन्दमया मे शुध्यन्तामि''ति शोध्यत्वश्रवणाच्च–इति।।

अत्रापरे प्रत्यवतिष्ठन्ते–अत्र तावद्विकारत्वावगमोऽसिद्धः–(१) विकारार्थकल्पकत्वेनाभिमतस्य प्रायपाठस्याभावात्। यद्यप्यन्नमये विकारार्थे मयडुपक्रान्तः; तथाऽपि तावता नानन्दमयेऽपि स एवार्थ इत्यायाति; प्राणमयादिषु तत्परित्यागात्। प्राणनवृत्तिप्राचुर्येण हि पञ्चवृत्तिर्वायुः प्राणमय इति व्यपदिष्टः, न तु प्राणकार्यत्वेन। एवमन्तःकरणजीवावपि मननविज्ञानप्राचुर्येण मनोमय इति विज्ञानमय इति निर्दिष्टौ। ततश्चानन्दमयेऽपि प्राचुर्यमेव मयडर्थः। न च–आनन्दप्राचुर्यमपि ब्रह्मणि न सम्भवति; प्राचुर्यस्य स्वसमानाधिकरणविजातीयाल्पत्वप्रतियोगिकताया ब्राह्मणप्रचुरो ग्राम इत्यादौ दृष्टत्वेन आनन्दप्राचुर्यार्थस्वाभाव्यादीषद्दुःखसम्भिन्नत्वावश्यम्भावादिति–वाच्यम्; प्रचुरप्रकाशस्सवितेत्यादौ व्यधिकरणसजातीयाल्पत्वप्रतियोगिकताया अपि दृष्टत्वेन ब्रह्मणि जीवगतानन्दाल्पत्वमपेक्ष्य तत्प्राचुर्यसम्भवात्। इह च वाक्यशेषे ''सैषाऽऽनन्दस्य मीमांसे''त्यारभ्य व्यधिकणजीवानन्दाल्पत्वमपेक्ष्यैव ब्रह्मानन्दस्य प्राचुर्यप्रदर्शनात्।।

(२) शिरःपक्षादिरूपेण कल्पितमवयवित्वं तु न ब्रह्मत्वविरोधि; अन्यथा ब्रह्मणोऽवयवित्ववदवयवत्वमपि नेति पुच्छब्रह्मणोऽप्यब्रह्मत्वप्रसङ्गात्।।

(३) आनन्दमयस्य पुच्छं ब्रह्मेति निर्देशोऽपि नानन्दमयस्य ब्रह्मत्वविरोधी; अन्नमयस्य स्वस्मादनतिरिक्तः स्वावयवैरेव ''तस्येदमेव शिर''इत्यादिना शिरःपक्षपुच्छादिमत्त्वकल्पनादर्शनाद् अनतिरिक्तैः पक्षपुच्छादिमत्त्वकल्पनाप्रायपाठानुगुण्येन ब्रह्मानन्दमययोरभिन्नयोरेव पुच्छतद्वद्भावनिर्देशे तात्पर्यकल्पनस्योचिततया ततो व्यतिरेकाप्रतीतेः।।

(४) आनन्दमयस्य स्वपर्यायगतश्लोकाविषयत्वमप्यसिद्धम्; अन्नमयादिपर्यायश्लोकानां पुच्छमात्रविषयत्वाभावेनास्यापि तद्वदेव पुच्छवद्विषयत्वौचित्यात्। न च–पुच्छवति प्रयुक्तस्यानन्दमयपदस्य श्लोके श्रवणाभावात् पुच्छे प्रयुक्तस्य ब्रह्मशब्दस्यैव श्रवणात्पुच्छविषय इति–शङ्क्यम्; ''सत्यं ज्ञानमनन्तं ब्रह्म'' ''तस्माद् वा एतस्मादात्मन'' इत्युपक्रान्तस्यैवानन्दमयवाक्ये प्रतिपादनेन ब्रह्मात्मानान्दमयशब्दानामैकार्थ्यस्यावधृततया तेष्वन्यतम-निर्देशमात्रेण श्लोकस्यानन्दमयविषयत्वसिद्धेः। न च–प्रियमोदादिमत्तया प्रसिद्ध आनन्दमये श्लोकदर्शिता सत्त्वासत्त्वशङ्का नान्वेतीति–वाच्यम्; जीवस्य तथा लोके प्रसिद्धत्वेऽपि

ब्रह्मणोऽप्रसिद्धत्वात्॥

(५) ''तस्यैष एवे''त्यादावानन्दमयस्यात्मान्तरश्रवणमप्यसिद्धम्; तस्य पूर्वस्य विज्ञानमयस्य एष एव शारीर आत्मा य एष आनन्दमय इत्यर्थाङ्गीकारात्। तस्य आनन्दमयस्य एष एव शारीर आत्मा यः पूर्वस्य विज्ञानमयस्येत्यर्थाङ्गीकारेऽपि विज्ञानमयस्य य आकाशादिस्रष्टा वक्ष्यमाणन्यायसिद्धपरमात्मभाव आनन्दमयः शारीर आत्मा, स एव स्वस्यापि स्वयमेवात्मेति पर्यवसानेन ''पतिं विश्वस्यात्मेश्वरम्'' इत्यात्मेश्वरत्वोक्तया ईश्वरान्तरस्येवात्मान्तरस्य निराकृतेरेव सिद्धेः॥

(६) शोध्यत्वं न ब्रह्मत्वविरोधि; सर्वत्र शुद्धिस्तत्तदर्थानुगुणेति ब्रह्मण्यप्यनादिभवसञ्चितानेकजीवापराधकलुषिते मुक्त्यर्थ प्रसाद्यत्वरूपस्य शोध्यत्वस्य सम्भवात्॥

तस्मात् (१) पुच्छब्रह्मवाद्युयुक्तीनामसाधकत्वात् पुच्छवदानन्दमयोऽपि ब्रह्मैव; प्रकरणस्य स्वस्मादनतिरिक्तैः स्वावयवैः पक्षपुच्छादिरूपणपरत्वेन तस्य पुच्छब्रह्मभेदप्रतीतेः॥

(२) प्रकरणगतश्लोकानां पुच्छवद्विषयत्वेन तत्रैव श्लोकगतस्य ब्रह्मशब्दाभ्यासस्य सत्त्वासत्त्वशङ्कालिङ्गस्य च पर्यवसानात्॥

(३) ''सत्यं ज्ञानमि''ति प्रकृतं ब्रह्म ''तस्माद् वा एतस्मादात्मन'' इत्यात्मशब्देन निर्दिश्य तस्याकाशादिकारणत्वप्रतिपादनानन्तरं सर्वान्तरत्वेन तस्यात्मत्वविवरणार्थ प्रवृत्तस्य सन्दर्भस्य तत्रैव परिसमापनेन तदन्तरं ''तस्माद् वा एतस्मादानन्दमयात्। अन्योऽन्तर आत्मा ब्रह्मे''ति तदन्तरस्य ब्रह्मणो निरूपणाभावात्॥

(४) ''सोऽकामयते''त्यनन्तरवाक्यगतेन स इति पुंल्लिङ्गान्तेनाव्यवहितप्रधानप्रकृतार्थपरामर्शिना परामर्शस्य योग्यत्वात्॥४॥

(५) भृगुवल्याम्–''एतं विज्ञानमयमात्मानमुपसंक्रम्य। एतमानन्दमयमात्मानमुपसक्रम्ये–''त्यत्रानन्दमयशब्दस्य ''विज्ञानं ब्रह्मेति व्यजानात्। आनन्दो ब्रह्मेतिं व्यजानादि''ति तत्रत्यसम्प्रतिपन्नब्रह्मपरभावेनानन्दशब्देन सह स्थानसाम्येन ब्रह्मपरत्वनिश्चयात्॥ (६) ''आनन्दमयोऽभ्यासादि''ति सूत्रस्वारस्याच्च–इति, इति, पुच्छब्रह्मवादाक्षेपः॥

अत्रोच्यते–(१) यत्तावदुक्तमानन्दमयस्य विकारत्वावगतिर्नास्तीति, तन्न; विकारार्थमयट्प्रायपाठेन तत्रापि मयटो विकारार्थत्वात्॥

तथा हि-"स वा एष पुरुषोऽन्नरसमय" इति न देह एवोच्यते; तस्यान्नपरिणामत्ववाचिनाऽन्नरसशब्देनान्नविकारत्वयाचिना अन्नमयशब्देन चोक्तिसम्भवे 'अन्नरसमय' इत्यस्य वैयर्थ्यात्, पुरुषशब्दस्य च चेतनवाचित्वात् "अन्नात्पुरुष" इत्यव्यवहितपुरुषपरामर्शस्य 'एष' इत्यनेन सिद्धतया 'स' इत्यस्य व्यवहिताकाशादिकारणात्मपरामर्शार्थत्वाच्च, किन्तु सः=प्रागाकाशादिकारणत्वेन निरूपित एषः=अनुपदमन्नकार्यत्वेन निरूपितश्च पुरुषोऽन्नरसमयः=अन्नरसं देहमनुप्रविश्य तदवच्छिन्नतया तत्कार्य इत्युच्यते। तथाच "अन्नात्पुरुष" इति निर्दिष्टमाकाशादिकारणरूपस्य पुरुषस्यान्नकार्यत्वमन्नकार्य देहावच्छेदलब्धपरिच्छिन्नाकारतयेति विवृतं भवति। एवं प्राणमयो मनोमयो विज्ञानमयश्च प्राणमनोबुद्ध्यवच्छिन्नतया तद्विकारभूतो जीव एवेति युक्तम्। न च स्वतः कार्य एव विकारार्थप्रत्ययः, न त्वौपाधिककार्यताभाजीति व्युत्पत्तिकल्पना प्रमाणवती। किञ्च मयटः प्राचुर्यार्थत्वं वदतस्तवापि मते जीव एवानन्दमय इति सिध्यति; आनन्दप्राचुर्यस्य प्रतियोगिदुःखाल्पत्वगर्भत्वात्। प्राचुर्यस्य विशेषणत्वे व्यधिकरणसजातीयाल्पत्वस्य निरूपकत्वेऽपि विशेष्यत्वे समानाधिकरणविजातीयाल्पत्वमेव निरूपकमिति हि व्युत्पत्तिसिद्धम्। अत एव "प्रचुरब्राह्मणो ग्राम" इत्यत्र प्राचुर्यस्य ग्रामान्तरगतब्राह्मणाल्पत्वापेक्षत्वेऽपि ब्राह्मणप्रचुरो ग्राम इत्यत्र तद्ग्रामगतशूद्राद्यल्पत्वापेक्षमेव प्राचुर्यं प्रतीयते। न च-प्रचुरप्रकाशस्सवितेतिवत् प्रकाशप्रचुरस्सवितेति प्रयोगेऽपि नक्षत्रादिगतप्रकाशाल्पत्वापेक्षमेव प्राचुर्यमवगम्यते, न तु सवितृगततमोऽल्पत्वापेक्षम्, तत्र तमसो बाधितत्वादिति-शङ्क्यम्; तत्रापि धनतुहिनसैंहिकेयाच्छदनारोपिततमोऽल्पत्वमपेक्ष्यैव घनाद्यपसरणसमये तथा प्रयोगात्, तदभावे तथा व्युत्पन्नप्रयोगाभावात्। ननु-'बलवत्तरश्चैवे'त्यादौ तरबाद्यर्थस्य प्राचुर्यत्य विशेष्यत्वेऽपि मैत्रादिगतबलाद्यल्पताऽपेक्षत्वं दृष्टमिति-चेत्, न; तत्र 'द्विवचनविभज्योपपदे तरबीयसुना''विति द्विवचनादिविशेषणवशादातिशायनिकप्रत्ययेषु व्युत्पत्त्यन्तरकल्पनेऽपि मयटि तत्कल्पकाभावेनौत्सर्गिकव्युत्पत्तिलङ्घनायोगात्। न च "प्रज्ञानघन एवानन्दमय" इति ब्रह्मण्यानन्दमयशब्दप्रयोगदर्शनाद् मयट्यपि व्युत्पत्त्यन्तरं कल्प्यमिति-वाच्यम्; तस्य "सुषुप्तस्थान एकीभूत" इति विशेषणानुसारेण प्राज्ञशब्दितसुषुप्तजीवविषयत्वात्। वाक्यशेषे "एष सर्वेश्वर एष एर्वज्ञ" इत्यादिपरमेश्वरधर्मकथनस्याध्यात्मिकाधि- दैविकतृतीयपादरूपप्राज्ञेश्वरैक्याभिप्रायत्वात्। अपि चान्यत्र व्यधिकरणसजातीयाल्पत्वमपेक्ष्य मयटः प्रयोगसम्भवेऽपि प्रकृते त्वदभिमतप्रायपाठानुसारेण समानाधिकरणविजातीयाल्पत्वमपेक्ष्यैव तत्प्रयोगो निर्वाह्यः। तथाहि-प्राणमये तावत्पञ्चवृत्तिवायुगतमेव व्यानादिवृत्त्ययल्पत्वमपेक्ष्य तत्र प्राणनवृत्तिप्राचुर्यम्, न तु तदन्यगतप्राणवृत्त्यल्पत्वमपेक्ष्य; ततोऽन्यत्र प्राणनवृत्तीनामभावात्। एवं मनोमयेऽपि करणभावेन

मननवृत्तिसम्बन्धिनोऽपि मनसस्तत्प्राचुर्यं तद्गतवृत्त्यन्तराल्पत्वमपेक्ष्यैव। विज्ञानमय इति विज्ञानमयेऽपि जीवे ज्ञानवृत्तिप्राचुर्यं तद्गतज्ञानानात्मकसंस्कारादि- रूपवृत्त्यन्तराल्पत्वमपेक्ष्यैव पर्यवस्यति।। किं बहुना? एवं त्रिषु प्राचुर्यार्थमुपगतवतोऽन्नरसमयेऽपि देहेऽवयवान्तराल्पत्वमपेक्ष्यान्नपरिणाम-रूपावयवप्राचुर्यमेव मयडर्थ इति वैरूप्यपरिहारार्थं बलादायाति। एवञ्चानन्दमयेऽपि समानाधिकरणदुःखाल्पत्वापेक्षमानन्दप्राचुर्यं मयडर्थः, इत्यापतितं दुःखमिश्रत्वं केन वार्यते? न च–तथापि समानाधिकरणयत्किञ्चिद्विजातीयाल्पत्वमपेक्ष्यानन्दप्राचुर्य- निर्वाहसम्भवेऽपि कुतो दुःखमिश्रत्वापादनमिति–वाच्यम्; सुखप्राचुर्यस्य तद्विरोधिदुःखाल्पता- ऽपेक्षायामेव प्रथमं बुद्धाववतरणेन तदुल्लङ्घनायोगात्।। न च–एवं सत्यानन्दमयो जीवोऽपि न स्यात्, तत्र दुःखाल्पत्वस्य सुखबाहुल्यस्य चाभावादिति–शङ्क्यम्; जीवस्य मुक्तौ भोग्यात् निरतिशयोत्कर्षादुत्तरावधिरहितात् ''श्रोत्रियस्य चाकामहतस्ये''ति श्रुतिदर्शितात् सुखात् सर्वमपि सांसारिकं दुःखमल्पमिति सम्भवात्। ननु–आनन्दमये मयट् प्राचुर्यार्थोऽपि मा भूत्, स्वार्थिकोऽस्त्विति–चेत्, न; प्रायपाठप्राप्तेऽतिरिक्तार्थे सम्भवति स्वार्थिकत्वेन वैयर्थ्यकल्पनाऽयोगात्। तस्मादानन्दमयस्य मयटा जीवत्वावगतिस्तावन्निष्प्रत्यूहा।।

(२) यदुक्तम्–ब्रह्मणोऽवयवित्वमवयवत्ववत् कल्पनया सम्भवति–इति, तत्र; अस्माभिः पुच्छपदस्याधारलक्षकस्योक्ततयाऽवयवत्वकल्पनाङ्गीकारेण दृष्टान्तासम्प्रतिपत्तेः, अध्यारोपापवादाभ्यां निष्प्रपञ्चब्रह्मप्रतिपत्तिप्रकरणे प्रियमोदादिरूपशिरःपक्षाद्यवयवकल्पनाया विरोधेनानुपयुक्तत्वेन चायुक्तत्वाच्च। प्रकरणस्य निष्प्रपञ्चपरत्वं च ''भेदव्यपदेशाच्चेति'' सूत्रविवरणे समर्थितम्।।

स्यादेतत्–''तयो वाचो निवर्तन्त'' इति मन्त्रो ब्रह्मणि द्वैतवस्तुमुखेन प्रवृत्तानां लौकिकीनां वैदिकीनाञ्च सर्वासां वाचां निवृत्तिं वदतीत्यमुमर्थमवलम्ब्य हि तत्र तत्समर्थनं कृतम्, न तु तद्युक्तम्; एकस्य 'वाच' इत्यस्य 'निवर्तन्ते' इत्यस्य च स्वारस्यमनुरुध्य बहूनां सप्रपञ्चवाक्यानां स्वार्थे प्रामाण्यात् प्रच्यावनस्य न्यायविरुद्धत्वादिति–चेत्, उच्यते; विज्ञानमयं न ब्रह्मेति प्रतिक्षिप्य आनन्दमयं ब्रह्मेति व्यवस्थापयति त्वय्यपि तुल्योऽयमाक्षेपः।।

तथाहि–विज्ञानमयस्य 'विज्ञानमय' इत्येतावतैव तावत्परब्रह्मत्वं प्रतीयते। तत्र मयट्प्रत्ययस्यानन्दमयैकरूप्याय त्वया व्यधिकरणसजातीयाल्पात्वपेक्षप्राचुर्यार्थत्वस्याभ्युपगन्तुं युक्ततया जीवादन्यस्य सङ्कुचितज्ञानस्याभावाद् जीवगतज्ञानाल्पत्वापेक्षज्ञानप्राचुर्य एव तत्पर्यवसानात्, मन्त्रवर्णोपात्तविपश्चित्त्वप्रत्यभिज्ञानाच्च। तथा ''विज्ञानं देवास्सर्वे ब्रह्म ज्येष्ठमुपासत'' इत्यत्र मान्त्रवर्णिकब्रह्मशब्देन ''तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्'' इति

श्रुत्यन्तरसिद्धदेवोपास्यत्वप्रत्यभिज्ञानेन "विज्ञानं ब्रह्म चेद्वेद। तस्माच्चेन्न प्रमाद्यति। शरीरे पाप्मनो हित्वा सर्वान् कामान्समश्नुत" इति तदनन्तरश्लोकेऽपि ब्रह्मशब्देन मान्त्रवर्णिकब्रह्मविद्याफल-प्रत्यभिज्ञानेन च तस्य ब्रह्मत्वं प्रतीयते। "विज्ञानं यज्ञं तनुत" इति तु ब्रह्मण्युपपद्यते; यज्ञादेर्हेतुकर्तरि तस्मिन्नपि स्वव्यापारद्वारा प्रयोज्यव्यापारकर्तृत्वसत्त्वात्, हेतुकर्तृत्वविवक्षायां णिजन्तप्रयोगनियमेऽपि स्वव्यापारद्वारा प्रयोज्यव्यापारकर्तृत्वविवक्षायामणिजन्तप्रयोगस्याविरुद्धत्वात्, साक्षाद्विलेखनमकुर्वति संविधानसम्पादनेन कर्षणप्रयोजके स्वामिन्यपि 'षड्भिर्हलैः कर्षती''ति प्रयोगदर्शनात् "यज्ञकृद् यज्ञभृद्यज्ञी''ति ब्रह्मण्येव प्रयोगदर्शनाच्च। एवमपि विज्ञानमयस्य यदब्रह्मत्वमुच्यते, तत् "तस्माद् वा एतस्माद्विज्ञानमयात्। अन्योऽन्तर आत्मे''ति, तमतिक्रम्य तदन्यस्य तदन्तरस्यात्मनः प्रतिपादनमात्रादेव; आनन्दमयत्वस्य प्रियाद्यवयवयोगस्य च विज्ञानमयेऽप्यविरोधात्। ततश्च यथा विज्ञानमयादन्यस्य तदन्तरस्य परमात्मनः प्रतिपादनदर्शनाद्विज्ञानमयपर्यायगतवाक्यजातं स्थूलारुन्धतीन्यायेन आरोपितपरमात्मभावतद्धर्मवैशिष्टयविषयमिति त्वयाऽभ्युपगम्यते, एवं प्राणमयादिपर्यायगतात्मत्वप्रतिपादनमपि, तथा "यतो वाचो निवर्तन्त" इत्यपवाददर्शनादारोपित-प्रपञ्चवैशिष्टयविषयं सप्रपञ्चवाक्यज्ञातमिति कुतोऽभ्युपगन्तुं न युज्यते?

ननु–युक्तं "विज्ञानमयादन्योऽन्तर आत्मे''त्येतावताऽपि विज्ञानमयविषयवाक्यजात-स्यारोपितविषयत्वापादनम्। "तस्माद् वा एतस्मादि''त्यत्रोपक्रान्तमात्मत्वं सर्वान्तरत्वेनोपपादयितुं प्रवृत्ते "स वा एष पुरुषोऽन्नरसमय" इत्येतस्मिन् प्रकरणे विज्ञानमयादन्तरत्वस्यैव सर्वान्तरत्वरूपत्वेन तस्योपक्रान्तात्मत्वोपपादकतया तात्पर्यवत्त्वेन बलवत्त्वात्, अन्यथा पदमात्रेण चरमपठितेन प्रथमपठितानेकवाक्यान्यथाभावापादनायोगादिति–चेत्, तर्हि अस्मिन्मतेऽपि "यतो वाचो निवर्तन्त" इत्यस्य परमोपक्रमगतानन्तत्वोपपादनार्थत्वेन तात्पर्यवत्त्वं समानमिति पश्य। "यतो वाच" इत्यस्य स्वप्रकरणगतेन "अदृश्येऽनात्म्येऽनिरुक्त" इति विशेषेण प्रकरणान्तरगतैर्ब्रह्मणो निष्प्रपञ्चत्वादिप्रतिपादकैश्चोपष्टम्भोऽप्यस्तीति विशेषः। तस्मान्निर्विशेषब्रह्मप्रकरणे प्रियाद्यवयवयोगात्सविशेष आनन्दमयो न प्रतिपाद्यं ब्रह्म भवितुमर्हतीति युक्तमेव॥

(३) यच्चोक्तम्–तस्य "ब्रह्म पुच्छं प्रतिष्ठे''ति निर्देशेन व्यतिरेकप्रतीतिरसिद्धा; प्रकरणस्य स्वस्मादनतिरिक्तैः शिरःपक्षादिनिरूपणपरत्वात्–इति, तदयुक्तम्; शिरःप्रभृतीनामन्नमयादिशब्दोदित-चेतनातिरिक्तत्वात्, चेतनपर्यन्तत्वानङ्गीकारेऽपि मनोमयपक्षशिरःपुच्छानां ऋक्सामयजुरथर्वाङ्गिरसां तदतिरिक्तत्वेनान्नमयादिष्वप्यवयवावयविभावादिकृतभेदसद्भावेन च तथा प्रकरणासिद्धेः स्वरसतः

प्रतीयमानस्य व्यतिरेकस्य त्यागायोगात्।।

(४) यत्तु–आनन्दमयस्य श्लोकाप्रतिपाद्यत्वमसिद्धम्; श्लोकानां पुच्छवद्विषयत्वनियम-दर्शनात्–इत्युक्तम्, तदप्ययुक्तम्; ''यतो वाचो निवर्तन्त'' इति मनोमयपर्यायश्लोकस्य ब्रह्मविषयस्य पुच्छवद्विषयत्वाभावात्, ''अप्राप्य मनसा सहे''ति श्रवणात् तत्रापि यथाकथञ्चित् पुच्छवद्विषयत्वमस्तीति चेत्, तर्हि ''असन्नेव स भवती''त्यत्र स इत्यस्य प्रकृतानन्दमयपरत्वात्तस्यापि यथाकथञ्चित्पुच्छवद्विषयत्वं सम्पन्नमिति सन्तुष्यतु भवान्। अयुक्तं च श्लोके स इति पुंलिङ्गेन प्रकृतपरामर्शिना तत्पदेनावश्यं परामर्शनीयस्यानन्दमयस्य श्लोकगतब्रह्मशब्दा-भ्याससत्त्वासत्त्वशङ्कालिङ्गविषयत्वम्।।

(५) यत्तु–''तस्यैष एव शारीर आत्मे''त्यत्रात्मान्तरश्रवणं नास्ति; अनन्यात्मत्वपरत्वात्–इत्युक्तम्, तदप्ययुक्तम्; पूर्वपर्यायस्थानामिव आनन्दमयपर्यायस्थस्यापि तस्य वाक्यस्य पुच्छब्रह्मरूपात्मान्तरपरत्वोपपत्तौ प्रक्रमविरुद्धार्थकल्पनायोगात्।।

(६) यच्च–प्रसाद्यत्वरूपं शोध्यत्वं ब्रह्मणोऽपि सम्भवति–इत्युक्तम्, तत्तुच्छम्; प्रागशुद्धिमतो हि शुद्धिराधेया। न च जीवापराधानुसारेण तेषु ब्रह्मणोऽप्रसादः कथमप्यशुद्धिशब्दमर्हति; तथा सति ब्रह्मणो नित्यशुद्धत्वश्रुतीनां सङ्कुचितार्थत्वप्रसङ्गात्, लोकेऽप्यपराधानुगुण्येन भृत्यादिषु राजादीनामुचितस्याप्रसादस्याशुद्धितशब्देन व्यवहाराभावाच्च। तस्मात्पुच्छब्रह्मवादोक्तयुक्तीनां निराकरणमनुपपन्नम्। इति पुच्छब्रह्मवादसिद्धान्तः।।

(१) यस्त्वानन्दमयब्रह्मवादे युक्तिषट्कोपन्यासः, तत्रावयवानतिरेको निगमनश्लोकानां पुच्छवत्परत्वनियमश्च प्रागेव निराकृतः।।

(२) यत्तु ''तस्माद् वा एतस्मादि''ति शैल्या आनन्दमये परिसमापनात् स एव ब्रह्मेत्युक्तम्, तदप्ययुक्तम्; यथा ''श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदि''त्यात्मजिज्ञासया उपसेदुषे नारदाय नामादिषूत्तरोत्तरमर्थान्तरोपदेशे ''अस्ति भगवो नाम्नो भूय'' इति ''वाग्वाव नाम्नो भूयसी''त्यादिप्रश्नप्रतिवचनाभ्यामेवेति शैल्याः प्राण एव समापनेऽपि विनैव तादृशे प्रश्नप्रतिवचने प्रवृत्तस्य ''एष तु वा अतिवदति यस्सत्येनातिवदती''त्यादेः तु-शब्दश्रुत्या ''आत्मत एष प्राण'' इति ततः प्राणोत्पत्तिलिङ्गेन च प्राणादर्थान्तरोपदेशपरत्वमिति तत्रैवात्मोपदेशपर्यवसानमभ्युपगम्यते, न तु प्राचीने प्राणे, एवमिहापि पूर्वोपन्यस्तप्रमाणैः प्रधानतयाऽवगते पुच्छब्रह्मण्येवोपक्रान्तोपदेशपर्यवसानस्याभ्युपगन्तुं युक्तत्वात्।।

ननु–भूमविद्यायां प्राणोपदेशे नामादिष्वनुक्तस्यातिवादित्वस्योक्त्या तत्पर्यन्त एवात्मोपदेश इति मत्वा शिष्ये भूयः प्रश्नमकुर्वति स्वयमेवाचार्यस्ततोऽर्थान्तरं सत्यमुपचिक्षेपेति श्लिष्यते, इह तूत्तरात्मोपदेशे दृष्टायाः "तस्माद् वे"त्यादिशैल्या ब्रह्मणि परित्यागे नास्ति कारणमिति–चेत्, मैवम्; अन्नमयादिपर्यायेष्विवानन्दमयपर्यायेऽपि क्वचिद्वस्तुनि प्रयोक्तव्यस्य पुच्छपदस्य तदाधारे ब्रह्मणि प्रयोगे तदेवोपक्रान्तब्रह्मोपदेशात्मकं निष्पद्यत इति पर्यायान्तरानारम्भोपपत्तेः।।

(३) ननु–एवमपि सर्वान्तरत्वेनात्मत्वविवरणमुपक्रान्तमान्तरत्वेनात्मत्वेन चोपदिष्ट आनन्दमये पर्यवस्यतीति युक्तम्, न तु तथाऽनुपदिष्टे पुच्छब्रह्मणीति–चेत्, एवं तर्हि भूमविद्यायामपि "तरति शोकमात्मविदि"त्युपक्रान्तस्यात्मोपदेशस्य "अथात आत्मादेश" इत्याद्युपरिभाग एव पर्यवसानं स्यात्। यदि तु तुशब्दश्रुत्या प्राणविच्छेदावगमात् सत्योपदेश एवोपक्रान्त आत्मोपदेशः स्यादिति मतम्, तर्ह्युक्तप्रमाणैः पुच्छब्रह्मोपदेश एवानन्दमयादप्यान्तरस्यात्मन उपदेशः स्यादिति तुल्यम्; तस्य "स यश्चायं पुरुष" इति जीवान्तरत्वस्याग्रे स्फुटत्वात्। तस्मात् पुच्छब्रह्मणि "तस्माद् वा एतस्मादि"त्यादिरूपा पूर्वच्छाया नास्तीति नायं दोषः, किन्तु अमुख्यात्मप्रायपाठेनामुख्यत्वशङ्कावहत्वात् स एव दोषः।।

(४) यत्तु–आनन्दमय एव "सोऽकामयते"त्यादिसन्दर्भस्य पर्यवसानं युक्तम्, पुंलिङ्गानुरोधात्–इत्युक्तम्, तदप्ययुक्तम्; पुच्छब्रह्मण्यव्यवहितप्रकृतब्रह्मशब्दापेक्षया पुंलिङ्गानुपपत्तावपि व्यवहितप्रकृतात्मशब्दापेक्षया तदुपपत्तेः, "तस्य द्वादशशतं दक्षिणे"त्यत्राव्यवहितपरामर्शासम्भवे व्यवहितपरामर्शस्य दृष्टत्वात्, "तस्यैष एव शारीर आत्मे"त्यानन्दमयादपि संनिहितमात्मशब्दमपेक्ष्य पुंलिङ्गोपपपत्तेश्च। न च–तस्य सर्वपर्यायसाधारणत्वात् प्रधानप्रतिपाद्यपरत्वं नास्तीति–वाच्यम्; साधारण्येऽपि प्रधानपरत्वानपायात्, आनन्दमयशब्दस्यासाधारण्येऽप्याात्मगतकेवलयौगिकार्थोपस्थापकतया तद्विशेष्यपरस्यात्मशब्दस्यैव सर्वपर्यायसाधारणस्यानन्दमयवाक्येऽपि प्रधानोपस्थापकत्वाच्च।।

(५) यत्तु–भृगुवल्यामानन्दमयो ब्रह्मेति निर्णीतम्–इत्युक्तम्, तद् व्यधिकरणम्; तावता विप्रतिपन्नस्यानन्दमयशब्दस्य ब्रह्मपरत्वासिद्धेः। न हि "आकाश इति होवाचे"त्यत्राकाशशब्दस्य ब्रह्मपरत्वनिर्णयमात्रेण "य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते' इत्यत्रापि तस्य ब्रह्मपरत्वं सिध्यति; भृगुबल्याम्नात आनन्दमयोऽपि "एतमानन्दमयमात्मानमुपसंक्रामती "त्यानन्दवल्याम्नाता-नन्दमयश्रुतोपवसंक्रमितव्यत्वलिङ्गप्रत्यभिज्ञानेन तद्वदब्रह्मेत्येवाङ्गीकाराच्च, भृगुवल्याम्नातानन्दस्थान-साम्यादपि अन्नमयादिषु पञ्चस्वपि मयट्प्रत्ययसारूप्येनानन्दमयस्थानसाम्यस्यैव प्रबलतया ततोऽपि

भृगुवल्याम्नातानन्दमयस्याब्रह्मत्वस्यैव सिद्धेश्च। एतेन–भृगुवल्याम्नातानन्दमयेन सह विषयवाक्यश्रुतानन्दमयस्य स्थानसाम्येन ब्रह्मत्वसाधनमपि–निरस्तम्; प्रथमपर्यायाम्नातयोरन्नान्नमय-योरिव त्वया विकारिविकारभावस्यैवाभ्युपगन्तुं युक्तत्वात्।।

(६) यत्तु–आनन्दमयब्रह्मवादे सूत्रस्वारस्यमुक्तम्, तदपि न युक्तम्; पुच्छब्रह्मवाद एव सूत्राणां स्वारस्यस्य समर्थिततत्वात्। तस्मादानन्दमयो जीव एव, इति युक्तं पुच्छब्रह्मविपयतयाऽधिकरणोपवर्णनम्–इति न्यायरक्षामणिः।। इत्यानन्दमयाधिकरणम्*।।१९।।

इति प्रदीपः षष्ठमानन्दमयाधिकरणम् समाप्तम्

भामती

उत्तरसूत्रसन्दर्भमाक्षिपति *जन्माद्यस्य यत इत्यारभ्य इति*। ब्रह्म जिज्ञासितव्यमिति प्रतिज्ञातं, तच्च शास्त्रैकसमधिगम्यं, शास्त्रश्च सर्वज्ञे सर्वशक्तौ जगदुत्पत्तिस्थितिप्रलयकारणे ब्रह्मण्येव प्रमाणं न प्रधानादाविति न्यायतो व्युत्पादितम्। न चास्ति कश्चिद्वेदान्तभागो यस्तद्विपरीतमपि बोधयेदिति च गतिसामान्यादित्युक्तम्। तत् किमपरमवशिष्यते यदर्थमुत्तरसूत्रसन्दर्भस्यावतारः स्यादिति। *किमुत्थानमिति* किमाक्षेपे। समाधत्ते *उच्यते, द्विरूपं हि इति*। यद्यपि तत्त्वतो निरस्तसमस्तोपाधिरूपं ब्रह्म तथापि न तेन रूपेण शक्यमुपदेष्टुमित्युपहितेन रूपेणोपदेष्टव्यमिति। तत्र च क्वचिदुपाधिर्विवक्षितः। तदुपासनानि *कानिचिदभ्युदयार्थानि* मनोमात्रसाधनतयात्र पठितानि। *कानिचित् क्रममुत्क्रयर्थानि, कानिचित्कर्मसमृद्ध्यर्थानि*। क्वचित् पुनरुक्तोऽप्युपाधिरविवक्षितः, यथाऽत्रैवान्नमयादय आनन्दमयान्ताः पञ्च कोशाः। तदत्र कस्मिन्नुपाधिर्विवक्षितः कस्मिन्नेति नाद्यापि विवेचितम्। तथा गतिसामान्यमपि सिद्धवदुक्तं, न त्वद्यापि साधितमिति। तदर्थमुत्तरग्रनथसन्दर्भारम्भ इत्यर्थः। स्यादेतत्– परस्यात्मनस्तत्तदुपाधिभेदविशिष्टस्याप्यभेदात् कथमुपासनाभेदः कथञ्च फलभेद इत्यत आह *एक एव तु इति*। रूपाभेदेऽप्युपाधिभेदादुपहितभेदादुपासनाभेदस्तथा च फलभेद इत्यर्थः। *क्रतुः* सङ्कल्पः। ननु यद्येक आत्मा कूटस्थनित्यो निरतिशयः सर्वभूतेषु गूढः कथमेतस्मिन् भूताश्रये तारतम्यश्रुतय इत्यत आह *यद्यप्येक आत्मा इति*। यद्यपि निरतिशयमेकमेव रूपमात्मन ऐश्वर्य्य ज्ञानं चानन्दश्च, तथाप्यनाद्यविद्यातमः समावृत्तं तेषु तेषु प्राणभृद्भेदेषु क्वचिदसदिव क्वचित्सदिव क्वचिदत्यन्तापकृष्टमिव क्वचित्सत् क्वचित् प्रकर्षवेत् क्वचिदत्यन्तप्रकर्षवदिव भासते, तत् कस्य हेतोः? अविद्यातमसः प्रकर्षनिकर्षतारतम्यादिति। यथोत्तमप्रकाशः सविता दिङ्मण्डलमेकरूपेणैव प्रकाशेनापूरयन्नपि वर्षासु निकृष्टप्रकाश इव शरदि तु प्रकृष्टप्रकाश इव प्रथते, तथेदमपीति। अपेक्षितोपाधिसम्बन्धम उपास्यत्वेन, 'निरस्तोपाधिसम्बन्धं ज्ञेयत्वेन इति।

तत्र तावत्प्रथममेकदेशिमतेनाधिकरणमारचयति। *तैत्तिरीयकेऽन्नमयम्* इत्यादि।

गौणप्रवाहपातेऽपि युज्यते मुख्यमीक्षणम् मुख्यत्वे तूभयोस्तुल्ये प्रायदृष्टिर्विशेषिका।।

आनन्दमय इति हि विकारे प्राचुर्य्ये च मयटस्तुल्यं मुख्यार्थत्वमिति विकारार्थान्नमयादिपदप्रायपाठादानन्दमयपदमपि विकारार्थमेवेति युक्तम्। न च प्राणमयादिषु विकारार्थत्वायोगात् स्वार्थिको मयडिति युक्तम्। प्राणाद्युपाध्यवच्छिन्नो ह्यात्मा भवति प्राणादिविकारो घटाकाशमिव घटविकारः। न च सत्यर्थे स्वार्थिकत्वमुचितम्,

चतुष्कोशान्तरत्वेन न सर्वान्तरतोचिता।
प्रियादिभागी शारीरो जीवो न ब्रह्म युज्यते॥

न च सर्वान्तरतया ब्रह्मैवानन्दमयं न जीव इति साम्प्रतम्, नहीयं श्रुतिरानन्दमयस्य सर्वान्तरतां ब्रूतेऽति त्वन्नमयादिकोशचतुष्टयान्तरतामानन्दमयकोशस्य। न चास्मादन्यस्यान्तरस्याश्रवणादयमेव सर्वान्तर इति युक्तम्, यदपेक्षं यस्यान्तरत्वं श्रुतं तत्तस्मादेवान्तरं भवति। न हि देवदत्तो बलवानित्युक्ते सर्वान् सिंहशार्दूलादीनपि प्रति बलवान् प्रतियतेऽपि तु समानजातीयनरान्तरमपेक्ष्य। एवमानन्दमयोऽप्यन्नमयादिभ्योऽन्तरो न तु सर्वस्मात्। न च निष्कलस्य ब्रह्मणः प्रियाद्यवयवयोगः, नापि शारीरत्वं युज्यत इति संसार्य्येवानन्दमयः। तस्मादुपहितमेवात्रोपास्यत्वेन विवक्षितं, न तु ब्रह्मरूपं ज्ञेयत्वेनेति पूर्वः पक्षः। अपि च यदि प्राचुर्य्यार्थोऽपि मयड्, तथापि संसार्य्येवानन्दमयः, न तु ब्रह्म, आनन्दप्राचुर्य्यं हि तद्विपरीतदुःखलवसम्भवे भवति, न तु तदत्यन्तासम्भवे। न च परमात्मनो मानागपि दुःखलवसम्भवः, आनन्दैकरसत्वादित्याह *न च सशरीरस्य सतः इति*। अशरीरस्य पुनरप्रियसम्बन्धो मनागपि नास्तीति प्राचुर्यार्थोऽपि मयड् नोपपद्यत इत्यर्थः। उच्यते–आनन्दमयावयवस्य तावद् ब्रह्मणः पुच्छस्याङ्गतया न प्राधान्यम्, अपित्वङ्गिन आनन्दमयस्यैव ब्रह्मणः प्राधान्यम्। तथा च तदधिकारे पठितमभ्यस्यमानमानन्दपदं तद्बुद्धिमादधत् तस्यैवानन्दमयस्याभ्यास इति युक्तम्। ज्मोतिष्टोमाधिकारे वसन्ते वसन्ते ज्योतिषेति ज्योतिष्पदमिव ज्योतिष्टोमाभ्यासः कालविशेषविधिपरः। अपि च साक्षादानन्दमयात्माभ्यासः श्रूयते *एतमानन्दमयमात्मानमुपसंक्रामति इति*। पूर्वपक्षबीजमनुभाष्य दूषयति *यत्तूक्तमन्नमयादि इति*। न हि मुख्यारुन्धतीदर्शनं तत्तदमुख्यारुन्धतीदर्शनप्रायपठितमप्यमुख्यारुन्धतीदर्शनं भवति। तादर्थ्यात्पूर्वदर्शनानामन्त्यदर्शनानुगुण्यं न तु तद्विरोधितेति चेद, इहाप्यानन्दमयादान्तरस्यान्यस्याश्रवणात्। तस्य त्वन्नमयादिसर्वान्तरत्वश्रुतेस्तत्पर्यवसानात्तादर्थ्य तुल्यम्। प्रियाद्यवयवयोगशारीरत्वे च निगदव्याख्यातेन भाष्येण समाहिते। प्रियाद्यवयवयोगवद् दुःखलवयोगोऽपि परमात्मन औपाधिक उपपादितः। तथाऽऽनन्दमय इति प्राचुर्य्यार्थता मयट उपपादितेति॥१२–१४॥

अपि च मन्त्रब्राह्मणयोरुपेयोपायभूतयोः सम्प्रतिपत्तेर्ब्रह्मैवानन्दमयपदार्थः, मन्त्रे हि पुनः पुनरन्योऽन्तर आत्मेति पर ब्रह्मण्यान्तरत्वश्रवणात्तस्यैव चान्योऽन्तर आत्माऽऽनन्दमय इति ब्राह्मणे प्रत्यभिज्ञानात् परब्रह्मैवानन्दभयमित्याह सूत्रकारः *मान्त्रवर्णिकमेव च गीयते*। मान्त्रवर्णिकमेव परं ब्रह्म ब्राह्मणेऽप्यानन्दमय इति गीयते इति।।१५।।

अपि चानन्दमयं प्रकृत्य शरीराद्युत्पत्तेः प्राक् स्रष्टृत्वश्रवणाद् बहु स्यामिति च सृज्यमानानां स्रष्टुरानन्दमयादभेदश्रवणादानन्दमयः पर एवेत्याह सूत्रम् *नेतरोऽनुपपत्तेः*। नेतरो जीव आनन्दमय· तस्यानुपपत्तेरिति।।१६।।

भेदव्यपदशाच्च। रसः सारो ह्ययमानन्दमय आत्मा रसं ह्येवायं लब्ध्वाऽऽनन्दीभवतीति। सोऽयं जीवात्मनो लब्धृभाव आनन्दमयस्य च लभ्यता नाभेद उपपद्यते। तस्मादानन्दमयस्य जीवात्मनो भेदे परब्रह्मत्वं सिद्धं भवति। चोदयति *कथं तर्हि इति*। यदि लब्धा न लब्धव्यः, कथं तर्हि परमात्मनो वस्तुतोऽभिन्नेन जीवात्मना परमात्मा लभ्यत इत्यर्थः। परिहरति *बाढं तथापि इति*। सत्यं परमार्थतोऽभेदेऽप्यविद्यारोपितं भेदमुपाश्रित्य लब्धृलब्धत्र्यभाव उपपद्यते। जीवो ह्यविद्यया परब्रह्मणो भिन्नो दर्शितः, न तु जीवादपि। तथा चानन्दमयश्चेज्जीवो न जीवस्याविद्ययापि स्वतो भेदो दर्शित इति न च लब्धृलब्धत्र्यभाव इत्यर्थः। भेदाभेदौ च न जीवपरब्रह्मणोरित्युक्तमधस्तात्। स्यादेतत्–यथा परमेश्वरादभिन्नो जीवात्मा द्रष्टा न भवत्येवं जीवात्मनोऽपि द्रष्टुर्न भिन्नः परमेश्वर इति जीवस्यानिर्वाच्यत्वे परमेश्वरोऽप्यनिर्वाच्यः स्यात् तथा च न वस्तु सन्नित्यत आह *परमेश्वरस्त्वविद्याकल्पिताद् इति*। रजतं हि समारोपितं न शुक्तितो भिद्यते। नहि तद्भेदेनाभेदेन वा शक्यं निर्वक्तुं, शुक्तिस्तु परमार्थसती निर्वचनीयानिर्वचनीयाद्रजताद्भिद्यत एव। अत्रैव सरूपमात्रं दृष्टान्तमाह *यथा मायाविन इति*। एतदपरितोषेणात्यन्तसरूपं दृष्टान्तमाह *यथा वा घटाकाशाद इति*। शेषमतिरोहितार्थम्।।१७–१९।।

इति भामती षष्ठमानन्दमयाधिकरणम् समाप्तम्।

श्रीकण्ठभाष्य

इह ब्रह्मलक्षणस्य जगत्कारणत्वस्य शास्त्रेकसमधिगम्यस्य तान्त्रिके प्रधानेऽतिव्याप्तिमाशङ्क्य चेतनत्वादिहेतुना यथा तस्मिन्नतिव्याप्तिर्न भवति तथा निरूपितम्। अचेतने प्रधाने इव चेतनेऽपि जीवे तन्नातिव्याप्तमिति वक्तुमधिकरणान्तरमारभ्यते-

।।सू०।। आनन्दमयोऽभ्यासात्।।१३।।

'तस्माद्वा एतस्मादात्मन आकाशस्संभूतः' (तै० २-१, ५.) इत्यारभ्य 'तस्माद्वा एतस्माद्विज्ञानमयात्, अन्योऽन्तर आत्माऽऽनन्दमयः'(२-१,५), इति कश्चिदाकाशादि-सकलभूतकारणत्वेन अन्नमयादिकोशकञ्चुकान्तरनिगूढ आत्मा आनन्दमय इति आनन्दवल्ल्यामाम्नायते।। अन्नान्दमय आत्मा जीवो वा? परमेश्वरो वा? इति सन्देहः।। जीव इति पूर्वः पक्षः, तद्धर्माणामत्रोपलम्भात्। तथाहि-'पृथिव्या ओषधयः, ओषधीभ्योऽन्नम्, अन्नात्पुरुषः' (तै० २-१) इत्यादिना पञ्चावयवं शरीरादिकं निरूप्यते। अत्र 'अन्नमयः' इति शिरीरमुच्यते। 'प्राणमयः' इति तदन्तर्वर्ती प्राणः। 'मनोमयः' इति तदन्तर्वर्ति मनः। 'विज्ञानमयः' इति तदन्तर्वर्तिनी बुद्धिः। 'आनन्दमयः' इति सर्वेषामन्नमयादीनामाश्रयो जीव एव। अन्नादीनां शिरः प्रभृतिकल्पना समुपासनार्था। अन्नादीनां ब्रह्मत्वेनोपासनात् तत्तदन्नादिसमृद्धिः फलमुक्तम्। कथमस्य संसारसागरदुःखमग्नस्य जीवस्यानन्दमयत्वाभिधानमिति चेत्-न, अत्रानन्दशब्देन परं ब्रह्मोच्यते 'आनन्दो ब्रह्म' (तै० ३-६) इति श्रवणात्। मयट्शब्दस्य विकारार्थत्वात् तत्कार्यश्रूतो जीव एव आनन्दमय इत्युच्यते। नित्यसंपन्नशिवत्वस्य ब्रह्मणः आनन्दमयत्वाङ्गीकारे 'अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया मे शुद्ध्यन्ताम्' (महाना० ५७) इति शुद्धिप्रार्थना व्यर्था स्यात्। अतोऽयमानन्दमय आत्मा जीव एव न परमेश्वरः।। इति प्राप्ते ब्रूमः-आनन्दमयोऽयमात्मा परमेश्वर इति। कुतः? अस्यानन्दस्य निरतिशयत्वेनाभ्यासात्। कथमभ्यस्यते? 'सैषाऽऽनन्दस्य मीमांसा भवति' (तै० २-८) इत्यारभ्य मानुषविशेषादिप्रजापतिपर्यन्तं तत्तदानन्दस्योपर्युपरि शतगुणमतिशयमभिधाय 'स एको ब्रह्मण आनन्दः' (तै० २-८) इति ब्रह्मानन्दो निरतिशयशिरस्कत्वेनाभ्यस्यते। तदेतन्निरतिशयानन्द-भाजनत्वमस्य संसारिणो न संभवति।। यदुक्तं आनन्दमयस्येश्वरत्वे नित्यशुद्धस्य तस्य

कथं विशुद्धिप्रार्थनेति। तत्रेदमुत्तरम् यथा प्रकृष्टप्रकाशस्य चन्द्रस्य तिरोधायकघनापगम एव प्रसादः तथा तस्य नित्यशुद्धस्य तिरोधानमलापनयनमेव शुद्धिः। तस्मादानन्दमयः परमेश्वर एव।। नन्वानन्द एव ब्रह्मेत्युच्यते, तद्विकार आनन्दमयः, मयटो विकारार्थत्वात्। आनन्दमयस्येश्वरत्वाभ्युपगमे ब्रह्मणोऽनय ईश्वर इति प्राप्नोति। तथा सति तस्य विकाररूपत्वादनित्यत्वं चेत्याशङ्कायामाह-

।।सू०।। विकारशब्दान्नेति चेन्न प्राचुर्यात्।।१४।।

अन्नमयादीनां यथाऽन्नादिविकाररूपत्वं तथाऽऽनन्दमयः इत्यानन्दविकारः। यथा मृद्विकारो हि मृण्मयो घटादिः। अतः परमेश्वरस्य विकारत्वासंभवात् अयं जीव एवेति चेत् न, मयट्शब्दस्यात्र प्राचुर्यार्थत्वात्। अन्नमयप्राणमयमनोमयपर्यन्तमेव मयट् विकारार्थः। विज्ञानमयो विज्ञानप्रचुरो जीवः। आनन्दमयोऽप्यानन्दप्रचुरः परमेश्वरः सर्वथा विकारप्रकरणपठितत्वात् विकारार्थ एव समुचितो मयट्छब्दस्येत्याशङ्क्याह-

तद्धेतुव्यपेदशाच्च।।१५।।

'एष ह्येवानन्दयाति' इति जीवान्प्रत्यानन्दहेतुतया आनन्दमयश्श्रूयते। स्वयं प्रचुरानन्दो हि परानानन्दयति। अतः परमेश्वर एवानन्दमयः।। आनन्दप्रचुरः परमेश्वरः आनन्दमय इत्युक्तेऽपि ब्रह्मणोऽन्य एवायमिति गम्यते, 'ब्रह्म पुच्छं प्रतिष्ठा' इति ब्रह्माधारत्वेनास्यावगमात्। परमेश्वरादन्यत्वाङ्गीकारे ब्रह्मणोऽस्वातन्त्र्यात् जगत्कारणत्वाद्यसंभवः। अतो जीवपक्ष एव समीचीन इत्यत आह-

मान्त्रवर्णिकमेव च गीयते।।१६।।

यत् 'सत्यं ज्ञानमनन्तं ब्रह्म' इति मन्त्रवर्णोदितं ब्रह्म तदेव 'अन्योऽन्तर आत्माऽऽनन्दमयः' इति आनन्दप्रचुरतया आनन्दमय इति गीयते। 'ब्रह्म पुच्छं प्रतिष्ठा' इति ब्रह्मशब्दः प्रणववाचकः, तस्य परमेश्वरवाचकत्वादाधारत्वम्।। अत्र केचिदाहुः -परमाकाशरूपः प्रकृत्यात्मा आनन्दमय इति श्रूयते न विश्वाधिकं निमित्तं परं ब्रह्म यत् 'सत्यं ज्ञानमनन्तं ब्रह्म इत्युच्यते। 'तस्माद्वा एतस्मादात्मन आकाशस्संभूतः' इत्याकाशादिप्रपञ्चप्रकृतित्वेन श्रुत आनन्दमयः परमाकाशः। परमाकाशरूपत्वमस्य 'यदेष आकाश आनन्दो न स्यात्' इत्यतोऽवगम्यते। 'ब्रह्म पुच्छं प्रतिष्ठां इति ब्रह्म आनन्दाकाशस्याधारत्वेनागम्यते अतएव क एको ब्रह्मण आनन्दः इति ब्रह्माश्रितत्वेनावगम्यते। पुरनेष एव 'आनन्दो ब्रह्मेति व्यजानात्, आनन्दाद्ध्येव स्वल्विमानि भूतानि जायन्त' इत्यादिना सकलभूतप्रकृतित्वेन अभिधीयते। तत्र 'आनन्दो ब्रह्म' इत्यानन्दस्य ब्रह्मत्वव्यापदेशस्तु ब्रह्मधर्मत्वेन तमदभेदात् 'सैषा भार्गवी वारुणी विद्या, परमे व्योमन् प्रतिष्ठिता' इति ब्रह्मधर्मस्वरूपे परमानन्दरूपे प्रपञ्चप्रकृतौ परमशक्तिपर्याये चिदात्मनि परमे व्योम्नि वारुणी विद्या समाप्तेत्युच्यते। ततो ब्रह्मध

र्मस्वभाव: प्रकृत्यात्मा परमाकाशरूपा परमशक्ति: आनन्दमय इत्युच्यते। तद्धर्मित्वेन प्रतिष्ठेयुच्यते परं ब्रह्म। विज्ञा नमयश्च तदुपासको जीव:। प्रतिष्ठाभूताद्धर्मिण: ब्रह्मण: धर्मश्रूतस्यानन्दमयस्य शत्तयात्मन: भेदादर्शनादानन्दमय आत्मा ब्रह्मेत्यभिप्रायेण 'आनन्द मयोऽभ्यासा'दिति सूत्रकारेण सूत्रितमिति।।

'तत्प्रतिष्ठे' त्युच्यते। तदश्रेदादानन्दमयस्य ब्रह्मत्वव्यपदेश इति। सर्वथानन्दमय: परमेश्वर इति सिद्धम्।। इत्यानन्दमयाधिकरणम्।।६।।

अथ इतरानुपपत्त्यधिकरणम्।।७।।

ब्रह्मण: परमशिवस्य समन्वयसिद्धं जगत्कारणत्वादिकं लक्षणं प्रधानजीवयोर्न व्यभिचरतीति स्थापितम्। अत: परं कथं जीवसमश्टिरूपस्य हिरण्यगर्भस्य जगत्कारणत्वादिकं श्रूयत इत्यत आह-

।सू०।। नेतरोऽनुपपत्ते:।।१७।।

'यत: प्रसूता जगत: प्रसूती तोयेन जीवान्व्यससर्ज भूम्याम्। यदोषधीभि: पुरुषान्पशूंश्च विवेश भूतानि चराचराणि' इति महोपनिषदि श्रूयतेऽस्य विषय:। अत्र सकलजगत्प्रसूत्यादिहेतुत्वेन श्रूयमाण: पुरुष: परमेश्वरो वाऽन्यो वेति संशय:। हिरण्यगर्भ इति पूर्व: पक्ष:। कथम्। ताल्लङ्गात्। 'एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मक:। भोगिशय्यायुत: शेते त्रैलोक्यग्रासबृंहित:।।' इति पुराणवचनात् ब्रह्मण: समुद्रशायित्वमवगम्यते। तदिह श्रूयते तल्लिङ्गं 'यमन्तस्समुद्रे कवयो वयन्ती' ति। 'प्रजापतिश्चरति गर्भे अन्त' रिति स एवोपक्रमे सर्वानुप्रविष्टतयाऽवगम्यते। उपसंहारे च 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चे' त्यादिना तस्यैव कारणत्वमवगम्यते। तस्मादुपक्रमोपसंहारसिद्धस्य हिरण्यगर्भस्यावान्तरसिद्धधर्मोपपत्ति:। किं च तत्प्रतिपादनप्रदेशान्तरोपसंहारश्च कृत:। 'अभ्द्यस्सम्भूतो हिरण्यगर्भ इत्यष्टा' विति। 'अभ्द्यस्सम्भ्रूत' इत्यत्र प्रजापतिरेव हि प्रतिपाद्य:। 'प्रजापतिश्चरति गर्भे अन्त' रिति दर्शनात्। 'हिरण्यगर्भस्समवर्तताग्रे' इत्यत्रापि 'प्रजापतिर्वै हिरण्यगर्भ:' इति श्रवणात्। ततो हिरण्यगर्भ एव जगत्प्रसूतिहेतुत्वादिनाऽत्र प्रतिपाद्यत इति प्राप्ते ब्रूम:। परमेश्वरादितरो भिन्नो हिरण्यगर्भोऽत्र न प्रतिपाद्य:। जगत्प्रसूतिहेतुत्वादीनां परमेश्वरधर्माणां तस्मिन्ननुपपत्ते:। 'यत: प्रसूता जगत: प्रसूती' त्यारभ्य जगत्प्रसूतिहेतोस्तस्य 'अत: परं नान्यदणीयसं हि परात्परं यन्महतो महान्तम्। यदेकमव्यक्तमनन्तररूपं विश्वं पुराणं तमस: परस्तात्।' इत्यादिना सर्वोत्कृष्टत्वं तमस: प्रकृतिमण्डलात्परत्वं चावगम्यते। तदण्डान्तर्वर्तिनो हिरण्यगर्भस्य न सम्भवति। किंच 'य एनं विदुरमृतास्ते भवन्ती' त्यस्य ज्ञानादमृतत्वं मुक्तिरभिधीयते। तत्र हरण्यगर्भे सम्भवति। परमेश्वरस्य

हि मुक्तिहेतुत्वम्साधारणं लिङ्गम्। 'यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः। तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यती' ति श्रवणात्। यदुक्तमोपसंहारसिद्ध इति तदप्रयोजकम्। अनुपपत्त्या प्रजापतिधातृशब्दौ हिरण्यगर्भ विहाय प्रजानां पशूनां पतिं जगद्धारकं परमेश्वरमेव' प्रतिपादयतः। अभ्द्यस्सम्भूतो हिरण्यगर्भ्रइत्युभयत्रापि परमेश्वर एव प्रतिपाद्यः। 'य ईशे अस्य द्विपदश्चतुपदः' 'आदित्यवर्णं तमसः परस्ता' दिति विश्वेश्वरत्वविश्वातीतित्वलिङ्गात्। ततो जगत्कारणत्वादिना प्रजापतिशब्दवाच्यः परमेश्वरो न हिरण्यगर्भः॥

परमेश्वरेण हिरण्यगर्भस्याभेदाज्जगत्कारणत्वमस्त्वित्याशङ्क्याह–

॥सू॥ भेदव्यपदेशाच्च॥१८॥

अस्यां महोपनिषदि परमेश्वरहिरण्यगर्भयोः भेदो व्यपदिश्यते कारणत्वेनकार्यत्वेन च 'यो देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिः। हिरण्यगंर्भ पश्यत जायमानम्' (महाना.१२.) इति। अतो हिरण्यगर्भादेः सर्वप्रपञ्चस्य कारणत्वमीश्वरस्येति सिद्धम्॥

पुनराशङ्क्याह–

॥सू॥ कामाच्च नानुमानापेक्षा॥१९॥

'प्रजापतिरकामयत प्रजास्सृजेयेति' (तै.सं. ३-१-१) इति सर्वत्र श्रुतिषु संकल्पो हिरण्यगर्भस्य जगत्सृष्टौ श्रूयते। तथाऽपि तस्य जगत्कारणत्वे अनुमानापेक्षा युक्तयपेक्षा नास्ति, तस्य कामस्यावान्तरसृष्टिविषयत्वात्। परमेश्वरस्यैव हिरण्यगर्भात्मना अवान्तरसृष्टिश्चेति वक्ष्यति-'संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्' (ब्र.सू. २-४-२०) इति॥

'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि, (छा. ६-३) इति हिरण्यगर्भरूपेणात्मना प्रपञ्चानुप्रविष्टस्य परमेश्वरस्य नामरूपकर्तृत्वश्रवणात् अनेयोरभेद एवाभ्युपेय इत्यत आह-

इति श्रीकण्ठभाष्यम् षष्ठमानन्दमयाधिकरणम् समाप्तम्।

शिवार्कमणिदीपिका

पूर्वाधिकरणे सद्विद्यावलम्बनप्रधानकारणत्वशङ्कानिराकरणेन प्रधाने ब्रह्मलक्षणस्यातिव्याप्तिर्निरस्ता। तथैवानन्दवल्लयवलम्बनजीवकारणत्वशङ्कानिराकरणेन जीवे तस्यातिव्याप्तिरिह निरस्यत इति दृष्टान्तसङ्गत्योत्तराधिकरणमवतारयति-**इहेति**।।सू।। **आनन्दमयोभ्यासात्॥१३॥** : तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मनन्दमय' इत्यानन्दमय आम्नायते। तस्य जीवत्वेऽपि न तत्र ब्रह्मलक्षणस्यातिव्याप्तिः। तस्मिन्कारणत्वाश्रयणात्' आत्मन आकाश' इत्यादिना प्राग्वर्णितस्य कारणत्वस्यान्नमयादिषु पर्यवसानासम्भवादुत्तरोत्तरमात्मान्तर-प्रतिपादनात् तत्र तत्र तदपर्यवसाने आनन्दमयप्रतिपादनानन्तरमपि 'ब्रह्म पुच्छं प्रतिष्ठे'ति ततोऽन्यस्य तत्प्रतिष्ठारूपस्य ब्रह्मणः प्रतिपादनेन तत्रापि तत्पर्यवसानायोगादित्याशङ्कानिराकरणार्थे पूर्वपक्षसिद्धान्तसाधारणमानन्दमये प्राग्वर्णितकारणत्वपर्यवसानं दर्शयितुं 'तस्माद्वा एतस्मादात्मन' इत्यादि 'निगूढ़ आत्मे' त्यन्तम्। तत्रायमाशयः। उपक्रमे तावदाकाशादिसर्व-प्रपंचकारणत्वेनात्मोपन्यस्तः। तन्निर्धारणार्थे 'स वा एष पुरुषोऽन्नरसमय, इत्यादि। तत्र न तावत्स आत्मान्नमय इति युक्तम्। अन्नमयस्याकाशादिक्रमेण तत्सृष्टान्नविकारार्थत्वप्रतिपादनात् 'तस्माद्वा एतस्मादन्नरसमयात्। अन्योऽन्तर आत्मा प्राणमयः' इति तदाभ्यन्तरात्मान्तरवर्णनाच्च। अत एव न प्राणमयो मनोमयो विज्ञानमयो वा। तत्तदाभ्यन्तरात्मान्तरवर्णनादेव। अतस्स्थूलारुन्धतीन्यायेनान्नमयादिषु तत्तट्बुद्ध्यवतारणक्रमेण आनन्दमये तट्बुद्धिं प्रतिष्ठापयितुमन्नमयादिविज्ञानमयान्तकोशचतुष्टयवर्णनमिति तन्निगूढः आनन्दमयस्सर्वप्रपञ्च-कारणभूतः आत्मेति युक्तम्। न च तदनन्तरं :ब्रह्म पुच्छं प्रतिष्ठे' ति ब्रह्मनिर्देशात् तस्याप्यतिलङ्घनमाशङ्कनीयम्। ब्रह्मण्यात्मशब्दश्रवणात् आत्मनिर्धारणपर्यवसान्स्यात्मश्रुतिविषय एवोचितत्वात्। ननु, 'ब्रह्म पुच्छं प्रतिष्ठे' त्येतदन्तरं, 'तस्यैष एवं शरीर आत्मा यः पूर्वस्ये'ति वाक्येन पूर्वस्य विज्ञानमयस्य तस्य चानन्दमयस्य चैक आत्मा प्रतिपाद्यते। स आत्मा प्रकृतं ब्रह्मैव पर्यवस्यतीति तस्यात्मश्रुतिविषयत्वमसिद्धम। न च तत्र षष्ठ्योस्सामानाधिकरण्येन तस्य पूर्वस्य

विज्ञानमयस्यैष एवात्मा य एष आनन्दमय इति तदर्थोऽस्त्विति वाच्यम्। यच्छब्दयुक्तावान्तरवाक्यान्तरगतस्य पूर्वस्येति पदस्य वाक्यान्तरान्वयकल्पनाया व्युत्पत्तिनिरुद्धत्वात्। स्यादेतत्। पूर्वस्य विज्ञानमयस्य आनन्दमयातिरिक्तः कश्चिदात्मा न प्रसिद्धः। :यः पूर्वस्ये'ति यमनूद्य तस्यानन्दमयं प्रत्यात्मत्वं विधीयेत। अतः प्रतीयमानार्थानुपपत्तेः व्यवहितान्वयः कल्प्यत इति चेन्न। 'तस्यैष एवं शारीर आत्माः यः पूर्वस्ये'ति हि प्राणमयादिपर्यायचतुष्टयेऽपि श्रूयते। तत्र प्राणामयपर्याये 'यः' पूर्वस्ये'त्यस्य योऽन्नमयस्यात्मेत्यर्थः। स चान्नमयस्यात्म प्रसिद्ध एव । तथाहि-यद्यपि 'स वा एष पुरुषोऽन्नरसमय- इति वाक्येन कारणवाक्यगततदेतच्छब्दोपादानवता अन्नरसमयः पुरुषः कारणवाक्यप्रतिपन्न आत्मैवेत्युक्तः। तथाप्याकाशादिक्रमेण तत्सृष्टान्नरसप्रभवस्य पुरुषस्य ताद्रूप्यमयुक्तम्। तच्छरीरतवात्। स्थूलारुन्धतीन्यायेन स एवेति व्यपदिश्यते। वस्तुतोऽन्नमयस्यात्मैव स कारणभूतात्मेति प्रथममेवावगम्यते। अतस्तस्य प्राणमयपर्यायगतवाक्ये 'यः पूर्वस्ये'त्यनुवादः सङ्घटते। तेन वाक्येन तस्य प्राणमयं प्रत्यात्मत्वे विहिते मनोमयपर्याये तदनुवादस्सम्भवति। एवं पूर्वपूर्वपर्यायोपात्तं प्रत्यात्मत्वेन विहितं तमनूद्योत्तरोत्तरपर्यायोपात्तं प्रत्यात्मविधौ न काचिदयुक्ति रित्यानन्दमयपर्यायगततद्वाक्यपर्यालोचनया तस्यानन्दमयादपि व्यतिरेकसिद्धौ तत्प्रतिष्ठाभूतब्रह्मरूपतयैव पर्यवसानं स्यात्। एवमर्थवर्णन एव पञ्चानामप्यन्नम-यादीनामेक एवं सर्वान्तरस्सर्वप्रतिष्ठाभूत आत्मा न तु पूर्वपूर्वस्योत्तरोत्तर इति प्रतिपादनेन 'तस्यैष एवे' तिवाक्यानामर्थवत्ता भवेत्। पूर्वपूर्वस्योत्तरोत्तर आत्मेत्यर्थवर्णने तु तस्यार्थस्य ' तस्माद्वा एतस्मा' दिति तत्तत्पर्यायप्रारम्भवाक्यैरेवावगतेस्तेषां वैयर्थ्यमेव स्यादिति चेत् उच्यते। यद्यपि प्राणमयादिपर्यायत्रयेऽपि तस्य वाक्यस्यात्मान्तरविधौ तात्पर्य तथाप्यानन्द मयपर्याये तस्यात्मेश्वरवचनस्येश्वरान्तरनिरास इव तन्निरासे तात्पर्यम्। कुत एवं कल्प्यत इति चेत् आत्मान्तरविवक्षायां 'तस्माद्वा एतस्मादन्योऽन्तर आत्मे'ति तत्प्रतिपादनप्रारम्भस्य प्राणमयादिपर्यायचतुष्टयेऽपि दर्शनात्। इह 'तस्माद्वा एतस्मादानन्दमयादन्योऽन्तर आत्मा ब्रह्मे' त्येवंरूपप्रारम्भादर्शनाञ्चानन्दमय एवाकाशादिकारणभूत आत्मेति श्रुतितात्पर्यावसायादेवं कल्प्यते। ननु, भूमविद्यायामात्मजिज्ञासयोपसेदुषे नारदाय नामादिषूत्तरोत्तरमर्थान्तरोपदेशे 'अस्ति भगवो नाम्नो भूय इति वाग्वाव नाम्नो भूयसी' त्यादिप्रश्नप्रतिवचनाभ्यामेवेति शैल्याः प्राणे समापनेऽपि विनैव तादृशे प्रश्नप्रतिवचने 'एष तु वा अतिवदति यस्सत्येनादिवदती' त्यादिना तदनन्तरं प्रतिपाद्यमाने सत्ये प्राणमुल्लङ्घ्यात्मोपदेशपर्यवसानमभ्युपगम्यते। इहापि तथा स्यादिति चेत् विषमो दृष्टान्तः। भूमविद्यायां प्राणोपदेशे नामादिष्वनुक्तस्यातिवादित्वस्योक्तया तत्पर्यन्त एवात्मोपदेश इति भ्रान्त्या शिष्ये भूयः प्रश्नमकुर्वति स्वयमेवाचार्यः ततोऽर्थान्तरं सत्यमुपचिक्षेपेति शिलष्यते। इह तूत्तरोत्तरात्मोपदेशे दृष्टायाः

शिष्यप्रश्नं विना स्वयमेव प्रवर्तितायाः 'तस्माद्वा' इत्यादिशैल्या नास्ति ब्रह्मणि परित्यागे किञ्चित्कारणम्। न तु 'तस्यैष एवे' त्यादिवाक्यस्य पर्यायचतुष्टयेऽप्यर्थैकरूप्यलाभः तत्र कारणं स्यादिति चेन्न। चरमप्रवृत्तभङ्गीभङ्गभिया प्रथमप्रवृत्तभङ्गीभङ्गायोगात्। तस्मादानन्दमय एव सर्वकारणभूत आत्मेति तस्मिन्नानन्दमये श्रुतस्यात्मशब्दस्य जीवब्रह्मसाधारण्यात् संशयमाह-**अत्रेति**। नन्वात्मशब्दः साधारणोऽपि 'ब्रह्मविदाप्नोति पर'मिति ब्रह्मोपक्रमात्तद्विषयो भवति। न हि जीवस्य ब्रह्मशब्दार्हतास्ति। परिच्छिन्नत्वात्। न वा तद्विदः परप्राप्तिरस्ति। 'तन्निष्ठ मोक्षोपदेशा'दिति (ब्र०-१-१-७) सूत्रे तन्निषेधात्। न च 'सत्यं ज्ञानमनन्त' मिति लक्षणं तत्रान्वेति। उच्यते। ब्रह्मणः तद्विदो जीवस्य चोपक्रमोऽस्ति तयोरात्मशब्देन कस्य परामर्शो युक्त इत्यनवधारणात्संशयः। जीव इति पूर्वपक्ष इति। तत्रात्मशब्देन ब्रह्मविद एव परामर्शो युक्तः। विभक्तयैकरूप्यात्। 'प्रजापतिर्वरुणायाश्वमनयत्स स्वां देवतामार्छ' दित्यत्र 'स' इत्यनेनेव प्रजापतेः। न च 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति मन्त्रे ब्रह्मापि प्रथमान्तनिर्दिष्टमिति वाच्यम्। 'यो वेदे'ति विदेः कर्मसमर्पकत्वेन ब्रह्मशब्दस्य द्वितीयान्तत्वात्। न चानन्दमयवाक्यगत आत्मशब्दः 'तस्माद्वा एतस्मादात्मन' इति कारणवाक्यगतात्मशब्दोपात्तविषयः तत्र नास्ति विभिक्तयैकरूप्यमिति वाच्यम्। तत्र 'तस्मा' दित्यनेन प्रकृतपरामर्शसिद्धा 'वेतस्मा' दित्यस्य प्रकृतयोर्ब्रह्मजीवयोर्मध्ये कस्य परामर्शः कार्य इत्याकाङ्क्षायां लोकप्रसिद्धस्य जीवस्येति ज्ञापनार्थतया तत्राप्यात्मशब्दस्य जीवपरत्वात्। एवं च सर्गाद्यकाले शरीररहितस्य जीवस्य सङ्कल्पासम्भवात् स्रष्टृत्वं न युज्यत इत्यपि शङ्का नावकाशं लभते। ब्रह्मविद्यया ब्रह्म प्राप्तस्य 'अभावं बादरि' (ब्र०. ४-४-१०-सू) रित्यधिकरणन्यायेन अशरीरस्यापि सङ्कल्पसम्भवादिति भावः। नन्वसिद्धोऽत्र जीवधर्मोपलम्भः। न चान्नमयादयस्तद्धर्माः तेषां पक्षित्वेनोत्तरोत्तरमभ्यन्तरत्वेन च वर्णितानामप्रसिद्धतया जीवधर्मत्वेन ब्रह्मधर्मत्वेन वा निर्धारणासम्भवादित्याशङ्क्य तेषां जीवधर्मत्वमुपपादयति-**तथा हीति**। अन्नमयस्तावत् शरीरमेव। 'अन्नात्पुरुष' इत्यदनीयविकारत्वोक्तेः। न च छान्दोग्यसृष्टिप्रकरण इवात्रान्नशब्दः पृथ्वीवाचकः। इहान्नस्य पृथिवीनिष्पन्नौषधिप्रभवत्ववचनेनौदनादिरूपत्वावगमात्। एवं च प्राणमयः प्राणवायुरेव। शरीरान्तर्वर्तित्वलिङ्गात्। तथा मनोमयविज्ञानमयौ मनोबुद्धी। उत्तरोत्तरं सूक्ष्मत्वेन तयोस्तदभ्यन्तरत्वव्यपदेशार्हत्वात्। प्राणमयादिष्वपि **मयटो** विकारोऽर्थः१। व्यष्टिप्राणमनोबुद्धीनां समष्टिप्राणादिविकारत्वात् शरीरादीनां शिरःपक्षद्वयपुच्छमध्यावयवत्वं काल्पनिकं मुखचन्द्रादिवद्रूपकमात्रसिद्धम्। तत्कल्पना तूपासनार्थेति भावः। अत्र पञ्चावयवमिति शरीरादिविशेषणस्य प्रत्येकं शिरःपक्षद्वयमध्यभागपुच्छयुक्तमित्यर्थः। आत्मा देहस्य मध्यभागः। 'मध्यंह्येषामङ्गानामात्मे'तिश्रुतेः। अनेनानन्दमयस्य जीवत्वे प्रियादियोगो हेत्वन्तरत्वेन सूचितः।

तत्रेष्टवस्तुदर्शनतल्लाभतदुपयोगप्रयुक्ताः सुखविशेषाः प्रियमोदप्रमोदाः। यावत्तृप्तिविषयभोगानन्तरं निवृत्ते विषयसम्पर्के तृप्तिरूपतयाऽनुवर्तमानं सुखमानन्दः। तेषामानन्दमयं प्रति शिरस्त्वादिना निरूप्यमाणानां तत्सम्बद्धः कश्चित्सम्बन्धो वक्तव्यः। तेषां च जीवेन भोक्तृभोक्तव्यसंबन्धः प्रसिद्धतरः। न च प्रसिद्धसम्बन्धग्रहणस्थलेऽप्यप्रसिद्धस्य तस्य ग्रहणं कार्यमिति। नन्वन्नमयाद्या न शरीरप्राणमनोबुद्धयः किंतु परब्रह्मण एव शरीरादिकोशान्तर्गताः स्थूलसूक्ष्मादिप्रकाराः रूपभेदाः। अन्नमयादिपर्यायेषु 'येऽन्नं ब्रह्मोपासते ये प्राणं ब्रह्मोपासते' 'आनन्दं ब्रह्मणो विद्वान्' 'विज्ञानं ब्रह्म चेद्वेदे'ति ब्रह्मशब्दाम्नानात्। तस्मादानन्दमयस्य शरीरादिजीवधर्मसम्बन्धोऽसिद्ध इत्याशङ्क्याह-**अन्नादीनामिति।** प्राणमयादिपर्यायेषु अन्योऽन्तर आत्मे'ति भेदव्यपदेशात् ब्रह्मानेकत्वाभावादन्नमयादयः शरीरादिकोशा एव। 'एतेषु ब्रह्मशब्दस्त्वन्नसमृध्द्यादिफलकब्रह्मदृष्टिविधानार्थः। विध्युपास्तिक्रियान्वयादिति भावः। नन्वन्नमयाद्युपासनानामन्नसमृद्ध्यादिः फलमुक्तं नानन्दमयोपासनस्य। अतस्तदुपासनस्य 'ब्रह्मविदाप्नोति पर' मित्यनेनैव फलमुक्तमिति श्रुत्यभिप्रायावगमात् वेद्यत्वेनोपक्रान्तं ब्रह्म आनन्दमय एवेति अवसीयते। न च ब्रह्मण्यन्नमयादिशब्दोक्तशरीरादिसम्बन्धानुपपत्तिः। न ह्यत्र शरीरादीनामानन्दमयेनोपकरणोपकरणिभावसम्बन्ध उक्तः। किं तु बाह्याभ्यन्तरभावसम्बन्धः। स तु जीवेनेव हृदयस्थितेन ब्रह्मणापि सम्भवति। अत एव स्थूलारुन्धतीन्यायादन्नमयादिक्रमेण बुद्ध्यवतारणमपि ब्रह्मणि सम्भवति। अन्यथा भृगुवल्लयां का गतिः। तत्र हि 'यतो वा इवामानि भूतानि जायन्त' इति जगज्जन्मादिकारणं ब्रह्म प्रस्तुत्य 'अन्नं ब्रह्मेति व्यजाना' दित्यादिना अन्नप्राणमनोविज्ञानेषु ब्रह्मबुध्द्यवतारणक्रमेण आनन्दे ब्रह्मबुद्धिः प्रतिष्ठापिता। न च तत्राप्यानन्दो जीव इति वक्तुं शक्यम्। 'अधीहि भगवो ब्रह्मेति'। 'तद्विजिज्ञासस्व'। 'तद्ब्रह्मेति'। 'आनन्दो ब्रह्मेतिव्यजाना' दित्यादिमध्यान्तपरामर्शेनान्नादिषु ब्रह्मबुद्ध्यवतारणेन तस्य ब्रह्मत्वावधारणात्। स्यादेतत्। भृगुवल्लयामन्नादिषु मयट्प्रत्ययाभावादाधिदैविकसमष्टिशरीरप्राणमनोविज्ञानेषु ब्रह्मशरीरत्वेन प्रसिद्धेषु ब्रह्मबुद्ध्यवतारणक्रमेणानन्दं ब्रह्मबुद्धिः प्रतिष्ठापितेति युक्तमानन्दस्य ब्रह्मत्वम्। इह तु मयट्प्रत्ययश्रवणात् आधिदैविकशरीरादिकार्येष्वाध्यात्मिकशरीरादिषु जीवशरीरत्वेन प्रसिद्धेषु जगत्कारणात्मबुद्ध्यवतारक्रमेण आनन्दमये तदुदि प्रतिष्ठापिता। अतोऽयमानन्दमयो जीव एवेति युक्तम्। अन्नमयादीनां भृगुवल्ल्युक्तान्नादिविकारत्ववदानन्दमयस्यापि तदुक्तानन्दविकारस्य स्थानप्रमाणबलात्प्रतीतेरिति। नैतद्युक्तम्। यतो नानन्दमये मयडिकारार्थः किं तु प्राचुर्यार्थः। अग्रे ''सैषानन्दस्य मीमांसे' त्यारभ्य प्रवृत्तया आनन्दमीमांसया 'यतो वाचो निवर्तन्त' इति श्लोकेन च निरतिशयत्वरूपतत्प्राचुर्याभिधानात्। इह मयटः प्राचुर्यार्थत्वे एव तत्प्राचुर्य कीदृश

मित्याकाङ्क्षोत्थानसम्भवेन तदभिधानस्याकाङ्क्षिताभिधानत्वेन सङ्गतिलाभात् श्रुत्यन्तरनिरीक्षणसापेक्षस्थानप्रमाणलभ्यार्थग्रहणात्प्राकरणिकवचनविशेषकैमर्थक्याकाङ्क्षापूरकार्थग्रहणस्य युक्ततरत्वात्। एवं च मयट्प्रत्ययस्य प्राचुर्यार्थत्वादानन्दमयशब्दो ब्रह्मणि सङ्गच्छते। प्रत्युत जीव एव न सङ्गच्छते। दु:खसागरनिमग्नेन तेन आनन्दकणिकाया अपि दुस्सम्पादकत्वात्। अत: शरीरादिपञ्चमपर्यायस्थत्वादपि भृगुवल्ल्युक्तानन्दवदानन्दमयोऽपि ब्रह्मैवेत्यभिप्रायेण शङ्कते-**कथमस्येति**। 'अत्रे' त्यादिपरिहारग्रन्थस्यायमभिप्राय:। आनन्दमयो ब्रह्मेति न युक्तम्। 'ब्रह्म पुच्छं प्रतिष्ठे' ति ततो भेदेन ब्रह्मण: प्रदर्शनात्। न च तत्र ब्रह्मशब्द: आनन्दमयपर एव, अन्नमयादिषु 'तस्येदमेव शिर:, अयं दक्षिण: पक्ष' इत्यादिना तत्तदवच्छिन्नेष्ववयवादिषु शिर:पक्षपुच्छादिकल्पनाप्रायपाठेन ब्रह्मानन्दमययोरभेदप्रतीतेरिति वाच्यम्। मनोमये पक्षशिर: पुच्छानामृक्सामयजुरथर्वाङ्गिरसां तद्भिन्नत्वेन तथा प्रायपाठासिद्धे:। अन्नमयादीनां शिर:पक्षादिष्ववयवावयविभावादेस्तस्येदमिति व्यतिरेकनिर्देशावलम्बनस्य सत्त्वादिहानन्दमयस्य ब्रह्मत्वे तदेव तस्य पुच्छमिति व्यतिरेकनिर्देशस्य कथञ्चिदप्यालम्बनासम्भवात्। न चात्र ब्रह्मशब्द: प्रणवादिविषय:। 'असन्नेव स भवति। असद्ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चद्वेद। सन्तमेनं ततो विदु'रित्यनन्तरश्लोके ब्रह्मणि सदसत्त्वज्ञानयोरिष्टानिष्टफलदर्शनेन तस्य परब्रह्मत्वावसायात्। लोकप्रसिद्धेषु प्रणवादिष्वसत्त्वज्ञानशङ्कानवकाशात्। न चायं श्लोक आनन्दमयविषय: अन्नमयादिपर्यायश्लोकानां पुच्छवद्विषयत्वेदर्शनेन तत्प्रायपाठादस्यापि पुच्छवद्विषयत्वावगमादिति वाच्यम्। ब्रह्मश्रुतिभ्यां पुच्छविषयत्वेनावधृतस्य श्लोकस्य प्रायपाठेन पुच्छवद्विषयत्वकल्पनायोगात्। 'यतो वाचो निवर्तन्ते। अप्राप्य मानसा सहे'ति मनोमयपर्यायश्लोकस्य पुच्छवद्विषयत्वाभावेन प्रायपाठासिद्धेश्च। 'मनसा सहे' तिश्रवणात्तत्रापि यथाकथञ्चित्पुच्छवद्विषयत्वमस्तीति चेत् यद्येतावता तव सन्तोषस्तर्हि जितमस्माभिरानन्दमयो जीवस्तस्य पुच्छत्वेन कल्पितं परं ब्रह्म पुच्छविषयौ श्लोकस्थब्रह्मशब्दौ। तत्र स इति पदं ब्रह्मसत्त्वासत्त्वज्ञानवद्द्विविधजीवपरामर्शीति सर्वसामञ्जस्येनास्मदभिमतसिद्धे। परं ब्रह्म तद्विकारलेशस्य जीवस्य कथं पुच्छमिति चेत्। यथा प्राणमयस्य पृथिवी पुच्छं तथेति सन्तुष्यतु भवान्। फलार्थदृष्टिविधानं यथाकथञ्चित्प्रवर्तते। एतेन पञ्चमपर्यायस्थत्वात् भृगुवल्ल्यानन्दवदानन्दमयो ब्रह्मेत्यनुमानं निरस्तम्। तस्य स्वप्रकरण एव स्पष्टं ब्रह्मभेदप्रतीतावप्रयोजकसामान्यतोदृष्टानुमानमात्रात्तस्य ब्रह्मत्वासिद्धे:। यथा विराट्सूत्रहिरण्यगर्भरूप-ब्रह्माहम्भावास्पदेषु समष्टिशरीरप्राणमनोबुद्धिषु बुद्ध्यवतारणक्रमेणोपदिष्ट आनन्दो ब्रह्म। एवं व्यष्टिजीवाहम्भावास्पदेषु व्यष्टिशरीरादिषु बुद्ध्यवतारणक्रमेणोपदिष्ट आनन्दमयो जीव इति दृष्टान्तेनैव सिद्धेश्च। अत एव व्यष्टिशरीरादीनां जीवधर्मत्वमपि

तदहम्भावविषयत्वरूपसम्बन्धविशेषकृतमुपपद्यते। एवमानन्दमयस्य जीवत्वे तदुपासनाफलं प्रक्रान्तब्रह्मविद्याफलादन्यद्वक्तव्यं स्यादिति चेत् नायं नियमः। भूमविद्यायां 'तरति शोकमात्मवि'दिति प्रक्रान्तात्मविद्याफलादन्यानि फलानि नामाद्याशान्तोपासनेषूक्त्वा प्राणोपासने तदनुक्तिदर्शनात् तत्रानुक्तं फलमुपासनानुगुणं कल्प्यं चेत् इहापि तथास्तु। यत्त्वानन्दमये मयट्प्राचुर्यार्थ इति तन्न। अन्नमयादिषु मयटो विकारार्थप्रायपाठानुसारेण आनन्दमयशब्दस्य जीवपरत्वनिश्चायकप्रमाणानुसारेण चात्र मयटो विकारार्थत्वात् पाश्चात्यमानन्दमीमांसादिकं तु 'ब्रह्मविदाप्नोति पर' मित्युपक्रान्तब्रह्मविद्याफलरूपमुक्तानुभाव्यब्रह्मानन्दोत्कर्षविषयं भविष्यति। अत एव तत्र ब्रह्मानन्दस्य 'स एको ब्रह्मण आनन्दः' 'श्रोत्रियस्य चाकामहतस्ये'ति अकामहतश्रोत्रियसाधारण्यम् 'आनन्दं ब्रह्मणो विद्वा'निति मुक्तभोग्यत्वं च श्रूयते। नन्वानन्दमीमांसादेः प्राप्यब्रह्मानन्दोत्कर्षविषयत्वे तदुपपादकतया जगत्स्रष्टत्ववर्णनस्यापि तद्विषयत्वं युक्तम्। आनन्दोत्कर्षस्यैश्वर्योत्कर्षप्रयुक्तौचित्यात् ब्रह्मानन्दोत्कर्षवर्णने प्रथमावधिभूतस्य मानुषानन्दस्य 'तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्। स एको मानुष आनन्द' इत्यैश्वर्यविशेषप्रयुक्ततयोपक्रमेणोत्तरोत्तरमानन्दोत्कर्षस्याप्यैश्वर्योत्कर्ष-प्रयुक्तत्वावसायाञ्च। सत्यं ब्रह्मणः स्रष्टत्ववर्णनादपि उपासनाराधिततत्प्रसादलब्धसामर्थ्यस्य सष्ट्रत्ववर्णने ततोऽप्यधिकमैश्वर्यं सिद्ध्यति यथा प्रतर्दनविद्यायां 'त्रिशीर्षाणं त्वाष्ट्रमहन' मित्यादिना ब्रह्मविद इन्द्रस्य सामर्थ्यातिशयवर्णने तत्प्रदातुर्ब्रह्मणस्ततोऽधिकमैश्वर्यं सिध्यति। तस्मान्निरतिशयानन्द- रूपपरब्रह्मविकारो जीवो जगत्कारणभूतः आनन्दमय इति युक्तम्। ननु, ज्ञानविकासरूपावस्थाविशेषविशिष्टस्य जीवस्येव जगत्सृष्टिसङ्कल्परूपावस्थाविशेषविशिष्टस्य ब्रह्मणोऽपि ब्रह्मविकारत्वं सम्भवतीति चेत् सत्यं तथाप्यत्र मयटो भृगुवल्ल्युक्तानन्दविकारार्थत्वसिद्धौ तस्यानन्दस्य 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त' इति वाक्येन कारणावस्थ ब्रह्मरूपत्वावगमात्। कारणावस्थब्रह्मणश्च 'तपसा चीयते ब्रह्म ततोऽन्नमभिजायते' इति श्रुत्यन्तरेण जगत्सृष्टिसङ्कल्परूपावस्थाविशिष्टत्वावगमात् तस्यैव तद्विकारत्वं न सम्भवतीति। इदं तु चिन्त्यते। आनन्दशब्दाद्विकारार्थे मयट् कुतो लभ्यते। विकारावयवयोरर्थयोस्तद्विधायका 'नित्यं वृद्धशरादिभ्य' इति (पा०-४-३-१४४) सूत्रत इति चेन्न। तत्र 'मयडैवेतयोर्भाषायामभक्ष्याच्छादनयो'रिति (पा०-४-३-१४३) पूर्वसूत्रान्मयडादीनामिव भाषायामित्यस्याप्यनुवृत्तेः। कुतस्तर्हि 'शरमयं बर्हिर्भवति' 'दर्भमयं वासो भवती' त्यादिश्रुतिषु मयट्प्रत्ययः। 'यस्य पर्णमयी जुहूर्भवती' त्यादिश्रुताविव 'व्द्यचश्छन्दसी' (४-३-१५०) ति सूत्रान्तरतः। तद्धि सूत्रं छन्दस्याप्राप्तमयटो विधानार्थम्। यथाह तस्मिन्सूत्रे वृत्तिकारः। 'भाषायां मयडुक्तः छन्दस्यप्राप्तो विधीयत' इति। अत्रैवं

पूर्वपक्षिणोऽभिप्रायः। भाषायां विहितप्रत्ययः छन्दस्यपि क्वचिद्भवति यथा 'सख्यशिश्वीति भाषायामि'ति (पा०४-१-६२ सू.)ङीषन्तौ सख्यशिश्वीशब्दौ भाषायां निपातितौ। 'सखा सप्तपदा भवे'ति यजुश्शाखायामङीषन्तस्य सामशाखायां ङीषन्तपाठो दृश्यते 'सखी सप्तपदी भवे'ति। नन्वितिकरणस्तस्मिन्सूत्रे कृतः। स प्रकारे वर्तमानो भाषायामित्यनेनान्वितः ततोऽन्यत्र छन्दस्यपि क्वचित्तद्रूपं गमयेत्। भाषाग्रहणं तु भाषायां नित्यार्थं स्यात्। एवं तर्ह्यत्र सूत्रे नित्यग्रहणं कृतम्। तदनर्थकम्। पूर्वसूत्रेण सर्वप्रातिपदिकेभ्यो भाषायां विकल्पने विहितस्य मयटः पुनर्वृद्धशरादिष्वारम्भसामर्थ्यादेव तेभ्यो नित्यं प्राप्तेः। अतश्छन्दसि वृद्धशरादिभ्यो विकल्पेन तत्प्राप्त्यर्थं भविष्यति। ननु, वृत्तौ 'केचिदेकाचो नित्यं मयटमिच्छन्ति तद्विधानार्थं नित्यग्रहण' मित्युक्तम्। एवं तर्हि शरादिषु मृद्ग्रहणमनर्थकं स्यात्। 'शरदर्भमृत्कुटीतृणसोमबल्बजे'ति हि शरादिः। यदि मृद्ग्रहणमेकदेशोदाहरणमुखेन तत्प्रपञ्चनार्थं तर्हि ततोऽपि सिद्ध्यत् न तस्यैकान्तिकं प्रयोजनमिति छन्दसि विकल्पेन प्राप्तिस्तस्यैकान्तिकं प्रयोजनं भविष्यति। 'सर्वे विधयश्छन्दसि विकल्प्यन्त' इति वात्र विकारे मयट् भविष्यति। ननु, छन्दसि बह्वचो मयटि सम्प्रतिपन्ने हि विकारार्थे तन्निर्वाहाय कथञ्चिदेवं कल्पनीयम। तदेव न सम्प्रतिपन्नमिति चेन्न। अन्नमयप्राणमयमनोमयप्रायपाठेन विज्ञानमयानन्दमयययोर्मयटो भृगुवल्ल्युक्तविज्ञानानन्दविकारार्थस्य अङ्गीकर्तव्यत्वेन तदसम्प्रतिपत्त्ययोगात्। यद्वा 'तत आगत' इत्यधिकारे 'हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः' (पा०-४-३-८१) इत्यनुवृतौ 'मयट्चे'ति (पा०-४-३-८२) सूत्रेण हेतुवाचिभ्यः शब्देभ्यः तत आगत इत्यर्थे मयड्विहितः सोऽत्र भविष्यति। तेनानन्दमय इत्यस्य आनन्दाद्धेतोरागत इत्यर्थे सति हेतोस्सकाशादागमनस्य तत उत्पत्तिरूपत्वादानन्दविकारत्वं लभ्यत इति नित्यसम्पन्नेति शुद्धिवाक्यस्यैतत्प्रकरणगतत्वाभावेऽप्यन्नमयादिक्रमेण कीर्तनात् शुद्धिप्रार्थनाविषयोऽप्ययमेवानन्दमयोऽवसीयत इति भावः। पूर्वपक्षमुपसंहरन् सिद्धान्तं प्रतिजानीते-**अत इति**। पूर्वाधिकरणे 'नाशब्द' मिति साध्यान्तरनिर्देशादनपेक्षितोऽपि प्रथमसूत्रादनुवृत्तो ब्रह्मशब्द इतःप्रभृति साध्यापेक्षावशान्मण्डूकप्लुत्याऽनुवर्तत इति तदनुवृत्तिलब्धसाध्यं दर्शयति-**परमेश्वर इति**। नन्वभ्यासः शतगुणत्वेनानन्दावृत्तिः सा गन्धर्वादिष्वपि सती नानन्दमयस्य ब्रह्मत्वप्रसाधनीत्यत आह-**निरतिशयत्वेनेति**। 'स एको ब्रह्मण आनन्द' इत्याद्यनन्तरं 'तदप्येष श्लोको भवती'ति स्वोक्तार्थविषयत्वेनावतारिते 'यतो वाचो निवर्तन्त' इति श्लोके ब्रह्मानन्दस्य निरतिशयत्वप्रतिपादनात् 'ते ये शतं प्रजापतेरानन्दा' इत्यत्र शतशब्दः सङ्ख्यावि शेषपरो न भवतीति किं त्वानन्त्यपर इति भावः। सूत्रे निरतिशयत्वविशेषणाद्यभावेऽप्यभ्यासस्यानन्दविषयत्वं तन्निरतिशयत्ववैशिष्टयमपि तस्य हेतूकरणसामर्थ्याल्लभ्यते। नन्वानन्दमयप्रतिष्ठात्वेन निर्दिष्टस्य ब्रह्मणोऽयमानन्दाभ्यासः न

त्वानन्दमयस्येत्याशङ्क्याह-**अस्येति।** अस्यानन्दमयस्य य आनन्दः स तस्येति व्यधिकरणे षष्ठ्यौ। अयमाशयः। शिरःपक्षपुच्छादियुक्तानन्दमयनिरूपणानन्तरं 'सोऽकामयते' त्यादिना कामनापूर्वकस्त्रष्टत्वादिकमुक्त्वा 'रसो वै सः। रसँ ह्येवायं लब्ध्वानन्दी भवती'ति यस्यानन्दरूपस्यानुभव एव जीवस्य पुरुषार्थत्वेनोक्तस्तस्य निरतिशयानन्दस्तदनन्तरप्रवृत्तेन 'सैषानन्दस्य मीमांसे'त्यादिना वर्ण्यत इत्याकाङ्क्षायोग्यतासन्निधिभिर्निर्विवादमवसीयते। स त्ववयव्यानन्दमय एव न पुच्छं ब्रह्म। पुल्लिङ्गनिर्देशात्। अतोऽयमानन्दाभ्यास आनन्दमयविषयोऽवसीयत इति। शुद्धिप्रार्थनालिङ्गमनूद्य परिहरति **यदुक्तमित्यादिना।** ततश्च घनमलिनश्चन्द्रश्शुद्धो भवत्विति प्रार्थना स्वदृष्टितिरोधायकघनापगमविषयत्वेनेव आनन्दमयशुद्धिप्रार्थना स्वचिच्छक्तितिरोधायकमलापगमविषयत्वेन पर्यवस्यतीति भावः। उत्तरसूत्रमवतारयितुं मयटो विकारार्थत्वशङ्कामुद्भावयति-**नन्विति।** नन्वस्तु भृगुवल्ल्युक्तानन्द-रूपब्रह्मविकारः परमेश्वर इत्याशङ्क्य तथा सति परमेश्वरस्याविकारनित्यसिद्धजगत्कारणत्व-लक्षितब्रह्मरूपता त्वदभिमता न सिद्ध्येदित्याह-**आनन्दमयस्येति।**।सू।। **विकारशब्दान्नेति चेन्न प्राचुर्यात्**।।१४।। 'अन्नमयादीना'मित्यादिना विकारप्रायपाठोऽपि पूर्वपक्षावलम्बनतया सौत्रशङ्काभिप्रायविषयत्वेन दर्शितः। प्राचुर्यादिति सौत्रहेतोः प्राचुर्यार्थत्वादित्यर्थमभिप्रेत्य साध्याहारं व्याचष्टे-**मयट्छब्दस्येति।** ननु, भृगुवलृयुक्तानन्दरूपविकारतौचित्यं विकारार्थमयट्प्रायपाठं चातिलङ्घ्य कुतः प्राचुर्यार्थत्वमवसीयत इत्याशङ्क्याह-**अन्नमयेति।** अयमाशयः। अन्नमयस्तावदन्नविकारः 'अन्नात्पुरुष' इत्यनुपदमुक्तेः तत्प्रायपाठानुसारेण प्राणमयमनोमययोरेव मयड्विकारार्थः। न तु विज्ञानमये। तत्र 'व्यचच्छन्दसी' ति सूत्राप्रवृत्तेः। नच तत्रापि तेन सूत्रेण **ज्ञानशब्दान्मयटि सत्युपसर्गस्य ज्ञानमयशब्देन प्रादिसमासः कल्पनीयः।** अग्रे 'विज्ञानं देवास्सर्वे। ब्रह्म ज्येष्ठमुपासत' इत्यादिदर्शनेन तत्रोपसर्गस्य ज्ञानान्वयावगमात् ज्ञाने ज्ञानस्वभावकृतस्पष्टास्पष्टत्वा-ल्पाधिकविषयत्वरूपविशेषवत् ज्ञानविकारे तत्स्वभावकृतविशेषस्याप्रसिद्धत्वेन विशेषार्थत्वेऽपि तस्य ज्ञानान्वयस्यैवोचितत्वाञ्च। न च विज्ञानशब्दादेवं विकारार्थो मयट् सम्भवतीति शङ्कात्र प्रवर्तते। 'नित्यं वृद्धशरादिभ्य' इति (पा०-४-३-१४४.) सूत्रविहितस्य मयटो विकल्पेन छन्दसि प्राप्त्यङ्गीकारेऽपि वृद्धत्वशरादित्वरहिते विज्ञानशब्दे तदप्रवृत्तेः। 'सर्वे विधयश्छन्दसि विकल्प्यन्त' इति मयटोऽत्र विकारोऽर्थ इत्यपि न युक्तम्। बलवत्प्रमाणनिर्णीतार्थनिर्वाहप्रयोजनं विना स्वाभिमतार्थपरिग्रहलोभेन छान्दसतया व्याकरणप्रसिद्धनियमत्यागे व्याकरणादिना वेदार्थनिर्णयलोपप्रसङ्गात्। न च हेतोर्मयट्प्रत्ययेन विकारार्थनिर्वाहः। यः पूर्वोत्पन्न एव स्वहेतुभूतान्मातापितृजन्मभूम्यादेः स्रुघ्नमधुरादेरिवापादानादागतस्तत्र 'हेतुमनुष्येभ्य' इति

(पा०-४-३-८१) सूत्रेण मयट्प्रत्ययविधानात् 'तत आगत' इति (पा०४-३-७४) सूत्रस्थागतशब्दस्य मुख्यागमनपरत्वसम्भवे मुख्यजन्मादिगौणसाधारणावगमनपरत्वकल्पनायोगात् क्वचिद्रौणागमनवत्यागताधिकारविहितप्रत्ययान्तप्रयोगदर्शनेऽपि तस्यौपचारिकत्वकल्पनासम्भवात्। ननु, मुख्यागमनमात्रविवक्षायां 'तत आगत' इत्यर्थनिर्देशकसूत्रे श्रुता पञ्चम्यत्रानुवृत्ताप्यपादापञ्चमी स्यात्। तथा च हेतुवाचिनो मनुष्यवाचिनश्च शब्दात्ततो हेतोर्मनुष्याच्चापादानादागतइत्यर्थे रूप्यमयटोर्विधानं भवेत्। तथा सत्यत्र हेतुवाचिशब्दात् पञ्चमीप्राप्त्यभावशङ्का निरवकाशा स्यात्। सा च शङ्कोद्भाव्य समाहिता न्यासपदमञ्जर्योः। तथाहि-न्यासें तावत्समादागतं समरूप्यमिति प्रत्त्युदाहरणं समाद्धेतोरागतमित्यर्थ इति व्याख्याय केन पुनरिह पञ्चमीति पञ्चमी प्राप्त्यभावशङ्कामुद्भाव्य समाहितम्। अस्मादेव ज्ञापकात् यदयं पञ्चम्यन्ताद्धेतोः प्रत्ययमाह ततो ज्ञायते हेतोः पञ्चमी भवतीति। पदमञ्जर्यामपि तथैवोदाहरणं व्याख्यायात्र तृतीया प्राप्नोतीति तृतीयाप्राप्त्युपन्यासमुखेन हेतौ पञ्चमीप्राप्त्यभावमाशङ्क्य 'ज्ञापकात्सिद्ध' मित्यादिना न्यासोक्तं समाधानमुपन्यस्य 'नैतदस्ति ज्ञापकं यत्र 'विभाषा गुण' इति (पा०-२-३-२५. सू) पञ्चमी तदर्थमेतत्स्यात्। जाड्यादागत' इति तद्दूषयित्वा स्वयं समाहितम्। तस्मा 'द्विभाषा गुण' इत्यत्र 'विभाषे'ति योगविभागात् अगुणवचनादपि क्वचित्पञ्चमी भवती'ति। अतो हेतुसमभिव्याहारादागत इत्यस्यानुवृत्तस्य जातइत्यर्थोऽङ्गीकृत इति शङ्कासमाधानाभ्यामुन्नीयत इति चेत्सत्यमस्थान एव ते शङ्कासमाधाने। यतो वृत्तिकारेण 'तत आगत' इति (पा०-४-३-७४) सूत्रे तत इत्यस्यापादानपञ्चमीत्वं सिद्धं कृत्वा तत्रापि मुख्यं यदपादानं विवक्षितं तद्गृह्यते इत्युक्तम्। 'तत इति मुख्यं यदपादानं विवक्षितं तद्गृह्यते नतु नान्तरीयकं स्रुघ्नादागच्छन् वृक्षमूलादागत' इति। न्यासपदमञ्जर्योश्च तद्वाक्यं तथैव व्याख्यातम्। तस्य हेतुमनुष्यसूत्रेऽनुवृत्तस्य मनुष्यविषय इव हेतुविषयेऽप्यपादानपञ्चम्यन्तत्वमेव भवतीति क इह पञ्चमीविषयशङ्कासमाधानयोः प्रसङ्गः। तस्मादन्नमयप्राणमयमनोमयेष्वेव मयड्विकारार्थो न विज्ञानमय इति। तत्र तर्हि मयटः कोऽर्थः कश्च विज्ञानमय इत्याकाङ्क्षायामाह-**विज्ञानमय इति**। अत्रेदं चिन्त्यते। विज्ञानप्रचुर इत्यर्थः कुतो लभ्यते। 'तत्प्रकृतवचने मयडि'ति (पा०-५-४-२१) सूत्रत इति चेत्। इदं सूत्रमित्थं वृत्तिकारादिभिर्व्याख्यातम्। तदिति प्रथमासमर्थात् प्राचुर्येण प्रस्तुतमिदमित्यर्थे वर्तमानात् स्वार्थे मयट् प्रत्ययो भवतीत्येकोऽर्थः। अस्या'न्नमयं यवागूमयी' त्याद्युदाहरणम्। प्राचुर्येण प्रस्तुतमन्नं प्राचुर्येण प्रस्तुता यवागूरित्यादिस्तदर्थः। यद्यपि प्रकृतशब्दः प्रस्तुतमात्रवाची न तु प्राचुर्यविशिष्टप्रस्तुतवाची। तथापि 'प्रकृत' इत्येतावति वक्तव्ये वचनग्रहणादयं विशेषो लभ्यते। वचनग्रहणं हि लोके यादृशस्य प्रकृतस्य मयटा वचनं प्रत्यायनं प्रसिद्धं तत्र यथा स्यादित्येवमर्थम्। लोके च मयडन्तैरन्नमयादिशब्दैः प्राचुर्येण प्रकृतस्य प्रत्यायनं प्रसिद्धमिति। अपरस्त्वर्थः। प्रकृतं

प्रस्तुतमुच्यतयेऽस्मिन्निति प्रकृतवचनं तदिति प्रथमासमर्थात्प्रकृतवचनेऽर्थे मयट् प्रत्ययो भवतीति। अस्यान्नमयो यज्ञ इत्याद्युदाहरणम्। प्रकृतमन्नमस्मिन्यज्ञ इत्यादिस्तदर्थः। अस्मिन्नर्थे प्रकृत्यर्थादर्थान्तरे प्रत्ययः। प्रकृतशब्देन च प्रस्तुतमात्रमुच्यते न तु प्राचुर्यविशिष्टमिति पूर्वस्मादर्थाद्विशेष इति। एवं सति 'विज्ञानमय' इत्यत्राद्यार्थे मयट्परिग्रहे प्रचुरविज्ञानस्वरूपत्वं जीवस्य लभ्यते न तु प्रचुरविज्ञानवत्त्वम्। न च तद्युक्तम्। ज्ञानरूपेऽप्येकस्मिन्परिच्छिन्ने स्वमात्रप्रकाशरूपे जीवे कथमपि प्राचुर्यस्योपपादयितुमशक्यत्वात्। प्रकृतं विज्ञानमस्मिन् जीव इति द्वितीयार्थपरिग्रहेऽपि विज्ञानवत्त्वमात्रं लभ्यते। प्रचुरविज्ञानवत्त्वं न लभ्यते। तस्माद्विज्ञानमयो विज्ञानप्रचुरो जीवइत्येतदनुपपन्नम्। एतेनानन्दमयोऽप्यानन्दप्रचुरः परमेश्वर इत्येतदपि व्याख्यातम्। अर्थद्वयेऽपि ह्या'नन्दं ब्रह्मणोविद्वा' निति वर्णयिष्यमाणप्रचुरानन्दमयत्वं न सिद्ध यतीति। तत्रायमभिप्रायः। अर्थद्वयपरिग्रहेऽपि प्रचुरविज्ञानवत्त्वं प्रचुरानन्दवत्त्वं च पर्यवसानवृत्त्या सिद्ध्यत्येव। आद्यार्थपरिग्रहे 'तद्गुणसारत्वा' (ब्र० २/३/२९सू०) दिति न्यायेन 'विज्ञानं ब्रह्म' 'आनन्दोब्रह्मे' त्यादाविवाभेदोपचाराश्रयणात् द्वितीयार्थपरिग्रहे सूत्रार्थत्वेन प्राचुर्यालाभेऽपि 'कारस्करोवृक्ष' इति निपातेन वृक्षविशेषवत्प्राचुर्यरूपविशेषस्य लोकप्रयोगतो लाभात्। लोकाः ख'ल्वन्नमयो यज्ञो घृतमयं भोजन' मित्याद्यन्नादिप्राचुर्ये सत्येव प्रयुञ्जत इति न्यासकृता तु द्वितीयार्थे प्रकृतशब्देन च प्रस्तुतमात्रमुच्यते नतु प्राचुर्यविशिष्टं प्रकृतमित्येव विशेष इत्युक्तवतापि हि प्रथमार्थकथने लोके च मयट्प्रत्ययान्तैरन्नमयादिशब्दैः प्रकृतस्य प्राचुर्यमुच्यत इति मयडन्तस्य प्राचुर्यविशिष्टेऽर्थे लोकप्रसिद्धिरुदाहृता। न च तद्वाक्यमन्नमयं वर्तत इत्यादि प्रथमार्थे क्रोडीकृतप्रयोगमात्रविषयमिति शङ्कनीयम्। प्रसिद्धेः प्रयोगद्वयेऽप्यविशेषेण सङ्कोचकल्पनायोगादिति। एवं विज्ञानमयशब्दस्य प्राचुर्यार्थमयडन्तत्वे विकारार्थप्रायपाठरूपपूर्वपक्षहेत्वसिद्धिः। तेन तस्य जीवपरत्वसिद्ध्या विज्ञानमया 'दन्योऽन्तर आत्मे'ति निर्दिष्टस्यानन्दमयस्य परमेश्वरत्वसाधकजीवान्यात्मत्वरूपहेत्वन्तरसिद्धिश्च भवतीति प्रयोजनद्वयार्थत्वेन विज्ञानमयशब्दगतस्यापि मयटः प्राचुर्यार्थत्वं सूत्रेण विवक्षितमिति दर्शयितुं तस्यापि प्राचुर्यार्थत्वं तेन तस्य जीवपरत्वं च भाष्ये दर्शितम्। ननु, विज्ञानमयशब्दः स्वरूपार्थमयडन्ततया बुद्धिपर इति युक्तम्। अग्रे 'विज्ञानं देवास्सर्वे। ब्रह्म ज्येष्ठमुपासत' इत्यादिषु केवलविज्ञानपदप्रयोगदर्शनादिति चेन्न। 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योति'रिति श्रुत्यन्तरे जीवपरतया प्रसिद्धस्य तस्य प्रत्ययार्थवत्त्वाय प्राचुर्यार्थकल्पेननात्रापि विज्ञानवृत्तिप्रचुरत्वेन प्रवृत्तिनिमित्तेन जीवपरत्वस्यैवाङ्गीकर्तुमुचितत्वात्। तदनुसारेण 'विज्ञानं यज्ञं तनुते। कर्माणि तनुतेऽपिचे'ति श्रुतयज्ञादिकर्तृत्वलिङ्गानुसारेण चाग्रिमविज्ञानपदानामपि जीवस्य स्वप्रकाशज्ञानरूपतया तद्गुणसारत्वन्यायेन वा 'यो विज्ञाने तिष्ठन्नि'ति श्रुत्यन्तर इव जीपपरत्वोपपत्तेः। स्यादेतत्। आनन्दमये

मयटः प्राचुर्यार्थतया परमेश्वरपरत्वं न सम्भवति। आनन्दप्राचुर्यस्य प्रतियोगिदुःखाल्पत्वगर्भत्वात् प्राचुर्यस्य स्वधर्मिविशेषणत्वेन१ निर्देशे व्यधिकरणसमजातीयाल्पत्वस्य निरूपकत्वेऽपि तद्विना निर्देशे समानाधिकरणविजातीयाल्पत्वमेव निरूपकमिति हि व्युत्पत्तिसिद्धम्। अत एव 'प्रचुरब्राह्मणो ग्राम' इत्यत्र प्राचुर्यस्य ग्रामान्तरगतब्राह्मणाल्पत्वापेक्षत्वेऽपि ब्राह्मणप्रचुरो ग्रामः ब्राह्मणानां प्राचुर्यमिह ग्राम इत्यत्र तद्ग्रामगतशूद्राल्पत्वापेक्षमेव प्राचुर्यं प्रतीयते। एवमेव 'प्रभूतैधोदकयवसकुशमाल्योपनिष्क्रमणमार्यजनभूयिष्ठमनलसमृद्धं धार्मिकाधिष्ठितं निकेतमावसितुं यतेते'ति स्मृतौ प्रयोगो दृश्यते। अत्र हि यस्मिन्देशे देशान्तरापेक्षया एधोदकादिकं प्रचुरं यत्र च देशे शूद्राद्यपेक्षया त्रैवर्णिकाः प्रचुराः स देशो विवक्षितः। न च प्रचुरप्रकाशः सवितेतिवत्प्रकाशप्रचुरः सवितेति प्रयोगेऽपि नक्षत्रादिगतप्रकाशाल्पत्वापेक्षमेव प्राचुर्यं प्रतीयते न तु सवितृगततमोऽल्पत्वापेक्षं तत्र तमसो बाधितत्वादिति शङ्क्यम्। तत्रापि घनतुहिनसैंहिकेयाद्याच्छादनारोपिततमोऽल्पत्वमपेक्ष्य धनाद्यपसरणसमये तथा प्रयोगात्। तदभावे तथाव्युत्पन्नप्रयोगाभावात्। ननु, 'बलवत्तरश्चैत्र' इत्यादौ तरबाद्यर्थस्य प्राचुर्यस्य विशेष्यत्वेऽपि मैत्रादिगतबलाद्यल्पतापेक्षत्वं दृष्टमिति चेन्न तत्र 'द्विवचनविभज्योपपदे तरबीयसुनावि'ति (पा०५-३-५७.सू०) द्विवचनविभज्योपपदविशेषणवशादातिशायनिकप्रत्ययेषु व्युत्पत्त्यन्तरकल्पनेऽपि मयटि तत्कल्पकाभावेनौत्सर्गिकव्युत्पत्तिलंघनायोगात्। तल्लङ्घनेऽत्र विज्ञानमये मयटः प्राचुर्यार्थत्वं न सिध्येत्। जीवगतज्ञानानात्मकवृत्त्यन्तराल्पत्वापेक्षमेव हि तत्र ज्ञानप्राचुर्यं समर्थनीयम्। न तु जीवान्यगतज्ञानाल्पत्वापेक्षम्। जीवादन्यत्र परमेश्वरे ज्ञानाधिक्यात् अचेतने ज्ञानस्यैवाभावात्। तस्मादानन्दमयशब्दस्य परविषयत्वे जीवविषयत्वे वा तत्र मयटः प्राचुर्यार्थत्वस्योपपादयितुमशक्यत्वाद्विकारार्थ एव ग्राह्यः। विकारार्थमयटः प्रायपाठाद्विज्ञानमये क्वचिदसम्भवात्त्यागेऽपि मनोमयपर्यन्तमनुवृत्तस्य तस्य बुद्धिसन्निहितत्वात्। न च विज्ञानशब्दादिवानन्दशब्दाच्छन्दसि विकारे मयडसम्भवः। वृद्धत्वात्। 'नित्यं वृद्धशरादिभ्य' इति सूत्रे (पा० ४-३-१४४) नित्यग्रहणस्य छन्दसि विकल्पार्थतोपपादनसम्भवादित्यभिप्रायेण शङ्कामुद्भाव्य तदुत्तरत्वेनोत्तरसूत्रमवतारयति-**सर्वथेति।** आनन्दमयशब्दः परविषयो जीवविषयोऽन्यविषयो वास्तु सर्वेष्वपि पक्षेषु प्राचुर्यार्थत्वं न सम्भवतीत्यनन्यगत्या विकारार्थ एव ग्राह्य इत्यभिप्रायः **सर्वथाशब्दः।।सू०।। तद्धेतुव्यपदेशाच्च।।१५।। एष ह्येवेति।** अयमाशयः। आनन्दमये विकारप्राचुर्ययोः साधारणस्य मयटो वाक्यशेषप्रतिपन्नार्थो ग्राह्यः। 'एष ह्येवानन्दयाती'ति वाक्यशेषे च 'सोऽकामयते' त्यानन्दमयं प्रकृत्याम्नाते आनन्दमय एव जीवानानन्दयतीति श्रूयते। तस्य च यथा स्वयं धनपरिग्रहरहितोऽपि ऋषिरनुग्रहेणान्यान्धनवतः करोति तद्वदनुग्रहमात्रेणानन्दवतः करोतीति नार्थः।

किंतु स्वानन्दैकदेशैरानन्दवतः करोतीति। 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'ति श्रुत्यन्तरात्प्रागत्रापि 'रसो वै सः। रस ह्येवायं लब्ध्वानन्दी भवती'ति श्रवणाच्च। ननु, विषयविशेषसम्पर्केण जायमानैरानन्दैरानन्दवत्त्वेनानुभूयमानानां जीवानां कथं नित्यसिद्धब्रह्मानन्दैकदेशैरानन्दवत्त्वोक्तिरुपपद्यते। उच्यते। विषयविशेषसंपर्कादिकारणवशात् तारतम्येन चाभिव्यक्तो ब्रह्मानन्द एव जीवैरास्वाद्यते। स एव च मानुषानन्दप्रभृति उत्तरोत्तरशतगुणत्वेनाम्नायत इति भाष्यकार एव चतुर्थाध्याये 'भावे जाग्रद्व' दिति (ब्र॰. ४-४-१४) सूत्रे वक्ष्यति। तथा च वाक्यशेषे सर्वजीवापेक्षया प्रचुरानन्दशालित्वमानन्दमयस्य प्रतिपन्नमिति स एव मयडर्थो युक्तः। एवं च सति तत्र प्राचुर्यस्य समानाधिकरणविजातीयाल्पतापेक्षत्वशङ्कापि निरवकाशा। व्यधिकरणसजातीयाल्पत्वापेक्षस्यैव प्राचुर्यस्य वाक्यशेषप्रतिपन्नत्वात्। न च व्युत्पत्तिविरोधः। मयट्प्रयोगे हि 'प्रचुरब्राह्मणो ग्राम' इत्यत्रेव प्राचुर्यं स्वधर्मिणो विशेषणम्। 'तत्प्रकृतवचने मय'डिति व्याकरण (पा॰. ५-४-२१) सूत्रानुसारात्। तथा चानन्दमयशब्दस्य प्राचुर्येण प्रस्तुतः आनन्दोऽयमिति वा प्राचुर्येण प्रस्तुत आनन्दोऽस्मिन्निति वार्थः। न तु 'ब्राह्मणप्रचुरो ग्राम' इतिवदानन्दप्रचुरोऽयमित्यर्थः। एवं सति विज्ञानमये मयटः प्राचुर्यार्थत्वं न निर्वहतीति शङ्कावशिष्यते। तत्रेदमुत्तरम्। प्राचुर्यस्य स्वधर्मिविशेषणत्वे व्यधिकरणसजातीयाल्पत्वं निरूपकमिति न नियमः। किं तु तात्पर्यानुसारेण क्वचित्तन्निरूपकं क्वचित्समानाधिकरणविजातीयाल्पत्वमिति नियमः। अत एवैषां ग्रामाणां कतमस्मिन्ग्रामे ब्राह्मणाः प्रचुरा इति प्रश्न इवा स्मिन् ग्रामे के वर्णाः प्रचुरा इति प्रश्नेऽप्यस्मिन्ग्रामे ब्राह्मणाः प्रचुरा इत्येवोत्तरं दृश्यते। न च समासादिरूपायां वृत्तौ तथा नियमः। समासेऽपि कतम एषां ग्रामाणां प्रचुरब्राह्मण इति प्रश्न इवायं ग्रामं प्रचुरकिंवर्णः इति प्रश्नेऽप्ययं ग्रामः प्रचुरब्राह्मण इत्युत्तरदर्शनात्। एवं चोभयथा सम्भवे सति आनन्दमये वाक्यशेषाव्द्यधिकरणसजातीयाल्पत्वं निरूपकं विज्ञानमये तस्य बाधितत्वात्समानाधिकरणविजातीयाल्पत्वं निरूपकमिति व्यवस्थोपपत्तेर्न सङ्कटं किञ्चिदिति। सूत्रे चकारः 'आनन्दमयोऽभ्यासा'दिति प्रधानसाध्यसाधकत्वेनोपन्यस्तस्याभ्यासहेतोर्मयटः प्राचुर्यार्थत्वेऽपि साधकत्वं सम्भवतीति तत्समुच्चयार्थः। 'एष ह्येवानन्दयती'ति प्रकृतस्यानन्दमयस्यानन्दो मानुषादिप्रजापत्यन्तजीववर्गानन्दादुत्तरोत्तरशतगुणोत्कृष्टादत्युत्कृष्टत्वेन वर्णित इत्यभ्यासोऽपि प्राचुर्यस्य व्यधिकरणसजातीयाल्पत्वं निरूपकं समर्पयन्मयटः प्राचुर्यार्थत्वोपपादको भवति। यद्वा पूर्वोपन्यस्ताभ्याससमुच्चयस्य स्वयमेवोन्नेतुं शक्यत्वान्न तत्सुच्चयार्थश्चकारः किं तु 'सोऽकामयते'ति प्रकरणगतानुक्तहेत्वन्तरसमुच्चयार्थः। तस्मिन्प्रकरणे हि 'बहु स्यां प्रजायेये'ति बहुभवनसङ्कल्पः 'इदं सर्वमसृजत। यदिदं किंचे'ति जडजीवसाधारणसकलप्रपञ्चस्रष्टत्वं 'तत्सृष्ट्वा तदेवानुप्राविशत्' इत्यन्तर्यामितया

सकलप्रपञ्चानुप्रवेशः 'तदनुप्रविश्य। सच्च त्यच्चाभवत्। निरुक्तं चानिरुक्तं च। निलयनं चानिलयनं च। विज्ञानं चाविज्ञानंचे'ति सर्वान्तर्यामित्वेन सर्वशरीरकतया स्वसृष्टप्रत्यक्षपरोक्षसाधारणनाम-युक्ततद्रहिताधाराधेयचेतनाचेतनात्मकसकलप्रपञ्चभावेन बहुभवनं 'भीषास्माद्वातः पवते। भीषोदेति सूर्यः। भीषास्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चम' इति नियन्तृत्वेन प्रसिद्धदेवतोपलक्षितसकलाधिकारिकवर्गभयहेतुत्वं चेत्येतानि ब्रह्मलिङ्गानि प्रदर्श्यन्ते। एतानि यद्यप्यानन्दमयस्य ब्रह्मत्वे साक्षात्साधकानि न तु तदुपपादकस्य मयटः प्राचुर्यार्थत्वस्य साधकानि। तथा'प्येष ह्येवानन्दयाती'ति आनन्दहेतुत्वव्यपदेश'स्यैतस्यैवानन्दस्ये' त्यादिश्रुत्यन्तरानुसारेण तत्र साक्षात्साधकत्वमपि सम्भवतीति तेनैतेषां समुच्चयो नानुपपन्नः। अनेनैव सूत्रेण प्रियमोदादीनां ब्रह्मधर्मत्वानुपपत्तिरप्यर्थात्परिहृता। तेषामिह ब्रह्मानन्दाभिव्यक्तिविशेषरूपत्वसिद्धेः। एवं च सत्यानन्द आत्मेति निरूपणमपि प्रियमोदप्रमोदरूपवीचीतरङ्गपरम्परापरिवृत-महासमुद्रायमाणवक्ष्यमाणब्रह्मानन्दविषयतयोपपद्यत इति न तत्क्षुद्राव्यपदिष्टतृप्तिरूपानन्दविषयत्वेन योजनीयम्। प्रतिष्ठात्वेन निरूपिताद्ब्रह्मणोऽन्यत्वादानन्दमयो जीव इति शङ्कामनूद्य तदुत्तरत्वेनोत्तरसूत्रमवतारयति-**आनन्दप्रचुर इति।** ननु, नियन्तुः परमेश्वरादन्यदस्तु जगत्कारणं ब्रह्मेति मतान्तरमाशङ्क्य तथा सति स्वातन्त्र्यरहितस्य ब्रह्मणः केवलमुपादानत्वसम्भवेऽपि प्राग्व्यवस्थापितजगदुभयकारणत्वं न घटत इत्याह-**परमेश्वरादिति**।।सू०।। **मान्त्रवर्णिकमेव च गीयते**।।१६।। 'ब्रह्मविदाप्नोति पर'मिति ब्राह्मणस्य ब्रह्मविषयपरमोपक्रमत्वेऽपि तत्र ब्रह्मविदोऽप्युपक्रान्तत्वात्'तस्माद्वा एतस्मादि'ति कारणवाक्यं तद्विषयमेव। लोकप्रसिद्धग्रहणार्थत्वादेतस्मादित्यधिकोपादानस्य। तथा च तत्समानविषयमानन्दमयवाक्यमपि तद्विषयमिति शङ्कासमाधानलाभार्थं सूत्रे ब्राह्मणमतिलङ्घ्य मन्त्रो गृहीतः। तत्र कथं ब्राह्मणोक्तमतिलङ्घ्य मन्त्रोक्तविषयत्वमानन्दमयवाक्यस्य कुतश्च मन्त्रोक्तविषयत्वेऽपि ब्रह्मविषयत्वं न तु ब्रह्मविद्विषयत्वं मन्त्रेऽपि ह्युभयोरुपादानमविशिष्टमित्याकाङ्क्षायां सूत्रगतमान्त्रवर्णिकपदन-पुंसकलिङ्गावधारणसूचितसमाधानाविष्करणाय मन्त्रोपन्यासपुरस्सरं सूत्रं व्याचष्टे-**यत्सत्यं ज्ञानमिति।** अयमाशयः। 'ब्रह्मविदाप्नोति परमि'त्यानन्दवल्यां प्रतिपाद्यस्य कृत्स्नस्याप्यर्थस्य सङ्ग्राहकं सूत्रम्। तत्र किं तद्ब्रह्म कथं च तद्वेदनं किंच तद्वेदनप्राप्यं परमोत्कृष्टं परमित्याकाङ्क्षायां तत् त्रितयं स्पष्टीकर्तुं 'तदेषाभ्युक्ते' ति ब्राह्मणोक्तार्थप्रतिपादकत्वेनावतारणपुरस्सरं तदनुव्याख्यानरूप 'स्सत्यं ज्ञान' मिति मन्त्र आम्नातः। तत्राप्येवमाकाङ्क्षोदेति। कथं ब्रह्मणस्त्रिविधपरिच्छेदराहित्यरूपमानन्त्यम्, अपरिच्छिन्नं ब्रह्म च कस्यां गुहायां निहितं वेद्यं, कथं च तद्वेदनेन युगपद्ब्रह्मादिस्तम्बपर्यन्तं प्राणिनिकायव्यवस्थितसकलकामरूपोत्कृष्टफलावाप्तिरिति। अतस्तदानन्त्याद्युपपादनार्थं

मन्त्रव्याख्यानरूपोऽनुवाकशेषः। तत्र प्रथममौचित्यादानन्त्योपपादनार्थत्वं कारणवाक्यस्य युक्तमिति 'तस्मादेतस्मा'दिति पदद्वयं व्यवहिताव्यवहित- ब्राह्मणमन्त्रवाक्यप्रकृतपरामर्शितयोपपादनीयमानन्त्यं 'सोऽकामयते'त्यादिकारणवाक्येनोपपाद्यते। तत्र बहुभवनसङ्कल्पादेस्तदुपपादकस्य वर्णनादिति चेत्। तेनापि ह्यानन्दमयवाक्यं समानविषयमेव, स इति पुल्लिङ्गेन प्रकृतस्यानन्दमयस्य परामर्शात्। तथा च मान्त्रवर्णिकब्रह्मानन्त्यप्रतिपादनार्थकारणवाक्यसमानविषयत्वेनापि तदानन्दमयवाक्यस्य मान्त्रवर्णिकब्रह्मविषयत्वं तथाप्यनिवार्यम्। 'तस्माद्वा एतस्मा'दित्यादिवाक्यप्रतिपन्नस्य कारणस्यात्मनः सर्वान्तरत्वेन निर्दिधारयिषया प्रवृत्तस्य तस्य ब्रह्मविषयत्वे च 'तस्माद्वा एतस्मादि'त्यादेरपि तद्विषयत्वमापतदनिवार्यम्। तद्विषयत्वे च 'यदानन्त्यं प्रतिज्ञायं श्रुतिस्तत्सिद्धये जगौ। तत्कार्यत्वं प्रपञ्चस्य तद्ब्रह्मेत्यवधारये'त्याप्तोक्तरीत्या तदपि कारणवाक्यं ब्रह्मानन्त्योपपादनार्थमेव पर्यवस्यतीति दूरं गत्वापि तस्मादेतस्मादिति पदद्वयमुक्तविधयैवोपपादनीयमिति। नन्वेवमपि 'ब्रह्म पुच्छं प्रतिष्ठे'ति प्रतिष्ठारूपब्रह्मान्यत्वप्रतीतेर्गतिर्न सिद्धेत्याशङ्क्याह-**ब्रह्म पुच्छमिति।** उपक्रमगतब्रह्मपदानुसारेणानन्दमयस्य ब्रह्मत्वसिद्धावुपसंहारे ततोऽन्यत्र प्रयुक्तं ब्रह्मपदं ब्रह्मवाचकतया तत्प्रतिष्ठाप्यत्वनिर्देशयोग्ये प्रणेव वर्तनीयमिति भावः। **अत्र केचिदिति।** तेषामयमाशयः। यथा 'सत्यं ज्ञान'मिति मन्त्रे व्याख्यातव्येष्वानन्त्यं कारणवाक्यैरुपपाद्यते। तथा कोशचतुष्टयरूपा तदवच्छिन्नस्य ब्रह्मणो गुहान्नमयादिवाक्यैः प्रदर्श्यते। तदैव सर्वकामावाप्तिरूपं फलमानन्दमीमांसया स्फुटीक्रियते। एव गुहामध्ये तदवस्थानस्थलतया निर्दिष्टं परमव्योमापि विशिष्येदन्तया प्रदर्शनीयम्। तत्प्रदर्शनपरमानन्दमयवाक्यम्। तत्रानन्दमयशब्दस्य वृत्तिः 'तत्प्रकृतवचने मयडि'ति सूत्रप्राथमिकार्थपरिग्रहेण सूपपादा। तत्र स्थितं ब्रह्म तु ब्रह्मपुच्छं प्रतिष्ठेत्यनेन निर्दिश्यते। न प्रणवः। ब्रह्मश्रुतेः 'असन्नेव स भवती' त्यनन्तरश्लोके ब्रह्मशब्दाभ्यासस्य च मुख्यार्थत्यागायोगात्। न च श्लोक आनन्दमयविषयः पूर्वपर्यायेषु श्लोकानामवयविविषयत्वदृष्टेरिति वाच्यम्। अन्नमयपर्यायश्लोकस्य 'अन्नाद्वै प्रजाः प्रजायन्ते' इत्यादेरन्नविषयतया तन्नियमासिद्धेस्तद्वदवयविसम्बन्धियत्किञ्चिद्विषयतया तत्पर्यायश्लोकतोपपत्तेश्च। न च तत्र स्थितस्य तत्प्रतिष्ठात्वनिर्देशानुपपत्तिः। भुवि स्थितस्य पर्वतस्य भूधरत्ववत्स्वशक्तिरूपे परमासने स्थितस्य परब्रह्मणः तत्प्रतिष्ठात्वोपपत्तेः। न चैवं सति 'तस्माद्वा एतस्मादि'त्यादेः कारणवाक्यस्य ब्रह्मविषयत्वे तत्प्रतिपाद्यकारणभूतात्मनिर्धारणस्य आनन्दमये पर्यवसानं 'तस्माद्वा एतस्मादि'ति वाक्यशैलीसमाप्त्यवगमितं विरुद्ध्येत। आनन्दमयविषयत्वे तस्य ब्रह्मानन्त्योपपादनार्थत्वमेतस्मिन्मतेऽभ्युपगन्तव्यम्। सर्वान्तरात्मत्वस्यानन्दमयमतिलङ्घ्य प्रतिष्ठारूपे ब्रह्मणि पर्यवसानं च

विरुद्ध्येतेत्युभयतःपाशा रज्जुरिति शङ्कनीयम्। उभयथाप्युपपत्तेः। ब्रह्मविषयत्वे कोशचतुष्टयात्मकगुहानिरतिशयानन्दात्मकपरमव्योमरूपयोः प्रकारचतुष्टयपर्यङ्करीत्या हार्दपरब्रह्म-स्थानयोर्निरूपणार्थमेव 'तस्माद्वा एतस्मादि'ति श्रुतिशैली प्रवृत्ता। न तु कारणभूतस्यात्मनः सर्वान्तरत्वनिर्दिधारयिषया। अन्नमयकोशे 'स वा एष पुरुष'इति कारणभूतात्मवाचकतदेतच्छब्दसामानाधिकरण्यं प्राणमयादिषु तद्वाचकात्मशब्दसामानाधिकरण्यं च स्थाननिरूपणसमय एव तेषु तदृष्टिविधानार्थ नतु तेष तद्बुद्ध्यवतारणक्रमेण तस्य सर्वान्तरत्वनिर्धारणार्थमित्युपपत्तेः। आनन्दमयविषयत्वेऽपि तदपृथक्सिद्धाश्रयस्य ब्रह्मण एवानन्त्यसिद्धेः। तस्मादिति मन्त्रब्राह्मणप्रकृतब्रह्मपरामर्शि। एतस्मादिति तदव्यवहितमन्त्रमात्रप्रकृतपरमव्योमपरामर्शि। उभयोस्सामानाधिकरण्यमभेदोपचारेण। अभेदोपचारश्च तन्मूलभूतापृथक्सिद्धाश्रयाश्रयिभावद्योतनेनानन्दमयविषयवाक्यकारणविषयवाक्यानां ब्रह्मानन्त्योपपादन-पर्यवसायित्वज्ञापनार्थ इत्युपपत्तेः। ब्रह्मणो गुहापरभव्योमरूपसर्वान्तरत्वस्य 'गुहायां परमे व्योमन्नि'ति वाक्येन प्रागेव सिद्धे'। एतस्मिन्मते 'तस्यैप एव शारीर आत्मा यः पूर्वस्ये'ति वाक्यानां सर्वेषामपि ऐकरूप्येण प्रतिष्ठारूपब्रह्मविषयतया ततोऽपि तस्योक्तसर्वान्तरत्यसिद्धेश्च। तदतिरिक्तसर्वान्तरत्वस्य 'तस्माद्वा एतस्मादि'त्यादेः ब्रह्मविषयत्वाश्रयणेऽप्यसिद्धे। मतान्तराश्रयणेऽपि तदसिद्धेश्च। वस्तुतस्तु द्वितीयपक्षाश्रयणमेव युक्तम्। 'सोऽकामयते' त्यादिना जगदुभयकारणत्वेनानन्दमयं प्रकृत्य 'को ह्येवान्यात्कः प्राण्यात्। यदेष आकाश आनन्दो न स्या'दित्यत्राकाशशब्देन तस्य प्राग्वर्णितपरमव्योमरूपत्वप्रतिपादनात्। यद्यप्यकाशशब्दस्य सप्तम्यन्तत्वाश्रयणेन तयोर्वाक्ययोर्ब्रह्मपरत्वमपि सम्भवति। 'ब्रह्म पुच्छं प्रतिष्ठे'ति नपुंसकलिङ्गनिर्दिष्टस्य ब्रह्मणः 'तस्यैष एव शारीर आत्मे'ति पुल्लिङ्गेनापि निर्दिष्टतया तत्र 'स' इति 'एष' इति च पुल्लिङ्गोपपत्तेः। तथापि 'यदेष आकाश आनन्दो न स्यादि'ति प्रकृतस्यानन्दस्य 'सैषानन्दस्य मीमांसे'ति विचारं प्रस्तुत्य तस्य निरतिशयोत्कर्षाभिधाने 'स एको ब्रह्मण आनन्द' 'इत्यानन्दं ब्रह्मणो विद्वानि'ति च ब्रह्मधर्मत्वप्रतिपादनात्तदनुसारेणाकाशशब्दस्य प्रथमान्तता सर्वनाम्नामानन्दमयपरता चावसीयते। न च भृगुवल्ल्युक्तानन्दवत् इहापि 'सोऽकामयते'त्यादिना जगत्कारणत्वेनोक्त आनन्दो ब्रह्मेति शङ्कनीयम्। दृष्टांतासिद्धेः। तत्राप्यानंदस्य 'सैषा भार्गवी' त्यादिवाक्यशेषानुसारेण परमव्योमरूपानन्दपरत्वात्। न च ब्रह्मजिज्ञासयोपसेदुषे भृगवे 'यतो वे'त्यादिजगत्कारणत्वलक्षणमुखेनोपदिष्टं ब्रह्म आनन्द इति निर्धारितमिति तत्र 'आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतामि जायंत' इत्यादिना ततः पूर्ववाक्येन प्रतिपन्नत्वात्। तदनुसारेण गौडद्राविडयोरेव ब्रह्मविद्या प्रतिष्ठितेति तत्स्थेषु विद्वत्सु प्रतिष्ठिताया विद्यायास्तत्र प्रतिष्ठित्वोक्तिवत्परमव्योमस्थे ब्रह्मणि प्रतिष्ठिताया विद्यायाः परमे व्योम्नि

प्रतिष्ठितत्वोक्तिर्योजनीयेति वाच्यम्। तथा सति 'सैषा भार्गवी' त्यादिवाक्यैयर्थ्यापत्तेः। ब्रह्मणः परमव्योमस्थत्वस्य 'यो वेद निहितं गुहायां परमे व्योमन्नि'ति पूर्वानुवाकमन्त्रेण प्रतिपन्नत्वात्। ब्रह्मणि भृगुवल्याः प्रतिष्ठितत्वस्य 'अधीहि भगवो ब्रह्मे'त्याद्युपक्रमतः प्रतीतेश्च। तस्माद्वाक्यवैयर्थ्यपरिहारायैवं योजनीयम्। अपृथक्सिद्धधर्मतया ब्रह्मानन्यत आनन्दाज्जगज्जन्मादिकमुच्यमानं ब्रह्मणः सम्बन्धविशेषेण तटस्थलक्षणमि 'त्यधीहि भगवो ब्रह्मेति' उपक्रमैकवाक्यतानिर्वाहमभिप्रेत्य पूर्वानुवाके ब्रह्मधर्मतयोक्त आनन्दोऽपि भृगुणा लक्षणमुखेन ब्रह्मतया ज्ञात इत्यभेदोपचारेण 'आनन्दो ब्रह्मे'ति व्यजानादिति वाक्यं प्रवृत्तमिति। एवं च प्रथमप्रवृत्तानन्दवल्लीस्वरसप्रतीतार्थानुरोधात् तदेकवाक्यतापि लभ्यते। एतेन भृगुवल्लयुक्तानन्दवत् पञ्चमपर्यायस्थत्वादानन्दमयो ब्रह्मेत्यपि शङ्का निरस्ता। भृगुवलृयुक्तानन्दस्यापि धर्मानन्दत्वोपपादनादिति। एवं चास्मिन्पक्षे मध्यावयवत्वेन निरूपित आनन्दः प्रियमोदादिप्रायपाठात् सांसारिकसुखविशेष द्रष्टव्यम्। ननु, यद्यानन्दमयो ब्रह्मधर्म आनन्दः कथं तर्हि सूत्रकारेण 'आनन्दमयो ब्रह्मे'त्युक्तमित्याशङ्क्य श्रुतिवदभेदोपचारेणेत्याह-**प्रतिष्ठाश्रूतादिति।** प्रथमसूत्रादनुवृत्तं ब्रह्मपदमिह साध्यनिर्देशकमित्यभिप्रेत्यैवं सूत्रगतिरुक्ता। यदि त्वीक्षति सूत्रा 'न्नाशब्द' मित्येतस्यानुवृत्तिरङ्गीक्रियते तदानीमानन्दमयः अशब्दं शब्देतरप्रमाणकं जीवस्वरूपं न भवतीत्यभेदोपचारं विना साध्यनिर्देशो लभ्यते। किं तु ब्रह्मानन्द इति सिद्धान्तसाध्यप्रदर्शनार्थ यत्नः कार्यः। अस्मिन्पक्षे त्वधिकरणस्यैवं संशयः। जगत्कारणमानन्दमयो जीवः उत ब्रह्मानन्दरूपा चिच्छक्तिरिति। कुतोऽयं संशय इति चेदुच्यते। आनन्दमयस्तावज्जगज्जन्मादिकारणत्वेन प्रतिपन्नः। तं प्रकृत्य 'सोऽकामयते' त्याद्याम्नानात्। न च तत्र 'स' इत्यनेन 'ब्रह्म पुच्छं प्रतिष्ठे'त्यादौ प्रकृतस्य ब्रह्मणः परामर्शः शङ्कनीयः। तस्य नपुंसकलिङ्गेनासाधारणशब्देन आनन्दमयावयवत्ववेदनावेदनविशेषणताभ्यामप्रधानत्वेन च निर्दिष्टत्वात्पुल्लिङ्गेन स्वासाधारणशब्देन स्वप्रधानतया निर्दिष्टे आनन्दमये प्रकृते विद्यमाने तत्परामर्शायोगात्। एवं च 'तस्माद्वा एतस्मा' दित्याद्युपक्रमगतकारणत्वप्रतिपादनमपि तद्विषयं पर्यवस्यति। स चानन्दमयो न ब्रह्म ब्रह्मणः तदवयवत्वेन निरूपितत्वात्। न ह्यस्यायमवयव इति भेदव्यवहारावलम्बनं कञ्चिद्विशेषं विना तस्यैव तदवयवत्वेन निरूपणं सङ्गच्छते। एवं सति 'तस्माद्वा एतस्मा'दित्यत्र प्रकृतपरामर्शिना सर्वनाम्ना 'यो वेद निहितं गुहायां परमे व्योमन्नि'ति मन्त्रे प्रकृतेषु परमव्योमतस्थब्रह्मतद्वेदितृषु ब्रह्मणः परामर्शायोगात्। द्वयोर्मध्ये यदि परमव्योमहृदयावच्छिन्नो भूताकाशः तदा यस्य 'सोऽकामयते' त्युक्तबहुभवनसङ्कल्पवत्त्वस्य 'आत्मन आकाशस्सम्भूत' इत्युक्तात्मश्रुत्याकाशकारणत्वयोश्चासम्भवात्तस्य परामर्शायोगे सति ब्रह्मविदेव तेन परामर्शनीय इति स एव जगज्जन्मादिकारणमानन्दमय इति तत्र मयड्विकारार्थप्रायपाठानुसारेण विकारार्थ इति च

प्राप्नोति। यदि परमव्योमब्रह्मानन्दरूपा चिच्छक्तिः तदा परमव्योम्नः चिच्छक्तिरूपत्वेन प्रसिद्धस्यानन्त्यवद्गुहावञ्च व्याख्यातवयत्वेन 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षे' त्यत्र पयस इव सप्तमीनिर्दिष्टत्वेऽपि प्राधान्यात्तस्य परामर्श इति सैव चिच्छक्तिरानन्दमयः तत्र मयट् प्राचुर्यार्थ इति च प्राप्नोति। एवं स्थिते पूर्वपक्षः-तस्मादित्यनेन ब्रह्मविदो जीवस्य परामर्श इति युक्तम्। तस्य प्रथमानिर्दिष्टतया प्राधान्यात्। न च परमव्योम्नोऽपि व्याख्यातव्यत्वेनार्थप्राधान्यमस्तीति वाच्यम्। व्योम्नो भूताकाशतया प्रसिद्धस्य व्याख्यातव्यत्वाभावात्। न च तत्परमत्वविशेषणेन प्रसिद्धाकाशादन्यदवसीयत इति वाच्यम्। प्रसिद्धस्यैव भूताकाशस्य हृदयावच्छिन्नावकाशरूपस्य ब्रह्माभिव्यक्तिस्थानत्वेनोत्कृष्टतया परमत्वविशेषणोपपत्तेः। न च 'यदेष आकाश आनन्दो न स्या'दित्यत्र प्रकृतानन्दपरामर्शिना सर्वनाम्ना आनन्दशब्देन च आकाशशब्दस्य सामानाधिकरण्यात् मन्त्रोक्तं परमव्योमैव 'तस्माद्वा एतस्मा'दित्यत्र तदेतच्छब्दाभ्यां परामर्शपूर्वकमानन्दमय इति निर्दिष्टमवसीयत इति वाच्यम्। तत्राकाशशब्दस्य परमे व्योमन्नित्यस्येव सप्तम्यन्तत्वोपपत्तेः। अस्ति हि हृदयकाशे जीवस्याप्यवस्थानप्रसिद्धिः। अस्ति हि तस्य 'को ह्येवान्यात्कः प्राण्या'दित्युक्तचेष्टाश्वसनहेतुत्वम्। यद्यानन्दमयो जीवः न ब्रह्मानन्दरूपं परमव्योम किमर्थमिह तत्प्रतिपादनं न विज्ञानमयपर्यायवत् गुहारूपतया तस्य गुहान्तर्गतव्योमस्थितत्वाङ्गीकारात्। न च प्रसिद्धस्य तस्य स्वरूपतो व्याख्यातव्यतास्ति। आनन्दमयस्य ब्रह्मानन्दत्वे वा किमर्थं तस्य जगत्कारणत्वादिप्रतिपादनं शिरःपक्षपुच्छादिकल्पनं च। यद्युच्येत ब्रह्मण आनन्त्यप्रतिपादनार्थं तस्य जगत्कारणत्वादिप्रतिपादनं तत्प्रसङ्गादुपासनार्थं शिरः प्रभृतिकल्पनमिति। जीवस्यापि तर्हि तत्तथैवास्तु। अविशिष्टं हि ब्रह्मानन्दस्येव जीवस्याप्यपृथक्सिद्धब्रह्मधर्मत्वम्। तेन तद्गतजगत्कारणत्वप्रतिपादनस्यापि ब्रह्मानन्त्योपयोगित्वं समानमेव। परिच्छिन्नस्य जीवस्य कथं बहुभवनसङ्कल्पपूर्वकं जगदुभयकारणत्वमिति चेत् ब्रह्मविद्स्तस्य चिच्छक्तिविकासेन चिच्छक्तिद्वारकमेव हि ब्रह्मणोऽपि जगदुपादानत्वम्। ननु, 'यदेष आकाश आनन्दो न स्या'दिति प्रकृतस्यानन्दस्य निरतिशयमुक्तभोग्यब्रह्मानन्दत्वमुक्तं कथमयं जीवस्यादिति चेन्न। 'सोऽकामयते'त्यादिना जीवस्य जगज्जन्मजीवनादिकारणत्वोक्तया ब्रह्मानन्त्योपपादनानन्तरं 'सैषानन्दस्ये' त्यादेरपेक्षानुसारेण 'सोऽश्नुते सर्वान्कामा'निति मन्त्रसङ्क्षिप्तफलविवरणरूपतया तत्रानन्दशब्दस्य प्रकृतानन्दपरत्वाभावात्। तस्माज्जगत्कारणमानन्दमयो जीव एवेति तत्रातिव्याप्तं ब्रह्मलक्षणमिति। एवं प्राप्ते सिद्धान्तः-आनन्दमयो ब्रह्मानन्दरूपा चिच्छक्तिः मानुषादिब्रह्मान्तेषूत्तरशतगुणत्वेनाभ्यस्तत्वात् जीवस्य तथाभूतानन्दत्वायोगात्। न चायमभ्यासो 'यदेष आकाश आनन्दो न स्या' दिति प्रकृतानन्दमयरूपानन्दविषयो न भवतीति वाच्यम्। आनन्दशब्दस्य

प्रकृतानन्दपरत्वे प्रतीयमाने तत्त्यागायोगात्। तद्विषयत्वेऽपि मन्त्रवर्णसङ्क्षिप्तब्रह्मविद्याफल-विवरणरूपत्वलाभात्। तथा हि-आनन्दमयशब्दरूपः स एवानन्दो मानुषादिप्रजापत्यन्तजीववर्गे ब्रह्मणि च तारतम्येनाभिव्यज्यत इति सकलवैषयिकसुखकणिकामहासमुद्रायमाणत्वोक्तया तस्य 'सर्वान्कामा'नित्यनेन सकलवैषयिकानन्दसमष्टिरूपतोक्तयर्हतात्र दर्शिता भवति। न च तत्र मानुषादिषु भिन्नभिन्ना एवानन्दा उत्तरोत्तरमुत्कृष्टतया वर्ण्यते। विषयविशेषसम्पर्कादिप्रभवसुखरूपाणां मानुषाद्यानन्दानां तत्तत्क्षणापवर्गितया सर्वेषामैक्यायोगादिति वाच्यम्। एतच्छङ्कानिराकरणार्थमेव मानुषादिषु 'स एको मानुष आनन्द' इत्यादिना तत्तदानन्दैक्यस्यान्ते 'स यश्चायं पुरुषे यश्चासावादित्ये स एक' इति पुरुषादित्यशब्दोक्तयोर्मनुष्यदेववर्गयोर्जीववर्गयोर्जीववर्गपरब्रह्मणोर्वानन्दैक्यस्य प्रतिपादनात्। एवमानन्दमीमांसायाः पर्यायभेदेऽप्येकानन्दविषयत्व एव तस्यास्सर्वकामशब्दविवरणरूपता समञ्जसा भवति। अन्यथा 'सर्वतीर्थाधिका गङ्गे'ति वाक्यस्य युगपत्सर्वेषु स्नातमनेनेति वाक्यविवरणरूपतेवोपचारनिमित्तप्रदर्शनपरतया नेतव्या स्यात्। तथा सत्येव चा'भ्यासा'दिति सौत्रहेतुरपि स्वारस्यं प्रतिपद्यते अभ्यासो हि गुणनमावर्तनम्। न चात्रानन्दभेदपक्षे ब्रह्मानन्द आवर्त्यते। 'स एको ब्रह्मण आनन्द'इति सकृदेव तत्कीर्तनात्। न च सकृत्कीर्त्यमानोऽपि शतगुणत्वेनावर्त्यते इत्ययमेवाभ्यास इति वाच्यम्। 'ते ये शतं प्रजापतेरानन्दा' इति प्राजापत्यानन्दस्यैव शतगुणत्वेन कीर्तनात् बुद्धिकल्पनया शतधावर्तितेन प्रजापत्यानन्देन ब्रह्मानन्दस्याभेदमात्रं हि तदुत्कर्षज्ञापनार्थमौपचारिकं व्यपदिश्यते 'स एको ब्रह्मण आनन्द'इति। न तु ब्रह्मानन्दः शतगुणत्वेनावर्त्यते। न हि 'चिरकालगङ्गाप्रवाहक्षालितकलङ्कमिन्दुमण्डलमिदमेतस्या मुख'मिति वाक्ये क्षालितकलङ्कत्वेन मुखं विशेष्यते। किंतु तथा कल्पितेनेन्दुमण्डलेन मुखस्याभेदमात्रं तदुत्कर्षज्ञापनार्थमौपचारिकं व्यपदिश्यते। एवं च यद्यानन्दभेदः तदानी 'मभ्यासा' दिति हेतु रसिद्धः स्यात्। अनैकान्तिकश्च। आनन्दाभ्यासमात्रस्य शतगुणत्वेन तदभ्यासस्य वा हेतुत्वे मनुष्यगंधर्वादिप्रजापत्यंतानंदवृत्तित्वा' त्ते ये शतं प्रजापतेरानंदा'इत्युक्तार्थविषयत्वेनावतारिते 'यतो वाचो निवर्तत'इति श्लोके ब्रह्मानंदस्य निरतिशयत्वकीर्तनात्तस्मिन्पर्याये शतशब्दस्यानंत्यपरत्वेऽपि प्रजापत्यानन्दवृत्तित्वात्। विरुद्धश्चायम् विपक्षमात्रवृत्तित्वपर्यालोचनायां ब्रह्मानन्दगतनिरतिशयत्वस्यैव हेतूकरणसंभवे तत्प्रतिपत्त्यधीनप्रतिपत्तिकस्यानन्तगुणत्वेन तदभ्यासस्य हेतूकरणं चासमञ्जसं भवेत्। निरतिशयत्वेनाभ्यास एव हेत्वर्थो विवक्षित इत्युच्यते चे' दभ्यासा'दिति सूत्रपदं सर्वथा निरभिप्रायकं कृतं स्यात्। निरतिशयत्वोक्तेः 'पुरुषान्नापरं किञ्चि'दित्युक्तेरिवाभ्यासत्वाभावात्। यद्युक्तसर्वदोषपरिहारार्थं शतगुणिताभ्यस्तप्रजापत्यानन्दतुलितत्वादिति हेत्वर्थः कल्प्येत तदानीमपि सौत्रहेतुमुपसर्जनीकृत्य हेत्वन्तरकरणादसामञ्जस्यमविशिष्टम्। आनन्दमयस्य ब्रह्मत्वे साध्ये

हेतोर्योजनायामप्यानन्दभेदवादिनां हेत्वसिद्ध्यादिदोषास्तुल्यास्तत्र मनुष्यगन्धर्वादिवृत्तितया न व्यभिचारविरोधाविति विशेषः। तस्मिन्पक्षे शतगुणिताभ्यस्तप्राजापत्यानन्दतुलितानन्दवत्त्वादित्यन्तिमविवक्षायां हेत्वर्थस्य कल्पनीयत्वाद्दविष्ठमुपसर्जनत्वमभ्यासो नेतव्य इत्यधिकतरमसामञ्जस्यम्। कथं च 'स एको ब्रह्मण आनन्द'इति शतगुणितप्राजापत्यानन्दतुलिततया श्रूयमाणोऽयमानन्दः आनन्दमयस्यानन्द इत्यवगन्तव्यम्। येन पक्षे हेतुस्सिद्ध्येत्। 'ब्रह्मण आनन्द' इति खलु श्रूयते। तेन प्रतिष्ठारूपस्य ब्रह्मणः स आनन्दस्सिद्ध्येत् न त्वानन्दमयस्य। यदि 'सोऽकामयते' त्यत्र तच्छब्दः पुल्लिङ्गसाधारणशब्दप्रकृतमानन्दमयं परामृशेत् न ब्रह्मेति तत्सामर्थ्यमालोच्येत तदा जगत्कारणत्वेन निरूपितं तर्हि 'रसो वै स'इति स्वादनीयानन्दपरेण रसशब्देन 'यदेष आकाश आनन्द' इति साक्षादानन्दशब्देन च प्रकृत्य 'सैषानन्दस्य मीमांसे'ति तमेवानन्दशब्देन परामृश्य तद्विचारप्रस्तावात् प्राजापत्यानंदतुलितानन्दत्वेनानन्दविचारनिगमनं तद्विषयं पर्यवस्येदित्यानन्दमय एव स आनन्दो भवेत् न त्वानन्दमयस्यानन्दः। यदि च तत्रानन्दप्रतिसम्बन्धिवाचकस्य ब्रह्मशब्दस्य यथाकथञ्चिदानन्दमयपरत्वमवगम्येत तदा ब्रह्मश्रुत्यैवानन्दमयस्य ब्रह्मत्वं सुज्ञानमिति तज्ज्ञानाधीनज्ञानानन्दविशेषरूपलिङ्गोपन्यासो व्यर्थः स्यात्। न हि पूर्वपक्षिणा सा ब्रह्मश्रुतिर्जीवविषयास्त्विति शङ्कितुं शक्यते। 'श्रोत्रियस्य चाकामहतस्ये'ति ब्रह्मविज्जीवस्य पृथगुपादानेन तद्विषयत्वशङ्कानवकाशात्। अब्रह्मविज्जीवविषयत्वशङ्कायाः पूर्वपक्षविरुद्धत्वात्। जगत्कारणमानन्दमयो ब्रह्मविज्जीव इति हि पूर्वपक्षः। न त्वब्रह्मविज्जीव इति। परिच्छिन्ने प्रागाकाशादिसृष्टेः शरीररहिते च तस्मिन् बहुभवनतत्सङ्कल्पयोस्सङ्कल्पमात्रस्य वाऽसम्भवात् सर्वनियन्तृत्वाद्यसम्भवाच्च। नन्वानन्दमयो ब्रह्मानन्दरूपा चिच्छक्तिरिति वा न जीव इति वा साध्येऽपि 'स एको ब्रह्मण आनन्द' इति ब्रह्मानन्दत्वोक्तेः 'श्रोत्रियस्य चाकामहतस्ये'ति जीवव्यतिरेकनिर्देशस्य 'यतो वाचो निवर्तन्त' इति निरतिशयानन्दत्वकीर्तनस्य च स्पष्टस्य होतोस्सत्त्वे किमर्थं मानुषादिप्राजापत्यान्तानन्देषूत्तरशतगुणत्वेन पुनःपुनः कीर्तनादित्येवंरूपहेत्वन्वेषणम्। उक्तहेत्वन्वेषणं विना ब्रह्मानन्दत्वोक्त्यादीनामानन्दमयविषयत्वं न सिद्ध्यतीति तदन्वेषणम्। कथमेवमत्रशङ्का भवेत्। सर्वकामावाप्तिरूपफलविवरणार्थेयमानन्दमीमांसा। तत्र यद्युत्तरोत्तरं शतगुणितत्वेन निरूपिता आनन्दास्तत्तल्लोकसम्भावितवैषयिकसुखसन्तानविशेषाः स्युस्तदा प्रतिपर्यायं 'श्रोत्रियस्य चाकामहतस्ये' त्युक्तत्वात्सकललोकगतयावद्वैषयिकसुखप्राप्तिरूपत्वेन सर्व कामावाप्तिर्विवृता भवेत् नान्यथा। अतः प्रकृतस्यानन्दमयरूपस्यैकस्यानन्दस्य जीवरूपत्वे ब्रह्मचिच्छक्तिरूपत्वे वानन्दमीमांसायास्तद्विषयत्वं वक्तुं युक्तमिति चेदत्रेदमुत्तरं वक्तव्यम्। सत्यं सर्वकामावाप्तिविवरणरूपत्वमानन्दमीमांसायास्तद्विवरणत्वं तत्र तत्तल्लोकगतभिन्नभिन्नवैषयि-

कानन्दसाकल्यप्राप्तिरूपतया न क्रियते। किं तु मानुषादिब्रह्मान्तगताभिव्यक्तितारतम्यभिन्नैकानन्दप्राप्तिरूपतया। प्रतिपर्यायं स एक आनन्द इत्यवसाने 'स यश्चायं पुरुषे, यश्चासावादित्य' इति च तदैक्यप्रतिपादनात्। तथा चानन्दमीमांसायाः प्रकृतैकानन्दविषयत्वेऽपि सर्वकामावाप्तिविवरणरूपंत्वोपपत्तेर्न प्रकृतहानं युक्तमिति। एवमुक्तहेतुसिद्ध्यधीनत्वात् हेत्वन्तराणां पक्षधर्मतया निश्चयस्यास्मिन्हेतौ प्रदर्शिते तानि स्वयमेव ज्ञास्यन्त इत्ययमेव हेतुः सूत्रकृतोपन्यस्त इत्यलं प्रसक्तानुप्रसक्त्या। एवं तावद्ब्रह्मानन्दस्यैवाभिव्यक्तितारतम्येन सकलवैषयिकसुखात्मना विद्यमानत्वोक्त्या 'सर्वान्कामा' नित्यनेन सर्वकामात्मना विद्यमानस्स एवोच्यत इति विवृतं भवति। युगपत्तदवाप्तेर्ब्रह्मविद्याफलत्वं तु 'श्रोत्रियस्य चाकामहतस्ये'त्यंशेन प्रदर्श्यते। तेन हि 'स एको ब्रह्मण आनन्द'इति पर्यायस्थितेन मुक्तौ ब्रह्मविदनुभाव्यत्वं ब्रह्मानन्दस्योच्यते। यद्यपि वैषयिकसुखानां सर्वेषां मिलितानामप्यखण्डब्रह्मानन्दलेशरूपत्वादखण्डब्रह्मानन्दानुभवो युगपत्सर्ववैषयिकसुखावाप्तेरतिरिच्यते। तथापि मुक्तं प्रति सर्वात्मनाभिव्यक्ते ब्रह्मानन्देऽनुभूयमाने वैषयिकसुखात्मना विद्यमानास्तदंशास्सर्वेऽप्यनुभूयन्त एवेति तस्य युगपत्सर्वकामावाप्तिविवरणरूपतोपपत्तिः। एवं च 'सोऽश्नुते सर्वान्कामान्सहे'ति मन्त्रो विवरणानुसारेण युगपत्सर्वकामावाप्त्यन्यूनतापरः। यथा 'आकाशवत्सर्वगतश्च नित्य' इति वाक्यमाकाशान्यूनपरिमाणतापरमिति योजनीयम्। एवं मनुष्यगन्धर्वादिपर्यायस्थितान्यकामहतश्रोत्रियवाक्यान्यपि मुक्तानुभाव्यस्य ब्रह्मानन्दस्य मनुष्यगन्धर्वानन्दाद्यन्यूनतापराणीति योजनीयम्। यद्वा। मनुष्यगन्धर्वादिपर्यायस्थितैः 'श्रोत्रियस्य चाकामहतस्ये'ति वाक्यैर्मुक्तेः प्राग्योगभूमिभेदानधिरूढस्य पूर्ववदेव द्वितीयसूत्रं योजनीयम्। कामहतश्रोत्रियस्य तत्तद्भूमिभेदेष्वाविर्भवन्नानन्दविशेषः कथ्यत इति भेदः। प्रायपाठानीतविकारार्थत्वप्रयुक्तजीवत्वशङ्कानिराकरणार्थं पूर्ववदेव तत्र हेत्वन्तरप्रतिपादनार्थं तृतीयसूत्रम्। तत्रायमर्थयोजनायां विशेषः। 'रसो वै सः'। 'यदेष आकाश आनन्द' इत्यानन्दमयस्यानन्दरूपतामुक्त्वोच्यते 'एष ह्येवानन्दयाती'ति। अतो यथा प्रचुरो जलराशिः स्वैकदेशैः केदारान् जलवतः करोति। एवं प्रचुर एवानन्दः स्वैकदेशैर्जीवानानन्दवतः कुर्यात् न त्वप्रचुर इति वाक्यशेषश्रुतानन्दवत्त्वकरणान्यथानुपपत्त्या प्रतीयमानं प्राचुर्यं मयडर्थो युक्त इति चकारोऽपि पूर्ववदभ्यासहेतुसमुच्चयार्थः। हेतुद्वयस्यापि फलत ऐक्येऽपि मुखभेदाद्भेदः। मान्त्रवर्णिकसूत्रं तु ब्रह्मवित्परामर्शशङ्कानिराकरणार्थम्। मान्त्रवर्णिकपरमव्योमैव 'तस्माद्वा' इत्यादिषु गीयते न तु ब्रह्मविदिति सौत्रेण नपुंसकलिंगेन द्योत्यते। तत्रायमभिप्रायः। परमत्वं व्योम्नि न परमेश्वराभिव्यक्तिस्थानत्वप्रयुक्तमिहानुवाद्यम्। परमे व्योम्नि निहितमिति व्योम्नि तत्सन्निधानस्यात्र वेद्यत्वेन प्रतिपाद्यतया ततोऽन्यस्य व्योम्नि परमत्वस्य परमेश्वर स्थानात्वाप्रयोजकस्यानुवाद्यताप्रतीतेः।

ततश्च यथाक्षरब्राह्मणे सकलजगदाधारत्वविशेषणेन भूताकाशादन्यत्वेनावसित आकाशः तत्रानतिप्रष्टव्यदेवतारूपत्वेन ब्रह्माश्रितत्वेन च व्याख्यातः। अत एव स चिदम्बरशक्तिरि'त्यक्षरमम्बरान्तधृते'रिति (ब्र० १-३-६) सूत्रेण सूत्रकार एव स्फुटीकरिष्यति। तथाऽत्रापि परमत्वविशेषणेन प्रसिद्धाकाशादन्यत्वेनावधृतं व्योम परमत्वप्रयोजकातिशयविशेषप्रदर्शनेन व्याख्यातमिति जगत्कारणत्वनिरतिशयब्रह्मानंदरूपत्वादिप्रदर्शनेन तद्व्याख्यानरूपः 'तस्माद्वा एतस्मा' दित्याद्युत्तरसंदर्भः इति तेन सैव चिदंबरशक्तिरुदाहृतश्रुतिबलादुक्तविशेषणविशिष्टतयापि सिद्ध्यतीति। तदेवं जगत्कारणमानन्दमयो न जीवः। किंतु ब्रह्मानन्दरूपा चिच्छक्तिः। अतो न जीवे ब्रह्मलक्षणस्यातिव्याप्तिरित्यधिकरणशरीरमिति स्थितं मतान्तरम्। इदं तु चिन्त्यते। जीवे ब्रह्मलक्षणस्यातिव्याप्तिनिराकरणार्थं प्रवृत्तेनानेनाधिकरणेन तत्रातिव्याप्तिं निरस्य चिच्छक्तावतिव्याप्तिरूपपादिता स्यात्। नन्वपृथक्सिद्धब्रह्मधर्मत्वात्तस्यास्तत्र तल्लक्षणसत्त्वान्नातिव्याप्तिरिति चेन्न। जातौ व्यक्तिलक्षणसत्त्वस्येव तस्याप्यतिव्याप्तिवात्। अन्यथा जीवे तल्लक्षणसत्त्वमप्यतिव्याप्तिर्न स्यात्। तस्याप्ययुतसिद्धतद्विशेषणत्वादिति। अत्रेदमुत्तरम्। शिववत्तदीया चिच्छक्तिरपि पञ्चकृत्यकारिणी भवत्येव। किं तु यथा शिवः शक्तिविशिष्ट एव परं ब्रह्म 'तौ ब्रह्मसामरस्येने'ति भाष्ये प्रागुदाहृतत्वात्। एवं स शक्तिविशिष्ट एव शुद्धाशुद्धात्मकस्य सर्वस्य प्रपञ्चस्य पञ्चकृत्यकारी। यतस्तयोः परस्परापेक्षं पञ्चकृत्यकारित्वम्। तथा हि श्रीशिवपुराणवचनानि 'शक्तिस्साक्षान्महादेवी महादेवस्तु शक्तिमान्। तयोर्विभूतिलेशो वै सर्वमेतञ्चराचरम्।। वस्तु किञ्चिदचिद्रूपं किञ्चिद्वस्तु चिदात्मकम्। इदं शुद्धमशुद्धं च परं चापरमेव च।। यत्संसरति चिच्चक्रमचिच्चक्रसमन्वितम्। तदेवाशुद्धमपरमितरत्तु परं शुभम्।। अपरं च परं चैव द्वयं चिदचिदात्मकम्। शिवस्य च शिवायाश्च स्वाम्यं चैतत्स्वभावतः।। यथा शिवस्तथा देवी यथा देवी शिवः। नानयोरन्तरं विद्याच्चन्द्रचन्द्रिकयोरिव।। चन्द्रो न खलु भात्येव यथा चन्द्रिकया विना। न भाति विद्यमानोऽपि तथा शक्त्या विना शिवः।। एवं परस्परापेक्षा शक्तिशक्तिमतोस्स्थितिः। न शिवेन विना शक्तिर्न शक्त्या न विना शिवः।। शक्तो यया शिवो नित्यं भुक्तौ मुक्तौ च देहिनाम्। यामाहुरखिलेशस्य तैस्तैरनुगुणैर्गुणैः।। समानधर्मिणीमेव शिवस्य परमात्मनः। यथा न जायते पुत्रः पितरं मातरं विना।। तथा भवं भवानीं च विना नैतच्चरा चरम्। स्त्रीपुंसप्रभवं विश्वं स्त्रीपुंसात्मकमेव च।। स्त्रीपुंसयोर्विभूतिश्च स्त्रीपुंसाभ्यामधिष्ठितम्। तस्मात्सह तया शक्त्या हृदि पश्यन्ति ये शिवम्।। तेषां शाश्वतिकी मुक्तिर्नेतरेषामिति श्रुतिः।' इत्यादीनि। एवं च यानि श्रुतिस्मृतिपुराणेषु शिवस्य पञ्चकृत्यकारित्वादिप्रतिपादकानि वचनानि यानि च चिच्छक्तेः 'वधूर्जजान नवगज्जनित्री। एका सती बहुधोषो व्युच्छस्यजीर्णात्वं जरयसि सर्वमन्यत्' इत्यादीनि श्रुतिवचनानि। 'सा शक्तिस्सर्वदा सूक्ष्मा

प्रबोधानन्दरूपिणी। शक्तिमानुच्यते देवः शिवः शीतांशुभूषणः। महदादिविशेषान्तास्त्व जाद्याश्चापि मूर्तयः।। यच्चान्यदस्ति तत्सर्वं तस्याः कार्यं न संशयः। सा देवी मायया सर्वं ब्रह्माद्यं सचराचरम्।। मोहयत्यप्रयत्नेन मोचयत्यपि लीलया। या सा माहेश्वरी शक्तिर्ज्ञानरूपातिलालसा। व्योमसंज्ञा परा काष्ठा सेयं हैमवती तथा।। सेयं करोति सकलं तस्याः कार्यमिदं जगत्।। न कार्यं नापि करणमीश्वरस्येति सूरयः।। सैषा माहेश्वरी गौरी मम शक्तिर्निरञ्जना। शान्ता सत्या परानन्दः परं पदमिति श्रुतिः। अस्यास्सर्वमिदं जातमत्रैव लयमेष्ययति। एषैव सर्वभूतानां गतीनामुत्तमा गति' रित्यादीनि शैवलैङ्गकौर्मादिवचनानि च पञ्चकृत्यकारित्वप्रतिपादकानि। तानि सर्वाणि विशेषवचनानुसारेण तयोः परस्परापेक्षया पञ्चकृत्यकारित्वादिविषयाणि। शिवस्य शक्तेर्वा तन्निषेधवचनानि च नैरपेक्ष्येण तन्निषेधपराणीति व्यवस्थापनीयम्। एवं सत्यपि शिवस्य सर्वात्मना स्वातन्त्र्यं शक्तेः शिवमात्रे पारतन्त्र्यमित्येतावानस्ति विशेषः। 'सैका परा च चिद्रूपा शक्तिः प्रसवधर्मिणी। विभज्या बहुधा विश्वं विदधाति शिवेच्छया। एवमेषा परा शक्तिरीश्वरेच्छानुवर्तिनी। स्थिरं चरं न यद्विश्वं सृजतीति विनिश्चयः।।' इत्यादिवचनप्रामाण्यात्। अत एव 'शक्तिशिवयोर्ब्रह्माभावे विशेषणविशेष्यता। अत एव च तयोः पूजायां विशेषाभावेऽपि पौर्वापर्यं शिवपुराणे विधीयते। 'यथा देवस्य देव्याश्च कुर्यात्स्नानादिकं तथा। न तु कश्चिद्विशेषोऽस्ति तत्र तौ सदृशौ यतः। प्रथमं देवमुद्दिश्य कुर्यात्स्नानादिकां क्रियाम्। पश्चाद्देव्यै प्रकुर्वीत देवदेवस्य शासनात्।' इति शिवशक्त्योर्ब्रह्मभावे शिवस्य विशेष्यतया प्राधान्यम्। 'युजे वा ब्रह्म पूर्व्यं नमोभिर्विश्लोका यन्ति पथ्येव सूरेः। श्रृण्वन्ति विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः'।। इति श्वेताश्वतरमन्त्रे पूर्वविशेषणबलादवसीयते। अस्य ह्ययमर्थः। वां युवयोः शिवशक्त्योर्मध्ये। पूर्व्यं पूर्वम् स्वार्थे यत्प्रत्ययः। विशेष्यतया प्रधानभूतम्। ब्रह्म शिवरूपम्। नमोभिः। युजे युनज्मि। छान्दसो विकरणव्यत्ययः। शिवस्य सर्वनमस्कारपर्यवसानभूमित्वात्तन्नमस्काराङ्कितैः श्लोकैः भजामीत्यर्थः। नमस्कारश्लोका विशेष्यन्ते। सूरेर्विदुषः शिवस्वरूपाभिज्ञस्य तज्ज्ञानान्मुक्तिं प्राप्तस्य मम। श्लोकाः वाचिकशिवनमस्कारसन्दर्भरूपाः 'अहं श्लोककृ'दिति मुक्तकृत्यत्वेन श्रुतिप्रसिद्धाः। पथ्येव पथि हिताः त्वरितनिर्विकारमार्गगमनाः सदश्वा इव। वियन्ति निर्गलप्रवाहतया निर्गच्छन्ति। पथ्यशब्दा 'त्सुपांसुलु' गिति सूत्रेण जस आकारादेशः। विश्वे सर्वेऽपि। अमृतस्य शिवस्य 'एतानि वा अमृतस्य नामधेयानी'ति श्रुतिप्रसिद्धामृतनामधेयस्य। पुत्राः 'दिव्या बहुरूपाः पुराणा' इत्यादिश्रुतिप्रसिद्धाः स्कन्दनन्दिकेश्वरादयः। श्रृण्वन्ति मम श्लोकानादरेणाकर्णयन्ति। अमृतपुत्रा विशेष्यन्ते। ये दिव्यानि दिवि भवानि चिदाकाशरूपे नित्यकैलासे स्थितानि धामानि भवनान्यातस्थुः आस्थितवन्त इति। यद्यप्यत्र द्वयोर्मध्ये पूर्वं ब्रह्मेत्युक्त्या द्वयोरपि प्रत्येकं ब्रह्मता प्रतीयते। भृगुवल्युक्तानन्दवल्लीगताभ्यां

जगत्कारणस्यानन्दस्य ब्रह्मत्वब्रह्मधर्मत्वोक्तिभ्यां च तथा प्रतीयते। तथापि विशेषणविशेयात्मकविशिष्टब्रह्मत्वावलम्बन एव तदेकदेशस्य ब्रह्मत्वव्यवहारः। यथा 'अग्निः पथिकृदग्निर्वैश्वानर' इत्यादिविशिष्टदेवतात्वावलम्बनः पाथिकृती वैश्वानरेष्टिरित्यादिः तदेकदेशस्य देवतात्वव्यवहारादौपचारिक इत्युपपादनीयम्। 'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गल'मिति परब्रह्मणः कृष्णपिङ्गलताश्रवणेन शबलस्य ब्रह्मतावगमात्। एवं च लक्ष्यब्रह्मशब्दार्थभूतविशिष्टैकदेशे विशेष्य इव विशेषणेऽपि लक्षणस्य वर्तनं नातिव्याप्तिः। विशिष्टे लक्ष्ये स्वतो लक्षणाभावेन तदेकदेशगतलक्षणेनैव तस्य लक्षणवत्तायाः समर्थनीयत्वादिति। एवमन्नमयाद्याः शरीरप्राणमनोजीवाः। आनन्दमयस्तु ब्रह्मानन्दरूपा चिच्छक्तिरिति केषाञ्चिन्मतमुपन्यस्तम्। इदानीमन्नमयाद्याः पञ्च कारणपुरुषा इत्यन्येषां मतमुपन्यस्यति-**अन्ये पुनरिति।** तेषामयमभिप्रायः। अन्नमयादयस्तावच्चेतना देवताविशेषांश्चेत्यभ्युपगन्तव्यम्। 'एतमन्नमय' मित्यादिफलवाक्येषु प्रत्येकं तेषु चेतनवाच्यात्मशब्दश्रवणात् उपसनावाक्येषु श्रुतस्यैव तस्य दृष्टिविधानार्थत्वेनान्यथासिद्ध्यभावात् मुक्तौ संसारमण्डलादुत्तीर्णेन तेषां क्रमप्राप्यत्वश्रवणाच्च। अतस्ते मुक्तप्राप्यपरमशिवलोकनेदिष्ठक्रमिकलोकाधिष्ठातृदेवताविशेषा इति निश्चये सति सङ्ख्यासाम्यात् ब्रह्मादयः कारणपुरुषा इत्यवधार्यन्ते। ते हि ब्रह्मादिक्रमेण सृष्ट्यादिकर्तृत्वात् सदाशिवादिक्रमेणोत्तरोत्तरकारणत्वाच्च कारणपुरुषाः। यद्यपि ते परमेश्वरानुग्रहादाधि-कारिकपदान्यवाप्ताः जीवविशेषाः न स्वयं सृष्ट्यादिकर्तारो नाप्युत्तरोत्तरकारणानि। किंतु तानधिष्ठाय वर्तमानः शिव एव। ''लोकानुग्रहणायैव शिवेन परमेष्ठिना। सदाशिवादयस्सर्वे मूर्त्यात्मानो ह्यधिष्ठिताः। अयस्यग्नौ समाविष्टे दाहोऽग्नेरेव नायसः। मूर्त्यात्मस्वेवमैश्वर्यमीश्वरस्यैव नात्मनाम्। न हि काष्ठो ज्वलत्यूर्ध्वमग्निरेव ज्वलत्यसौ। काष्ठस्याङ्गारता नाग्नेरेवमत्रापि योज्यताम्। मूर्त्यात्मस्वपि रागाद्या दोषास्सन्त्येव वस्तुतः। तथापि तेषामेवैते न शिवस्य तु सर्वथा। अग्नावपि समाविष्टे ताम्रं खलु सकालिकम्। इति नाग्निरसौ दूष्यस्ताम्रसंसर्गकारणात्। नाग्नेरशुचिसंसर्गादशुचित्वमुपेयते। अशुचेस्त्वग्निसंयोगाच्छुचित्वमुपजायते। एवं शोध्यात्मसंसर्गान्न ह्यशुद्धः शिवो भवेत्। शिवसंसर्गतस्त्वेष शोध्यात्मैव विशुद्ध्यति।।'' इत्यादि शिवपुराणवचनप्रामाण्यात्। 'तेजोऽतस्तथा ह्याहे' (ब्र॰ २-३-१० सू) त्यधिकरणभाष्ये तथैव प्रतिपादयिष्यमाणत्वाच्च। तथापि तदधिष्ठातुः शिवस्यैव कारणत्वं तेषूपचर्य ते कारणपुरुषा इति व्यपदिश्यन्ते। ते च ब्रह्मादिक्रमेण पृथिव्यादिभूतानामधिदेवताः। एवं च पृथिव्या ॐषधयः। ॐषधीभ्योऽन्नमि'ति श्रुतेः अन्नकारणत्वादन्नशब्दलक्षितायाः पृथिव्या देवतात्वात् अन्नमयश्चतुर्मुखः। 'आपोमयः प्राण' इति श्रुतेः प्राणकारणतया प्राणशब्दलक्षितानामपां देवतात्वात्प्राणमयो विष्णुः। एवं तेजोवाय्वाकाशेषु

केनचित्सम्बन्धेन मनोविज्ञानानन्दशब्दानां लक्षणामुपपाद्य मनोमयादयो रुद्रेश्वरसदाशिवा इति समर्थनीयम्। चेतनत्वमुक्तप्राप्यपरमशिवलोकनेदिष्ठलोकाधिष्ठातृत्वलिङ्गानुगृहीतया पञ्चसङ्ख्ययान्नमयादयो ब्रह्मादय इति निश्चिते अन्नमयप्राणमयशब्दयोः प्रसिद्धसम्बन्धाधीनलक्षणामूलया वृत्त्या ब्रह्मविष्णुपरत्वलाभे च सति मनोमयादिशब्दानां रुद्रादिपरत्वस्यावश्याङ्गीकरणीयत्वात्। एवं चानन्दमयः सदाशिवः तत्प्रतिष्ठारूपं ब्रह्म परमशिव इति स्थिते तयोरपृथक्सिद्धिरूपादभेदादानन्दमयशब्दो ब्रह्मपर इत्यभिप्रेत्यानन्दमयो ब्रह्मेति सूत्रकारोक्तिरिति। एवं चायमन्येषां पक्षेऽधिकरणप्रकारः। 'सोऽकामयते'त्यादिना जगत्कारणत्वेन प्रतिपाद्यमान आनन्दमयः किमाकाशाभिमानी सदाशिवाख्य आधिकारिकपुरुषः किं वा परमशिवाख्यं परब्रह्मेति संशये पूर्वपक्षः-चेतनत्वोपासनाप्राप्यत्वलिङ्गसहकृतया पंचसङ्ख्यया 'आत्मन आकाशस्सम्भूत'इत्यादिप्राचीनवाक्यप्रतिपन्नपञ्चभूतपरिवृत्त्यनुगृहीतयान्नमयादयः पञ्च भूताभिमानिनः आधिकारिकपुरुषा इति निश्चिते स्थानप्रमाणादानन्दमयः आकाशाभिमानी सदाशिव इति युक्तम्। अत एव तस्मिन् 'यदेष आकाश आनन्दो न स्या'दित्याकाशशब्दः श्रूयते। 'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्या'मिति (ब्र० २-१-५ सू) न्यायादाकाशशब्दस्य प्राचीनेन कामनालिङ्गेन तदभिमानिदेवतापरत्वौचित्यात्। एवं चाकाशशब्दसामानाधिकरण्येनानन्दशब्दश्रवणमप्यानन्दमयशब्दस्य स्वार्थिकमयडन्तत्वेनाकाशाभिमानिदेवतापरत्वज्ञापकतयोपपद्यते। 'को ह्येवान्यात्कः प्राण्या'दित्येतदपि तत्रोपपद्यते। यदि सदाशिवो भूताकाशमधिष्ठाय प्राणिनामसङ्कटेनावस्थानं सम्पादयेत् तदा नीरन्ध्रनिविडीभूतानां तेषां श्वासचेष्टयोरसम्भवात् अत एव प्राणनहेतुतया सर्वानन्दकरत्वात् 'एष ह्येवानन्दयाती'त्यादिकमप्युपपद्यते। न चोपक्रमे प्रकृताद्ब्रह्मणो जगदुत्पत्तेरुक्तत्वात् तदनुसारेण जगत्कारणतयोच्यमान आनन्दमयो ब्रह्मेति शङ्कनीयम्। आनन्दमयपुच्छत्वेन तद्व्यतिरिक्ततया निर्दिष्टस्य ब्रह्मणस्तत्त्वायोगात्। 'आत्मन आकाशस्सम्भूत' इत्यस्याकाशाभिमानी सदाशिवः पूर्वकल्पानुष्ठितोपासनामहिम्ना स्वयमशरीरोऽपि स्वसङ्कल्पेन प्रथमं स्वाभिमानविषयकाशं सृष्ट्वा तदवच्छिन्नः स्वयं स्वस्मादेव सम्भूत इत्यर्थकत्वोपपत्तेः। आत्मशब्दस्य स्वशब्दपर्यायत्वात् तत्र 'तस्माद्वा एतस्मादि'ति प्रकृतब्रह्मपरामर्शिसर्वनामसामानाधिकरण्यस्य 'स वा एष पुरुषोऽन्नरसमय' इत्यत्रेव, तदभेददृष्ट्यर्थत्वोपपत्तेः। अन्यथा सर्वनामत एव प्रकृतपरामर्शलाभा'दात्मन' इत्यादिकस्य वैयर्थ्यापत्तेः। न च मुक्तेः प्राक् परिच्छिन्नस्याधिकारिकपुरुषस्य बहुभवनतत्सङ्कल्पाद्यनुपपत्तिः। मुक्तेः प्रागपि विद्यासामर्थ्येन चिच्छक्तिविकासस्याङ्गीकरणीयत्वात्। अन्यथा सौभरिप्रभृतीनां कायव्यूहपरिग्रहाद्यनुपपत्तेः। एवं चान्नमयादिशब्दोक्तब्रह्माद्युपासनया क्रममुक्तिफलकक्रमिकतावल्लोकावाप्त्युक्तिरप्युपपद्यत इति। एवं

प्राप्ते सिद्धान्तः। आनन्दमयो ब्रह्म। निरतिशयत्वेनाभ्यस्यमानस्यानन्दस्य ब्रह्मण्येवोपपत्तेः। विकारभूताधिकारिकपुरुषविशेषपरत्वेनावगतानन्दमयशब्दात् ब्रह्मप्रतीतिर्न सम्भवतीति चेन्न। तेनापि तदवच्छिन्नब्रह्मप्रतीत्युपपत्तेः। 'तं ममायुरमृतमुपास्वे'त्यादिषु चेतनाचेतनात्मकविकार-वाचिशब्दाद्विकारावच्छिन्नब्रह्मप्रत्ययस्य प्रचुरतरमुपलम्भात्। आनन्दयितृत्वव्यपदेशादप्यानन्दमयो ब्रह्म। 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'ति ब्रह्मपरश्रुत्यन्तरैकार्थ्यात्। किंच मन्त्रवर्णिकं ब्रह्मैवानन्दमय इति गीयते। 'तस्माद्वा एतस्मा'दिति सर्वनाम्नोः सन्निहितासन्निहितमन्त्रब्राह्मणप्रकृतब्रह्मपरामर्शित्वात्। न च दृष्टिविध्यर्थस्तत्परामर्शः। प्रतीतभेदयोस्सामानाधिकरण्ये हि दृष्टिविधिरभ्युपगन्तव्यः। न चेह भेदप्रतीतिरस्ति। प्रत्युत 'एतस्माज्जायते प्राण' इत्यादि श्रुत्यन्तरेषु ब्रह्मण आकाशादिस्रष्ट्रभेदप्रतीतेः। न चात्रात्मशब्दस्याधिक्येन वैयर्थ्यपरिहारार्थं स्वस्मादित्यर्थोऽभ्युपगन्तव्य इति भेदप्रतीतिरस्तीति वाच्यम्। 'तस्यैष एव शारीर आत्मा। यः पूर्वस्ये'त्यत्रानुवादार्थत्वेन तदुपयोगात्। तथापि पुच्छपुच्छवद्भावेन ब्रह्मानन्दमययोः भेदप्रतीतिंरस्तीति चेन्न। एकस्यैव विकारानवच्छेदतदवच्छेदाभ्यामौपाधिकभेदसत्त्वेन तत एव प्रियमोदादीनां दक्षिणोत्तरपक्षत्वादिकल्पनवत् पुच्छतद्वद्भावकल्पनस्याप्युपपत्तेः। एवं चान्नमयाद्युपासनापि 'येऽन्नं ब्रह्मोपासत' इत्यादिवाक्यशेषानुसारेण तत्तदवच्छिन्नब्रह्मोपासने चतुर्मुखाद्यवच्छिन्नब्रह्मोपासनया तत्तल्लोकप्राप्तिपूर्वक 'मानन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चने'ति मन्त्रोक्तमुक्तिप्राप्तिरित्येतदप्युपपद्यते इति। सूत्राण्यप्यस्मिन्नर्थे निगदव्याख्यानानि। ननूपन्यस्तमतत्रयमध्ये किं मतं ग्राह्यमित्याकाङ्क्षायामाह-**सर्वथेति**॥ यद्यानन्दमयः साक्षात्परं ब्रह्म यदि वा तदीया चिच्छक्तिः यदि वा सदाशिवेऽभिव्यक्तं परं ब्रह्म सर्वथाप्यानन्दमयो न जीवः। किं तु परमेश्वर इत्यतिव्याप्तिनिरासादधिकरणप्रयोजनसिद्धिरविशिष्टेति किं तत्र विशेषविचारेणेत्यभिप्रायः॥

॥ इत्यानन्दमयाधिकरणम् ॥६॥

अथ इतरानुपपत्त्यधिकरणम्-॥७॥

मा भूद्व्यष्टिजीवे ब्रह्मलक्षणस्यातिव्याप्तिः। सकलशरीराभिमानितया समष्टिजीवरूपे हिरण्यगर्भे तु स्यात्। 'अम्भस्यपार' इति परमात्मसूक्तोपक्रमोपसंहारमध्यपरामर्शावगमितायास्तस्य जगत्कारणतायाः प्रत्याख्यातुमशक्यत्वादिति शङ्कानिराकरणार्थत्वेन प्रत्युदाहरणसङ्गत्योत्तरा-धिकरणमवतारयति-**ब्रह्मण इति**।सू०॥ **नेतरोऽनुपपत्तेः**॥१७॥ **यतः प्रसूतेति**। जगतः प्रसूती प्रस्तुतजगत्प्रसवधर्मिणी प्रकृतिर्यस्मात्प्रसूता॥ ङीप् छान्दसः। यद्वस्तु भूम्यां तत्तल्लोकस्थाने तोयेन शरीरारम्भकेण जलप्रधानेन पार्थिवादिद्रव्येण जीवान् व्यससर्ज सृजतिस्म। लिट्यडागमश्छान्दसः।

यच्च वस्तु ॐषधीभिः स्थावरैः सह पुरुषान् देवमनुष्यादीन् पशून् तिर्यग्जातीयांश्चेत्येव **स्वसृष्टानि** सर्वाणि चराचराणि स्थावरजङ्गमानि भूतान्यन्तर्यामितया विवेशेत्यर्थः। अत्र मन्त्रे विशेषाश्रवणात् पूर्वापरमन्त्रेषु सतां हिरण्यगर्भपरब्रह्मविषयश्रुतिलिङ्गानां बलाबलानवधारणाच्च संशयमाह-**अत्रे**ति। 'नेतरोऽनुपपत्ते' रितिसूत्रानुसारेणान्यो वेति सन्देहकोटिर्दर्शिता। अन्यशब्दार्थो हिरण्यगर्भ इति तद्विवरणं पूर्वपक्षपरिग्रहवाक्येन कृतम्। ननु, कुतो हिरण्यगर्भ इति निर्णयः। उभयत्र प्रमाणाविशेषादित्याशङ्कते-**कथमिति**। बलवतः समुद्रशायित्वलिङ्गादित्याह-**तल्लिङ्गादिति**। समुद्रशायित्वस्य तल्लिङ्गत्वं तावद्विष्णुपुराणसम्मत्योपपादयति-**एकार्णवे त्विति**। नारायणात्मकः जलनिवासेन नारायणसंज्ञा प्राप्त इत्यर्थः। 'स चाप्सु शयनादेव शिवात्मा स्वेच्छया चिरम्। नारायणाख्यामवहच्छक्तिरूपः प्रजापतिः॥' इति स्मृतेः। यद्वा नारायणस्य विष्णोर्देहं प्राप्त इत्यर्थः। 'ततोऽवतीर्य विश्वात्मा देहमाविश्य चक्रिणः। सुष्वाप योगशयने एकीभूयाथ चक्रिणा॥' इति कूर्मपुराणवचनात्। **त्रैलोक्येति**। प्रलयसमये त्रैलोक्यस्य ग्रसनेन पुष्ट इत्यर्थः। 'जनस्थैर्योगिभिर्देवश्चिन्त्यमानोऽब्जसम्भव' इति वाक्यशेषेण ब्रह्मशब्दस्य कमलासनपरत्वं तत्रैव स्पष्टीकृतम्। अस्तु समुद्रशायित्वं कमलासनलिङ्गं तत्र श्रूयत इत्याशङ्क्याह-**तविहेति**। यमन्तः समुद्रे कवयः प्राज्ञाः वयंति ध्यानेन सन्तन्वन्तीति। यद्यपि समुद्रस्थानत्वमात्रमवसीयते। तथापि तत्र निद्राणत्वमेव विवक्षितमित्युपबृंहणानुसारेणावसीयते। तच्च लिङ्गमनन्यथासिद्धत्वात्प्रबलम्। तमोवश्यस्यैव हि तत्सम्भवति। न तु तमोऽतीतस्य परब्रह्मण इति भावः। ननु समुद्रे निद्राणत्वं विष्णोरपि साधारणं कथं हिरण्यगर्भलिङ्गमित्याशङ्क्य शिवव्यावर्तकमेतल्लिङ्गमुदाहृतम्। श्रुतिवशाद्विष्णुव्यावृत्तिरपि लभ्यत इत्यभिप्रेत्याह-**प्रजापतिरिति**। ननु, मध्ये परब्रह्मलिङ्गान्यपि श्रूयन्त इत्याशङ्क्याह-**तस्मादिति**। उपक्रमोपसंहारगतप्रजापतिधातृश्रुतिभ्यां मध्यगतसमुद्रनिद्राणत्वलिङ्गेन च हिरण्यगर्भ एव जगत्कारणत्वादिधर्मैः प्रतिपाद्यत इति निश्चये सति तदनुसारेण मध्यगतान्यलिङ्गानि नेतव्यानीत्यर्थः। तत्र परात्परत्वं 'परात्परतरो ब्रह्मा परात्परतरो हरि' रिति हिरण्यगर्भस्यापि श्रूयमाणमापेक्षिकं नेतव्यम्। अमृतत्वफलप्रदानं जगत्सृष्टयादिकमिव कल्पभेदेन हिरण्यगर्भः करोतीत्यभ्युपगमेनोपपादनीयम्। तमोऽतीतत्वलिङ्गं तु प्रथमश्रुतनिद्राणत्वाक्षिप्ततमोवश्यत्व-विरोधात्स्तुत्यर्थं नेतव्यमिति भावः। **किंचेति**। 'अद्‌भ्यस्सम्भूतो हिरण्यगर्भ इत्यष्टा'विति वाक्येन 'अद्‌भ्यः सम्भूतः पृथिव्यै रसाच्चे'त्यनुवाक्यस्य 'हिरण्यगर्भस्समवर्तताग्र'इत्यादीनामष्टानां मन्त्राणां चास्मिन्सूक्तेऽन्तर्भाव कथनेन तदेकवाक्यतापादितेति ततोऽप्यस्य हिरण्यगर्भपरतावसीयत इत्यर्थः। न'न्वद्‌भ्यस्सम्भूत'- इत्यनुवाको विष्णुपरः। 'ह्रीश्च ते लक्ष्मीश्च पत्न्या'वितिश्रुताल्लक्ष्मीपतित्वलिङ्गादित्याशङ्क्याह- **अद्भ्य इति**। उपक्रमगतप्रजापतिश्रुति-विरोधादुपसंहारगतं लक्ष्मीपदं लज्जावाचिह्रीपदसमभिव्याहारेण पुरुषश्रैष्ठ्यापादकसद्गुणान्तरपरत्वेन

नेतव्यमिति भाव:। ननु, 'हिरण्यगर्भस्समवर्तताग्र'इत्यादिमन्त्राणां स्मृतौ विष्णुपूजायां विनियुक्तत्वाद्विनियोगलिङ्गेन तेषां विष्णुपरत्वमवसीयत इत्याशङ्क्याह- **हिरण्यगर्भ** इति। 'अत्रापी'त्येतदनन्तरं प्रजापतिरेव प्रतिपाद्यत इति पूर्ववाक्यादनुषङ्ग: कार्य:। हिरण्यगर्भश्रुते: कमलासने रूढत्वात्। तन्मन्त्रब्राह्मणे तस्यास्तत्परत्वेन व्याख्याततत्वाच्च। तद्विरोधिविनियोगलिङ्गमात्रमकिञ्चित्करम्। अन्यथा 'हिरण्यगर्भस्समवर्तताग्र'इत्याघारमाघारयती'ति वायव्यपशावैन्द्रे द्वितीयाघारे श्रौतविनियोगदर्शनादिन्द्रस्यैव तत्प्रतिपाद्यत्वप्रसङ्गादिति भाव:। एतेना'द्भ्यस्सम्भूतो हिरण्यगर्भ इत्यष्टा'विति विष्णुपरसन्दर्भैकवाक्यतापादना'दम्भस्य पार'इति सूक्तं विष्णुपरमित्यपि शङ्का निरस्ता। अपिचा'द्भ्यस्सम्भूत' इत्यनुवाक आदित आरभ्य विमृश्यमानो हिरण्यगर्भपर इति स्पष्टमवसीयते। तथाहि अद्भ्भोऽण्डकटाहाधारभूताभ्य: पृथिव्यै रसात् पृथिव्या: कार्यात् तास्वप्सु निवृत्तात् पार्थिवादण्डकटाहाच्च संभूतो हिरण्यगर्भ: विश्वकर्मण: प्रपञ्चविषयसृष्ट्यादिसर्वकार्ययुक्तस्य परमेश्वरस्याधि ऐश्वर्ये समवर्तत तदैश्वर्यविषयोऽभूत्तन्नियम्योऽभूदिति **यावत्।** तस्य हिरण्यगर्भस्य रूपं विदधच्छरीरं सृजन् त्वष्टा सकलप्रपञ्चनगरतक्षा परमेश्वर एति अन्तर्यामितया स्वयमपि तद्रूपं प्रविशति। तदुक्तप्रकारेण पुरुषस्य हिरण्यगर्भस्य विश्वं सर्वमप्युत्पत्त्यादिप्रकारमाजानमज्ञानमिति प्रथममन्त्रस्यार्थ:। तेन ब्रह्माण्डोदरजातो हिरण्यगर्भ: प्रथममन्त्रप्रतिपाद्य इति तावदवसीयते। 'प्रजापतिश्चरती'ति मन्त्रस्यायमर्थ:। प्रजापतिर्जीवसमष्टिरूपो हिरण्यगर्भ: व्यष्टिजीवात्मना गर्भेऽन्तश्चरति तदनन्तरं वस्तुत: स्वयमजायमानोऽपि तत्तद्व्यष्टिजीवशरीरोपाधिभिर्बहुधा सुरनरतिर्यगादिबहुप्रकारेण जायते। तस्य योनिं स्थानं धीरा: धीमन्तो जानन्ति। किं तत्। मरीचीनां पदमादित्यमण्डलं तस्य वेधस: स्थानमिच्छन्तीति। अस्यापि मन्त्रस्य प्रजापतिश्रुत्या सकलजीवसमष्ट्यभिमानिनो हिरण्यगर्भस्य तदहंभावविषयव्यष्टिजीवात्मना गर्भावस्थानजननवर्णनौचित्यात्। तस्यादित्यमण्डलस्थानत्वाच्च स एव हिरण्यगर्भ: प्रतिपाद्योऽवसीयते। हिरण्यगर्भस्य आदित्यमण्डलं स्थानमिति कुत्र प्रतिपन्नमिति चेत् छन्दोगोपनिषदि। तत्र ह्येवं श्रूयते-'असदेवेदमग्र आसीत्तत्सदासीत्तत्समभवत् तदाण्डं निरवर्तत तत्संवत्सरस्य मात्रामशयत तन्निरभिद्यत ते आण्डकपाले रजतं च सुवर्णं चाभवतां तद्रजतं येयं पृथिवी यत्सुवर्णं सा द्यौ: यज्जरायु: ते पर्वता: यदुल्बं स मेघो नीहारो या धमनय: ता नद्यो यद्वास्तेयमुदकं स समुद्रोऽथ यत्तदजायत सोऽसावादित्य: तं जायमानं घोषाउलूलवोऽनूदतिष्ठन् सर्वाणि च भूतानि सर्वे च कामास्तस्योदयं प्रतिपत्त्यायंघोषाउलूलवोऽनूत्तिष्ठन्ति सर्वाणि भूतानि सर्वे चैव कामा'इति। अत्र हि प्रलये प्रपञ्चस्यासच्छब्दोक्ताव्यक्तनामरूपतयावस्थानं तत: सर्गादावाकाशादिमहाभूतसृष्ट्या सच्छब्दवाच्यव्यक्तनामरूपतां ततो महाभूतानां ब्रह्माण्डाद्युत्पादनसामर्थ्यसिद्धये पञ्चीकरणेन त्रिवृत्करणेन वान्योन्यसङ्गतत्वरूपं सम्भूतत्वमण्डोत्पत्तिमण्डस्य द्विधाभावादिकं च पुराणप्रक्रिययैव

निरूप्य तस्य ब्रह्माण्डस्य मध्ये यद्धिरण्यगर्भस्य जननं स्मृतिपुराणेषु प्रतिपादितम्। शतपथब्राह्मणे चोद्धारकाण्डे 'आपो वा इदमग्र आसीत्सलिलमेवे'त्युपक्रस्य' तास्वन्तर्हिरण्मयमण्डं सम्बभूवे' त्यादिना तास्वप्सु ब्रह्माण्डस्योत्पत्तिमभिधाय' तदन्तः पुरुषस्सम्बभूवे'ति तन्मध्ये पुरुषस्योत्पत्तिमुक्त्वा 'स प्रजापति'रिति तत्र प्रजापतिनामकीर्तनेन 'स भूरिति व्याहरत् तदिमं लोकमजनय'दित्यादिना भूलोकादिस्रष्टृत्वकीर्तनेन च तथैव च स्पष्टीकृतम्। तत्स्थाने आदित्यस्य जननमुक्त्वा 'तस्योदयं प्रती' त्यादिना प्रतिदिवसमुदयन् द्वीपान्तरादागच्छन्प्रसिद्धादित्य एवात्रादित्यशब्देनोक्त इति विभावितम्। तेन ज्ञायते हिरण्यगर्भ एवादित्यमण्डलस्थत्वात्तत्रादित्यशब्देनोक्त इति। बृहदारण्यकोपनिषदि च 'यो ब्रह्माणं विदधाति पूर्वमि'ति 'स वै शरीरी प्रथम' इति च श्रुतिस्मृत्योः प्रथमजत्वेन प्रसिद्धं हिरण्यगर्भं 'स यो हैतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मे'ति प्रस्तुत्य 'आप एवेदमग्र आसुस्ता आपस्सत्यमसृजत इत्यद्भ्यस्सम्भूत' इत्युक्तप्रकारेण तस्य सृष्टिमुक्त्वा 'तद्यत्सत्यं असौ स आदित्यो य एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्ष'न्निति तस्यादित्यमण्डलस्थत्वं स्पष्टमेवोक्तम्। मण्डलाभिमानिनामधेयेन मार्ताण्डशब्देन च मृते द्विधाकरणादार्तेऽण्डे जात इत्यर्थे वृद्धैर्व्युत्पादिदितेन ब्रह्माण्डोदरजातो हिरण्यगर्भ एव मण्डलस्थ इति विभावितम्। ततश्च आदित्यमण्डलस्थानत्वात् लिङ्गाद्धिरण्यगर्भः प्रतिपाद्योऽवसीयत इति युक्तमेव। 'वेधस' इति षष्ठ्यन्तया वेधःश्रुत्यापि तथाऽवसीयते। 'यो देवेभ्य' इति मन्त्रस्यार्थः। यो द्युतिमद्भ्य इन्द्रादिदेवेभ्योऽधिकं तपति यस्तेषामग्रे श्रैष्ठ्ये निहितः परमेश्वरेण यस्तेभ्यः पूर्वं जातस्तस्मै रोचमानाय ब्रह्मणोऽपत्याय नम इति। यद्वा देवग्रहणं मनुष्यादीनामप्युपलक्षणम्। ततश्चायमर्थः। यो देवादिभ्यस्तेषां व्यवहारसिद्धये आतपति प्रकाशं करोति। यश्च तेषां पुरोहितः उदयन् प्रतिपुरुषमग्रे निहितः। यश्च तेभ्यः पूर्वं जातः तस्मै नम इति। अत्राप्यादित्यात्मकस्सुरज्येष्ठ इति प्रसिद्धो 'यो देवानां प्रथमं पुरस्ता'दिति 'यो ब्रह्माणं विदधाति पूर्व'मिति च प्रथमसिद्धशरीरत्वेन प्रतिपन्नो हिरण्यगर्भः प्रतिपाद्य इति स्पष्टम्। 'रुचं ब्राह्म'मित्यस्यार्थः। रोचमानं ब्रह्मणोऽपत्यं प्रकृतं हिरण्यगर्भमण्डकटाहनिवर्तनद्वारेणोत्यादयन्तः सदाशिवाद्याः आकाशाद्यभिमानिदेवताः तद्ब्रह्मणोपत्यमुद्दिश्याब्रुवन् यस्त्वां ब्राह्मण एवं वेत्ति तस्य देवास्सर्वे वश्या भवन्तीति। ननु, पूर्वानुवाकरूपपुरुषसूक्तैकवाक्यत्वादस्यानुवाकस्य पुरुषसूक्तस्य च नारायणपरत्वात्कथमस्य हिरण्यगर्भपरत्वमुपपद्यते। उच्यते। पुरुषसूक्ते 'सहस्रशीर्षा पुरुष'इत्यादिभः श्वेताश्वतरोपनिषदि शिवपरत्वेन निर्ज्ञातैर्मन्त्रैः शिवं प्रस्तुत्य 'तस्माद्विराडजायत विराजो अधि पुरुष' इति शिवाद्धिरण्मयतया विविधं राजमानस्याण्डस्य तदनन्तरं तत्र हिरण्यगर्भस्य चोत्पत्तिमभिधाय तस्यैव मुखाद्यवयवेभ्योऽग्न्यादिदेवानां ब्राह्मणादीनां चोत्पत्तिरभिहिता। न तु नारायणस्यावयवेभ्यः। पूर्वं तत्प्रसङ्गाभावात्। ऐतरेयोपनिषदि 'आत्मा वा इदमेक एवाग्र आसी'दित्यादिना परमेश्वरं प्रस्तुत्य 'सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्छयत्तमभ्यतप'दिति तत्कृतां हिरण्यगर्भस्य सृष्टिं तस्य

सृष्ट्युन्मुखतापत्तिं चोक्त्वा 'तस्याभितप्तस्य मुखं निरभिद्यत यथाण्डमुखाद्वाग्वाचोऽग्निर्नासिके निरभिद्येतां नासिकाभ्यां प्राणः प्राणाद्वायुः अक्षिणी निरभिद्येतां अक्षीभ्यां चक्षुश्चक्षुष आदित्यः कर्णौ निरभिद्येतां कर्णाभ्यां श्रोत्रं श्रोत्राद्दिश' इत्यादिनाग्न्यादीनां हिरण्यगर्भावयवेभ्यः पूर्वमुत्पत्तिवर्णनात्। मानवे धर्मशास्त्रे परमेश्वरसृष्टब्रह्माण्डोदरजातं हिरण्यगर्भमेव प्रस्तुत्य 'लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः। ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्तय'दिति स्मरणाच्च। याज्ञवल्क्ये धर्मशास्त्रे परमेश्वरं प्रस्तुत्य 'मुखबाहूरुपज्जास्स्युस्तस्य वर्णा यथाक्रम'मिति स्मर्यत इति चेन्न। तस्योदाहृतश्रुतिस्मृत्यनुसारेण हिरण्यगर्भशरीरानुप्रविष्टतदात्मभूतपरमेश्वरविषयत्वोपपत्तेः। तस्मात्पुरुषसूक्तमारभ्य प्रकृतमेव हिरण्यगर्भमुद्दिश्य प्रवर्तमानस्य 'ह्रीश्च त' इत्यादेरेतदनुवाकवाक्यैकवाक्यतां प्रापितानां हिरण्यगर्भमन्त्राणां च कथमप्यन्यपरत्वाशङ्कानावकाशं लभते। एवं चोक्तमहिमा स एव हिरण्यगर्भः पूर्वकल्पानुष्ठितोपासनालब्धसत्यसङ्कल्पत्वादिमहिमा जगत्प्रसूत्यादिसकलप्रपञ्चहेतुत्वेन प्रतिपाद्यत इत्यतस्तत्रातिव्याप्तं ब्रह्मलक्षणामिति पूर्वपक्षमुपसंहरति-**तत इति। तस्मिन्ननुपपत्तेरिति।** जगत्प्रसवधर्मिणी परा शक्तिर्हि जगत्प्रसूतिः सा परमेश्वरस्य नित्यानपायिनी प्रभेति तस्याः प्रपञ्चमहावृक्षाङ्कुरतयोन्मेषरूपा प्रसूतिः 'प्रज्ञा च तस्मात्प्रसृता पुराणी' त्युक्तप्रकारा परमेश्वरादेव सम्भवतीति। 'तेदव ब्रह्म परमं कवीना'मित्यसाधारणब्रह्मशब्दार्थत्वोक्त्या व्यज्यमानं त्रिविधपरिच्छेदराहित्यरूपतदर्थपौष्कल्यं तत्रैव सम्भवति। 'तदेव भूतं तदु भव्यमाहुरिद'मिति सामान्येन भूतभाविवर्तमानसकलकल्पानुयायिसर्वप्रपञ्चात्मकत्वमुच्यमानमपि तत्रैव सम्भवति। 'तदेव शुक्रममृतं तद्ब्रह्म स आपस्स प्रजापति'रित्यत्र 'शुक्रममृत'मित्युच्यमानं नित्यमुक्तविभूतिकत्वं 'स प्रजापति'रिति प्रजापतिशब्दोक्तहिरण्यगर्भविभूतिकत्वं च तस्मिन्नेव सम्भवति। एकवचनान्तो हि प्रजापतिशब्दो हिरण्यगर्भपरः। न तु दक्षकाश्यपादिपरः। तद्ब्रह्मे'ति 'तु वेदादिविभूतिकत्वपरं तस्मिन्नुपपद्यते। एतान्युक्तानि सर्वाणि जगत्प्रसूतिहेतुत्वादीनि हिरण्यगर्भे नोपपद्यन्त इत्यर्थः। 'परात्पर'मित्यादिकमप्यापेक्षिकत्वादिना योजयितुमिहाशक्यमित्याशयेनाह-**यतः प्रसूतेति।** यस्य जगत्प्रसूतिहेतुत्वादिकमुक्तं यतः परं प्रकृष्टं च यतोऽन्यत्पृथग्भूतं यतोऽणीयः सूक्ष्मतरं च वस्तु नास्तीत्युक्तम्। तस्मात्परं किमधिकं भविष्यति येनेह परात्परत्वमापेक्षिकं नीयेत। 'परात्परतरो ब्रह्मे'त्यत्र तु ततोऽपि परस्यानुपदमेव वर्ण्यमानत्वात्तदापेक्षिकमिति युक्तम्। 'तमसः परस्ता'दित्येतदपि न स्तुत्यर्थं काल्पनिकम्। 'तदक्षरे परमे व्योम'न्निति यस्मिन्नविनाशिनि परमे व्योम्नि प्रागवस्थानमुक्तम्। तस्य हि तमोऽतीतदेशत्वमिहोच्यते। 'य एवं विदुरमृतास्ते भवन्ती'त्येतत्कल्पभेदेनापि हिरण्यगर्भे न सम्भवति। 'यदा चर्मवदाकाश'मिति मन्त्रेण शिवविज्ञानं विना मुक्तेर्गगनवेष्टनवदसम्भावितत्ववर्णनादिति भावः। 'यदा चर्मव'दिति मन्त्रे यदेत्यस्य यदीत्यर्थः।

उपक्रमोपसंहारसिद्धो हिरण्यगर्भ इति शङ्कामनूद्य परिहरति-**यदुक्तमिति। तदप्रयोजकमिति।** मध्यगतैरपि बहुप्रमाणैर्विरोधे सति उपक्रमोपसंहारैकरूप्यमप्रयोजकमित्यर्थः। सूत्रे बहुप्रमाणविरोधं द्योतयितुमेव लिङ्गविशेषमनुपन्यस्य सामान्येनानुपपत्तेरित्युक्तम्। एवं चोपक्रमोपसंहारगतशब्दौ योगेन परमेश्वरे योजनीयावित्याह-**अनुपपत्त्येति।** मुण्डके 'तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते। तपसा चीयते ब्रह्म ततोऽन्नमभिजायत' इति कार्यकारणयोः प्रयुक्तस्य ब्रह्मशब्दस्येवात्र विभूतिविभूतिमतोः प्रयुक्तस्य प्रजापतिशब्दस्यार्थभेदावश्यम्भावेन कस्य चिदवश्यकल्पनीयो योगः प्राकरणिकलिङ्गानुसारात् विभूतिमति प्रयुक्तस्य कल्प्यते। धातृशब्द'स्त्वम्भस्यपार' इति सूक्तोपसंहारगतो न भवति। 'पुरुषस्य विद्महे सहस्राक्षस्य महादेवस्य धीमहि। तन्नो रुद्रः प्रचोदयात्'। 'तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदया' दित्येतदवसानत्वात्परमात्मविषयसूक्तस्य तदनन्तरं रुद्रगायत्रीप्रसङ्गागतानां गणेशगायत्र्यादीनां स्नानार्थदूर्वाधारणादिमन्त्राणां च परमात्मसूक्तान्तर्भावाभावात्। तथैव च भट्टभास्करेण सूक्तमर्यादायाः प्रदर्शितत्वात्। एवं चोपक्रमोपसंहारपर्यालोचनायां प्रजापतिश्रुतेरुपक्रमस्थत्वेऽपि तत एकस्याः प्रत्येकमभ्यस्तयोरौपसंहारिकरुद्रमहादेवश्रुत्योः प्रबलत्वात् सूक्तस्य परमेश्वरपरत्वमेव सिद्ध्यति। अथापि यदि धातृश्रुतेरुपसंहारगतत्वमभ्युपगम्यते तथापि तस्याः परमेश्वरे यौगिकत्वमभ्युपगन्तुं युक्तम्। मध्यगतबहुश्रुतिलिङ्गानुसारादिति भावः। 'यमन्तस्समुद्र' इति त्वेवं नेतव्यम्। समुद्रः पुरुषः। 'नाग्निस्तृप्यति काष्ठानां नापगानां महोदधि'रित्युक्तरीत्या तृप्तिराहित्येन समुद्रसाम्यात्पर्याप्तभोग्यसम्पत्तावपि सम्यगुत्प्लुत्य द्रवंत्यस्मादिन्द्रियाणि इति यौगिकार्थसम्भवात्। अत एव 'स एष पुरुषः समुद्रः सर्वलोकमत्ति। यद्ध किंचाश्नुते अत्त्येनं मन्येते'त्याद्यैतरेयोपनिषदि श्रूयते। एवं च यमन्तःपुरुषे हृदयादिप्रदेशेषु कवयश्चिन्तासन्तानेन तन्तुजालेन पटमिव स्वस्वाभिमतरूपविशिष्टं वयन्तीत्यर्थः। एवं सति 'वयन्ती' त्येतदपि स्वारस्यं लभते। उत्तरनारायणाद्येकवाक्यतापादनेनापि नास्य हिरण्यगर्भपरत्वसिद्धिरित्याह-**अद्भ्य इति।** उत्तरनारायणे हि 'वेदाहमेतं पुरुषं महान्त'मिति द्वितीयमन्त्रः। तत्र श्रूयमाणं तमसः परस्तात् वर्तमानत्वमनन्योपायमुक्तिहेतुवेदनविषयत्वं च हिरण्यगर्भे न सम्भवतीति तस्य शिवपरत्वमवश्यं वक्तव्यम्। तन्निर्वाहाय च 'तस्य त्वष्टा विदधद्रूपमेती'ति पूर्वमन्त्रे हिरण्यगर्भस्यान्तर्यामितया प्रस्तुतः परमेश्वर एव 'एतं पुरुष'मित्यनेन परामृश्यते। न तु हिरण्यगर्भ इत्युपपादनीयम्। एवं च हिरण्यगर्भविषयत्वेऽपि तदन्तर्यामिमहिमपर्यवसाय्येव सोऽनुवाकः। तथा हिरण्यगर्भमन्त्राष्टकमध्ये 'य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेमे'ति पठ्यते। तेन शिवासाधारणं पशुपतित्वं वर्ण्यते। 'एतावन्तो वै पशवो द्विपादश्चतुष्पादश्चे'ति श्रुत्यन्तरदर्शनात्। अत एव श्वेताश्वतरोपनिषदि 'यो देवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः। हिरण्यगर्भं पश्यत जायमानं स नो देवः

शुभया समृत्या संयुनक्तु' इति मन्त्रानन्तरं 'यो देवानामधिपो यस्मिँल्लोका अधिश्रिता' इति मन्त्रस्येदमेवोत्तरार्ध पठ्यते। अतस्तत्र श्रुतो हिरण्यगर्भशब्दः परमेश्वरपरो व्याख्येयः। हिरण्यरूपं वीर्यमस्य गर्भ इति व्युत्पत्तेः। न च 'प्रजापतिर्वै हिरण्यगर्भ' इति तव्द्याख्यानरूपार्थवाददर्शनात् तस्य कमलासनपरत्वं वक्तव्यमिति वाच्यम्। 'हिरण्यगर्भस्समवर्तताग्र' इत्यादि 'आघारमाघारयति' इति वायव्यपशावाघारे मन्त्रविधेः खल्वयमर्थवादः श्रूयते 'प्रजापतिर्वै हिरण्यगर्भः प्रजापतेरनुरूपत्वाये'ति। स त्वमन्त्रके प्राजापत्ये पूर्वाघारे न भवति। किंत्वैन्द्रे मन्त्रवत्युत्तराघारे। तस्मिन्प्रकृतौ मन्त्रकार्यस्य नियमादृष्टस्य कलृप्तत्वेन तदपेक्षितमन्त्रमात्रविधौ लाघवादमन्त्रके पूर्वाघारे प्रकृतावक्लृप्तस्य तस्याप्यत्रैव कल्पनीयतया गौरवादिति स्थापितं दशमेऽध्याये 'हिरण्यगर्भे पूर्वस्य मन्त्रलिङ्गादुत्तरस्य वा मन्त्रार्थत्वा'दिति पूर्वोत्तरपक्ष(जै० १०,३,१३,१५.) सूत्राभ्याम्। तथा चानेन मन्त्रेण विनियोजकश्रुतिबलात् द्वितीयाघारदेवतायाः इन्द्रस्य प्रकाशनं कर्तव्यमिति तन्निर्वाहाय मन्त्रस्थहिरण्यगर्भपदस्येव तव्द्याख्यानरूपप्रजापतिपदस्यापि इन्द्रपरत्वस्य वक्तव्यत्वात् न तद्बलान्मन्त्रगतहिरण्यगर्भपदस्य कमलासनपरत्वप्रसक्तिः। अतश्श्वेताश्वतरोपनिषत्प्रत्यभिज्ञान-गृहीतपाशुपत्यलिङ्गाद्धिरण्यगर्भमन्त्रा अपि परमेश्वरपरा एव। किं तु 'वचनात्त्वयथार्थमैन्द्री स्या'दिति (जै० ३,२,३) न्यायादैन्द्याघारे विनियोगविध्यनुसारेण तदनुष्ठानकाले यथाकथञ्चिदिन्द्रे मन्त्रार्थो योजनीयः। तस्मान्न तदुभयैकवाक्यतयाप्यस्य सूक्तस्य हिरण्यगर्भपरत्वप्रसक्तिरिति भावः। तथाप्युत्तरनारायणपठितः 'प्रजापतिश्चरति गर्भे अन्तः' इति मन्त्रभाग इह 'अम्भस्यपार' इति मन्त्रपठितः परमेश्वरे न सङ्घटते। तत्र हिरण्यगर्भपरत्वेनावधृतत्वादित्याशङ्क्याह-**तत इति**। इह जगत्प्रसूतिहेतुत्वादिपारमेश्वरलिङ्गसत्त्वा 'न्नैतमूर्ध्वं न तिर्यञ्च'मित्यादिश्वेताश्वतरोप-निषद्गतानेकमन्त्रतदंशप्रत्यभिज्ञानसत्तवाच्च तद्विरोधेऽन्यपरकिंचिन्मंत्राशे प्रत्यभिज्ञानमकिञ्चित्करमिति भावः। ननु, तथापि 'अभिमन्ता जीवो नियंतेश्वरस्सर्वाभिमानी हिरण्यगर्भ' इति तापनीयश्रुतेः समष्टिजीवे हिरण्यगर्भ इव परमेश्वरे व्यष्टिजीवात्मना गर्भे सञ्चारो न घटत इति चेन्न। हिरण्यगर्भस्यापि सर्वाभिमानित्वं सर्वशरीरेष्वहंमानवत्त्वमेव। तत्सर्वप्रपञ्चशरीरकस्य परमेश्वरस्य सर्वत्राप्यविशिष्टमिति तत्र व्यष्टिजीवात्मना गर्भसञ्चाराद्युक्तिस्सङ्घटतेतराम्। अत एव श्वेताश्वतरोपनिषद्याम्नायते-'एष हि देवः प्रदिशो नु सर्वाः पूर्वो हि जातः स उ गर्भे अन्तः॥ स एव जातः स जनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्वतोमुख' इति। भो जना अन्तर्यामितया परमेश्वरस्सर्वेषां प्रतयग्रूपस्तिष्ठतीत्यर्थः। अयं मन्त्रः किञ्चित्पाठभेदेनात्रापि सूक्ते श्रूयते। तस्माद्युक्तमुक्तं 'नेतरोऽनुपपत्तेः' इति। तत्र न हिरण्यगर्भ इति निर्देष्टव्ये 'नेतर' इति निर्देशो हिरण्यगर्भः परमेश्वरान्न भिद्यते अतस्तत्र लक्षणसत्त्वं न दोषायेति केषाञ्चिन्मतं निरसितुं कृतः।

तन्निरासहेतुप्रदर्शनार्थत्वेनोत्तरसूत्रमवतारयति-**परमेश्वरेणेति।** अत्रेदं शङ्काबीजम्। प्रपञ्चसृष्टिहेतुकामनावत्त्वं शिवासाधारणमिति तावत्सम्प्रतिपन्नम्। तच्च हिरणयगर्भस्य 'प्रजापतिरकामयत प्रजाः सृजेयेति' इति बहुषु प्रदेशेषु श्रूयते। अतस्तद्धेतुकादनुमानात् 'ब्रह्मा शिवो मे अस्तु सदाशिवों, यो ब्रह्मा ब्रह्मण उज्जभार प्राणेश्वरः कृत्तिवासाः पिनाकी'ति शिवहिरण्यगर्भवाचकसामानाधिकरण्याच्च हिरण्यगर्भः शिवाभिन्नः। अत एव कूर्मपुराणे वसुमनसो राज्ञो जन्मप्रभृति सूर्यभक्तस्य सावित्रीजपेन बहुकालं सूर्यमाराधितवतः तदवसाने तस्मै फलं दातुं सूर्यमण्डलाद्धिरण्यगर्भरूपेण प्रादुर्भूतस्यैव देवस्य क्षणान्तरे परमेश्वररूपेण दर्शनमुक्तम्। "पूर्णे वर्षशते तस्य भगवानुग्रदीधितिः। प्रादुरासीन्महायोगी भानोर्मण्डलमध्यतः। स दृष्ट्वा देववपुषं मण्डलस्थं सनातनम्। स्वयम्भुवमनाद्यन्तं ब्रह्माणं विस्मयं गतः। तुष्टाव वैदिकैर्मन्त्रैः सावित्र्या च विशेषतः। क्षणादपश्यत्पुरुषं तमेव परमेश्वरम्। चतुर्मुखं जटामौलिमष्टहस्तं त्रिलोचनम्। चन्द्रावयवलक्ष्माणं नरनारीतनुं हरम्। भासयन्तं जगत्कृत्स्नं नीलकण्ठं स्वरश्मिभिः।।" इत्यादिना। तस्माद्धिरण्यगर्भस्य शिवाभिन्नत्वात्तत्र लक्षणसत्त्वं न दोषः। अतस्तद्व्यावर्तनाय यत्नो न कार्य इत्येतच्छङ्कानिराकरणार्थं सूत्रम्।।सू।। **भेदव्यपदेशाच्च**।।१८।। 'अस्मिन्नस्य च तद्योगं शास्ती'ति व्यवहिताग्रिमसूत्रादस्मिन्निति पदस्यानयनमभिप्रेत्य व्याचष्टे-**अस्यामिति।** सूत्रे त्वस्मिन्निति पदमुपनिषद्ग्रन्थाभिप्रायम्। तथा चास्यामेवोपनिषदि शिवहिरण्यगर्भयोः भेदे व्यपदिश्यमाने सन्निहिते तदभेदाभिप्रायेण 'यतः प्रसूते'त्यादिना जगत्प्रसूतिकारणत्वादिवर्णनमिति नयनमत्यन्तमयुक्तमिति भावः। 'यो देवाना'मिति मन्त्रः शास्त्रयोनित्वाधिकरणावसाने व्याख्यातः। ननु, ब्रह्मणस्सकाशाद्रुद्रस्योत्पत्तिर्बहुषु प्रदेशेष्वाम्नायते। अतस्तदविरोधार्थमयं मन्त्रः इत्थं व्याख्यातव्यः। महर्षिर्योगबलेन कालत्रयवृत्तांतसाक्षात्कारसमर्थो रुद्रः स्वाविर्भावात्प्रागेव जातं स्वजनकं हिरण्यगर्भं जायमानावस्थाविशिष्टं योगबलेन साक्षात्कृतवानिति। अन्यथा परस्परविरोधेनाप्रामाण्यापत्तेरिति। अवैदिकव्याख्यानमुपसंहारव्याजेन निराकरोति-**अत इति।** अयमाशयः। एवं व्याख्यानेऽपि कथं विरोधस्समाहितो भवति। रुद्रस्य क्वचिद्ब्रह्मणः क्वचिन्नारायणादपि ह्युत्पत्तिः श्रूयते। कल्पभेदेन व्यवस्थितिरिति चेत् किमत्र सा व्यवस्था न प्रवर्तते येनेत्थं व्याख्यातव्यं स्यात्। श्वेताश्वतरपाठानध्ययनप्रयुक्तं चेदं व्याख्यानम्। तत्र हि द्वितीयाध्याये-'यो देवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः। हिरण्यगर्भं जनयामास पूर्वं स नो बुद्ध्या शुभया संयुनक्तु' इत्यप्यस्य मन्त्रस्य पाठो दृश्यते। अतस्तदनुसारेण तदीयचतुर्थाध्यायपाठे तैत्तिरीयपाठे च पश्यतेत्यस्य प्राग्वर्णित एवार्थो ग्राह्यः। वस्तुतस्तु, नात्र कल्पभेदेन व्यवस्था। किंतु परमशिवाद्ब्रह्मण उत्पत्तिरस्मिन्मन्त्रे प्रतिपाद्या। अन्यत्र ब्रह्मणो नारायणाद्वा संहाररुद्रस्योत्पत्तिः प्रतिपाद्येति व्यवस्था। अत्र हि दहरविद्योपास्यतया निर्धारणीयस्यास्य विभूतिषु 'स ब्रह्मा स शिवस्सेन्द्र' इति संहाररुद्रोऽपि गृहीतः।

'नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायते अथ पुनरेव नारायणस्सोऽन्यत्कामो मनसा ध्यायत तस्य ध्यानान्तस्थितस्य ललाटात्स्वेदोऽपतत् ता इमा आपः प्रतता आसुः। तासु तेजो हिरण्मयमण्डं तत्र ब्रह्मा चतुर्मुखोऽजायत। अथ पुनरेव नारायणः सोऽन्यत्कामो मनसाध्यायत। तस्य ध्यानान्तस्थस्य ललाटान्त्र्यक्षः शूलपाणिः पुरुषोऽजायत। विभ्रत्सत्यं ब्रह्मचर्यं तपो वैराग्य'' मित्यादि श्रुत्यन्तरयोस्तु ब्रह्मसहपाठात् 'एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ मम। मया दर्शितपन्थानौ सृष्टिसंहारकारका'विति महाभारते ''ततो मे सहसोत्पन्नः प्रसादो मुनिपुङ्गवाः। चतुर्मुखस्ततो जातो ब्रह्मा लोकपितामहः। तदन्तरेऽभवत्क्रोधः कस्माच्चित्कारणात्तदा। आत्मनो मुनिशार्दूलास्तत्र देवो महेश्वरः। रुद्रः क्रोधात्मको जज्ञे शूलपाणिस्त्रिलोचनः। तेजसा सूर्यसङ्काशः त्रैलोक्यं संहरन्निव।।'' इति कूर्मपुराणे च नारायणवचनैरुपबृंहणाच्च रुद्रशब्देन स एव मूर्त्यन्तर्गतसंहाररुद्रो गृहीतः। एवं शतपथब्राह्मणादिषु ब्रह्मण उत्पन्नत्वेन प्रतिपादितः स एव संहाररुद्रः। कथं ब्रह्मप्रभवस्य हि रुद्रस्य स्थाणुरित्यसाधारणं नाम। यथोपेन्द्रस्य विष्णुरिति यथावा यदूद्वहस्य कृष्ण इति। ब्रह्मप्रभवं ब्रह्मनियोगात्सृष्टौ प्रवृत्तं जरामरणहीनानेव सृजन्तमेवंभूताः प्रजा मा स्राक्षीरिति पुनर्ब्रह्मवचनात्सृष्टेर्निवृत्तं रुद्रं प्रस्तुत्य 'स्वात्मजैरेव तै रुद्रैर्निवृत्तात्मा व्यतिष्ठत। स्थाणुत्वं तेन तस्यासीद्देवदेवस्य शूलिन' इति कूर्मपुराणे, 'ततः प्रभृति देवोऽसौ न प्रसूते शिवाः प्रजाः। ऊर्ध्वरेताः स्थितः स्थाणुर्यावदाभूतसम्प्लव'मिति शिवपुराणे, 'ततः प्रभृति विश्वात्मा न प्रसूते शिवाः प्रजाः। स्थाणुवन्निश्चलो यस्मात्स्थितः स्थाणुरतस्समृत' इत्यादित्यपुराणे च स्थागुणशब्दस्य तन्नामत्वप्रतिपादनात्। स्थाणुनाम्नश्च रुद्रस्य महाभारते सभापर्वणि 'यत्र भूतपतिः सष्ट्वा सर्वलोकान्सनातनः। उपास्यते तिग्मतेजा वृतो भूतैस्सहस्रशः' इति मैनाके शिवस्य सन्निधानमुक्त्वा 'नरनारायणौ ब्रह्मा यमः स्थाणुश्च पञ्चमः। उपासते यत्र परं सहस्रयुगपर्यय'इति तदुपासकेषु परिगणनं कृतम्। राजधर्मे च 'भूयस्स भगवान्ध्यात्वा चिरं शूलवरायुधः। तस्य तस्य निकायस्य चकारैकैकमीश्वरम्। देवानामीश्वरं चक्रे देवं दशशतेक्षणम्।। यमं वैवस्वतं चापि पितृणामकरोत्पति'मित्युपक्रम्य 'रुद्राणामपि चेशानं गोप्तारं विदधे प्रभुः। महात्मानं महादेवं विशालाक्षं सनातन'मिति तस्य शिवनियम्येषु परिगणनं कृतम्। 'विशालाक्ष'इत्यपि स्थाणुनाम्नो रुद्रस्य नामान्तरम्। राजधर्म एव प्रदेशान्तरे ब्रह्मप्रणीतं नीतिशास्त्रं प्रस्तुत्य 'ततस्तां भगवान्नीतिं पूर्वं जग्राह शङ्करः। बहुरूपो विशालाक्षः शिवस्स्थाणुरुमापति'रिति यस्य तत्र प्रयोगात्। अनन्तरं 'स देवस्सर्वभूतात्मा महादेवस्सनातनः। असङ्ख्यातसहस्राणां रुद्राणां स्थानमव्ययम्। युगानामायुषो ह्रासं विज्ञाय भगवान् शिवः। सञ्चिक्षेप ततश्शास्त्रं महार्थं ब्रह्मणां कृतम्। वैशालाक्षमिति प्रोक्तं तदिन्द्रः प्रत्यपद्यते'ति तत्प्रणीते नीतिशास्त्रे वैशालाक्षसमाख्याकीर्तनाच्च। तस्मादुपपन्नेयमुक्तव्यवस्था। रुद्रस्य क्वचिन्नारायणादुत्पत्तिः प्रतिपाद्यते क्वचिच्चतुर्मुखादित्यादिकस्य तु कल्पभेदेन व्यवस्था। सा त्वध्यायान्तिमाधिकरणे

पुराणप्रामाण्यव्यवस्थापनावसरे प्रदर्शयिष्यते। यद्वा। संहाररुद्रस्यापि न ब्रह्मणो नारायणाद्वोत्पत्तिः। किंतु तदंशस्य नीललोहितरुद्रस्यैव। यस्य महाभारते 'ततः पार्श्वे वृषाङ्कस्य ब्रह्मचारी व्यवर्तत। पिङ्गाक्षस्तपसा श्रेष्ठो बलवान्नीललोहित'इति कृष्णार्जुनयोः कैलासयात्रायां कैलासे श्रीकण्ठपार्श्वेऽवस्थानमुक्तम्। यस्य च कूर्मपुराणे ब्रह्मपञ्चमशिरोलवनप्रस्तावे शिवाविर्भावात्पूर्वमाविर्भाव उक्तः। तत्र हि ब्रह्मनारायणयोः परस्परोत्कर्षे विवदमानयोः नीललोहितरुद्रस्याविर्भाव उक्तः। तस्मिन् ब्रह्मणा 'जानासि पूर्वं हि भवान् ललाटान्मम शङ्कर। प्रादुर्भावं तवेशान मामतः शरणं व्रजे'ति सावज्ञमुक्ते तत्प्रेरितेन भैरवेण ब्रह्मणः पञ्चमे शिरसि च लूने तदनन्तरं शिवस्याविर्भाव उक्तः। 'अथान्वपश्यद्गिरिशं मण्डलान्तरसंस्थितम्। महासीनं महादेव्या महादेवं सनातन'मित्यादि प्रपञ्चेन तत्स्तुतिनमस्काराभ्यां ब्रह्मणा प्रसादितस्य तं प्रीतिवचनैः सान्त्वितवतश्शिवस्य नीललोहितं प्रति वचनं श्रूयते। 'प्रोवाचाग्रेऽवतिष्ठन्तं नीललोहितमीश्वरम्। एष ब्रह्मास्य जगतः सम्पूज्यः प्रथमः सुतः। आत्मनो रक्षणीयस्ते गुरुर्ज्येष्ठः पिता तवे'ति कल्पादौ परमशिवात्त्रयाणामुत्पत्तौ ज्येष्ठः। अस्मिन्नीललोहितरुद्रावतारे पिता उभयथापि गुरुरित्यर्थः। इयं च नीललोहितरुद्रस्य ब्रह्मणो नारायणाद्वोत्पत्तिः नारायणस्य काश्यपदशरथादिभ्य उत्पत्तिरिवैच्छिकाविर्भावरूपा। अत एव कौर्मे नारायणं प्रति शिववचनम्। 'अहं च भवतो वक्त्रात्कल्पान्ते घोररूपधृक्। शूलपाणिर्भविष्यामि क्रोधजस्तव पुत्रक'इति। 'अनादिनिधनो देवः चैतन्यादिसमन्वितः। ज्ञानानि च वशे यस्य तारकादीन्यशेषतः। अणिमादिगुणोपेतमैश्वर्यं न च कृत्रिमम्। सृष्ट्यर्थं ब्रह्मणः पुत्रो ललाटादुत्थितः प्रभुः। ततापं परमं घोरं ततो विप्राश्चतुर्मुखः। सृष्ट्यर्थं ब्रह्मणस्तस्य भ्रुवो घ्राणस्य मध्यतः। अविमुक्ताभिधाद्देशात्स्वकीयात्तु विशेषतः। त्रिमूर्तीनां महेशस्य द्विजा वेदान्तवित्तमाः। अंशभूतो महादेवः सर्वलोकनमस्कृतः। अर्धनारीश्वरो भूत्वा प्रादुरासीत्कृपानिधिः। तस्य हृत्कमलस्थस्य नियोगादंशजो विभोः। ललाटं तस्य निर्भिद्य प्रादुरासीत्प्रभोर्मुखात्। निर्दिष्टः परमेशेन महेशो नीललोहितः। पुत्रो भूत्वानुगृह्णाति ब्रह्माणं ब्रह्मणोऽनुज'इत्यादिमहाभारतस्कान्दलैङ्गशैवपुराणादिवचनानि चात्र द्रष्टव्यानि। तस्मान्त्रिमूर्तीनां परस्परस्मादुत्पत्तिसत्त्वेऽपि ब्रह्मविष्णुरुद्रादिक्रमिकसर्वप्रपञ्चकारणं संसाररुजां द्रावकः परमशिव एवेति तद्विषयस्य 'यो देवाना'मिति मन्त्रस्य नार्थान्तरकल्पनशङ्कावकाश इति। अथोत्तरसूत्रमवतारयति-**पुनराशङ्क्येति**। आशङ्काभिप्रायः पूर्वसूत्रावतारिकायां दर्शितः।।सू।। **कामाच्च नानुमानापेक्षा**।।१९।।

इति शिवार्कमणिदीपिका षष्ठमानन्दमयाधिकरणम् समाप्तम्।

अथ अन्तरधिकरणम्॥ सू–२०–२१॥

शाङ्करभाष्यम्

अन्तस्तद्धर्मोपदेशात्॥२०॥

इदमाम्नायते–"अथ य एषोऽन्तरादित्ये हिरणमयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेशा आ प्रणखात्सर्व एव सुवर्णः तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद।" "इत्यधिदैवतम्" (छा० १।६।६।७।८)। "अथाध्यात्ममपि" "अथं य एषोऽन्तरक्षिणी पुरुषो दृश्यते" (छा० १।७।१।५) इत्यादि। तत्र संशयः–किं विद्याकर्मातिशयवशात्प्राप्तोत्कर्षः कश्चित्संसारी सूर्यमण्डले चक्षुषि चोपास्यत्वेन श्रूयते, किंवा नित्यसिद्धः परमेश्वर इति॥ किं तावत्प्राप्तम्? संसारीति। कुतः? रूपवत्त्वश्रवणात्। आदित्यपुरुषे तावद् हिरण्यश्मश्रु इत्यादि रूपमुदाहृतम्। अक्षिपुरुषेऽपि तदेवातिदेशेन प्राप्यते–"तस्यैतस्य तदेव रूपं यदमुष्य रूपम्" इति। न च परमेश्वरस्य रूपवत्त्वं युक्तम्; "अशब्दमस्पर्शमरूपमव्ययम्" (का० १।३।१५) इति श्रुतेः। आधारश्रवणाच्च–"य एषोऽन्तरादित्ये" "य एषोऽन्तरक्षिणी"इति। न ह्यनाधारस्य स्वमहिमप्रतिष्ठस्य सर्वव्यापिनः परमेश्वरस्याधार उपदिश्येत। "स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिनि'(छा० ७।२४।१)इति, "आकाशवत्सर्वगतश्च नित्य" इति च श्रुती भवतः॥ ऐश्वर्यमर्यादाश्रुतेश्च। "स एष ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां च" (छा० १।६।७)इत्यादित्यपुरुषस्यैश्वर्यमर्यादा। "स एष ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्कामानां च" (छा० १।७।६)इत्यक्षिपुरुषस्य। न च परमेश्वरस्य मर्यादावदैश्वर्य युक्तम्; "एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय" (बृ० ४।४।२२)इत्यविशेषश्रुतेः। तस्मान्नाक्ष्यादित्ययोरन्तः परमेश्वर इत्येवं प्राप्ते। ब्रूमः– *अन्तस्तद्धर्मोपदेशाद इति*॥ "य एषोऽन्तरादित्ये" "य एषोऽन्तरक्षिणी"इति च श्रूयमाणः पुरुषः परमेश्वर एव, न संसारी। कुतः? *तद्धर्मोपदेशात्*॥ तस्य हि परमेश्वरस्य धर्मा इहोपदिष्टाः॥ तद्यथा–"तस्योदिति नामे" इति श्रावयित्वा तस्यादित्यपुरुषस्य नाम स एष सर्वेभ्यः पाप्मभ्य

उदित:'' इति सर्वपाप्मापगमेन निर्वक्ति। तदेव च कृतनिर्वचनं नामाक्षिपुरुषस्याप्यतिदिशति—यन्नाम तन्नाम इति। सर्वपाप्मापगमश्च परमात्मन एव श्रूयते—''य आत्माऽपहतपाप्मा''(छा० ८।७।१) इत्यादौ। तथा चाक्षुषे ''सैवर्क्तत्साम तदुक्थं तद्यजुस्तद् ब्रह्म इत्यृक्सामाद्यात्मकतां निर्धारयति। सा च परमेश्वरस्योपपद्यते; सर्वकारणत्वात्सर्वात्मकत्वोपपत्तेः। पृथिव्यग्न्याद्यात्मके चाधिदैवतं ऋक्सामे, वाक्यप्राणाद्यात्मके चाध्यात्ममनुक्रम्याह—''तस्यर्क्च साम च गेष्णौ'' ''इत्यधिदैवतम्''। तथाऽध्यात्ममपि ''यावमुष्य गेष्णौ तौ गेष्णौ''इति। तच्च सर्वात्मन एवोपपद्यते। ''तद्य इमे वीणायां गायन्त्येनं ते गायन्ति तस्मात्ते धनसनयः'' (१।७।६) इति च लौकिकेष्वपि गानेष्वस्यैव गीयमानत्वं दर्शयति। तच्च परमेश्वरपरिग्रहे घटते; ''यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा। तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम्'' (१०।४१) इति भगवद्गीतादर्शनात्। लोककामेशितृत्वमपि निरङ्कुशं श्रूयमाणं परमेश्वरं गमयति।।? यदुक्तम्—हिरण्यश्मश्रुत्वादिरूपश्रवणं परमेश्वरे नोपपद्यते—इति, अत्र ब्रूमः—स्यात्परमेश्वरस्याऽपीच्छावशान्मायामयं रूपं साधकानुग्रहार्थम्;। ''माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद। सर्वभूतगुणैर्युक्तं मैवं मां ज्ञातुमर्हसी''इति स्मरणात्। अपि च यत्र निरस्तसर्वविशेष पारमेश्वरं रूपमुपदिश्यते, भवति तत्र शास्त्रम्—''अशब्दमस्पर्शमरूपमव्ययम्'' इत्यादि। सर्वकारणत्वात्तु विकारधर्मैरपि कैश्चिद्विशिष्टः परमेश्वर उपास्यत्वेन निर्दिश्यते—''सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः'' (छा० ३।१४।२) इत्यादिना। तथा हिरण्यश्मश्रुत्वादिनिर्देशोऽपि भविष्यति।। यदप्याधारश्रवणान्न परमेश्वरः—इति, अत्रोच्यते—स्वमहिमप्रतिष्ठस्याप्याधारविशेषोपपत्तेः। ऐश्वर्यमर्यादाश्रवणमप्यध्यात्माधिदैवतविभागापेक्षमुपासनार्थमेव। तस्मात्परमेश्वर एवाक्ष्यादित्ययोरन्त-रुपदिश्यते।।२०।।

***भेदव्यपदेशाच्चन्यः*।।२१।।**

अस्ति चादित्यादिशरीराभिमानिभ्यो जीवेभ्योऽन्य ईश्वरोऽन्तर्यामी; ''य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्मान्तर्याम्यमृत'' (वृ० ३।७।९) इति श्रुत्यन्तरे भेदव्यपदेशात्। तत्र हि ''आदित्यादन्तरो'' ''यमादित्यो न वेद''इति वेदितुरादित्याद्विज्ञानात्मनोऽन्योऽन्तर्यामी स्पष्टं निर्दिश्यते, स एवेहाप्यन्तरादित्ये पुरुषो भवितुमर्हति; श्रुतिसामान्यात्। तस्मात् परमेश्वर एवेहोपदिश्यत इति सिद्धम्।।२१।।

इति शाङ्करभाष्यम् सप्तममन्तरधिकरणम् समाप्तम्।।

वार्तिकम्

''जन्माद्यस्य यतः'' इत्यारभ्य ''तत्तु समन्वयादि''त्यन्तेन जिज्ञास्यब्रह्मणः सूद्रपत्वं निरूपितम्, तदनन्तरं ''सदेवे'' त्यादिवाक्यमुदाहृत्य सतो ज्ञानरूपत्वम् ''ईक्षतेर्नाशब्दमि''त्यनेन। ''आनन्दमयोऽभ्यासात्'' इत्यनेनान्दमयवाक्यमुदाहृत्य तस्य सत्यज्ञानानन्दात्मकस्य ब्रह्मण आनन्दरूपत्वमिति सिद्धं सत्यज्ञानानन्दाद्वयत्वं ब्रह्मणः। सिद्धश्च शास्त्रार्थः। सम्प्रति गतिसामान्यप्रपञ्चनायाग्रिमो ग्रन्थ आरभ्यते। तच्च ब्रह्मणो द्वैरूप्ये सिद्धे सिद्ध्यति। अतस्तदर्थमिदमधिकरणमारभ्यते– *अन्तस्तद्धर्मोपदेशादिति*।। तत्र किञ्चित सविशेषवाक्यमुदाहृत्य तच्चिन्तयितुं शक्यते, इति योग्यत्वात् हिरण्मयवाक्यमुदाहरणम्। पूर्वाधिकरणेनास्यापवादिकी सङ्गतिः, आनन्दमयवाक्यवदेतस्यापि वाक्यस्य निर्विशेषत्वप्रसक्तावपवादात्। प्रसङ्गसङ्गतिर्वा; अन्तरत्वश्रुतत्वसाम्येन मयडन्तपदाभिधेयत्वसाम्येन च हिरण्मयपुरुषस्य स्मृतत्वादुपेक्षानर्हत्वाच्च। प्रत्युदाहरणासङ्गतिर्वा; यथाऽनन्दमयवाक्ये ब्रह्मार्थत्वनिश्चायकप्रमाणमभ्यासादिकारणमस्ति, नैवमत्र, इति तत्प्रातिलोम्येन प्रवर्तनात्। दृष्टान्तसङ्गतिर्वा; यथा प्रियशिरस्त्वादिनिर्देशेऽपि न तत्र सविशेषं ब्रह्म न भवतीत्युक्तम्, एवमत्रापीतिदृष्टान्तेन प्रवर्तनात्। उपोद्घातसङ्गतिर्वा; प्रकृतगतिसामान्यप्रपञ्चनसिद्ध्यर्थचिन्तात्वात्। आक्षेपसङ्गतिर्वा; एतद्वाक्यस्य जीवपरत्व आनन्दमयवाक्यस्यापि ब्रह्मपरत्वाक्षेपात्, वाक्ययोः समानप्रवृत्तिकत्वादिति।।

एवमत्र चिन्त्यते–किं पूर्वोक्तलक्षणं निर्विशेषमेव ब्रह्म, आहोस्वित् सविशेषमुपास्यमस्य रूपान्तरमस्तीति। तदर्थ चायं विचारः–''अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते'' ''अथ य एषोऽक्षिणि पुरुषो दृश्यते'' इत्यध्यात्माधिदैवभेदेनादित्यमण्डलान्तर्वर्तितयाऽक्ष्यन्तर्वर्तितया चोपास्यत्वेन श्रूयमाणः पुरुषः–किं जीवः, किं वा ब्रह्मेति। दृश्यत इति शास्त्रदृष्ट्यभिप्रायं वा, योगिदृष्ट्यभिप्रायं वा। कुतः संशयः? उभयलिङ्गदर्शनात्।।

तत्र जीवलिङ्गानि तावत्–रूपवत्त्वाधारवत्त्वैश्वर्यमर्यादावत्त्वानि।। तत्र–(१) ''य एषोऽन्तरादित्य'' इत्याधारवत्त्वमुपदिश्यते।।

(२) हिरणमय इति रूपवत्त्वम्; मयटस्ताद्रूप्यार्थत्वात्, अर्थान्तरस्य प्रकुतेऽसंभवात्। नहि हिरण्यविकारः पुरुषः संभवति। नापि हिरण्यात्मकः तत्प्रचुरः संभवतीति चेत्=अथैवं मन्यसे–मा भूद्विकारार्थः, स्वार्थिको वा मयट्, प्राचुर्यार्थस्तु स भविष्यति; बहुसुवर्णालङ्कारवति तत्प्रयोगदर्शनात्। अतोऽन्तरासंभवोऽसिद्ध इति–चेत्, न; वाक्यशेषविरोधेन प्राचुर्यार्थत्वशङ्काया अप्यनुपपत्तेः। हिरणमयपदस्यैव ह्यर्थो वाक्यशेषे विव्रियते–''हिरण्यश्मश्रुर्हिरण्यकेश आ प्रणखात् सर्व एव सुवर्ण'' इति। एतैर्हि लुप्तोपमैः पदैर्हिरण्यवर्णत्वं पुरुषस्य ख्याप्यते। अत एवातिदेशवाक्येऽपि–यदमुष्य रूपं तदस्य रूपमिति रूपातिदेश उपपद्यते। तस्मात् ताद्रूप्यार्थेन मयटाऽत्र रूपवत्त्वमुच्यते॥

(३) ऐश्वर्यमर्यादा च श्रूयते–''स एष ये चास्मात् प्राञ्चो लोकास्तेषां चेष्टे देवकामानां चे''त्यादित्यपुरुषस्य। ''स एष एवैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां चे''त्यक्षिपुरुषस्य॥

ब्रह्मलिङ्गानि चैतानि–(१)सर्वपाप्मभ्य उदयः, (२) पृथिव्यग्न्यात्मकऋक्सामगेष्णत्वम्, (३) सर्वगीतिषु गीयमानत्वं च। अत उभयलिङ्गसत्त्वाद् भवति सन्देहः–किमयं जीव एव कश्चित् ज्ञानकर्मभ्यां प्राप्तादित्यादिभावस्तत्तद्रूपादिगुणविशिष्ट उपास्यत्वेन तत्र तत्रोपदिश्यते, किं वा ब्रह्मैव कथञ्चित् तत्तद्गुणविशेषविशिष्टम्–इति॥

तत्र यदि रूपादिमत्त्वं जैवेनैव रूपेण व्याप्तं न कथञ्चिदपि ब्रह्मणि संभवेत, जीवे न सर्वपाप्माभ्युदयलक्षणब्रह्मधर्मः कथञ्चित् संभवेत्, तदा जीव एव सर्वदोपास्यत्वेन तत्तद्गुणविशेषविशिष्टतया वेदान्तेषूपदिश्यते, इति ब्रह्मणः सविशेषत्वाभावेनोपास्यत्वासिद्धेर्न तस्मिन् वेदान्तानां गतिसामान्यसिद्धिः। अथ–सर्वपापोपादानकनिर्गमनादिलक्षणगुणो मुख्यब्रह्मरूपेणैव व्याप्तत्वाद् न कथञ्चिदपि जीवे संभवति, ब्रह्मणि च सर्वकारणे रूपादिमत्त्वं कथञ्चित संभवेत, तदा न जीव उपास्यः। किं तर्हि? ब्रह्मैव सविशेषं सर्वत्रोपास्यम्, इति ज्ञेयत्वेनेवोपास्यत्वेनापि ब्रह्मण एव निर्देशात् तस्मिन् सर्ववेदान्तानां गतिसामान्यसिद्धिरिति॥

किं तावत् प्राप्तम्? आदित्यमण्डलान्तः, अक्षिगोलकान्तश्च जीव एव कश्चिद् देवतात्माभिमान्युपास्यत्वेन निर्दिश्यते, न ब्रह्म। कुतः? *तद्धर्मोपदेशात्*॥ जीवधर्मा एव ह्यत्रोपदिश्यन्ते रूपवत्त्वादयः पूर्वोदाहताः। न चैषां ब्रह्मणि विपक्षे संभवोऽस्ति॥

तथाहि–(१) रूपवत्त्वं तावद् ब्रह्मणि न संभवति; ''अशब्दमस्पर्शमरूपम्'' इत्यरूपत्वश्रुतेः। अपिच रूपं तावत् शरीरधर्मः, न च ब्रह्मणि शरीरमस्ति; ''अशरीरं वाव सन्तं प्रियाप्रिये न

स्पृशतः'' ''अकायमव्रणामि''त्यादिश्रुतेस्तत्प्रतिषेधात्। अपिच शरीरं हि भोगायतनत्वाद् धर्माधर्मकृतम्। न च ब्रह्मणि धर्माधर्मौ स्तः; ''अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्'' ''न प्रियाप्रिये स्पृशत'' इत्यादिश्रतेस्तस्मिन् धर्माधर्मतत्फलप्रतिषेधात्, तद्वत्त्वे ब्रह्मणः संसारित्वप्रसङ्गाच्च। तस्माद् रूपवत्त्वं न ब्रह्मणः संभावनागोचरः।।

(२) नाप्याधारवत्त्वम्, स्वमहिमप्रतिष्ठितत्वश्रुतिविरोधात्, सर्वकारणत्वेन सर्वाधारत्वाच्च।

(३) ऐश्वर्यमर्यादाऽपि ब्रह्मणि नोपपद्यते; ''एष सर्वेश्वर एष सर्वाधिपतिरि''त्यमर्यादैश्वर्यश्रुतेः। तस्मादेषां धर्माणां ब्रह्मण्यसंभवात् संसारिणि संभवाच्च संसार्येवैतैधर्मैरूपास्यः। इतोऽपि संसार्येवोपास्यः, न ब्रह्म; ''तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत'' इति तस्योपास्यत्वप्रतिषेधात्।।

(१) यस्तु—सर्वपाप्मोदयलक्षणो ब्रह्मधर्मोऽस्मिन् वाक्य उदाहृतः, स चादित्यमण्डलान्तर्गतदेवतात्मन्यपि संभवति। देवतात्मा च; प्रापकज्ञानकर्मभ्यां पूर्वसञ्चितसर्वपापदाहात्, देवताशरीरे च पापाजननात्, ''न ह वै देवाः पापं गच्छन्ती''ति श्रुतेः। अपि च सर्वपाप्मभ्य उदयस्तु देवतात्मन एव संभवति; अपगमस्य प्रतियोगिसापेक्षत्वात्, न ब्रह्मणः; तत्र प्रतियोग्यप्रसिद्धेः।।

यत्तु—पृथिव्याद्यात्मकऋक्सामगेष्णत्वं सर्वगीतिषु गीयमानत्वं च, तदप्युपास्यदेवतात्मनः स्तुतये भविष्यति। तस्मात् कस्या अप्यनुपपत्तेरभावात् संभवाच्च जीव एवोपास्यः, न ब्रह्मेति प्राप्तम्।।

एवं प्राप्तेऽभिधीयते— *अन्तस्तद्धर्मोपदेशात्*।। अत्र पूर्वोत्तरपक्षसूत्रद्वयं सूत्रकारेण समानाक्षरत्वात् तन्त्रेणैवोच्चारितम्; ''केदारपोषणरताः काशीतलवाहिनी गङ्गा। कंसं जघान कृष्णः कम्बलवन्तं न बाधते शीतम्।।'' इतिवत्। पूर्वपक्षस्य साक्षात् सौत्रत्वे संभवति, उत्सूत्रं तद्वर्णनस्यायुक्तत्वात्। तेनावृत्त्येदं सूत्रं पूर्वोत्तरपक्षयोर्योज्यते।।

आदित्यमण्डलान्तरूपास्यत्वेन श्रूयमाणः पुरुषः परमेश्वर एव भवितुमर्हति, न जीवः। कुतः? ब्रह्मणो धर्माणां तस्मिन् पुरुषे श्रुत्योपदेशात्। सर्वपाप्मापगमादयो हि ब्रह्मधर्मास्तस्मिन् पुरुषे श्रुत्योपदिश्यन्ते।।

तद्यथा—(१) ''तस्योदिति नामे''त्यादिना पुरुषस्य नाम श्रावयित्वा तन्नाम निर्वक्ति सर्वपाप्मापगमलक्षणब्रह्मधर्मेण—''स एष सर्वेभ्यः पाप्मभ्य उदित'' इति। तदेव चाक्षुषेऽपि पुरुषे—''यन्नाम तन्नामे''त्यतिदिशति। अयं च धर्मो ब्रह्मण्येव निश्चयेन श्रुत्यन्तरे समधिगतः—''य

आत्माऽपहतपाप्मा'' ''अपापविद्धम्'' ''अन्यत्र धर्मादन्यत्राधर्मादि''ति। एतेन–यदुक्तम्–अपगमस्य समानाधिकरणप्रतियोग्यपेक्षणाद् ब्रह्मणि च तदभावाद् न सर्वपाप्मविगमसंभवः–इति, तदपि प्रत्युक्तम्; तदत्यन्ताभावस्यैव तदपगमत्वेन विवक्षितत्वात्, तज्ज्ञानाद् जीवस्य ब्रह्मतां गतस्य सर्वपापगमनाद् वा तेभ्यस्तस्योदयोपपत्तेः। योऽपि पूर्वोक्तरीत्या देवतात्मन्यपि तत्संभव उक्तः, स नोपपद्यते। न हि सर्वात्मना देवतात्मनः पापक्षयः संभवति; ''तद्य इह रमणीचरणा रमणीयां योनिमापद्यन्ते कपूयचरणाः कपूयाम्'' इति श्रुतिविरोधात्, ''न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ती''ति श्रुतिविरोधाच्च। किं तर्हि? यदेव पापां तस्य देवतात्मभावप्राप्तिविराधि, तदेव क्षीयते। अतो न सर्वात्मना निष्पापत्वं देवतात्मनः॥

(२) तथाऽयमपि ब्रह्मधर्मस्तत्रोपदिश्यते–''तस्यर्क् च साम च गेष्णा''विति। गेष्णौ=पर्वणी इत्यर्थः। चाक्षुषे च पुरुषो–''सैवर्क् तत्साम तदुक्थं तद्यजुस्तद् ब्रह्मे''ति पृथिव्यग्न्याद्यात्मकऋक्सामगेष्णत्वमृक्सामादिसर्वात्मत्वं च सर्वकारणस्य ब्रह्मण एवोपपद्यते, नान्यस्य; असंभवात्॥

तथाऽन्योऽपि धर्मस्तत्रोपदिश्यते–''त इमे वीणायां गायन्त्येतं ते गायन्ति तस्मात् ते धनसनय'' इति। विभूतिमन्त इत्यर्थः। लौकिकेष्वपि गानेषु गीयमानत्वं सर्वात्मनो ब्रह्मण एवोपपद्यते; अन्यथाऽन्यगानेनान्यस्य गीयमानत्वानुपपत्तेः। एतेन–एतेषां सर्वेषां धर्माणां देवतात्मन्यसंभवेऽप्येतैरेव प्राशस्त्यं लक्षयित्वा स्तुतिर्भविष्यतीति–परास्तम्; स्वार्थे संभवति लक्षणया स्तुतिपरत्वकल्पनानुपपत्तेः, तद्गुणवत्तयोपासनानुपपत्तेश्च। न च–ब्रह्मण्युपास्यत्वानुपपत्तिस्तत्प्रतिषेधादित्युक्तमिति–वाच्यम्; प्रतिषेधस्य ज्ञेयब्रह्माभिप्रायत्वात्, ब्रह्मण एव सर्वत्रोपास्यत्वात्, ''यद्यद् विभूतिमत्सत्त्वमि''त्यादिस्मृतेः, लौकिकराजाद्युपासनायामप्यंशेन तस्यान्वयात्। एतेन–रूपादिप्रतिषेधोऽपि–व्याख्यातः॥

ननु–(१) उक्तं रूपवत्त्वादयो धर्मा ब्रह्मणि नोपपद्यन्ते–इति, नैष दोषः; सर्वान्तर्यामिणि तत्तदुपाधिमत्तया रूपादिमत्त्वोपपत्तेः, ''य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरम्'' इत्यादिश्रुतेः ''सहस्रशीर्षा पुरुष'' इत्यादिमन्त्रवर्णाच्च मायया निर्मितकायपरिग्रहेणापि तदुपपत्तेः। यदि च मायया शरीरपरिग्रहेऽपि स्वप्नादिशरीरवददृष्टं विना नोपपद्यत इत्याग्रहः, अस्तु तर्हि भक्तार्पिततत्तत्कर्मजनितशुभादृष्टात् तत्परिग्रहः, सर्वजीवोपार्जितशुभाशुभाद्वा। शुभाशुभादृष्टे हि स्वकर्मवशादिष्टा फलानुकूलावीश्वरेच्छाद्वेषाविति वक्ष्यते। तथाच जीवानां शुभाशुभफलदानाय नाम स्वेच्छागृहीततनोर्न तेषामिवादृष्टवशतया संसारित्वप्रसङ्गः; स्वेच्छादेरपि स्वनियम्यत्वेन स्ववशवर्तित्वात्। अत एव सात्त्विकराजसतामसयोनिषु विहारं कुर्वतोऽपि भगवतो लीलाविग्रहमेव तं तं देहं मन्यन्ते सात्वताः। तस्मादुपपन्नं भगवतो रूपवत्त्वम्; विश्वरूपत्वात्॥

तदिदमुक्तम्—*स्यात् परमेश्वरेऽपीच्छावशाद् मायामयं रूपं साधकानुग्रहार्थमिति*।। प्रकृताभिप्रायमेतत्; दुष्टे द्वेषादपि शरीरपरिग्रहस्य भगवतो व्याख्यातत्वात्, "परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय सम्भवामि युगे युग" इति भगवद्वचनात्।।

एतेन—(२) आधारवत्त्वादिकमपि—व्याख्यातम्; अध्यात्माधिदैवभेदेनाधारभेदैश्वर्य-मर्यादाश्रवणोपपत्तेः। अपि च—"तेषां चेष्टे मनुष्यकामानां चे"ति लोककामेशितृत्वं श्रूयमाणं निरङ्कुशं ब्रह्मण्येवोपपद्येत।।२०।।

भेदव्यपदेशाच्चान्यः।।२१।। इति तु सूत्र पूर्वमेवास्माभिर्व्याख्यातं न पुनर्व्याख्यायते। तस्माद् ब्रह्मधर्मोपदेशाद् जीवोपास्यत्वानुपपत्तेश्च ब्रह्मैव मायागृहीततत्तद्गुणविशिष्टतयोपास्यम्, अरूपश्रवणं तु शुद्धज्ञेयब्रह्माभिप्रायम्, इति सिद्धं ज्ञेयमुपास्यं च द्विरूपं ब्रह्म। अतो गतिसामान्यप्रपञ्चनसिद्धिरिति।।२१।।

इति वार्तिकम् सप्तममन्तरधिकरणम् समाप्तम्।।

प्रदीपः

अन्तः=अन्तःस्थः, परमात्मा, तद्धर्मोपदेशात्=उपदिश्यमानतद्धर्मवत्त्वात्। तद्धर्मवत्त्वपदेन तदसाधारणधर्मवत्त्वमेव विवक्ष्यते। अतः पूर्वपक्षेऽपि तद्धर्मवत्त्वेऽपि न क्षतिः; पूर्वपक्ष्यभिमतानां धर्माणां साधारणधर्मत्वादिति सूत्रार्थः॥

अत्र विचारे समालोचनमर्हन्ति प्राकरणिकानि वाक्यानीमानि। छान्दोग्ये प्रथमाध्याये षष्ठे सप्तमे च खण्ड एवमाम्नायते—इयमेवर्गग्निः साम तदेतस्यामृच्यध्यूढं साम तस्मादृच्यध्यूढं साम गीयत इयमेव साऽग्निरमस्तत् साम॥१॥ अन्तरिक्षमेवर्ग्वायुः साम तदेतस्यामृच्यध्यूढं साम तस्मादृच्यध्यूढं साम गीयतेऽन्तरिक्षमेव सा वायुरमस्तत्साम्॥२॥ द्यौरेवर्गादित्यः साम तदेतदेतस्यामृच्यध्यूढं तस्मादृच्यध्यूढं साम गीयते द्यौरेव साऽऽदित्योऽमस्तत्साम्॥३॥ नक्षत्राण्येवर्क् चन्द्रमाः साम तदेतदेतस्यामृच्यध्यढं तस्मादृय्यद्दयूढं साम गीयते नक्षत्राण्येव सा चन्द्रमा अमस्तत्साम्॥४॥ अथ यदादित्यस्य शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं तत्साम तदेतदेतस्यामृच्यध्यूढं साम तस्मादृच्यध्यूढं साम गीयते॥५॥ अथ यदेवैतदादित्यस्य शुक्लं भाः सैव साऽथ यन्नीलं परः कृष्णं तदमस्तत्सामाऽथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आ प्रणखात् सर्व एव सुवर्णः॥६॥ तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद॥७॥ तस्यर्क् च साम च गेष्णौ तस्मादुद्गीथस्तस्मात्त्वेवोद्गीतैतस्य हि गाता स एष ये चामुष्मात् पराञ्चो लोकास्तेषां चेष्टे देवकामानां चेत्यधिदैवतम्॥८॥ अथाध्यात्मं वागेवर्क् प्राणः साम तदेतदेतस्यामृच्यध्यूढं साम तस्मादृच्यध्यूढं साम गीयते वागेव सा प्राणोऽमस्तत्साम॥१॥ श्रोत्रमेवर्ङ् मनः साम तदेतदेतस्यामृच्यध्यूढं साम तस्मादृच्यध्यूढं साम गीयते श्रोत्रमेव सा मनोऽमस्तत्साम्॥३॥ अथ यदेतदक्ष्णः शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं तत्साम तदेतदेतस्यामृच्यध्यूढं तस्मादृच्यध्यूढं साम गीयतेऽथ यदेवैतदक्ष्णः शुक्लं भाः सैव साऽथ यन्नीलं परः कृष्णं तदमस्तत्साम्॥४॥ अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते सैवर्क् तत्साम तदुक्थं तद्यजुस्तद् ब्रह्म तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम॥५॥ स एष ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां चेति तद्य इमे वीणायां गायन्त्येतं ते गायन्ति तस्मात्ते धनसनयः॥६॥ इति॥

इदमुद्गीथोपासनाप्रकरणम्, इत्युपास्यविशेषं प्रतिपादयतीति वक्तव्यम्। अत्र संशयः–किमादित्यमण्डलाद्यन्तरूपास्योऽयं जीवः, उत परमात्मेति। अत्रोपास्यस्य रूढेन विशेष्यवाचकशब्देनानिर्देशाद् विशेषणस्वारस्येनैव निर्णयः कर्तव्यः। विशेषणानि च–''मर्यादाधाररूपाणि संसारिणी परे न तु। तस्मादुपास्यः संसारी कमानधिकृतो रविरि''ति प्रथमकोट्युपोद्बलिका युक्तिः। अस्मिन् पक्षेऽग्न्याद्यात्मकर्गादिरूपत्वं सर्वतादात्म्यं सर्वत्र गानेषु गीयमानत्वम्, सर्वपाप्मोदितत्वं च कथञ्चन स्तावकतया जीवे योजनीयानि, परन्तु स्तावकत्वकल्पनायामसामञ्जस्याद् ब्रह्माव्यभिचरितधर्मयोः सार्वात्म्यसर्वदुरितविरहयोरन्यथाऽनुपपात्त्या ब्रह्मैवोपास्यमिति प्रतीयत इति द्वितीयकयोट्युपोद्बलिका युक्तिः। अस्मिन् पक्षे मर्यादाधाररूपाणमपि कथञ्चन ब्रह्मणि न विरोधो भविष्यति; जीवस्य ब्रह्मकार्यत्वेन जीवधर्माणां ब्रह्मण्यपि संभवात्, अभेदात्। अभेदेऽपि ब्रह्मधर्मास्तु न जीवधर्मा भवन्ति। तदुक्तं भामत्याम्–''समारोपस्य रूपेण विषयो रूपवान् भवेत्। विषयस्य तु रूपेण समारोपो न रूपवानि''ति हि वस्तुस्थितिः। अत्रा विषयपदेनाधिष्ठानं विवक्ष्यते।।

अत्र पूर्वाधिकरणेनेवात्राप्यन्तरस्यैव परमात्मत्वनिरूपणाद् दृष्टान्तसङ्गतिः। अत्र पूर्वपक्षे जीवलिङ्गानामभिभावकत्वं मन्यते, सिद्धान्ते तु ब्रह्मलिङ्गानामिति सिद्धान्तदृष्ट्या सम्भाव्यमानस्वारस्यजीवलिङ्गाभिभूतब्रह्मलिङ्गकत्वाद् गतिसामान्यप्रपञ्चनाय ब्रह्मणि समन्वयाच्चाध्यायसङ्गतिः पादसङ्गतिश्च; स्पष्टब्रह्मलिङ्गवाक्यविचारत्वस्यैव पादसङ्गतित्वात्। ''अनन्तर उपपत्तेरि''त्यत्र तु जीवलिङ्गस्यैव प्राधान्यम्; ''एष दृश्यत'' इत्यस्य जीवासाधारणत्वात्, इति तत्र नासाधारणब्रह्मलिङ्गेन बाधः, किन्तु कारणान्तरेण, इति न तस्यानेन गतार्थत्वम्, तद्वाक्यस्य वात्र विषयवाक्यतेति न दोषः। पूर्वाधिकरणे निर्विशेषं ब्रह्म विचारितम्, अत्र सगुणं ब्रह्मेति मन्तव्यम्।।

अत्र प्रधानं विषयवाक्यं निर्दिशति–*इदमाम्नायत इत्यादिना–इत्यादीत्यन्तेन*।। संशयं संगृह्णाति–*तत्र संशय इत्यादिना–परमेश्वर इतीत्यन्तेन*।। पूर्वपक्षार्थमवतारयति–*किं तावत्प्राप्तमिति*।। तत्र पूर्वपक्षयुक्तयः–

मर्यादाधाररूपाणि संसारिणि, परे न तु।
तस्मादुपास्यः संसारी कर्मानधिकृतो रविः।।

इति।। इयं कारिका भामत्या भाष्यार्थ स्पष्टं विपरोतक्रमेणानुवदति। तथाच रूपवत्त्वाधारवत्त्वैश्वर्यमर्यादाश्रवणान्यथानुपपत्तिः पूर्वपक्षबीजमिति भामत्या आशयः। तत्र रूपवत्त्वं जीवलिङ्गमित्याह–*कुतः रूपवत्त्वश्रवणादित्यादिना–इति श्रुतेरित्यन्तेन*।।

आधारवत्त्वं द्वितीयलिङ्गमाह- *आधारश्रवणाच्चेत्यादिना- श्रुति भवत इत्यन्तेन*।। ऐश्वर्यमर्यादां तृतीयं जीवलिङ्गमाह- *ऐश्वर्यमर्यादाश्रुतेश्चेत्यादिना- इत्यविशेषश्रुतेरित्यन्तेन*।। इति पूर्वपक्षग्रन्थयोजना।।

अत्र कर्मानधिकृतो रविरिति- सर्वदुरितविरहस्यापि जीवधर्मत्वाविरोधोपपादनार्थम्, देवतात्मत्वाद् योगमहिम्ना सर्वतादात्म्यसंभावनार्थं च। सर्वत्र गीतिषु गीयमानत्वं त्वविवक्षितमेव मन्यते, इति तस्य स्तुत्यर्थता पूर्वपक्षिणामनुमतेत्यनुमीयते। अयं चार्थो भाष्यगतेन- संशयवाक्यघटेन विद्याकर्मवशात् प्राप्तोत्कर्ष इति पदद्वयेन सूच्यते। अन्यत् सर्वं स्पष्टार्थम्। यद्यप्य''न्तस्तद्धर्मोपदेशादि''ति सूत्रमेव पूर्वपक्षपरतयापि योजयितुं शक्यते; तद्धर्मोपदेशाद् इत्यस्य जीवधर्मोपदेशादित्यर्थविवक्षया, तथापि नेदं सूत्रकाराभिमतम्; तत्पदवैयर्थ्यापत्तेः, अतः सिद्धान्तपरतयैव योजनमर्हति; पूर्वपक्षस्तूत्सूत्रमेवेत्यभिप्रायेणाह भाष्यकारः- *एवं प्राप्ते ब्रूमः- अन्तस्तद्धर्मोपदेशादिति*।। अन्यथा- उपदिश्यमानतद्धर्मवत्त्वस्य पूर्वपक्षयोजनायां ब्रह्मणि व्यभिचारः स्यादिति भावः। इयमत्र सिद्धान्तकारिका भामत्याः-

सार्वात्म्यसर्वदुरितविरहाभ्यामिहोच्यते।
ब्रह्मैवाव्यभिचारिभ्यां सर्वहेतुर्विकारवत्।।

इति।। यद्यपि सर्वेषु गीयमानत्वमप्यपरं लिङ्गं वर्तते; तथापि तत् सार्वात्म्य एवान्तर्भवतीति मत्वा धर्मद्वयमेवात्र संगृहीतम्। अथवा- सार्वात्म्यतः प्राक् सर्वगानेषु गीयमानत्वमप्युपलक्षणीयम्। अत्रापि विपरीतक्रमेणैव भाष्यार्थानुवादः। तत्र सिद्धान्तपक्षं संगृह्णाति- *य एष इत्यादिना- न संसारीत्यन्तेन*।। तद्धर्मोपदेशपदं व्याचष्टे- *तस्येत्यादिना*।। तत्र प्रथमं धर्मं सर्वदुरितविरहं संगृह्णाति- *तद्यथेत्यादिना- इत्यादावित्यन्तेन*।। सार्वात्म्यं द्वितीयं धर्मं संगृह्णाति- *तथा चाक्षुष इत्यादिना- सर्वात्मन एवोपपद्यत इत्यन्तेन*।। सर्वगानेषु गीयमानत्वं तृतीयं धर्मं संगृह्णाति- *तद्य इम इत्यादिना- गीतादर्शनादित्यन्तेन*।। अथ पूर्वपक्षयुक्तीनां क्रमस्याविवक्षणेन समाधानायाह- *लोककामेत्यादिना*।। रूपवत्त्वस्य ब्रह्मण्यपि संभवमाह- *यत्तूक्तमित्यादिना- भविष्यतीत्यन्तेन*।। आधारवत्त्वमुपपादयति- *यदपीत्यादिना- उपासनार्थमेवेत्यन्तेन*।। इति सिद्धान्तभाष्ययोजना। अथ पदार्थाः- नित्यसिद्धः=विद्याकर्मादिनिरपेक्षसिद्धिमान्। कप्यासम्=कपेरासनम्। पुण्डरीकम्=- रक्ताम्भोजम्। शाबरभाष्ये-''दर्भैः स्तृणीत हरितैरि''त्यत्र दर्भपदस्थाने पुण्डरीकपदोहावसरे हरितैरित्यत्र रक्तैरित्यूहनीयमियुक्तत्वात।। एतेन- पुण्डरीकं सिताम्भोजमिति कोशोऽत्र न विवक्ष्यत इति सूच्यते। स्वमहिमप्रतिष्ठस्य=अन्यानधिष्ठितस्येत्यर्थः। तथाच अनाधारस्येत्यस्य

विवरणम्—स्वमहिमप्रतिष्ठस्येति फलितम्। प्राञ्च:=उपरितना:। अर्वाञ्च:—अधस्तना:। मर्यादावदैश्वर्यम्=परिमितमैश्वर्यम्। ननु—ऋक्सामात्मत्वं कथं सर्वात्मत्वे पर्यवस्यतीत्याशङ्कायामाह—*पृथिव्यग्न्याद्यात्मके इति*।। गेष्णौ=पर्वणी। धनसनय:=विभूतिमन्त:। मायामयम्=मायापरिणामम्। स्वाधीनमयापरिणाममिति यावत्।।२०।।

भेदव्यपदेशाच्चान्य:।।२१।। आदित्यपुरुषात् पृथगन्यत्र श्रुतौ भिन्नस्य परमात्मेना निर्देशाद् आदित्यात् पृथक् परमात्मा प्रसिद्ध इति भाव:। अनेन च—आदित्यमण्डले चेतन: कर्मानधिकृतरवितोऽन्य: परमात्माऽप्रसिद्ध इति शङ्का निवार्यते।।

ननु—आदित्यमण्डले जीवस्य परमात्मनश्चोभयोरपि सत्त्वाविशेषेऽपि अन्तर्यामिब्राह्मणार्थ एवात्रापि विवक्षित इत्यत्र किं प्रमाणमिति—चेत्, "आदित्ये तिष्ठन् आदित्यादन्तर" इति शब्दसामान्येन प्रत्यभिज्ञानमेवात्र प्रमाणमित्याह—*तत्र हीत्यादिना*।। आदित्यादन्तर:=अन्तरादित्य इत्यर्थ:। यद्यप्यत्रादित्यादिति पञ्चमी, तथापि—"उपदेशभेदादिति चेन्नोभयस्मिन्नप्यविरोध" इति न्यायेन सप्तम्यर्थ एव पर्यवसानम्। एतेन—आदित्यशब्दस्य मण्डलपरत्वं प्रत्युक्तम्—वेदतिव्यम्। अन्यत् सर्व स्पष्टार्थम्।।

"रूपादिरहितं ब्रह्म रूपितं श्रुतिमौलिषु। कथं रूपादिमदिति श्रद्दधीमहि कल्पनाम्।।१।।

कर्मणां च फलत्वेन रूपादिकमधीमहे। कर्मलेशविहीनस्य कथं तदुपपद्यते।।२।।

यदि रूपादि मिथ्यैतदविरोधाय कल्प्यते। कथं तद्बोधयन्तीनां प्रामाण्यं घटते गिराम्।।३।।

अतोऽन्यत्रापि रूपादिप्रतिपादनमस्ति यत्। योग्यं हिरण्यगर्भादिसंसारिपरमेव तत्।।४।।

अथवा ब्रह्मणि परे स्तावकत्वेन केवलम्। योजनीयं यथा मोक्षे जक्षणाद्युपवर्णनम्।।५।।

सर्वपाप्मोदितत्वं हि प्राक्तदाच्छादिते भवेत्। कदाचिदपि न ब्रह्म पापाच्छादितमिष्यते।।६।।

नामैव किल नान्वेति कूटस्थे परमात्मनि। तत्र नामनिरुक्त्यर्थस्वारस्यं किं करिष्यति।।७।।

न हि यस्यार्थवादस्य विधिना येन नान्वय:। स्वारस्यं तत्स्तुतौ तस्य सदप्याद्रियते बुध:।।८।।

ऋक्सामाद्यात्मनोऽस्योक्ता स्तुतये दृष्टयेऽपि वा। ऋक्सामयोर्यथाऽत्रैव पृथिव्याद्यग्निरूपता।।९।।

ऋक्सामाद्यैरभेदस्तु ब्रह्मण्यप्यविकारिणि। सिद्धान्ते नाभ्युपगत: कल्प्य: सूर्येऽपि सङ्गत:।।१०।।

सफलानन्यथासिद्ध सर्वपाप्मोदयाहृतम्। अतादृग्रुपवत्त्वादि न संसारित्वसाधकम्।।११।।

जीवस्यापि न युक्तैव वाच्या ह्युद्गमनक्रिया। पापापादानिका त्वेषा नैव युक्ता कथञ्चन।।१२।।

इति।। ''अदृश्यत्वादिगुणको धर्मोक्तेरि''तिवत् सूत्रे ''धर्मोपदेशादि''त्येतावति वक्तव्ये तत्पदं तस्यैव धर्म इति अब्भक्षादिवद् अवधारणगर्भतया फलवचनाद्यनुसारेण सर्वपापविरहरूपतया पर्यवसितस्य सर्वपापोदितत्वस्यादित्यजीव सम्भवाभावरूपमनन्यथासिद्धत्वं तद्विचारद्वारा तत्प्रतिभटस्य रूपवत्त्वादेर्ब्रह्मण्यपि सम्भवरूपमन्यथासिद्धत्वं च सिद्धान्तबीजं ज्ञापयितुम्। तेन ब्रह्मण्यपि सम्भाविततयाऽन्थासिद्धादेकदेशैश्वर्यादस्य बलवत्त्वं लभ्यते। ''आकाशस्तल्लिङ्गादि''तिवत् ''तद्धर्मादि''त्येतावति वक्तव्य उपदेशग्रहणं तद्धर्मस्यैवोपदेशात् फलवचनावगतेन तात्पर्येण प्रतिपादनादित्यर्थकतया सफलत्वरूपतात्पर्यलिङ्गवत्त्वम्, तत्प्रतिभटतया रूपवत्त्वतद्गतादित्यमण्डलादिनिष्ठत्वयोरैन्द्रजालिकदर्शिताद्भुतरूपविशेषतद्गतगोपुरारूढत्वयोरिव दर्शनविषयतयाऽनुवाद्यत्वेनैश्वर्यमर्यादायाः श्रुत्यन्तरसिद्धे सर्वैश्वर्य उपास्यतयाऽवयुत्यानुवाद्यत्वेन च पूर्वपक्ष्यापादितरूपादिवचनाप्रामाण्यपरिहारं च ज्ञापयितुम्। तेन तद्रहिताद्रूपवत्त्वादाधारवत्त्वाच्च बलवत्त्वमस्य लभ्यते। न च–अनन्यथासिद्धत्वेन फलरूपतात्पर्यवत्त्वेन वा एकेनैव बलेन रूपादित्रयाद् बलवत्त्वं लभ्यते, किमुभयज्ञापनेनेति–वाच्ययम्, रूपवत्त्वमपि ब्रह्मण्यसम्भाविततयाऽनन्यथासिद्धम्; ब्रह्मणो रूपवत्त्वे श्रुतिसिद्धतद्धेतुकर्मणः श्रुतिसिद्धतत्कार्यदुःखस्य च तत्र प्रसक्तेः, अत एव रूपोपाधिकमाधारवत्त्वमपि ब्रह्मण्यसम्भाविततयाऽनन्यथासिद्धमित्याशङ्काग्रस्तत्वात् तस्याश्शङ्कायाः फलरूपतात्पर्यवत्तया बलमुपजीव्य प्रदर्शितेन प्रकारेण निरसनीयत्वात्, फलरूपतात्पर्यलिङ्गस्यैकदेशैश्वर्यमपि फलवदिति मन्दशङ्काग्रस्तत्वात् तस्याश्चानन्यथासिद्धबलमुपजीव्य निरसनीयत्वात् तथैव प्राक्फलवचनसद्भावमभ्युपेत्य निरस्तत्वात्। किञ्च तद्धर्मयोरुपदेशादिति द्विवचनान्तसमासेन ब्रह्मैकधर्मस्य सार्वात्म्यस्य प्रतिपादनादित्यपि हेतोरर्थः–इति न्यायरक्षाणिः।।२१।।

इति प्रदीपः सप्तममन्तरधिकरणम् समाप्तम्।

भामती

स्वमतपरिग्रहार्थमेकदेशिमतं दूषयति *इदं त्विह वक्तव्यम् इति*। एष तावदुत्सर्गो यत्–

ब्रह्म पुच्छं प्रतिष्ठेति ब्रह्मशब्दात्प्रतीयते।
विशुद्धं ब्रह्म, विकृतं त्वानन्दमयशब्दतः॥

तत्र किं पुच्छपदसमभिव्याहारादन्नमयादिषु चास्यावयवपरत्वेन प्रयोगादिहाप्यवयवपरत्वात् पुच्छपदस्य तत्समानाधिकरणं ब्रह्मपदमपि स्वार्थत्वागेन कथञ्चिदवयवपरं व्याख्यायताम्? आनन्दमयपदं चान्नमयादिविकारवाचिप्रायपठितं विकारवाचि वा, कथञ्चित् प्रचुरानन्दवाचि वा ब्रह्मण्यप्रसिद्धं कयाचिद् वृत्या ब्रह्मणि व्याख्यायताम्? आनन्दपदाभ्यासेन च ज्योतिप्पदेनेव ज्योतिष्टोम आनन्दमयो लक्ष्यताम्, उतानन्दमयपदं विकारार्थमस्तु, ब्रह्मपदं च ब्रह्मपदं च ब्रह्मण्येव स्वार्थेऽस्तु, आनन्दपदाभ्यासश्च स्वार्थे, पुच्छपदमात्रमवयवप्रायलिखितमधिकरणपरतया व्याक्रियतामिति कृतबुद्धय एव विदाङ्कुर्वन्तु। तत्र

प्रायपाठपरित्यागो मुख्यत्रितयलङ्घनम्।
पूर्वस्मिन्नुत्तरे पक्षे प्रायपाठस्य बाधनम्॥

पुच्छपदं हि वालधौ मुख्यं सदानन्दमयावयवे गौणमेवेति मुख्यशब्दार्थलङ्घनम् अवयवपरतायामधिकरणपरतायां च तुल्यम्। अवयवप्रायलेखबाधश्च विकारप्रायलेखबाधेन तुल्यः। ब्रह्मपदमानन्दमयपदम् आनन्दपदमिति त्रितयलङ्घनं त्वधिकं, तस्मान्मुख्यत्रितयलङ्घनादसाधीयान् पूर्वः पक्षः। मुख्यत्रयानुगुण्येन तूत्तर एव पक्षो युक्तः। अपि चानन्दमयपदस्य ब्रह्मार्थत्वे ब्रह्म पुच्छमिति न समञ्जसम। नहि तदेवावयव्यवयवश्चेति युक्तम्। आधारपरत्वे च पुच्छशब्दस्य प्रतिष्ठेत्येदप्युपपन्नतरं भवति। आनन्दमयस्य चान्तरत्वमन्नमयादिकोशापेक्षया। ब्रह्मणस्त्वान्तरत्वमानन्दमयादर्थाद् गम्यत इति त्र श्रुत्योक्तम्। एवं चान्नमयादिवदानन्दमयस्य

प्रियाद्यवयवयोगी युक्तः। वाङ्मनसागोचरे तु परब्रह्मण्युपाधिमन्तर्भाव्य प्रियाद्यवयवयोगः प्राचुर्य्य च क्लेशेन व्याख्यायेयाताम्। तथा च मान्त्रवर्णिकस्य ब्रह्मण एव ब्रह्म पुच्छं प्रतिष्ठेति स्वप्रधानस्याभिधानात् तस्यैवाधिकारो नानन्दमयस्येति। सोऽकामयतेत्याद्या अपि श्रुतयो ब्रह्मविषया नानन्दमयविषया इत्यर्थसंक्षेपः। सुगममन्यत्।।

सूत्राणि त्वेवं व्याख्येयानि इति। वेदसूत्रयोर्विरोधे गुणे त्वन्याय्यकल्पनेति सूत्राण्यन्यथा नेतव्यानि। आनन्दमयशब्देन तद्वाक्यस्थब्रह्मपुच्छप्रतिष्ठेत्येतद्गर्त ब्रह्मपदमुपलक्ष्यते। एतदुक्तं भवति—आनन्दमय इत्यादिवाक्ये यद् ब्रह्म पुच्छं प्रतिष्ठेति ब्रह्मपदं, तत् स्वप्रधानमेवेति। यत्तु ब्रह्माधिकरणमिति वक्तव्ये ब्रह्म पुच्छमित्याह श्रुतिः, तत्कस्य हेतोः? पूर्वमवयवप्रधानप्रयोगात् तत्प्रयोगस्यैव बुद्धौ सन्निधानात्, तेनायि चाधिकरणलक्षणोपपत्तेरिति।। 'मान्त्रवर्णिकमेव च गीयते*।।१५।। यत्सत्यं ज्ञानमित्यादिना मन्त्रवर्णेन ब्रह्मोक्तं तदेतदुपायभूतेन ब्राह्मणेन स्वप्राधान्येन गीयते—ब्रह्म पुच्छं प्रतिष्ठेति। अवयववचनत्वे त्वस्य मन्त्रे प्राधान्यं ब्राह्मणे त्वप्राधान्यमिति, उपयोंपेयेयोर्मन्त्रब्राह्मणयोर्विप्रतिपत्तिः स्यादिति।

नेतरोऽनुपपत्तेः। अत्र इतश्चानन्दमय इति भाष्यस्य स्थाने इतश्च ब्रह्म पुच्छं प्रतिष्ठेति पठितव्यम्। *भेदव्यपदेशाच्च*। अत्रापीतश्चानन्दमय इत्यस्य चानन्दमयाधिकार इत्यस्य च भाष्यस्य स्थाने ब्रह्म पुच्छं प्रतिष्ठेति च ब्रह्मपुच्छाधिकार इति च पठितव्यम्। *कामाच्च नानुमानापेक्षा*। *अस्मिन्नस्य च तद्योगं शास्ति*। इत्यनयोरपि सूत्रयोर्भाष्ये आनन्दमयस्थाने ब्रह्म पुच्छं प्रतिष्ठेति पाठो द्रष्टव्यः। *तडेतुय्यदेशाच्च*। विकारस्यानन्दमयस्य ब्रह्म पुच्छमवयवश्चेत् कथं सर्वस्यास्य विकारजातस्य सानन्दमयस्य ब्रह्म पुच्छं कारणमुच्येत 'इदं सर्वमसृजत यदिदं किञ्च' इति श्रुत्या? नह्यानन्दमयविकारावयवो ब्रह्मविकारः सन् सर्वस्य कारणमुपपद्यते। तस्मादानन्दमयविकारावयदो ब्रह्मेति तदवयवयोग्यानन्दमयो विकार इह नोपास्यत्वेन विवक्षितः, किन्तु स्वप्रधानमिह ब्रह्म पुच्छं ज्ञेयत्वेनेति सिद्धम्।

पूर्वस्मिन्नधिकरणेऽपास्तसमस्तविशेषब्रह्मप्रतिपत्त्यर्थमुपायतामात्रेण पञ्च कोशा उपाधयः स्थिताः, न तु विवक्षिताः। ब्रह्मैव तु प्रधानं ब्रह्म पुच्छं प्रतिष्ठेति ज्ञेयत्वेनोपक्षिप्तमिति निर्णीतम्। सम्प्रति तु ब्रह्म विवक्षितोपाधिभेदमुपास्यत्वेनोपक्षिप्यते, न तु विद्याकर्मातिशयलब्धोत्कर्षो जीवात्मादित्यपदवेदनीय इति निर्णीयते। तत्र—

मर्य्यादाधाररूपाणि संसारिणि परे न तु।
तस्मादुपास्यः संसारी कर्मानधिकृतो रविः।

हिरण्यश्मश्रुरित्यादिरूपश्रवणात्, य एषोऽन्तरादित्ये य एषोऽन्तरिक्षणीति चाधारभेदश्रवणाद् ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां चेत्यैश्वर्य्यमर्य्यादाश्रुतेश्च, संसार्येव कार्य्यकारणसङ्घातात्मको रूपादिसम्पन्न इहोपास्यः, न तु परमात्मा 'अशब्दमस्पर्शम्' इत्यादिश्रुतिभिः 'अपास्तसमस्तरूपश्च स्वे महिम्नि' इत्यादिश्रुतिभिरपाकृताधारश्च 'एष सर्वेश्वरः' इत्यादिश्रुतिभिरधिगतनिर्मर्य्यादैश्दर्य्यश्च शक्य उपास्यत्वेनेह प्रतिपत्तुम्। सर्वपाप्मविरहश्चादित्यपुरुषे सम्भवति, शास्त्रस्य मनुष्याधिकारतया देवतायाः पुण्यपापयोरनधिकारात्। रूपादिमत्त्वान्यथानुपपत्त्या च कार्य्यकरणात्मके जीवे उपास्यत्वेन विवक्षिते यत्तावत् ऋगाद्यात्मकतयास्य सर्वात्मकत्वं श्रूयते तत्कथञ्चिदादित्यपुरुषस्यैव स्तुतिरित्यादित्यपुरुष एवोपास्यो न परमात्मेत्येवं प्राप्तम्। अनाधारत्वे च नित्यत्वं सर्वगतत्वं च हेतुः। अनित्यं हि कार्य्यं कारणाधारमिति नानाधारम्। नित्यमप्यसर्वगतं यत्तस्मादधरभावेनावस्थितं तदेव तस्योत्तरस्याधार इति नानाधारं तस्मादुभयमुक्तम्। एवं प्राप्तेऽभिधीयते–'अन्तस्तद्धर्मोपदेशात्'।

सार्वात्म्यसर्वदुरितविरहाभ्यामिहोच्यते।
ब्रह्मैवाव्यभिचारिभ्यां सर्वहेतुर्विकारवत्॥

नामनिरुक्तेन हि सर्वपाप्मापादानतयास्यौदय उच्यते। न चादित्यस्य देवतायाः कर्मानधिकारेऽपि सर्वपाप्मविरहः प्राग्भवीयधर्माधर्मरूपपाप्मसम्भवे सति। न चैतेषां प्राग्भवीयो धर्म एवास्ति, न पाप्मेति साम्प्रतम्, विद्याकर्मातिशयसमुदाचारेऽप्यनादिभवपरम्परोपार्जितानां पाप्मनामपि प्रसुप्तानां सम्भवात्। न च श्रुतिप्रामाण्यादादित्यशरीराभिमानिनः सर्वपाप्मविरह इति युक्तम्, ब्रह्मविषयत्वेनाप्यस्याः प्रामाण्योपपत्तेः। न च विनिगमनायां हेत्वभावः, तत्र तत्र सर्वपाप्मविरहस्य भूयो भूयो ब्रह्मण्येव श्रवणात्। तस्यैव चेह प्रत्यभिज्ञायमानस्य विनिगमनाहेतोर्विद्यमानत्वात्। अपि च सार्वात्म्यं जगत्कारणस्य ब्रह्मण एवोपपद्यते। कारणादभेदात् कार्य्यजातस्य, ब्रह्मणश्च जगत्कारणत्वात्। आदित्यशरीराभिमानिनस्तु जीवात्मनो न जगत्कारणत्वम्। न च मुख्यार्थसम्भवे प्राशस्त्यलक्षणया स्तुत्यर्थता युक्ता। रूपवत्त्वञ्चास्य परानुग्रहाय कायनिर्माणेन वा, तद्विकारतया वा सर्वस्य कार्य्यजातस्य, विकारस्य च विकारवतोऽनन्यत्वात्तावशरूपभेदेनोपदिश्यते, यथा 'सर्वगन्धः सर्वरसः' इति। न च ब्रह्मनिर्मितं मायारूपमनुवदच्छास्त्रमशास्त्रं भवति। अपि तु तां कुर्वदिति

नाशास्त्रत्वप्रसङ्गः। यत्र तु ब्रह्म निरस्तसमस्तोपाधिभेदं ज्ञेयत्वेनोपक्षिप्यते, तत्र शास्त्रम् 'अशब्दमस्पर्शमरूपमव्ययम्' इति प्रवर्त्तते। तस्माद्रूपवत्त्वमपि परमात्मन्युपपद्यते, एतेनैव मर्य्यादाधारभेदावपि व्याख्यातौ। इपि चादित्यदेहाभिमानिनः संसारिणोऽन्तर्य्यामी भेदेनोक्तः, स एवान्तरादित्य इत्यन्तः श्रुतिसाम्येन प्रत्यभिज्ञायमानो भवितुमर्हति। *तत्मात्ते धनसनयः इति*। धनकन्तो विभूतिमन्त इति यावन् कस्मात् पुनर्विभूतिमत्त्वं परमेश्वरपरिग्रहे घटत इत्यत आह *यद्यद्विभूतिमद् इति*। सर्वात्मक्तवेऽपि विभूतिमत्स्वेव परमेश्वररूपाभिवरूक्तिः, न स्वविद्यातमः पिहितपरमेश्वरस्वरूपेष्वविभूतिमत्स्वित्त्यर्थः। *लोककामेशितृत्वमपि इति*। अतोऽत्यन्त-पारार्थ्यन्यायेन निरङ्कुशमैश्वर्यमित्यर्थः॥२०-२१॥

इति भामती सप्तममन्तराधिकरणम् समाप्तम्।

श्रीकण्ठभाष्य

।।सू।। अस्मिन्नस्य च तद्योगं शास्ति।।२०।।

अस्मिन् उपनिषत्तन्त्र एव अस्य हिरण्यगर्भस्य तद्योगं तस्य परमेश्वरस्य शेषत्वसंबन्धं शास्ति मन्त्रभागः –'ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिः' (महाना. २१) ।इति। अतः परमेश्वर एव जागत्कारणं, तच्छेषभूतो हिरण्यगर्भ इति सिद्धम्।।

।। इति इतरानुपपत्त्यधिकरणम्।।७।।

अथान्तरधिकरणम्।।८।।

तदितः पूर्वैरधिकरणन्यायैः सर्वज्ञं नित्यतृप्तमनादिबोधं स्वतन्त्रमलुप्तशक्तिकमनन्तशक्तिकं सकलजगदुभयकारणं समस्तोपनिषत्तन्त्रसमन्वयैकप्रतिपाद्यं स्वप्रकाशनिखिलप्रपञ्च-विशिष्टाद्वितीयस्वभावं सञ्चिदानन्दस्वरूपं संसारपाशविच्छेकारणं चिदचिदर्थान्तरं शिवतत्वं परं ब्रह्मेति सिद्धम। तस्य साधकानां संसारभेषजं मनस्समाधानयोग्यं किमपि रूपं प्रदर्शयितुमिदमधिकरणमारभ्यते

।।सू।। अन्तस्तद्धर्मोपदेशात्।।२१।।

'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् सर्व एव सुवर्णस्तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी' (छा. १-६) इति छान्दोग्ये श्रूयतेऽस्य विषतः।। अयमादित्यान्तर्वर्ती हिरण्मयः पुरुषः परमेश्वरो देवताविशेषो वेति संशयः।। एवं सति सर्वाधारस्य सर्वगतस्य परमेश्वरस्यादित्यान्तर्वर्तित्वं हिरण्मयरूपत्वं च न संभवति, स्वेच्छया रूपाङ्गीकारे त्रिलोचनत्वं नियतं तदिह न विद्यते। 'पुण्डरीकमेवमक्षिणी' (छा.१-६) इति लोचनद्वयमेव श्रूयते। अथ वा-स्वेच्छागृहीतोपि देहः संसारिणामिव परमेश्वरस्यापि दुःखमुत्पादयेदेव। स्वेच्छासंबन्धेऽपि पावकस्य दाहकत्वं हि स्वभावः। अतः परमेश्वरस्य शरीरसबंन्धो न युक्तः। तस्मादयं कश्चिद्देवताविशेष एव, न परमेश्वरः इति पूर्वपक्षन्यायः।। सिद्धान्तस्तु - परमेश्वर एव। कुतः? तद्धर्माणामुपदेशात्। 'स एष सर्वेषां लोकानामीष्टे सर्वेषां कामानाम्' 'तस्योदितिनाम स एष सर्वेभ्यः

पाप्मभ्य उदित:' (छा. १-६) इत्यादिना प्रतिपादिता: सर्वलोककामेश्वरत्वसर्वपापराहित्यादयो धर्मा हि पारमेश्वरा:, 'एको हि रुद्रो न द्वितीयाय तस्थुः य इमाल्ँलोकानीशत ईशिनीभि:।।' (श्वे. ३-२) 'एको बहूनां यो वदधाति कामान् (श्वे. ६-१३)' इत्यादिश्रवणात्।। सर्वाधारस्य सर्वगतस्य आदित्यान्तर्वर्तित्वं न संभवतीति यदुक्तं तत्र न विरोध:, सर्वाधार: सर्वगत: परमेश्वर: साधकानुग्रहाय हिरण्मयं किमपि रूपं समास्थाय सवितृमण्डलमधिवसति। शरीरसंबन्धा-दस्मदादिवदीश्वरस्य न संसारदोषापत्ति:। श्रुतिरेव भगवती ह्यस्य शरीरसंबन्धं सर्वपापराहित्यं च प्रतिपादयति। वयं हि श्रुतिप्रामाण्यशरणा न युक्तिं बहु मन्महे। पावकोऽपि संबन्धात् न शक्तिमतां दाहक:। 'यथा कप्यासं पुडरीकमेवमक्षिणी' (छा. १-६) इति त्रिलोचनस्य परमेश्वरस्य लोचनद्वयग्रहणं पुण्डरीकसादृश्यवर्णनार्थं, न तृतीयलोचनाभावद्योतनपरम्। तथा हि-त्रिपुत्रं ब्राह्मणं प्रति 'द्वौ पुत्रावस्याग्निकल्पा'वित्युक्ते द्विसंख्याग्रहणं न शेषपुत्रनिषेधपरं, किन्तु पुत्रद्वयस्याग्निसादृश्यपरम्, तद्वदत्रापि। कमुदकं रश्मिभि: पिबतीति कपिरादित्य:, तेनासितं विकसितं पुण्डरीकं यथा स्फुरति तथा परमेश्वरस्य लोचनद्वयम्। तृतीयलोचनं तु मुकुलितस्वभावं विकसितपुण्डरीकसदृशं न भवति, मुकुलितपुण्डरीकसदृशमित्यभिप्राय:।। 'असौ योऽवसर्पति नीलग्रीवो विलोहित:, उतैनं गोपा अदृशन्नदृशन्नुदहार्य:, उतैनं विश्वा श्रूतानि स दृष्टो मृडयाति न:, (तै. सं. ४-५-१) इति नीलग्रीवस्य परमेश्वरस्य सर्वश्रूतप्रत्यक्षत्वावगमात्, 'स्वरुचाहितमण्डलस्त्रिनेत्रो रवि:' इति तस्य त्रिलोचनत्वावगतेश्च, आदित्य एव प्रत्यक्ष: परमेश्वर: प्रभामण्डलमध्यवर्ती। अन्यथा कथमस्य नीलग्रीवत्वं त्रिलोचनत्वं चोच्येत, 'असावादित्यो ब्रह्म' (तै.आ. २-२) इति ब्रह्मत्वव्यपदेशश्च। तस्मात् 'अन्तरादित्ये' इति मण्डलवर्ती सूर्य एव हिरण्मय: पुरुष इत्यत आह-

इति श्रीकण्ठभाष्यम् सप्तममन्तरधिकरणम् समाप्तम्।

शिवार्कमणिदीपिका

जगत्कारणत्व इति। जगत्कारणशिवाभिन्नत्वे यदनुमानं तत्रादरो न कार्य इत्यर्थ:। अवान्तरसृष्टि: देवमनुष्यादिव्यष्टिसृष्टि:। तत्रापि न हिरण्यगर्भस्य स्वातन्त्र्यम्। किं तु तदन्तर्यामिणश्शिवस्यैवेति वक्ष्यमाणार्थं स्मारयति-**परमेश्वरस्यैवेति।** तथाच यदि सर्गाद्यकालसृष्टिहेतु: यदि वार्वाचीनकतिपयसृष्टिहेतुकामनावत्त्वम् उभयथा हेतुरसिद्ध इति भाव:। सौत्रेण चकारेण श्रौतं ब्रह्मशिवशब्दसामानाधिकरण्यं पौराणिकं प्रथमं ब्रह्मत्वेन दृष्टस्य पुनश्शिवत्वेन दर्शनं चेत्येतदपि ब्रह्मशिवाभेदसाधकत्वेन नादरणीयम्। शरीरशरीरिभावादिना सर्वात्मकत्वेन तदुभयोपपत्तेरिति समुच्चीयते। यत्रादित्यरूपस्य हिरण्यगर्भस्य शिवरूपेणापि दर्शनमुक्तं तत्रैव हि कूर्मपुराणे तयोर्भेदोऽपि प्रतिपाद्यते। 'विद्यासहायो भगवान्यस्यासौ मण्डलान्तरे। हिरण्यगर्भ: पुत्रोऽसावीश्वरो दृश्यते पर'इति। विद्यासहायो भगवानसौ मण्डलान्तरे स्थितो हिरण्यगर्भो यस्य पुत्र: असौ परमेश्वरो दृश्यत इत्यन्वय:।। उत्तरसूत्रमवतारयितुमाशङ्कते-**अनेनेति।** नामरूपव्याकरणं तावच्चतुर्मुखकर्तृकमिति सकलपुराणाद्यैककण्ठ्येन प्रसिद्धम्। तत्र पारमेश्वरोत्तमपुरुषप्रयोगेन परमेश्वरस्य कर्तृत्वं वदन्ती श्रुति: परमेश्वरस्य तच्छरीरत्वेन तदभेदेन वोपपादनीया। तच्छरीरकत्वपक्षे 'जीवेनात्मने'ति सामानाधिकरण्यानुपपत्तेरभेदपक्ष एव परिशिष्यत इति भाव:।।सू।। **अस्मिन्नस्य च तद्योगं शास्ति।।२०।। ब्रह्माधिपतिरिति।** 'ईशानस्सर्वविद्यानामि'त्यनेन वेदाधिपत्यस्य 'ईश्वर: सर्वभूताना'मित्यनेन ब्राह्मणाधिपत्यस्य च सिद्धत्वादिहाभ्यासेन हिरण्यगर्भाधिपत्यमेव विधीयते। श्रुत्यन्तरापातप्रतिपन्नतदुत्कर्षतदभेदभ्रान्तिवारणायेति भाव:। जीवविषयात्मशब्द- प्रयोगोपपत्तिस्तु संज्ञामूर्तिक्लृप्त्यधिकरणे (ब्र० २/८/१७ सू) प्रदर्शयिष्यते।।

।।इति इतरानुपपत्त्यधिकरणम्।।७।।

उत्तराधिकरणमवतारयितुं प्राक्सिद्धमर्थजातमनुवदति-**तदित: पूर्वैरिति।** उभयकारणमित्यन्तेन सोपपत्तिकजन्माद्यधिकरणार्थोऽनूदित:। तदनन्तरविशेषणेनानन्तराधिकरणद्वयार्थ:। स्वप्रकाशेत्यादि-विशेषणेन ईक्षत्यधिकरणविषयवाक्यगतसच्छब्दार्थोऽनूदित:। 'सच्चिदानन्दस्वरूप-'मित्यनेनानंदमयाधिकरणविषयवाक्यांतर्गतसत्यज्ञानादिवाक्यार्थ: 'संसारपाशच्छेदकारण'मित्यनेन

हिरण्यगर्भाधिकरणविषयवाक्यान्तर्गतस्य 'य एनं विदुरमृता' इत्यादिवाक्यस्यार्थः 'चिदचिदर्थान्तर'मित्यनेन चिदचिद्विलक्षणमित्यर्थकेन अचेतने प्रधाने चेतने मुक्ते हिंरण्यगर्भे चानतिप्रसक्तं जगत्कारणत्वमस्येतरवैलक्षण्यमित्येवमीक्षत्याद्यधिकरणत्रयव्युत्पाद्यार्थः सङ्गृह्यानूदितः। अथोत्तराधिकरणे प्रतिपादयिष्यमणमर्थं दर्शयति-**तस्येति**। संसारभेषजं मुक्तिप्रदम्। **मनस्समाधानेति**। दहरविद्याद्युपास्यं हि रूपं **स्थानस्य** हृदयपुण्डरीकादेरप्रसिद्धत्वात् शास्त्रावगततत्तत्स्वरूपानुसन्धान-पूर्वकमनुसन्धेयमिति तावत्पर्यन्तमविक्षेपेण मनस्समाधानं दुस्सम्पादम्। वक्ष्यमाणरूपस्य तु स्थानमादित्यमण्डलमागोपालाङ्गनमतिप्रसिद्धमिति तत्स्थानके वक्ष्यमाणरूपे मनस्समाधानं सुसम्पादमिति भावः। किमप्यप्राकृतं रूपमित्यर्थः। ननु किमर्थोऽत्र जन्मादिसूत्रार्थप्रभृति प्राचीनसकलार्थानुवादः। कथं च प्राणाकाशाद्यतिव्याप्तिनिरासेऽग्रे करिष्यमाणे मध्ये चिदचिदर्थान्तरमिति विशेषणेन चेतनाचेतनेष्वतिव्याप्तिनिरासात् सिद्धयतोऽर्थस्य सिद्धत्वेनोपन्यासः। कथं चातिव्याप्तिनिरासार्थपेटिकामध्ये ध्यानोपयुक्तरूपविशेषणनिरूपणार्थाधिकरणस्य प्रस्तावः। तस्य च साधनाध्यायसङ्गतस्य समन्वयाध्याये का सङ्गतिःका च पूर्वाधिकरणसङ्गतिः। उच्यते। लक्षणपरिष्कारपेटिकासमाप्तिप्रदर्शनार्थो लक्षणसूत्रार्थमारभ्यानुवादः। अत एवातिव्याप्ति-निरासिसिद्धार्थोपन्यासः। आकाशप्राणाधिकरणद्वयमाकाशप्राणयोरतिव्याप्तिनिरासार्थं न भवति। तयोरधिकरणनिरसनीयातिव्याप्तिशङ्काहेतोरदर्शनात्। किंत्वाकाशप्राणवाक्ययोर्ब्रह्मणि तात्पर्यनिरूपणार्थं तदर्थेन तेन वाक्यशेषगतकारणत्वानुवादप्रभव-मन्दशङ्काविषयातिव्याप्तिनिरासोऽपि लभ्यत इत्यानुषङ्गिकप्रयोजनसूचनार्थं तदवतारिकाभाष्यम्। इदमप्यधिकरणमन्तरादित्यविद्यावाक्यस्य ब्रह्मणि तात्पर्यनिरूपणार्थमेव। ध्यानार्थरूपविशेष-सिद्धिरप्यनेनाधिकरणेन लभ्यत इत्येतदवतारिकाभाष्यमप्यानुषङ्गिकप्रयोजनसूचनार्थम्। पूर्वाधिकरणविषयवाक्ये हिरण्यगर्भविषयोपक्रमोपसंहारैकरूप्यस्य मध्यगतबहुप्रमाणविरोधा-दनादरणीयत्वमुक्तम्। इह तद्विषयोपक्रमोपसंहारैकरूप्यस्य तथा विरोधो नास्तीति प्रत्यवस्थानात् प्रत्युदाहरणरूपा समनन्तराधिकरणसङ्गतिः। सा पूर्वपक्षावसाने स्पष्टीकरिष्यते। भाष्येऽपि सा 'देवताविशेषो वे'ति संशयवाक्येन सूचयिष्यते। मण्डलान्तर्वर्तित्वेन प्रसिद्धो हि देवताविशेषः तत्र ग्राह्यः। हिरण्यगर्भश्च तथा प्रसिद्ध इति पूर्वाधिकरणे दर्शितम्। नन्वादित्य इत्यपि कश्चिदाधिकारिको देवताविशेषोऽस्ति। अस्तु सोऽपि पाक्षिकतया पूर्वपक्षावलम्बनं भविष्यति। अत एव भाष्ये सामान्येन 'देवताविशेषो वे'ति पूर्वपक्षकोटिः प्रदर्शिता। न तु हिरण्यगर्भ इत्यादित्य इति वा। तस्मात्सर्वमुपपन्नम्।।सू।। **अन्तस्तद्धर्मोपदेशात्**।।२१।।

इति शिवार्कमणिदीपिका सप्तममन्तरधिकरणम् समाप्तम्।

अथ आकाशाधिकरणम्॥ सू० २२॥

शाङ्करभाष्यम्

***आकाशस्तल्लिङ्गात्*॥२२॥**

इदमामनन्ति–''अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम्'' (छान्दो० १।९।१) इति। तत्र संशयः–किमाकाशशब्देन परं ब्रह्माभिधीयते, उत भूताकाशमिति। कुतः संशयः? उभयत्र प्रयोगदर्शनात्। भूतविशेषे तावत्सुप्रसिद्धो लोकवेदयोराकाशशब्दः ब्रह्मण्यपि क्वचित्प्रयुज्यमानो दृश्यते। यत्र वाक्यशेषवशादसाधारणगुणश्रवणाद्। निर्धारितं ब्रह्म भवति, यथा–''यदेष आकाश आनन्दो न स्यात्'' (तै० २।७)इति, ''आकाशो वै नामरूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्म'' (छा० ८।१४।१)इति चैवमादौ। अतः संशयः।। किं पुनरत्र युक्तम्। भूताकाशमिति। कुतः? तद्धि प्रसिद्धतरेण प्रयोगेण शीघ्रं बुद्धिमारोहति। नचायमाकाशशब्द उभयोः साधारणः शक्यो विज्ञातुम्; अनेकार्थत्वप्रसङ्गात्। तस्माद् ब्रह्मणि गौण एवाकाशशब्दो भवितुमर्हति। विभुत्वादिभिर्हि बहुभिर्धर्मैः सदृशमाकाशेन ब्रह्म भवति। न च मुख्यसंभवे गौणोऽर्थो ग्रहणमर्हति। संभवति चेह मुख्यस्यैवाकाशस्य ग्रहणम्।। ननु भूताकाशपरिग्रहे वाक्यशेषो नोपपद्यते–''सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते'' इत्यादिः। नैष दोषः; भूताकाशस्यापि वाय्वादिक्रमेण कारणत्वोपपत्तेः। विज्ञायते हि–''तस्माद्व वा एतस्मादात्मन आकाशः संभूतः। आकाशाद्वायुः। वायोरग्निरि'' (तै० २/१)इत्यादि। ज्यायस्त्वपरायणत्वे अपि भूतान्तरापेक्षयोपपद्येते भूताकाशस्यापि। तस्मादाकाशशब्देन भूताकाशस्य ग्रहणम्–इत्येव।। प्राप्ते ब्रूमः–

***आकाशस्तल्लिङ्गात्*॥** आकाशशब्देन ब्रह्मणो ग्रहणं युक्तम्। कुतः? तल्लिङ्गात्। परस्य हि ब्रह्मण इदं लिङ्गम्–''सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते'' इति। परस्माद्धि ब्रह्मणो भूतानामुत्पत्तिरिति वेदान्तेषु मर्यादा। ननु भूताकाशस्यापि वाय्वादिक्रमेण कारणत्वं दर्शितम्, सत्यं दर्शितम्; तथापि मूलकारणस्य ब्रह्मणोऽपरिग्रहादाकाशादेवेत्यवधारणं सर्वाणीति च भूतविशेषणं

नानुकूलं स्यात्। तथा ''आकाश प्रत्यस्तं यन्ती''इति ब्रह्मलिङ्गम्, ''आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम्'' इति च ज्यायस्त्वपरायणत्वे। ज्यायस्त्वं ह्यनापेक्षिकं परमात्मन्येवैकस्मिन्नाम्नातम्–''ज्यायान्पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्य'' (छा० ३/१४/३) इति। तथा परायणत्वमपि परमकारणत्वात्परमात्मन्येवोपपन्नतरम्। श्रुतिश्च –''विज्ञानमानन्दं ब्रह्म रातेर्दातुः परायणम्'' (बृ० ३/९/२८) इति।।

अपि चान्तवत्त्वदोषेण शालावत्यस्य पक्षं निन्दित्वा अनन्तं किंचिद्वक्तुकामेन जैवलिना आकाशः परिगृहीतः, तं चाकाशमुद्गीथे सम्पाद्योपसंहरति–''स एष परोवरीयानुद्गीथः स एषोऽनन्तः'' (१/९/२) इति। तच्चानन्त्यं ब्रह्मलिङ्गम्। यत्पुनरुक्तम्, भूताकाशं प्रसिद्धिबलेन प्रथमतरं प्रतीयत–इति, अत्र ब्रूमः–प्रथमतरं प्रतीतमपि सत् वाक्यशेषगतान्ब्रह्मगुणान्दृष्ट्वा न परिगृह्यते। दर्शितश्च ब्रह्मण्यप्याकाशशब्दः–''आकाशो वै नाम नामरूपयोर्निर्वहिता''इत्यादौ। तथाकाशपर्यायवाचिनामपि ब्रह्मणि प्रयोगो दृश्यते–''ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः'' (ऋ० सं० १/१६४/३९) ''सैषा भार्गवी वारुणी विद्या परमे व्योमन्प्रतिष्ठिता'' (तै० ३/६) ''ॐ कं ब्रह्म खं ब्रह्म'' (छा० ४/१०/५) ''खं पुराणम्'' (बृ० ५/१) इति चैवमादौ। वाक्योपक्रमेऽपि वर्तमानस्याकाशशब्दस्य वाक्यशेषवशाद्युक्ता ब्रह्मविषयत्वावधारणा। 'अग्निरधीतेऽनुवाकम्' इति हि वाक्योपक्रमगतोऽप्यग्निशब्दो माणवकविषयो दृश्यते। तस्मादाकाशशब्दं ब्रह्मेति सिद्धम्।।२२।।

इति शाङ्करभाष्यम् इत्यष्टममाकाशाधिकरणम् समाप्तम्।।

वार्तिकम्

पूर्वमव्यभिचरितब्रह्मधर्मोपदेशाद् जीवलिङ्गमपि रूपवत्त्वाद्यन्यथासिद्धं भवतु, इह तु ब्रह्मलिङ्गेनाकाशश्रुतिर्नान्यथयितुं शक्यते; लिङ्गापेक्षया श्रुतेर्बलवत्त्वात्, इति पूर्वोत्तराधिकरणयोः प्रत्युदाहरणसङ्गतिः। यद्वा-यथा भूताकाशस्योद्गीथे संपत्तिं कृत्वोपासना, एवं जीवस्योपासना भविष्यतीति दृष्टान्तसङ्गतिः।।

स्वरादिक्रमेणामुष्य लोकस्य साम्नो गतित्वं दाल्भ्याभिहितं दूषयित्वाऽस्य लोकस्य साम्नो गतित्वे शालावत्येनाभिहिते "अन्तवद्वै किल ते शालावत्य सामे"त्यन्तवत्त्वेन जैवलिना शालावत्यप्रश्ने दूषिते स्वमतं दुष्टं ज्ञात्वा "अस्य लोकस्य का गतिरि"ति शालावत्येन पृष्टो जैवलिः-"आकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम्" इति श्रुतेर्वचनम्।।

तत्र संशयः-किमाकाशपदेन भूताकाशोऽभिधीयते, किं वा परं ब्रह्म-इति। ननु-"सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त" इत्याद्यव्यभिचरितब्रह्मधर्मोपदेशात् पूर्वन्यायेनाकाशशब्दाभिधेयत्वस्य ब्रह्मणि सिद्धेर्न्यायान्तरानिर्देशाच्च संशयाभावाद् नारम्भणीयमिदमधिकरणमिति-चेत्, न; दत्तोत्तरत्वात्। उक्तमेतत्सङ्गतिकथनाय-आकाशशब्दस्य भूताकाशे रूढत्वाद् लिङ्गापेक्षया श्रुतेर्बलवत्वात् तथा लिङ्गवाधसंभवेन पूर्वपक्षकोटिरिति। न च-एवं सति सिद्धान्तपक्षस्यैव निर्बीजत्वात् पुनः संशयाभाव इति-वाच्यम्; आकाशशब्दस्य ब्रह्मण्यपि श्रुतिषु प्रयोगदर्शनात् तद्बीजोपपत्तेः। तदिदमुक्तम्-*उभयत्र प्रयोगदर्शनादिति*।। तदेतद् विभजते-*भूताकाशे तावदित्यादिना*।। *यदेव आकाश आनन्दो न स्यादिति*।। अयं वाक्यशेषः प्रकृतब्रह्मण आनन्दरूपत्वप्रतिपादकः; तत्राकस्माद् भूताकाशस्य ग्रहीतुमशक्यत्वात्, तस्यानन्दत्वासंभवात्, प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गाच्च। असाधारणो गुणश्च नामरूपनिर्वाहित्वम्। न हि नामरूपान्तःपातिनो भूताकाशस्य तदुपपत्तिः; स्वयमेव स्वस्य वोढुमशक्यत्वात्।।

ननु-एवं सत्यन्यत्रापि ब्रह्मणि तत्प्रयोगाद् अत्रापि लिङ्गविशेषेण तत्प्रयोगनिश्चयोपपत्तेः पूर्वपक्षाभावात् संशयानुपपत्तेः, रूढेस्त्वन्यत्रेवात्रापि लिङ्गविशेषानुपपत्त्यैव परित्यागोपपत्तेर्न

तद्बलादपि संशय इति—चेत्, सत्यम्; यदि तल्लिङ्गमसन्दिग्धं भवेत्, तदेव तु सन्दिग्धम्, अनिश्चितमपि वोभयकोटिसंस्पर्शीति मन्यते पूर्वपक्षी। कथम्? इत्थम्। लिङ्गं हि द्विविधम्–एकं तावद् मन्त्रपदानामाभिधानसामर्थ्यम्, तच्च न्यायान्तरनिरपेक्षमेव भवति विनियोजकं प्रमाणम्। तदेव च श्रुतिलिङ्गाधिकरण उपन्यस्तम्। द्वितीयं त्वन्यार्थदर्शनलक्षणार्थवादवाक्याभिधानसामर्थ्यम्। तच्चेतरसापेक्षमेव सत् स्वार्थे प्रमाणम्, न स्वतः। कुतः? अन्यार्थे श्रुतत्वाद्, गुणवादेनाप्यन्यार्थसिद्धेर्न्यायान्तरेण तदाशङ्कानिराकरणमन्तरेण तस्य स्वार्थपरत्वानुपपत्तेः। प्रकृते चार्थवादिकं लिङ्गम्; साम्नो गतेराकाशस्य स्तुत्यर्थत्वात्–"सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त" इत्यादेः। सा च स्तुतिर्गुणवादेन भूताकाशेऽपि संभवतीति मन्यते पूर्वपक्षी। तद्वाक्यस्य स्वार्थपरत्वे न्यायमपश्यन्, स्वार्थपरत्वसंभवेऽपि वा "गुणे त्वन्याय्यकल्पने"ति न्यायात् प्रधानाकाशपदवृत्त्यविरोधेनार्थवादिकपदानां वृत्तिसंकोचसंभवात्। तस्मादुपपद्यते संशयः। एतेन–यदुक्तम्–न पूर्वन्यायान्न्यायान्तरमत्रोपदिश्यते–इति, तत्प्रयुक्तम्; पूर्वाधिकरण उपासनागुणत्वेन विवक्षिता ब्रह्मधर्मा उपदिश्यन्त इति हेतुः कृतः, इह त्वार्थवादिकं तल्लिङ्गम्, इति न्यायभेदात्। ननु–एतेऽपि धर्मा उपासनार्था गुणत्वेन विवक्षिताः, नैवम्; अनन्तत्वस्यैवोपासनागुणत्वेन विवक्षितत्वात्। अस्तु वा तद्विवक्षा, उभयत्र तत्संभवस्य प्रदर्शयिष्यमाणत्वेन सन्दिग्धत्वात्, तेषां न्यायाक्षरेण ब्रह्मलिङ्गत्वेन निश्चितानामेव निश्चायकत्वात्। अत एव–"तल्लिङ्गादि"ति ब्रह्मणि लिङ्गं विशेषयता तन्निश्चायकन्यायोऽपि सूत्रकृता–सूचितः। एतेन–सन्दिग्धं लिङ्गं कथं हेतुत्वेनोपन्यस्तम्? साध्यसमत्वादिति–अपास्तम्।।

किं तावत् प्राप्तम्? भूतविशेष एवात्राकाशशब्देनाभिधीयते, न ब्रह्म। कुतः? तस्याकाशपदाभिधानसामर्थ्यं हि भूताकाशस्याभिधेयत्वे लिङ्गम्। यत्र हि यस्य शक्तिः स तेनाभिधीयत इति नियमः; अशक्याभिधानानुपपत्तेः। शक्तिश्च लोक आकाशपदस्य भूतविशेषे दृष्टा; तत्र प्रसिद्धतरप्रयोगत्वात्। एतेन–शक्तेरुभयसाधारणत्वादनैकान्तिको हेतुरिति–अपास्तम्; लोके भूताकाश इव ब्रह्मणि तदप्रसिद्धेः। लोके ब्रह्मण्याकाशशब्दस्य प्रयोगाप्रसिद्धावपि वेदेऽस्ति तत्र तत्प्रसिद्धिः; ब्रह्मणोऽलौकिकत्वेन लोके तस्मिन् तदप्रसिद्धिमात्रोपपत्तेरिति चेत्, न; लोकवेदाधिकरणन्यायेन वेदेऽपि भूताकाश एव तत्प्रयोगसिद्धेः, "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" "आकाशवत् सर्वगतश्च नित्य" इत्यादौ तस्मिन् तत्प्रयोगदर्शनात्। यत्रापि "यदेष आकाश आनन्दो न स्यादि"त्यादौ ब्रह्मण्याकाशपदप्रयोगो निर्धारितः, सोऽपि कथञ्चिदुपचाराद् लुप्तोपमतया वा दृष्टव्यः; अन्यथा लोकवेदाधिकरणविरोधापत्तेः, आकाशपदस्य नानार्थत्वकल्पनापत्तेश्च, उभयानुगतस्यैकस्य प्रवृत्तिनिमित्तस्याभावात्। तस्मादाकाशपदसामर्थ्याद् आकाशोऽत्र भूतविशेषः परिगृह्यते–इति।।

ननु–"सर्वाणि ह वा" इत्यादिब्रह्मलिङ्गविरोधात् प्रकरणसमोऽयं हेतुरिति–चेत्, न; तस्य दुर्बलत्वेन सत्प्रतिपक्षत्वानुपपत्तेः। आकाशपदं हि विशेष्यपदम्; प्रश्नविषयस्य गतेरभिधानार्थत्वात्। "सर्वाणि ह वा" इत्यादीनि विशेषणपदानि; गतिविशेषणाभिधानार्थत्वात्। अतोऽङ्गगुणविरोधे च तादर्थ्यादिति न्यायात् "गुणे त्वन्याय्यकल्पने"ति न्यायाच्च प्रधानपदानुसारेण गुणपदानां प्रशंसार्थत्वेन वा यथाकथञ्चित् स्वार्थसंकोचेन वा व्याख्येयत्वाद् न तयोः समबलत्वाभावेन सत्प्रतिपक्षत्वम्–इति। व्याख्यातानि च तानि पदानि स्वार्थसंकोचेन भूताकाशे भाष्यकृता। अपिच श्रुतिसामर्थ्यं भूताकाशाभिधाने लिङ्गम्, ब्रह्माभिधाने च वाक्यसामर्थ्यम्। श्रुतिवाक्ययोस्तु न समबलत्वमस्ति; कक्ष्याद्वयान्तरितत्वेन वाक्यस्य श्रुत्या बाधादिति श्रुतिलिङ्गाधिकरणे व्यवस्थिततत्वात्। अपिच "आकाश इति होवाचे"ति प्रश्नोत्तरप्रथमावगतमाकाशपदमसञ्जातविरोधि, तेन तदुपरक्तायां बुद्धौ यद्यदेव तदेकवाक्यगतमुपनिपतति, तत्तदुपजातविरोधि तदानुगुण्येनैव व्यवस्थातुमर्हति; अन्यथा तदेकवाक्यत्वानुपपत्तेः। एतेन–परेण पूर्वबाधोऽप्यत्र–प्रत्युक्तः; तदेकवाक्यगतत्वेन तत्सापेक्षत्वात् परस्य तद्बाधकत्वानुपपत्तेः, वैपरीत्यात्। तदुक्तम्–पूर्वात् परबलीयस्त्वं तत्र नाम प्रतीयताम्। अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत्।" इति। एतेन–अन्यत्रेवात्राप्याकाशपदं लक्षणया वर्तिष्यत इति–अपास्तम्; उक्तप्रकारेणानुपपत्तेरभावात्। तदिदमुक्तम्–*न च मुख्यसंभवे गौणार्थो ग्रहणमर्हतीति*।। मुख्यसंभवं दर्शयितुमाशङ्कामुत्थापयति–*नन्विति*।। वाक्यशेषोपपत्तिं दर्शयन् मुख्यार्थसंभवमाह–नैष दोष इत्यादिना।। तस्मात् भूताकाशमेवाकाशपदेन परिगृह्यते, न परं ब्रह्मेति प्राप्तम्।।

एवं प्राप्ते पठति–*आकाशस्तल्लिङ्गात्*।। आकाशशब्देनात्र परं ब्रह्म गृह्यते। कुतः? तल्लिङ्गात्=परस्य हि ब्रह्मणः परिग्रह इदं लिङ्गं भवति–"सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त" इति। सर्ववेदान्तेषु परस्मादेव ब्रह्मणो भूतानामुत्पत्तिश्रवणमव्यभिचारितया भवति ब्रह्मणो गमकम्।।

ननु–"आकाशाद्वायुर्वायोरग्निरि"ति वाय्वादिक्रमेण भूताकाशस्यापि भूतकारणत्वश्रवणात् कुतोऽव्यभिचार इति–चेत्, न; 'सर्वाणी'तिविशेषणादव्यभिचारोपपत्तेः। न हि वाय्वादीनामाकाशादुत्पत्तिसंभवेऽपि सर्वभूतानां तत उत्पत्तिः संभवति; स्वस्यैव स्वतोऽनुत्पत्तेः। एतेन–स्वकार्यभूताभिप्रायेण सर्वशब्दसंकोचोऽपि–प्रत्याख्यातः; तथा सत्यविवक्षितार्थत्वापत्तेः। न ह्येवं सति कोऽप्यर्थः सर्वशब्दस्यात्र विवक्षितो भवति; भूतानीति बहुवचनेन तत्कार्याणां वाय्वादीनां सर्वेषां परिग्रहोपपत्तेः।। कपिञ्जलाधिकरणन्यायेन त्रिषु बहुत्वनिवेशशङ्कायां तन्निवारणाय सर्वग्रहणमिति–चेत्, न; तद्वदत्र त्रितयपरिग्रहकारणाभावेन तदाशङ्कानुपपत्तेः। आकाशपदेन ब्रह्मण्यपि

परिगृहीते स दोष इति चेत्, न; भूताकाशे व्यभिचारात्, तत्परिग्रहशङ्कावारणार्थत्वेन तस्मिन् तदर्थविवक्षोपपत्तेः। अस्त्वविवक्षितं सर्वाणीति विशेषणम्, को दोष इति चेत्, न; हेतौ निरर्थकविशेषणानुपपत्तेः। आकाशस्य गतित्वोपपादकतया हि–''सर्वाणि ह वा''इत्यादिहेतुरुपन्यस्यते। न हि हेतौ व्यर्थविशेषणं भवति; शरीराजन्यत्वानुमानवद् व्यर्थविशेषणत्वस्य हेतुदोषत्वात्। अत एव सूत्रकारणे–''तल्लिङ्गात्''इत्युक्तम्। एतेन–गुणवादत्वेन प्रशंसार्थत्वमस्येत्युक्तमित्यपि–अपास्तम्; हेतुवचनत्वात्। अपिच न केवलं तव मते सर्वपदानुपपत्तिः, आकाशादेवेत्यन्ययोगव्यवच्छेदार्थैवकारानुपपत्तिश्च। न हि भूताकाशादेव भूतानामुत्पत्तिः; मूलकारणादपि तदुत्पत्तेः। मूलकारणपरिग्रहेऽप्याकाशपदेन कथमवधारणोपपत्तिः; भूताकाशादेरपि तदुत्पादकत्वादिति चेत्, न; तस्मात् यत्किंचिद्भूतोत्पत्तावपि सर्वभूतोत्पत्तेरभावाद् मूलकारणादेव सर्वभूतोत्पत्तिरित्यवधारणोपपत्तेः। अपिच–''आकाशाद्वायुर्वायोरग्निरि''ति श्रुत्यन्तरादन्यतोऽपि भूतोत्पत्तौ प्रसक्तौ मूलकारणादेवेत्यवधारणोपपत्तिः। न ह्याकाशादेर्निःसारस्य भूतकारणत्वमुपपद्यते प्रकृतिमनपेक्ष्य। तस्माद् मूलकारणमेवाकाशादिभावद्वारा वाय्वादिकारणमिति वक्ष्यमाणन्यायात् सिद्ध्यत्येवावधारणमिति। एतेन–''आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणमि''त्येतान्यपि ब्रह्मलिङ्गानि–व्याख्यातानि। सूत्रे ''तल्लिङ्गात्''इत्येकवचनं प्रत्येकमेव तत्साधकत्वसूचनार्थम्। भाष्यकारेणापि तथैव तान्युपन्यस्तानि।।

एतेन–यदुक्तं श्रुतिवाक्ययोर्विरोधे श्रुतिर्बलीयसी, आकाशपदं तु पदश्रुतिः, ''सर्वाणि ह वा'' इत्यादि तु वाक्यमिति–अपास्तम्, तत्रापि सर्वावधारणपदश्रुत्योस्तेन विरोधस्य दर्शितत्वात्, ''त्यजेदेकं कुलस्यार्थे'' इति न्यायेन तस्यैव त्यागोपपत्तेः। अपिच शालावत्याभिहितं पृथिवीलोकगतित्वमन्तवत्त्वेन दूषयित्वाऽनन्तं किञ्चिद्वक्तुकामेन जैबलिनाऽऽकाशः परिगृहीतः। परिगृह्य च तमाकाशमुद्गीथे संपाद्यानन्तत्वेन तं वाक्यशेष उपसंहरति–''स एष परोवरीयानुद्गीथः स एषोऽनन्त'' इति। तच्च निरतिशयानन्तत्वं सद् ब्रह्मलिङ्गं भवति। न च तदापेक्षिकम्; पृथिव्यामपि तत्संभवाद् विशेषाभिधानानुपपत्तेः। यदप्युक्तम्–विशेष्यपदमेतदाकाश इति, ''सर्वाणि ह वा'' इत्यादीनि तु पदानि विशेषणपदानिः–तयोर्विरोधे–''गुणे त्वन्याय्यकल्पने''ति न्यायाद् गुणपरित्याग एव युक्त इति, तदप्यसत्; गतेरेव प्रश्नविषयतया प्राधान्यात् तद्विशेषकत्वेनाकाशपदस्योच्चरितत्वाद् विशेष्यपदत्वासिद्धेः। ''आकाश इति होवाचे''ति प्रश्नोत्तरे प्रश्नविषयगतिराकाशेन विशेष्यते। कुतः? अनवस्थितकोटिको हि प्रश्नार्थो भवति। स चोत्तरार्थे निश्चितैककोटिना विशेषणेनान्वयं प्रतिपद्येतरकोटिव्युदासेन निश्चितैककोटिको भवति। तदेवोत्तरस्य प्रयोजनम्; अन्यथा प्रयोजनान्तरासंभवात्, प्रश्नवैयधिकरण्याच्च तद्वैयर्थ्यापत्तेः। तस्माद् नाकाशपदस्य विशेष्यपदत्वमस्ति।।

*यदप्युक्तम्—प्रथमवागतमाकाशमनुपजातविरोधि, तेन तदुपरक्तायां बुद्धौ यद्यदेवैकवाक्यगतमुपनिपतति, तत्तदुपजातविरोधि तदानुगुण्येनैव व्यवस्थातुमर्हति—इति, तदप्यपेशलम्; 'गङ्गायां घोष' इत्यत्र चरमोपस्थितघोषपदार्थानुसारेण प्रथमावगतगङ्गापदस्यान्यथा नयनात्। तस्माद् बहूनां ब्रह्मलिङ्गानां विरोधात् ''त्यजेदेकमि''ति न्यायादेकाकाशपदं ब्रह्मणि सर्वगतत्वादिसादृश्याद् भाक्तं व्याख्येयम्। अस्तु वा सत्यादिपदवद् आकाशपदमपि ब्रह्मणि मुख्यम्; सर्ववेदान्तेष्वविगानेन ब्रह्मणि तत्प्रयोगात्, तत्पर्यायव्योमादिशब्दप्रयोगात्। तच्चोदाहृतं भाष्ये। न चैवं सति नानार्थत्वप्रसङ्गः; सर्वगतत्वस्यैवोभयसाधारणस्य तत्प्रवृत्तिनिमित्तस्य सत्त्वात् तदप्रसङ्गात्॥

ब्रह्मण्येव वा सत्यादिशब्दवद् मुख्यमस्तु, तत्प्रथमकार्ये तु तद्गुणयोगाद् भाक्तं भविष्यति। न च लोकवेदाधिकरणविरोधः; लोकेऽपि निरूढलक्षणयैव भूताकाश आकाशपदप्रयोगात् तद्विरोधानुपपत्तेः, अन्यथा ह्यष्टवर्षा स्त्री स्वर्गः, क्षौमं वासः स्वर्ग इति स्वर्गशब्दस्य लोके सुखसाधने रूढत्वात् स्वर्गकामवाक्येषु स्वर्गशब्दः सुखविशेषे लक्षणिकः स्यात्। तथा च षष्ठाद्याधिकरणविरोधः। तस्माद् यथा स्वर्गशब्दः सुखविशेषे वाक्यशेषवशाद् रूढः, सुखसाधनेषु च लौकिकेषु भाक्तः, यथा वा ज्ञानशब्दश्चैतन्ये मुख्यः, बुद्धिवृत्तौ तु भाक्तः, एवमत्रापि वाक्यशेषवशादाकाशशब्दो ब्रह्मणि मुख्यः, भूताकाशे तु भाक्तः, इति न कश्चिद् दोषः। एतेन—वाक्योपक्रमे वर्तमानस्याकाशशब्दस्य न वाक्यशेषवशेनान्यथाकरणं युक्तमिति—अपास्तम्; 'अग्निरधीतेऽनुवाकम्' इत्यादावुपक्रमगतस्याप्यग्निशब्दस्य माणवकविषयत्वदर्शनात्। सर्वथाऽप्याकाशशब्दमिह परं ब्रह्मेति सिद्धम्॥२२॥

इति वार्तिकम् इत्यष्टममाकाशाधिकरणम् समाप्तम्॥

प्रदीप

अत्राधिकरणे समालोचनीयानि प्राकरणिकानि वाक्यानीमानि—छान्दोग्य उद्गीथविद्यायामेव पूर्वतनविषयवाक्यानन्तराण्येव कानिचन वाक्यानि श्रूयन्ते। तानि यथा—छान्दोग्ये प्रथमाध्यायेऽष्टमनवमखण्डयोरिदमाम्नायते—"त्रयो होद्गीथे कुशला बभूवुः शिलकः शालावत्यश्चैकितायनो दाल्भ्यः प्रवाहणो जैवलिरिति ते होचुरुद्गीथे वै कुशलाः स्मो हन्तोद्गीथे कथां वदाम इति॥१॥ तथेति ह समुपविविशुः। स ह प्रवाहणो जैवलिरुवाच भगवन्तावग्रे वदतां ब्राह्मण्योर्वदतोर्वाचं श्रोष्यामीति॥२॥ तथा शीलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच हन्त त्वा पृच्छानीति पृच्छेति होवाच॥३॥ का साम्नो गतिरिति स्वर इति होवाच स्वरस्य का गतिरिति प्राण इति होवाच प्राणस्य का गतिरित्यन्नमिति होवाचान्नस्य का गतिरित्याप इति होवाच॥४॥ अपां का गतिरित्यसौ लोक इति होवाचामुष्य लोकस्य का गतिरिति न स्वर्गं लोकमतिनयेदिति होवाच स्वर्गं वयं लोकं सामाभिसंस्थापयामः स्वर्गसंस्तावं हि सामेति॥५॥ तं हि शिलकश्शालावत्यश्चैकितायनं दाल्भ्यमुवाचाप्रतिष्ठितं वै किल ते दाल्भ्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति॥६॥ हन्ताहमेतद् भगवत्तो वेदानीति विद्धीति होवाचामुष्य लोकस्य का गतिरित्ययं लोक इति होवाचास्य लोकस्य का गतिरिति न प्रतिष्ठां लोकमतिनयेदिति होवाच प्रतिष्ठां वयं लोकं सामाभिसंस्थापयामः प्रतिष्ठासंस्तावं हि सामेति॥७॥ तं ह प्रवाहणो जैवलिरित्युवाचान्तवद्वै किल ते शालावत्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति हन्ताहमेतद्भगवत्तो वेदानीति विद्धीति होवाच॥८॥ अष्टमः खण्डः॥ अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम्॥१॥ स एष परोवरीयानुद्गीथः स एषोऽनन्तः परोवरीयो हास्य भवति परोवरीयसो ह लोकाञ्जयति य एतदेवं विद्वान् परोवरीयांसमुद्गीथमुपास्ते—" इति।

अत्राकाशशब्दो भूताकाशपरो वा ब्रह्मपरो वेति संशयः। संशयसामग्री तु—आकाशशब्दश्रुतिः, "सर्वाणि ह वै"तिवाक्यशेषगतसर्वजगत्कारणत्वलिङ्गं च। अत्र श्रुतिर्भूताकाशब्रह्मसाधारणी, लिङ्गमपि कथञ्चन भूताकाशेऽपि वाय्वादिकारणे योजयितुं शक्यत्वात् साधारणम्, अनन्तत्वं तु न स्ववाक्यगतम्, इति कस्य प्राबल्यमिति निर्णयार्थमिदमधिकरणम्॥

पूर्वाधिकरणे सर्वात्म्यादिब्रह्मलिङ्गेन साधारणजीवलिङ्गानामन्यथा नयनं मतम्, अत्रादि साधारणाकाशश्रुतेरसाधारणब्रह्मलिङ्गेनान्यथा नयनम्; आनर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायादिति विविच्यते, इति श्रुत्या लिङ्गबाधाक्षेपनिरासेन प्रवृत्तत्वादाक्षेपिकी सङ्गतिः, अथवोभयत्र लिङ्गप्राबल्यादु दृष्टान्तसङ्गतिः। विषयवाक्यं संगृह्णाति– *इदमामनन्तीत्यादिना–परायणमित्यन्तेन*।। संशयं प्रदर्शयति– *तत्र संशय इत्यादिना–अतः संशय इत्यन्तेन*।। तत्र कुतः संशय इत्यादिना संशयसामग्रीनिर्देशः। *भूताकाशे तावदिति*।। *लोकवेदयोरिति*।। वेदे तावत्–"तस्मादाकाशः संभूतः" "आकाशवत् सर्वगतश्च नित्यः" "कस्मिंस्तु खल्वाकाश ओतश्च प्रोतश्चे"त्यादौ। अत्र सर्वत्र भूताकाशपरत्वम्। ब्रह्मण्यपि प्रयोगस्थलं निर्दिशति– *यदेष आकाश इति*।। *आकाशो वा इति च*।। व्यवस्थापयिष्यते चोत्तरत्र–"आकाशोऽर्थान्तरत्वादिव्यपदेशादि"त्यत्राऽऽकाशपदस्य ब्रह्मपरत्वम्। अत्रार्थान्तरत्वं भूताकाशाद नामरूपनिर्वहणादिभिर्यथा विज्ञातम्, न तथा प्रकृते किञ्चिदस्ति स्ववाक्य एवेति न तेनाधिकरणेनास्य गतार्थत्वमिति भावः।।

पूर्वपक्षमनुवदति– *भूताकाशमित्यादिना*आकशस्य ग्रहणमित्यन्तेन*।। अत्र भामतीकारिका–

"प्रथमत्वात् प्रधानत्वादाकाशं मुख्यमेव नः।
तदानुगुण्येनान्यानि व्याख्येयानीति निश्चयः।।"

इति। अत्र प्रधानत्वादिति रूढत्वादिति विवक्षितम्। अयमेवार्थो भाष्यकारेणापि–'तद्धि प्रसिद्धतरेणेत्यादिना–मुख्यस्यैवाकाशस्य ग्रहणमि'त्यन्तेन प्रतिपाद्यते।। ननु–प्रधानत्वेऽप्यनन्तत्वाद्य-साधारणलिङ्गेनानर्थक्यप्रतिहतन्यायेन न रूढ्यर्थाश्रयणसंभव इत्याशङ्क्याह–प्रधानत्वादिति।। उपक्रमगतेनार्थवादेन विरोध उपसंहारगतश्रुतेरप्यन्यथानयने, उपक्रमगतश्रुत्योपसंहारगतार्थ-वादस्यान्यथानयने किमु वक्तव्यमिति–"आकाश इति होवाचे"ति विषयवाक्योपक्रमस्थत्वाद आकाशश्रुतिरेव प्रबलेति भावेन कारिकायाम्–प्रथमत्वादित्युक्तम्। प्रथमत्वाच्चेत्यर्थः। तथाच वाक्यशेषान्यथानयनमेव युक्तमिति फलितम्। एतदुपोद्बलकं तु भाष्यम्– *ननु इत्यादि–भूताकाशस्यापीत्यन्तं* शङ्कासमाधानात्मकमिति मन्तव्यम्। प्रकृतकारिकाऽपि विपरीतक्रमेणैव भाष्यार्थमनुवदति– *भूतान्तरापेक्षयेति*।। अङ्गीकृतं हि*"अपाम सोमममृता अभूमे"त्यादावमृतत्वमापेक्षिकम्, इति आकाशेऽप्यमृतत्वश्रुतिस्तावदमृता दिवौकस इतिवदिति "शब्दाच्च" इति सौत्रशङ्कासमाधानावसरे वर्णयिष्यते भाष्य एवेति ज्यायस्त्वानन्तत्वादिकं सर्वमापेक्षिकं भूताकाशेऽपि युज्यत इति भावः।।

सिद्धान्तमवतारयति– *एवं प्राप्त इति*।। सूत्रं व्याचष्टे–आकाशशब्देनेत्यादिना– तल्लिङ्गादित्यन्तेन*।। तच्छब्देम परं ब्रह्म लिङ्गशब्देनासाधारणो धर्मश्च विवक्ष्यत इत्याह– *परस्य हीत्यादिना*।। लिङ्गम्=हेतुः। कर्मधारयसमासः। तथाच–आकाशः, परं ब्रह्म, उपदिश्यमानसर्वभूतकारणत्वात्, सदादिवदिति तल्लिङ्गपदसूचितो न्याय इति भावः। पूर्वाधिकरणे तद्धर्माणामुपदिश्यमानत्वं विवक्षितम्। तथाच सार्वात्म्यादिकं ब्रह्मधर्म इति निरूपणमपि तदर्थः। अत्र न्यायान्तरसिद्ध एवार्थो हेतुत्वेन विवक्ष्यत इति विशेषः। अत एवात्र लिङ्गपदम्। असाधारणत्वमेव विशदयति– *परस्माद्धीति*।। हिशब्दोऽवधारणार्थः। मर्यादा=परा काष्ठा। अन्येषां त्वापेक्षिकमेव कारणत्वमिति भावः। तथाच आकाशस्यापि वाय्वाद्यपेक्षया कारणत्वं यद्यपि संभवति; तथापि तस्यापेक्षिकत्वात् सर्वकारणत्वरूपहेतोर्ब्रह्मसाधकस्यैवात्र विवक्षणाद न भूताकाशपरिग्रहो युक्त इति भावः।।

''ननु–आकशपदस्य विशेष्यपदत्वेन प्राधान्यम्, 'सर्वाणि ह वा'' इत्यादीनां तु विशेषणपदत्वाद् गुणत्वम्, तथाच ''गुणे त्वन्याय्यकल्पने''ति न्यायात् सर्वत्वावधारणे न विवक्षिते इति भूताकाशपरिग्रह एव युक्त इत्याशयेन शङ्कते– *नन्विति*।। ''अस्य लोकस्य का गति''रिति प्रश्नोत्तरत्वादाकाशस्य गतेरेव विशेष्यत्वम्, न त्वाकाशस्येति नाकाशप्राधान्यम्, इति गत्युत्तरत्वं यदर्थविवक्षणेन स्यात्, तदेवाकाशपदेन विवक्षणीयम्। तत्र चाकाशपदं सर्वाणिपदमेवपदं चेति पदत्रयश्रुत्रिविरोधे 'विप्रतिषेधे भूयसां स्यात स्वधर्मत्व'मिति न्यायात् सर्वत्वावधारणयोरपि विवक्षणेन निष्पन्न एवार्थ आकाश इति वक्तव्यम्। स च परं ब्रह्मवेत्यभिप्रायेण समाधत्ते– *सत्यमित्यादिना*।। ''अस्य लोकस्ये''त्यत्रेदंलोकपदार्थे भूताकाशोऽप्यन्तर्गतः, इति न स एव तस्य गतिर्भवतीति तदतिरिक्तं मूलकारणमेव विवक्षणीयमिति भावः। वाय्वादिकारणत्वं हि न केवलमाकाशस्य, किन्तु ब्रह्मणोऽपीति–''तदभिध्यानादेव तु तल्लिङ्गात् स'' इत्यत्र सूत्रकृतैव विशदीकरिष्यत इति 'आकाशादेवे'त्यवधारणानुपपत्तिः। ब्रह्मपरिग्रहे तु सर्वभूतकारणत्वं ब्रह्मण एव, नाकाशादेरपीति नावधारणानुपपत्तिः; आकाशादेर्वाय्वादिमात्रकारणत्वात्, इति न दोषः।।

ननु–जन्मस्थितिभङ्गं समासार्थ इति जन्माद्यधिकरणभाष्ये जन्मस्थितिभङ्गानां समुदितानां कारणत्वस्य वर्णनाद् उत्पत्तिमात्रकारणत्वेन कथं ब्रह्मपरिग्रह इति शङ्कायामाह– *तथा आकाशमिति*।। ''आकाशं प्रत्यस्तं यन्तीति तथा=श्रूयते। इतिर्हेत्वर्थे। यस्माद आकाशं प्रत्यस्तं यन्तीत्यपि श्रूयते, तस्माद् अत्र ब्रह्मलिङ्गं वर्तत इति भावः। प्रत्येककारणत्वपक्षे तु यथाश्रुतमेव साधु। तल्लिङ्गादित्येकत्वं तु द्वितीयपक्षे जात्यभिप्रायं मन्तव्यम्। अवश्यं चैकत्वं जात्यभिप्रायमिति

प्रथमपक्षेऽपि स्वीकर्तव्यम्; लिङ्गान्तराणमपि दर्शनादित्यभिप्रायेण लिङ्गान्तराण्यनुवदति– *ज्यायस्त्वपरायणत्वे इति*॥

एतेन–

''सामानाधिकरण्येन प्रश्नतत्प्रतिवाक्ययोः।
पौर्वापर्यपरामर्शात् प्रधानत्वेऽपि गौणता॥''

इति भामतीकारिकायाः प्रश्नतत्प्रतिवाक्ययोः सामानाधिकरण्येन=ऐकरूप्यार्थम् प्रधानत्वेऽपि=आकाशपदस्य मुख्यत्वेऽपि गौणता स्वीकर्तव्येति प्रथमांशो विवृतः। अत्र प्रधानत्वेऽपीत्यपिशब्दात् प्रश्नोत्तरत्वेन विशेषणत्वाद वस्तुगत्या न प्राधान्यमपीति सूच्यते। पौर्वापर्यपरामर्शाद गौणतेत्यंशोपोद्बलकं भाष्यं तु–अपि चेत्यादि–ब्रह्मलिङ्गमित्यन्तम्। अत्र प्रश्नोत्तरपरम्परा प्राकरणिकवाक्यानां सर्वेषामादौ संग्रहात् तत एव विशदा। अन्तवत्त्वदोषेण शालावत्यस्य पक्षम्–''अयं लोको गतिरि''ति पक्षम्। दूषयित्वा=''अन्तवत्तु किल ते शालावत्य सामेत्या''दिना निन्दित्वेत्यर्थः। वक्तुकामेन=अनन्तं वक्ष्यामीति। जैवलिनाप्यन्तवदेव यदि किञ्चिदुक्तं स्यात्, तर्हि स्वमतमपि स्वयमेव दूषितं स्यादिति भावः। तथा चानन्तत्वमपि ''सत्यं ज्ञानमनन्तं ब्रह्मे''त्यत्र ब्रह्मलिङ्गतयावगतमत्र श्रूयमाणमाकाशपदस्य ब्रह्मपरतां द्रढयिष्यतीति भावः॥

प्रथमतरं प्रतीतमपि॥ उपक्रमाधिकरणं हि उपक्रमोपसंहारयोर्विरोध एव प्रवर्तते, अत्र तु न विरोधलेशोऽपि; उपक्रमस्यापि ब्रह्मपरत्वात्, इत्याह–*दर्शितश्चेति*॥ ननु–तत्र वाकयशेषानुसारेण ब्रह्मपरत्वं तदुपजीव्यैवेति–चेत्, प्रकृतेऽपि समानमित्याह–*वाक्यशेषगतानिति*॥ यथा ''आकाशो वा'' इत्यादिस्थले ब्रह्मपरत्वम्, वाक्यशेषगुणासम्बन्धाद् न भूताकाशपरतवम् तथाऽत्रापीति हृदयम्। तथा च वाक्यकवाक्यतास्थल एवोपक्रमाधिकरणन्यायः, न पदैकवाक्यतास्थले, अत्र तु पदैकवाक्यतैवाकाशपदस्य ''सर्वाणि ह वा'' इति वाक्यस्य चेति भावः। अत एव–'अग्निरधीतेऽनुवाकम्' इत्यादावग्निपदस्य गौणत्वं वाक्यशेषवशादिति भावः। विध्यर्थवादयोस्तु वाक्यैकवाक्यतैवेति जैमिनीय न्यायमालादिषूक्तम्। तदिदमाह–*वाक्योपक्रमेऽपीत्यादिन माणवकविषयौ दृश्यत इत्यन्तेन*॥

अधिकरणार्थमुपसंहरति–*तस्मादिति*॥ यद्यपि–''अन्तस्तद्धर्मोपदेशादि''त्यत्र तद्धर्मोपदेशा-दित्यनेनान्यथासिद्धब्रह्मधर्मोपदेशादित्यर्थस्यैव विवक्षणात्, अत्रापि तल्लिङ्गपदेन तस्यैवार्थस्य विवक्षणाच्च सिद्धान्तन्यायोऽधिकरणद्वयेऽपि समानः, पूर्वपक्षन्याय एव परं विभिन्नः; तथापि

लिङ्गस्यासाधारणस्य क्वचिच्छ्रुतिबाधकत्वं वर्तत इति सूचनार्थमधिकरणान्तरम्। तथाच लिङ्गप्राबल्यं विवक्षितमिति सूचनार्थमेव-*तल्लिङ्गादिति* स्वशब्देनापि हेतोरुल्लेखः; अन्यथा तु ''तद्धर्मोपदेशादि''त्यस्यैवानुवृत्त्या निर्वाहापत्तिः। अथवा-पूर्वत्र ब्राह्मणवाक्यगतधर्माणामेव ब्रह्मगतानां प्राबल्यं प्रतिपादितम्; उपदेशपदस्वारस्यात्, अत्र तु अर्थवादगतानामिति विशेषात् तल्लिङ्गादिति पृथक् सूत्रणमित्यनुसन्धेयम्। पूर्वोत्तरयोः पक्षयोरुभयोरपि प्रायेण साम्ये कस्याञ्चनाधिकाशङ्कायामेवातिदेशेनाधिकरणान्तरप्रवृत्तिः, न त्वत्यन्तवैषम्येऽपीति। अत एवाकाश इति सूत्रणमात्रसंभवि; पूर्वपक्षयुक्तीनां सर्वात्मना वैषम्यात्। आकाशपदस्य ब्रह्मपरत्वमधिकरणत्रये व्यवस्थाप्यते-आकाशाधिकरणे प्रकृते, दहराधिकरणे प्रथमतृतीयपादे, तत्रैव-आकाशार्थान्तरत्वाधिकरणे च। अधिकं वार्तिके व्यक्तम्॥२२॥

इति प्रदीप इत्यष्टममाकाशाधिकरणम् समाप्तम्॥

भामती

पूर्वस्मिन्नधिकरणे ब्रह्मणोऽसाधारणधर्मदर्शनाद्विवक्षितोपाधिनोऽस्येवोपासना, न त्वादित्यशरीराभिमानिनो जीवात्मन इति निरूपितम्।। इदानीं त्वसाधारणधर्मदर्शनात् तदेवोदगीथे सम्पाद्योपास्यत्वेनीपदिश्यते, न भूताकाश इति निरूप्यते। तत्र 'आकाश इति होवाच' इति किं मुख्याकाशपदानुरोधेन 'अस्य लोकस्य का गतिः इति च 'सर्वाणि ह वा इमानि भूतानि' इति च 'ज्यायान्' इति च 'परायणम्' इति च कथञ्चिद् व्याख्यायतामुतैतदनुरोधेनाकाशशब्दो भक्त्या परात्मनि व्याख्यायतामिति? तत्र

प्रथमत्वात् प्रधानत्वादाकाशं मुख्यमेव नः।
तदानुगुण्येनान्यानि व्याख्येयानीति निश्चयः॥

अस्य लोकस्य का गतिरिति प्रश्नोत्तरे 'आकाश इति होवाच' इत्याकाशस्य गतित्वेन प्रतिपाद्यतया प्राधान्यात्, 'सर्वाणि ह वा' इत्यादीनां तु तद्विशेषणतया गुणत्वात्, गुणे त्वन्याय्यकल्पनेति बहून्यप्यप्रधानानि प्रधानानुरोधेन नेतव्यानि। अपि च 'आकाश इति होवाच' इत्युत्तरे प्रथमावगतमाकाश्पदमनुपजातविरोधित्वेन तदनुरक्तायां बुद्धौ यद्यदेव तदेव वाक्यगतमुपनिपतति तत्तदुपजातविरोधि तदानुगुगुण्येनैव व्यवस्थातुमर्हति। न च क्वचिदाकशाशब्दो भक्त्या ब्रह्मणि प्रैंयुक्त इति सर्वत्र तेन तत्परेण भवितव्यम्। न हि गङ्गायां घोष इत्यत्र गङ्गापदमनुपपक्ष्या तीरपरमिति यादांसि गङ्गायामित्यत्राप्यनेन तत्परेण भवितव्यम्। सम्भवश्चोभयत्र तुल्यः। न च ब्रह्मण्यप्याकाशशब्दो मुख्यः, अनेकार्थत्वस्यान्याय्यत्वात्। भक्त्या च ब्रह्मणि प्रयोगोपपत्तेः। लोके चास्य नभसि निरूढतरत्वात् तत्पूर्वकत्वाच्च वैदिकार्थप्रतोतेर्वैपरीत्यानुपपत्तेः। तदानुगुण्येन च 'सर्वाणि ह वा' इत्यादीनि भाष्यकृता स्वयमेद नीतानि। तस्माद् भूताकाशमेवात्रोपास्यत्वेनोपदिश्यते, न परमात्येति प्राप्तम्।

एवं प्राप्तेऽभिधीयते—आकाशशब्देन ब्रह्मणो ग्रहणं, कृतः? तल्लिङ्गात्। तथाहि—

सामानाधिकरण्येन प्रश्नतत्प्रतिवाक्ययोः।
पौर्वापर्य्यपरामर्शात् प्रधानत्वेऽपि गौणता॥

यद्यप्याकाशपदं प्रधानार्थं तथापि यत् पृष्टं तदेव प्रतिवक्तव्यं, न खल्वनुन्मत्त आम्रान् पृष्टः कोबिदारानाचष्टे। तदिहास्य लोकस्य का गतिरिति प्रश्नो दृश्यमाननामरूपप्रञ्चमात्रविषय इति तदनुरोधाद्य एव सर्वस्य लोकस्य गतिः, स एवाकाशशब्देन प्रतिवक्तव्यः। न च भूताकाशः सर्वस्य लोकस्य गतिः, तस्यापि लोकमध्यपतितत्वात्, तदेव तस्य गतिरित्यनुपपत्तेः। न चोत्तरे भूताकाशश्रवणाद् भूताकाशकार्य्यमेव पृष्टमिति युक्तम्। प्रश्नस्य प्रथमावगतस्यानुपजातविरोधिनो लोकसामान्यविषयस्योपजातविरोधिनोत्तरेण सङ्कोचानुपपत्तेः, तदनुरोधेनोत्तरव्याख्यानात्। न च प्रश्नेन पूर्वपक्षरूपेणाव्यस्थितार्थेनोत्तरं व्यवस्थितार्थं न शक्यं नियन्तुमिति युक्तम्, तन्निमित्तानामज्ञानसंशयविपर्य्यासानामनवस्थानेऽपि तस्य स्वविषये व्यवस्थानात्। अन्यथोत्तरस्यानालम्बनत्वापत्तैर्वैयधिकरण्यापत्तेर्वा।

अपि चोत्तरेऽपि बह्वसमञ्जसम्। तथाहि–'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते' इति सर्वशब्दः कथञ्चिदल्पविषयो व्याख्येयः। एवमेवकारोऽप्यसमञ्जसः। न खल्वपामाकाश एव कारणम् अपि तु तेजोऽपि। एवमन्नस्यापि नाकाशमेव कारणम्, अपि तु पावकपाथसी अपि। मूलकारणविवक्षायान्तु ब्रह्मण्येवावधारणं समञ्जसम्। असमञ्जसन्तु भूताकाशे। एवं सर्वेषां भूतानां लयो ब्रह्मण्येव। एवं सर्वेभ्यो ज्यायस्त्वं ब्रह्मण एव। परमयनं ब्रह्मैव। तस्मात्सर्वेषां लोकानामिति प्रश्नेनोपक्रमाद्, उत्तरे च तत्तदसाधारणब्रह्मगुणपरामर्शात्, पृष्टायाश्च गतेः परमयनमित्यसाधारणब्रह्मगुणोपसंहारात्, भूयसीनां श्रुतीनामनुग्रहाय 'त्यजेदेकं कुलस्यार्थे' इतिवद् वरमाकाशपदमात्रसमञ्जसमस्तु। एतावता हि बहु समञ्जसं स्यात्। न चाकाशस्य प्रधान्यमुत्तरे, किन्तु पृष्टार्थत्वादुत्तरस्य, लोकसामान्यगतेश्च पृष्टत्वाद्, परायणमिति च तस्यैवोपसंहाराद् ब्रह्मैव प्रधानम्। तथा च तदर्थं सदाकाशपदं प्रधानार्थं भवति, नान्यथा। तस्माद् ब्रह्मैव प्रधानमाकाशपदेनेहोपास्यत्वेनोपक्षिप्तं, न भूताकाशमिति सिद्धम्।

अपि च। अस्येवोपक्रमेऽन्तवत् किल ते सामेति *अन्तवत्त्वदोषेण शालावत्यस्य इति*। न चाकाशशब्दो गौणोऽपि विलम्बितप्रतिपत्तिः, तत्र तत्र ब्रह्मण्याकाशशब्दस्य तत्पर्य्यायस्य च प्रयोगप्राचुर्य्यादत्यन्ताभ्यासेनास्यापि मुख्यवत् प्रतिपत्तेरविलम्वनादिति दर्शनार्थं ब्रह्मणि प्रयोगप्राचुर्य्यं वैदिकं निदर्शितं भाष्यकृता। तत्रैव च प्रथमावगतानुगुण्येनोत्तरं नीयते, यत्र तदन्यथा कर्तुं शक्यम्। यत्र तु न शक्यं तत्रोत्तरानुगुण्येनैव प्रथमं नीयत इत्याह *वाक्योपक्रमेऽपि इति*।।२२।।

इति भामती इत्यष्टममाकाशाधिकरणम् समाप्तम्।

श्री कण्ठभाष्य

मण्डलाभिमानिनोऽस्मात् चेतनरूपात् आदित्यादन्य एव हिरण्मयरूपः परमेश्वरः, भेदव्यपदेशात् 'य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयति एष त आत्माऽन्तर्याम्यमृतः, (बृह. ५-७) इति। अत्रामृतशब्देन शिव उच्यते 'एतानि ह वा अमृतस्य नामधेयानि' (जाबाल. ३) इति शतरुद्रीयप्रशंसापरजाबालोपनिषच्छ्रवणात् आदित्याद्भेद एव परमेश्वरस्य तदविदितत्वादिधर्मैः व्यपदिश्यते। तस्मादादित्याच्चेतनादन्य ईश्वरो हिरण्मयः 'नीलग्रीवो विलोहितः' (तै. सं ४-५-१) इति नीलग्रीवः परमेश्वर एवादित्यान्तर्वर्ती प्रतिपाद्यते। तदात्मतया तच्छब्दवाच्यत्वम्।। ननु न नीलग्रीवः परमेश्वर आदित्यान्तर्वर्ती, किन्तु नारायण एव। तथा हि, सर्वत्र लौकिकाः पठन्ति-'ध्येयस्सदा सवितृमण्डलमध्यवर्ती नारायणस्सरसिजासनसन्निविष्टः।' इति। तस्यैव पुण्डरीकसदृशाक्षिद्वयसंबन्धो युक्तः, पुण्डरीकाक्ष इति प्रसिद्धेः। किमन्यथाप्रतिपादनप्रयासेन इति चेत् न, परमेश्वरासाधारणलिङ्गानां हिरण्मयपुरुषे दृश्यमानानां तस्मिन् नारायणेऽनुपपत्तेः। तथा हि-सूत्रविषयस्य संदिग्धस्यास्य वाक्यस्यासन्दिग्धैर्वाक्यान्तरैर्निर्णयो युक्तः। महोपनिषदि श्रूयते, 'आदित्यो वा एष एतन्मण्डलं तपति' इत्यादि तत्र 'य एष एतस्मिन् मण्डलेऽर्चिर्दीप्यते' इति मण्डलप्रभामुक्त्वा 'य एष एतास्मिन मण्डलेऽर्चिषि पुरुषः' इति मण्डलाभिमानिनं सूर्यमभिधाय य एषोऽनतरादित्ये हिरण्मयः पुरुषः' इति हिरण्मयं पुरुषमादित्यान्तर्यामिणमुक्त्वा पुनः 'आदित्यो वै तेज ओजो बलं यशः' इत्यादिना तस्यादित्यरूपस्य विश्रूतिमभिधाय 'एष पुरुष एष श्रूतानामधिपतिः' इति श्रूतपतित्वेन तं निर्दिश्य, पुनः कीदृश इत्याकाङ्क्षायां 'सर्वो वै रुद्रः' इत्यारभ्य 'हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतय उमापतये' इत्युपसंहृतम्। तत्र बाहुग्रहणस्योपलक्षणत्वाद्धिरण्यरूप इति तात्पर्यम्। अतो हिरण्यसदृशरूपः उमापतिरादित्यमण्डलवर्तीति सिद्ध्यति। अत्र नीलग्रीवत्वमुमापतित्वमित्यादि विशेषलिङ्गम्, परमेश्वरादन्यत्र तस्यायोगात्। पुण्डरीकाक्षत्वं साधारणं लिङ्गं, नारायणादन्यत्रापि तस्य दर्शनात् कमललोचना नारी कमललोचनः पुरुष इति। अतो विशेषलिङ्गेन सामान्यलिङ्गस्य बाधः। 'ध्येयः सदा' इत्यादि लौकिकं वचनं भाक्तमेव। ततो हिरण्यसदृशरूपस्त्रिलोचनो नीलग्रीव उमापतिः सकललोककामेश्वरः सर्वपाप्मानाघ्रातो भगवान् परमेश्वर आदित्यान्तर्वर्ती सावित्रीप्रतिपाद्यः सर्वेषां मुमुक्षूणां ध्येय इति सिद्धम्।।

इति श्रीकण्ठभाष्य इत्यष्टममाकाशाधिकरणम् समाप्तम्।

शिवार्कमणिदीपिका

परमेश्वरस्य साधारत्वोक्ति विशेषणविशिष्टशरीरसम्भवासम्भवाभ्यां संशयमाह-**अयमिति।** पूर्वपक्षमाह-**एवं सतीति।** उक्तप्रकारेण संशये सतीत्यर्थः। सर्वाधारत्वमाधारासम्भवे सर्वगत्वं हिरण्यमरूपासम्भवे च हेतुः। न हि व्यापको हिरण्यविकारतया परिच्छिन्ने विग्रहे मातीति भावः। ननु शरीरवतस्सर्वात्मना तस्मिन् शरीरेऽन्तर्गततया भाव्यमिति न नियमः। किं तु तदधिष्ठानमात्रेण भाव्यमिति। अन्यथा चिच्छक्तिव्याप्त्या जीवानां काव्यव्यूहपरिग्रहासम्भवप्रसङ्गात्। प्रमाणबलात्तेषां तदङ्गीकारे तत एवेश्वरस्यापि शरीरवत्त्मङ्गीकरणीयम्। अस्ति हि 'उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्त'मिति तस्यापि शरीरवत्त्वे प्रमाणम्। न च शरीरस्य कर्मजन्यत्वनियमेन कर्मरहितस्य तदसम्भवात् उपासनार्थमुमासहायत्वादिविशिष्टशरीरकल्पनामात्रपरं तदिति वाच्यम्। कर्माभावेऽप्युपासकानुग्रहार्थं शरीरपरिग्रहसम्भवात्। अन्यथा संसारिणा यत्किञ्चिन्निर्मातृत्वं कर्माधीनं दृष्टमिति तस्य प्रपञ्चनिर्मातृत्वस्याप्यसिद्धिप्रसङ्गादित्याशङ्क्याह-**स्वेच्छयेति।** त्रिलोचनत्वं नियतमिति त्वदभिमतप्रमाणानुसारेणैवेति भावः। स्वेच्छया प्रपञ्चसृष्टिवच्छरीरपरिग्रहोऽपि सम्भवति। **अथवेति। उत्पादयेदेवेति। पावकस्य** दाहकत्वमिव वस्तुस्वभावप्रयुक्तं शरीरस्य दुःखजनकत्वमैच्छिकत्वेऽपि परिहर्तुमशक्यमित्यर्थः। तस्मा 'दुमासहाय' मित्यादिकमुपसनार्थ-कल्पनापरं योजनीयम्। 'ध्यात्वा मुनिर्गच्छती'ति वाक्यशेषात्। न चेह तथा योजनं सम्भवति। 'य एषोऽन्तरादित्ये हिरणमयः पुरुषो दृश्यत' इति दृश्यमानतोक्त्या स्वाभाविकत्वावसायादिति भावः। तथापि सर्वलोककामेश्वरत्वसर्वपापराहित्यादिधर्मैरयं परमेश्वरोऽवसीयत इत्याशङ्कामुपसंहारव्याजेन निराकरोति-**तस्मादिति। अयं** भावः। नास्यादित्यमण्डलान्तर्गतस्य पुरुषस्य सर्वलोककामेश्वरत्वं श्रूयते। किं तु 'ये चास्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां चे'त्यादित्यमण्डलादूर्ध्वं ये स्वर्लोकादयो लोका ये च तत्रत्यानां देवानां कामभेगास्तदुभयैश्वर्यं श्रूयते। तत्परिच्छिन्नैश्वर्यश्रवणं जीव एव कर्माधीनं सङ्कुचितैश्वर्यं सङ्गच्छते न तु स्वाभाविकनिरतिशयैश्वर्ये परमेश्वरे। न च देवलोककामैश्वर्योक्त्यैव तच्छेषमनुष्यादिलोककामैश्वर्यमर्थात्सिद्ध्यति। दुर्गाधिपत्योक्त्येव तच्छेषसीमाधिपत्यमिति सर्वैश्वर्यपरमेवेदं वाक्यमिति वाच्यम्। आदित्यपुरुषप्रतिपादनानन्तरं हि 'य

एषोऽन्तरक्षिणि पुरुषो दृश्यत' इत्यादिना प्रतिपाद्यस्याक्षिपुरुषस्य 'ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां चे'ति विभज्यादित्यण्डलाधस्तनमनुष्यादिलोककामेश्वरत्वं श्रूयते। तत्कथं तेन वाक्येनादित्यपुरुषस्य सर्वैश्वर्यं सिद्ध्येत्। न खलु राजकीययोरनयोरयं दुर्गाधिपतिरयं तत्सीमाधिपतिरिति विभज्य कथने कस्यचिद्दुर्गाधिपत्यवचनेन तस्यैव तत्सीमाधिपत्यमपि सिद्ध्यति। ननु तथापि सर्वपापराहित्यं श्रूयत एव 'तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्यः उदित'इति। न च सर्वपापराहित्यं देवेषु संभवति। 'नह वै देवान्पापं गच्छति पुण्यमेवामून्गच्छती'ति श्रुतेः। यदि देवेष्वप्यनादिभवसञ्चितानि प्रसुप्तानि पापानि सन्त्येव तेषां देवत्वदशायां तेषु फलानारम्भकत्वामात्रं 'न ह वै देवा'निति श्रुत्यर्थ उच्येत तदा सर्वपापोदयवाक्यस्यापि स एवार्थोऽस्त्विवति वाच्यम्। यतो मोक्षशास्त्रे पाप्मशब्दः पुण्यस्यापि ग्राहकः। मुमुक्षुं प्रति तस्याप्यनिष्टफलत्वात् 'न सुकृतं न दुष्कृत' मित्युपक्रम्य 'सर्वे पाप्मानोऽतो निवर्तन्त' इत्युभयत्रापि तत्प्रयोगाच्च पुण्यपापोदयराहित्यादिकं तु देवेष्वपि न सम्भवतीति चेन्न। पाप्मशब्दस्यानिष्टफलत्वेन रूपेण क्वचिदजहल्लक्षणया पुण्यसाधारण्येऽपि पापमात्रे गृहीतशक्तिकस्य तस्य मोक्षशास्त्रेऽपि तत्साधारण्यनियमाभावात्। अन्यथा 'नैतं सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतं सर्वे पाप्मानोऽतो निवर्तन्त' इति प्रकृतेष्वहोरात्रजरामृत्युशोकसुकृतदुष्कृतेष्वविशेषेण पाप्मशब्दस्य प्रयुक्ततयान्यत्रापि तावत्साधारण्यप्रसङ्गात्। न चेष्टापत्तिः। तस्मिनेव प्रकरणे 'एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोक'इति सत्यपि पाप्मशब्दं जरामृत्युशोकानां पृथग्ग्रहणात्। अस्तु वा मोक्षशास्त्रे सर्वत्र पाप्मशब्दः पुण्यसाधारणः। तथाप्यत्र नासङ्गतिः। कल्पान्ते मुक्तिं प्राप्स्यतां हिरण्यगर्भादीनां ब्रह्मसाक्षात्कारवत्त्वेन तन्निर्धूतसकलपुण्यपापपञ्जराणां प्रारब्धमात्रानुवृत्तिमतां पुण्यपापाल्पत्वाभिप्रायेण सर्वपापोदितत्वव्यपदेशार्हत्वात्। वस्तुतस्तु तद्व्यपदेशः परमेश्वर एव न सङ्गच्छते। कथं सर्वपापोदितत्वं पाप्मनः स्वाच्छादकादुद्गमनं प्राक् तदाच्छादितस्य घटते मेघमण्डलादुदितत्वमिव प्राङ्मेघमण्डलाच्छादितस्य चन्द्रस्य। न च कदाचिदपि परमेश्वरः पापाच्छादित इष्यते। अतः प्राक्पापाच्छादनपिहितस्वभावेषु ब्रह्मसाक्षात्कारनिर्धूतसकलतदाच्छादनेषु हिरण्यगर्भादिष्वेव तस्यापि स्वारस्यं प्रतिपद्यामहे। नन्वादित्यपुरुषस्य उदितिनामविधानतन्निर्वचनतद्वेदनफलकथनानन्तरं 'तस्यर्क्च साम च गेष्णौ तस्मादुद्गीथस्तस्मात्त्वेवोद्गातैतस्य हि गाते'ति ऋक्सामयोस्तद्गानरूपत्वं तस्मादेव हेतोरुद्गीथभक्तेरुद्गीथसंज्ञावत्त्वं तद्गायकस्य ऋत्विज उद्गातृसंज्ञावत्त्वं चेति श्रूयते। तत्सोमेन्द्रादिदेवताविषयस्तोत्रीयऋक्सामगेयत्वं सर्वात्मनि ब्रह्मण्युपपद्यते न त्वन्यत्रेति चेन्न। तस्य

ब्रह्मण्यप्यनवच्छिन्नपराहम्भाववत्त्वेनोपपादनं कार्यं न तु सोमेन्द्रादिदेवतारूपजीवाभेदेन। तद्वत्त्वं तु ब्रह्मज्ञानविगलितपरिच्छिन्नदेहाभिमाने पराहम्भाववति हिरण्यगर्भादावप्युपपद्यते। वास्तवसार्वात्म्या-भावादनुपपत्तावप्याभिमानिकपराहम्भावविषयतामात्रेण कथञ्चिदुपपादनीयम्। उपक्रमोपसंहारगत-साधारणत्वविग्रहवत्त्वपरिच्छिन्नैश्वर्यलिङ्गानुरोधात् पूर्वाधिकरणविषयवाक्य इव अत्र मध्यगतबहुप्रमाणविरोधाभावात्। तस्मादयमादित्यमण्डलान्तर्वर्तित्वेन श्रुतिस्मृतिप्रसिद्धो हिरण्यगर्भः स्यात्। 'अर्यम्णे चरुं निर्वपेत्स्वर्गकाम'इतीष्टिविद्या'वसौ वा आदित्योऽर्यमा' इत्यादित्यरूपत्वेन व्याख्यातस्यार्यम्णः तदिष्ट्यनुवाक्यायां'मर्यमायाति वृषभस्तुविष्मान्दाता वसूनां पुरुहूतो अर्हन्। सहस्राक्षो गोत्रभिद्वज्रबाहुरस्मासु देवो द्रविणं दधात्वि'तीन्द्ररूपतया प्रतिपादनादिन्द्रो वा स्यान्मडलाभिमानित्वेन प्रसिद्धत्वात् ताभ्यामन्य आदित्यो वा स्यात् सर्वथा परब्रह्मव्यतिरिक्तो यः कश्चिद्देवताविशेषएवायमिति। अन्तरिति सौत्रपदेन मण्डलान्तर्वर्तिपुरुषः पक्षो निर्दिष्ट इति तत्रानुषङ्गलब्धं साध्यं दर्शयति-**परमेश्वर इति।** 'तद्धर्मोपदेशा'दित्यत्र बहुवचनान्तसमासेन धर्मबाहुल्यं विवक्षितमित्याह-**तद्धर्माणामिति। स एष इति। ननु** छान्दोग्यश्रुतिरिहोदाहृता। तत्र 'स एष सर्वेषां लोकानामीष्टे सर्वेषां कामाना'मिति सर्वलोककामैश्वर्यं न श्रूयते किंतु 'ये चैतस्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां चे'ति कतिपयलोककामैश्वर्यं श्रूयते। तत्तु परिच्छिन्नैश्वर्याधिकारिकदेवताविशेषलिङ्गं परमेश्वरसाध्यं विरुद्धमेव। अत एवेदं लिङ्गं पूर्वपक्षसाधकत्वेनोदाहृतं शाङ्करभाष्ये। सत्यम्। अक्ष्यादित्यपुरुषयोरैक्यं सिद्धं कृत्वा ततस्सिद्धस्य सर्वलोककामेश्वरत्वस्यानुवादरूपमिदं भाष्यं न तु श्रुतिवाक्योदाहरणरूपम्। ऐक्ये हि तयोर्विभज्योक्तमादित्यमण्डलोपरितनलोककामेश्वरमधस्तनलोककामेश्वरत्वं चैकधर्मिकं भवत्सर्व-लोककामेश्वरत्वरूपं पर्यवस्यति। विभज्यैश्वर्यकथनं परमुपासनार्थमिति सिद्ध्यति। नन्वक्ष्यादित्यपुरुषयोरैक्यसिद्धिरेव कुतः। उच्यते। यद्ययं हिरण्मयः पुरुषो मंडलाधिष्ठाता हिरण्यगर्भरूपः यदि वा परमेश्वरः उभयथाप्यादित्यमंडलस्थ एवायमक्षिस्थोऽपि 'तद्यत्तत्सत्यमसौ स आदित्यो य एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुष आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविश' दित्यादिश्रुतिषु हिरण्यगर्भादिरूपस्य मण्डलाधिष्ठातुः 'य आदित्ये तिष्ठन्नादित्यादन्तरो यश्चक्षुषि तिष्ठंश्चक्षुषोऽन्तर' इत्यादिश्रुतिषु परमेश्वरस्य चाक्ष्यादित्ययोरैक्यावसायात्। इह च नामरूपैक्येनाधिदैवतमन्तरादित्येऽध्यात्ममन्तरक्षिणि च मंडलाभिमानिपुरुषस्य परमेश्वरस्य चोभयत्राप्येकस्यैवोपासनाविधानप्रतीतेश्च। न चादित्यपुरुषस्य नामरूपाद्युपदेशानंतरं 'य एषोऽन्तरक्षिणि पुरुषो दृश्यत'इत्युपक्रम्य'तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णो तौ गेष्णौ

यन्नाम तन्नामे'त्यादित्यपुरुषनामादीनामक्षिपुरुषेऽतिदेशात्तयोर्भेदः प्रतीयते अभेदेऽतिदेशानपेक्षणादिति शङ्कनीयम्। नाम्नः स्थानविशेषविशिष्टवाचित्वशङ्कया रूपस्यैच्छिकस्य प्रतिस्थानं भेदशङ्कया चातिदेशोपपत्तेः। दृश्यते हि 'तद्यत्तत्सत्यमसौ स आदित्य' इत्युपक्रान्तस्य हिरण्यगर्भस्य मण्डलेऽक्षिणि च स्थानविशेषविशिष्टवाचित्वेन भिन्ने अहरहमिति नामनी दृश्येते तद्वद्रूपस्यापि स्थानभेदेन भेदशङ्कया 'य एष एतस्मिन्मण्डले पुरुषस्तस्य भूरिति शिर' इत्यादिना क्वचिदुपदिष्टस्य 'योऽयं दक्षिणेऽक्षन् पुरुषस्तस्य भूरिति शिर'इत्यादिनान्यत्राप्युपदेशः। एवं च मण्डलाभिमानिनः तदन्तर्यामिणश्चाक्ष्यादित्ययोरनुगतत्वम्। इह तयोरन्यतरस्याक्षिण्यादित्ये चैकस्यैव प्रतिपाद्यत्वं चान्तर्याम्यधिकरणसत्यविद्याधिकरणपर्यालोचनालभ्यं समानमेव पूर्वपक्षसिद्धान्तयोः। किंतु शरीरश्रवणात् सत्यविद्यायामिवात्रापि मण्डलाभिमान्याधिकारिकपुरुषः प्रतिपाद्यो न तु परमेश्वर इति पूर्वपक्षिणो विवादः। अत्रेदमुच्यते। स्थानविशेषणैकस्योपासनार्थं विभज्य प्रतिपाद्यमानमूर्ध्वाधरलोककामेश्वरत्वं सर्वलोककामेश्वरत्वरूपं पर्यवस्यति। तत्तु परमेश्वर एव सङ्गच्छत इति। एवमर्थतः फलितलिङ्गमभिप्रेत्यैव शाङ्करभाष्येऽपि सिद्धान्ते लोककामेशितृत्वमपि निरङ्कुशं श्रूयमाणं परमेश्वरं गमयतीत्युक्तम्। तस्मादिह न काचिदनुपपतिः। **सर्वेभ्यःपाप्मभ्य इति।** अस्य वाक्यस्य मुख्यार्थः सर्वस्मात्पापादुद्गमनरूपो देवेष्वपि न सम्भवति। न हि कश्चिदपि जीवो नीडे स्थिते तस्माच्छकुन्त इव पापपञ्जरे स्थिते तस्मादपादानादूर्ध्वं गच्छति। तस्माद्यथा कुतश्चिदपादानात्तं विहायोद्गतस्सर्वात्मना तत्सम्बन्धरहितो भवति। एवमयं सर्वात्मना पापसंबन्धरहित इत्ययमर्थो लक्षणया प्रतिपाद्यते। अन्यत्रापि हि परमेश्वरे पापसम्बन्धराहित्यवचनानि यथाकथञ्चिल्लाक्षणिकान्येव दृश्यन्ते यथा 'एष आत्माऽपहतपाप्मा सर्वे पाप्मानोऽतो निवर्तन्त' इत्यादीनि। असङ्कुचितसकलपापराहित्यं तु परमेश्वर एव सम्भवति नाधिकारिकपुरुषेषु। अतस्सर्वलोककामेश्वरत्ववत्सर्वपापराहित्यमपि पारमेश्वरं लिङ्गमिति भावः। अपि चादित्यपुरुषस्य ऋक्सामगेष्णत्वादिवचनेनाक्षिपुरुषस्य 'तद्य इमे वीणायां गायन्त्येतं ते गायन्ती'ति लौकिकगानविषयत्ववचनेन 'सैव ऋक्साम तदुक्थं तद्यजुस्तद्ब्रह्मे'ति साक्षात्सार्वात्म्यवचनेन च बहुशोऽवगम्यमानं सार्वात्म्यमपि परमेश्वरलिङ्गम्। न तदाभिमानिकत्वमात्रेण ततोऽन्यत्र नेतुं युक्तम्। इहान्यत्रोपक्रमोपसंहारैकरूप्यासिद्धेः। 'ये चैतस्मा'दित्याद्युपसंहारस्य परिच्छिन्नैश्वर्यविषयत्वाभावात्। उपक्रमगतसाधारणत्वविग्रहवत्वयोर्ब्रह्मण्यपि सम्भवेनान्यथासिद्धतायां अपि वक्ष्यमाणत्वाच्च। तदेतत्सार्वात्म्तत्समर्पकवचनजातं चादिशब्दाभ्यां संगृहीतम्। ननु सर्वलोककामेश्वरत्वादीनां परमेश्वरधर्मत्वं क्व सम्प्रतिपन्नं येन तेषां 'तद्धर्मोपदेशा'दिति सूत्रे परमेश्वरधर्मत्वेन

सिद्धवदुपादानमुपपद्येतेत्याकाङ्क्षायां तत्सम्प्रतिपत्तिस्थानमुदाहरति-**एको हि** रुद्र इति। मन्त्रद्वयेऽप्येक इति विशेषणेन सर्वलोकेश्वरत्वं सर्वकामेश्वरत्वं चानितरसाधारणमित्यपि दर्शितम्। 'एष आत्माऽपहतपाप्मा सर्वं खल्विदं ब्रह्म'त्यादिश्रवणमादिशब्देन गृह्यते। साधारत्वं परिच्छिन्नशरीरविशिष्टतयेत्युपपादयति-**सर्वाधारस्येत्यादिना।** शरीरवत्त्वं तत्प्रतिक्षेपकतर्कस्य श्रुतिविरोधादप्रामाण्यसमर्थनेनोपपादयति-**शरीरसम्बन्धादिति।** यथा परमेश्वरस्वरूपं तस्यापहतपाप्मत्वादिगुणवत्त्वं च श्रुतिसिद्धत्वात्तर्को न प्रतिक्षेप्तुं शन्कोति तथा तस्य शरीरवत्त्वमपि। अपहतपाप्मत्वादिलिङ्गोपनीतस्य तस्य हिरण्यश्मश्रुत्वादिविशिष्टशरीरप्रतिपादकोदाहृत श्रुतिविरोधादिति भाव:। स्यादेतत्। शरीराणां कर्मजन्यत्वदु:खजनकत्वनियमं लोकदृष्टमवलम्ब्य परमेश्वरस्य सशरीरत्वे कर्मवत्वदु:खित्वरूपं संसारित्वं नापाद्यते येन श्रुतिविरोधात्तर्क: प्रतिहन्येत। किंतु 'रमणीयचरणा रमणीयां योनिमापद्येरन् कपूयचरणा: कपूयां योनिं न ह वै सशरीरस्य सत: प्रियाप्रिययोरपहतिरस्ती'त्यादिश्रुतिसिद्धं नियममवलम्ब्य। न चैच्छिकं शरीरं स्वातन्त्र्याविघातकमिति न तादृशशरीरस्य कर्मजन्यत्वं दु:खजनकत्वं वेति वाच्यम्। उदाहृतश्रुत्यनुरोधेन शरीरमात्रस्य कर्मजन्यत्वदु:खजनकत्वनियमेऽवधृते तथाभूतशरीरेच्छाया एव 'विधिविहितं बुद्धिरनुसरती'तिन्यायेन कर्मानुसारित्वप्राप्ते:। न च स्वेच्छाशरीरं स्वातन्त्र्यायोपपद्यते। 'स्वेच्छैव तादृशी पुंसां यस्मात्कर्मानुसारिणी'ति पौराणिकफणितेश्चेत्याशङ्कानिवारणाय भगवतीति श्रुतिविशेषणम्। भगवती वीर्यवती रमणीयचरणादिश्रुत्यपेक्षया बलवतीति यावत्। 'भग: श्रीकाममाहात्म्यवीर्य-यत्नार्ककीर्ति'ष्विति हि नैघण्टुका:। बलं चास्या: विशेषविषयत्वलक्षणमिति स्फोरयति-**अस्य शरीरसम्बन्धमिति।** नन्वपहतपाप्मत्वादिलिङ्गैरादित्यान्तर्वर्ती परमेश्वर इति निर्णये सति खलु हिरण्यश्मश्रवादिवाक्यं तस्य दु:खहेतुपाप्मरूपकर्मरहितस्यैव सत: शरीरसम्बन्धं प्रतिपादयत् सामान्येन शरीरस्य कर्मजन्यत्वं दु:खजनकत्वं च प्रतिपादयतो वाक्याद्विशेषविषयत्वेन प्रबलमिति सामान्यवाक्यं शरीरविशेषविषयं भवेत्। तथा निर्णय एव न सिद्ध्यति। शरीरस्य कर्मजन्यत्वे दु:खजनकत्वे च लाघवाच्छरीरत्वमेवावच्छेदकं न तु तद्विशेषत्वमित्युपपत्तिरूपतात्पर्यलिङ्गवद्रमणीयचरणादिवाक्य-समर्पितकर्मजन्यत्वदु:खजनकत्वदोषदुष्टशरीरवत्त्वलिङ्गादादित्यान्तर्वर्तिपुरुषस्य संसारित्वानिश्चये सति सर्वपापोदयादिपरमेश्वरलिङ्गानां तदनुसारेण नेतव्यत्वात्। न च तेषां बहुत्वादेकं शरीरवत्त्वलिङ्गं न तद्विरुद्धार्थसमर्पणक्षममिति तात्पर्यं वाच्यम्। तात्पर्यलिङ्गवत्त्वाद्वाक्योपनीतदोषशालिन: शरीरित्वलिङ्गस्यैकस्याप्यनन्यथासिद्धत्वेन अतथाभूतबहुलिङ्गेभ्योऽनुकूलतर्कवदनुमानस्य तद्रहित-बह्वनुमानेभ्य इव बलवत्त्वादित्याशङ्क्य प्रतिपादयतीत्युक्तम्। तात्पर्येण समर्थयतीत्यर्थ:। अस्ति

सर्वपापराहित्ये तावदुपास्यगुणे तदनुगुणफलरूप 'मुदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदे' तिवाक्यशेषसमर्पितं तात्पर्यलिङ्गम्। तच्च श्रुतिसमर्पितत्वात्पुरुषबुद्धिकल्प्यलाघवरूपोपपत्तितः प्रबलम्। एवमक्ष्यादित्यवर्त्येकपुरुषगतोर्ध्वाधस्तनलोककामेश्वरत्वरूपे सर्वकामेश्वरत्वेऽपि 'सोऽमुनैव स एष ये चामुष्मात्पराञ्चो लोकास्तांश्चाप्नोति देवकामांश्चाथानेनैव ये च तस्मादर्वाञ्चो लोकास्तांश्चाप्नोति मनुष्यकामांश्चे'ति वाक्यशेषप्रतिपन्नमस्ति तदनुगुणरूपं तात्पर्यलिङ्गम्। तथा सार्वात्म्येऽपि बहुविधोक्तप्रकारोपनीतत्वमस्त्यभ्यासरूपं तात्पर्यलिङ्गम्। एवं च बहुभिः प्रबलतात्पर्यलिङ्गवद्वाक्यसमर्पितैर्लिङ्गैः परमेश्वरत्वनिश्चये सति तस्यैव दुःखहेतुपापकर्मराहित्येन सह आदित्याक्षिस्थानयोरुपदेशातिदेशाभ्यां तात्पर्येण तत्प्रतिपाद्यमानमुक्तरूपं शरीरं न प्रत्याख्यातुं शक्यम्। न च दुःखहेतुकर्मजन्यदुःखजनकत्वं वा तत् कल्पयितुं शक्यमिति तदनुसारेण रमणीयचरणादिवाक्यमेवानीश्वरशरीरविषयतया व्यवस्थापनीयम्। तत्तात्पर्यलिङ्गतयोपन्यस्ता लाघवोपपत्तिस्तु कर्माजन्यं दुःखाजनकं च सर्वपापोदितस्य परमेश्वरस्य शरीरं प्रतिपादयन्त्या श्रुत्या विरुद्धत्वान्नादरणीयेति भावः। एवं च सर्वपापोदितत्वादिकं संसारिणि कथमप्यसम्भवादनन्यथासिद्धं शरीरवत्त्वं तदुपाधिकं साधारत्वं च पारमेश्वरगुणकलापवच्छ्रुतिप्रतिपन्नमङ्गीकर्तुं शक्यत्वादन्यथासिद्धमित्यनन्यथासिद्धिरूपोऽप्यत्र बलाबलविभागोऽनुसन्धेयः। पारमेश्वरशरीर-प्रतिक्षेपतर्कस्य श्रुतिविरोधाभासत्वमुक्तं स्वतोऽपि तस्याभासत्वमाह–पावक इति। न हि दाहकस्वभाव इति पावकः शक्तिविशेषयुक्तान् भूतवशिनोऽपि दहति। एवं दुःखजनकस्वभावमपि शरीरं धर्मिग्राहकमानसिद्धसर्वशक्तियुक्तस्य परमेश्वरस्य दुःखं न जनयिष्यति। शरीरं दुःखजनकमेवेति नियमोऽस्ति चेत्तस्य वह्निर्दाहक एवेति नियमस्येव शक्तिरहितविषये चारितार्थ्यं भविष्यति। ईश्वरतज्ज्ञानादिवत्तच्छरीरस्यापि सर्वकारणत्वाभ्युपगमे विरोधाभावादेवं शरीरं कर्मजन्यमेवेति नियमस्यापि परमेश्वरानुग्राह्यनिग्राह्यपुरुषजन्यत्वेन चारितार्थ्यमुपपद्यत इति न कश्चिद्युक्तिविरोध इति भावः। **यथा कप्यासमिति**। एवमिह वक्तुं शक्यम्। अक्षिद्वित्वमुद्देश्यगतत्वान्न विवक्षितं ग्रहैकत्ववत्। तथा च सम्मार्गस्य सर्वग्रहविषयत्ववत्पुण्डरीकसादृश्यस्याक्षित्रयविषयत्वं भविष्यति। कोऽस्मिन्विग्रहे पारमेश्वरत्वासम्भवशङ्कावकाशः। किमर्थं च तत्र 'द्वावग्निकल्पा'वित्याद्युदाहरणेन परिहारान्वेषणम्। न च तृतीयलोचनस्य मुकुलितत्वाद्विकसितपुण्डरीकसादृश्यमक्षित्रयस्य न सम्भवतीति वाच्यम्। द्वित्वविवक्षायां खलु तस्य 'यथा कप्यासं पुण्डरीक'मिति विशेषणार्थस्य तृतीयलोचनाव्द्यावर्तकं तद्द्वित्वविशेषणं न तु लोचनान्तरव्यावर्तकमिति द्वित्वविशेषणोपपादनार्थं कपिशब्दस्य योगेन सूर्यपरत्वमङ्गीकृत्य सूर्यकरविकसितपुण्डरीकसादृश्यं तस्य 'यथा कप्यासमित्यादिवाक्यस्यार्थ इति

व्याख्यातव्यम्। तदविवक्षायां तु कपिर्मर्कटः तस्यासः आस्यते उपविश्यते अनेनेति व्युत्पत्त्या पश्चाद्भागः तत्सादृश्यात् ताच्छब्द्यम्। तथा च मर्कटपश्चाद्भागवत् लोहितं यत्पुण्डरीकं तत्सादृश्यं तदर्थ इत्येव व्याख्यातुमुचितम्। प्रोद्गातृन्यायेन रूढिपूर्वकलक्षणासम्भवे योगानौचित्यात्। 'य उदगान्महतोऽर्णवाद्विभ्राजमानस्सलिलस्य मध्यात्समावृषभो लोहिताक्ष'इति मन्त्रे मण्डलान्तर्वर्तिनो लोहिताक्षत्ववर्णनदर्शनेन अत्रापि श्रुत्यन्तरप्रतिपन्नार्थवर्णनसम्भवे अर्थान्तरवर्णनानौचित्याच्च। न चैवं सति हीनोपमा दोषः उपमितोपमात्वात् 'महामहानीलशिलारुचः पुरो निषेदिवान्कंसकृषः स विष्टरे। श्रितोदयाद्रेरभिसायमुच्चकैरचूचुरच्चन्द्रमसोऽभिरामताम्।।' इत्यादिषु साक्षादपि हीनोपमाया दर्शनाच्च। तत्र 'त्वदाननसमश्चन्द्र'इत्यादिवत् कविसमयसिद्धत्वात् हीनोपमा न दोष इति चेत्तर्हि अनादिकवेः परमेश्वरस्य कृताविहापि सा न दोष इति सन्तोष्टव्यम्। एवं चात्र केषाञ्चिद्वेदपरिहरणीयन्यायविरोधमविगणय्य काव्यपरिहरणीयहीनोपमादोषभयात्कपिशब्दस्य सूर्ये योगाश्रयणमारोपितवृश्चिकभयादाशीविषमुखे निपातनम्। हीनोपमादोषमेकं परिहर्तुं प्रवृत्तानां च तेषां ब्रह्मोपासनां कुर्वन्ति ब्रह्महत्यां करोतीति वदतामिव अश्लीलनिगृहीतार्थत्वरूपौ द्वौ दोषौ प्रसज्येयाताम्। परमेश्वरलोचनोपमाने हीनोपमादोषादपि च तदभिव्यक्तिस्थाने भगवति सूर्ये मर्कटप्रसिद्धकपिशब्दप्रयोगरूपमश्लीलं कष्टतरम्। साक्षादेव च परमेश्वरे सकलवेदमन्त्रस्तूयमानेन्द्रानपकर्षविषयहीनार्थगायत्रीमन्त्रसादृश्यमनुसन्धेयमभ्युपगच्छतां न हीनोपमात्र दोषतयोद्भावयितुमुचिता। नन्वमरकोशे 'पुण्डरीकं सिताम्भोज'मित्यनुशिष्टं तत्र कथं कप्यासविशेषणोपनीतं लौहित्यमन्वेतु। सत्यम्। तदनुशासनं नाभियुक्तसम्मतम्। यतः शबरस्वामिना नवमाध्याये 'मौद्गं चरुं निर्वपेच्छ्रियै श्रीकाम'इति विहितायामिष्टौ पुण्डरिकाणि बर्हीषि भवन्ती'ति स्तरणार्थत्वेन विहितेषु पुण्डरीकेष्वतिदेशप्राप्तस्य 'दर्भैः स्तृणीत हरितै'रिति मन्त्रस्य दर्भपदस्थाने पुण्डरीकपदमिव हरितपदस्थाने रक्तपदमूहितव्यमित्युक्तम्। पार्थसारथिमिश्रप्रभृतिभिरपि रक्तपदोहवि-साविवोक्तः। वाक्यकारेणाप्यत्रैव विषयवाक्ये पुण्डरीकविशेषणं कप्यासपदं कमर्कटजघनपरतया व्याख्यातम्। कपिशब्दस्य यौगिकार्थमादाय तस्य पदस्यान्येष्वपि केषु चिदर्थेषु वाक्यकारेण प्रदर्शितेष्वपि रूढिप्राबल्यश्रुत्यन्तरदृष्टार्थपरव्याख्यानौचित्यन्यायानु-सारिभिस्तत्त्वविद्भिरिदमेव व्याख्यानं परिगृहीतम्। न चैतावदभियुक्तव्यवहारविरोधे कतिपयकाव्यप्रयोगमात्रदर्शिनः कोशकारस्य वचनं स्वार्थव्यवस्थापने प्रभवति। नन्वत्र 'य एषोऽन्तरादित्ये हिरण्मयः पुरुष'इत्यादिना वर्णितविग्रहे लोचनं सोमे ग्रहवन्न प्राप्तम्। अतो रक्तारविन्दसादृश्यविशिष्टलोचनविधिपरमिदं वाक्यमवगन्तव्यम्। तथा च विधेयगतस्य द्वित्वस्य

विवक्षितत्वात् द्वित्वविशेषणेन लोचनान्तरस्य तत्र रक्तारविन्दसादृश्यस्य वा व्यवच्छेदो लभ्येतेत्युभयथापि विग्रहस्य पारमेश्वरत्वव्याघातः। परमेश्वरस्य हि द्वात्रिंशल्लक्षणोपेतविग्रहस्य वामदक्षिणलोचनयोः प्रान्ते परं महापुरुषलक्षणं लौहित्यशालित्वमूर्ध्वलोचनमेव तु निखिलब्रह्मांडहोमाधारसंवर्ताग्निरूपं सर्वात्मना लोहितं यद्युच्येत विग्रहत्वसामान्यादर्थाल्लोचन-प्राप्तिरस्ति। तथा सत्यौत्सर्गिकं तद्द्वित्वमपि प्राप्नोति। तथा च सोमग्रहबहुत्ववदुक्त-विग्रहलोचनत्रित्वस्याप्राप्तेः सर्वेषु ग्रहेषु सम्मार्गविधेरिव त्रिष्वपि लोचनेषु रक्तारविन्दसादृश्यविधेरलाभात्स एव व्याघातः। तस्माद्विध्यनुवादपक्षयोरुभयोरप्यत्र विग्रहे पारमेश्वरत्वासम्भवशङ्का प्रवर्तत इति चेदुच्यते। अनूद्य विधानसम्भवे 'सोमेन यजेते' त्यादाविव गत्यन्तराभावे समाश्रयणीयं विशिष्टविधिगौरवं नाभ्युपगन्तव्यम्। सम्भवति चात्र श्रुत्यन्तरपुराणादिप्रसिद्धानां परमेश्वरलोचनानामनुवादः। तथाहि-सर्वकामेश्वरात्वादिलिङ्गैः परमेश्वर इह प्रतिपाद्ये बुद्धिसन्निहिते हिरण्मयत्वादिविशिष्टविग्रहवर्णने च तद्विषयत्वेनावधारिते तस्य विग्रहाङ्गीकारो चाविरुद्धे प्रतिपन्ने तत्र विग्रहे परमेश्वरविग्रहत्वलिङ्गेन श्रुत्यन्तरादिप्रसिद्धं लोचनत्रित्वं प्राप्नोतीत्येवं प्राप्तानां तेषामिहानुवादस्संभवति। शङ्कावादिनापि हि परमेश्वरविग्रहस्य लोचनत्रयप्रसिद्धिमवलम्ब्यैव द्विलोचनस्यास्य विग्रहस्य पारमेश्वरत्वं न सम्भवतीति शङ्कनीयम्। न च तथाप्यस्या'क्षिणी'इति विशिष्टानुवादो न सम्भवतीति शङ्कनीयम्। 'दध्नेन्द्रियकामस्य जुहुयादित्यत्र दध्नः फलसम्बन्धे विधीयमाने 'जुहुया'दित्यस्य प्रकरणप्राप्ताश्रय- सम्बन्धानुवादकत्ववत् लोचनानां रक्तारविन्दसादृश्यसम्बन्धे विधीयमाने 'अस्ये' त्यस्य प्रकरणप्राप्तपरमेश्वरसम्बन्धानुवादकत्वोपपत्तेः। नन्वस्त्विह'क्षिणी'इत्यंशोऽनुवादः तथापि तद्द्वित्वस्य विवक्षा स्यात् 'अग्नी आदधीत यस्योभावग्नी अनुगतावभिनिम्रोचेदभ्युदियाद्वा पुनराधेयं तस्य प्रायश्चित्तिः युवं हि स्थ स्वःपती' इति द्वयोर्यजमानयोःप्रतिपदं कुर्यादिति विधिषूद्देश्यविशेषणस्याप्यग्नियजमानद्वित्वस्य विवक्षादर्शनादिति चेत् न। वैषम्यात्। उद्देश्यं हि द्विविधम्। उपात्तमुत्पाद्यं च। यद्वाक्यात्तरोत्पन्नं सिद्धक्रत्वादिस्वकार्यसम्बन्धं तत्रैव निर्ज्ञातसङ्ख्याकं संस्कारादिविधानार्थं केवलमन्यत्रानूद्यते तदुपात्तम्। यथा'ग्रहं संमार्ष्टि'इत्यादिविधिषु ग्रहादिकम्। तत्र नास्ति परिच्छेदकसङ्ख्यापेक्षा प्राङ्निर्ज्ञातसंख्यत्वादेव। यत्तु, संस्कारवाक्योद्देश्यं संस्कारेणोत्पाद्य स्वकार्येण योजनीयं तत्रप्रागनिर्ज्ञातसं ख्याके तस्मिन्नस्ति परिच्छेदकसंख्यापेक्षा। अतस्तत्र विवक्षितैव सङ्ख्या। अत एव चमसाध्वर्यून्वृणीते' इत्यत्रोद्देश्याश्चमसाध्वर्यवो वरणेनोत्पाद्य क्रतावुपादेया इति तद्बहुत्वं विवक्षितमित्युक्तम् 'उत्पत्तौ तु बहुश्रुते' रिति तृतीयाध्यायाधिकरणे। ततश्च 'अग्नी आदधीते' त्यत्र

उद्देश्ययोरग्न्योराधानोत्पादितयो'राहवनीये जुहोति' 'गार्हपत्ये हवींषि श्रपयती'त्यादिवाक्यैः स्वकार्यसम्बन्धः कर्तव्य इत्युत्पाद्योद्देश्यत्वात् सङ्ख्याविवक्षा युक्ता। 'यस्योभावग्नी अनुगता'वित्यत्र अग्न्योरुपात्तोद्देश्यत्वेऽप्यग्न्यनुगमे निमित्ते विधीयमानस्य पुनराधानस्य 'अग्नी आदधीते' ति विहिताधानाभ्यासरूपत्वात् तस्य चाधानस्याग्निद्वयोत्पादकतया निर्ज्ञातस्य सत्येकस्मिन्नग्नौ क्रियमाणस्याग्निद्वयोत्पादकत्वायोगाद्विधीयमानस्य नैमित्तिकाधान स्वभावपर्यालोचनयापेक्षितत्वात् तद्द्वित्वविवक्षा युक्ता। 'द्वयोर्यजमानयो'रित्यत्र तथैवोपात्तोद्देश्यत्वेऽपि नैमित्तिकप्रतिपन्नमंत्रविधान-स्यानियतनिमित्तापेक्षत्वाद्यजमानमात्रस्य यत्किञ्चिद्गतद्वित्वमात्रस्य च सर्वत्रक्रतौ नियतत्वा-द्विधीयमाननैमित्तिकापेक्षानुसारेण कुलाययज्ञादौ क्वचिदेव सम्भवादनियतं यजमानद्वित्वं निमित्तं वक्तव्यम्। 'द्वयो'रिति विशेषणं च साफल्यं नेतव्यम्। 'उपास्मै गायता नर' इति नित्यप्रतिमन्त्रेण 'एते असृग्रमिन्दव'इति बहुभ्यो यजमानेभ्य इति वाक्यान्तरविधेयप्रतिपन्नमन्त्रान्तरेण च सहाष्टदोषदुष्टे विकल्पोऽपि परिहरणीय इत्यपेक्षितत्वात् तद्द्वित्वविवक्षापि युक्ता। इह'त्वक्षिणी' इत्येतन्नोत्पाद्योद्देश्यपरम्। न वा तद्द्वित्वसङ्ख्यापेक्षं किञ्चिद्विधेयमस्ति। तस्मात्तत्र'यस्योभयं हविरार्तिमाच्र्छेदैन्द्रं पञ्चशरावमोदनं निर्वपेत्' इत्यत्र हविरुभयत्वस्येवाक्षिद्वित्वस्याविवक्षैव न्यायप्राप्ताऽवतिष्ठते। नन्विहाद्वित्वविवक्षायां द्विवचनं किमालम्बनं ग्रहैकत्वहविरुभयत्व-विवक्षायामेकवचनमुभयपदं च किमालम्बनम्। तत्तद्ग्रहगतैकत्वानुवादक- मेकवचनम्। कदाचिदुभयार्तेरपि सम्भवात् पक्षप्राप्तोभ्यत्वानुवादकमुभयपदमिति चेत्तर्हि त्रिषु लोचनेषु द्वयोर्द्वयोः प्रत्येकं वर्तमानं द्वित्वं द्विवचनमनुवदतीत्यस्तु। स्यादेदत्। 'ग्रहं सम्मार्ष्टी'त्यत्रैकवचनं जात्येकत्वावलम्बनम्। यथा 'वृषलैर्न प्रवेष्टव्य' मित्यत्र बहु वचनं तद्बहुत्वावलम्बनम्। न हि तद्बहुवचनं नित्यवत् श्रुतं पक्षप्राप्तबहुत्वानुवादकमिति युक्तम्। न च तत्रैव प्रत्येकबहुलत्वावलम्बनमिति वक्तुं शक्यम्। (जातिबहुत्वावलम्बनमिति वक्तुं शक्यम्।) वस्तुत एकस्यामपि जातौ 'जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यामिति (पा०, १.२-५८) सूत्रसिद्धस्यातिदेशकस्य बहुत्वस्यापि सत्त्वात्। ततश्च जातौ मुख्यस्यैकत्वस्यातिदेशिकस्य बहुत्वस्य चाव्यभिचारित्वात् जातिविवक्षायां श्रूयमाणयोरपि तयोरविवक्षा युक्ता। यथोदाहृतविधिनिषेधयोः द्वित्वविवक्षा न युक्ता। जातिविवक्षायां जातौ द्वित्वस्य कथमप्यप्राप्तेः। व्यक्तिविवक्षायामपि तत्र तस्य नियतस्याप्राप्तेः। तस्मादेकत्वबहुत्वन्यायाविषयत्वाद्द्वित्वस्य श्रूयमाणस्य विवक्षैव युक्ता। न च तथा सति 'यस्योभयं हविरार्ति'मित्यत्रापि द्वित्वस्य विवक्षायामन्यतरार्तौ नैमित्तिकाभावप्रसङ्गः। तत्र द्वित्वमात्रं न श्रुतम्। किं तु व्द्यवयवस्समुदायः। 'संख्याया अवयवे तय'बिति (पा०-५-२-४२)

विहितस्य श्रूयमाण संख्याविशेषयुक्तावयवघटितसमुदायार्थस्य तयप्प्रत्ययस्य 'द्वित्रिभ्यां तयस्यायज्वा। (पा०-५-२-४३) 'उभादुदात्तो नित्य'मित्यु (पा०५-२-४४) भशब्दात्परतायामयजादेशविधानात्। ततश्चोभयशब्दार्थस्यावयवद्वयारब्धसमुदायस्यैकावयवनाशेऽपि नाशोऽस्तीति युक्तं, तत्रान्यंतरनाशेऽपि नैमित्तिकानुष्ठानमिति वैषम्यात्। इत्थमेव हेलाराजीय टीकायाम् 'एकत्वं वा बहुत्वं वा केषाञ्चिदविवक्षितम्। तद्धि जात्यभिधानाय द्वित्वं तु स्याद्विवक्षित'मित्यादिश्लोकव्याख्यानेषु प्रपञ्चितम्। तस्माच्छाब्दिकमर्यादया ग्रहैकत्वादिवद्द्वित्वस्याविवक्षोक्तिर्न युक्तेति चेत् उच्यते। शाब्दिकमर्यादावलम्बनेऽपि जातिविवक्षायां तदविवक्षोक्तिर्युक्ता। यत्तु जातिविवक्षायामेकवचनं बहुवचनं वा प्राप्नोति न द्विवचनमिति। सत्यमन्यत्र व्रीह्यादिजातिषु तथैव। स्तनलोचनादिजातिविवक्षायां तु द्विवचनमपि पक्षे भवति। 'स्तनादीनां द्वित्वाविष्टा जातिः प्रायेणे'ति वामनसूत्रे विधानात्।। 'स्नान्तीनां बृहदमलोदबिंदुचित्रौ रेजाते रुचिरदृशामुरोजकुंभौ'।। इत्यादिकाव्यप्रयोगदर्शनात्।। 'तस्य क्रुद्धस्य नेत्राभ्यां प्रापतन्नश्रुबिंदवः।। दीपाभ्यामिव दीप्ताभ्यां सार्चिषस्तैलबिंदवः।।' इति रामायणे दशाननक्रोधवर्णने नेत्राभ्यामिति द्विवचनदर्शनात्।। तस्मात् स्तनलोचनादिजातिष्वेकत्वबहुत्ववद्द्वित्वस्यापि प्राप्तत्वात्तासु तस्याप्यविवक्षा युक्ता। 'द्वित्वं तु स्याद्विवक्षित'मिति वचनं तु द्वित्वानाविष्टव्रीह्यादिजातिविषयमिति न विरोध इति। एवमक्षिद्वित्वाविवक्षयोपपादयितुं शक्येऽपि प्रकृतेऽर्थे यदि कश्चिन्मीमांसान्यायानभिज्ञो मन्येत अस्य विग्रहस्य पारमेश्वरत्वं व्यवस्थापनीयमिति पक्षापातमात्रेण द्वित्वविवक्षां ब्रवीति न तु श्रूयमाणस्य द्विवचनस्यार्थाविवक्षाकल्पनं युक्तमिति तं प्रति तद्विवक्षामङ्गीकृत्य परिहारो भाष्यकारेणोच्यते **'यथाकप्यास'मित्यादिना। पुण्डरीकेति।** कप्यासविशेषणलब्धविकसित-पुण्डरीकसादृश्यवर्णनार्थमित्यर्थः। पुण्डरीकमात्रसादृश्यं तु तृतीयलोचनस्यापि साधारणमेव। ननु, लोचनविशेषणं द्वित्वं कथं लोचनान्तरव्यवच्छेदकं न स्यादित्याशङ्क्य दृष्टान्तमुखेनोपपादयति-**तथाहीति।** ननु सर्वत्र न्यूनाधिकसङ्ख्याव्यवच्छेदः सङ्ख्याविशेषविवक्षायाः फलम्। तथा च पुत्रगतद्वित्वसङ्ख्या विवक्षिता तद्गताधिकसङ्ख्याव्यवच्छेदेन पुत्रान्तरनिषेधे कथं न पर्यवस्येदित्याशङ्कां निराकरोति-**किंत्विति।** इह द्वित्वसङ्ख्या न स्वयं विधेया। किं तु उद्देश्यतावच्छेदकीभूतपुत्रगताग्निंसादृश्यविधानार्था। तथा चाग्निसदृशपुत्रगताधिकसङ्ख्याव्यवच्छेदेन पुत्रान्तरगताग्निसादृश्यनिषेधे पर्यवस्येदिति भावः। ननु दृष्टान्ते द्वावित्यधिकविशेषणोपादानात्तथा भवतु नाम। इह तु 'द्वे' इत्यधिकविशेषणाभावान्नाक्ष्यन्तरगतपुण्डरीकसादृश्यनिषेधः प्राप्नुयात्। न हि द्वाविति विशेषणं विहाय 'अस्य पुत्रावग्निकल्पा'वित्युक्तेऽपि पुत्रान्तरगताग्निसादृश्यनिषेधो लभ्यते।

तथा चाक्षिगतसङ्ख्या विवक्षिताक्ष्यन्तरनिषेध एव पर्यवस्येत् निषेध्यान्तराभावादित्याशङ्क्याह-**तद्वदत्रापीति।** विधेयान्तरवत्युद्देश्ये विवक्षिता सङ्ख्योद्देश्यादन्यत्र गतस्य विधेयस्य निषेधं प्रापयति। 'अस्य पुत्रावग्निकल्पा'वित्यत्रोद्देश्यविशेषणत्वात्सङ्ख्या न विवक्षितेति न तयान्यत्र विधेयस्याग्निकल्पत्वस्य निषेधः। नाप्युद्देश्यतावच्छेदकस्य पुत्रत्वस्य। किं 'त्वस्य पुत्रौ पठत' इत्यादाविव यथाप्राप्तसङ्ख्यानुवादमात्रम्। 'द्वावस्य पुत्रावग्निकल्पा' वित्यत्र तु द्वयोर्यजमानयो' रित्यत्रेव, द्विशब्दवैयर्थ्यपरिहाराय द्वित्वविवक्षावश्यंभाविनी। अतस्तत्र 'अस्य पुत्राणां मध्ये द्वावग्निकल्पा'विति द्वित्वस्योद्देश्यतावच्छेदकत्वेन विवक्षितत्वे सति विधेयस्याग्निकल्पत्वस्य पुत्रान्तरे निषेधः। इह तद्वदे'वाक्षिणी' इति द्विवचनोक्तस्याप्युद्देश्यविशेषणस्य द्वित्वस्य विवक्षितत्वाङ्गीकारे अक्ष्यन्तरे विधेयस्य पुण्डरीकसादृश्यस्यैव निषेधो भवेत् न त्वक्ष्यन्तरस्येति भावः। ननु परमेश्वरस्य तृतीयेऽक्षिणि पुण्डरीकसादृश्यस्य नापि कप्यासविशेषणलब्धलौहित्यविशेषशालिपुण्डरीकसादृश्यस्य निषेधस्सम्भवति। तस्यापि तथात्वादित्याशङ्क्य कप्यासशब्दमन्यथा व्याचष्टे-**कमुदकमिति।** प्रतिपादितन्यायैरिह वर्णितस्य विग्रहस्य पारमेश्वरत्वनिश्चये सति यद्यक्षिणी इत्यत्रोद्देश्यविशेषणस्य द्वित्वस्य न्यायविरुद्धमपि विवक्षितत्वमङ्गीक्रियते तदा तस्य 'द्वावस्य पुत्रावग्निकल्पा' वित्यत्रेवान्यगतविधेयनिषेधपर्यवसायित्वावश्यंभावेन तन्निर्वाहाय रूढिप्राबल्यादिन्यायं परित्यज्य कप्यासपदमेव व्याख्येयमिति भावः। कशब्दोपपदात् 'पा पान' इति धातोरौणादिक इकारप्रत्यये आतो लोंपे च सति निष्पन्नः कपिशब्दः 'असु क्षेपण' इति धातोरस्यते विकास्यत इति कर्मणि घञन्तः। ततश्च कपेरासं विकास्यमिति कृद्योगलक्षणषष्ठीसमासः। 'तेनासितमिति भाष्ये स्वकीयनिष्ठान्तप्रयोगानुसारेण तृतीयाप्रयोगः। आसितमिति 'असु क्षेपणे' इति धातोर्ण्यन्तान्निष्ठायां रूपम्। **मुकुलितेति।** विशिष्टविधेयनिषेधोऽत्र विशेषणमात्रनिषेधपर्यवसायीति भावः॥

उत्तरसूत्रमवतारयति-**असौ य इति।** सिद्धान्तोपक्रमे परमेश्वर एवेति प्रतिज्ञावाक्येन 'नेतरोऽनुपपत्ते'रिति (ब्र०-१-१-१७) सूत्रान्नेतर इत्यस्यानुवृत्तिमङ्गीकृत्यादित्यान्तर्वर्ती परमेश्वरः न तु मण्डलाभिमानी पुरुष इति साध्यं दर्शितम्। तत्रेयमाशङ्का। अस्तु परमेश्वरस्स तु मण्डलाभिमानिनः पुरुषादन्यो न भवति। 'असौ योऽवसर्पती'ति मन्त्रे यमतिपामरा गोपाला उदकुम्भहारिण्यः स्त्रियोऽन्यानि च सर्वाणि भूतानि व्योम्नि सञ्चरन्तं पश्यन्ति तस्यैव मण्डलाभिमानिनः पुरुषस्य नीलग्रीवत्वरूपपरमेश्वरसाधारणधर्मोपदेशात्। न च मण्डलमेव सर्वे पश्यन्ति न तु मण्डलाभिमानिनं नीलग्रीवमिति मन्त्रस्य यथाश्रुतार्थबाधः शङ्कनीयः। मण्डलस्यापि तदभिमानिपुरुषशरीरत्वेन मण्डलदर्शनस्य तच्छरीरकपुरुषदर्शनत्वोक्त्युपपत्तेः। 'ध्यायन्नुपविष्टस्तिष्ठन्परमेश्वरमवलोकयन्

देवदत्तो मया दृष्ट' इत्यादिव्यवहारदर्शनात्। न च तस्य त्रिलोचनत्वाभावादक्षिद्वित्वविवक्षाप्राप्तमुकुलितलोचनान्तरवत्त्वायोगः। 'अरुणोऽरुणकङ्कजे निषण्णः कंमलाभीतिवरान्करैर्दधानः। स्वरुचाहितमण्डलस्त्रिनेत्रो रविराकल्पशताकुलोऽवतान्नः।।'' इत्यभियुक्तकृते तद्ध्यानश्लोके तस्य त्रिनेत्रत्वप्रतिपादनात्। तस्मान्मण्डलाभिमानी पुरुष एव परमेश्वरः स एव विषयवाक्येऽस्मिन्नुपास्यः प्रतिपाद्यते न तु तस्यान्तरः कश्चिदित्येवमाशङ्कानिराकरणार्थमुत्तरसूत्रमित्यर्थः।।सू।। **भेदव्यपदेशाच्चान्यः**।।२२।। ननु, 'य आदित्ये तिष्ठ' न्नित्यादिश्रुतावादित्यशब्दो मण्डलवाची। 'य एष एतस्मिन्मण्डले पुरुष' इति बृहदारण्यके 'एष एतस्मिन्मण्डलेऽर्चिषि पुरुष' इति तैत्तिरीये च पुरुषस्य मण्डलस्थत्वोक्तेः तदैकार्थ्यौचित्यात्। न चादितिशब्दान्निष्पन्नोऽपत्यार्थण्यप्रत्ययश्चेतन एवान्वेति न मण्डल इति वाच्यम्। अपत्यार्थण्यप्रत्ययानन्तरं 'तस्ये' दमित्यर्थे ण्यप्रत्ययान्तरनिषक्त्या तद्वाचित्वोपपत्तेः। 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्य' इति (पा०-४-१-८५. सू.) ण्यप्रत्ययविधानस्य प्राग्दीव्यतीयसर्वार्थसाधारणत्वात्। ततश्च मण्डलाभिमानिपुरुषादसिद्धो भेदव्यपदेश इत्याशङ्क्याह-**तदविदितत्वादिधर्मैरिति**। 'यमादित्यो न वेदे'त्यत्र वेदनप्रसक्तिमत्त्वाच्चेतन एवादित्यशब्दार्थ इत्यवगम्यते। 'यमादित्यो न वेद यस्यादित्यश्शरीर'मिति पुल्लिङ्गाभ्यामपि तथाऽवगम्यते। श्रुत्यन्तरोक्तमण्डलपरत्वे हि नपुंसकलिङ्गता स्यात्। तैत्तिरीये 'य एष एतस्मिन्मण्डलेऽर्चिषि पुरुष' इति मण्डलाभिमान्यादित्यवर्णनानन्तरं 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषइति तदान्तरत्वेन परमेश्वरवर्णनाच्च तथाऽवगम्यते। एवं च 'य आदित्ये तिष्ठ'न्नित्यादित्यशब्दस्य ण्यप्रत्ययद्वयान्ततया प्रक्रियागौरवमपि नाश्रयणीयम्। उदाहृतबृहदारण्यकश्रुतेर्हिरण्यगर्भविषयत्वस्य प्रागुपपादितत्वात्तैत्तिरीयश्रुतेस्स्वान्तर्वर्त्तिपरमेश्वरान्यमण्डलाभिमानिविषयत्वस्य तत्रैव स्पष्टत्वाच्च। 'य आदित्ये तिष्ठ' न्नित्यादिपरमेश्वरविषयश्रुतौ तदैकार्थ्यं नानुसरणीयम्। परमेश्वरस्य मण्डलनस्थत्वं क्वचिदाम्नातमस्ति चेत्पर्यङ्कस्थराज्ञः प्रासादस्थत्ववत्तदुपपद्यते। एवमुक्तन्यायैः प्रकृतविषय-वाक्येऽप्यादित्यशब्दो मण्डलाभिमानिपुरुषपर इति भावः। **तस्मादादित्यादिति**। यद्यपि हिरण्यगर्भाद्भेदः पूर्वाधिकरणे सिद्धः। तथाप्यदितिपुत्रत्वेन प्रसिद्धान्मण्डलाभिमानिनः पुरुषाद्भेदोऽनेन सूत्रेण प्रतिपाद्यत इति भावः। 'असौ योऽवसर्पती'ति मन्त्रो न मण्डलाभिमानिपुरुषपरः। किं तु तदन्तर्वर्तिपरमेश्वरपरः। तच्छरीरकतया तत्प्रतिपादकशब्दविषयत्वं तस्योपपद्यत इत्याह-**नीलग्रीवइति**। भेदव्यपदेशसूत्रे चकारेण नारायणादप्ययमन्य इति दर्शितम्। तदुपपादयितुमाशङ्कते-**नन्विति**। लौकिकप्रसिद्धिपुण्डरीकाक्षत्वलिङ्गाभ्यामादित्यान्तर्वर्त्ती हिरण्मयः पुरुषो नारायणस्स एव

सर्वलोककामेश्वरत्वादिपारमैश्वर्यशालीति प्राप्ते परिहार:-तैत्तिरीयोपनिषदि तमेव मण्डलाभिमान्यादित्यान्तरं हिरण्मयं पुरुषं प्रस्तुत्य तस्य छान्दोग्ये 'तस्यर्च्क साम च गेष्णा'वित्यादिना वर्णितं स्तोत्रीयनानासूक्तप्रतिपाद्यतेज:प्रभृतिप्रधानसूर्यादिसकलदेवतारूपविभूतिमत्त्वं 'आदित्यो वै तेज ओजो बल'मित्यादिना प्रतिपाद्य तस्य भूतपतित्वलिङ्गेन 'सर्वो वै रुद्र:' 'पुरुषो वै रुद्र:' 'सर्वो ह्येष रुद्र'इतिरुद्रशब्दाभ्यासेनाभ्यस्तेनोमापतित्वलिङ्गेन च परमेश्वरत्वाविष्करणाद-सन्दिग्धार्थवाक्यान्तरानुसारेण विवादविषयवाक्यार्थनिर्णयस्य युक्तत्वाच्चासन्दिग्धार्थसमानविषय-वाक्यान्तरगतान्नारायणभेदकपरमेश्वरधर्मव्यपदेशात्ततोऽन्य: परमेश्वर एवायम्। न चात्र सर्वात्मना हिरण्मयत्वमुक्तं वाक्यान्तरे बाहुमात्रे तदुक्तमिति भेद: शङ्कनीय:। तत्रापि 'य एषोऽन्तरादित्ये हिरण्मय: पुरुष' इत्युपक्रमानुसारेण बाहुग्रहणस्य सर्वावयवोपलक्षणत्वात्। न च 'सर्वो वै रुद्र' इत्यारभ्य अन्तरादित्यविद्याप्रकरणविच्छेद: शङ्कनीय:। असम्बन्धिपदनिचय-व्यवधानादेर्भेदकस्याभावादादित्यान्तर्वर्त्तिनो हिरण्मयपुरुषस्योपासनार्थं रूपविशेषापेक्षायां तत्समर्पणपरत्वेनैकवाक्यतासमर्थत्वाच्च। सूर्यहृदये-'नमस्ते घृणिने तुभ्यं सूर्याय ब्रह्मरूपिणे। त्वमेव ब्रह्म परममापो ज्योती रसोऽमृतम्। भूर्भुव: स्वस्त्वमोङ्कारस्सर्वो रुद्रस्सनातन:। पुरुषस्सन्महोऽतस्त्वां प्रणमामि कपर्दिनम्। त्वमेव विश्वं बहुधा जातं यज्जायते च यत्। नमो भीमाय रुद्राय त्वामहं शरणं गत:। प्रचेतसे नमस्तुभ्यं नमो मीढुष्टमाय च। नमो नमस्ते रुद्राय त्वामहं शरणं गत:। हिरण्यबाहवे तुभ्यं हिरण्यपतये नम:। अम्बिकापतये नित्यमुमाया: पतये नम:।।' इति। 'सर्वो वै रुद्र' इत्याद्यनुवाकत्रयस्य 'घृणिस्सूर्य'इत्याद्यनुवाकैकवाक्यतया अन्तरादित्यविद्यापेक्षितरूपसमर्पणपरत्वस्य स्फुटीकरणाच्चेति। अत्र भाष्ये तैत्तिरीयमहोपनिषद्वाक्योपन्यासोऽन्येषामपि वेदत्रयसमाम्नातानां निर्णायकवाक्यानामुपलक्षणार्थ:। तथा हि-ऋक्संहितायां तावत् 'कद्रुद्राय प्रचेतसे' इति रुद्रसूक्ते परमेश्वरं प्रस्तुत्याम्नायते-'य: शुक्र इव सूर्यो हिरण्यमिव च रोचते। श्रेष्ठो देवानां वसु'रिति। शुक्र इव तन्नामप्रवृत्तिनिमित्तात्सर्वपापराहित्याच्छुभ्रइव हिरण्यमिव उज्ज्वलविग्रहत्वात् सुवर्णमिव च रोचते देवानां श्रेष्ठो वसुरुत्तमं धनं तद्वत्सर्वकामसाधनश्च सूर्यान्तर्वर्ती परमेश्वर इति वर्णनया छान्दोग्ये वर्णितानि नामगुणै विग्रहो देवकामेश्वरत्वं चेति विशेषणान्येव सङ्ग्रहेण दर्शितानि। तत्प्रत्यभिज्ञानाद्वसुरिति पुल्लिङ्गत्वं छान्दसं योजनीयम्। तथा यजुस्संहिताया'मसौ यस्ताम्रोऽरुण' इत्यादिमंत्रद्वयमादित्यान्तर्वर्तिनं शिवं प्रतिपादयीति स्पष्टमेव। सामगानां कृच्छ्राङ्गादित्योपस्थान मन्त्रेषु 'नमोरुद्राय पशुपतये महते देवाय त्र्यम्बकायैकचरायाधिपतये हरये शर्वायेशानायोग्राय वज्रिणे घृणिने कपर्दिने नम: सूर्यायादित्याय नम: नमो नीलग्रीवाय शितिकण्ठाय नम: नमश्चन्द्रललाटाय

कृत्तिवाससे नम इति मन्त्राश्चान्तरादित्यवर्तिनं शिवमेवाविष्कुर्वन्ति। अत एव रामायणेऽप्यादित्यस्य शिववपुष्ट्वमुक्तम्। 'ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे। भास्वते सर्वभक्षाय रौद्राय वपुषे नम'इति। अस्यार्थस्यैव वेदत्रयप्रसिद्धत्वं कूर्मपुराणे दर्शितम्। 'एष रुद्रो महादेवः कपर्दी च घृणी हरिः। आदित्यो भगवान्सूर्यो नीलग्रीवस्त्रिलोचनः। अधीयते सहस्रांशुस्सामगाध्वर्युहोतृभि'रिति। शिवपुराणेऽपि तत्तद्वेदवाक्यस्थितविशेषणसङ्ग्रहेणायमर्थो दर्शितः। सर्वो रुद्रो नमस्तस्मै पुरुषस्सन्परो महान्। हिरण्यबाहुर्भगवान् हिरण्यपतिरीश्वरः। अम्बिकापतिरीशानः पिनाकी वृषवाहनः।' इत्यारभ्य हिरण्यकेशः पद्माक्षो ह्यरुणस्ताम्र एव च। यो वसर्पत्यसौ देवो नीलग्रीवो हिरण्मय' इत्यन्तेन। तस्मान्निर्णीतार्थवाक्यानुसारेण विवादविषये छान्दोग्यवाक्येऽप्यन्तरादित्यवर्ती शिव एव प्रतिपाद्योऽवसीयत इत्युपसंहरति-**अत इति। पुण्डरीकाक्षत्वमिति।** पुण्डरीकाक्ष इति नामैवासाधारणं न तु पुण्डरीकसदृशलोचनत्त्वम्। अतस्समानार्थशाखान्तरगतेनापि शिवासाधारणलिङ्गेन तस्य बाधः। **लौकिकं वचनमिति।** पौरुषेयं पौराणिकवचनं भाक्तं तद्भक्तविषयं विष्णुपूजावसाने विष्णोरादित्यमण्डले ध्येयत्वपरं न तु विष्णोरादित्यान्तर्वर्तित्वप्रतिपादनपरम्। सर्वदेवतानामपि हि तत्तन्मन्त्रादिनिष्ठैरादित्यमण्डले ध्यानं कार्यमिति विधानं दृश्यते। विशिष्य च विष्णोर्द्वादशादित्यान्तर्गतस्योपेन्द्ररूपस्य मासविशेषमण्डलाधिष्ठानाधिकारनिर्वर्तकत्वेन तत्र सन्निधानं स्मृतिपुराणेषु प्रसिद्धमिति भावः। **सावित्रीप्रतिपाद्य** इति। 'आदित्यमण्डलासीनं रुक्माभं पुरुषं परम्। ध्यायञ्जपेत्तदित्येतान्निष्कामो मुच्यते द्विजः। आदित्यमण्डलान्तःस्थं परं ब्रह्माधिदैवतम्। छन्दो निचृत्स्याद्गायत्री मया दृष्टा सनातनी' त्यादिस्मृतिवचनैरादित्यान्तर्वर्ति परं ब्रह्म गायत्रीप्रतिपाद्यमिति तावदवसीयते। तच्च शिव एवेत्यनुपदं व्यवस्थापितम्। तदनुसारेण 'विश्वामित्र ऋषिश्छन्दो गायत्री देवता रवि' रित्यादिस्मृतिषु रविवाचकं पदं तदन्तर्यामिणि पर्यवस्यति। सवितुर्वरेण्यमिति सवितृवरणीयत्वप्रतिपादनादपि'येन सूर्यस्तपति तेजसेद्ध'इति मन्त्रेण सवितुस्तेजःप्रदतया समाश्रयणीयं तदन्तर्यामिणी शिवे पर्यवस्यति। न च सवितुर्भर्ग इत्यन्वयोऽस्तु। तथा सति सवितृशब्दस्य जगत्प्रसवितरि ब्रह्मणि वृत्त्या भर्ग इत्यस्य 'भञ्जो आमर्दन' इति धातोरसुन्प्रत्ययेन निष्पन्नस्य पापभञ्जके तस्मिन्नेव ब्रह्मरूपे ज्योतिषि वृत्त्या'राहोश्शिर'इतिवदुपचारेण सवितुर्भर्ग इत्यस्य ब्रह्मैवार्थस्स्यादिति वाच्यम्। सवितृशब्दस्य सन्निहितं प्रतिसम्बन्ध्यपेक्षं 'तदक्षरं तत्सवितुर्वरेण्यं' 'तां सवितुर्वरेण्यस्य चित्रा' मित्यादिमन्त्रान्तरेषु क्लृप्तस्वान्वयं वरेण्यशब्दं विहायान्यान्वयासम्भवात् उदाहृतस्मृतिवचनजातसिद्धस्यादित्यान्तर्वर्ति परं ब्रह्म गायत्र्या दैवतमित्य स्यार्थस्य प्रसिद्धये सवितृशब्दस्य रविपरत्वावश्यम्भावाच्च। मैत्रायणीयानां गायत्र्यर्थनिरूपणप्रकरणगतेन 'यदेष रुद्रो

भर्गाख्यो ब्रह्मवादिन' इति वाक्येन तलवकारिणां 'द्वितीयपादो भर्गमय' इति वाक्येन 'आदित्यान्तर्गतं यच्च भर्गाख्यं वै मुमुक्षुभि'रिति योगयाज्ञवल्क्यस्मृतिवचनेन 'तद्भर्गाख्यं किमपि परमं धाम भर्ग प्रपद्य' इति साम्बस्तोत्रप्रयोगेण चाकारान्ततयावगतस्यात एव रूढ्या शिवपरस्य च भर्ग इत्यस्य सकारान्तत्वज्योतिःपरत्वयोरयोगाच्च। न च वाच्यमकारान्तत्वे 'धीमही' त्यनेन कर्माकाङ्क्षेणान्वयो न स्यादिति। छन्दसि विभक्त्यादिव्यत्ययस्मरणेन 'सुपां सुलु'गित्यादिसूत्रतः स्वादेशेन वा भर्ग इत्यस्य कर्मार्थत्वोपपत्तेः। प्रधानप्रकृत्यंशमुख्यार्थलाभार्थं प्रथमाविभक्तिव्यत्ययादिकल्पनोपपत्तेः। न च तथा सति तदिति नपुंसकनिर्देशानुपपत्तिः। नपुंसकलिङ्गस्य तत्पदस्य ब्रह्मनामतया तदुपपत्तेः। 'तदिति वा एतस्य महतो भूतस्य नाम भवति योऽस्यैतदेवं नाम वेद ब्रह्म भवतीत्यै'तरेयोपनिषदि 'ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत' इति गीतासु च तस्य तन्नामत्वप्रसिद्धेः। न च तथा सति उत्तरार्धगतयत्पदाकाङ्क्षापूरणाय तत्पदान्तरमध्याहरणीयं स्यादिति वाच्यम्। उत्तरवाक्यगतयत्पदस्य तत्पदनिरपेक्षतायाः 'वीरप्रसूर्जगति भार्गव रेणुकैव या त्वां त्रिलोकतिलकं सुतमभ्यसूत' अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधु'रित्यादिलोकवेदप्रयोगेषु सुप्रसिद्धत्वात् तथैव शब्दविद्भिरालङ्कारिकादिभिर्व्युत्पादितत्वाच्च तदित्यस्य पुल्लिङ्गयत्पदप्रतिनिर्देशकत्वकल्पनस्य क्लिष्टत्वाच्च। यदि भर्ग इत्यस्य सकारान्तत्वमिष्यते तथापि छान्दसो वर्णविकार इत्यकारान्तरूढ्या शिववाचित्वमेव तस्य सिद्ध्यति न तु सान्तयोगेन ज्योतिर्वाचित्वम्। रूढशब्दत्वकल्पनसम्भवे यौगिकशब्दत्वाभ्युपगमायोगात्। किञ्चिद्वर्णविकारेऽपि बहुसारूप्ये लोकवेदयोः शब्दतदर्थानन्यत्वस्य लोकवेदाधिकरणसिद्धत्वात् 'गूढोत्मा न प्रकाशते" सर्वप्रोक्तं त्रिविधं ब्रह्ममेतत्' 'ऊर्ध्वरेतं विरूपाक्षं' 'चक्षोस्सूर्यो अजायते'त्यादिषु आत्मादिशब्दानामाकाराभावादिविकारे सत्यप्यात्मादिशब्दरूपत्वस्य प्रसिद्धार्थपरत्वस्य चाङ्गीकाराच्च। एवं च देवस्य द्युतिमतः सवितुरादित्यस्य वरेण्यं तेजःप्रदत्वेन समाश्रयणीयं भर्गं शिवं ध्यायामः य आदित्यान्तर्वर्ती भर्गो नोऽस्माकं धियः प्रचोदयात् अन्तर्यामित्वेन प्रेरयति इति मन्त्रयोजना। ननु 'यो देवस्सवितास्माकं धियो धर्मादिगोचराः। प्रेरयेत्तस्य यद्भर्गस्तद्वरेण्यमुपास्महे।।' इति स्मृतौ यदिति विशेषणेन भर्ग इत्यस्य सान्तत्वं प्रख्याप्य तस्य सवितुरित्यनेनान्वयं धीप्रेरकत्वस्य सवितृविशेषणत्वं च समाश्रित्य विधान्तरेण योजना दर्शिता। सत्यम्। पूर्वोदाहृतसमवितृवरेण्यशब्दान्वयोपपादकन्यायविरुद्धत्वान्नातीव श्रद्धेया सा।। 'धियो यो न' इत्यस्यादित्यपरत्वे च प्रकाशदानेन चाक्षुषज्ञानजनकतामात्रं तदर्थः स्यात्। असङ्कुचितधीप्रेरकत्वं तदर्थो न स्यात्। तदेव हि तदर्थत्वेन वाच्यम्। असङ्कोचलाभात्। 'स यश्चायमशरीरः प्रज्ञात्मा यश्चासावादित्य एकमेव तदिति विद्यात्तस्मात्पुरुषं पुरुषं प्रत्यादित्यो भवति। तदप्यतेदूषिणोक्तम्। चित्रं

देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणत्याग्नेः। आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्चे' त्यैतरेयोपनिषदर्थानुरोधाच्च। तत्र ह्य'शरीरः प्रज्ञात्मे'ति जीवानामन्तर्याम्युक्तः। 'तस्मात्पुरुषं पुरुषं प्रती'ति वाक्यशेषात्। शरीरे पुरुष इति यमवोचाम स एवायं दैहिक आत्मा तस्य योऽयमशरीरः प्रज्ञात्मा स रस इति प्राग्जीवान्तर्यामितया तद्रसत्वेन तस्य कीर्तनाच्च। न च न्यायविरोधमुपन्यस्य स्मृतिवचनं कथमुपेक्ष्यत इति वाच्यम्। विधान्तरेणापि मन्त्रयोजनाप्रदर्शकानां स्मृतिवचनानां दर्शनेन परस्परपराहतेषु तेषु न्यायस्यानुरोध्यत्वात्। दृश्यन्ते हि'देवस्य सवितुर्मध्ये यो भर्गो नो धियः क्रमात्। प्रचोदयात्तं वरेण्यं धीमहीत्यन्वयक्रमः॥' इत्यादीन्यपि स्मृतिवचनानि। श्रुतिविरोधाच्च तदुपेक्षणीयम्। उदाहृतानि हि भर्गशब्दस्याकारान्तत्वे सवितृवरेण्यशब्दयोः परस्परान्वये च गमकानि श्रुतिवचनानि। तस्माद्गायत्रीमन्त्रगतभर्गश्रुतितद्देवताप्रतिपादकस्मृतिपुराणवचनानुरोधाच्छिवस्यादित्यान्तर्वर्तित्वप्रतिपादकश्रुतिस्मृतिपुराणवचनानुरोधाच्च गायत्रीप्रतिपाद्यः शिव एव। उक्तं चादित्यपुराणे 'ततो दर्भासने स्थित्वा गायत्रीं प्रजपेद्द्विजः। यद्गायत्र्याः परं तत्त्वं देवदेवो महेश्वरः। इति ज्ञात्वा जपेद्विद्वान् गायत्र्याः फलमश्नुते।' इति। नन्वाश्वमेधिके पर्वणि 'तन्मण्डलस्थं मा ध्यायेत्तेजोमूर्तिं चतुर्भुजम्। उदुत्यं च जपेन्मन्त्रं चित्रं तच्चक्षुरित्यपि। गायत्रीं च यथाशक्ति जप्त्वा सूक्तं च मामक'मिति कृष्णवचनेन विष्णोरादित्यान्तर्वर्तित्वं गायत्र्युपास्यत्वं च प्रतिपादितम्। मैवम्। सन्ध्यासु विष्णुभक्तेरादित्यमण्डले तन्मूर्तिर्ध्यातव्येत्येतावत्परं तद्वचनजातम्। न तु विष्णोरादित्यान्तर्यामित्वगायत्रीप्रतिपाद्यत्वपर्यन्तस्थापनक्षमम्। श्रुतिविरुद्धेऽर्थे तस्य तात्पर्यायोगात्। 'ततः षडक्षरं मन्त्रं षट्कृत्वः परिवर्तये'दिति पूर्वश्लोके षडक्षरमन्त्रजपविधानदर्शनेन तदनन्तरमादित्यमण्डले तदर्थध्यानविधेरौचित्याच्च तत्तद्देवतामन्त्रजपनिष्ठानां सर्वेषामपि हि तद्देवतामन्त्र जपानन्तरं तद्देवतापूजानन्तरं च आदित्यमण्डले तद्देवताध्यानविधिरुपलभ्यते। अत एवाग्नेयपुराणे विष्णुपूजां विधाय तदवसाने 'ध्येयः सदे'त्यादिश्लोकः पठितः। किं चाश्वमेधिके वैष्णवधर्मशास्त्रात्मकः कृष्णयुधिष्ठिरसंवादो वैष्णवागमधर्मविधानार्थं प्रवृत्तः न तु वैदिकधर्मविधानार्थम्। 'भगवन् वैष्णवा धर्माः किंफलाः किंपरायणाः। कथं त्वमर्चनीयोऽसि मूर्तयः कीदृशश्च ते। कथं वैखानसा ब्रूयुः कथं वै पाञ्चरात्रिकाः। एवमेतत्पुरावृत्तं वैष्णवं धर्मशासन'मिति तत्रादिमध्यान्तवचनोपलम्भात्। उपक्रमे च 'श्रुता मे मानवा धर्माः' इति वैदिकधर्मेभ्यः श्रुतेभ्यो व्यावर्त्य 'युष्मदीयान्परान्धर्मान्पुण्यान्कथय मेऽच्युते'ति तान्त्रिकधर्माणां प्रश्नविषयेनोपक्षिप्तत्वात्। मानवा धर्मा इति हि वैदिकधर्मा एवोच्यन्ते। 'यद्वै किं च मनुरवदत्तद्भेषज'मिति श्रुतेः कूर्मपुराणे व्यासगीतायां वर्णाश्रमाचारोपदेशानन्तरं 'मित्येष मानवो धर्मो युष्माकं कथितं मये'त्युपसंहृतत्वाच्च।

एवं च तन्त्रनिष्ठेन गायत्र्या विष्णुचिन्तने कर्तव्येऽपि न तद्वैदिकैः कार्यम्। 'क्वचित्तंत्रानुरोधेन धर्मं पौराणिका अपि। वदन्ति तादृशोंऽशस्तु ग्राह्यस्तन्त्रावलम्बिना। यत्तु तन्त्रानुसारेण कथितं तत्परित्यजेत्। धर्मशास्त्रे पुराणे च यत्नतो वैदिको जनः।' इति पौराणिकैरेव तथाव्यवस्थायाः प्रदर्शितत्वात्। तस्माद्गायत्रीप्रतिपाद्यश्शिवोऽवसीयत इति भावः।। **सर्वेषां मुमुक्षूणां ध्येय इति।** 'उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदे'ति सर्वपापराहित्यफलश्रवणात् ब्रह्मसाक्षात्कारं विना तदसम्भवात् ब्रह्मसाक्षात्कारद्वारा मुक्तिफलकत्वमस्योपासनस्यावसीयत इति भावः। यद्वा। गायत्र्यधिकृतानां सर्वेषामादित्यान्तर्वर्तिनः परमेश्वरस्य गायत्र्योपासनं मुक्तिफलकमित्यनेन वाक्येनोच्यते। अत एव कूर्मपुराणे वसुमनसो राज्ञः शिवं रविमण्डले गायत्र्या चिरमुपासितवतो देहान्ते मुक्तिरुपवर्णिता। अधिकरणार्थमुपसंहरति-**इति सिद्धमिति**।। ।।इत्यन्तरधिकरणम्।।८।।

इति शिवार्कमणिदीपिका इत्यष्टममाकाशाधिकरणम् समाप्तम्।

अथ प्राणाधिकरणम्। सू० २३॥

शाङ्करभाष्यम्

अत एव प्राणः।।२३।। उद्गीथे—"प्रस्तोतर्या देवता प्रस्तावमन्वायत्ते"इत्युपक्रम्य श्रूयते—"कतमा सा देवतेति। प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्ते" (छा० १/११/४,५)इति।।

तत्र संशयनिर्णयौ पूर्ववदेव द्रष्टव्यौ। "प्राणबन्धनं हि सोम्य मनः" (छा० ६/८/२) "प्राणस्य प्राणम्" (बृ० ४/४/१८) इति चैवमादौ ब्रह्मविषयः प्राणशब्दो दृश्यते, वायुविकारे तु प्रसिद्धतरो लोकवेदयोः अत इह प्राणशब्देन कतरस्योपादानं युक्तमिति भवति संशयः।।

किं पुनरत्र युक्तम्? वायुविकारस्य पञ्चवृत्तेः प्राणस्योपादानं युक्तम्। तत्र हि प्रसिद्धतरः प्राणशब्द इत्यवोचाम्। ननु—पूर्ववदिहापि तल्लिङ्गाद् ब्रह्मण एव ग्रहणं युक्तम्; इहापि वाक्यशेषे भूतानां संवेशनोद्गमनं पारमेश्वरं कर्म प्रतीयते, न; मुख्येऽपि प्राणे भूतसंवेशनोद्गमनस्य दर्शनात्। एवं ह्याम्नायते—"यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनः स यदा प्रबुध्यते प्राणादेवाधि पुनर्जायन्ते" (श० ब्रा० १०/३/३/६) इति। प्रत्यक्षं चैतत् स्वापकाले प्राणवृत्तावपरिलुप्यमानायामिन्द्रियवृत्तयः परिलुप्यन्ते, प्रबोधकाले च पुनः प्रादुर्भवन्तीति। इन्द्रियसारत्वाच्च भूतानामविरुद्धो मुख्ये प्राणेऽपि भूतसंवेशनोद्गमनवादी वाक्यशेषः। अपिचादित्योऽन्नं चोद्गीथप्रतिहारयोर्देवते प्रस्तावदेवतायाः प्राणस्यानन्तरं निर्दिश्येते। न च तयोर्ब्रह्मत्वमस्ति, तत्सामान्याच्च प्राणस्यापि न ब्रह्मत्वमिति।।

एवं प्राप्ते सूत्रकार आह—*अत एव प्राणः* इति।। तल्लिङ्गादिति पूर्वसूत्रे निर्दिष्टम्। अत एव=तल्लिङ्गात्। प्राणशब्दमपि परं ब्रह्म भवितुमर्हति। प्राणस्यापि हि ब्रह्मलिङ्गसम्बन्धः। श्रूयते—"सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहत" (छा० १।११।५ इति। प्राणनिमित्तौ सर्वेषां भूतानामुत्पत्तिप्रलयावुच्यमानौ प्राणस्य ब्रह्मतां गमयतः।।

ननु-उक्तं मुख्यप्राणपरिग्रहेऽपि संवेशनोद्गमनदर्शनमविरुद्धम्; स्वापप्रबोधयोर्दर्शनात्—

अत्रोच्यते; स्वापप्रबोधयोरिन्द्रियाणामेव केवलानां प्राणाश्रयं संवेशनोद्गमनं दृश्यते, न सर्वेषां भूतानाम्। इह तु सेन्द्रियाणां सशरीराणां च जीवाविष्टानां भूतानाम्; "सर्वाणि ह वा इमानि भूतानी" ति श्रुतेः। यदापि भूतश्रुतिर्महाभूतविषया परिगृह्यते, तदापि ब्रह्मलिङ्गत्वमविरुद्धम्॥

ननु–सहापि विषयैरिन्द्रियाणां स्वापप्रबोधयोः प्राणेऽप्ययं प्राणाच्च प्रभवं शृणुमः–"यत्र सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन्प्राण एवैकधा भवति तदैनं वाक्सर्वैनामभिः सहाप्येति" (कौ० ३/३)–इति, तत्रापि तल्लिङ्गात् प्राणशब्दं ब्रह्मैव। यत्पुनरन्नादित्यसंनिधानात् प्राणस्याब्रह्मत्वमिति, तदयुक्तम्; वाक्यशेषबलेन प्राणशब्दस्य ब्रह्मविषयतायां प्रतीयमानायां संनिधानस्याकिंचित्करत्वात्। यत्पुनः प्राणशब्दस्य पञ्चवृत्तौ प्रसिद्धतरत्वम्, तदाकाशशब्दस्येव प्रतिविधेयम्। तस्मात् सिद्धं प्रस्तावदेवतायाः प्राणस्य ब्रह्मत्वम्॥

अत्र केचिदुदाहरन्ति–"प्राणस्य प्राणम्", "प्राणबन्धनं हिं सोम्य मन"–इति च, तदयुक्तम्; शब्दभेदात्प्रकरणाच्च संशयानुपपत्तेः। यथा पितुः पितेति प्रयोगेऽन्यः पिता षष्ठीनिर्दिष्टोऽन्यः प्रथमानिर्दिष्टः पितुः पितेति गम्यते, तद्वत् "प्राणस्य प्राणम्" इति शब्दभेदात्प्रसिद्धात्प्राणादन्यः प्राणस्य प्राण इति निश्चीयते। न हि तस्येति षष्ठ्यन्तस्य स एव भेदनिर्देशार्हो भवति। यस्य च प्रकरणे यो निर्दिश्यते, नामान्तरेणापि स एव तत्र प्रकरणी निर्दिष्ट इति गम्यते। यथा ज्योतिष्टोमाधिकारे–"वसन्ते वसन्ते ज्योतिषा यजेते" इत्यत्र ज्योतिःशब्दो ज्योतिष्टोमविषयो भवति, तथा परस्य ब्रह्मणः प्रकरणे "प्राणबन्धनं हि सोम्य मन" इति श्रुतेः प्राणशब्दो वायुविकारमात्रं कथमवगमयेत्? अतः संशयाविषयत्वान्नैतदुदाहरणं युक्तम्। प्रस्तावदेवतायां तु प्राणे संशयपूर्वपक्षनिर्णया उपपादिताः॥२३॥

इति शाङ्करभाष्यम् प्राणाधिकरणम् समाप्तम्॥

वार्तिकम्

अत एव प्राणः।। अतिदेशाधिकरणत्वात् पूर्वसङ्गतिरेवास्य सङ्गतिः। प्रत्युदाहरणसङ्गतिर्वा; पूर्ववदिह ब्रह्मलिङ्गाभावात्, भूतसंवेशनोद्गमनयोर्मुख्यप्राणलिङ्गत्वस्य पूर्वपक्षे वक्ष्यमाणत्वात्। दृष्टान्तसङ्गतिर्वा; पूर्वस्मिन् वाक्ये ब्रह्मलिङ्गसत्त्ववदिह मुख्यप्राणलिङ्गस्य सत्त्वात्। यद्यपि–प्रस्तावोपासनामुपक्रम्यैतत् श्रुतम्; तथापि पूर्वत्रान्तराकाशशब्दवाच्ययोरुद्गीथानुवृत्तिदर्शनेन तत्प्रकरणानुवृत्तेः प्रकृते चोद्गीथे प्रस्तावोपासनोक्तेरुद्गीथ इति भाष्यकारेणोपक्रम उक्तम्।। उद्गीथे=उद्गीथे प्रकृते सतीत्यर्थः। *प्राणमभ्युज्जिहत इति।।*।। प्राणं लक्ष्यीकृत्योद्गच्छतीत्यर्थः।।

तत्र संशयः–किं प्राणशब्देन मुख्यप्राणोऽभिधीयते, किं वा परं ब्रह्मेति। तदर्थं चेयं चिन्ता–किं भूतसंवेशनोद्गमनं मुख्यप्राणलिङ्गम्, किं वा ब्रह्मलिङ्गमिति। यदि मुख्यप्राणलिङ्गं तत्, तदा तस्यैव प्रस्तावदेवतात्वेनोपास्यत्वम्; अथ ब्रह्मलिङ्गम्, तदा पूर्ववद् ब्रह्मलिङ्गाद् ब्रह्मण एव प्रस्तावदेवतात्वेनोपास्यत्वनिर्णय इति। एतेन–पूर्वेणागतार्थत्वमस्य दर्शितं भवति; तल्लिङ्गस्यैव तदधीननिर्णयत्वादिति।।

किं तावत् प्राप्तम्? प्राणशब्देनेह पञ्चवृत्तिः प्राणो गृह्यते, न ब्रह्म। कुतः? तत्र तस्य मुख्यत्वात्, गौणमुख्ययोर्मुख्य कार्यसंप्रत्ययात्। ननु–पूर्ववदिहापि मुख्यवृत्तिबाधकं भूतसंवेशनोद्गमनलक्षणं ब्रह्मलिङ्गमस्ति, नेति ब्रूमः; मुख्येऽपि प्राणे तदध्यवसानात्। एवं ह्यन्यत्राम्नायते–"यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं मनः प्राणं श्रोत्रम्, यदा प्रबुद्ध्यते, प्राणादेवाधि पुनर्जायन्त" इति। न चैतदर्थवादमात्रम्; स्वापप्रबोधयोर्मुख्यप्राणवृत्तावपरिलुप्यमानायामिन्द्रियवृत्तीनां लयोद्गमनयोः सर्वप्रत्यक्षत्वात्। न च–एतावतापि मुख्यप्राणे न भूतलयोद्गमनसिद्धिः, इन्द्रियाणामेव तस्मिन् लयोद्गमनयोः श्रवणादिति–वाच्यम्; भौतिकानामिन्द्रियाणां तस्मिन् लयोद्गमनसिद्धौ तत्प्रधानत्वाद् भूतानामपि तत्र तत्सिद्धेः। त्रिधा हि भूतानि पुरुषभोगाय व्यवस्थितानि–इन्द्रियतदधिष्ठानतद्विषयरूपेण। तत्रेन्द्रियलये तदधिष्ठानतद्विषययोरवस्थाने प्रयोजनाभावात् ताभ्यां सहैवेन्द्रियाणि प्राणे लीयन्ते। ताभ्यां विना तेषामुद्गमासंभवेन सहैव ताभ्यां तेषामुद्गमः। अत इन्द्रियलयश्रुतौ सर्वभूतलयस्यार्थसिद्धत्वाद्

भूतसंवेशनोद्गमनवादी वाक्यशेषोऽपि मुख्यप्राणे न विरुद्धः। तदिदमुक्तम्– *इन्द्रियसारत्वादविरुद्धो मुख्येऽपि प्राणे भूतसंवेशनोद्गमनवादी वाक्यशेष इति*।। इतोऽपि न प्रस्तावदेवतायाः प्राणस्य ब्रह्मत्वम्; अब्रह्मणोरादित्यान्नयोरुद्गीथप्रतिहारदेवतयोः संनिधिपाठात्। तस्माद् भूतसंवेशनोद्गमनयोर्मुख्यप्राणलिङ्गत्वाद् अब्रह्मादित्यान्नसंनिधिपाठाच्च प्राणशब्दोऽपि मुख्यप्राण इत्येवं प्राप्तम्।।

एवं प्राप्ते पठति– *अत एव प्राण इति*।। पूर्वसूत्रनिर्दिष्टात् 'तल्लिङ्गादि'ति हेतोरेव प्राणशब्दमत्र परं ब्रह्म भवितुमर्हति; ''सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहत'' इति त्वाकाशस्येव प्राणस्यापि ब्रह्मलिङ्गसंबन्धः श्रूयते। ततः प्राणनिमित्तौ सर्वेषां भूतानामुत्पत्तिप्रलयौ श्रूयमाणौ प्राणस्य ब्रह्मतां गमयतः। न हि सर्वेषां भूतानामुत्पत्तिप्रलयौ ब्रह्मणोऽन्यतः संभवतः।।

ननु–मुख्यप्राणेऽपि तदुपपत्तिर्दृष्टश्रुतिभ्यामुक्ता, नैवम्; स्वापप्रबोधयोरिन्द्रियाणामेव मुख्यप्राणाश्रयसंवेशनोद्गमनश्रवणात्, तथा दर्शनाच्च। न हि साधिष्ठानानां सविषयाणां चेन्द्रियाणां लयो मुख्यप्राणवृत्त्याश्रयो दृष्टः, तथा सति मुख्यप्राणवृत्तेरप्यसंभवेण तद्दर्शनानुपपत्तेः, ब्रह्मण्येव तल्लयश्रवणात्। एतेन–स्थितिप्रयोजनाभावादिन्द्रियैः सहैव तदधिष्ठानविषयलयव्याख्यानम्– प्रत्याख्यातम्; अतो मुख्यप्राणाश्रयकेवलेन्द्रियाणामेव स्वापप्रबोधयोः संवेशनोद्गमनं दृश्यते। श्रूयते च ''यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनः, यदा प्रबुध्यते प्राणादेवाधि पुनर्जायन्त'' इति, न पुनराकाशादिमहाभूतानां सेन्द्रियाणां सशरीराणां जीवाविष्टानां भूतानां वा। इह पुनः–''सर्वाणि ह वा इमानि भूतानी''त्यत्र सेन्द्रियाणां सशरीराणां जीवाविष्टानां सर्वेषां भूतानां पञ्चमहाभूतानां वा संवेशनोद्गमनं श्रयते। तस्माद् भिन्नविषयत्वाद् ब्रह्मलिङ्गमेवैतत्। ननु–श्रुत्यन्तरे सहापि विषयैरिन्द्रियाणां मुख्यप्राणेऽप्ययं तस्माच्च प्रभवं शृणुमः–''यत्र सुप्तः स्वप्नं न कञ्चन पश्यति अथास्मिन् प्राण एवैकधा भवति, तदैनं वाक् सर्वैर्नामभिः सहाप्येति''–इति, नैवम्; तत्रापि ब्रह्मलिङ्गात् प्राणशब्दं ब्रह्मैव व्याख्येयम्, उक्तप्रकारेण तल्लिङ्गस्य मुख्यप्राणेऽसंभवात्।।

यद्–अब्रह्मादित्यान्नसंनिधिपाठात् प्राणस्याब्रह्मत्वमिति–उक्तम्, तन्न; वाक्यशेषवशेन प्राणशब्दस्याब्रह्मविषयत्वे प्रतीयमाने संनिधानस्य ततो दुर्बलत्वेनाकिञ्चित्करत्वात्। यदपि–प्राणशब्दस्य पञ्चवृत्तौ प्राणे मुख्यत्वम्–इति, तदपि न; आकाशस्येव प्रस्तावदेवताया अपि प्राणस्य सिद्धं ब्रह्मत्वम्–इति।। अत्र वृत्तिकारेण ''प्राणस्य प्राणम्'' ''प्राणबन्धनं हि सोम्य मनः'' इति छान्दोग्यबृहदारण्यकवाक्यद्वयमुदाहृत्य चिन्तितम्, तन्न युक्तम्; उभयस्मिन्नपि वाक्ये

संशयाभावात्। तत्र न तावत् "प्राणस्य प्राणमि"ति बृहदारण्यकवाक्ये संशयः संभवति; 'पितुः पिते'तिवत् शब्दभेदात् पञ्चवृत्तिप्राणात्तद्भेदसिद्धेः, अन्यथा–"उत चक्षुषश्चक्षुः" इत्यादावपि तत्संशयापत्तेः। 'राहोः शिरः' इतिवदुपचारसन्देहात् तत्संशयोपपत्तिरिति चेत्, न; मुख्यार्थेऽनुपपत्त्यभावेन तत्सन्देहानुपपत्तेः, अन्यथाऽतिप्रसङ्गात्। 'राहोः राहुः' इतिवदेकप्रकृतिकेन शब्देन भेदोपचारादर्शनाच्च। तदेतदभिप्रेत्योक्तम्–*न हि षष्ठ्यन्तस्येति*।। *भेदनिर्देशार्हो भवतीति*।।

इति वार्तिकम् प्राणाधिकरणम् समाप्तम्।

प्रदीपः

अत्रानुसन्धेयानि प्राकरणिकानि विषयवाक्यानीमानि छान्दोग्यप्रथमाध्यायदश-मैकादशखण्डगतानि। तेन च छान्दोग्यप्रथमाध्यायः समालोचितप्रायः, अन्यत्रासन्देहान्न विचार इति तु फलति। एतावता च तैत्तिरीयोपनिषत् छान्दोग्यप्रथमाध्यायश्च विचारितौ गतिसामान्यप्रपञ्चनप्रसङ्गेन। इदमनेन सिद्धम्–तैत्तिरीय-छान्दोग्यप्रथमाध्याययोरेतदतिरिक्तं सन्दिग्धं ब्रह्मपरं स्पष्टब्रह्मलिङ्गं वाक्यमेकमपि नास्तीति।।

तानि यथा–''मटचीहतेषु कुरुष्वाटिक्या (आटिक्या=अनुपजातपयोधरादिन्यञ्जनया) सह जाययोषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्रणक उवास।।१।। स हेभ्यं कुल्माषान् खादन्तं बिभक्षे तं होवाच। नेतोऽन्ये विद्यन्ते यच्च ये म इम उपनिहिता इति।।२।। एतेषां मे देहीति होवाच तानस्मै प्रददौ हन्तानुपानमित्युच्छिष्टं वै मे पीतं स्यादिति होवाच।।३।। न स्विदेतेऽप्युच्छिष्टा इति न वा अजीविष्यमिमान् न खादन्निति होवाच कामो म उदपानमिति।।४।। स ह खादित्वातिशेषान् जायाया आजहार साऽग्र एव सुभिक्षा बभूव तान् प्रतिगृह्य निदधौ।।५।। स ह प्रातः संजिहान उवाच यद्बतान्नस्य लभेमहि लभेमहे धनमात्रां राजाऽसौ यक्ष्यते स मा सर्वैरार्त्विज्यैर्वृर्णीतेति।।६।। तं जायोवाच हन्त पत इम एव कुल्माषा इति तान् खादित्वाऽमुं यज्ञं विततमेयाय।।७।। तत्रोद्गातॄनास्तावे स्तोष्यमाणानुपोपविवेश स ह प्रस्तोतार मुवाच।।८।। प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान् प्रस्तोष्यसि मूर्धा ते शतधा विपतिष्यतीति।।९।। एवमेवोद्गातारमुवाचोद्गातर्या देवतोद्गीथमन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्धा ते शतधा विपतिष्यतीति।।१०।। एवमेव प्रतिहर्तारमुवाच प्रतिहर्तर्या देवता प्रतिहारमन्वायत्ता तां चेदविद्वान् प्रतिहरिष्यसि मूर्धा ते शतधा विपतिष्यतीति ते ह समारतास्तूष्णीमासाञ्चक्रिरे।।११।। इति दशमः खण्डः।। अथ हैनं यजमान उवाच भगवन्तं वा अहं विविदिषाणीत्युषस्तिरस्मि चाक्रायण इति होवाच।।१।। स होवाच भगवन्तं वा अहमेभिः सवैरार्त्त्विज्यैः पर्यैशिषं भगवतो वा अहमवित्त्याऽन्यानवृषि।।२।। भगवांस्त्वेव मे सर्वैरार्त्त्विज्यैरिति, तथेत्यथ तर्ह्येत एव समतिसृष्टाः स्तुवतां यांवत्त्वेतेभ्यो धनं दद्यास्तावन्मम दद्या इति तथेति ह

यजमान उवाच।।३।। अथ हैनं प्रस्तोतोपससाद प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान् प्रस्तोष्यसि मूर्धा ते शतधा विपतिष्यतीति मा भगवानवोचत् कतमा सा देवतेति।।४।। प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्ता तां चेदविद्वान् प्रास्तोष्यो मूर्धा ते शतधा व्यपतिष्यत् तथोक्तस्य मयेति।।५।। अथ हैनमुद्गातोपससाद उद्गातर्या देवतोद्गीथमन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्धा ते शतधा विपतिष्यतीति मा भगवानवोचत् कतमा सा देवतेति।।६।। आदित्य इति होवाच सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैस्सन्तं गायन्ति सैषा देवतोद्गीथमन्वायत्ता तां चेदविद्वानुदगास्यो मूर्धा ते शतधा व्यपतिष्यत् तथोक्तस्य मयेति।।७।। अथ हैनं प्रतिहर्तोपससाद प्रतिहर्तर्या प्रतिहारमन्वायत्ता तां चेदविद्वान् प्रतिहरिष्यसि मूर्धा ते शतधा विपतिष्यतीति स भगवानवोचत् कतमा सा देवतेति।।८।। अन्नमिति होवाच सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ति सैषा देवता प्रतिहारमन्वायत्ता तां चेदविद्वान् प्रत्यहरिष्यो मुर्धा ते शतधा न्यपतिष्यत्तथोक्तस्य मयेति।।९।। इत्येकादशः खण्डः—इति।।

अत्र ''सामानाधिकरण्येन प्रश्नतत्प्रतिवाक्ययोरि''ति सिद्धान्तन्यायांशो न प्रसरति; का गतिरितिवद् विशिष्य प्रश्नाभावात्, देवतामात्रप्रश्नात्। न हि परब्रह्मण एव देवतात्वमिति नियमः; उद्गीथप्रतिहारदेवतयोरादित्यान्नयोरपि परब्रह्मत्वप्रसङ्गात्। सर्वत्वविशेषणमवधारणं चादित्यान्नयोरपि वर्तत एवेति तत्संनिधिपाठात् प्राणोऽप्यब्रह्म मुख्यप्राण एव भवितुमर्हति; श्रुत्यन्तरे ''यत्र सुप्तः स्वप्नं न कञ्चन पश्यति अथास्मिन् प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिः सहाप्येति''ति साधिष्ठानशरीरविषयादीनामपि सुषुप्त्यवस्थायां लयोऽवगम्यते, इति प्रकृतेऽपि भूतसंवेशनोद्गमनं मुख्यप्राण एवेति कल्पनायां न दोषलेशोऽपि। पौर्वापर्यपरामर्शेऽपि पूर्वमाकाशवाक्यमेवेति विषयान्तरत्वाद् न पूर्वमेतद्वाक्ये ब्रह्मलिङ्गसंभावनापि, परतस्तु— उद्गीथप्रतिहारयोर्-ब्रह्मणोरादित्यान्नयोरपि विषयान्तरत्वाद् न तदेकवाक्यतेति ''पौर्वापर्यपरामर्शात्'' इत्याकाशाधि-करणसिद्धान्तन्यायांशान्तरमपि नात्रोपयुक्तम्। अस्यां चावस्थायाम्—प्राणशब्दमुख्यश्रुतिरेव निर्णायिकेति स्वीकर्तव्यमादित्यान्नादिस्थल इवेत्याकाशाधिकरणपूर्वपक्षन्यायस्यैवात्र व्यवस्थापकत्वमिति आक्षेपसङ्गतिरस्याधिकरणस्य पूर्वाधिकरणेन। न हि पूर्वाधिकरण इवात्र बहूनि लिङ्गानि वर्तन्त इति न श्रुतिबाधकत्वं लिङ्गस्य संभवतीति तु पूर्वपक्षिणां हृदयम्। तथाच—प्राणश्रुतिसर्वभूतसंवेशनोद्गमनलिङ्गयोः कस्य प्राबल्यमिति निर्णयार्थमिदमधिकरणम्। पदैकवाक्यत्वादत्रापि नासञ्जातविरोधन्यायः, ''यत्र सुप्तः स्वप्नं न कञ्चन पश्यती''त्यस्यापि साध्यसमत्वाद् न दृष्टान्तता। सुषुप्तौ प्राणे मुख्य इन्द्रियसंवेशनादिकमेव प्रत्यक्षमिति ''सर्वाणि

भूतानी''त्यस्यासम्बन्धश्चेत्यादिसिद्धान्तिनामभिप्रायात्तु संशयावसरः॥

अत एव=ब्रह्मलिङ्गादेव। प्राणः=प्राणशब्दोऽपि ब्रह्मेति वाक्यशेषः। आकाशाधिकरणन्याय एवात्रापि विवक्ष्यत इति भावः।

अत्र विषयवाक्यं संगृह्णाति– *उद्गीथ इत्यादिना–अन्वायत्तेत्यन्तेन*॥ अतिदेशसङ्गतित्वात् संशयनिर्णययोर्न लेशतोऽपि भेद इत्याह– *तत्रेति*॥ पूर्वपक्षे परं बहुशः साम्येऽपि का चनाधिकाशङ्काङ्कुरितोपस्थापयिष्यते। तत्र प्रथमं साधारणं संशयाकारं सामग्रीनिर्देशपूर्वकं सूचयति– *प्राणबन्धनमित्यादिना–संशय इत्यन्तेन*॥ पूर्वपक्षं पूर्वाधिकरणसमानं संगृह्णाति– *वायुविकारस्येत्यादिना*॥ पूर्वाधिकरणादस्य विशेषमधिकाङ्कानिरासमात्र इति निरूपयितुमुक्ताधिकरणवैयर्थ्य तत्परिहारं चानुवदति– *ननु पूर्ववदित्यादिना–प्राणस्यापि न ब्रह्मत्वमित्यन्तेन*॥ पूर्ववत्=आकाशवाक्य इव। इहापि=प्राणवाक्येऽपि। तल्लिङ्गात् तल्लिङ्गात्=ब्रह्मलिङ्गात्। किं तद् ब्रह्मलिङ्गमित्यत आह– *इहापीति*॥ वाक्यशेषपदेनासंजातविरोधिन्यायाप्रसरः सूच्यते। *भूतानामिति*॥ सर्वेषां भूतानाम्। न तु भौतिकानामिन्द्रियाणामेव, येनेन्द्रियाणां लयमभिप्रेत्य मुख्यप्राणपरत्वशङ्का स्यादिति निगूढो भावः। अभिप्रायमजानन् पूर्वपक्षी समाधते– *नेत्यादिना*॥ *यदा वै पुरुष इति*॥ यद्यप्यत्र शतपथब्रह्मणवाक्ये वागादीनामेव लय उक्तः, न तु भूतानाम्; तथापि तद्भौतिकत्वाद्वागादीनां भूतानामप्युपलक्षणम्। *प्रत्यक्षं चेति*॥ अनेन प्रमाणान्तरानुग्रहोऽपि सूच्यत इति बहुप्रमाणबाधायोगः पूर्वाधिकरणसिद्धान्तन्याय एवात्र प्रथमप्रश्नस्याप्यनुगुण इति हृदयम्। तदिदमाह– *इन्द्रियसारत्वादिति*॥ इन्द्रियकारणत्वादित्यर्थः। अन्यथा–''यत्र सुप्तः स्वप्नं न कञ्चन पश्यती''ति श्रुत्यन्तरैकवाक्यताभङ्गापत्तेरिति भावः। नाधिकाशङ्कायामेतावन्मात्रं कारणम्, किन्तु संनिधिपाठोऽपीत्यभिप्रायेणाह– *अपि चादित्योऽन्नमिति*॥ विषयान्तरत्वेऽपि यदि संनिधिपाठो नियामकः, तर्हि पूर्वतनाकाशवाक्यस्यापि संनिधनात् तत्संनिधिरेव प्रबलः; तत्प्रायपाठात्; तथापि खण्डान्तरगतत्वादसंनियोगशिष्टत्वाच्च न तत्संनिधेः प्रयोजकत्वम्; प्राणादित्यान्नानां त्वेकखण्डगतत्वं संनियोगशिष्टत्वं धनकामैकचाक्रायणोपदिष्टत्वं च वर्तत इति न विरोधः। *न च तयोरिति*॥ ''सर्वाणि ह वा इमानि भूतानी''त्युपदेशप्रणालीसाम्येऽपीति शेषः॥

एवं प्राप्ते=प्राणशब्दो मुख्यप्राणपर एवेति प्रसक्तावित्यर्थः। अत्रेयं भामत्याः पूर्वपक्षकारिका–

अर्थे श्रुत्येकगम्ये हि श्रुतिमेवाद्रियामहे।
मानान्तरावगम्ये तु तद्वशात्तद्व्यवस्थितिः॥

इति। आकाशस्य वाय्वादिकारणत्वमपि श्रुत्येकसमधिगम्यम्, इति प्रमाणान्तरविरोध आकाशपदेन भूतविशेषपरिग्रहो न समापतति। प्राणपदस्य तु मुख्यंप्राणपरत्वाभावे प्रत्यक्षविरोधोऽपि भवतीति बहुप्रमाणानुग्रहणार्थ 'विप्रतिषेधे भूयसां स्यात् स्वधर्मत्वमि'ति न्यायाद् मुख्यप्राणपरिग्रह एव युक्त इति कारिकार्थः। अयं चार्थः–''प्रत्यक्षं चैतत् स्वापकाले प्राणवृत्तावपरिलुप्यमानायामिन्द्रियवृत्तयः परिलुप्यन्ते, प्रबोधकाले च प्रादुर्भवन्ती''ति भाष्यवाक्यतोऽवगम्यते। तथाचाकाशाधिकरणसिद्धान्तन्याथोऽपि 'त्यजेदेकं कुलस्यार्थे, इति न्यायेन पूर्वपक्षानुगुण इति फलति। अत्रेयं भामत्याः सिद्धान्तकारिका–

पुंवाक्यस्य बलीयस्त्वं मानान्तरसमागमात्।
अपौरुषेये वाक्ये तत्सङ्गतिः किं करिष्यति॥

इति। भाष्यकारास्तु–भूतसंवेशनोद्गमनं मुख्ये प्राणे न प्रत्यक्षम्, न वा श्रौतम्; इन्द्रियाणामेव तत्र तद्दर्शनादिति प्रत्यक्षविरोधस्य न प्रसङ्गलेशोऽपीति शङ्कोत्तरमुखेन दर्शयन्ति– *ननूक्तमित्यादिना–इति श्रुतेरित्यन्तेन*॥ *स्वापप्रबोधयोर्दर्शनादिति*॥ भौतिकेन्द्रियसवेशनोद्गमनस्य प्रत्यक्षादित्यर्थः। *इन्द्रियाणामेव केवलानामिति*॥ केवलानाम्=भूतनिरपेक्षाणामित्यर्थः। तथाच न प्रत्यक्षविरोधः श्रुतेरिति न 'विप्रतिषेधे भूयसां स्यात् स्वधर्मत्वमि'ति न्यायविरोध इति भावः। श्रुत्यन्तरं तु साध्यसममित्याह– *तत्रापीति*॥ संनिधिपाठस्याकिञ्चित्करत्वमनूद्याह– *यत्पुनरित्यादिना– अकिञ्चित्करत्वादित्यन्तेन॥ *वाक्यशेषबलेनेति*॥ स्थानाद् वाक्यस्य बलीयस्त्वात् संनिधानस्याकिञ्चित्करत्वम् न कार्य कारित्वमिति भावः। संनियोगाशिष्टन्यायस्त्वेकवाक्यतास्थल एव, नैकाध्यायादिगतत्वेऽपि; अतिप्रसङ्गादित्यनुसन्धेयम्। अन्यत स्पष्टम् प्राजपदस्य ब्रह्मपरत्वं तु–अधिकरणत्रये निर्धारितम्– अस्मिन, एतत्पादान्ते ''प्राणस्तथानुगमात्'' इत्यधिकरणे, कम्पनाधिकरणे च प्रथमतृतीयपादे। तत्रान्त्येऽस्पष्टब्रह्मलिङ्गत्वं निर्विशेषपरत्वं च। द्वितीये तु लिङ्गबहुत्वेन सन्देहानिवृत्तिरित्यादिकं तत्रैव व्यक्तीभविष्यति॥

इति प्रदीपः प्राणाधिकरणम् समाप्तम्।

भामती

'उद्गीथे या देवता प्रस्तावमन्वायत्ता' इत्युपक्रम्य श्रूयते–'कतमा सा देवतेति प्राण इति होवाचोषस्तिश्चाक्रायण:' उद्गीथोपासनप्रसङ्गेन प्रस्तावोपासनमप्युद्गीथ इत्युक्तं भाष्यकृता। प्रस्ताव इति साम्नो भक्तिविशेषस्तमन्वायत्ता अनुगता प्राणो देवता। अत्र प्राणशब्दस्य ब्रह्मणि च वायुविकारे च दर्शनात् संशय:–किमयं ब्रह्मवचन उत वायुविकारवचन इति?

तत्रात एव ब्रह्मलिङ्गादेव प्राणोऽपि ब्रह्मेव न वायुविकार इति युक्तम्। यद्येवं तेनैव गतार्थमेतदिति कोऽधिकरणान्तरस्यारम्भार्थ:? तत्रोच्यते–

अर्थे श्रुत्येकगम्ये हि श्रुतिमेवाद्रियामहे।
मानान्तरावगम्ये तु तद्वशात्तद् व्यवस्थिति:॥

ब्रह्मणो वा सर्वभूतकारणत्वमाकाशस्य वा वाय्वादिभूतकारणत्वं प्रति नागमादृते मानान्तरं प्रभवति। तत्र पौर्वापर्य्यपर्य्यालोचनया यत्रार्थे समञ्जस आगम: स एवार्थस्तस्य गृह्यते, त्यज्यते चेतर:। इह तु संवेशनोद्गमने भूतानां प्राणं प्रत्युच्यमाने किं ब्रह्म प्रत्युच्येते आहो वायुविकारं प्रतीति विशये 'यदा वै पुरुष: स्वपिति प्राणं तर्हि वागप्येति' इत्यादिकाया: श्रुते: सर्वभूतसारेन्द्रियसंवेशनोद्गमनप्रतिपादनद्वारा सर्वभूतसंवेशनोद्गमनप्रतिपादिकाया मानान्तरानुग्रह-लब्धसामर्थ्याया बलात्संवेशनोद्गमने वायुविकारस्यैव प्राणस्य, न ब्रह्मण:। अपि चात्रोद्गीथप्रतिहारयो: सामभक्त्योर्ब्रह्मणोऽन्ये आदित्यश्चान्नं च देवते अभिहिते कार्यंकरणसङ्घातरूपे, तत्साहचर्यात् प्राणोऽपि कार्यंकरणसङ्घातरूप एव देवता भवितुमर्हति। निरस्तोऽप्ययमर्थ ईक्षत्यधिकरणे पूर्वोक्तपूर्वपक्षहेतूपोद्बलनाय पुनरुपन्यस्त:। तस्माद्वायुविकार एवात्र प्राणशब्दार्थ इति प्राप्तम्।

एवं प्राप्तेऽभिधीयते–पुंवाक्यस्य बलीयस्त्वं मानान्तरसमागमात्।
अपौरुषेये वाक्ये तत्सङ्गति: किं करिष्यति॥

नो खलु स्वत: सिद्धप्रमाणभावमपौरुषेयं वच: स्वविषयज्ञानोत्पादे वा तद्व्यवहारे वा मानान्तरमपेक्षते। तस्यापौरुषेयस्य निरस्तसमस्तदोषाशङ्कस्य स्वत एव निश्चायकत्वात्। निश्चयपूर्वकत्वाद् व्यवहारप्रवृत्ते:। तस्मादसंवादिनो वा चक्षुष इव रूपे त्वगिन्द्रियसंवादिनो वा तस्यैव द्रव्ये नादाढर्यं दाढर्यं वा। तेन स्तामिन्द्रियमात्रसंवेशनोद्गमने वायुविकारे प्राणे, सर्वभूतसंवेशनोद्गमने तु न ततो वाक्यात्प्रतीयेते, प्रतीतौ वा तत्रापि प्राणी ब्रह्मैव भवेन्न वायुविकार:। 'यदा सुप्त: स्वप्नं न कञ्चन पश्यत्यथास्मिन् प्राण एवैकधा भवति' इत्यत्र वाक्ये यथा प्राणशब्दो ब्रह्मवचन:। न चास्मिन् वायुविकारे सर्वेषां भूतानां संवेशनोद्गमने मानान्तरेण दृश्येते। न च मानान्तरसिद्धसंवादेन्द्रिय-संवेशनोद्गमनवाक्यदाढर्यात् सर्वभूतसंवेशनोदगमनवाक्यं कथञ्चिदिन्द्रियविषयतया व्याख्यानमर्हति, स्वत: सिद्धप्रमाणभावस्य स्वभावदृढस्य मानान्तरानुपयोगात्। न चास्य तेनैकवाक्यता, एकवाक्यतायां वा तदपि ब्रह्मपरमेव स्यादित्युक्तम्। इन्द्रियसंवेशनोद्गमनं त्ववयुत्यानुवादेनाऽपि घटिष्यते। 'एकं वृणीते द्वौ वृणीते' इतिवत्। न तु सर्वशब्दार्थ: सङ्कोचमर्हति। तस्मात् प्रस्तावभक्ति प्राणशब्दाभिधेयब्रह्मदृष्टयोपासीत, न वायुविकारदृष्टयेति सिद्धम्। तथा चोपासकस्य प्राणप्राप्ति: कर्मसमृद्धिर्वा फलं भवतीति। *वाक्यशेषबलेन इति*। वाक्यात् सन्निधानं दुर्वलमित्यर्थ:। उदाहरणान्तरन्तु निगदव्याख्यातेन भाष्येण दूषितम्।।१३।।

इति भामती प्राणाधिकरणम् समाप्तम्।

श्री कण्ठभाष्य

अथाकाशाधिकरणप्राणाधिकरणे॥९-१०॥

सर्वज्ञत्वादिधर्मकस्य परब्रह्मणः शिवस्य परममङ्गलास्पदमुपास्यं रूपमभिधाय तल्लक्षणस्य नामरूढिवशादन्यत्रातिव्याप्तिशङ्कायामधिकरणमारभ्यते-

॥सू॥ आकाशस्तल्लिङ्गात्॥२३॥ अत एव प्राणः॥२४॥

छान्दोग्ये श्रूयतेऽस्य विषयः 'सर्वाणि ह वा इमानि श्रूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्ति' 'सर्वाणि ह वा इमानि श्रूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते' इति॥ अत्र सकलभूतोत्पत्तिप्रलयकारणप्रतिपादकौ प्राणाकाशशब्दौ परमेश्वरप्रतिपादनपरौ किं वा भूताकाशप्राणवायुप्रतिपादनपराविति संदेहः॥ 'प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते, प्राणेन जातानि जीवन्ति, प्राणं प्रयन्त्यभिसंविशन्ति' इत्यादिश्रुतेः, 'आकाशाद्वायुः'

इति श्रीकण्ठभाष्य प्राणाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

सङ्गतिं सूचयन्नुत्तराधिकरणमवतारयति-**सर्वज्ञत्वादीति**। यद्वाक्यमवलम्ब्य परब्रह्मणशिवस्य योग्यं रूपमुपास्यं प्रदर्शितं तत्र तस्य तात्पर्ये व्यवस्थापिते तद्वाक्यानन्तरं पठितयोराकाशप्राण-वाक्ययोर्बुद्धिस्थयोस्तत्र तात्पर्यनिरुपणं क्रियत इति प्रसङ्गलक्षणसङ्गतिरिह विषयवाक्यक्रममूला विवक्षिता। तयोर्ब्रह्मणि तात्पर्यनिरूपणे कृते मन्दानामाकाशप्राणयोर्ब्रह्मलक्षणातिव्याप्तिशङ्कापि निरस्ता भवतीत्येतावताऽतिव्याप्तिशङ्कायामित्युक्तम्। शिवस्य योग्यं रूपमित्येतत्सूचयितुं 'सर्वज्ञत्वादिधर्मकस्ये'ति 'परममङ्गलास्पद'मिति च विशेषणे। सर्वोत्तरगुणशालिनः सर्वोत्तरसौन्दर्यशालि रूपं योग्यम्। 'प्रायो विरूपेषु भवन्ति दोषा यत्राकृतिस्तत्र गुणा वसन्ती'ति सामुद्रिकशास्त्रवचनादिति भावः।।सू.।। **आकाशस्तल्लिङ्गात्**।।२३।।

इति श्री शिवार्कमणिदीपिकाप्राणाधिकरणम् समाप्तम्।

अथ ज्योतिश्चरणाधिकरणम्।। सू० २४–२७।।

शाङ्करभाष्यम्

ज्योतिश्चरणाभिधानात्।।२४।। इदमामनन्ति–"अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिरि" -(छा० ३/१३/७) ति। तत्र संशयः– किमिदं ज्योतिः शब्देनादित्यादिज्योतिरभिधीयते, किं वा परमात्मेति। अर्थान्तरविषयस्यापि शब्दस्य तल्लिङ्गाद् ब्रह्मविषयत्वमुक्तम्, इह तु तल्लिङ्गमेवास्ति नास्तीति विचार्यते।।

किं तावत् प्राप्तम्? आदित्यादिकमेव ज्योतिः शब्देन परिगृह्यत इति। कुतः? प्रसिद्धेः। तमो ज्योतिरिति हीमौ शब्दौ परस्परप्रतिद्वन्द्विविषयौ प्रसिद्धौ। चक्षुर्वृत्तेर्निरोधकं शार्वरादिकं तम उच्यते। तस्या एवानुग्राहकमादित्यादिकं ज्योतिः। तथा दीप्यत इतीयमपि श्रुतिरादित्यादिविषया प्रसिद्धा। नें हि रूपादिहीनं ब्रह्म दीप्यत इति मुख्यां श्रुतिमर्हति। द्युमर्यादत्वश्रुतेश्च। न हि चराचरबीजस्य ब्रह्मणः सर्वात्मकस्य द्यौर्मर्यदा युक्ता, कार्यस्य तु ज्योतिषः परिच्छिन्नस्य द्यौर्मर्यादा स्यात्। "परो दिवो ज्योतिरि" ति च ब्राह्मणम्।।

ननु–कार्यस्यापि ज्योतिषः सर्वत्र गम्यमानत्वाद् द्युमर्यादावत्त्वमसमञ्जसम्। अस्तु तर्ह्यत्रिवृत्कृतं तेजः प्रथमजम्, न; अत्रिवृत्कृतस्य तेजसः प्रयोजनाभावादिति। इदमेव प्रयोजनं यदुपास्यत्वमिति चेत्, न; प्रयोजनान्तरप्रत्युक्तस्यैवादित्यादेरुपास्यत्वदर्शनात्, "तासां त्रिवृतं त्रिवृतमेकैकां करवाणी" (छा० ६/३/३) ति चाविशेषश्रुतेः। न चात्रिवृत्कृतस्यापि द्युमर्यादत्वं प्रसिद्धम्। अस्तु तर्हि त्रिवृत्कृतमेव तत्तेजो ज्योतिःशब्दम्। ननु–उक्तमर्वागपि दिवोऽवगम्यतेऽग्न्यादिकं ज्योतिः– इति, नैष दोषः ; सर्वत्रापि गम्यमानस्य ज्योतिषः "परो दिव" इत्युपासनार्थः प्रदेशविशेषपरिग्रहो न विरुद्धयते। ननु–निष्प्रदेशस्यापि ब्रह्मणः प्रदेशविशेषकल्पना भागिनी। "सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्वि" ति चाधारबहुत्वश्रुतिः कार्ये ज्योतिष्युपपद्यतेतराम्। "इदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिरि" (छा० ३/१३/७) ति च कौक्षेये ज्योतिषि परं ज्योतिरध्यस्यमानं दृश्यते।

सारूप्यनिमित्ताश्चाध्यासा भवन्ति। यथा–''तस्य भूरिति शिर एक शिर एकमेव तदक्षरमि'' (बृ॰ ५/५/३) ति कौक्षेयस्य तु ज्योतिषः प्रसिद्धमब्रह्मत्वम्। ''तस्यैषा दृष्टिः'' (छा॰ ३/१३/७) ''तस्यैषा श्रुतिरि'' ति चौष्ण्यघोषविशिष्टत्वस्य श्रवणात्। ''तदेतद् दृष्टं च श्रुतं चेत्युपासीते'' ति च श्रुतेः। ''चक्षुष्यः श्रुतो भवति य एवं वेद'' (छा॰ ३/१३/८) ति चाल्पफलश्रवणादब्रह्मत्वम्। महते हि फलाय ब्रह्मोपासनमिष्यते। न नचान्यदपि किंचित्स्ववाक्ये प्राणाकाशवद् ज्योतिषोऽस्ति ब्रह्मलिङ्गम्। न च पूर्वस्मिन्नपि वाक्ये ब्रह्म निर्दिष्टमस्ति; ''गायत्री वा इदं सर्वं भूतम्'' इति छन्दोनिर्देशात्। अथापि कथच्चित् पूर्वस्मिन् वाक्ये ब्रह्म निर्दिष्टं स्यात्, एवमपि न तस्येह प्रत्यभिज्ञानमस्ति। तत्र हि ''त्रिपादस्यामृतं दिवी''- (३/१२१, ६) इति द्यौरधिकरणत्वेन श्रूयते। अत्र पुनः ''परो दिवो ज्योतिरि'' ति द्यौर्मर्यादात्वेन। तस्मात्प्राकृतं ज्योतिरिह ग्राह्यमिति।।

एवं प्राप्ते ब्रूमः–ज्योतिरिह ब्रह्म ग्राह्यम्। कुतः? चरणाभिधानात्। पादाभिधानादित्यर्थः। पूर्वस्मिन् हि वाक्ये चतुष्पाद् ब्रह्म निर्दिष्टम्–''तावानस्य महिमा ततो ज्यायांश्च पूरुषः। पादोऽस्य सर्वा भूतानि त्रिादस्यामृतं दिवी'' (३/१/२/३) त्यनेन मन्त्रेण। तत्र यच्चतुष्पदो ब्रह्मणस्त्रिपादमृतं द्युसम्बन्धिरूपं निर्दिष्टम्, तदेवेह द्युसंबन्धाद् निर्दिष्टमिति प्रत्यभिज्ञायते। तत् परित्यज्याप्रकृतं ज्योतिः कल्पयतः प्रकृतहानाप्रकृतप्रक्रिये प्रसज्येयाताम्। न केवलं पूर्वशक्याऽज्योतिर्वाक्य एव ब्रह्मानुवृत्तिः, परस्यामपि शाण्डिल्यविद्यायामनुवर्तिब्यते ब्रह्म। तस्मादिह ज्योतिरिति ब्रह्म प्रतिपत्तव्यम्। यत्तूक्तम्–''ज्योतिर्दीप्यत'' इति चैतौ शब्दौ कार्ये ज्योतिषि प्रसिद्धौ– इति, नायं दोषः ; प्रकरणाद्-ब्रह्मावगमे सत्यनयोः शब्दयोरविशेषकत्वात्, दीप्यमानकार्यज्योतिरुपलक्षिते ब्रह्मण्यपि प्रयोगसंभवात्, ''येन सूर्यस्तपति तेजसेद्ध'' (तै॰ ब्रा॰ (३/१२/९/७) इति च मन्त्रवर्णात्। यद्वा नाय ज्योतिः शब्दश्चक्षुर्वृत्तेरेवानुग्राहके तेजसि वर्तते; अन्यत्रापि प्रयोगदर्शनात्, ''वाचैवायं ज्योतिषाऽऽस्ते'' (बृ॰ ४/३/५) ''मनो ज्योतिर्जुषताम्'' (तै॰ ब्रा॰ १/६/३/३) इति च। तस्माद् यद्यत् कस्यचिदवभासकम्, तत्तज्ज्योतिः- शब्देनाभिधीयते। तथा ''तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति'' (कौ॰ २/५/१५) ''तद् देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्'' (बृ॰ ४/४/१६) इत्यादिश्रुतिभ्यश्च। यदप्युक्तम्–द्युमर्यादत्वं सर्वगतस्य ब्रह्मणो नोपपद्यते–इति, अत्रोच्यते, सर्वगतस्यापि ब्रह्मण उपासनार्थः प्रदेशविशेषपरिग्रहो न विरुध्यते।।

ननु–उक्तं निष्प्रदेशस्य ब्रह्मणः प्रदेशविशेषकल्पना नोपपद्यत–इति, नायं दोषः ; निष्प्रदेशस्यापि ब्रह्मण उपाधिविशेषसंबन्धात्प्रदेशविशेषकल्पंनोपपत्तेः। तथाहि–आदित्ये, चक्षुषि, हृदय इति प्रदेशविशेषसंबन्धीनि ब्रह्मण उपासनानि श्रूयन्ते। एतेन ''विश्वतः पृष्ठेष्वि''-त्याधारबहुत्वमुपपादितम्। यदप्येतदुक्तम्–औष्ण्यघोषानुमिते कौक्षेये कार्ये

ज्योतिष्यध्यस्यमानत्वात्परमपि दिवः कार्यं ज्योतिरेव–इति, तदप्ययुक्तम् ; परस्यापि ब्रह्मणो नामादिप्रतीकत्ववत्कौक्षेयज्योतिष्प्रतीकत्वोपपत्तेः। "दृष्टं च श्रुतं चेत्युपासीते" ति तु प्रतीकद्वारकं दृष्टत्वं श्रुतत्वं च भविष्यति। यदप्युल्पफलश्रवणान्न ब्रह्मेति, तदप्यनुपपन्नम् ; न हीयते फलाय ब्रह्माश्रयणीयम्, इयते नेति नियमहेतुरस्ति। यत्र हि निरस्तसर्वविशेषसंबन्धं परं ब्रह्मात्मत्वेनोपदिश्यते, तत्रैकरूपमेव फलं मोक्ष इत्यवगम्यते। यत्र तु गुणविशेषसंबन्धं प्रतीकविशेषसम्बन्धं वा ब्रह्मोपदिश्यते, तत्र संसारगोचराण्येवोच्चावचानि फलानि दृश्यन्ते–"अन्नादो वसुदानो विन्दते वसु य एवं वेदे" (बृ० ४/४/२४) इत्याद्यासु श्रुतिषु। यद्यपि न स्ववाक्ये किंचिज्ज्योतिषो ब्रह्मलिङ्गमस्ति ; तथापि पूर्वस्मिन् वाक्ये दृश्यमानं ग्रहीतव्यं भवति। तदुक्तं सूत्रकारेण– *ज्योतिश्चरणाभिधानादि" इति*।।

कथं पुनर्वाक्यान्तरगतेन ब्रह्मसंनिधानेन ज्योतिः श्रुतिः स्वविषयाच्छक्या प्रच्यावयितुम्? नैष दोषः ; "यदतः परो दिवो ज्योति" रिति प्रथमतरपठितेन यच्छब्देन सर्वनाम्ना द्युसंबन्धात् प्रत्यभिज्ञायमाने पूर्ववाक्यनिर्दिष्टे ब्रह्मणि स्वसामर्थ्येन परामृष्टे सत्यर्थाज्ज्योतिः शब्दस्यापि ब्रह्मविषयत्वोपपत्तेः। तस्मादिह ज्योतिरिति ब्रह्म प्रतिपत्तव्यम्।।२४।।

छन्दोऽभिधानान्नेति चेन्न, तथा चेतोऽर्पणनिगदात्तथा हि दर्शनम्।।२५।। अथ यदुक्तम्– पूर्वस्मिन्नपि वाक्ये न ब्रह्माभिहितमस्ति, "गायत्री वा इदं सर्वं भूतं यदिदं किञ्चे" (छा० ३/१२/१) ति गायत्र्याख्यस्य छन्दसोऽभिहितत्वात्–इति, तत्परिहर्तव्यम्।। कथं पुनश्छन्दोऽभिधानान्न ब्रह्माभिहितमिति शक्यते वक्तुम्? यावता "तावानस्य महिमे" त्येतस्यामृचि चतुष्पाद् ब्रह्म दर्शितम्। नैतदस्ति ; "गायत्री वा इदं सर्वम्" इति गायत्रीमुपक्रम्य तामेव भूतपृथिवीशरीरहृदयवाक्प्राणप्रभेदैर्व्याख्याय "सैषा चतुष्पदा षड्विधा गायत्री तदेतदृचाभ्यनूक्तं तावानस्य महिमे" ति तस्यामेव व्याख्यातरूपायां गायत्र्यामुदाहृतो मन्त्रः कथमकस्माद् ब्रह्म चतुष्पादभिदध्यात्? योऽपि तत्र "यद वै तद् ब्रह्मे" (छा० ३/१२/५, ६) इति ब्रह्मशब्दः, सोऽपि छन्दसः प्रकृतत्वाच्छन्दोविषय एव "य एतामेवं ब्रह्मोपनिषदं वेदे" (छा० ३/११/३) त्यत्र हि वेदोपनिषदमिति व्याचक्षते। तस्माच्छन्दोऽभिधानान्न ब्रह्मणः प्रकृतत्वमिति चेत्।।

नैष दोषः ; तथा चेतोऽर्पणनिगदात्। तथा = गायत्र्याख्यच्छन्दोद्वारेण तदनुगते ब्रह्मणि, चेतसोऽर्पणम् = चित्तसमाधानमनेन ब्राह्मणवाक्येन निगद्यते– "गायत्री वा इदं सर्वम्" इति। न ह्यक्षरसनिवेशमात्राया गायत्र्याः सर्वात्मकत्वं संभवति। तस्माद्यद्गायत्र्याख्यविकारेऽनुगतं जगत्कारणं ब्रह्म, तदिह सर्वमित्युच्यते। यथा "सर्वं खल्विदं ब्रह्मे" (छा० ३/१४/१) ति। कार्यं च कारणादव्यतिरिक्तमिति वक्ष्यामः – "तदनन्यत्वमारम्भणशब्दादिभ्य" (ब्र० २/१/१४) इत्यत्र।

तथाऽन्यत्रापि विकारद्वारेण ब्रह्मण उपासनं दृश्यते– ''एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्त एतमग्नावध्वर्यव एतं महाव्रते छन्दोगा'' (ऐ० ३/२/३/१२) इति। तस्मादस्ति छन्दोऽभिधानेऽपि पूर्वनिस्मन्वाक्ये चतुष्पाद् ब्रह्म निर्दिष्टम्। तदेव ज्योतिर्वाक्येऽपि परामृश्यत उपासनान्तरविधानाय।।

अपर आह– साक्षादेव गायत्रीशब्देन ब्रह्म प्रतिपाद्यते ; सङ्ख्यासामान्यात्। यथा गायत्री चतुष्पदा षडक्षरैः पादैः, तथा ब्रह्म चतुष्पात्। तथाऽन्यत्रपि छन्दोऽभिधायी शब्दोऽर्थान्तरे सङ्ख्यासामान्यात्प्रयुज्यमानो दृश्यते। तद्यथा– ''ते वा एते पञ्चान्ये दश सन्तस्तत्कृतम्'' इत्युपक्रम्याह– ''सैषा विराडन्नादी'' (छा० ४/३/८) इति। अस्मिन्पक्षे ब्रह्मैवाभिहितमिति न छन्दोऽभिधानम्। सर्वथाऽप्यस्ति पूर्वस्मिन्वाक्ये प्रकृतं ब्रह्म।।२५।।

भूतादिपादव्यपदेशोपपत्तेश्चैवम्।।२६।। इतश्चैवमभ्युपगन्तव्यमस्ति–पूर्वस्मिन्वाक्ये प्रकृतं ब्रह्मेति, यतो भूतादीन्पादान् व्यपदिशति। भूतपृथिवीशरीरहृदयानि हि निर्दिश्याह–''सैषा चतुष्पदा षड्विधा गायत्री'' इति। न हि ब्रह्मानाश्रयणे केवलस्य छन्दसौ भूतादयः पादा उपपद्यन्ते। अपि च ब्रह्मानाश्रयणे नेयमृक्संबध्येत–''तावानस्य महिमे'' ति। अनया हि ऋचा स्वरसेन ब्रह्मैवाभिधीयते, ''पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवी'' (छा० ३/१२/५) ति सर्वात्मत्वोपपत्तेः। पुरुषसूक्तेऽपीयमृग्ब्रह्मपरतयैव समान्नायते। स्मृतिश्च ब्रह्मण एवंरूपतां दर्शयति–''विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्'' (भग० १०/४२) इति। ''यद् वै तद् ब्रह्मे'' (छा० ३/१२/७) ति च निर्देश एवं सति मुख्यार्थ उपपद्यते। ''पञ्च ब्रह्मपुरुषा'' (छा० ३/१३/६) इति च हृदयसुषिषु ब्रह्मपुरुषश्रुतिर्ब्रह्मसंबन्धितायां विवक्षितायां सम्भवति। तस्मादस्ति पूर्वस्मिन्वाक्ये ब्रह्म प्रकृतम्। तदेव ब्रह्म ज्योतिर्वाक्ये द्युसंबन्धात्प्रत्यभिज्ञायमानं परामृश्यतं इति स्थितम्।।२६।।

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्।।२७।। यदप्येतदुक्तं पूर्वत्र–''त्रिपादस्यामृतं दिवी'' इति सप्तम्या द्यौराधारत्वेनोपदिष्टा, इह पुनः–''अथ यदतः पर'' इति पञ्चम्या मर्यादात्वेन। तस्मादुपदेशभेदान्न तस्येह प्रत्यभिज्ञानमस्ति–इति, तत्परिहर्तव्यम्। अत्रोच्यते–नायं दोषः ; उभयस्मिन्नप्यविरोधात्। उभयस्मिन्नपि सप्तम्यन्ते पञ्चम्यन्ते चोपदेशे न प्रत्यभिज्ञानं विरुध्यते। यथा लोके वृक्षाग्रसंबद्धोऽपि श्येन उभयथोपदिश्यमानो दृश्यते–वृक्षाग्रे श्येनः, वृक्षाग्रात्परतः श्येन इति च। एवं दिव्येव सद् ब्रह्म दिवः परमित्युपदिश्यते।।

अपर आह–यथा लोके वृक्षाग्रेणासंबद्धोऽपि श्येन उभयथोपदिशयमानो दृश्यते–वृक्षाग्रे श्येनः, वृक्षाग्रात्परतः श्येन इति च, एवं च दिवः परमपि सद् ब्रह्म दिवीत्युपदिश्यते। तस्मादस्ति पूर्वनिर्दिष्टस्य ब्रह्मण इह प्रत्यभिज्ञानम्। अतः परमेव ब्रह्म ज्योतिः शब्दमिति सिद्धम्।।२७।।

इति शाङ्करभाष्यम् दशमं ज्योतिरधिकरणम् समाप्तम्।

वार्तिकम्

छान्दोग्यवाक्येऽपि न सन्देहः संभवति ; "सदेव सोम्येदमग्र आसीदि" ति सतः प्रकरणस्यानुवर्तनात्। पूवानुमन्त्रणानुवाकवद् लिङ्गेन प्रकरणबाधसंभवात् संशयोपपत्तिरिति चेत्, न ; वैषम्यात्। तत्र हि प्रकृतयोर्दर्शपूर्णमासयोर्देवताया अभावात् शब्दानुविद्धस्यैव देवतात्वेनोपचारादिनाप्यप्रकृतदेवतायां तान्नाम्नो योजयितुमशक्यत्वाद् युक्तो लिङ्गेन तदनुमन्त्रणानुवाकोत्कर्षः, इह तु बहुषु स्थलेषु ब्रह्मणि प्राणशब्दप्रयोगाद लिङ्गाविरोधाद् युक्तं प्रकरणेन ब्रह्मणः प्राणशब्दत्वमिति। तस्मान्नास्ति तत्रापि सन्देह इति।। इति नवमं प्राणाधिकरणम्।।

ज्योतिश्चरणाभिधानात्।। छान्दोग्ये श्रयते–"अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्टेषु सर्वतः पृष्टेष्वि" ति।। विश्वतः पृष्टेष्वित्यस्य व्याख्यानं सर्वतः पृष्ठेष्विति। न विद्यत उत्तमो येभ्यः, तेष्वनुत्तमेष्वित्यर्थः। तेन अतो द्युलोकात् परं सर्वेषामुपरि चोत्तमानुत्तमलोकभेदेषु च यद् ज्योतिर्दीप्यते=प्रकाशते, इदमेव तत्। किम? यदिदं दृष्टिश्रुतिभ्यामनुमेयमस्मिन्नन्तः पुरुषे ज्योतिरिति विषयवाक्ययोजना। दृष्टिश्रुति च तस्योष्णस्पर्शघोषोपलब्धी ; "तस्यैषा द्रष्टिः। यत्रैतदस्मिन् शरीरे संस्पर्शेनोष्णिमानं विजानाति, तस्यैषा श्रुतिर्यत्रैतत् कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत उपश्रृणोति" ति वाक्यशेषात्। अत्र प्रत्युदाहरणसङ्गतिर्द्रष्टव्या ; पूर्ववदत्र ब्रह्मलिङ्गाभावात्। द्रष्टान्तसङ्गतिर्वा ; तत्र ब्रह्मलिङ्गवदत्र तेजोलिङ्गसत्त्वात्।।

तत्र संशयः–किं ज्योतिः शब्देन तेजोविशेषोऽभिधीयते, किं वा परं ब्रह्मेति। तदर्थं चायं विचारो भविष्यति–किं पूर्वस्मिन् गायत्रीवाक्ये "गायत्री वा इदं सर्वमि" त्यत्र गायत्रीपदेन छन्दोऽभिधीयते, किं वा परं ब्रह्मेति। ब्रह्माभिधानेऽपि किं तदस्मिन् वाक्ये प्रत्यभिज्ञायते, न वेति। यदा प्रत्यभिज्ञायते, तदा पूर्ववाक्यगतचरणाभिधानमेवास्ति ब्रह्मलिङ्गम्, इत्याकाशादिपदवद् ज्योतिः पदमपि गुणवृत्त्या ब्रह्मपरं भविष्यति। यदा च न, तदा कारणाभावाद् मुख्यार्थमेव ज्योतिः पदमिति।।

किं तावत् प्राप्तम्? पूर्ववदिह ब्रह्मलिङ्गाभावात् तेजोलिङ्गसत्त्वाच्च भौतिकमादित्यादिज्योतिरेवेह

मुख्यं ज्योतिः शब्देनाभिधीयते। आकाशवाक्ये प्राणवाक्ये च बलवद्बाधकरवाक्यशेषोपात्तब्रह्म-लिङ्गोपनिपाताद् आकाशप्राणशब्दौ मुख्यार्थात् प्रच्याव्य गुणवृत्त्या ब्रह्मपरत्वेन नीतौ। न च तथेह किञ्चिद् बाधकं ब्रह्मलिङ्गमस्ति, येन ज्योतिः शब्दोऽपि मुख्यार्थात् प्रच्याव्य ब्रह्मपरतां नीयेत ; तदनुपलम्भात्। मुख्यश्च ज्योतिःशब्दो विषयावरकतमोविरोधिन्यादित्याद्यालोके दृष्टा ; तत्रैव सर्वजनीनप्रयोगदर्शनात्। इतोऽपि ज्योतिः शब्दोऽत्र ब्रह्मपरो व्याख्यातुं शक्यते ; यतस्तेजोलिङ्गमेवात्र दृश्यते–दीप्यत इति। दीप्तिर्हि रूपवत एव तेजसः संभवतिः नारूपस्य ब्रह्मणः। द्युमर्यादत्वश्रुतेरपि ज्योतिश्शब्दं तेजः, न ब्रह्म। न हि सर्वात्मकस्य ब्रह्मणो द्युमर्यादत्वं युक्तम्। श्रूयते च तद् ''दिवः परो दीप्यत'' इति। कार्यस्य तु ज्योतिषः परिच्छिन्नत्वात् तच्छ्रवणं युक्तम्। ननु–कार्यस्यापि ज्योतिषो न द्युमर्यादत्वं युक्तम् ; आदित्यादिज्योतिष इहापि प्रत्यक्षेणादर्शनात्। न च–त्रिवृत्कृतस्य ज्योतिषः सर्वत्रोपलम्भेऽप्यत्रिवत्कृतस्यानुपलम्भात् तस्यैव दिवः परत्वं भविष्यतीति–वाच्यम ; तस्य कार्याकारेणापरिणतस्य स्वतः प्रयोजनविधुरत्वेनावस्थितौ प्रमाणाभावात्। न हि जीवादृष्टजन्या सृष्टिर्निष्फला भवति। उपास्यत्वमेव तत्प्रयोजनमिति चेत्, न ; प्रयोजनान्तरप्रयुक्ततयाऽवस्थितस्यै-वादित्यादेः कार्यस्योपास्यत्वदर्शनात्। अपि च ''तासां त्रिवृतं त्रिवृतमेकैकां करवाणी'' त्यविशेषेणात्रिवृत्कृतानां तेजोऽबन्नलक्षणदेवतानां त्रिवृत्करणं श्रूयते। तन्नासति बाधके संकोचमर्हति। अतोऽप्यध्यवसीयते–नास्त्यत्रिवृत्कृतं तेज इति। तत्र कारणात्मनो हिरण्यगर्भस्यात्रिवृत्कृतकार्यत्वात् कथं न त्रिवृत्करणश्रुतिसंकोच इति चेत्, न ; अत एव तस्यापि त्रिवृत्कृतकार्यत्वमस्तु ; साक्षाद् ब्रह्मजत्वात्, भौतिकत्वं वा। यदि तस्यात्रिवृत्कृतभूतकार्यत्वमित्याग्रहः, अस्तु नाम ; तथाप्यकार्यापन्नं नाप्यत्रिवृत्कृतं तेजः ; निष्प्रयोजनत्वादित्युक्तमेव। अस्तु वा तदपि ; तथापि न तस्यापि द्युमर्यादावत्त्वमुपपद्यते। न ह्यत्रिवृत्कृतं तेजो दिव ऊर्ध्वमेवावतिष्ठते, नाध इति किञ्चिन्नियामकमस्ति। तस्माद् न ब्रह्मवत् तेजसोऽपि द्युमर्यादा युक्तेति–चेत्, न ; सर्वत्राधिगम्यमानस्यापि त्रिवृत्कृतस्य तेजस उपासनार्थम्–''परो दिवः'' इति देशविशेषपरिग्रहोपपत्तेः, तद्देशवर्तिन एव ज्योतिर्विशेषस्यात्रोपास्यत्वात्। न चैवं निष्प्रदेशस्य ब्रह्मणः प्रदेशविशेषपरिकल्पनाऽयुक्ता, न वा ''सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्वि'' त्याधारवत्त्वश्रवणम्। ब्रह्मणि परमार्थतस्तदयुक्त-त्वेऽप्युपासनार्थमादित्यमण्डलस्थत्वादिवत् तत्कल्पनमविवक्षितमिति चेत्, न ; कार्ये ज्योतिषि तस्योपपन्नतरत्वेन ब्रह्मणि तत्कल्पनाया अप्रसरात्। अपिच–''इदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योति'' रिति जाठरे ज्योतिषि परं ज्योतिरध्यस्योपासनं श्रूयते। सारूप्यनिबन्धना चाध्यासोपासना दृष्टा–''तस्य भूरिति शिरः एकं हि शिर एकमेतदक्षरमि'' त्यादौ। न च कौक्षेयज्योतिर्ब्रह्मणोः सादृश्यमस्ति ; येन तत्र तदध्यासः स्यात्, तयोब्रह्मत्वाब्रह्मत्वाभ्यामत्यन्तविलक्षणत्वात्। न च

कौक्षेयज्योतिषोऽपि ब्रह्मत्वात् सादृश्यसिद्धिरिति–वाच्यम् ; तदब्रह्मत्वस्य प्रसिद्धतरत्वात्, ''तस्यैषा दृष्टिः'' ''तस्यैषा श्रुतिरि'' ति तदौष्ण्यघोषयोः श्रवणाच्च। न हि परब्रह्मण औष्ण्यघोषयोः संभवोऽस्ति ; ''अशब्दमस्पर्शमरूपमव्ययमि'' ति श्रुतेः। तस्माद् अब्रह्मणि कौक्षेयज्योतिष्यध्यस्यमानत्वेन तत्सादृश्यात् परं ज्योतिरष्यब्रह्मैव। ''चक्षुष्यः श्रुतो भवति य एवं वेदे'' त्यल्पफलश्रवणादप्यब्रह्मत्वं ज्योतिषोऽध्यवसीयते। न चान्यत् स्ववाक्ये ज्योतिषो ब्रह्मत्वलिङ्गं किञ्चिदस्ति प्राणाकाशयोरिव।।

ननु–स्ववाक्यं ब्रह्मलिङ्गाभावेऽपि पूर्वस्मिन् वाक्ये–''तावानस्य महिमा। ततो ज्यायांश्च पुरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवी'' ति मन्त्रेण ब्रह्मलिङ्गं निर्दिष्टमस्ति। तस्यैव लिङ्गिनो ब्रह्मणोऽत्र ''यदतः परो दिवो ज्योतिरि'' ति द्युसम्बन्धात् सर्वनामश्रुतेश्च प्रत्यभिज्ञानादुपपद्यते ज्योतिषो ब्रह्मत्वमिति–चेत्, न ; पूर्ववाक्ये–''गायत्री वा इदं सर्वं भूतम्'' इति गायत्रीछन्द उपक्रम्य तस्यैव चतुष्पात्त्वेन षड्विधत्वेन च प्रतिपादनाद् ब्रह्मनिर्देशासिद्धेः। यदि वक्ष्यमाणरीत्या पूर्ववाक्यस्य कथञ्चिद् ब्रह्मपरत्वं व्याख्यायेत, अस्तु नाम ; तथापि तद् ब्रह्म न ज्योतिर्वाक्ये प्रत्यभिज्ञातुं शक्यते; उपदेशभेदात्। तत्र हि–''त्रिपादस्यामृतं दिवी'' ति द्यौरधिकरणत्वेन श्रयते, अत्र तु ''परो दिव'' इति द्यौर्मर्यादात्वेन। यापि ''यदत'' इति सर्वनामश्रुतिः, सापि ''वचनानि त्वपूर्वत्वादि'' तिन्यायेन ''यदाग्नेयोऽष्टाकपालो भवती'' तिवत् ''सर्वतः प्रतिहारमाश्विनं भक्षयति तस्मात् सर्वा दिशः श्रृणोती'' त्यादिवच्चापूर्वार्था भविष्यति। तस्मात् कार्यं ज्योतिरिह ग्राह्यमिति प्राप्तम्।।

एवं प्राप्तेऽभिधीयते–ज्योतिरिह परं ब्रह्मैव ग्राह्यम्, न भौतिकम् ; कुतः ज्योतिश्शब्देन पादाभिधानात्। यत् पूर्वस्मिन् वाक्ये–''पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवी'' ति चतुष्पदो ब्रह्मणस्त्रिपादमृतं द्युसम्बन्ध्युपक्रान्तम्, तदेवात्र ज्योतिः पदेनाभिधीयते। तच्च परं ब्रह्मेति वक्ष्यते। तस्मात् त्रिपादमृताभिधानसामर्थ्याद् ज्योतिः शब्दं परं ब्रह्मेत्यध्यवसीयते। कथं पुनरवगम्यते पूर्ववाक्योपात्तं त्रिपादमृतमेव ज्योतिः पदेनाभिधीयते, येंन ज्योतिः शंब्द परं ब्रह्म व्याख्यायेत–इति? उच्यते ; यच्छब्दसामानाधिकरण्याद् अतः पदसमानाधिकृतद्युसम्बन्धाच्च ज्योतिः पदस्य तदर्थत्वमध्यवस्यामः। सर्वनाम्नस्तावद् उत्सर्गतोऽयं स्वभावः–यत् प्रमाणान्तरप्रसिद्धपदार्थानुवादकत्वम्, नापूर्वार्थबोधकत्वम् ; बुद्धिस्थवाचित्वात्। किं बहुना? यत्संसर्गवशात् प्रच्याव: –''यस्योभयं हविरार्तिमार्च्छत्'' ''यस्याहिताग्नेरग्निर्गृहान् दहेदि'' त्यादौ, यत्र तु प्रमाणान्तरप्रसिद्धिः केनापि प्रकारेण न लभ्यते, तत्रागत्यैवापूर्वार्थत्वं तस्य कल्प्यते, यथा–''यदाग्नेयोऽष्टाकपालो भवती'' ति ; इहापि यदो यावत् पूर्वप्रसिद्धः कश्चिदर्थ उपलभ्यते, तावद् गतिसंभवाद् नापूर्वार्थत्वं कल्पयितुं शक्यते। अतो यत्पदेन किं पूर्वप्रकृतं स्वप्रधानमभिधीयतामित्यपेक्षायाम्–''अतो दिव'' इति

परामृष्टद्युसम्बन्धात् ''त्रिपादस्यामृतं दिवी'' ति पूर्वप्रकृतद्युसम्बन्धि त्रिपादमृतं स्वप्रधानं तदर्थतया प्रत्यभिज्ञायते। एवं च सति तत्समानाधिकृतं ज्योतिः पदं तस्यैव त्रिपादमृतस्याभिधायकम्, नान्यस्य ; तदभिधायकस्य यदा सामानाधिकरण्यविरोधात्। ननु च—एवं तर्हि द्युपदसम्बद्धयच्छब्देनैव त्रिपादमृतोपस्थितौ ज्योतिरिति विशेषपदं व्यर्थमिति—चेत्, सत्यम् ; अर्थात्तल्लाभेऽपि—''सा वैश्वदेव्यामिक्षे'' त्यत्रामिक्षापदवत् तदभिधायकविशेषपदमन्तरेण तदाकाङ्क्षाया अशान्तेः, ''शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्यत'' इति न्यायात्।।

ननु—नार्थात् तद्विशेषप्रसिद्धिरिह मयोक्ता, किं तर्हि? द्युशब्दसम्बन्धलक्षणवाक्यात्, न ह्यन्यत् त्रिपादमृतात् द्युसम्बन्धि पूर्व प्रकृतमस्ति, यत् द्युशब्दसमभिव्याहृतेन यदाऽभिधीयतेति चेत, न ; तत्पदमन्तरेण वाक्यस्यैव साकाङ्क्षतया तदनुपस्थापकत्वात्, पूर्वप्रकृतं द्युसम्बन्धीत्युक्ते किमित्याकाङ्क्षादर्शनात्, योग्यपदमपेक्ष्यैव सर्वनाम्नः स्वार्थोपस्थापकत्वाच्च। तस्मात् अतः=पूर्वप्रकृताद् दिवः परं यत्=पूर्वप्रकृतमित्युक्ते किं तदित्यपेक्षायां त्रिपादमृतमिति स्वशब्देन तस्मिन् वक्तव्ये प्राप्तेऽपि ज्योतिरिति परशब्देनाभिधानं दीप्तिगुणविधानार्थम्, ज्योतिर्हि दीप्यते, नाज्योतिः, इति त्रिपादमृतं कार्यज्योतिरुपलक्षितं ज्योतिः शब्देनाभिधीयते। यदि हि प्रकृतं त्रिपादमृतं न ज्योतिः शब्दं स्यात्, तर्हि प्राकृतं ज्योतिः तदा सर्वनाम्नः प्रसिद्धार्थवाचित्वमौत्सर्गिकं बाध्येत, ब्रह्मप्रकरणं च हीयेत, अप्रकृतप्रक्रियाकल्पनं च प्रसज्येत। ब्रह्म चात्र पूर्वप्रकृतं यच्छब्देनानुकृष्यत इत्युक्तम्। अग्रे च शाण्डिल्यविद्यायां तदनुवृत्तिदर्शनात्, अकस्मान्मध्ये ब्रह्मणः परित्यागे कारणाभावाच्च।।

एतेन—यदुक्तम्—'ज्योतिः' 'दीप्यते' इति चैतौ शब्दौ कार्ये ज्योतिषि प्रसिद्धौ न ब्रह्मण्युपपद्येते इति, तदपि—अपास्तम् ; प्रकरणात् द्युपदसमभिव्याहृतयच्छब्दवचनाच्च ब्रह्मावगमे सति तयोरविशेषकत्वात्, विशेषकत्वेऽपि दीप्यमानकार्यज्योतिरुपलक्षिते ब्रह्मणि तत्प्रयोगोपपत्तेरित्युक्तत्वात्। अभ्युपेत्यैतदुक्तम्। वस्तुतस्तु—ब्रह्मण्यपि ज्ञानादिपदवद् ज्योतिः पदमपि विशेषेण वर्तते। न हि चक्षुर्वृत्त्यनुग्राहक एव तेजसि ज्योतिः शब्दोऽनुवर्तते ; ''वागृज्योतिर्मनोज्योतिश्चक्षुज्योतिरि'' ति लोकेवेदयोर्वागादिष्वपि तत्प्रयोगदर्शनात्। तस्मात् प्रकाशकत्वसामान्याद् यद्यदेव यस्य कस्यचित् प्रकाशकम्, तत्तदेव ज्योतिरित्यभिधीयते। ब्रह्म च चैतन्यरूपत्वात् स्वयं प्रकाशकम्ः ''तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाती'' ति ''तद्देवा ज्योतिषां ज्योति'' रिति च श्रुतेः। अत उपपन्नोऽत्रापि ब्रह्मणि ज्योतिरादिः। एतेन—दीप्यत इति शब्दोऽपि ब्रह्मणि—व्याख्यातः ; दीप्त्यर्थस्य भातेरत्र प्रयोगदर्शनेन तस्यापि प्रयोगोपपत्तेरिति। ननु—एवं सत्यधिकरणारम्भो व्यर्थः ; ब्रह्मणः प्रकृतत्वेन तस्यैव ज्योतिः शब्देनाभिधानसिद्धेः

सन्देहाभावादिति-चेत्, न ; ब्रह्मप्रकरणस्यैव वक्ष्यमाणरीत्या सन्दिग्धत्वात् तत्संदेहोपपत्तेः, शक्तिसंशयाच्च। तस्मात् यत्किञ्चिदेतत्। अपिच-"तं देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्" इति श्रुत्यन्तरे ज्योतिरमृतशब्दयोस्सामानाधिकरण्येन ब्रह्मणि प्रयोगदर्शनाद् अत्राप्यमृतशब्देन पूर्वोपात्तस्य ब्रह्मणो यदा परामृश्य ज्योतिः शब्देनाभिधानं युक्तमिति। यदप्युक्तम्-सर्वगतस्य ब्रह्मणो द्युमर्यादत्वं नोपपद्यते-इति, तदप्युपासनार्थमुपाधिसम्बन्धकल्पनया चक्षुरादित्यादिसंस्थानवद् ब्रह्मणोऽविरुद्धम्। एतेन-'सर्वतः पृष्ठेष्वि' त्याधारबहुत्वश्रवणमपि ब्रह्मण्य विरुद्धमिति-व्याख्यातम्।।

यदुक्तम्-औष्ण्यघोषानुमितकौक्षेयज्योतिष्यध्यस्यमानत्वेन तत्सादृश्यात् परं ज्योतिरपि प्राप्तमेव-इति, तन्न ; "नाम ब्रह्मेत्युपासीत" मनो ब्रह्मेत्युपसीते" ति नामादीनामिव कौक्षेयज्योतिषोऽपि ब्रह्मप्रतीकत्वाविरोधात्, ...संपद्यमानयत्किञ्चित्सादृश्यस्य तद्वदत्रापि विद्यमानत्वात्, "दृष्टं च श्रुतं चेत्युपासीते" ति दृष्टत्वश्रुतत्वगुणयोः प्रतीकद्वारा ब्रह्मण्युपपत्तेः। एतेन-अल्पफलश्रवणमपि-व्याख्यातम् ; अध्यासानुसारेण ब्रह्मोपासनभेदाद् अल्पानल्पफल-भेदोपपत्तेः। निगुण ब्रह्मण एव विवक्षेति विशेषोऽत्रानुसन्धेयः। तथाच यथायोगं तेजोलिङ्गानामपि नयनं न विरुद्धम्, इति नात्यन्तिको बाधस्तेजोलिङ्गस्यात्रेति मन्तव्यम्। तदिदमाह-*दृष्टं च श्रुतं चेति*।। प्रकरणस्य महतोऽवान्तरस्य वा वाक्येन बाधाद् आदित्यान्नसंनिधिवदकिञ्चत्करत्वाच्च कथं चरणाभिधानस्य वाक्यान्तरावगतस्य हेतुत्वमित्याशङ्क्य परिहरति-ब्रह्मज्ञानाद्धेयकरूपं फलं प्राप्यते, नोच्चावचगुणविशिष्टब्रह्मज्ञानात्, "तं यथोपासते तदेव भवती" ति श्रुतेः। तस्मात्-"अन्नादो वसुदानो बिन्दते वसु य एवं वेदे" त्याद्यासु श्रुतिषु ब्रह्मोपासनायां यथाल्पफलत्वमविरुद्धम्, तद्वदत्रापि भविष्यति। न च स्ववाक्ये ब्रह्मलिङ्गाभावादब्रह्मत्वम् ; उक्तरीत्या पूर्ववाक्यगतब्रह्मणोऽत्र प्रत्यभिज्ञाने सिद्धे तद्वाक्यावगतब्रह्मलिङ्गस्यैवात्रानुसन्धेयत्वत्। अत एव सूत्रकारेण ज्योतिषो ब्रह्मत्वे "चरणाभिधानादि" ति हेतुमुपन्यस्यता "पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवी" ति मन्त्रोपात्तब्रह्मलिङ्गमर्थादिह सूत्रितं भवति। यदि च ज्योतिरिह परं ब्रह्म ग्राह्यम्, कुतः? तस्यैव मन्त्रेव मन्त्रेण चरणतयाऽभिधानादिति सूत्रयोजना क्रियते, तदा साक्षादेव सूत्रकारेण मन्त्रोपात्तं तल्लिङ्गं "चरणाभिधानादि" ति निर्दिष्ट मन्तव्यम्। यदा तु पूर्वाक्तव्याख्यानरीत्या ज्योतिःपदेन मन्त्रोपात्तचरणस्याभिधानादिति, तथाऽर्थादिति। ननु-वाक्यान्तरगतब्रह्मसंनिधानेन न ज्योतिः श्रतेर्बाधो युक्त इति-चेत्, न ; ब्रह्मण्यपि ज्योतिः शब्दसंभवस्योक्तत्वात् तद्बाधासिद्धेः। न च-एवमपि सामान्यश्रुतिर्न संनिधानमात्रेण विशेषपरतया नेतुं शक्यत इति-वाच्यम् ; प्रथमपठितेन यच्छब्देन

सर्वनाम्ना स्वसामर्थ्येन द्युसम्बन्धाच्च पूर्ववाक्यनिर्दिष्टे ब्रह्मणि प्रत्यभिज्ञायमानेऽर्थात् तत्समानाधिकृतज्योतिः पदस्य ब्रह्मविषयत्वोपपत्तेः संनिधिमात्रेण तत्सङ्कोचानभ्युपगमात्, प्रत्यभिज्ञायामेव संनिधानस्योपयोगोक्तेः। तस्मात् परं ब्रह्मैवात्र ज्योतिः शब्दमिति॥

छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात्तथाहि दर्शनम्॥२५॥ अस्य सूत्रस्य प्रयोजनमाह-* अथ यदुक्तमिति*॥ पूर्वपक्षभाष्य इति शेषः ; इत एवाकृष्योक्तशंङ्कायास्तत्र भाष्यकारेण वर्णनात्। आशङ्कासूत्रभागगतं नञ्पदं प्रतियोगिनं पूरयित्वा व्याकरोति-*कथं पुनरित्यादिना*॥ यदुक्तं पूर्ववाक्ये चतुष्पदो ब्रह्मणोऽभिहितत्वादेवेदं प्रत्यभिज्ञायत इति, भवेदप्येतदेवम्-यदि पूर्ववाक्ये चतुष्पाद् ब्रह्माभिहितं स्यात्, न चैवमस्ति ; गायत्रीच्छन्दस एव तत्र चतुष्पात्त्वेनाभिधानात्, न ब्रह्मणः ; यतः-''गायत्री वा इदं सर्वं भूतं यदिदं किञ्चे'' ति गायत्रीमेवोपक्रम्य ''वाग्वै गायत्री वाचा इदं सर्वं भूतं गायति त्रायते च। या वै सा गायत्री इयं वाव सेयं पृथिवी''। ''या वै सा पृथिवी इयं वाव सा यदिदमस्मिन् पुरुषे शरीरमस्मिन् हीमे प्राणाः प्रतिष्ठिताः। यद्वै तत् शरीरमिदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे हृदयमस्मिन् हीमे प्राणाः प्रतिष्ठिता'' इति भूतपृथिवीशरीरहृदयभेदैश्चतुष्पात्त्वेनोक्त्वाऽन्यथा वाक्प्राणसहितैश्च तैर्भूतादिभिः षड्विधत्वेन तामेव व्याख्याय-''सैषा चतुष्पदा षड्विधा गायत्री'' त्युपसंहृत्य पुनस्तस्यामेव गायत्र्याम्-''तदेतदृचाऽभ्यनुक्तं तावानस्य महिमे'' त्युदाहृते ब्राह्मणेन मन्त्रः कथमकस्माद् ब्रह्माभिधातुं शक्नुयात्? अतो गायत्र्येव तत्र मन्त्रेणाभिधीयते, न ब्रह्म॥

यदपि तत्र ''यद्वै तद् ब्रह्मे'' ति ब्रह्मपदं श्रुतम्, तदपि छन्दसः प्रकृतत्वात् छन्दोविषयमेव। गायत्रीवाक्यात् पूर्वतनोर्ध्वामृतवाक्यान्ते-''य एतामेव ब्रह्मोपनिषदं वेदे'' त्यत्र वेदोपनिषदमाचक्षते। तस्मात् पूर्ववाक्ये छन्दोऽभिधानाद् न ब्रह्मणः प्रकृतत्वेनास्मिन् वाक्ये प्रत्यभिज्ञानमिति चेद् भावान् पश्यति, तन्न ; कुतः? तथा चेतोऽर्पणनिगदात्=गायत्र्याख्यच्छन्दोद्वारेण तदनुगते ब्रह्मणि चेतसः समाधानम्-''गायत्री वा इदं सर्वं भूतम्'' इत्यनेन ब्राह्मणवाक्येन निगद्यते। न ह्यन्यथाऽक्षरसंनिवेशरूपाया गायत्र्याः सर्वत्वं संभवति। अतो ब्रह्मविकारभूतायां गायत्र्यामनुगतं सर्वकारणं ब्रह्मैव-''गायत्री वा इदं सर्वमि'' त्यनेनोच्यते ; साक्षात्तत्र चित्तं समाधातुमशक्तेः, ओङ्कारवत् तत्प्रतीकत्वेन गायत्र्युपन्यासस्य तत्रापि कृतत्वात्। यद्वा सर्वपदस्य गायत्र्यामसंभवाद् ब्रह्मणश्च सर्वात्मकत्वेन तस्मिंस्तत्प्रयोगोपपत्तेस्तस्य ब्रह्मार्थत्वे सिद्धे तत्सामानाधिकरण्याद् गायत्रीपदस्यापि तद्विकारच्छन्दोऽभिधानद्वारा लक्षणया ब्रह्मार्थत्वं निश्चीयते। विकारशब्देन ब्रह्माभिधानप्रयोजनं तु तत्तद्द्वारा चेतः समाधानमित्यवोचाम॥

अपरे तु–पादसङ्ख्यासामान्याद् गौणमेव गायत्रीपदं ब्रह्मणि प्रयुक्तमिति–वर्णयन्ति। तस्माद् यदि पूर्वस्मिन् वाक्ये गायत्रीपदेन ब्रह्मप्रतीकतया छन्दोविधानम्, यदि वोक्तप्रकारेण लक्षणया गौण्या वा वृत्त्याऽभिधानम्, सर्वथाऽपि गायत्रीवाक्ये प्रकृतं ब्रह्मेति।।२५।।

भूतादिपादव्यपदेशोपपत्तेश्चैवम्।।२६।। इतश्च पूर्वस्मिन् वाक्ये ब्रह्म प्रकृतमित्येवमभ्युपगन्तव्यम् ; यतस्तत्र भूतादीन् पादत्वेन व्यपदिशति श्रुतिः, न त्वब्रह्मणश्छन्दोमात्रस्य भूत-पृथिवी-शरीरहृदयादयः पादा उपपद्यन्ते। ब्रह्मकार्यत्वात्तु तेषां तत्पादत्वमुपपद्यते। ''तावानस्य महिमे'' ति मन्त्रोऽपि ब्रह्मण्येवोपपद्यते। न च छन्दसः स्तावकत्वेन तदुपपत्तिः ; स्वार्थे संभवत्यन्यार्थकल्पनाया अन्याय्यत्वात्, पुरुषसूक्ते चास्य मन्त्रस्य ब्रह्मप्रकाशकत्वेन विनियोगाद्वा, ''विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदि'' ति स्मृतेः, ब्रह्मण्येवंरूपताध्यवसानाच्च। एवं च सति ''यद्वै तद् ब्रह्मे'' ति निर्देशो मुख्यार्थः सन्नुपपद्यते ; अन्यथाऽमुख्यः सन्नोपपद्येत। हृदयसुषिषु ब्रह्मपुरुषत्वाभिधानमपि ब्रह्मपरतायामेव कल्पेत। तस्मादस्ति पूर्ववाक्ये प्रस्तुतं ब्रह्म। तदेव च ज्योतिर्वाक्ये द्युसम्बन्धात् प्रत्यभिज्ञायमानं यच्छब्देन परामृश्यत इति स्थितम्।।२६।।

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्।।२७।। भवत्वेवं पूर्ववाक्ये प्रकृतं ब्रह्म; तथापि न तस्य ज्योतिर्वाक्ये प्रत्यभिज्ञानमस्ति। कुतः? उपदेशभेदात्=समाने ह्युपदेशे प्रत्यभिज्ञानं भवति। तत्साम्यं त्वर्थैकत्वे। न चेह तदस्ति। पूर्ववाक्ये हि ''त्रिपादस्यामृतं दिवी'' ति सप्तम्या दिव आधारत्वमुपदिष्टम्, इह तु–''परो दिव'' इति पञ्चम्या द्युमर्यादत्वम्। अतः शब्दार्थयोरुभयोरपि भेदेनोपदेशभेदादिह पूर्वप्रकृतस्य ब्रह्मणो द्युसम्बन्धे सत्यपि न प्रत्यभिज्ञानमिति चेद् भवान् पश्यति, नायं दोषः ; यतः उभयोपदेशेऽपि प्रत्यभिज्ञानं न विरूद्धयते; लोके सप्तम्यन्तपञ्चम्यन्तयोरुपदेशप्रकारभेदेऽप्यैकार्थ्यप्रत्यभिज्ञानदर्शनात्। तद्यथा लोके वृक्षाग्रसम्बद्ध एव श्येन उभयथोपदिश्यमानो दृष्टः–वृक्षाग्रे श्येनः, वृक्षाग्रात् परतः श्येनः इति च। यो हि श्येनो वृक्षाग्रे वस्तुतोऽस्ति, स ततः परतोऽप्यस्त्येव; अर्वाग्भागातिरिक्तमध्यपरभागस्यैव तस्य वृक्षाग्रात् परतोऽप्यवस्थानात्। ननु–एवमपि यदवच्छेदेन श्येनो वृक्षाधारः, न तदवच्छेदेन स तन्मर्याद इति–चेत्, न; अवच्छेदभेदेऽपिश्येनस्यैकत्वात्। ननु–श्येनस्यैकत्वेऽप्यधोदेशावच्छिन्नस्यैव वृक्षाधारत्वम्; संयोगविभागयोरेकावच्छेदेनैकस्मिन्नसंभवात्, तयोः सादेश्यविरोधादिति–चेत्, न; सोऽयं देवदत्त इत्यत्र तदेतद्देशकाललक्षणविरुद्धधर्मसंसर्गिणोरपि देवदत्तयोः स्वरूपेणैक्यप्रत्यभिज्ञानदर्शनात् तद्वदत्राप्य-वच्छेदभेदेऽपि स्वरूपेण तदविरोधात्।।

केचित्तु–यदा वृक्षाग्रे श्येनो वस्तुतः सम्बद्धोऽस्ति, तदा वृक्षाग्रात् परतः श्येन इति वाक्ये श्येनशब्देन मध्यपरभागावच्छिन्नः श्येनो लक्ष्यत इति–वर्णयन्ति। तन्न साधु; वृक्षाग्रे श्येन इत्यस्मिन्नपि वाक्ये श्येनशब्दे लक्षणाप्रसङ्गात्, अधोभागावच्छिन्नस्यैव श्येनस्य वृक्षाग्रे विद्यमानत्वात्, सामान्यशब्दस्य विशेषे लाक्षणिकत्वात्। यदि ब्रूयाद् न तत्र श्येनशब्दे लक्षणा; सप्तम्यन्तवृक्षाग्र इतिपदसमभिव्याहारादेव नीलोत्पलादाविव विशेषलाभादिति चेत्, एवं तर्हि प्रकृतेऽपि दीयतां दृष्टिः; पञ्चम्यन्तवृक्षाग्रादितिपदसमभिव्याहारादेव मध्यपरभागावच्छिन्नश्येनविशेषलाभाद् न श्येनपदे लक्षणेति। अत्र परं लक्षणा स्यात्–यदा वृक्षाग्रेण सम्बद्ध उपरिदेशे विद्यमानः श्येनो वृक्षाग्रात् परतः वृक्षाग्रे श्येन इति च व्यपदिश्यते, तदा वृक्षाग्र इति पदे गङ्गायां घोष इत्यत्र गङ्गापदेनेव सामीप्यं लक्ष्यत इति, एवं ब्रह्मण्यप्युभयोपदेशे न प्रत्यभिज्ञानविरोधः ; श्येनस्य वृक्षाग्रसम्बन्धवद् ब्रह्मणो वस्तुतो द्युसम्बन्धाभावात्। प्रथमपक्षं दार्ष्टान्तिकेऽघटमानं मन्वानो द्वितीयपक्षं परिग्राहयति– *अपर आहेत्यादिना*।।

एवं वा– *उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्*।। यदुक्तम्–द्युसम्बन्धात् पूर्वप्रकृतस्य द्युपादमृतस्य ज्योतिर्वाक्ये प्रत्यभिज्ञानम्–इति, तन्न; कुतः? उपदेशभेदात्=तत्र हि दिवीति द्योतनवति=स्वस्वरूप इत्युपदिश्यते, इह तु दिवः पर इति द्युलोकात् पर इति द्युशब्दस्योभयत्र भिन्नार्थत्वेनोपदेशभेदाद् न द्युसम्बन्धादिह ब्रह्मणः प्रत्यभिज्ञानमिति चेत, न; उभयस्मिन्नप्यविरोधात्। उक्तमेतत्–अतः शब्दसामानाधिकरण्यात् पूर्वोक्तस्यैव दिवः परामर्श इह भवति–इति। तत्र यदि पूर्ववाक्ये दिवीति द्योतनवत्स्वरूपमभिधीयते, यदि वा द्यौर्लोकः, उभयथा व्याख्यानेऽप्युभयस्मिन्नपि वाक्ये द्युशब्दस्योभयार्थत्वाविरोधित्वेन प्रत्यभिज्ञानाविरोधात्। यदा द्योतनवत् स्वस्वरूपं पूर्ववाक्ये द्युशब्दस्यार्थः, तदा ज्योतिर्वाक्येऽपि तस्य स एवार्थः। न च–स्वस्यैव स्वमर्यादात्वमनुपपन्नमिति–वाच्यम्; आधाराधेयभाववत् तस्याप्यविरुद्धत्वात्, अध्यात्माभिभूतभेदेनैकस्यापि ज्योतिषस्तदुभयोपपत्तेश्च, हृदयपुण्डरीकाकाशावच्छिन्नज्योतिरपेक्षया बहिर्धाऽऽकाशाद्यवच्छिन्नस्य ज्योतिषः परत्वात्। द्युलोकार्थत्वपक्षेऽप्यविरोधः पूर्वमेव व्याख्यातः। ननु–सर्वाधारस्य ब्रह्मणः कथं द्युलोकाधारत्वमुपपद्यते? नैष दोषः ; वृक्षाग्रानाधारस्यापि श्येनस्य वृक्षाग्राधारत्वव्यपदेशवत् तदनाधारस्यापि ब्रह्मणस्तदाधारत्वव्यपदेशोपपत्तेः। तदिदमुक्तमेव– *दिवः परमपि सद् ब्रह्म दिवीत्युपदिश्यत इति*।। तस्मादस्तिज्योतिर्वाक्ये पूर्वनिर्दिष्टस्य ब्रह्मणः प्रत्यभिज्ञानम्। अतः परमेव ब्रह्मेह ज्योतिः शब्दवाच्यमिति सिद्धम्।।२७।।

इति वार्तिकम् दशमं ज्योतिरधिकरणम् समाप्तम्।।

प्रदीपः

संनिधामस्याकिञ्चित्करत्वम्, न कार्यकारित्वमिति भावः। संनियोगशिष्टन्यायस्त्वेक-वाक्यतास्थल एव, नैकाध्यायादिगतत्वेऽपि; अतिप्रसङ्गादित्यनुसन्धेयम्। अन्यत् सपष्टम्। प्राणपदस्य ब्रह्मपरत्वं तु–अधिकरणत्रये निर्धारितम्–अस्मिन्, एतत्पादान्ते "प्राणस्तथानुगमात्" इत्यधिकरणे, कम्पनाधिकरणे च प्रथमतृतीयपादे। तत्रान्त्येऽस्पष्टब्रह्मलिङ्गत्वं निर्विशेषपरत्वं च। द्वितीये तु लिङ्गबहुत्वेन सन्देहानिवृत्तिरित्यादिकं तत्रैव व्यक्तीभविष्यति।।२३।। इति नवमं प्राणाधिकरणम्।।

अत्रानुसन्धेयानि प्राकरणिकानि वाक्यानि प्रकृताधिकरणोपयुक्तानीमान्येव। इदमाम्नायते छान्दोग्ये तृतीयाध्याये द्वादशत्रयोदशखण्डयोः–"गायत्री वा इदं सर्वं भूतं यदिदं किञ्च वाग्वै गायत्री वाग्वा इदं सर्वं भूतं गायति च त्रायते च।।१।। या वै सा गायत्रीयं वाव सा येयं पृथिव्यस्यां हीदं सर्वं भूतं प्रतिष्ठितमेतामेव नातिशीयते।।२।। या वै सा पृथिवीयं वाव सा यदिदमस्मिन् पुरुषे शरीरमस्मिन् हीमे प्राणाः प्रतिष्ठिता एतदेव नातिशीयन्ते।।३।। यद्वै तत्पुरुषे शरीरमिदं वाव तदिदमस्मिन्नन्तः पुरुषे हृदयमस्मिन् हीमे प्राणाः प्रतिष्ठिता एतदेव नातिशीयन्ते।।४।। सैषा चतुष्पदा षट्पदा गायत्री तदेतदृचाभ्युक्तम्।।५।। तावानस्य महिमा ततो ज्यायांश्च पुरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवीति।।६।। यद्वै तद् ब्रह्मेतीदं वाव तद्योऽयं बहिर्धा पुरुषादाकाशो यो वै स बहिर्धा पुरुषादाकाशः।।७।। अयं वाव स योऽयमन्तः पुरुष आकाशो यो वै सोऽन्तः पुरुष आकाशः।। अयं वाव स योऽयमन्तर्हृदय आकाशस्तदेतत्पूर्णमप्रवर्ति पूर्णामप्रवर्तिनीं श्रियं लभते य एवेदं वेद।।९।। इत्येकादशः खण्डः।। तस्य ह वा एतस्य हृदस्य पञ्च देवसुषयः स योऽस्य प्राङ् सुषिः स प्राणस्तच्चक्षुः स आदित्यस्तदेतत्तेजोऽन्नाद्यमित्युपासीत तेजस्व्यन्नादो भवति य एवं वेद।।१।। अथ योऽस्य दक्षिणः सुषिस्स व्यानस्तच्छ्रोत्रं स चन्द्रमाः तदेवत् श्रीश्च यशश्चेत्युपासीत श्रीमान् यशस्वी भवति य एवं वेद।।२।। अथ योऽस्य प्रत्यङ् सुषिः सोऽपानः सा वाक् सोऽग्निस्तदेतद् ब्रह्मवर्चसमन्नाद्यमित्युपासीत ब्रह्मवर्चस्व्यन्नादो भवति य एवं वेद।।३।। अथ योऽस्योदङ् सुषिस्समानस्स पर्जन्यस्तदेतत्मीर्तिश्च व्युष्टिश्चेत्युपासीत कीर्तिमान् व्युष्टिमान् भवति य एवं वेद।।४।। अथ योऽस्योर्ध्वः सुषिस्स उदानस्स वायुः स आकाशस्तदेतदोजश्च महश्चेत्युपासीतौजस्वी महस्वान् भवति य एवं वेद।।५।। ते वा एते पञ्च ब्रह्मपुरुषाः स्वर्गस्य

लोकस्य द्वारपान् वेद॥६॥ अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्टेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिस्तस्यैषा दृष्टिः॥७॥ यत्रैतदस्मिन् शरीरे संस्पर्शेनोष्णिमानं विजानाति, तस्यैषा श्रुतिर्यत्रैतत्कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत उपश्रृणोति तदेतद् दृष्टं च श्रुतं चेत्युपासीत चक्षुष्यः श्रुतो भवति य एवं वेद य एवं वेद॥८॥ इति त्रयोदशखण्डः इति। *ज्योतिश्चरणाभिधानात्*॥ ज्योतिः पदं परब्रह्मपरम्, चरणाभिधानात्=पादत्रयाभिधानात्, पादत्रयात्मकब्रह्माभिधायकयच्छब्दसमानाधिकृतत्वादिति यावत्, इति सूत्रार्थः॥

अत्र विचारणीयवाक्यं हि–"अथ यदतः परो दिवो ज्योति" रिति। तत्र पूर्वाधिकरणयोस्संनिधिपाठमप्यनादृत्य वाक्यशेषवशेनैव वाक्यार्थनिर्णय इति निर्धारितम्, इति तन्न्यायात्–"तस्यैषा दृष्टिः", "तस्यैषा श्रुति" रिति वाक्यशेषस्य ब्रह्मण्यन्वयायोगात् कौक्षेयेऽन्यस्मिन् वा तेजस्येव संभवात् तेजः परत्वमिति पूर्वत्र ब्रह्मलिङ्गादिवात्र तेजोलिङ्गात् निर्णय इति दृष्टान्तसङ्गतिः, अथवाऽऽक्षेपः॥

न हि स्ववाक्य एव ब्रह्मलिङ्गवदत्र चरणाभिधानं विषयवाक्ये दृश्यते। 'त्रिपादस्यामृतं दिवी' ति पूर्वत्र सप्तमी, अत्र तु "परो दिव" इति पञ्चमीति न तदर्थस्य प्रत्यभिज्ञानमपि। "गायत्री" वेत्यादिकं तु छन्दः प्रकरणमेव, न ब्रह्मप्रकरणमिति न तस्यानुवृत्तिरपीति न सिद्धान्तयुक्तीनां चरणाभिधानादीनामत्र संभव इति पूर्वपक्षाशयः। अत्रेयं भामत्याः पूर्वपक्षकारिका–

औत्सर्गिकत्वाद्वाक्यस्थतेजोलिङ्गोपलम्भनात्।
वाक्यान्तरेणनियमात् तदर्थाप्रतिसन्धितः॥

इति। अत्र ज्योतिः पदेन तेजो विवक्षितमिति पूर्वेणान्वयः। औत्सर्गिकत्वाद् इत्यस्य मुख्यग्रहस्येत्यनेन सम्बन्धः। विषयसंशयनिर्देशपूर्वकमुक्तं पूर्वपक्षं निर्दिशति भाष्यकारः–*इदमामनन्तीत्यादिना–प्राकृतं ज्योतिरिह ग्राह्यमित्यन्तेन*॥ तत्र विषयवाक्यं निर्दिशति–*इदमामनन्तीत्यादिना–ज्योतिरित्यन्तेन*॥ संशयं निर्दिशति–*तत्रेत्यादिना*॥ पूर्वपक्षं प्रतिजानीते–*आदित्यादिकमिति*॥ आदिशब्देनाग्न्यादितेजो गृह्यते। मुख्यग्रहणस्यौत्सर्गिकत्व-रूपप्रथमयुक्तिं संगृह्योपपादयति–*प्रसिद्धेरित्यादिना*॥ न केवलं ज्योतिः शब्दे, किन्तु दीप्यतेशब्देऽपि मुख्यार्थबाधापत्तिरन्यथेत्याह–*तथा दीप्यत इति*॥ दिवः पर इति द्युमर्यादत्वमपि मुख्यं तेजः परत्व एवेत्याह– *न हीति*॥ दिवः परत्वं कार्यज्योतिषि यद्यपि बाधितम्; तथाप्यत्रिवृत्कृतं तेजो विवक्ष्यत इति न दोष इत्याह–*अस्तु तर्हीति*॥ निरस्यति–*नेति*॥

कौक्षेयज्योतिः सारूप्येणाप्यादित्यादित्यादीनामेव ग्रहणमित्याह–*इदं वाव तद्यदिदमिति*।। वाक्यस्थतेजोलिङ्गोपलम्भं दर्शयति–*तस्यैषेति*।। वाक्यान्तरणानियममाह–*न च पूर्वस्मिन्निति*।। वाक्यान्तरस्य ब्रह्मपरत्वाभावेन वाक्यान्तरेणानियम उक्तः, वाक्यान्तरे ब्रह्मविवक्षायामपि न तदर्थस्य प्रत्यभिज्ञानमिति कारणाद् न वाक्यान्तरेण नियम इत्याह–*अथापीत्यादिना*।। पूर्वपक्षमुपसंहरति–तस्मादिति।। सन्दंशन्यायेन ज्योतिःपदस्य ब्रह्मपरत्वं व्यवस्थापयन् पूर्वतनप्रकरणस्य ब्रह्मपरत्वमाह–*पूर्वस्मिन्निति*।। अथोपरितनप्रकरणस्यापि ब्रह्मपरत्वमाह–*परस्यामपीति*।। शाण्डिल्यविद्यायाम्="इति ह स्माह शाण्डिल्य" इत्युपसंह्रियमाणायां "सर्वं खल्वि" त्यादिना प्रवृत्तायां विद्यायामित्यर्थः। "सर्वं खल्विदमि" त्यादिकं तु मनोमयादिशब्दघटितमपि ब्रह्मपरमेवेत्युत्तरत्र विशदीभविष्यतीति भावः। तस्मात्–पूर्वोत्तरप्रकरणयोर्ब्रह्मप्रकरणत्वात्, अत्रापि–"अथ यदतः परो दिवो ज्योतिरि" ति त्रिपाद्ब्रह्मण एव विवक्षणाच्चेत्यर्थः। "अथ यदतः परो दिवो ज्योतिरि" ति यच्छब्दश्रवणाद् यच्छब्दस्य तच्छब्दावधिकार्थप्रतिद्योतकत्वात्–"त्रिपादस्यामृतं दिवी" ति निर्दिष्टस्यैवात्र प्रत्यभिज्ञायमानस्य ज्योतिः पदेन ग्रहणमिति भावः।।

सर्वनाम प्रसिद्धार्थं प्रसाध्यार्थविघातकृत्।
प्रसिद्ध्यपेक्षि सत् पूर्ववाक्यस्थमपकर्षति।।

इति च भामती। पूर्वोत्तराकाशप्राणशब्दयोः केवलब्रह्मपरत्वम्, न त्वाकाशाद्युपहितब्रह्मपरत्वम्, अत्र तु तेजउपाधिक *कथमित्यादिना*।। *यच्छब्देनेति*।। यच्छब्देन "त्रिपादस्यामृतं दिवी" त्यस्यैवोपस्थपनात त्रिपादब्रह्मणो न केवलं प्रकरणम्, किन्तु वाक्यमप्युपस्थापकमिति भावः। तदेतदाह–*ब्रह्मणि स्वसामर्थ्येन परामृष्ट इति*।। एतावता "गायत्री वे" ति प्रकरणस्य ब्रह्मप्रकरणत्वं सिद्धवत्कृत्य सिद्धान्त आक्षिप्तः, सांप्रतमाशङ्कासमाधानाभ्यां तदुपपादयति सूत्रकारः–*छन्दोऽभिधानादित्यादिना*।। "गायत्री वे" ति प्रकरणस्य तदुपहितब्रह्मपरत्वं "तथा चेतोऽर्पणनिगदात्तथाहि दर्शनम्" इति सूत्राशेनोत्तरसूत्रेण च व्यवस्थापयति। अन्यत् सर्व स्पष्टार्थम्।। ज्योतिः पदस्य ब्रह्मपरत्वमस्मिन्नधिकरणे, द्वितीयपादे तत्समानार्थकवैश्वानरपदस्य ब्रह्मपरत्वम्, तृतीयपादे "ज्योतिर्दर्शनादि" त्यत्र ब्रह्मपरत्वमिति स्थलत्रये निर्धारितम्। तेषामपौनरुक्तयं तु तत्रैव व्यक्तीभविष्यति।।२८।।

इति प्रदीप दशमं ज्योतिरधिकरणम् समाप्तम्।।

भामती

इदमामनन्ति–'अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिः' इति यज्ज्योतिरतो दिवो द्युलोकात्परं दीप्यते प्रकाशते विश्वतः पृष्ठेषु विश्वेषामुपरि। असङ्कुचद्वृत्तिरयं विश्वशब्दोऽनवयवेन संसारमण्डलं ब्रूत इति दर्शयितुमाह *सर्वतः पृष्ठेषूत्तमेषु*। न चेदमुत्तममात्रमपि तु सर्वोत्तममित्याह *अनुत्तमेषु*। नास्त्येभ्योऽन्य उत्तम इत्यर्थः। 'इदं वाव तद्यदिदमस्मिन् पुरुषेऽन्तर्ज्योतिस्त्वग्ग्राह्येण शारीरेणोष्मणा श्रोत्रग्राह्येण च पिहितकर्णेन पुंसा घोषेण लिङ्गेनानुमीयते'। तत्र शारीरस्योष्मणस्त्वचा दर्शनं दृष्टिः, घोषस्य च श्रवणं श्रुतिः, तयोश्च दृष्टिश्रुती ज्योतिष एव, तल्लिङ्गेन तदनुमानादिति।

अत्र संशयः–किं ज्योतिः शब्दं तेज उत ब्रह्मेति? किं तावत् प्राप्तं? तेज इति। कुतः? मुख्यग्रहणविषये मुख्यग्रहणस्य–

औत्सर्गिकत्वाद्वाक्यस्थतेजोलिङ्गोपलम्भनात्।
वाक्यान्तरेणानियमात्तदर्थाप्रतिसन्धितः॥

बलवद्बाधकोपनिपातेन खल्वाकाशप्राणशब्दौ मुख्यार्थत्वात् प्रच्याव्यान्यत्र प्रतिष्ठापितौ। तदिह ज्योतिष्पदस्य मुख्यतेजोवचनत्वे बाधकस्तावत् स्ववाक्यशेषो नास्ति। प्रत्युत तेजोलिङ्गमेव दीप्यत इति। कौक्षेयज्योतिः सारूप्यं च चक्षुषो रूपवान् श्रुतो विश्रुतो भवतीत्यल्पफलत्वं च स्ववाक्ये श्रूयते। न जातु ज्वलनापरनामा दीप्तिर्विना तेजो ब्रह्मणि सम्भवति। न कौक्षेयज्योतिः सारूप्यमृते बाह्यात्तेजसो ब्रह्मण्यस्ति। न चौष्ण्यघोषलिङ्गदर्शनश्रवणमौदर्य्यात्तेजसोऽन्यत्र ब्रह्मण्युपपद्यते। न च महाफलं ब्रह्मोपासनमणीयसे फलाय कल्पते। औदर्य्ये तु तेजस्यध्यस्य बाह्यं तेज उपासनमेतत्फलानुरूपं युज्यते। तदेतत्तेजोलिङ्गम्। एतदुपोद्बलनाय च निरस्तमपि मर्य्यादाधारवत्त्वमुपन्यस्तम्। इह तन्निरासकारणाभावात्। न च मर्य्यादावत्त्वं तेजोराशेर्न सम्भवति, तस्यं सौर्य्यादेः सावयवत्वेन तदेकदेशमर्य्यादासम्भवात्। तस्य चोपास्त्वेन विधानात्। ब्रह्मणस्त्वनवयवस्यावयवोपासनानुपपत्तेः। अवयवकल्पनायाञ्च सत्यां गतावनवकल्पनात्। न च 'पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि'

इति ब्रह्मप्रतिपादकं वाक्यान्तरं यदतः परो दिवो ज्योतिरिति ज्योतिः शब्दं ब्रह्मणि व्यवस्थापयंतीति युक्तम्। न हि सन्निधानमात्राद् वाक्यान्तरेण वाक्यान्तरगता श्रुतिः शक्या मुख्यार्थाच्च्यावयितुम्।

न च वाक्यान्तरेऽधिकरणत्वेन द्यौः श्रुता दिव इति मर्य्यादाश्रुतौ शक्या प्रत्यभिज्ञातुम्। अपि च वाक्यान्तरस्यापि ब्रह्मार्थत्वं प्रसाध्यमेव नाद्यापि सिध्यति तत् कथं तेन नियंतुं ब्रह्मपरतया यदतः पर इति वाक्यं शक्यम्। तस्मात्तेज एव ज्योतिर्न ब्रह्मेति प्राप्तम्। तेजः कथनप्रस्तावे तमः कथनं प्रतिपक्षोपन्यासेन प्रतिपक्षान्तरे दृढा प्रतीतिर्भवतीत्येतदर्थम्। चक्षुर्वृत्तेर्निरोधकमित्यर्थावरकत्वेन।

आक्षेप्ताऽऽह *ननु कार्य्यस्यापि इति*। समाधातैकदेशी ब्रूते *अस्तु तर्हि इति*। यत्तेजो-बन्नाभ्यामसंपृक्तं तदत्रिवृत्कृतमुच्यते। आक्षेप्ता दूषयति *न इति*। न हि तत् क्वचिदप्युपयुज्यते सर्वास्वर्थक्रियासु त्रिवृत्कृतस्यैवोपयोगादित्यर्थः।

एकदेशिनः शङ्कामाह *इदमेव इति*। आक्षेप्ता निराकरोति *न, प्रयोजनान्तर इति*। एकैकां त्रिवृतंत्रिवृतं करवाणीति तेजः प्रभृत्युपासनामात्रविषया श्रुतिर्न सङ्कोचयितुं युक्तेत्यर्थः। एवमेकदेशिनि दूषिते परमसमाधाता पूर्वपक्षी ब्रूते। *अस्तु तर्हि त्रिवृत्कृतमेव इति*। *भागिनी युक्ता*। यद्यप्याधारबहुत्वश्रुतिर्ब्रह्मण्यपि कल्पितोपाधिनिबन्धना कथञ्चिदुपपद्यते। तथापि यथा कार्य्ये ज्योतिष्यतिशयेनोपपद्यते न तथाऽत्रेत्यत उक्तम् *उपपद्यतेतराम् इति*। *प्राकृतं*। प्रकृतेर्जातं, कार्यमिति यावत्। एवं प्राप्ते, उच्यते–

सर्वनाम प्रसिद्धार्थ प्रसाध्यार्थविघातकृत्।
प्रसिद्ध्यपेक्षि सत्पूर्ववाक्यस्थमपकर्षति॥
तद्बलात् तेन नेयानि तेजोल्लिङ्गान्यपि ध्रुवम्।
ब्रह्मण्येव प्रधानं हि ब्रह्मच्छब्दो न तत्र तु॥

औत्सर्गिकं तावद्यदः प्रसिद्धार्थानुवादकत्वं यद्विधिविभक्तिमप्यपूर्वार्थावबोधन-स्वभावात्प्रच्यावयति। यथा यस्याहिताग्नेरग्निर्गृहान् दहेत् यस्योभयं हविरार्त्तिमार्च्छेदिति। यत्र पुनस्तत्प्रसिद्धमन्यतो न कथञ्चिदाप्यते, तत्र वचनानि त्वपूर्वत्वादिति सर्वनाम्नः प्रसिद्धार्थत्वं वलादपनीयते। यथा यदाग्नेयोऽष्टाकपालो भवतीति। तदिह यदतः परो दिवो ज्योतिरिति यच्छब्दसामर्थ्याद् द्युमर्य्यादेनापि ज्योतिषा प्रसिद्धेन भवितव्यम्। न च तस्य प्रमाणान्तरतः प्रसिद्धिरस्ति। पूर्ववाक्ये च द्युसम्बन्धि त्रिपाद् ब्रह्मप्रसिद्धमिति प्रसिद्ध्यपेक्षायां तदेव सम्बध्यते। न च प्रधानस्य प्रातिपदिकार्थस्य तत्त्वेन प्रत्यभिज्ञाने तद्विशेषणस्य विभक्त्यर्थस्यान्यतामात्रेणान्यता युक्ता।

एवं च स्ववाक्यस्थानि तेजोलिङ्गान्यसमञ्जसानीति ब्रह्मण्येव गमयितव्यानि, गमितानि च भाष्यकृता। तत्र ज्योतिर्ब्रह्मविकार इति ज्योतिषा ब्रह्मैवोपलक्ष्यते। अथ वा प्रकाशमात्रवचनो ज्योतिः शब्दः, प्रकाशश्च ब्रह्मणि मुख्यः, इति ज्योतिर्ब्रह्मेति सिद्धम्। *प्रकृतहानाप्रकृतप्रक्रिये इति*। प्रसिद्ध्यपेक्षायां पूर्ववाक्यगतं प्रकृतं सन्निहितमप्रसिद्धं तु कल्प्यं न प्रकृतम्। अत एवोक्तं *कल्पयत इति*। सन्दंशन्यायमह *न केवलम् इति*। *परस्यापि ब्रह्मणो नामादिप्रतीकत्ववद् इति*। कौक्षेयं हि ज्योतिर्जीवभावेनानुप्रविष्टस्य परमात्मनो विकारः, जीवाभावे देहस्य शैत्यात्, जीवतश्चौष्ण्याज्ज्ञायते। तस्मात्तत्प्रतीकस्योपादानमुपपन्नम्। शेषं निगदव्याख्यातं भाष्यम्।।२४।।

पूर्ववाक्यस्य हि ब्रह्मार्थत्वे सिद्धे स्यादेतदेवं, न तु तदब्रह्मार्थमपि तु गायत्र्यर्थम्। 'गायत्री वा इदं सर्वं भूतं यदिदं किञ्च' इति गायत्रीं प्रकृत्येदं श्रूयते 'त्रिपादस्यामृतं दिवि' इति।

नन्वाकाशस्तल्लिङ्गादित्यनेनैव गतार्थमेतत्। तथाहि। तावानस्य महिमेत्यस्यामृचि ब्रह्म चतुष्पादुक्तम्। सैव च तदेतदृचाभ्यनूक्तमित्यनेन सङ्गमिता ब्रह्मलिङ्गम्। एवं गायत्री वा इदं सर्वमित्यक्षरसन्निवेशमात्रस्य गायत्र्या न सर्वत्वमुपपद्यते, न च भूतपृथिवीशरीरहृदयवाक्प्राणात्मत्वं गायत्रयाः स्वरूपेण सम्भवति। न च ब्रह्मपुरुषसम्बन्धित्वमस्ति गायत्रयाः। तस्माद्गायत्रीद्वारा ब्रह्मण एवोपासना न गायत्रया इति पूर्वेणेव गतार्थत्वादनारम्भणीयमेतत् न च पूर्वन्यायस्मारणे सूत्रसन्दर्भ एतावान् युक्तः।

अत्रोच्यते—अस्त्यधिकशङ्का। तथाहि—गायत्रीद्वारा ब्रह्मोपासनेति कोऽर्थः। गायत्रीविकारोपाधिनो ब्रह्मण उपासनेति। न च तदुपाधिनस्तदवच्छिन्नस्य सर्वात्मत्वम्, उपाधेरवच्छेदात्। न हि घटावच्छिन्नं नभोऽनवच्छिन्नं भवति। तस्मादस्य सर्वात्मत्वादिकं स्तुत्यर्थं, तद्वरं गायत्रया एवास्तु स्तुतिः कयाचित् प्रणाडया 'वाग्वै गायत्री वाग्वा इदं सर्वं भूतं गायति च त्रायति च' इत्यादिश्रुतिभ्यः। तथा च 'गायत्री वा इदं सर्वम्' इप्युपक्रमे गायत्रया एव हृदयादिभिर्व्याख्या, व्याख्याय च 'सैषा चतुष्पदा षड्विधा गायत्री इत्युपसंहारो गायत्र्यामेव समञ्जसो भवति। ब्रह्मणि तु सर्वमेतदसमञ्जसमिति यद्वेतद् ब्रह्मेति च ब्रह्मशब्दच्छन्दोविषय एव, यथैतां ब्रह्मोपनिषदमित्यत्र वेदोपनिषदुच्यते। तस्माद्गायत्रीच्छन्दोऽभिधानान्न ब्रह्मविषयमेतदिति प्राप्तम्।

एवं प्राप्तेऽभिधीयते। *न* कुतः? *तथा चेतोऽर्पणनिगदात्*। गायत्र्याख्यच्छन्दोद्वारेण गायत्रीरूपविकारोनुगते ब्रह्मणि चेतोऽर्पणं चित्तसमाधानमनेन ब्राह्मणवाक्येन निगद्यते। एतदुक्तं भवति—न गायत्री ब्रह्मणोऽवच्छेदिका, उत्पलस्येव नीलत्वं, येन तदवच्छिन्नमन्यत्र न

स्यादवच्छेदविरहात्। किंन्तु यदेव तद् ब्रह्म सर्वात्मकं सर्वकारणं तत्स्वरूपेणाशक्योपदेशमिति तद्विकारगायत्रीद्वारेणोपलक्ष्यते। गायत्र्याः सर्वच्छन्दो व्याप्त्या च सवनत्रयव्याप्त्या च द्विजातिद्वितीयजन्मजननी तया च श्रुतेर्विकारेषु मध्ये प्राधान्येन द्वारत्वोपपत्तेः। न चात्रोपलक्षणाभावेन नोपलक्ष्यं प्रतीयते, न हि कुण्डलेनोपलक्षितं कण्ठरूपं कुण्डलवियोगेऽपि पश्चात्प्रतीयमानमप्रतीयमानं भंवति। तद्रूपप्रत्यायनमात्रोपयोगित्वादुपलक्षणानामनवच्छेदकत्वात्।

तदेवं गायत्रीशब्दस्य मुख्यार्थत्वे गायत्र्या ब्रह्मोपलक्ष्यत इत्युक्तं, सम्प्रति तु गायत्रीशब्दः संख्यासामान्याद्गौण्या वृत्त्या ब्रह्मण्येव वर्त्तत इति दर्शयति *अपर आह इति*। तथाहि–षडक्षरैः पादैर्यथा गायत्री चतुष्पदा एवं ब्रह्मापि चतुष्पाद्। सर्वाणि हि भूतानि स्थावरजङ्गमान्यस्यैकः पादः। दिवि द्योतनवति चैतन्यरूपे स्वात्मनीति यावत्। त्रयः पादाः। अथवा दिव्याकाशे त्रयः पादाः। तथाहि श्रुतिः–इदं बाव तद्योऽयं बहिर्धा पुरुषादाकाशतस्तद्धि तस्य जागरितस्थानं जाग्रत् खल्वयं बाह्यान् पदार्थान् वेद तथाऽयं वाव स योऽयमन्तः पुरुष आकाशः' शरीरमध्य इत्यर्थ, 'तद्धि तस्य स्वप्नस्थानं तथाऽयं वाव स योऽयमन्तर्हृदय आकाशः' हृदयपुण्डरीक इत्यर्थः, तद्धि तस्य सुषुप्तिस्थानम्। तदेतत् 'त्रिपादस्यामृतं दिवि' इत्युक्तम्। तदेवं चतुष्पात्त्वसामान्यादगायत्रीशब्देन ब्रह्मोच्यते इति। *अस्मिन् पक्षे ब्रह्मै वाभिहितम् इति*। ब्रह्मपरत्वादभिहितमित्युक्तम्।।२५।।

षड्विधा इति। भूतपृथिवीशरीरहृदयवाक्प्राणा इति षट् प्रकारा गायत्रयाख्यस्य ब्रह्मणः श्रूयन्ते–"पञ्च ब्रह्मपुरुषा इति च हृदयसुषिषु ब्रह्मपुरुषश्रुतिर्ब्रह्मसम्बन्धितायां विवक्षितायां संभवति"। अस्यार्थः–हृदयस्यास्य खलु पञ्च सुषयः, पञ्च छिद्राणि। तानि च देवैः प्राणादिभी रक्ष्यमाणानि स्वर्गप्राप्तिद्वाराणीति देवसुषयः। तथाहि, हृदयस्य यत् प्राङ्मुखं छिद्रं तत्स्थो यो वायुः स प्राणस्तेन हि प्रायणकाले सञ्चरते स्वर्गलोकं, स एव चक्षुः स एवादित्य इत्यर्थः। 'आदित्यो ह वै, बाह्यः प्राणः' इति श्रुतेः। अथ योऽस्य दक्षिणः सुषिस्तत्स्थो वायुविशेषो व्यानः। तत्सम्बद्धं श्रोत्रं तच्चन्द्रमाः। 'श्रोत्रेण सृष्टा दिशश्चन्द्रमाश्च' इति श्रुतेः। अथ योऽस्य प्रत्यङ्मुखः सुषिस्तत्स्थो वायुविशेषोऽपानः स च वाक् तत्सम्बन्धात्, वाक् चाग्निरिति। 'वाग्वा अग्नि' इति श्रुतेः। अथ योऽस्योदङ्मुखः सुषिस्तत्स्थो वायुविशेषः स समानः, तत्सम्बद्धं मनः, तत्पर्जन्यो देवता। अथ योऽस्योर्ध्वः सुषिस्तत्स्थो वायुविशेषः स उदानः। पादतलादारभ्योर्ध्वं नयनात् स वायुस्तदाधारश्चाकाशो देवता। ते वा एते पञ्च सुषयः। तत्सम्बद्धाः पञ्चहार्दस्य ब्रह्मणः पुरुषा न गायत्रयामक्षरसन्निवेशमात्रे सभवन्ति, किन्तु ब्रह्मण्येवेति।।२६।।

यथा लोके इति। यदाधारत्वं मुख्यं दिवस्तदा कथञ्चिन्मर्य्यादा व्याख्येया। यो हि श्येनो वृक्षाग्रे वस्तुतोऽस्ति स च ततः परोऽप्यस्त्येव। अर्वाग्भागातिरिक्तमध्यपरभागस्थस्य तस्यैव वृक्षात्परतोऽवस्थानात्। एवं च बाह्यद्युभागातिरिक्तशरीरहार्दद्युभागस्थस्य ब्रह्मणो बाह्याद् द्युभागात् परतोऽवस्थानमुपपन्नम्। यदा तु मर्य्यादैव मुख्यतया प्राधान्येन विवक्षिता तदा लक्षणयाऽऽधारत्वं व्याख्येयम्। यथा गङ्गायां घोष इत्यत्र सामीप्यादिति। तदिदमुक्तम् *अपर आह इति*। अत एव दिवः परमपीत्युक्तम्॥२७॥

इति भामती दशमं ज्योतिराधिकरणम् समाप्तम्॥

श्री कण्ठभाष्य

अत एव प्राणः॥२४॥

इत्यादिश्रुतेश्च, प्राणाकाशयोरपि सकलभूतकारणत्वावगमात् तावेवात्र प्रतिपाद्यौ॥ इति प्राप्ते ब्रूमः-प्राणाकाशशब्दवाच्यः परमेश्वर एव, सर्वकारणत्वादितल्लिङ्गात्। न ह्यनयोः सर्वकारणत्वादिकं संभवति। तत्रानन्दरूपस्य ब्रह्मणः कारणत्ववादे तात्पर्यं 'प्राणाद्ध्येव खलु' इत्यादिश्रुतेः, न प्राणस्य कारणत्ववादे, किंत्वनुवादमात्रम्। आकाशस्य भूतान्तर्वर्तितया सर्वशब्देन ग्रहणात्, सर्वश्रूतोत्पत्तिः 'आत्मन आकाशस्संश्रूतः' इति श्रुत्या परमेश्वरादेव। तस्मात् सर्वश्रूतकारणत्वं न भूताकाशप्राणयोरिति सिद्धान्तः॥ ननु भूताकाश इत्युपपदग्रहणेन किमिति चेत्-परमाकाशस्य परप्रकृतिरूपस्य सर्वभूतकारणत्वसद्भावात् सप्रयोजनम्। तर्हि परमेश्वर इति कथं निर्णयः? तदभेदात्, इति सिद्धम्॥

इत्याकाशाधिकरणप्राणाधिकरणे॥९॥१०॥

अथ ज्योतिरधिकरणम्॥११॥

पूर्वं निखिलभुवननाकस्य निरस्तसमस्तदोषवासनाकलङ्कस्य निरतिशयमाङ्गल्यरत्नाकरस्य उमापतेः परब्रह्मणः आदित्यमण्डलमास्पदमिति निरूपितम्। तदिह तस्य स्थानान्तरमुच्यते-

ज्योतिश्चरणाभिधानात्॥२५॥

छान्दोग्ये श्रूयतेऽस्य विषयः 'अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिः' इत्यादि॥ अत्र सकललोकव्यापितया दिवि श्रूयमाणं परं ज्योतिः परमेश्वरो वा तदन्यो वेति संशयः॥ द्युशब्दस्याकाशवाचित्वात् 'परो दिवः' इत्याकाशवर्ती सूर्य एवात्र प्रतिपाद्यते ज्योतिरिति। अथवा 'अन्तः पुरुषे ज्योतिः' इति पुरुषान्तर्वर्तितया जाठरोऽग्निरिति पूर्वपक्षः॥ सिद्धान्तस्तु 'परो दिवो ज्योतिः' इति सर्वोत्तरं परं ज्योतिः परमेश्वर एव। पूर्वत्र 'पादोऽस्य सर्वा श्रूतानि' इति ज्योतिषोऽस्यैकांशतया *विश्वश्रूतानामभिधानात्। नैतत् संभवति जाठराग्निसूर्ययोः, परिच्छिन्नत्वात्॥

पूर्वं 'गायत्री वा इदं सर्वं भूतं' इति सर्वात्मकतया गायत्री प्रतिपाद्यते। प्रकरणात् तदेकांशत्वमेष प्रपञ्चस्य 'पादोऽस्य सर्वाभूतानि' इतिश्रुतिरोहत्य आह **छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगताद् तथा हि दर्शनम्॥२६॥**

पूर्वं 'गायत्री वा इदं सर्वं भूतं' इति छन्दसोऽभिधानात् तस्यैवात्राभिधानं न परमेश्वरस्य इति चेत्-नैतत् संभवति गायत्र्याख्यस्य छन्दोमात्रस्य सर्वभूतात्मकत्वं, किंतु गायत्रीसादृश्यानुसंधानोपदेशः परमेश्वरस्य क्रियते, यथा गायत्री षडक्षरैश्चतुर्भिः पादैश्चतुष्पदा तथा ब्रह्मापि चतुष्पादिति। तथा ह्यन्यत्रापि छन्दोऽभिधायी शब्दः सादृश्यादर्थान्तरे प्रयुज्यमानो दृश्यते, यथा संवर्गविद्यायां 'ते वा एते पञ्चान्ये दश सन्तस्तत्कृतम्' इत्युपक्रम्य 'सैषा विराट्' इत्युक्तम्। तथा च सर्वात्मकतया परमेश्वरस्य लिङ्गेन गायत्रीप्रकरणबाधः। अतः परमेश्वर एव ज्योतिरिति॥

भूतादिपादव्यपदेशोपपत्तेश्चैवम्॥२७॥

श्रूतपृथिवीशरीरहृदयैश्चतुष्पदेति व्यपदेशो न गायत्र्याख्ये छन्दस्युपपद्यते, परमेश्वर एवोपपद्यते॥

इति श्रीकण्ठभाष्यम् दशमं ज्योतिरधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

अत एव प्राण:॥२४॥ इदं सूत्रद्वयमधिकरणद्वयार्थम्। तत्रोत्तराधिकरणं पूर्वाधिकरणन्यायातिदेशार्थम्। अत:पूर्वपक्षसिद्धान्तैकरूप्याद्युगपद्धिकरणद्वयोपन्यासार्थं सूत्रद्वयं युगपल्लिखितम्। तथैव विषयवाक्यद्वयमप्युदाहरति-**छान्दोग्य इति।** श्रुत्यनन्यथासिद्धलिङ्गाभ्यां लिङ्गान्यथासिद्ध्यनन्यथासिद्धिभ्यां वा पूर्वोत्तरपक्षकोटिद्वयमित्यभिप्रेत्य संशयं दर्शयति-**अत्रेति।** इयमिह विषयशुद्धि:। दाल्भ्यशालावत्यजैवलिभिस्त्रिभिरारब्धायां वादकथायां प्रथमं शालावत्यदाल्भ्ययो: प्रश्नोत्तरपरम्परा प्रसृता 'का साम्नो गतिरिति स्वरइति होवाच स्वरस्य का गतिरिति प्राण इति होवाच प्राणस्य का गतिरिति अन्नमिति होवाच अन्नस्य का गतिरिति आप इति होवाच अपां का गतिरिति असौ लोक इति होवाच अमुष्य लोकस्य का गतिरिति न स्वर्गं लोकमतिनयेदिति होवाचे'ति। एवं दाल्भ्येन स्वर्गलोके सामगतिपरम्पराविश्रान्तिभूमित्वेन स्थापिते तस्य पक्ष: शालावत्येन दूषित: 'अप्रतिष्ठं वै किल ते दाल्भ्य सामे'ति। स्वर्गस्य मनुष्यकृतयज्ञाद्यधीनस्थितिकत्वात् सामगतिपरम्परा प्रतिष्ठारूपे वस्तुनि न समापितेत्यप्रतिष्ठितं साम स्यादित्यर्थ:। एवं दूषितस्वपक्षतया शिष्यभावं प्राप्तस्य दाल्भ्यस्य शालावत्यस्य च प्रश्नद्वयमुत्तरद्वयं च प्रकृत 'ममुष्य लोकस्य का गतिरिति अयं लोक इति होवाच अस्य लोकस्य का गतिरिति न प्रतिष्ठां लोकमतिनयेदिति होवाचे'ति। ततश्शालावत्यस्य पक्षो जैवलिना दूषित: 'अन्तवत्किल ते शालावत्य सामे'ति। एवं शालावत्यस्य सामगतिपरम्पराविश्रान्तिस्थानत्वेन स्वाभिमते पृथिवीलोकेऽन्तवत्त्वेन दूषिते तस्यापि कारणमनन्तं किंचिदसौ जैवलिर्जानाति तत्किमिति जिज्ञासोस्तच्छिष्यभावं प्राप्तस्य तं प्र'त्यस्य लोकस्य का गति'रिति प्रश्ने 'आकाश इति होवाचे'त्युत्तरं श्रूयते। तस्यायं वाक्यशेष: 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाश: परायणं स एष परोवरीयानुद्गीथ: स एषोऽनन्त'इति। तथा उषस्तिनामा कश्चिदृषिर्धनाशया राज्ञो यज्ञं गत्वा स्वस्य ज्ञानवैभवं प्रकटयन्प्रस्तोतारमुवाच प्रस्तोतर्या देवता प्रस्तावभक्तिमनुगता तां चेदविद्वान्मम विदुषस्सन्निधौ प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति। एवमेवोद्गातारं प्रतिहर्तारं चोवाच उद्गीथप्रतिहारभक्त्यनुगतदेवतावेदनं विनोद्गाने प्रतिहरणे च स्वपुरत: क्रियमाणे तयोर्मूर्धा विपतिष्यतीति। ते भीता: कर्मभ्यो विरेमु:। ततो यजमानेनानुनीतो

यावदेभ्यो धनं दद्यास्तावन्मह्यं दद्या इति यजमानं पृष्ट्वा ततो लब्धतावद्धनदानप्रतिश्रवण उषस्तिः तदनन्तरं प्रस्तोत्रा प्रस्तावदेवतां पृष्टः प्राणइत्युपदिश्य तत्र सर्वभूतसंवेशनोद्गमनमुक्त्वा 'सैषा देवता प्रस्तावमन्वायत्ते' त्युपसंजहार। तथोद्गात्रोद्गीथदेवतां पृष्ट आदित्य इत्युपदिश्य 'सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैस्सन्तं गायन्ती' त्युक्त्वा 'सैषा देवतोद्गीथमन्वायत्ते' त्युपसंजहार। एवं प्रतिहर्त्रा प्रतिहारदेवतां पृष्टोऽन्नमित्युपदिश्य 'सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ती' त्युक्त्वा 'सैषा देवता प्रतिहारमन्वायत्ते' त्युपसञ्जहार। तत्राकाशवाक्ये तावदित्थं पूर्वपक्षः। उपक्रमगताभ्यस्ताकाशश्रुतिबलाद्भूताकाश एवायम्। वाक्यशेषगतं तु सर्वभूतकारणत्वश्रवणं तत्रापि योजयितुं शक्यम्। तस्य वाय्वादिसर्वभूतकारणत्वात् स्वस्मिन्नपि स्थलूसूक्ष्मरूपेण कार्यकारणभावसत्त्वाच्च। भूतशब्दस्य 'न हिंस्यात्सर्वभूतानी' त्यत्रेव प्राणिनिकायपरत्वे तत्कारणत्वमाकाशस्य न सम्भवति। चेतनवर्गं प्रति तस्याकारणत्वादिति चेत् सत्यम्। तस्येह पञ्चमहाभूतपरत्वं भविष्यति। एवमन्यथासिद्धं लिङ्गं नोपक्रमगतायाः श्रुतेर्बाधकम्। अनन्यथासिद्धेन हि लिङ्गेन प्राक्पूर्वपक्षे लिङ्गबाध उक्तः। न'न्वाकाश इति होवाचे'त्यतः प्राक् अस्य लोकस्य का गति'रिति प्रश्नवाक्ये सर्वलोककारणत्वं श्रूयते। तत्र लोकशब्दो लोक्यत इति व्युत्पत्त्या प्राणिनिकायपरः। मैवम्। तत्रा'स्य लोकस्ये'ति शब्दः पृथिवीलोकपर इति प्राक् प्रस्तावानुसारेणावगमात्। न च पृथिवीमात्रकारणत्वेनापां प्रसिद्धतया प्रश्नवैयर्थ्यादस्येतिसर्वनाम-श्रुतेर्बलीयस्त्वाच्चायं प्रश्नः सर्वलोकगतिविषय एवेति वाच्यम्। अपां कारणस्य तेजसः प्रसिद्धत्वेऽप्यपां का गतिरिति प्रश्नदर्शनेन तद्वत्पृथिवीकारणेऽपि प्रश्नोपपत्तेः। 'अस्य लोकस्य का गति'रिति प्राग्दाल्भ्यकृतस्य प्रश्नस्य 'न प्रतिष्ठां लोकमतिनयेदिति होवाचे'ति वर्णितोत्तरानुसारेण पृथिवीमात्रकारणविषयत्वसम्प्रतिपत्तेश्च अन्तवत्तवदूषणमुक्तवतस्ते प्रसिद्धविलक्षणमनन्तं कारणमभिमतं तत्किमिति प्रश्नोपपत्तेश्च। अस्येतिपदस्य श्रुतित्वेऽपि सर्वनामस्वाभाव्यात् 'यदेव विद्यया करोती'त्यत्र यत्पदस्येव प्रकृतमात्रे सङ्कुचितवृत्तित्वोपपत्तेश्च। अथापि स्यात् अभिधत्तामयमस्यशब्दः पृथिवीं तथाप्यन्तवत्त्वदोषापनिनीषया प्रश्नप्रवृत्तेः पृथिवीमात्रकारणनिरूपणे तदसिद्धेः छत्रिवदजहल्लक्षणया चेतनाचेतनात्मकसकलकार्यपर इति। मैवम्। प्रश्नवाक्यस्य केवलं पृथिवीकारणविषयत्वेऽपि अनन्ते सर्वकारणेऽपि पृथिवीकारणत्वसत्त्वेन उत्तरस्यानन्तर-सर्वकारणविषयतामात्रेण अन्तवत्त्वदोषापनयनसम्भवेन तदर्थं प्रश्नवाक्ये लक्षणाकल्पनस्यायुक्तत्वात्। नन्वाकाशस्य पृथिवीकारणत्वेन निरूपणेऽन्तवत्त्वदोषो नापनीतः स्यादिति चेत् तर्ह्यनन्तत्वलिङ्गमेव पूर्वपक्षविरोध्याशङ्कनीयं न तु प्रश्नवाक्यास्पृष्टं सर्वलोकगतित्वम्। ननु, तथैवास्तु अनन्तत्व-मन्तवत्त्वदोषापनिनीषया विवक्षितम् उपक्रमोपसंहारपरामृष्टं च बलवदाकाशश्रुतिबाधकं स्यादिति

चेन्नैवम्। प्रतिष्ठात्ववदनन्तत्वस्याप्यपेक्षितत्वोपपत्तेः। दाल्भ्याभिमतस्वर्गलोकोद्भावितप्रतिष्ठितत्वदोषापनिनीषया हि शालावत्येन स्वर्गलोकस्य गतित्वेन स्वोपन्यस्ते पृथिवीलोके प्रतिष्ठात्वमुपन्यस्तम्। न च प्रतिष्ठात्वं निरपेक्षं ब्रह्मणोऽन्यत्र सम्भवति। सापेक्षं तु स्वर्गेऽप्यस्त्येव। तथापि केनचित्प्रकारेण स्वेर्गापेक्षया पृथिव्याः प्रतिष्ठात्वातिशयं विवक्षित्वोद्भावितदोषापनयः समर्थनीयः। एवमनन्तत्वेऽपि भविष्यतीति किमनुपपन्नम्। पृथिव्यपेक्षया बहुकालावर्तिनि भूताकाशे ह्यनन्तत्वमुपचरितुं शक्यम्। 'कदापि न समाप्यतेऽस्य भोजन'मिति बहुकालानुवर्त्तिनि भोजन इव समाप्तिराहित्यम्। तस्मादनन्तत्वलिङ्गं न बाधकम्। 'नन्वाकाशादेव समुत्पद्यन्त' इत्यवधारणेन विवक्षितं सर्वभूतजनने कारणान्तरनैरपेक्ष्यं बाधकं स्यादिति चेन्न। ब्रह्मणोऽप्याकाशवत् कालादृष्टादिकारणान्तरसापेक्षत्वेन साम्यात् कथञ्चिदवधारणसमर्थनस्य भूताकाशेऽपि सम्भवात्। ननु, परोवरीयस्त्वं नाम परेभ्य उत्कृष्टेभ्योऽप्यतिशयेन श्रैष्ठ्यम्। तन्निरतिशयोत्कर्षरूपं स्वानुगुणफलश्रवणरूपतात्पर्यलिङ्गवत्त्वादाकाशश्रुत्यपेक्षया बलवदिति चेन्न। 'परोवरीयसो हि लोकाञ्जयति परोवरीय एव हास्यास्मिँल्लोके जीवनं भवति तथामुष्मिँल्लोक' इति फलवचनस्यैहिकामुष्मिकजीवनसाधारणसापेक्षोत्कर्षविषयत्वेन निरतिशयोत्कर्षविषयत्वाभावात् सापेक्षोत्कर्षस्य भूताकाशेऽपि सम्भवात्। ननु तथाप्यसङ्कुचितसर्वभूतकारणत्वं तथाभूतसर्वभूताधारत्वं सर्वतोज्यायस्त्वं परायणत्वं परोवरीयस्त्वमनन्तत्वमित्येतानि लिङ्गानि च बहूनि ब्रह्मणि स्वारस्यवन्तीति बहुलिङ्गस्वारस्यानुग्रहार्थमाकाशश्रुतेरेकस्याः बाधो युक्तः 'त्यजेदेकं कुलस्यार्थ' इति 'भूयसां स्यात् स्वधर्मत्व'मिति च न्यायादिति चेन्न। 'आत्मार्थे पृथिवीं त्यजे' दिति 'द्रव्यसंस्कारविधेर्द्रव्यं तदर्थत्वा'दिति च ततोऽपि बलवता न्यायेन प्रधानविरोधिनां बहूनामपि गुणानामेव बाधनस्योचितत्वात्। 'अस्य लोकस्य का गति'रिति प्रश्नोत्तरे आकाशस्य गतित्वेन प्रतिपाद्यतया प्रधानत्वादुदाहृतलिङ्गानां तद्विशेषणतया गुणत्वात्। ननु तथापि कांस्यभोजिन्यायेन गुणानुरोधार्थमाकाशश्रुतिश्चिदाकाशपरास्त्विति चेन्न। प्रथमगृहीतव्युत्पत्त्यनुसारेण भूताकाशशक्तस्यैवाकाशशब्दस्या'काशवत्सर्वगतश्च नित्य' इत्यादिश्रुतिदर्शितरीत्या नित्यत्वसर्वगतत्वादिगुणेन चिदाकाशे वृत्त्युपपत्तौ तत्र शक्त्यन्तरकल्पनायां अयुक्तत्वात्प्रधानविरोधे च कांस्यभोजिन्यायानवतारादिति। एवं प्राप्ते सिद्धान्तः। आकाशः परं ब्रह्म सर्वभूतकारणत्वरूपतल्लिङ्गात्। यद्यत्र भूतशब्दो महाभूतपरः यदि वा प्राणिनिकायपरः यदि वा तद्रूढ्योः परस्परव्याघातेनाप्रवृत्तौ बालाक्यधिकरणन्यायाल्लब्धोन्मेषेण भवन्ति जायन्त इति योगेन कार्यमात्रपरः सर्वधापि भूतशब्दोक्तं बिन्दुमायाप्रकृतिकार्यशुद्धमिश्रमलिनप्रपञ्चान्तर्गतं सर्वं प्रति कारणत्वं कस्यापि भूताकाशस्य न सम्भवत्येव। न च प्रथमश्रुतप्रधानपराकाशश्रुत्यनुसारेण सर्वभूतशब्दयोरर्थसङ्कोचः कल्पनीयः। 'आकाश इति होवाचे'

त्यतोऽपि प्राक् श्रुतस्योपक्रमोपसंहाराभ्यां प्रतिपिपादयिषितस्यानन्तत्वस्योपपादनार्थं प्रवृत्तस्य सर्वभूतकारणत्वस्य सङ्कोचासहिष्णुत्वात्। तथाहि अनन्तत्वं त्रिविधपरिच्छेदराहित्यं तत्प्राक्प्रकृतिज्ञातमाकाशस्योप- पादयितुं 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीते' त्यत्र ब्रह्मणस्सर्वात्मकतायां हेतुत्वेनोपन्यस्तम्। सकलकार्योत्पत्तिलयस्थित्याधारत्वं 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति आकाशः परायण'मिति वाक्यत्रयेणात्रापि हेतुतयोपन्यस्तम्। अत एवात्र प्रसिद्धिद्योतको हवै शब्दः। स हि प्रसिद्ध्यपेक्षहेतुपरत्वे सफलतरः। तेन वस्तुपरिच्देदराहित्यं लब्धम्। तल्लाभार्थमपि भूतशब्दोऽत्र योगेन सकलकार्यपरः। 'आकाशादेवे' त्यवधारणेनोपादानातिरिक्तकर्त्रसद्भावकृतवस्तुपरिच्छेदशङ्काप्यनवकाशीकृता। अवधारणस्य गृहमेधीयाधिकरण पञ्चमपक्षन्यायेनोपात्तसजातीयव्यवच्छेदकतयात्राकाशस्योपादानत्वेन सकल-जगन्मूलकारणत्वप्रतिपादने कर्तृतया प्रसक्तस्य मूलकारणान्तरस्यैव व्यवच्छेद्यत्वात्। अनाद्यनन्तकालव्यापिसकलजगन्मूलकारणत्वोक्त्यैव कालपरिच्छेदराहित्यमपि लब्धम्। 'आकाशो ह्येवैभ्यो ज्याया'निति सकलकार्यप्रपञ्चज्यायस्त्वस्य 'तावानस्य महिमा। ततो ज्यायांश्च पुरुषः।' 'ज्यायान्दिवो ज्यायानन्तरिक्षा' दित्यादिश्रुत्यन्तरसिद्धस्य वर्णनेन देशपरिच्छेदराहित्यं लब्धमू। पूर्वोत्तरसन्दर्भपर्यालोचनादनन्तत्वोपपादनार्थत्वेनावगतं कर्त्रन्तरादिनिरपेक्षासंकुचितसर्वभूतकारणत्वं तावदेकं ब्रह्मलिङ्गम्। एवमनन्तत्वम्। अनन्तत्वोपपादकत्वादेव संकोचासहिष्णु ज्यायस्त्वादिकमपि तल्लिङ्गम्। एवं च सर्वभूतकारणत्वाद्युपपत्तिरूपेणोपक्रमोपसंहाररूपेण च तात्पर्यलिङ्गेनोपबृंहितमनन्तत्वमपि तल्लिङ्गमित्यनुक्तसिद्धम्। न च प्रतिष्ठात्ववदापेक्षिकत्वेन तद्योजयितुमपि युक्तम्। वैषम्यात्। तथाहि। यत्रोपक्रमे कञ्चिद्दोषं सङ्कीत्य तद्दोषसमाधानं नोपसंहियते तत्र तन्मध्यगतवाक्यानां यथार्थाभ्युपगमेन तत्समाधानं लभ्यते तथा तदर्थोऽभ्युपगन्तव्यः। अत एव 'जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजति' 'विष्णुरुपांशु यष्टव्यः' 'प्रजापतिरुपांशु यष्टव्यः' अग्नीषोमावुपांशु यष्टव्यावजामित्वाये' त्युपांशुयाजिविधिवाक्ये उपक्रमे पुरोडाशयागद्वयनैरन्तर्यकृते जामितादोषे उपसंहारे तत्समाधाने च श्रूयमाणे तत्समाधानं मध्यगतवाक्येष्वन्तरावाक्ये यागविधान एव लभ्यते। न तु विष्णवादिवाक्येषु यागविधान इति तेषु प्रत्यक्षमपि यागविधिं परित्यज्य अन्तरावाक्य एव कल्प्योऽपि यागविधिः स्वीकृतः। यत्र तु मध्ये प्रतिपादनीयस्यान्यप्रतिपादनशेषत्वं न तत्रायं नियमः प्रवर्तते। तद्यथा-'यद्रद्ग्राम्याणां पशूनां पयसा जुहुयाद्ग्राम्यान्पशूंञ्छुचार्पयेद्यदारण्यानामारण्यान्जर्तिलयवाग्वा वा जुहुयाद्गवीधुकयवाग्वा वा न ग्राम्यान्पशून्हिनस्ति नारण्या'नित्यादौ सङ्कीर्तितस्य ग्राम्यारण्यपशुहिंसादोषस्यान्ते समाधानसङ्कीर्तनं मध्यगतवाक्यप्रतिपाद्यस्य जर्तिलगवीधुकशब्दवाच्यारण्यतिलारण्यगोधूमकृतयवाग्वोरग्निहोत्र-वैकल्पिकद्रव्यत्वाभ्युपगम एव लभ्यते न तु कस्यचिदपि। पयसस्तद्रव्यत्वाभ्युपगमे

पशुहिंसादोषतादवस्थ्यापत्तेः। अथापि न तथाभ्युपगम्यते। तदनन्तर'मथो खल्वाहुरनाहुतिर्वै जर्तिलाश्च गवीधुकाश्च' 'पयसाग्निहोत्रं जुहुया' दिति श्रवणेन पय एवाग्निहोत्रे द्रव्यं जर्तिलादिवाक्यं तु ग्राम्यारण्यपशुहिंसाराहित्येन प्रशस्तमपि जर्तिलयवाग्वादिकं यदपेक्ष्याहोम्यं तत्पयोऽत्यन्तं प्रशस्तमिति पयःप्राशस्त्यप्रतिपादनेन तद्विधिशेष इति दशमे व्यवस्थापितत्वात्। एवमिहापि पृथिव्याः प्रतिष्ठात्वसङ्कीर्तनस्यान्तवत्त्वदोषोद्भावनेन देशकालपरिच्छिन्नत्वात् निरपेक्षप्रतिष्ठात्वयोग्यता नास्ति इत्यापि प्रदर्श्य तदन्यस्यानन्तस्य निपरेक्षप्रतिष्ठारूपस्य प्रतिपादने शेषत्वात् न तत्र स नियमः प्रवर्तते किंत्वन्यप्रतिपादनशेषत्वरहितानन्तत्वप्रतिपादन एवानन्तत्वेनाकाशप्रतिपादनार्थमेव सर्वमिदं प्रकरणमारब्धं न तु तस्यान्यप्रतिपादनशेषत्वमिति प्रथमोद्भावितान्तवत्त्वदोषसमाधानार्थेन 'स एषोऽनन्त' इत्युपसंहारेणावगमात्। वस्तुतस्तु पृथिव्याः प्रतिष्ठात्वरूपं सर्वाधारत्वमिह न कीर्तितम्। किं तु प्रतिष्ठितत्वरूपं निश्चलत्वम्। 'अप्रतिष्ठितं वै किल ते दाल्भ्य सामे' त्यप्रतिष्ठितत्वदोषोपक्रमानुसारेण 'प्रतिष्ठां वयं लोकं सामाभिसंस्थापयामे'त्युपसंहारे श्रुतस्य प्रतिष्ठाशब्दस्य प्रतिष्ठितपरत्वावसायात् स्वर्गलोकं प्रति पृथिवीलोकस्याधारत्वाभावाच्च। न चोपजीव्यत्वरूपमौपचारिकमिहाधारत्वं विवक्षितमिति वाच्यम्। 'इतः प्रदानं देवा उपजीवन्ती'तिवद'मुतः प्रदानं मनुष्या उपजीवन्ती'त्यपि श्रवणेनोपजीव्यत्वस्योभयत्रापि तौल्यात्। तस्मान्निश्चलत्वरूपं प्रतिष्ठितत्वमेवेह विवक्षितमिति व्याख्येयम्। तद्धि स्वर्गलोके ज्योतिश्चक्रान्तर्गतत्वेन भ्रमणवति नास्ति। अतस्तत्राप्रतिष्ठितत्वदोषोद्भावनपूर्वकं पृथिव्यां तत्परिजिहीर्षया वर्णितमिति युज्यते। आर्यभटाभिमतस्तु भूभ्रमणवादः पुराणादिभिः 'पृथिवी प्रतिष्ठिदे'ति श्रुत्या अनेन च प्रतिष्ठितत्ववर्णनेन विरुद्धत्वान्न ग्राह्यः। अत एव मत्स्यजिघृक्षुपक्षिशुष्कालाबुफलदृष्टान्तावलम्बनाभ्यां जैनयवनाभ्यां कल्पितौ भूपतनप्लवनवादावपि न ग्राह्यौ। तस्मात्प्रतिष्ठितत्वमपि मुख्यमेव विवक्षितमिति न तद्दृष्टान्तत्वेनानन्तत्वस्यापेक्षिक-त्वकल्पनावकाश इति युक्तमेव अनन्तत्वं प्रबलं ब्रह्मलिङ्गमिति। एव'मस्य लोकस्य का गति'रिति शालावत्यप्रश्नवर्णितं सर्वलोककारणत्वमपि ब्रह्मलिङ्गमिति। न च दाल्भ्यप्रश्नसारूप्यात् शालावत्यप्रश्नोऽपि पृथिवीकारणमात्रविषय इति वाच्यम्। दाल्भ्यप्रश्नस्यानन्तवस्तुपरत्वाभावेऽपि ह्यन्तवत्त्वदोषमुद्भावितवान् जैवलिरनन्तं वस्तु पृथिवीकारणं विवक्षतीति निश्चयवतः शालावत्यस्य प्रश्नोऽयमनन्तवस्तुपर इति कल्पनीयम्। तथैव सर्वकारणत्वाभावे तदनन्तं न स्यात्। अतोऽनन्तं वस्तूपक्षिपता जैवलिना सर्वकारणमेव तदुपक्षिप्तं भवतीत्यपि निश्चयसम्भवेन तत्किं सर्वकारणमनन्तं वस्त्विति तत्प्रश्नस्सर्वकारणवस्तुविषय इत्युपपद्यते। एवमुपपत्तौ च नान्यसन्निधानमात्रेणा'स्य लोकस्ये'ति श्रुत्योस्सङ्कुचितविषयत्वकल्पनोपपद्यते। एवमनेकलिङ्गसद्भावेऽप्यन्यानि सर्वाणि

लिङ्गान्यनन्तत्वलिङ्गाधीनोन्मेषाणीति तेनैकेनैव लिङ्गेन लिङ्गान्तरैरुपबृंहितेन साध्यसिद्धिमभिप्रेत्य सूत्रे 'तल्लिङ्गा'दित्येकवचनं कृतम्। तस्मादिहाकाशः परं ब्रह्म। नन्वाकाशशब्दनिरूढिसद्भावादयं चिदाकाश इत्यस्तु। तत्रापि ब्रह्मणीवानन्तत्वादिलिङ्गानां सामञ्जस्यादिति चेदस्तु। न भूताकाश इति हि भूताकाशत्वमेव व्यवच्छिद्यते। ब्रह्मेत्यनुवृत्तस्साध्यनिर्देशस्त्वभेदोपचारादुपपद्यत इति। प्राणाधिकरणेऽप्याकाशाधिकरणवत्पूर्वपक्षसिद्धान्तौ। प्राणः पञ्चवृत्तिर्वायुः न ब्रह्म। उपक्रमगतप्रधानप्राणश्रुत्यनुसारेण चरमश्रुततद्गुणसर्वभूतसंवेशनोद्गमनादीनां वर्णनीयत्वादिति प्राप्ते 'कतमा सा देवते'ति 'सैषा देवते' त्युपक्रमोपसंहारगतप्रतिपिपादयिषितचेतनत्वलिङ्गेनासङ्कुचितसर्वभूतसंवेशनोद्गमनावधारणोपबृंहितेन प्राणश्रुतिबाधात् ब्रह्मवेति निर्णय इत्यतिदशस्य प्रयोजनमधिकाशङ्कानिराकरणम्। एवमत्राधिकाशङ्का-अनन्तत्ववद्देवतात्वं न ब्रह्मैकान्तिकं लिङ्गम्। आदित्यादिसाधारण्यात्। नाप्यचेतनव्यावृत्तम्। सूक्तप्रतिपाद्येषु सोमलतादिषु हविरुद्देश्येष्वश्वमेधाश्वावयवादिषु' हन्ताहमिमास्तिस्रो देवता'इति श्रुतिनिर्दिष्टेषु तेजःप्रभृतिषु च तव्द्यवहारदर्शनात्। इहापि प्रतिहारदेवतायामन्ने तच्छ्रवणात्। न च तत्रान्नशब्दस्तदभिमानिदेवतापरः। 'अन्नमेव प्रतिहरमाणानि जीवन्ती'ति वाक्यशेषविरोधात्। तद्वत्प्राणशब्दोऽपि प्राणाभिमानिदेवतापर इति तत्र देवतात्वलिङ्गसमर्थनोपपत्तेश्च। न चाकाशवाक्य इव प्राणवाक्ये 'सर्वाणि ह वा इमानि भूतानी' त्येतत्सङ्कोचासहिष्णववगम्यते। तत्रानन्तत्वलिङ्गोपपादनार्थस्येवात्र कस्यचिदसङ्कोचहेतोरभावात्। तदभावे चोपक्रमगतप्रधानप्राणश्रुत्यनुरोधेन यथायोग्यं सङ्कोचस्योचितत्वात्। अन्नादित्यवाक्ययो 'स्सर्वाणिभूतानी'त्यस्यावश्यं सङ्कोचनीयत्वेन तत्प्रायपाठादत्रापि सङ्कोचस्य प्राप्तेश्च। न हि सर्वे प्राणिनः आदित्यं गायन्ति अन्नं भक्षयन्त एव वा जीवन्ति किं तु तत्र योग्या एव जीवन्ति। अन्नशब्दो ह्योदनवाची नत्वदनीयमात्रवाची। 'भिस्सा स्त्रीभक्तमन्धोऽन्नमोदनोऽस्त्री'ति नैघण्टुकप्रसिद्धेः। 'अन्नेन व्यञ्जन'मिति पाणिनि (पा० २-१-३४.) सूत्रदर्शनाच्च। न च 'प्राणमेवाभिसंविशन्ती' त्यवधारणमाकाशवाक्यगतावधारणमनन्तत्वलिङ्गोपपादनार्थत्वेनेव केनचिद्धेतुनान्यथासिद्धमवगम्यते। प्रत्युता'न्नमेव प्रतिहरमाणानी'त्यवधारणप्रायपाठेन तद्वद्याथाकथाचमित्येव प्रतीयते। वस्तुतस्तु 'सर्वाणि भूतानी'त्यादिवाक्यशेषस्य न काचिदनुपपत्तिः। भूतशब्दो ह्यत्र प्राणिनिकायपरः। तथा च तेषां संवेशनोद्गमने स्थितिप्रवृत्ती इन्द्रियवृत्तिविलयतदुद्भवरूपौ स्वापप्रबोधौ वा। तेषां च प्राणैकायत्तत्वं 'मा मोहमापद्यथ अहमेवैतत्पञ्चधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य धारयामी'त्यादिप्राणसंवादगतवाक्यजातेन 'यदा वै पुरुषः स्वपितिप्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनस्सयदा प्रबुध्यते प्राणादेवाधि पुनर्जायन्त' इत्यादिस्वापप्रबोधविषयवाक्यजातेन स्थितिप्रवृत्त्योः प्राणाधीनत्वग्राहकप्रत्यक्षेण स्वापदशायां

प्राणवृत्तिमात्रानुवृत्त्यनुभवेन चावगम्यत इति किमत्रानुपपन्नम्। अथवा। अस्त्वत्र संवेशनोद्गमने भूतानामुत्पत्तिप्रलयावित्यर्थपरिग्रहः। सोऽपि प्राणविषय उपपद्यत एव। 'प्राणाद्ध्येव खल्विमानि भूतानि जायन्त'इत्यादिश्रुतेः। ननु भृगुवल्लयामन्नप्राणमनोविज्ञानेषु चतुर्ष्वपि स्थूलारुन्धतीन्यायमवलम्ब्य जगदुत्पत्तिस्थितिप्रलयकारणत्ववर्णने दृश्यमाने केन विशेषेण विशिष्य प्राणे तदाशङ्क्यते। श्रुत्यन्तरसंवादने विशेषणेति ब्रूमः। 'असद्वा इदमग्र आसीत्। तदाहुः। किं तदासीदिति। ऋषयो वाव तेऽग्रे असदासीत्। तदाहुः। के ते ऋषय इति। प्राणा वावर्षय' इति श्रुतौ हि श्रुत्यन्तरेषु ब्रह्मण इव प्राणस्य प्राग्जगदुत्पत्तेस्सद्भावश्श्रूयते। तेनानन्दरूपे ब्रह्मणीव प्राणेऽपि जगदुत्पत्त्यादिश्रवणं तात्त्विकविषयमित्यस्ति शङ्कावकाशः। न च ब्रह्मकारणत्वप्रतिपादकश्रुत्यनुरोधात् तत्रत्यप्राणशब्दोऽपि ब्रह्मपर इति वाच्यम्। कल्पभेदेनोभयोरपि कारणत्वोपपत्तौ प्राणश्रुतिबाधायोगात्। न च बहुवचनं मुख्यप्राणेऽनुपपन्नमिति वाच्यम्। ब्रह्मणीव तदुपपत्तेः। 'एतस्माज्जायते प्राण'इति प्राणोत्पत्तिश्रुतेः जीवोत्पत्तिश्रुतिवदुपपत्तेः। प्रथमं ब्रह्मण उत्पन्नस्य प्राणस्य भूतेन्द्रियादिसर्वकारणत्वोपपत्तेश्च। तस्मात्प्राणश्रुतेरन्नादित्यरूपाब्रह्मप्रायपाठादानन्दवल्लयामन्नमयाद्यब्रह्मप्रायपाठवदाकाशवाक्यसामगतिरूपस्वरप्राणाद्यब्रह्मप्रायपाठवत् भूमविद्यायां नामाद्यब्रह्मप्रायपाठवच्चात्र प्राणश्रुत्यनुग्राहके प्रायपाठे बाधकस्य बलवतो लिङ्गादेरभावाच्च अत्र प्राणो न ब्रह्मेति। एवमधिकाशङ्कानिराकरणार्थमिदमतिदेशाधिकरणम्। तन्निराकरणप्रकारस्त्वयम्। देवशब्दात्सुरवाचिनो 'देवात्तलि'ति स्वार्थविहिततद्धितान्तो देवताशब्दः क्वचित्क्वचिदचेतने पूज्यत्वविवक्षया प्रयुक्तोऽपि सुररूपचेतनविशेषवाचीति प्रयोगप्राचुर्याभिधानकोशादिभिरवगतम्। स चात्र प्रस्तावभक्तावुपासनीये प्राणे प्रश्नोपदेशरूपयोरुपक्रमोपसंहारयोः श्रवणेन विवक्षितार्थतयावसीयत इति तेन प्राणशब्दः चेतनविशेषवाची तावन्निर्धार्यते। अन्नशब्दोऽपि तेन तथा निर्धार्यते चेदन्नाभिमानिदेवतापरोऽस्तु। तथैव प्राणशब्दोऽपि यद्यपि प्राणाभिमानिदेवतापरो वक्तुं शक्यते। 'प्राणबन्धनं हि सोम्य मनः प्राणस्य प्राण'मित्यादिश्रुतिषु परमेश्वर इव प्राणसंवादादिषु प्राणाभिमानिनि प्रयुक्तश्च। तथा यत्र परमेश्वरपरत्वमेव तस्य युक्तम्। वाक्यशेषस्य स्वरसतोऽसङ्कुचितसर्वभूतसंवेशनोद्गमननिरपेक्षाधारपरस्य स्वतस्तत्र सम्भवात्। प्राणाभिमानिदेवतायां सङ्कुचितार्थस्य तस्य प्राणवायुगततदर्थारोपेण समर्थनीयत्वात्। न ह्यन्नवाक्यशेषः तदभिमानिदेवतां विना चेतनान्तरे कथमप्यन्वयमलभमानस्तस्यामन्नगततदर्थारोपेण समर्थित इत्यत्र गत्यन्तरसम्भवेऽप्यन्यदीयारोपस्समाश्रयणीयः। न वा गत्यन्तररहितयोरन्नादित्यवाक्यशेषयोस्सर्वशब्दस्य संकोचः कृत इत्यसंकोचसंभवेऽप्यत्र सङ्कोचः कल्पनीयः। नाप्यन्नवाक्यशेषेऽवधारणस्य स्वारसिकमन्ययोगव्यवच्छेदकत्वं त्यक्त्वाभिन्नक्रमत्वेनायोगव्यवच्छेदकत्वमाश्रितमित्यत्रापि तथाश्रयणीयम्। प्रायपाठस्तु

स्थानप्रमाणरूपो लिङ्गबाध्योऽत्र न नियामकः। यत्तु संवेशनोद्गमनयोः स्थितिप्रवृत्तिरूपत्वे स्वापप्रबोधरूपत्वे वा सर्वशब्दसङ्कोचो नाश्रयणीय इति तन्न। स्थितिप्रवृत्त्यादीनां प्रतिदेहव्यवस्थितप्राणविशेषाधीनत्वेनैकत्र ततस्सर्वभूतसंवेशनोद्गमनहेतुत्वालाभात्। सर्वभूतलयोत्पत्तिकारणत्वमेकत्र समष्टिप्राणे सम्भवतीति चेन्न। असङ्कुचितसकलचेतनाचेतनरूपसर्वभूतकारणत्वस्य प्राणे सर्वशरीरके परमेश्वर एव सम्भवात्। 'प्राणा वा ऋषय' इति श्रुतेर्ज्ञातृत्वप्रतिपादकऋषिशब्दानुरोधेन 'आत्मा वा इदमेक एवाग्र आसी'दित्यादिश्रुत्यन्तरानुरोधेन च 'तथा प्राण' इत्यधिकरणे वक्ष्यमाणया रीत्या परमेश्वरपरत्वात्। 'प्राणाद्ध्येव खल्वि'त्यादिश्रुतेरप्यन्नादिपर्यायगतवाक्यानामिवानन्दरूपस्य परब्रह्मणः कारणत्वं एव तात्पर्यात्। तस्मात्सर्वजगत्प्रकृतित्वावधारणोपबृंहितप्रतिपिपादयिषितचेतनत्वलिङ्गेन प्राणश्रुतिबाधात् प्राणः परमेश्वर इति सिद्धम्। 'आकाशस्य भूतान्तर्वर्तितये'त्यादिभाष्यस्यायमर्थः। शुद्धमिश्रमलिनप्रपञ्चान्तर्गतस्य त्रिविधस्याप्याकाशस्य भूतान्तर्भूततया सर्वशब्देन ग्रहणात् तदन्तर्भावेन सर्वभूतोत्पत्तिः कुतश्चिदप्येकस्मादाकाशान्न सम्भवति। किंत्वा'त्मन आकाश' इति श्रुतेः परमेश्वरादेवेत्यप्यङ्गीकरणीयमिति। आकाशग्रहणमत्र वाय्वादिकस्याप्युपलक्षणम्। आकाशवत्त्रिविधं पृथिव्यादिकं प्रत्यपि कस्यचिदाकाशस्य कारणत्वं न सम्भवतीत्यस्य हेतोरविशिष्टत्वात्प्रथमसृज्यवाचित्वादाकाशपदं सर्वोपलक्षणत्वेनोपात्तम्। भाष्यान्तराणि निगदव्याख्यानानि॥

॥ इत्याकाशाधिकरणं प्राणाधिकरणं च॥९॥१०॥

॥सू॥ ज्योतिश्चरणाभिधानात्॥२६॥ सङ्गतिं दर्शयन्नुत्तराधिकरणस्य विषयमाह-**पूर्वमिति।** पूर्व 'मन्तस्तद्धर्मोपदेशा'दित्यधिकरणे निखिलभुवननायकस्य सर्वलोककामेश्वरस्य निरस्तसमस्तदोषवासनाकलङ्कस्य सर्वपापोदितस्य निरतिशयमङ्गल्यरत्नाकरस्य साधकानुजिघृक्षया तदनुग्रहार्थं परिगृहीतदिव्यविग्रहकान्तिसौन्दर्यादिसर्वोत्तरमङ्गल्यगुणगणमणिगणमहासमुद्रस्य उमापतेस्तैत्तिरीयोपनिष'द्युमापतय' इति विशेष्यपदेन निर्दिष्टस्य परब्रह्मणः आदित्यान्तर्वर्तिनः परमेश्वरस्यादित्यमण्डलं पर्यङ्कस्थस्य राज्ञः प्रासादवदास्पदमिति निरूपितम्। इहाधिकरणे तस्य परमेश्वरस्य स्थानोक्तेः प्रसङ्गात्स्थानान्तरमुच्यत इत्यर्थः। यस्य वाक्यस्य ब्रह्मणि तात्पर्यनिर्णये सति तदुपासनस्थानान्तरावगतिरपि लभ्यते तस्य ब्रह्मणि तात्पर्यनिर्णयोऽत्र क्रियत इति यावत्। अनेन पूर्वाधिकरणद्वयस्य प्रसक्तानुप्रसक्तरूपत्वात्पूर्वाधिकरणेनैवास्यापि प्रसङ्गसङ्गतिरिति दर्शितं भवति। तत्प्रदर्शनार्थमेव तदधिकरणनिर्णीततात्पर्यकवाक्यलब्धानि परमेश्वरस्य विशेषणानि 'निखिलभुवने'त्यादिना वर्णितानि। 'अथ यदतः पर' इति लिङ्गव्यत्ययः। आतोदिवः परमूध्ववर्तितया बहिर्भूतं यत्

ज़्योतिर्दीप्यते। केषु विश्वत: विश्वस्य पृथिव्यादेरुपरिस्थानरूपेष्वनुत्तमेषूत्तमेषु च लोकेषु। लोकसामस्त्यस्पष्टीकरणार्थं विश्वत: पृष्ठेषु सर्वत: पृष्ठेष्विति द्विर्वचनम्। तज्ज्योतिरिदमेव। यदन्त: पुरुषे जाठराख्यं ज्योतिरित्यर्थ:। दिव: परमिति क्वचित्स्थितत्वेनोक्तस्यापि दीप्त्या सर्वलोकव्याप्तिरुपपद्यते। अत्र द्युशब्दस्य परापरान्तरिक्षलोकपराकाशसाधारण्यं संशयबीजमिति धर्मविशेषणेन दर्शयन् संशयमाह-**अत्रेति।** 'दिवी'ति सामीप्ये सप्तमी। उदुम्बरे वसतीतिवद्दिव: परं श्रूयमाणमित्यर्थ:। **तदन्यो वे तिं** आदित्यजाठरपूर्वपक्षद्वयसङ्ग्रहार्थं साधारण्येन निर्देश:। **द्युशब्दस्येति।**

आदित्यपूर्वपक्षे आकाशो भूमिसूर्यमध्यवर्त्यपरोऽन्तरिक्षलोक:। 'यावत्प्रमाणा पृथिवी विस्तारपरिमण्डला। नभस्तावत्प्रमाणं स्याद्व्यासमण्डलतो द्विजे'ति तत्राकाशपर्यायप्रयोगदर्शनात्। जाठरपूर्वपक्षे देहबाह्यो भूतकाश:। अयमन्तरिक्षलोकरूपो देहबाह्यभूताकाशरूपो वा आकाशोऽत्र विषयवाक्ये द्युशब्देनोच्यते। तत:परत्वं सूर्यस्य तत उपरि वर्तमानत्वम्। जाठरस्य ज्योति:प्रकरणात्पूर्वं गायत्रीप्रकरणे योऽयं बहिर्धा पुरुषादाकाश इत्युक्तत्वात् देहबाह्याकाशात् पृथग्योऽयमन्त:पुरुषे आकाश इति निर्दिष्टे देहान्तराकाशे वर्तमानत्वं विवक्षितमित्यभिप्रेत्याह-**परो दिव इत्याकाशवर्तीति।** अन्तरिक्षलोकवाचिनो देहबाह्याकाशवाचिनश्चाकाशशब्दस्य सामीप्यसप्तमी-समास:। एवं चैतत्पर्यन्तं सूर्यविशेषणं जाठराग्नावप्यनुषञ्जनीयम्। सूर्य एवेत्येवकारेण परमेश्वरपक्ष-व्यवच्छेद:। तत्रायमाशय:। द्युशब्दोऽत्र स्वर्गवाची वक्तव्य:। आकाशवाची वा तत्पर्यायतयान्तरिक्ष-लोकवाची वा। आद्येऽपि परमेश्वरनित्यस्थानभूतसर्वोत्तरपरस्वर्गवाची शक्रादित्रिदशालयरूपसूर्य-लोकादिध्रुवलोकावध्यपरस्वर्गवाची वा। प्रथमे 'दिव:पर'इत्येतदनुपपन्नम्। तस्योपरि तद्बहिर्भूततया वर्तमाने हि तत: पर इत्युच्यते। न हि वृक्षस्योपरि भ्राम्यन्निव वृक्षकोटरे स्थितोऽपि पक्षी वृक्षात्पर इत्युच्यते। न च परमेश्वर: परस्वर्गस्योपरि ततो बहिर्भूतो वर्तते किं तु तन्मध्यगते दिव्यमन्दिरे। परस्वर्गवाचित्वे 'चात' इति विशेषणमनुपपन्नम्। अपरस्वर्गवाचित्वपक्षोऽपि न सङ्गत:। न ह्यपरस्वर्गादप्यूर्ध्वम्महराद्यनेकलोकघटितस्य परपृथिवीलोकरूपस्य पार्थिवस्य प्रकृतिकार्यस्य ब्रह्माण्डस्य तदूर्ध्ववर्तिन: परस्वर्गाधस्तनस्य परान्तरिक्षलोकरूपस्य मायाकार्यस्य गुह्याष्टकाद्युन्मनान्तलोकनिवहस्य चोपरि परमाकाशमये परस्वर्गे वर्तमानस्य परमेश्वरस्यापरस्वर्गात्परत्वोक्त्या कश्चिदतिशयो लभ्यते। अत एव द्वितीयविकल्पोऽप्यनुपपन्न:। न हि तस्यात इति निर्दिष्टप्राकृताकाशात्परत्वोक्त्यापि कश्चिदतिशयो लभ्यते। तृतीये तु परान्तरिक्षविवक्षायां तत:परत्वोक्त्या लभ्यत एवातिशय:। किं तु तत्परतायामत इति विशेषणं नोपपद्यते। तस्मादिहापरान्तरिक्षात्परत्वं विवक्षणीयम्। तदादित्य एव सङ्गच्छते न ब्रह्मणि। ज्योतिष्ट्वेन

दीप्तिमत्त्वेन च लोकप्रसिद्धे तस्मिन्नेव च यच्छब्दयोगेन प्रसिद्धवदनूद्यमानं तदुभयं सङ्गच्छते। ज्योतिःश्श्रुतिरपि प्रसिद्ध्यतिशयात्तत्रैव सङ्गच्छते। न च भूरादिलोकत्रयव्यतिरिक्तेषु महारादिलोकेषु सूर्यकिरणप्रचाराभावाद्विश्वतःपृष्ठेत्यादिकं तस्मिन्न सङ्गच्छत इति वाच्यम्। तदुपक्रमार्थत्वेनादित्ये निश्चिते तदनुसारेण तस्य त्रैलोक्यान्तर्गतलोकसामस्त्यपरत्वोपपत्तेः। स्यादेतत्। अथ यदतः प्राक् 'त्रिपादस्यामृतं दिवी'ति ब्रह्म प्रकृतम्। तदेव प्रकृतपरामर्शिना यत्पदेनाभिधातव्यम्। ततश्चोपक्रमगतयत्पदानुसारेण तत्समानाधिकरणज्योतिरादिपदानां तत्रैव कथंचन वृत्तिरभ्युपगन्तव्येति चेन्न। यत्पदादपि प्राथमिकेनाधिकारार्थेनाथशब्देन ज्योतिश्शब्दस्वारस्येन च प्रकृताद्भेदस्यैव संज्ञाधिकरणन्यायतः प्रतीतेः। 'संज्ञा चोत्पत्तिसंयोगा'दित्यधिकरणे हि' अथैष ज्योतिरेतेन सहस्रदक्षिणेन यजेते'त्यत्र किं प्रकृतं ज्योतिष्टोममनूद्य तत्र सहस्रदक्षिणाविधानमुत ज्योतिर्नामकसहस्रदक्षिणाविशिष्टकर्मान्तरविधानमिति 'एष इति सर्वनाम्नः प्रकृतपरामर्शित्वात् ज्योतिरिति नामैकदेशस्य 'वसन्तेवसन्ते ज्योतिषा यजेते' त्यत्रेव ज्योतिष्टोमे कथञ्चिद्वृत्तिसम्भवात् तत्र सहस्रदक्षिणाविधानमिति पूर्वपक्षं कृत्वाधिकारार्थेनाथशब्देन प्रकरणविच्छेदावगमात् ज्योतिरिति संज्ञान्तरस्य स्वतोऽर्थान्तरपरत्वस्वारस्याच्च तद्बला'देष, इत्यस्य प्रक्रियमाणपरत्वमङ्गीकृत्य नामगुणविशिष्टकर्मान्तरविधानमिति सिद्धान्तितम्। तद्वदिहाप्यथशब्देन प्रकरणविच्छेदावगमात् प्राक् ब्रह्मण्यप्रयुक्तस्य ज्यौतिश्शब्दस्य प्रसिद्धतरलौकिकार्थस्वारस्याच्च। यदित्यस्य प्रक्रियमाणादित्यपरत्वमभ्युपगम्य तदुपासनविधानमङ्गीकर्तुं युक्तमिति। **अथवेति।** अत्रायमाशयः। सत्यं ज्योतिरिह प्रकृतं ब्रह्म न भवतीति किंत्वादित्य इति न युक्तम्। जाठराग्निरित्येव युक्तम्। 'इदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योति'रिति श्रुत्या तस्य ज्योतिःपदस्य जाठराग्निपरत्वेन व्याख्यातत्वात्। उदाहृतवाक्यशेषश्रुतेः 'तस्यैषा दृष्टिर्यत्रैतदस्मिन्शरीरे संस्पर्शेनोष्णिमानं विजानाति तस्यैषा श्रुतिर्यत्रैतत्कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत उपशृणोतीति तदनन्तरवाक्येन जाठराग्निविषयस्पष्टीकरणाच्च। न च जाठराग्नौ दिव ऊर्ध्ववृत्तित्वं सर्वलोकव्यापिदीप्तिमत्त्वं च नान्वेतीति शङ्कनीयम्। ''गौण्या लक्षणया वापि वाक्यभेदेन वा पुनः। वेदो यमाश्रयत्यर्थं को नु तं प्रतिकूलयेत्''॥ इति वार्तिकोक्तरीत्या वैदिकव्याख्यानदर्शने व्याख्येयभागे तदनुकूलार्थपरत्वकल्पना-वश्यम्भावात्। तथा च दिवः परत्वं बाह्याकाशादन्यत्र शरीराकाशे वर्तमानत्वं सकललोक-व्यापिदीप्तिमत्त्वं ब्रह्माण्डरीत्या पिण्डाण्डरूपे देहे ध्यानार्थं तत्तल्लोकतया कल्पितेषु भागेषु व्याप्तया 'सन्तापयति स्वं देहमापादतलमस्तक' इति श्रुतिसिद्धया दीप्त्या युक्तत्वमिति व्याख्येयम्। न च 'स एष परोवरीयानुद्गीथ' इति सर्वलोकगताकाशस्योद्गीथसामानाधिकरण्यश्रवणमिव दिवः परस्य ज्योतिषो जाठराग्निसामानाधिकरण्यश्रवणं तथात्वेनोपासनार्थमस्तु माभूत्तव्द्याख्यानरूपमिति वाच्यम्।

व्याख्यानतया तत्त्वार्थोपदेशरूपत्वोपपत्तौ स्पष्टभेदयोस्सामानाधिकरण्यश्रवणस्यैव कल्पितार्थविषयत्वकल्पनायोगात्। अन्यथातिप्रसङ्गात्। एवमादित्यो जाठरो वा परं ज्योति र्न परमेश्वर इति प्राप्ते सिद्धान्तयति-**सिद्धान्तस्त्विति** सर्वोत्तरमिति हेतुगर्भं विशेषणम्। सकलसंसारमण्डलातीतस्थानवृत्तित्वा'द्दिव:पर' इत्यनेन प्रतिपादितं ज्योति: परमेश्वर:। आदित्यजाठरयोस्तदसम्भवादिति भाव:। कथं 'दिव: पर' इत्यस्य सर्वोत्तरत्वपराताऽवसीयत इति चेत्। इत्थम्। इदं ज्योतिस्तावद्द्युसम्बन्धप्रत्यभिज्ञानात् प्राक्सर्वाणि भूतानि एकं पादं कृत्वा पादत्रयात्मना निरूपित: पुरुष इत्यवसीयते। तस्य च पुरुषसूक्ते 'त्रिपादूर्ध्व उदैत्पुरुष:। पादोऽस्येहाभवात्पुन'रिति सर्वप्राणिनिकायापेक्षयोर्ध्ववर्तित्वमवगतम्। तथाभूते तस्मि'न्दिव: पर' इत्यनेनात्र प्राकृतान्तरिक्षमात्रात् प्राकृताकाशमात्राद्वा परत्वमुच्यते चेन्न तत्स्वारस्यं लभते। अतोऽत्र द्युशब्दस्य प्रकृतमायाकार्यरूपलौकिकाकाशसामान्यपरत्वमभ्युपगन्तव्यम्। 'अत'इत्यस्व च सन्निहितप्राकृताकाशग्रहणार्थत्वं परित्यज्य परमाकाशव्यावर्तनार्थत्वमङ्गीकरणीयम्। ततो 'दिव: पर' इत्यस्य सर्वोत्तरत्वपरता लभ्यते। अयं सर्वोत्तरत्वहेतु'श्चरणाभिधाना'दिति सूत्रांशेन चरणत्रयरूपस्य प्रकृतस्य पुरुषस्य ज्योति:पदेनाभिधानादित्यर्थस्य विवक्षितत्वाल्लभ्यते। 'परं ज्योति'रिति परविशेषणं 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत' इति श्रुतौ परमेश्वरेऽपि ज्योति:पदप्रयोगोऽस्तीति ज्ञापनार्थं परापरज्योतिषो: परज्योतिष एवात्र ग्रहणमुचितमिति ज्ञापनार्थं च। ज्योतिश्शब्दो हि नादित्यादीनामेव वाचक:। किं तु यदेव किञ्चिदवभासकं चेतनव्यवहारोपयोगि तस्य सर्वस्यापि वाचक:। बृहदारण्यके 'किं ज्योतिरयं पुरुष' इति प्रश्ने आदित्यचन्द्राग्निवचनात्मनां पूर्वपूर्वाभावे उत्तरोत्तरस्य पुरुषं प्रति ज्योतिष्ट्वमुक्तवता याज्ञवल्क्येन तेषु ज्योतिश्शब्दप्रवृत्त्युपपादनायादित्येनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुत इत्येवमादिभिरादित्यादीनां पुरुषव्यवहारोपयोगस्य प्रतिपादितत्वादन्यत्रापि 'मनो ज्योतिर्जुषतामाज्य'मित्यादिदर्शनाच्च। एवं च आदित्यादीन्यपरज्योतींषि कतिपयभासनेन तावन्मात्रव्यवहारोपयोगित्वात्। परमेश्वरस्तु परं ज्योति: 'तस्य भासा सर्वमिदं विभाती'तिश्रुते: सर्वावभासनेन सर्वव्यवहारोपयोगित्वात्। ततश्चात्र प्रकरणोपपदादिसङ्कोचकरहितेन ज्योति:पदेन परमेव ज्योतिरभिधातुमुचितमिति। अयमपि हेतुश्चरणव्यपदेशादित्यादिकमनुक्त्वा 'चरणाभिधाना'दिति ज्योति:पदस्याभिधावृत्तिप्रतिपादकशब्दोपादानेन विवक्षित:। एवं दिव: परत्वं ज्योतिश्श्रुतिश्चेति यदुभयं पूर्वपक्षसाधकत्वेनाभिमतं तदेव सिद्धान्तसाधकमिति विशेषणमुखेन दर्शितम्। अथ चरणाभिधानादिति सूत्रांशं हेत्वन्तरपरत्वेन व्याचष्टे-**पूर्वत्रेति। एकांशतयेति।** सौत्रचरणशब्दस्य भावप्रधानतया व्याख्यानम्। तथात्र सर्वेषां भूतानां ज्योतिरेकांशत्वेन प्रतिपादनात् ज्योति: परमेश्वर इत्यर्थ:। ननु नास्ति भूतानां ज्योतिरेकांशत्वेन प्रतिपादनं किं तु त्रिपात्पुरुषैकांशत्वेन। अतोऽयं हेतुरसिद्ध:। एवं च सर्वोत्तरत्वहेतुरप्यसिद्ध:। न च द्युसम्बन्धेन

ज्योतिस्त्रिपात्पुरुषतया प्रत्यभिज्ञापितमिति वाच्यम्। 'दिवः पर' इत्यतः प्राथमिकेनाथशब्देनाधिकारार्थतया प्रकरणविच्छेदकेन ज्योतिषः प्रकृतत्रिपात्पुरुषान्यतयैव ज्ञापितत्वात्। तथा च प्रकृतस्य त्रिपात्पुरुषस्य निजैकांशसकलप्रपञ्चहेतुना परमेश्वरत्वसिद्धौ तदन्यपरस्य ज्योतिःपदस्यादित्यादिपरज्योतिःपरत्वमेवागत्याङ्गीकरणीयमिति ज्योतिश्श्रुतिरपि न सिद्धान्तसाधिका। एतेन यत्पदरूपसर्वनामश्रुतिः प्रकृतपरामर्शित्वस्वाभाव्यात् प्रकृतत्रिपात्पुरुषपरा सती समानाधिकरणं ज्योतिःपदमपि तत्र पर्यवसाययेदित्यपि शङ्का निरस्ता। प्राथमिकेनाथशब्देन प्रकरणविच्छेदावगमे सति यत्पदस्या'थैष ज्योति'रित्यत्रैतत्पदस्यैव प्रक्रियमाणपरत्वोपपत्तेरिति चेत्। उच्यते। सर्वनाम्नां समानाधिकृतशब्दस्वारस्यप्राप्तमपि प्रकरिष्यमाणपरत्वमतिलङ्घ्य प्रकृतपरामर्शित्वं व्युत्पत्तिसिद्धम्। अत एव प्रयुक्तिलक्षणे 'तप्ते पयसि दध्यानयति सो वैश्वदेव्यामिक्षे' त्यत्रामिक्षापदवाच्यं पयसोऽर्थान्तरं दधिसंसर्गजन्यं द्रव्यान्तरमभ्युपेयम्। पय आमिक्षेति व्यपदेशभेदात्तस्यैव द्रव्यान्तरस्य कठिनाम्लमधुरस्य वैश्वदेवयागद्रव्यत्वमामिक्षापदसमानाधिकृततत्पदस्य तद्द्रव्यपरत्वं चाभ्युपेयमिति प्राप्ते सर्वनाम्नः प्रकृतपरामर्शित्वस्वाभाव्यात् तत्पदमानयनक्रियां प्रति प्रधानकर्मतया दध्यानयनाधिकरणत्वेन निर्दिष्टं पयः परामृशतीति पय एव यागद्रव्यम्। तत्पदे स्त्रलिङ्गमामिक्षापदसामानाधिकरण्यकृतम्। आमिक्षापदं तु न द्रव्यान्तरविधायकं किं तु तत्पदेन केवले पयसि यागद्रव्ये विहिते तत्र दध्यानयनसंस्कारविधिप्राप्तदधिसंसर्गानुवादकम्। तच्चास्मादेव वैदिकव्यवहारात् आम्लद्रव्यसंसर्गघनीभूतपयोमात्रवाचकं न तज्जन्यद्रव्यान्तरवाचकम्। आम्लरसो न यागद्रव्यगतः किं तु तत्संस्कारकद्रव्यगत इति निर्णीतम्। 'दधि मधु घृतं धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्य'मिति चित्रायागविधौ दध्याद्यनेकद्रव्यमेलनरूपसंसृष्टैकद्रव्यक एको यागः। तत्पदं च संसृष्टद्रव्यपरमिति प्राप्ते तत्पदं प्रकृतपरामर्शित्वस्वाभाव्या-दसंसृष्टदध्यादिसप्तद्रव्यपरं न तु संसृष्टैकद्रव्यपरमिति। दध्यादि सप्तद्रव्यकाः सप्त यागाः। सप्तस्वपि द्रव्येषु तदिति नपुंसकैकवचनं 'नपुंसकमनपुंसकेने' त्यादिव्याकरणस्मृत्यनुसारेण। संसृष्टपदं तु यागभेदेऽपि एकदैवत्यतया सान्नाय्यवद्दध्यादीनां सहप्रक्षेपे संसर्गसत्त्वात्तदनुवादकं योज्यमिति निर्णीतं टुपूटीकायामष्टमद्वादशाध्याययोः। 'अथैष ज्योति'रित्यत्र तु ज्योतिश्शब्दस्य ज्योतिष्टोमसंज्ञायाः संज्ञान्तरत्वेन स्वतोऽर्थान्तरपरत्वस्वारस्यात् नामैकदेशत्वेन ज्योतिष्टोमानुवादकत्वकल्पनायाः क्लिष्टत्वात्। एतेन 'सहस्रदक्षिणेन यजेते'त्येतावतापि प्रकृते ज्योतिष्टोमे गुणविधानोपपत्त्या 'अथैष ज्योति'रिति तदनुवादवैयर्थ्यात् ज्यौतिष्टोमिकद्वादशशतदक्षिणायाः सहस्रदक्षिणाया विकल्पप्रसङ्गाच्च। तत्रैष इति सर्वनाम्नः प्रस्तोष्यमाणपरत्वमगत्या कल्पितम्। इह तु विपरीतम्। ज्योतिश्शब्दस्य हि सर्वावभासके परश्वर एव स्वारस्यं न त्वादित्यादिषु। सकललोकव्यापिदीप्तियुक्तज्योतिष्ट्वेनानुवादश्च उपासनाविशेषार्थ इति न वैयर्थ्यम्। नाप्यत्र विधीयमानस्य कस्य चिद्गुणस्य केनचिद्विरोधिगुणेन

विकल्पः प्रसज्यते। तथाप्यथशब्देनाधिकारार्थेन प्रकरणविच्छेदात् सर्वनाम्नः प्रकृतपरत्वं न सम्भवतीति चेन्न। तस्य कांस्यभोजिन्यायेन पूर्वप्रकृतापेक्षार्थत्वोपपत्तेः तस्य पूर्वोपासनान्वितब्रह्मगुणानां ज्योतिरुपासनायामप्यन्वयसमर्पकतया साफल्याच्च। इदमारभ्यत इत्यनुक्त्वाप्यारम्भसम्भवेन आरम्भापरपर्यायाधिकारप्रतिपादनस्य श्रोतृचित्तसमाधानमात्रफलस्य निष्फलप्रायत्वात्। 'अथैष ज्योति'रित्यत्र तु संज्ञाभेदादिभिः कर्मभेदनिश्चयात् पूर्वप्रकृतापेक्षार्थत्वं पूर्वपक्षितं न सम्भवतीत्यगत्या तत्राधिकारार्थत्वमाश्रितम्। न चेहाधिकारार्थत्वस्य सर्वथैवासम्भवोऽपि। प्रकृतं ब्रह्म अविहायैव तत्रोपासनान्तराधिकारार्थत्वसम्भवात्। तस्मात्सर्वनाम्नस्तत्समानाधिकरणज्योतिःपदस्य च प्रकृतत्रिपात्पुरुषपरत्वात् ज्योतिषि निजैकांशसमाप्तसकलप्रपञ्चहेतोस्सर्वोत्तरत्वहेतोश्च नासिद्धिः। अथशब्दस्य पूर्वप्रकृतार्थापेक्षित्वाच्च न ज्योतिःश्रुतिस्वारस्यहानिः। तथापि यच्छब्दयोगेन प्रसिद्धवदनूद्यमानसकललोकव्यापिदीप्तिशालिज्योतिःष्ट्वमादित्यपरिग्रहइव पूर्वप्रकृतार्थपरिग्रहे न सम्भवति। पूर्वं तत्र तस्यावर्णितत्वादिति चेत्। उच्यते। निजैकांशसमाप्तसकलभूतत्वहेतुना त्रिपात्पुरुषे वर्णितेन ज्योतिषः परमेश्वरत्वं त्रिपात्पुरुषेण सहैव सिद्ध्यति। तस्य परमेश्वरत्वाभावे तदभिन्नतया प्रत्यभिज्ञायमानस्य ज्योतिषस्तदसम्भवात्। अपि च 'त्रिपादस्यामृतं दिवी' त्येतदनन्तरं 'यद्वैतद्ब्रह्मे'ति वाक्ये प्रकृतं त्रिपात्पुरुषं तत्पदेन निर्दिश्य तद्विषयतया प्रयुक्तात्तदनन्तरं प्रागादिहृदयसुषिरवर्तिप्राणाद्युपासनानां प्रकृतत्रिपात्पुरुषोपासनाङ्गानां विधानानन्तरं 'ते वा एते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपा' इति तेषां प्राणादीनां हृदयकमलान्तर्ध्यातव्यपरमाकाशाख्य-स्वर्गलोकरूपप्रकृतत्रिपात्पुरुषराजधानीद्वारपालकत्वकीर्तने तद्विषयकतया प्रयुक्ताश्च ब्रह्मेति परमेश्वराभिधानादपि त्रिपात्पुरुषस्य परमेश्वरत्वं सिद्ध्यति। इदमपि 'चरणाभिधाना'दिति सूत्रांशेन विवक्षितम्। चरणत्रयरूपस्य पुरुषस्य ब्रह्मेति परमेश्वरवाचिना शब्देनाभिधानादित्यर्थः। एवं त्रिपात्पुरुषस्य परमेश्वरत्वसिद्धौ तद्विषयत्वेन सम्प्रतिपन्नाभि'स्तस्य भासा सर्वमिदं विभाति तदेव ज्योतिषां ज्योति'रित्यादि श्रुतिभिस्तस्मिन्प्रसिद्धस्य सकललोकव्यापिदीप्तिशालिज्योतिष्ट्वस्यानुवाद उपपद्यते। एवं दिवः परस्य ज्योतिषः परमेश्वरत्वसिद्धौ तस्य जाठराग्निसामानाधिकरण्यं नामब्रह्मादिसामानाधिकरण्यवदृष्टिविधानार्थत्वेनोपपादनीयम्। ननु किमर्थमेवमुपपाद्यते। जाठराग्नि-शरीरकपरमेश्वरोपासनाविधानमस्तु प्रसिद्धतरसकललोकव्यापिदीप्तिमदादित्यशरीरक-परमेश्वरोपासनाविधानं वास्तु। माभूत्कल्पितार्थविषयोपासनाविधानं 'नाम ब्रह्मेत्युपास्ते' इत्यादिवदितिशिरस्कत्वाभावादित्याशङ्क्याह-**नैतत्संभवतीति।** दृष्टश्रुतत्वरूपबलवल्लिङ्गसत्त्वात् जाठराग्निविषयैव शङ्का निराकार्या। आदित्यविषया तु मन्देति सूचनाय जाठराग्निसूर्ययोरित्यल्पाच्तरस्यापि सूर्यशब्दस्य पश्चान्निवेशः। न चासाधुत्वमपि। 'लक्षणहेत्वोः क्रियाया' इति (पा०३-२-१२६) सूत्रप्रयोगदर्शनात्। **परिच्छिन्नत्वादिति।** तयोः परिच्छिन्नत्वे तत्र

व्यवस्थितस्य परमेश्वरस्यापि सार्वात्म्यं न सम्भवतीति भावः।। उत्तरसूत्रं तदुद्भाव्यशङ्काप्रदर्शनपूर्वकमवतारयति-**पूर्वमिति।** ननु अनुपदमेवोक्तं जाठराग्निसूर्ययोः परिच्छिन्नत्वात्तदवच्छिन्नस्य परमेश्वरस्यापि सार्वात्म्यं न सम्भवतीति कथं गायत्र्या एव सर्मात्मतया प्रतिपादनमिहाशङ्क्यते। उच्यते। इह सर्वात्मत्वकीर्तनं 'आपो वा इदं सर्व'मित्यपां सर्वात्मकत्वकीर्तनमिव स्तुत्यर्थमिति शङ्कावादिनोऽभिप्रायः। तथाहि-'गायत्री वा इदं सर्वं भूतं यदिदं किंच वाग्वै गायत्री वाग्वा इदं सर्वं भूतं गायति च त्रायते च। या वै सा गायत्री इयं वाव सा येयं पृथिव्यस्यां हीदं सर्वं भूतं प्रतिष्ठितमेतामेव नातिशीयते। या वै सा पृथिवी इयं वाव सा यदिदमस्मिन्पुरुषे शरीरमस्मिन्हीमे प्राणाः प्रतिष्ठिताः एतदेव नातिशीयन्ते। यद्वैतत्पुरुषे शरीरमिदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे हृदयमस्मिन्हीमे प्राणाः प्रतिष्ठिताः एतदेव नातिशीयन्ते। सैषा चतुष्पदा षड्विधा गायत्री'ति सन्दर्भेऽस्मिन्नादिमध्यावसानेष्वभ्यस्ता गायत्रीश्रुतिस्सर्वात्मत्वलिङ्गात्प्रबला। न च तथाभूताया अप्याकाशश्रुतेरनन्तत्वलिङ्गमिवैतदस्या बाधकमिति वक्तुं शक्यम्। तद्वदनन्यथासिद्धत्वाभावात् प्रत्युत गायत्री श्रुतेरेवानन्यथासिद्धत्वात्। न खल्वियमाकाशश्रुतिरिव ब्रह्मण्यौपचारिकीति वक्तुं शक्यते। 'वाग्वै गायत्री' त्याग्रिमव्याख्याने 'वाग्वा इदं सर्वं भूतं गायति च त्रायते चेति'वाचि यौगिकत्वकीर्तनेन विरोधाच्चतुष्पदेति टाबन्तनिर्देशेन विरोधाच्च। 'टाबृची'ति (पा० ४-१-९) ऋच्यभिधेयायामेव हि टाप्प्रत्ययो विहितः। अन्यत्र चतुष्पादिति भाव्यम्। त्रिपादितिवत्। न चात्र गायत्रीशब्दः तच्छरीरकपरमेश्वरपर्यन्त इत्यभ्युपगमेनापि सार्वात्म्यश्रवणनिर्वाहः। गायत्र्यामिव तदवच्छिन्नेऽपि तदसम्भवात्। तावत्पर्यंतं गत्वापि स्तावकत्वाभ्युपगमे प्रसिद्धतरे छन्दस्येव सार्वात्म्यश्रवणस्य स्तावकतास्त्विति। नन्वस्तु षड्विधा गायत्रीत्येतत्पर्यन्तः सन्दर्भो गायत्रीपरः। तदनन्तर'स्तावानस्ये'त्यादिसन्दर्भः परमेश्वरपर एव। तत्र गायत्रीप्रसङ्गाभावेन सर्वभूतपादत्वलिङ्गस्य ब्रह्मश्रुत्योश्च बाधनायोगात्। तथापि गायत्रीप्रकरणमनुवर्तत इति चेन्न। तस्य प्रबलश्रुतिलिङ्गबाधितस्य विच्छेदोपपत्तेरित्याशङ्क्याह-**प्रकरणादिष्विति।** 'षड्विधा गायत्री' त्येतदनन्तरं 'तदेतदृचाभ्यनूक्त' मित्युक्तार्थविषयत्वेनावतारिताया: 'तावानस्य महिमा। अतो ज्यायांश्च पुरुषः। पादोऽस्य सर्वाभूतानि। त्रिपादस्यामृतं दिवी' ति ऋचः तदेकविषयस्य 'यद्वैतद्ब्रह्मे' त्याद्यनन्तरसन्दर्भस्य च गायत्रीविषयत्वमावश्यकमिति श्रुतिवाक्येनैव सङ्घटितं प्रकरणमिदमनन्यथासिद्धम्। अतस्तदनुसारेण सर्वभूतपादत्वमपि स्तावकत्वेन नेतव्यम्। ब्रह्मश्रुती वेदविषयत्वेन नेतव्ये इति भावः। ननु 'तदेतदृचाभ्यनूक्त'मिति वाक्यं पूर्वोत्तरसन्दर्भयोरेकविषयत्वघटकमिति न युज्यते। तथा सति हि तत्र तत्पदं पूर्वसन्दर्भप्रतिपादितं गायत्र्याश्चतुष्पदत्वषड्विधत्वरूपमर्थजातं परामृशेत् गायत्रीमेव वा। नाद्यः। उत्तरत्र षाड्विध्योक्त्यदर्शनात् पादचतुष्टयस्यापि गायत्र्यां भूतपृथिवीशरीरहृदयरूपस्य प्रतिपादनमिहान्यादृशस्येति भेदात्। न द्वितीयः। नपुंसकलिङ्गविरोधात्। तस्मादत्र वाक्ये तत्पदमगत्या

'यद्वैतद्ब्रह्मे'ति प्रस्तोष्यमाणब्रह्मपरं वाच्यमिति नैतत्पूर्वोत्तरसन्दर्भयोरेकविषयत्वघटकमिति चेत्। उच्यते। सर्वनाम्नो बुद्धिसन्निहितप्रस्तुतपरत्वे सम्भवति तदसन्निहितप्रस्तोष्यमाणपरत्वमयुक्तमिति प्रागुपपादितम्। सम्भवति च तदित्यत्र प्रधानस्य प्रकृत्यंशस्य प्रस्तुतगायत्रीपरत्वं तदनुसारेण पाशबहुत्ववल्लिङ्गसर्वनामरूपं नपुंसकलिङ्गं कथञ्चिन्नेतुं युक्तम्। तस्मात्प्रकृतस्य छन्दस एव 'तावानस्ये'त्यादिसन्दर्भेऽभिधानात् द्युसम्बन्धेन प्राक्प्रस्तुतः परमेश्वरः प्रत्यभिज्ञाप्यत इत्येतदयुक्तमिति शङ्कार्थः।।सू।। **छन्दोऽभिधानान्नेतिचेतिचेन्न** तथा चेतोऽर्पणनिगदात्तथा हि दर्शनम्।।२६।। **अत्राभिधानमिति।** 'तावानस्ये' त्यादिसन्दर्भे अभिधानमित्यर्थः। यद्यपि'तावानस्ये' तिमन्त्रे गायत्र्यभिधायकशब्दो नास्तीति न तत्प्रतिपादनमत्र शङ्कनीयम्। तथाप्यग्रे ब्रह्मश्रुत्योर्वेदवाचितया छन्दोऽभिधायकत्वमभिप्रेतं शङ्कावादिनेत्येतदपि दर्शयितुं सूत्रभाष्ययोरभिधानग्रहणम्। सौत्रेण नञ विवक्षितां छन्दोऽभिधानानुपपत्तिमाह-**नैतदिति।** एत 'च्चरणाभिधाना' दिति पूर्वसूत्रोपन्यस्तं 'तावानस्ये'ति मन्त्रेणोच्यमानं सर्वभूतात्मत्वं गायत्र्याख्यस्य छन्दोमात्रस्य न सम्भवतीति योजना। अत्रायमाशयः। 'तावानस्ये'ति पुरुषसूक्तपठितो मन्त्र इह प्रकृतार्थविषयत्वेनावतारितः। पुरुषसूक्ते च सहस्रशीर्षत्वादिविशिष्टपुरुषविशेषविषये नास्ति छन्दसः प्रतिपाद्यत्वप्रसक्तिः प्रत्युत 'छन्दांसि जज्ञिरे तस्मा'दिति सर्वेषां छन्दसां तत्प्रतिपाद्यपुरुषकार्यकोटावाम्नानं दृश्यते। अतस्तत्र सर्वभूतपादत्वकथनं न गायत्रीस्तावकत्वेन योजयितुं शक्यमिति गायत्रीश्रुतिरप्यनन्यथासिद्धा नान्यत्र योजयितुं शक्येत्याशङ्क्य तदनन्यथासिद्ध्युपपादकत्वेन तथेत्यादिसूत्रांशं व्याचष्टे-किं तु **गायत्रीति।** अनेन तथेतिशब्दो गायत्रीसादृश्यपरः। चेतोऽर्पणमनुसन्धानं निगद उपदेश इति व्याख्यातम्। एवं च गायत्रीसादृश्यानुसन्धानार्थं परमेश्वरं गौणोऽयं गायत्रीशब्द इत्युक्तं भवति। किं तद्गायत्रीसादृश्यमित्याकाङ्क्षायामाह-**यथेति।** चतुर्विंशत्यक्षरा गायत्री सा षडक्षरैः पादैश्चतुष्पदाप्यस्ति (यथा इन्द्रः शचीपतिर्बलेनपीडितः दुश्चयवनो वृषासमित्सुसाभहिरिति), तद्वत्परमेश्वरोऽपि चतुष्पादिति तत्सादृश्यमित्यर्थः। पादचतुष्टयवत्त्वेन प्रसिद्धेषु छन्दोऽन्तरेषु गवादिषु च सत्स्वपि क्वचित्तथात्वेन दृष्टाया गायत्र्या उपादानं तत्सादृश्यरूपमेव ब्रह्मणश्चतुष्पात्त्वमनुसन्धातव्यमित्येतदर्थं यथा भूयोऽङ्गकलापवत्त्वेन प्रसिद्धेष्विष्टिपशुसोमेषु सत्स्वपि कौण्डपायिनामयने कर्मणि अग्निहोत्रनामोपादानमग्निहोत्रसादृश्यरूपमेवाङ्गजातमनुष्ठातव्यमित्येतदर्थमिति भावः। यद्वा प्रसिद्धां त्रिपादमेव गायत्रीं षष्टिस्त्रिष्टुभो माध्यन्दिनं सवनमित्युक्तरीत्या षट्सु षट्स्वक्षरेषु पादकल्पनया चतुष्पदामनुसन्धाय तत्सादृश्यरूपं ब्रह्मणि चतुष्पात्त्वमनुसन्धेयमित्येतदर्थं प्रसिद्धगायत्रीसादृश्यपरमेवेदं भाष्यं व्याख्यातव्यम्। एवं च यथा 'गम्भीरायां नद्यां घोष'इत्यत्र गम्भीरत्वान्वितनदीसम्बन्धित्वलाभार्थं गम्भीरायामिति नद्या विशेषणं न तु लक्ष्यस्य तीरस्य। एवं चतुष्पादत्वापन्नगायत्रीसादृश्यलाभार्थं चतुष्पदेत्येतद्गायत्र्या विशेषणं न तु लक्ष्यस्य ब्रह्मण इति चतुष्पदेत्यस्य टाबन्तत्वमुपपद्यते। अनया

दिशा 'वाग्वै गायत्री वाग्वा इदं सर्वं भूतं गायति च त्रायते चे'त्येतदपि वाक् खलु सर्वं गायत्यभिधत्ते हिताहितोपदेशेन त्रायते च अतो वाग्रूपा गायत्री गानत्राणसाधनीत्येव वाग्रूपत्वं गायत्रीशब्दयौगिकार्थं च प्रसिद्धगायत्र्यामनुसन्धाय तत्सादृश्यं ब्रह्मण्यनुसन्धातव्यमित्येतदर्थं वाग्वा इत्यादिकं गायत्र्या विशेषणं न ब्रह्मण इति व्याख्याने यौगिकार्थप्रदर्शनमप्युपपद्यत इति तदुपपत्तिर्भाष्ये न प्रदर्शिता। 'तथाहिदर्शन'मिति सूत्रांशं व्याचष्टे-**तथेति।** 'वायुर्वाव संवर्गः प्राणोवा व संवर्ग' इति संवर्गविद्यायां 'वायुस्तस्मिन्नप्ययवन्तोऽग्निस्सूर्यश्चन्द्र आपश्चेत्यधिदैवतं पञ्च। प्राणस्तस्मिन्नप्ययवन्ति वाङ्मनश्चक्षुश्श्रोत्रं चेत्यध्यात्म पंच। एतेषु दशसु संख्यासाम्यरूपदशाक्षरछन्दस्सादृश्यानुसन्धानार्थं तद्वाचिनो विराट्छब्दस्य प्रयोगे दृश्यते। एवमिहापि ब्रह्मणि गायत्रीशब्दस्य प्रयोग इत्यर्थः। इदमत्र वक्तुं शक्यम्। गायत्रीशब्दोऽत्र प्रकरणे गायत्र्यवच्छिन्नपरमेश्वरपर इति तत्रावच्छिन्नरूपेऽनन्वय्यपि स्वार्वात्म्यमनवच्छिन्नस्वरूपे तस्मिन्वस्तुगत्यान्वेत्येव। यथा दहरविद्यायां दहरोऽस्मिन्नन्तराकाश' इति हृदयावच्छेद्रादल्पत्वेनोक्ते तस्मि'न्यावान्वा अयमाकाश'इत्युच्यमानं भूताकाशसाम्यं यथा वा शाण्डिल्यविद्यायाम् 'एष आत्मान्तर्हृदयेऽणीया'निति हृदयावच्छेदादणीयस्त्वेनोक्ते तस्मि'न्नेष म आत्मान्तर्हृदये ज्यायान्दिव' इत्यादिनोच्यमानं ज्यायस्त्वम्। अवश्यं चात्राप्येवमेव सार्वात्म्यमुपपादनीयम्। अत्रापि हि गायत्र्याख्यः परमेश्वरो हृदय एवोपासनीय इति हृदयसुषिरेषूपासनीयानां प्राणादीनां तद्द्वारपालकत्वकीर्तनादवसीयते। सूत्रमप्यस्मिन्नर्थे महद्भिर्योजितम्। तथा तेन गायत्र्यवच्छिन्नप्रकारेण ध्यानोपदेशात्। तथान्यत्रा'प्येतं ह्येव बह्वृचाः महत्युक्थे मीमांसन्त' इत्यादौकार्यविशेषावच्छिन्नपरमेश्वरोपासनदर्शनमस्तीति। पूर्वयोजनायां च नैवं विषयवाक्यस्वारस्यानुगुण्यमस्ति। तथाहि-गायत्रीशब्दस्य परमेश्वरे गौणतायां गायत्रीगतं पादचतुष्टयवत्त्वरूपं सादृश्यं निमित्तमिति कुतोऽवगन्तव्यम्। न तावच्चतुष्पदेत्यस्य गायत्रीछन्दोरूपसादृश्यप्रतियोगिविशेषणत्वबलात् तस्य भूतपृथिवीशरीरहृदयात्मकपादचतुष्टय-वत्त्वार्थकत्वस्य छन्दोरूपगायत्र्याश्चाग्रिमसूत्रे सूत्रकृतैव वक्ष्यमाणत्वात्। नापि स्वतःप्रसिद्धिबलात् गायत्रीषु त्रिपादत्वस्यैव। प्रसिद्धेः। न च कविसमयप्रसिद्धिबलात्। कीर्तिधावल्यादिष्विव गायत्रीचतुष्पादत्वे तदसम्प्रतिपत्तेः। न च क्वचिद्दर्शनबलात्। प्रायिकस्य प्रसिद्धसादृश्यस्यैव सादृश्योक्तिषु ग्राह्यत्वात्। अन्यथा 'वराहं गावोऽनुधावन्ती'त्यत्रवायसस्यापि वराहशब्दार्थत्वापत्त्या यववराहाधिकरणविरोधप्रसङ्गात्। औपधिक्याः कस्याश्चिद्गोर्द्विपात्त्वसम्भवेन वायसे तत्सादृश्योपपत्तेः। एतेन प्रसिद्धगायत्र्या गायत्र्यां चतुष्पादत्वकल्पनापक्षोऽप्यपास्तः। प्रसिद्धायां गवि वामदक्षिणभागस्थयोः द्वयोर्द्वयोः पादयोः ऐक्यारोपेण द्विपात्त्वकल्पनया वायसे तत्सादृश्यस्याप्युपपादनसम्भवेन पूर्वोक्तविरोधप्रसङ्गात्। तस्मादिह गायत्रीशब्दस्य गायत्रीशरीरक-परमेश्वरपरत्वस्योपपन्नत्वात्तद्विषयतया सूत्रव्याख्यानस्यापि भाष्यान्तरदृष्टस्योपलक्षणमिदं भाष्यकारकृतं

सूत्रव्याख्यानमिति द्रष्टव्यम्। गायत्रीशब्दस्य सादृश्यपरत्वेन व्याख्यानेऽपि हि पादचतुष्टयवत्त्वेन सादृश्यवर्णनं षाड्विध्येन सादृश्यास्याप्युपलक्षणमित्यन्योपलक्षणत्वमाश्रयणीयम्। सहोपात्तयोश्चतुष्पदत्वषाड्विध्ययोरन्यतरेणैव सादृश्यं विवक्षणीयमित्यत्र विनिगमनाविरहात् षट्सु षट्स्वक्षरेषु कल्पितैः पादैष्चतुष्पादत्वस्येव कल्पितेषु चतुर्षु पादेषु प्रतिपादं षड्भिष्षड्भिरक्षरैः प्रसिद्धेषु त्रिषु पादेषु षड्भिरर्धैर्वा षाड्विध्यस्यापि सम्भवाच्च। लिङ्गेनेति। ब्रह्मश्रुत्योरप्युपलक्षणम्। प्राथमिकत्वादनन्यथासिद्धत्वाच्च लिङ्गस्य विशिष्य ग्रहणम्। **गायत्रीप्रकरणबाध इति।** गायत्री शब्दस्य परमेश्वरपरतयोपपादितत्वा'द्गायत्री वा इदं सर्वं भूत'मित्यादिसन्दर्भस्य गायत्रीप्रकरणत्वबाध इत्यर्थः।। एवं गायत्रीविषयसन्दर्भेकवाक्यतया श्रुतिसङ्घटिते तदुपरितनसन्दर्भे दृष्टैः श्रुतिलिङ्गैर्गायत्री न छन्दः परमेश्वर इति प्रसाधितम्। तत्सन्दर्भगतलिङ्गबलेनापि तथाऽवसीयत इत्येतदर्थत्वेनोत्तरसूत्रमवतारयति।।सू।। **श्रूतादिपादव्यपदेशोपपत्तेश्चैवम्।।२७।।**

इति शिवार्कमणिदीपिका दशमं ज्योतिरधिकरणम् समाप्तम्।।

अथ प्रतर्दनाधिकरणम्॥ सू॰ २८–३१॥

शाङ्करभाष्यम्

प्राणस्तथाऽनुगमात्।।२८।। अस्ति कौषीतकिब्राह्मणोपनिषदीन्द्रप्रतर्दनाख्यायिका–"प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण चे" इत्यारभ्याम्नाता। तस्यां श्रूयते–"स होवाच प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्वे" ति। तथोत्तरत्रापि "अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयती" (कौ॰ ३/१/२/३) ति। तथा "न वाचं विजिज्ञासीत वक्तारं विद्यादि" त्यादि। अन्ते च "स एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृतः" (कौ॰ ३।८।) इत्यादि।।

तत्र संशयः–किमिह प्राणशब्देन वायुमात्रमभिधीयते, उत देवतात्मेति, जीवः, अथवा परं ब्रह्मेति।। ननु–"अत एव प्राण" इत्यत्र वर्णितं प्राणशब्दस्य ब्रह्मपरत्वम्। इहापि च ब्रह्मलिङ्गमस्ति–"आनन्दोऽजरोऽमृत" इत्यादि। कथमिह पुनः संशयः संभवति? अनेकलिङ्गदर्शनादिति ब्रूमः। न केवलमिह ब्रह्मलिङ्गमेवोपलभ्यते। सन्ति हीतरलिङ्गान्यपि। "मामेव विजानीही" (कौ॰ ३/१/) तीन्द्रस्य वचनं देवतात्मलिङ्गम्। "इदं शरीरं परिगृह्योत्थापयती" ति प्राणलिङ्गम्। "न वाचं विजिज्ञासीत वक्तारं विद्यादि" त्यादि जीवलिङ्गम्। अत उपपन्नः संशयः। अत्र प्रसिद्धेर्वायुः प्राणः।। इति प्राप्ते उच्यते–प्राणशब्दं ब्रह्म विज्ञेयम्। कुतः? तथाऽनुगमात्। तथाहि–पौर्वापर्येण पर्यालोच्यमाने वाक्ये पदार्थानां समन्वयो ब्रह्मप्रतिपादनपर उपलभ्यते। उपक्रमे तावत् "वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस" इति तस्मै। हितमत्वेनोपदिश्यमानः प्राणः कथं परमात्मा न स्यात्? न ह्यन्यत्र परमात्मज्ञानाद्धिततमप्राप्तिरस्ति; "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाये" (श्वेता॰ ३/८) इत्यादिश्रुतिभ्यः। तथा "स यो मां वेद न वै तस्य केनचन कर्मणा लोको मीयते न स्तेयेन न भ्रूणहत्यये" त्यादि च ब्रह्मपरिग्रहे घटते। ब्रह्मविज्ञानेन हि सर्वकर्मक्षयः प्रसिद्धः–"क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावर" (मु॰ २/२/८) इत्याद्यासु श्रुतिषु। प्रज्ञात्मत्वं च ब्रह्मपक्ष एवोपपद्यते। नह्यचेतनस्य वायोः प्रज्ञात्मत्वं संभवति।

तथोपसंहारेऽपि–''आनन्दोऽजरोऽमृत'' इत्यानन्दत्वादीनि न ब्रह्मणोऽन्यत्र सम्यक् संभवन्ति। ''स न साधुना कर्मणा भूयान् भवति नो एवासाधुना कर्मणा कनीयानेष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते। एष उ एवासाधु कर्म कारयति तं यमेभ्यो लोकेभ्योऽधो निनीषत'' इति, ''एष लोकाधिपतिरेष लोकेश'' इति च। सर्वमेतत्परस्मिन् ब्रह्मण्याश्रीयमाणेऽनुगन्तुं शक्यते, न मुख्ये प्राणे। तस्मात्प्राणो ब्रह्म।।२८।।

न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन्।।२९।। यदुक्तं प्राणो ब्रह्मेति, तदाक्षिप्यते–न परं ब्रह्म प्राणशब्दम्। कस्मात्? वक्तुरात्मोपदेशात्। वक्ता हीन्द्रो नाम कश्चिद्विग्रहवान् देवताविशेषः स्वमात्मानं प्रतर्दनायाचचक्षे–''मामेव विजानीही'' इत्युपक्रम्य ''प्राणोऽस्मि प्रज्ञात्मे'' त्यहङ्कारवादेन। स एष वक्तुरात्मत्वेनोपदिश्यमानः प्राणः कथं ब्रह्म स्यात्? नहि ब्रह्मणो वक्तृत्वं संभवति; ''अवागमना'' (बृह० ३/८/८) इत्यादिश्रुतिभ्यः। तथा विग्रहसम्बन्धिभिरेव ब्रह्मण्यसंभवद्भिर्धर्मैरात्मानं तुष्टाव–''त्रिशीर्षाणं त्वाष्ट्रमहनमरुन्मुखान्यतीञ्शालावृकेभ्यः प्रायच्छम्'' इत्येवमादिभिः। प्राणत्वं चेन्द्रस्य बलवत्त्वादुपपद्यते। ''प्राणो वै बलम्'' इति हि विज्ञायते। बलस्य चेन्द्रो देवता प्रसिद्धा। या च काचिद् बलकृति इन्द्रकर्मैव तदिति हि वदन्ति प्रज्ञात्मत्वमप्यप्रतिहतज्ञानत्वाद्देवतात्मनः संभवति। अप्रतिहतज्ञाना देवता इति हि वदन्ति। निश्चिते चैंव देवतात्मोपदेशे हिततमत्वादिवचनानि यथासंभवं तद्विषयाण्येव योजयित्व्यानि। तस्माद्वक्तुरिन्द्रस्यात्मोपदेशान्न प्राणो ब्रह्मेत्याक्षिप्य प्रतिसमाधीयते–*अध्यात्मसंबन्धभूमा ह्यस्मिन्न् इति*।। अध्यात्मसम्बन्धः=प्रत्यगात्मसम्बन्धः, तस्य भूमा=बाहुल्यमअस्मिन्नध्याय उपलभ्यते। ''यावद्ध्यस्मिञ्शरीरे प्राणो वसति तावदायुरि'' ति प्राणस्यैव प्रज्ञात्मनः प्रत्यग्भूतस्यायुः प्रदानोपसंहारयोः स्वातन्त्र्यं दर्शयति, न देवताविशेषस्य पराचीनस्य। तथाऽस्तित्वे च प्राणानां निः श्रेयसमित्यध्यात्ममेवेन्द्रियाश्रयं प्राणं दर्शयति। तथा ''प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयती'' (कौ० ३/३) इति ''न वाचं विजिज्ञासीत वक्तारं विद्यादि'' ति चोपक्रम्य ''तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेअर्पिता एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृत'' इति विषयेन्द्रियव्यवहारानभिभूतं प्रत्यगात्मानमेवोपसंहरति। ''स म आत्मेति विद्यादि'' ति चोपसंहारः प्रत्यगात्मपरिग्रहे साधुः, न पराचीनपरिग्रहे। ''अयमात्मा ब्रह्म सर्वानुभूरि'' (बृह० २/५/१९) ति च श्रुत्यन्तरम्। तस्मादध्यात्मसंबन्धबाहुल्याद् ब्रह्मोपदेश एवायं न देवतात्मोपदेशः।।२९।।

कथं तर्हि वक्तुरात्मोपदेशः? *शास्त्रदृष्ट्या तूपदेशो वामदेववत्*।।३०।। इन्द्रो नाम देवतात्मानं स्वमात्मानं परमात्मत्वेनाहमेव परं ब्रह्मेत्यार्षेण दर्शनेन यथाशास्त्रं पश्यन्नुपदिशति स्म–"मामेव विजानीही" ति। यथा "तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च" इति, तद्वत्; "तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवदि" (बृ० १/४/१०) ति श्रुतेः।।

यत्पुनरुक्तम्–"मामेव विजानीही" त्युक्त्वा विग्रहधर्मैरिन्द्र आत्मानं तुष्टाव त्वाष्ट्रवधादिभिः–इति, तत्परिहर्तव्यम्। अत्रोच्यते–न त्वाष्ट्रवधादीनां विज्ञेयेन्द्रस्तुत्यर्थ-त्वेनोपन्यासः–यस्मादेवंकर्माऽहं तस्मान्मां विजानीहीति। कथं तर्हि? विज्ञानस्तुत्यर्थत्वेन–यत्कारणं त्वाष्ट्रवधादीनि साहसान्युपन्यस्य परेण विज्ञानस्तुतिमनुसन्दधाति–"तस्य मे तत्र लोम च न मीयते स यो मां वेद न ह वै तस्य केन च कर्मणा लोको मीयत" इत्यादिना। एतदुक्तं भवति–यस्मादीदृशान्यपि क्रूराणि कर्माणि कृतवतो मम ब्रह्मभूतस्य लोमापि न हिंस्यते, स योऽन्योऽपि मां वेद न तस्य केनचिदपि कर्मणा लोको हिंस्यत इति। विज्ञेयं तु ब्रह्मैव "प्राणोऽस्मि प्रज्ञात्मे" ति वक्ष्यमाणम्। तस्माद् ब्रह्मवाक्यमेतत्।।३०।।

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्।।३१।। यद्यप्यध्यात्म-संबन्धभूमदर्शनान्न पराचीनस्य देवतात्मन उपदेशः ; तथापि न ब्रह्मवाक्यं भवितुमर्हति। कुतः? जीवलिङ्गाद मुख्यप्राणलिङ्गाच्च। जीवस्य तावदस्मिन्वाक्ये विस्पष्टं लिङ्गमुपलभ्यते–"न वाचं विजिज्ञासीत वक्तारं विद्यादि" त्यादि। अत्र हि वागादिभिः करणैर्व्यापृतस्य कार्यकरणाध्यक्षस्य जीवस्य विज्ञेयत्वमभिधीयते। तथा मुख्यप्राणलिङ्गमपि–"अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयती" ति। शरीरधारणं च मुख्यप्राणस्य धर्मः ; प्राणसवादे वागादीन् प्राणन्प्रकृत्य–"तान्वरिष्ठः प्राण उवाच मा मोहमापद्यथाऽहमेवैतत्पञ्चधाऽऽत्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामि" (प्र० २/३) ति श्रवणात्। ये तु "इमं शरीरं परिगृह्य" ति पठन्ति, तेषामिमं जीवमिन्द्रियग्रामं वा परिगृह्य शरीरमुत्थापयतीति व्याख्येयम्। प्रज्ञात्मत्वमपि जीवे तावच्चेतनत्वादुपपन्नम्। मुख्येऽपि प्राणे प्रज्ञासाधनप्राणान्तराश्रयत्वादुपपन्नमेव। जीवमुख्यप्राणपरिग्रहे च प्राणप्रज्ञात्मनोः सहवृत्तित्वेनाभेदनिर्देशः, स्वरूपेण च भेदनिर्देश इत्युभयथापि निदश उपपद्यते–'यो वै प्राणः सा प्रज्ञा या वै प्रज्ञा स प्राणः सह ह्येतावस्मिञ्शरीरे वसतः सहोत्क्रामत" इति। ब्रह्मपरिग्रहे तु किं तस्माद्भिद्येत? तस्मादिह जीवमुख्यप्राणयोरन्यतर उभौ वा प्रतीयेयाताम्, न ब्रह्मेति चेत्, नैतदेवम्; उपासात्रैविध्यात्। एवं सति त्रिविधमुपासनं प्रसज्यते–जीवोपासनं मुख्यप्राणोपासनं ब्रह्मोपासनं चेति।

न चतदेकस्मिन् वाक्येऽभ्युपगन्तुं युक्तम्। उपक्रमोपसंहाराभ्यां हि वाक्यैकत्वमवगम्यते। "मामेव विजानीही" त्युपक्रम्य "प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्वे" त्युक्त्वा, अन्ते "स एष प्राण एव प्रज्ञात्माऽनन्दोऽजरोऽमृत" इत्येकरूपावुपक्रमोपसंहारौ दृश्येते। तत्रार्थैकत्वं युक्तमाश्रयितुम्। न च ब्रह्मलिङ्गमन्यपरत्वेन परिणेतुं शक्यम्; दशानां भूतमात्राणां प्रज्ञामात्राणां च ब्रह्मणोऽन्यत्रार्पणानुपपत्तेः। आश्रितत्वाच्चान्यत्रापि ब्रह्मलिङ्गवशात्प्राणशब्दस्य ब्रह्मणि वृत्तेः। इहापि च हिततमोपन्यासादिब्रह्मलिङ्गयोगाद् ब्रह्मोपदेश एवायमिति गम्यते। यत्तु—मुख्यप्राणलिङ्गं दर्शितम्—"इदं शरीरं परिगृह्योत्थापयति"—इति, तदसत्; प्राणव्यापारस्यापि परमात्मायत्तत्वात्परमात्मन्युपचरितुं शक्यत्वात्, "न प्राणेन नापानेन मर्त्यो जीवति कश्चन। इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रिताव" (कठ० २/५//५) इति श्रुतेः। यदपि—"न वाचं विजिज्ञासीत वक्तारं विद्यादि" त्यादि जीवलिङ्गम्—दर्शितम्, तदपि न ब्रह्मपक्षं निवारयति। न हि जीवो नामात्यन्तभिन्नो ब्रह्मणः ; "तत्त्वमसि" "अहं ब्रह्मास्मि" इत्यादिश्रुतिभ्यः। बुद्ध्याद्युपाधिकृतं तु विशेषमाश्रित्य ब्रह्मैव सन् जीवः कर्ता भोक्ता चेत्युच्यते। तस्योपाधिकृतविशेषपरित्यागेन स्वरूपं ब्रह्म दर्शयितुं "न वाचं विजिज्ञासीत वक्तारं विद्यादि" त्यादिना प्रत्यगात्माभिमुखीकरणार्थमुपदेशो न विरुध्यते। "यद्वाचाऽनभ्युदितं येन वागभ्युद्यते। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत।।" (के० १/४) इत्यादि च श्रुत्यन्तरं वचनादिक्रियाव्यापृतस्यैवात्मनो ब्रह्मत्वं दर्शयति। यत्पुनरेतदुक्तम्—"सह ह्येतावस्मिञ्शरीरे वसतः सहोत्क्रामतः" इति प्राणप्रज्ञात्मनोर्भेददर्शनं ब्रह्मवादे नोपपद्यत इति, नैष दोषः ; ज्ञानक्रियाशक्तिद्वयाश्रययोर्बुद्धिप्राणयोः प्रत्यगात्मोपाधिभूतयोर्भेदनिर्देशोपपत्तेः। उपाधिद्वयोपहितस्य तु प्रत्यगात्मनः स्वरूपेणाभेद इति। अतः "प्राण एष प्रज्ञात्मे" त्येकीकरणमविरुद्धम्।।

अथवा—"नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्" इत्यस्यायमन्योऽर्थः—न ब्रह्मवाक्येऽपि जीवमुख्यप्राणलिङ्गं विरुध्यते। कथम्? उपासात्रैविध्यात्। त्रिविधमिह ब्रह्मोपासनं विवक्षितम्—प्राणधर्मेण प्रज्ञाधर्मेण स्वधर्मेण च। तत्र "आयुरमृतमुपास्स्वायुः प्राण" इति, "इदं शरीरं परिगृह्योत्थापयती" इति, "तस्मादेतदेवोक्थमुपासीते" ति च प्राणधर्मः। "अथ यथास्यै प्रज्ञायै सर्वाणि भूतान्येकीभवन्ति तद्व्याख्यास्याम" इत्युपक्रम्य "वागेवास्या एकमङ्गमदूदुहत्तस्यै नाम परस्तात्प्रतिविहिता भूतमात्रा प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोती" त्यादिः प्रज्ञाधर्मः। "ता वा एता दशैव भूतमात्रा अधिप्रज्ञं दश प्रज्ञामात्रा अधिभूतम्। यद्धि भूतमात्रा न स्युर्न प्रज्ञामात्राः स्युः। यद्धि प्रज्ञामात्रा न स्युर्न भूतमात्राः स्युः। न ह्यन्यतरतो रूपं किञ्चन सिद्ध्येत। नो

एतन्नाना। तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणे अर्पिताः स एष प्राण एव प्रज्ञात्मे'' त्यादिर्ब्रह्मधर्मः। तस्माद् ब्रह्मण एवैतदुपाधिद्वयधर्मेण स्वधर्मेण चैकमुपासनं त्रिविधं विवक्षितम्। अन्यत्रापि ''मनोमयः प्राणशरीरः'' (छा० ३/१४/२) इत्यादावुपाधिधर्मेण ब्रह्मण उपासनमाश्रितम्। इहापि तद्युज्यते ; वाक्यस्योपक्रमोपसंहाराभ्यामेकार्थत्वावगमात्, प्राणप्रज्ञाब्रह्मलिङ्गावगमाच्च। तस्माद् ब्रह्मवाक्यमेतदिति सिद्धम्।।३१।।

।।इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीशङ्करभगवत्पादकृतौ प्रथमाध्यायस्य प्रथमः पादः।।१–१।।

प्रदीपः

अत्रालोच्यमानानि प्राकरणिकानि वाक्यानीमानि कौषीतकिब्राह्मणतृतीयाध्यायगतानि। तानि यथा ''प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण च तं हेन्द्र उवाच प्रतर्दन वरं ते ददानीति स होवाच प्रतर्दनस्त्वमेव वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस इति तं हेन्द्र उवाच न वै वरं परस्मै वृणीते त्वमेव वृणीष्वेत्यवरो वै तर्हि किल मे इति होवाच प्रतर्दनोऽथो खल्विन्द्रः सत्यादेव नेयाय सत्यं हीन्द्रः स होवाच मामेव विजानीह्येतदेबाहं मनुष्याय हिततमं मन्ये यन्मां विजानीयां त्रिशीर्षाणं त्वाष्ट्रमहनमवाङ्मुखान्यतीन् शालावृकेभ्यः प्रायच्छं वह्वीः सन्धा अतिक्रम्य दिवि प्रह्लादादीनतृणामहमन्तरिक्षे पौलामान् पृथिव्यां कालकाश्यांस्तस्य तत्र न लोम च नामीयत स यो मां विजानीयाद् नास्य केनचन कर्मणा लोको मीयते न मातृवधेन न पितृवधेन न भ्रूणहत्यया नास्य पापं च न चकृषो मुखान्नीलं वेत्तीति॥१॥ स होवाच प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्वायुः प्राणः प्राणो वा आयुः प्राण उवाचामृतं यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुः प्राणेन ह्येवामुष्मिँल्लोकेऽमृतत्वमाप्नोति प्रज्ञया सत्यसंकल्पं स यो म आयुरमृतमित्युपास्ते सर्वमायुरस्मिन् लोक एवाप्नोत्यमृतत्वमक्षितिं स्वर्गे लोके तद्धैक आहुरेकभूयं वै प्राणा गच्छन्तीति न हि कश्चन शक्नुयात् सकृद्वाचा नाम प्रज्ञापयितुं चक्षुषा रूपं श्रोत्रेण शब्दं मनसा ध्यानमित्येकीभूयं वै प्राणा भूत्वा एकैकं सर्वाण्येवैतानि प्रज्ञापयन्ति वाचं वदतीं सर्वे प्राणा अनुवदन्ति चक्षुः पश्यत् सर्वे प्राणा अनुपश्यन्ति श्रोत्रं श्रृणवत् सर्वे प्राणा अनुश्रृण्वन्ति प्राणं प्राणन्तं सर्वे प्राणा अनुप्राणन्त्येवमुहैव तदिति हेन्द्र उवाचास्तीत्येव प्राणानां निः श्रेयसादानमिति॥२॥ जीवति वागपेतो मूकान् विपश्याम जीवति चक्षुरपेतोऽन्धान् विपश्याम जीवति श्रोत्रापेतो बधिरान् विपश्यामो जीवति बाहुच्छिन्नो जीवत्यूरुच्छिन्न इत्येवं हि पश्याम इत्यथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति तस्मादेनमेवोक्थमुपासीत यो वै प्राणः सा प्रज्ञा या प्रज्ञा स प्राणः स ह ह्येतावस्मिन् शरीरे वसतस्सहोत्क्रामतस्तस्यैषैव दृष्टिरेतद्विज्ञानं यत्रैतत् पुरुषः सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन् प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिः सहाप्येति चक्षुः सर्वै रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदा प्रतिबुद्ध्यते यथाऽग्नेऽर्ज्वलतो विस्फुलिङ्गा

विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकास्तस्यैषैव सिद्धिरेतद्विज्ञानं यत्रैतत् पुरुष आर्तो मरिष्यान्नाबल्यं न्येत्य मोहं नैति तदाहुरुदक्रामीत् चित्तं न श्रृणोति न पश्यति वाचा वदत्यथास्मिन् प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिः सहाप्येति चक्षुः सर्वै रूपैस्सहाप्येति... ... ... स यदा प्रतिबुद्धयते यथाऽग्नेर्ज्वलतः... ... ... लोकाः॥३॥ स यदाऽस्माच्छरीरादुत्क्रामति वागस्मात् सर्वाणि नामान्यभिविसृजते वाचा सर्वाणि नामान्याप्नोति... ... . .. मनसा सर्वाणि ध्यातान्याप्नोति सैषा प्राणे सर्वाप्तिर्यो वै प्राणः सा प्रज्ञा या वै प्रज्ञा स प्राणस्सह ह्येतावस्मिन् शरीरे वसतः सहोत्क्रामतोऽथ खलु प्रज्ञायां सर्वाणि भृतान्येकीभवन्ति तद्वयाख्यास्यामः, ...॥६॥ नहि प्रज्ञापेता धीः काचन सिद्धयेत्र प्रज्ञातव्यं प्रज्ञायेत॥७॥ न वाचं विजिज्ञासीत वक्तारं विद्यान्न गन्धं विजिज्ञासीत घ्राणं विद्यान्न रूपं विजिज्ञासीत रूपविदं विद्यान्न शब्दं विजिज्ञासीत श्रोतारं विद्यान्नान्नरसं विजिज्ञासीतान्नरसविज्ञातारं विद्यान्न कर्म विजिज्ञासीत कर्तारं विद्यात्, ... ता वा एता दशैव भूतमात्रा अधिप्रज्ञं दश प्रज्ञामात्रा अधिभूतं यद्धि भूतमात्रा न स्युर्न प्रज्ञामात्राः स्युर्यद्वा न प्रज्ञामात्रा न स्युर्न भूतमात्राः स्युः॥८॥ न ह्यन्यतरतो रूपं किञ्चन सिद्धयेन्नो एतन्नाना तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्रा प्रज्ञामात्रास्वर्पिता प्रज्ञामात्राः प्राणेऽर्पिता एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृतो न साधुना कर्मणा भूयान्नो एवासाधुना कर्मणा कनीयानेष ह्येवैनं साधु कर्म कारयति तं यमन्वानिनेषत्येष एवैनमसाधु कर्म कारयति तं यमेभ्यो लोकेभ्यो नुनुत्सत एष लोकपाल एष लोकाधिपतिरेष सर्वेश्वरस्स म आत्मेति विद्यात् स म आत्मेति विद्यादि''ति॥

अत्रेन्द्रेण मां विजानीहीत्युपदिश्य त्वाष्ट्रवधादिकर्तृत्व-तज्जन्यपापासंस्पर्शादिविग्रहधर्मा उपदिष्टाः। इदं तु देवतात्मनस्तस्यैवोपास्यत्वमिति प्रथमब्राह्मणेनावगम्यते। द्वितीयब्राह्मणेन तु-उपास्यस्य मांपदार्थस्य प्राणरूपत्वं प्रतिपाद्यते। तत्र प्रणस्य प्रज्ञात्मत्वामृतत्वादिवर्णनात् ''यावद्धयस्मिन् शरीरे प्राणो वसती'' ति विशिष्य शरीरेऽवस्थानवर्णनाच्च प्राणपदार्थः को वेति न निर्धार्यते। ''प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति'' ''सह ह्येतावस्मिन् शरीरे वसतः सहोत्क्रामंत'' इति तृतीयब्राह्मणवाक्यं तु मुख्यप्राण एव मुख्यप्राण एव स्वरसं प्रतीयते। तत्रैव ''यत्रैतत् पुरुषः स्वपिती'' त्यादिवाक्यैस्सर्वभूतसंवेशनोद्गमनं ब्रह्मलिङ्गं श्रूयमाणं तु प्राणपदस्य ब्रह्मपरत्वं ज्ञापयति। अत्र प्राणप्रज्ञयोरभेदवर्णनपूर्वकं सहवसत्यादिवर्णनाद् जीवात्मत्वमपि प्रतीयते। ''न वाचं विजिज्ञासीते'' त्यष्टमब्राह्मणवाक्येन ''तद्यथे'' त्यादेः ''स म आत्मेति विद्यात्'' इत्यनस्य दर्शनेन तु निर्विशेषब्रह्मस्वरूपमेव मांपदार्थतयेन्द्रेण विवक्षितमिति प्रतीयते। तथाच देवतालिङ्गम्, प्राणलिङ्गम्, जीवलिङ्गम्, ब्रह्मलिङ्गम् चेति समबलानि बहूनि लिङ्गानि वर्तन्ते। अतः

सन्देहावसरः—किमत्रेन्द्रप्रतर्दनोपाख्यायिकायां प्राणशब्दोऽयं मुख्यप्राणपरः, किं वा जीवपरः, उत देवतात्मपरः, आहोस्विद् ब्रह्मपरः, अथवा सर्वपर इति।।

अत्रान्तिमे पक्षे वाक्यभेदापत्तिः, ब्रह्महत्यादिपापासंस्पर्शोपक्रमस्य "न साधुना कर्मणा भूयान् नो वाऽसाधुना कर्मणा कनीयानि" त्युपसंहारस्यैकरूप्येण ततोऽवगतैकवाक्यताया भङ्गापत्तिः। अतः एकस्यैवात्र ग्रहणे कर्तव्ये कोटिचतुष्टयमेव सन्देहे विवक्ष्यंते।।

तत्र मुख्यप्राणादिपक्षेषु सर्वत्र सर्वेषां लिङ्गानां समन्वयप्रकारस्तु वार्तिकादौ विशद एव। एतावदेवात्रोपपाद्यते—उपक्रमपरामर्शोपसंहारेषु मुख्यप्राणादिलिङ्गं न वर्तते, केवलं ब्रह्मलिङ्गं वर्तत इति। तत्र प्रथमं हिततमत्वं ब्रह्मलिङ्गमित्यत्र न विशयलेशोऽपि। एवं सर्वपापासंस्पर्शित्वम्, अमृतत्वम्, सर्वभूतसंवेशनोद्गमनम्, "एतस्मादात्मनः प्राणा" इतिवाक्यावगतसर्वलोककारणत्वम्, वागादिपरित्यागेनावशेषितविज्ञानात्मत्वम्, प्रज्ञामात्राद्यधिष्ठानत्वम्, प्रज्ञात्मत्वम्, आनन्दत्वम्, अजरत्वामृतत्वे, पुण्यपापासंस्पर्शित्वम्, सर्वकारयितृत्वम्, लोकपालत्व-लोकाधिपतित्व-सर्वेश्वरत्वानि, "स म आत्मे" ति प्रतिपादितविज्ञानात्मान्तर्यामित्वं च ब्रह्मण एवासाधारणं लिङ्गमिति ब्रह्मलिङ्गमादित आन्तमनुगतं वर्तते। प्राणादिलिङ्गं तु तत्र तत्र मध्ये कुत्रचन कुत्रचन ब्राह्मणे लेशतः केवलं स्फुरति। यथाच "समारोपस्य रूपेण विषयो रूपवान् भवेत्। विषयस्य तु रूपेण समारोपो न रूपवान्।।" इतिन्यायेन मुख्यप्राणादिलिङ्गान्यपि न ब्रह्मणि विरुद्धानि, तथाऽन्तरधिकरणे व्यक्तिकृतम्। अतो युक्तं सूत्रितम्—*प्राणस्तथाऽनुगमादिति*।।

तत्र पूर्वाधिकरणे कौक्षेयज्योतिर्धर्माणामपि तदुपहितोपासनाया विवक्षणादविरोधवदत्रापि मुख्यप्राणादिधर्मैरेव ब्रह्मोपासनाया विवक्षणाद् अब्रह्मधर्माणमसाधारणानामपि न विरोध इति व्यवस्थापनाद् दृष्टान्तसङ्गति। अथवा—"अत एव प्राण" इत्यत्र निर्धारितसर्वभूतसंवेशनोद्गमनस्य ब्रह्मलिङ्गस्य प्रत्यभिज्ञानाद् ज्योतिरधिकरणे गायत्रीवाक्यैकवाक्यतयेवात्रापि वाक्यान्तरैकवाक्यतया प्राणपदार्थाध्यवसानाद् दृष्टान्तसङ्गतिः।।

अत्र विषयवाक्यं संगृह्णाति—*अस्तीत्यादिना—इत्यादीत्यन्तेन*।। अत्र—"प्राणोऽस्मि प्रज्ञात्मा तं मामि" तीन्द्रदेवताकोटेरुन्नायकं वाक्यम्, प्राण एव प्रज्ञात्मेति मुख्यप्राणकोटेः, "न वाचं विजिज्ञासीते" ति जीवकोटेः, "स एष प्राण एव प्रज्ञात्माऽऽनन्द" इत्यादिकं ब्रह्मकोटेरिति विभागः।।

संशयं प्रदर्शयति—*तत्र संशय इत्यादिना—ब्रह्मेतीत्यन्तेन*।। "अत एव प्राण" इत्यनेन गतार्थत्वमाशङ्क्य परिहरति—*नन्वित्यादिना—संशय इत्यन्तेन*।। अत्रेयं भामतीकारिका—

अनेकलिङ्गसन्दोहे बलवत् कस्य किं भवेत्।
लिङ्गिनो लिङ्गमित्यत्र चिन्त्यते प्रागचिन्तितम्॥

इति। एतेन–पूर्वपक्षोऽपि–व्याख्यातः ; संशयप्रदर्शनेनैव पूर्वपक्षस्यापि प्रदर्शितप्रायत्वात्। अत्र भाष्ये पूर्वपक्षे युक्तीनामप्रदर्शने कारणं तूत्तरत्र सूत्रकारैरेव तेषां तेषां पक्षाणां विशदीकरणमेव। तथाऽनुगमादिति सौत्रं पदं व्याचष्टे–*पौर्वापर्येणेत्यादिना*॥ तथाचोपक्रमपरामर्शाद्यवगतब्रह्मतात्पर्यकत्वमेव सोत्रो हेतुरिति फलति। तत्रोपक्रमे ब्रह्मलिङ्गमाह–*उपक्रम इति*॥ हिततमत्वस्य प्राणलिङ्गत्वम्, न परमात्मलिङ्गत्वमेवेति भावः। मध्यपरामर्शगतं ब्रह्मलिङ्गमाह–*तथा स यो मां वेदेत्यादिना*॥ अयमर्थतोऽनुवादः। प्रसिद्धं ह्यपहतपाप्मत्वं ब्रह्मलिङ्गमित्यन्तरधिकरण इति पुण्यपापासंस्पर्शत्वमपि ब्रह्मलिङ्गमेव, प्राणस्य तु जडत्वाद् न तत्र तत्सम्भावनापि। देवतात्मन इन्द्रस्य तु पुण्यसम्बन्धोऽस्त्येव। जीवस्य तु पुण्यपापोभयसम्बन्ध इति कथञ्चन हिततमत्वस्य प्राणादौ कल्पनायामपि मध्यपरामर्शैकरूप्यं ब्रह्मलिङ्गत्व एवेति भावः। अथोपसंहारगतं ब्रह्मलिङ्गमाह–*तथोपसंहारेऽपीति*॥ अत्र लोकपालत्वमात्रं कथञ्चन देवतात्मनि सम्भवति, सर्वेश्वरत्वादिकं तु न सम्भवति। एतेनानन्दत्वमपि–व्याख्यातम्; बृहस्पत्यानन्दशतगुणितन्यूनानन्दस्य तस्यानन्दरूपत्वासम्भवात्॥२८॥

अथ जीवलिङ्गान्यादाय जीवपरत्वमाशङ्क्य सूत्रकारः स्वयमेव समाधत्ते–*न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन्निति*॥२९॥ न=न प्राणशब्दो ब्रह्मपरः ; वक्तुरात्मोपदेशात्=वक्तुरिन्द्रस्यात्मनो देवतात्मन एवात्रोपदेशात्, उपदिश्यमानवक्त्रात्माभिन्नत्वादिति यावत्, इति चेत्=इति पश्यति चेद् भवान्। तन्नेति वाक्यशेषः। तन्न युक्तम्; कुतः? हि=यस्माद् अध्यात्मसम्बन्धभूमा वक्तुरात्मनोऽधिकस्य परमात्मनो बहुत्र सम्बन्धः अस्मिन्=तृतीयाध्याये दृश्यत इति सूत्रार्थः। वक्तुरात्मा देवतात्मैवात्र विवक्ष्यत इत्यत्र द्वे कारणे–मामित्यहङ्कारवादेनोपदेशः, विग्रहधर्मैस्त्वाष्ट्रवधादिभिः स्तुतिश्च। तत्र प्रथममाह–*वक्ता हीत्यादिना–श्रुतिभ्य इत्यन्तेन*॥ द्वितीयमाह-*तथा विग्रहेत्यादिना–प्रायच्छमित्येवमादिभिरित्यन्तेन*॥ प्राणत्व-प्रज्ञात्मत्व-हित-तमत्वानामिन्द्रे समन्वयमाह–*प्राणत्वं चेत्यादिना–वदन्तीत्यन्तेन*॥ अध्यात्मसम्बन्धेत्यंशं व्याचष्टे–*प्रत्यगात्मेत्यादिना*॥ परमात्मलिङ्गान्यत्र बहूनि विद्यमानानि संगृह्णाति–*यावद्धीत्यादिना–इति च श्रुत्यन्तरमित्यन्तेन*॥ वक्तुरात्मनोऽधिकस्यापरस्यात्मन एवात्र माम्पदार्थत्वमिति तु भावः। बद्धदृष्टया यद्यप्यहमर्थातिरेकेणापर आत्मा न दृश्यते; तथापि श्रुतिः–''स म आत्मे'' ति वदन्त्यहमर्थातिरिक्तमात्मानं गमयतीति तदभिप्रायेणैव माम्पदप्रयोगः। इन्द्रो हि जीवन्मुक्तोऽहं ब्रह्मास्मीतिसाक्षात्कारदशामापन्नः प्रतर्दनाय मामुपास्स्वेत्युपदिदेश। तत्र

चास्मत्प्रत्ययविषयो विषय्येवात्मा, न विषयकोटिप्रविष्टः। अङ्गीकृतं हि लक्षणयाऽहंप्रतीतिविषयत्वं प्रत्यगात्मनोऽपि। तदुक्तमध्यासभाष्ये-"न तावदयमेकान्तेनाविषय"; अस्मत्प्रत्ययविषयत्वादि" ति॥२९॥

ननु-विदुषामहङ्काराभाषात् कथमहम्पदेन प्रत्यगात्मनो व्यवहार इत्यंत आह सूत्रकारः-*शास्त्रदृष्ट्यातूपदेशो वामदेववदिति*॥३०॥ मामित्यहङ्कारवादेनोपदेशः तत्त्वमस्यादिमहावाक्यजन्यसाक्षात्कारदृष्ट्याऽहं ब्रह्मास्मीति व्यवहारो जीवन्मुक्तस्येन्द्रस्यापि न विरुद्धः ; वामदेववत=वामदेवस्येवेत्यर्थः। जीवन्मुक्तानां हि प्रारब्ध कर्मलेशतोऽहङ्कारादीनामप्यनुवृत्तिर्वर्तते, परन्तूहापोहेन व्यवहरन्तस्ते लक्ष्यस्वरूपमप्यहम्पदेन श्रुतिरिवानुभवन्त्युपदिशन्ति चेति नाहङ्कारवादो देवतात्मलिङ्गमिति भावः। पूर्वेण सूत्रेण ब्रह्मलिङ्गानां बहुत्वमुक्तम्, अनेन तु देवतालिङ्गानामसम्भवः प्रतिपाद्यत इति विवेकः। तत्राहङ्कारवादं प्रत्याह-*इन्द्रो नामेत्यादिना-इति श्रुतेरित्यन्तेन*॥ विग्रहधर्मैरिन्द्रस्तुतिमाशङ्क्य प्रत्याह-*यत्पुनरित्यादिना-हिंस्यत इत्यन्तेन*॥३०॥

अथ जीवमुख्यप्राणलिङ्गानुसारेण पूर्वपक्षमनूद्य परिहरति सूत्रकारः-*जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगादिति*॥३१॥

जीवमुख्यप्राणलिङ्गात्=जीवलिङ्गात् मुख्यप्राणलिङ्गाच्च, न=न प्राणशब्दो ब्रह्मपरः, इति चेत्=इति चेत् पूर्वपक्षी मन्यते, न=नैतद्युक्तम्; उपासात्रैविध्यात्=तथा सति जीवोपासनम्, मुख्यप्राणोपासनम्, ब्रह्मलिङ्गस्यापि सत्त्वेन ब्रह्मोपासनमित्युपासनात्रैविध्यापत्तेः, वाक्यभेदापत्तेरिति यावत्। ननु-एवं सत्येकमेवोपासनं विवक्ष्यताम्, तथापि न ब्रह्मोपासनमत्रेत्याशङ्कायामाह-*आश्रितत्वादिति*॥ प्राणादिपदानां ब्रह्मपरत्वस्यान्यत्र ब्रह्मलिङ्गवशेन स्वीकारात्, इह=इन्द्रप्रतर्दनोपाख्यायिकायामपि, तद्योगात्=ब्रह्मलिङ्गवशेन प्राणशब्दप्रवृत्त्युपपत्तेरिति सूत्रार्थः। अथवा-उपासत्रैविध्यादित्यस्य=त्रिविधर्मेण ब्रह्मण उपासनस्य ज्योतिर्वाक्य इव विवक्षणादिति योजना। जीवलिङ्गमाह-*जीवस्येत्यादिना-अभिधीयत इत्यन्तेन*॥ मुख्यप्राणलिङ्गमाह-*तथा मुख्येत्यादिना-व्याख्येयमित्यन्तेन*॥ प्रज्ञात्मत्वं जीवमुख्यप्राणयोः समन्वयीकरोति-*प्रज्ञात्मत्वमपीत्यादिना-भिद्येतेत्यन्तेन*॥ उपासात्रैविध्यादित्यस्य प्रथमं व्याख्यानमाह-*उपासात्रैविध्यादित्यादिना*॥ द्वितीयं व्याख्यानमाह-*अथवेत्यदिना*॥ सर्वथा तु प्राणशब्दोऽत्र न मुख्यप्राणादिपर इति सिद्धम्॥३१॥ इत्येकादशं प्रतर्दनाधिकरणम्॥

॥इति प्रदीपे प्रथमाध्यायस्य प्रथमः पादः समाप्तः॥१-१॥

वार्तिकम्

प्राणस्तथाऽनुगमात्।।२८।। कौषीतिकानां ब्राह्मणोपनिषदीन्द्रप्रतर्दनोपाख्यायिकायां ब्रह्म-देवता-जीव-मुख्यप्राणानां प्रत्येकं बहूनि लिङ्गानि दृश्यन्ते। तानि च यथास्थानं दर्शयिष्यामः। दर्शितानि च भाष्ये।।

तेषु सन्देहः–किं तानि समबलानि, उतैकतरस्य लिङ्गं बलवद् अन्येषां च लिङ्गानि दुर्बलानि–इति। तदर्थं चायं विचारः–किमत्रानेकानि वाक्यानि, किं चैकं वाक्यम्–इति। तदर्थमप्ययं विचारः–किं पदार्थप्रतीत्यानुगुण्येन वाक्यार्थप्रतीतिर्व्याख्येया, किं वा वाक्यार्थप्रतीत्यानुगुण्येन पदार्थप्रतीतिः–इति। यदा च पदार्थप्रतीत्यानुगुण्येन वाक्यार्थप्रतीतिव्याख्या, तदा वाक्यभेदः, वाक्यभेदाच्च समबलानि लिङ्गानीति सिद्ध्यति। तत्सिद्धौ च प्राणशब्दोऽत्र मुख्यप्राण इति पूर्वपक्षसिद्धिः। यदा तु वाक्यार्थप्रतीत्यानुगुण्येन पदार्थप्रतीतिव्याख्या, तदैकवाक्यतासिद्धौ तदेकतरलिङ्गस्य बलवत्त्वसिद्धिः। तत्राप्येतद् विचारणीयम्–कस्य लिङ्गं बलवत्–इति–किं मुख्यप्राणस्य लिङ्गं बलवत्, किं वा देवतात्मनः, उत जीवस्य, आहोस्विद् परब्रह्मण–इति। यस्य लिङ्गं विचाराद् बलवत्त्वेन सेत्स्यंति, स एव प्राणशब्दोऽत्र भविष्यति। तत्र पक्षत्रयं पूर्वक्षिणः, चरमपक्षस्तु सिद्धान्तः। तदेतत् सर्वं हृदि निधायाह–*किमिह प्राणशब्देन वायुमात्रमभिधीयते, उत देवतात्मा, उत जीवः, अथवा परं ब्रह्मेति*।। सूत्रभाष्यकाराभिप्रेतमुक्तविचारशरीरमविद्वान्–"अत एव प्राण" इत्यनेनास्याधिकरणस्य गतार्थत्वमाशङ्कते–*नन्विति*।। स्वाशयं स्पष्टीकृत्य संशयबीजं दर्शयन्नस्य विचारस्य ततोऽधिकविषयत्वं दर्शयति–*अनेकलिङ्गदर्शनादिति ब्रूम इत्यादिना*।। यथा चास्याधिकविषयत्वम्, तथा पूर्वमेव दर्शितमस्माभिः ; लिङ्गबलाबलविचारस्य दर्शितत्वात्। न हि–ब्रह्म-मुख्यप्राणजीवदेवतात्मलिङ्गानां बलाबलविचारः–"अत एव प्राण" इत्यत्र कृतः येन तेनास्य गतार्थता स्यात्।।

एतेन–प्रत्युदाहरणसङ्गतिरत्रोक्ता–भवति; यथा तत्र सिद्धब्रह्मलिङ्गात् प्राणशब्दं ब्रह्मत्यवधारितम्, न तथेह सिद्धं ब्रह्मलिङ्गमस्ति। दृष्टान्तसङ्गतिर्वा। यथा दिवि दिव

इत्यप्रधानप्रकृत्यर्थमनुरुध्य प्रत्ययार्थो नीतः, तद्वदिहापि स्वतन्त्रप्राणादिपदार्थभेदप्रतीतौ तत्सापेक्षत्वेन गुणभूतवाक्यार्थप्रतीतेर्युक्तमन्यथा नयनमिति पूर्वपक्षोत्थानस्य वक्ष्यमाणत्वात्।।

किं तावत् प्राप्तम्? ''प्राणोऽस्मि प्रज्ञात्मा'' ''अथ खलु प्राण एव प्रज्ञात्मा इदं शरीरं परिगृह्योत्थापयति यो वै प्राणः सा प्रज्ञा या प्रज्ञा से प्राणः सह ह्येतावस्मिन् शरीरे वसतः सहोत्क्रामत'' इत्यादिवाक्यसन्दर्भेषु श्रूयमाणः प्राणो मुख्यप्राणो भवितुमर्हति। कुतः? तत्र प्राणशब्दस्य प्रसिद्धेः ; तदतिक्रमे प्रमाणाभावात्। यत्रासीत् सर्वभूतसंवेशनोद्गमनं ब्रह्मलिङ्गंबलंवद् बाधकम्, तत्र तद्बलाद् मुख्यार्थात् प्रच्याव्य भाक्तः प्राणशब्दो ब्रह्मणि व्याख्यातः, इह तु तदतिक्रमे न किञ्चित्कारणमस्ति, प्रत्युत तदुपोद्बलकानि मुख्यप्राणलिङ्गानि सन्ति–शरीरपरिग्रहेणोत्थानम्, प्रज्ञात्मना सहवसतिः, सहोत्क्रमणवत्त्वम्। तानि हि मुख्यप्राणलिङ्गानि; ''यो वै प्राणः सा प्रज्ञा या वै प्रज्ञा से प्राण'' इति यस्यैव प्राणस्य प्रज्ञात्मत्वेनोपास्यत्वमुक्तम्, तस्यैव प्राणस्य प्रज्ञात्मना सहास्मिन् शरीरे वसतिरुत्क्रमणं चोच्यते–''सह ह्येतावस्मिन् शरीरे वसतः सहोत्क्रामत'' इति। न च प्राणस्य ब्रह्मत्वे प्रज्ञात्मना तस्याभेदात्तेन प्राणस्य सहवासः, सहोत्क्रमणं च द्विवचननिर्देशो वोपपद्यते। तस्मात् प्रसिद्धेस्तल्लिङ्गाच्च वायुरेवात्र प्राणः प्रज्ञात्मना जीवेनोपास्यत्वेन सदा परिगृह्यते, न ब्रह्म; अप्रसिद्धेः, अतल्लिङ्गत्वाच्च।।

एतेन–''न वाचं विजिज्ञासीत वक्तारं विद्यादि'' ति जीवलिङ्गमुपपन्नम्; प्रज्ञात्मनो जीवस्यमुख्यप्राणेन सहोपास्यत्वात्। न च–एवं सति ''यो वै प्राणः सा प्रज्ञा या वै प्रज्ञा स प्राण'' इति तयोरभेदनिर्देशः सहोपास्यत्वेऽनुपपन्न इति–वाच्यम्; तयोः सहवृत्त्युत्क्रमणयोः प्रकृतत्वादुपपत्तेः।।

ननु–''एष प्राण आनन्दोऽजरः'' इति वाक्यशेषे प्राणशब्दो न मुख्यप्राणे घटते; तस्यानन्दादिरूपत्वासंभवादिति–चेत्, एवं तर्हि तत्र प्राणशब्दो ब्रह्मण्यस्तु।।

ननु–एवमपि–''प्राणोऽस्मि प्रज्ञात्मे'' त्यत्र प्राणशब्दो न मुख्यप्राणे संभवति; कुतः? प्राणशब्देन वक्तुरात्मोपदेशात्, इन्द्रदेवतायाश्च प्रकृते वक्तृत्वात्, ''त्रिशीर्षाणं त्वाष्ट्रमहनमरुन्मुखान् यतीन् शालावृकेभ्यः प्रायच्छम्'' इत्येवमादिभिर्देवताविग्रहधर्मैस्तच्श्रुतेश्चेति–चेत्, एवं तर्हि तत्र देवतात्मैव प्राणशब्दोऽस्तु। तथापि–''प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयती'' त्यादौ मुख्यप्राणलिङ्गात् स एव प्राणशब्दो भविष्यति।।

ननु–एवं सति वाक्यभेदः स्यादिति–चेत्, अस्तु नाम; पदार्थानां स्वातन्त्र्योपलम्भेन परस्परानन्वयात्। तत्स्वातन्त्र्योपलम्भश्च समानबलतत्तल्लिङ्गोपलम्भात्। ननु–उपक्रम

परामर्शोपसंहारैकरूप्येणार्थैकत्वादेकवाक्यताप्रतीतेर्न तद्विरोधेन वाक्यभेदकल्पनमुचितमिति–चेत्, न; उपजीव्यपदार्थप्रतीत्यानुगुण्येन वाक्यार्थप्रतीतेर्व्याख्यानादेकवाक्यताया असिद्धेः, अन्यथोपजीव्यविरोधात्, पदार्थानां च जीव-मुख्यप्राण-ब्रह्म-देवतात्मनां स्वातन्त्र्येणोपस्थितेः परस्परान्वयासंभवस्योक्तत्वात्। तस्मादुपास्यभेदेनोपासनाभेदाद् न वाक्यभेदो दोषाय। यदि वा–"संभवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यत" इति न्यायाद् यथाकथञ्चिदेकार्थत्वं तेषां परिकल्प्यैकवाक्यता समर्थ्यते, एवमपि मुख्यप्राण एवास्मिन् वाक्य उपास्यत्वेन परिगृह्यते; प्राणश्रुत्यनुगृहीतत्वेन तल्लिङ्गस्य बलवत्त्वात् तदानुगुण्येनान्यलिङ्गानां व्याख्यानोपपत्तेः॥

तथा हि–"प्राणोऽस्मि प्रज्ञात्मा" "न वाचं विजिज्ञासीत वक्तारं विद्यादि" ति प्रज्ञात्मत्वं वक्तृत्वं जीवलिङ्गं तु मुख्यप्राण उपपद्यते; तस्य जीवोपाधित्वात्, वाग्व्यापारस्य प्राणाधीनत्वाच्च। प्राणस्य बलकार्यत्वाद् बलदेवताया इन्द्रवात् तद्विग्रहधर्मेण प्राणस्तुत्युपपत्तेर्न देवतालिङ्गमपि प्राणे विरुद्ध्यते। यदप्यानन्दत्वाजरत्वादि ब्रह्मलिङ्गम्, तदपि मुख्यप्राणे न विरुद्ध्यते; तस्यानन्दहेतुत्वात्, अप्राणस्य काष्ठपाषाणादेरानन्दाभावात् तत्त्वोपपत्तेः, अजरत्वादेरप्यापेक्षिकस्य–"अजरा निर्जरा देवा" इतिवत् प्राणेऽपि सत्त्वात्। एतेन–हिततमत्वादिकमपि मुख्यप्राणे–व्याख्यातम्॥

अस्तु वा विग्रहवत्या इन्द्रदेवताया एवात्रोपास्यत्वम्; तस्यैवोपास्यत्वश्रुतेः, तल्लिङ्गस्यैव बलवत्तयोपलब्धेश्च। तथा हि–इन्द्रधामागतं प्रतर्दनं प्रतीन्द्र उवाच–"मामेव विजानीही" त्युपक्रम्य "प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्वे" ति। न च–प्रज्ञात्मत्वं प्राणशब्दाभिधेयत्वं च देवतात्मन्यसंभवीति–वाच्यम्; तस्याप्रतिहतप्रज्ञानत्वेन बलाधिष्ठातृत्वेन च तदुभयोपपत्तेः। एतेन–शरीरपरिग्रहस्य समुत्थापनमपि तस्मिन्–व्याख्यातम्। हिततमपुरुषार्थहेतुत्वमपीन्द्रस्य देवतात्मत्वादतिप्रसिद्धम्। भ्रूणहत्यादिपापासंस्पर्शोऽपि तस्मिन्नुपपद्यते; तत्र तस्याजनेः, मनुष्याधिकारत्वाद् विधिनिषेधशास्त्रस्य देवतात्मानं प्रत्यप्रवृत्तेः। लोकाधिपत्यं च तस्य लोकापालत्वात्। आनन्दरूपत्वं च स्वर्गस्यैवानन्दरूपत्वात्, "यन्न दुःखेने" त्यादिश्रुतेः। "आभूतसंप्लवस्थानममृतत्वं हि भाष्यत" इति श्रुतेश्चामृतत्वमिन्द्रस्य। "त्रिशीर्षाणं त्वाष्ट्रमहनम्" इत्यादिना विग्रहधर्मेण च स्तुतिस्तस्यैवोपपद्यत इति॥

जीवो वाऽस्तु; देवताप्राणयोस्तद्यागसाधनत्वात् तस्मिंस्तद्धर्मवत्त्वोपपत्तेः। ब्रह्माभिन्नत्वात्तु तस्योक्तब्रह्मधर्मोपपत्तिः, न ब्रह्म; वक्तृत्वादेर्जीवादिलिङ्गस्य ब्रह्मण्यनुपपत्तेः। त माद् नास्मिन् वाक्ये प्राणो ब्रह्मेति प्राप्तम्॥

एवं प्राप्तेऽभिधीयते–प्राणशब्दमिह परं ब्रह्म ग्राह्यम्, न मुख्यप्राणादि। कुतः? तथाऽनुगमात्=तथात्वावगमात्। अस्मिन् हि वाक्ये पौर्वापर्येण पर्यालोच्यमाने तस्मिन् प्राणशब्दाभिधेये हिततमवरादिपदार्थानां समन्वयदर्शनेन तस्य ब्रह्मत्वावगमादित्यर्थः।।

तथा हि–अस्मिन् वाक्ये हिततमत्वेन, प्रज्ञात्मत्वेन, अमृतत्वेन, आनन्दत्वेन, अजरत्वेन, निखिलभ्रूणहत्यादिपापासंस्पर्शित्वेन, लोकाधिपतित्वेन, लोकेश्वरत्वेन च प्राण उपदिश्यमानोऽवगम्यते। न ह्येते पदार्थां ब्रह्मणोऽन्यत्र समनुगता भवेयुः।।

ननु–उक्तपदार्थानां स्वातन्त्र्येणोपलब्धेः, तत्पूर्वकत्वाच्च वाक्यार्थबोधस्य तदनुसारेण वाक्यभेदोपपत्तेर्नायं दोषोऽस्मान् प्रति ढौकते–इति, नैतदस्ति। यद्यपि पदार्थावगमपूर्वको वाक्यार्थबोधः ; न पदार्थावगमपरतया पदान्युच्चार्यन्ते, किं तर्हि? वाक्यार्थावगमपरतया तस्योद्देश्यत्वात्। तमेव त्वेकं वाक्यार्थ पदार्थावगममन्तरेणावगमयितुमशक्नुवन्ति तानि तमपि कुर्वन्ति। न च यदर्थे यस्यागमनम्, न तेन तद्बाधो युक्तः ; तथा सति सर्वत्र कारणेन कार्यविरोधापत्तेस्तदनुत्पत्तिप्रसङ्गः। एतेन–पदार्थावगमस्योपजीव्यत्वात् प्राधान्यमिति–प्रत्याख्यातम् ; वाक्यार्थावगमार्थत्वेन तच्छेषत्वात् तत्त्वेन प्राधान्यासिद्धेः, वाक्यार्थावगमस्यैवोद्देश्यत्वेन प्राधान्यात्। तस्माद् उत्सर्गतो विशिष्टेकार्थबोधस्वरसान्येव सर्वत्र पदानि कुत्रचिद् बलवद्बाधकोपनिपाताद् नानार्थावबोधपरतां नीयन्ते। तद्यथा–"स्योनं ते सदनं कृणोमी" त्यत्र लिङ्गात् पदानामेकवाक्यतां भङ्क्त्वा नानार्थावबोधपरतया नयनम्। यत्र तु बलवद् बाधकं नास्ति, तत्र तेषामेकार्थत्वमौत्सर्गिकं न केनाप्यपनेतुं शक्यते। यथाहुः–"संभवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यत" इति। तद्यथा–उपांशुवाक्ये, तथा वा जातेष्टिवाक्ये पदानामापाततो नानार्थतया प्रतीयमानानाप्न्येकार्थत्वम्, एवमिहापि बलवद्बाधकाभावाद् युक्तं तेषां विशिष्टैकार्थप्रतिपादकत्वम्। मुख्यप्राणादिलिङ्गानि तु ब्रह्मणि गमयिष्यन्ते, इति न तद्विरोधः। तस्मात् प्राणशब्दमत्र ब्रह्म।।२८।।

न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन्।।२९।। यदुक्तम्–प्राणशब्दं ब्रह्मेति, तन्न ; कुतः? प्राणशब्देन वक्तुरिन्द्रस्य देवतात्मन आत्मोपदेशात्–"प्राणोऽस्मि प्रज्ञात्मे" ति, तद्विग्रहधर्मैरात्मनः स्तुतिदर्शनाच्चेत्युक्तत्वात्। तस्मादनन्यथासिद्धदेवतालिङ्गविरोधाद् न प्राणशब्दं परं ब्रह्म, किन्तु देवतात्मेति चेद् भवान् पश्यति, तन्न; देवतात्मनोऽत्र प्राणशब्देन परिग्रहासंभवात्। कथमसंभवः? उच्यते; यतोऽध्यात्मसम्बन्धभूमा ह्यस्मिन्=प्रत्यगात्मसम्बन्धबाहुल्यं ह्यस्मिन् अध्याय इन्द्रप्रतर्दनाख्यायिकायामुपलभ्यते। तद्यथा–"यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुरि" ति प्राणस्यैव प्रज्ञात्मनः प्रत्यग्भूतस्यायुः प्रदानतदुपसंहारयोः स्वातन्त्र्यं दर्शयति, न पराग्भूतस्य

देवताविशेषस्य। तथास्तित्वे च प्राणानां निःश्रेयसमित्यध्यात्ममेवेन्द्रियाश्रयं प्राणं दर्शयति, न त्वमरावत्यामधिष्ठितस्य विग्रहवतो देवताविशेषस्य तथात्वमस्ति। तथा–"प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयती" ति, तथा–"न वाचं विजिज्ञासीत वक्तारं विद्यादि" त्युपक्रम्य–"तद्यथा रथस्यारेषु नेमिरर्पितो नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः, प्रज्ञामात्राः प्राणे अर्पिता एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृत" इति विषयेन्द्रियव्यवहारानभिभूतं प्रत्यगात्मानमेवोपसंहरति। अत्र भूतमात्रापदेन विषयाः परिगृह्यन्ते; शब्दादयः पञ्च गुणा आकाशादीनि च पञ्च महाभूतानि, इति दशानां भूतमात्रात्वेन परिसङ्ख्याततत्वात्। तथा प्रज्ञामात्रापदेनापि पञ्चबुद्धीन्द्रियाणां तज्जन्यपञ्चबुद्धीनां च ग्रहणं द्रष्टव्यम्। तथाच विषयेन्द्रियतज्जन्यव्यवहारैरनभिभूतत्वं प्रत्यगात्मनोऽनेनोपसंहृतं भवति। तथा–"स म आत्मेति विद्यादि" त्यात्माभेदेन प्राणस्योपसंहारः प्राणपदेन प्रत्यगात्मपरिग्रहे युज्यते, न पराग्भूतदेवतात्मपरिग्रहे। न च ब्रह्मणोऽप्यात्माभेदेनोपसंहारो न युक्तः ; "अयमात्मा ब्रह्म सर्वानुभूरि" त्यादिश्रुत्यन्तरात् तदभेदसिद्धेस्तदुपपत्तेः। तस्मादस्मिन् वाक्ये प्राणस्याध्यात्मसम्बन्धभूयस्त्वाद् ब्रह्मोपदेश एवायम्–"प्राणोऽस्मि प्रज्ञात्मे" ति, न पराचीनेन्द्रदेवतोपदेश इति।।२९।।

का तर्हि उदाहृतदेवतालिङ्गानां गतिरिति चेत्, न; तेषामन्यथासिद्धेरित्याह–*शास्त्रदृष्टया तूपदेशो वामदेववत्*।।३०।। तत्त्वमस्यादिशास्त्रात् सिद्धा याऽऽत्मनो दृष्टिः–अहं ब्रह्मास्मीति, तया दृष्टया स्वस्यैवात्मनो ब्रह्मत्वेन प्रतर्दनं प्रत्युपदेश इन्द्रेण क्रियते–"मामेव विजानीहि" "प्राणोऽस्मि प्रज्ञात्मे" ति। वामदेववत्=यथा–"तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चे" ति वामदेव ऋषिः सर्वात्मभावमार्षेण दर्शनेन प्रतिपन्नवान्, तद्वत्। न च–एवं सति देवतात्मनोऽविज्ञेयत्वात् तद्विग्रहधर्मेण तत्स्तुत्यनुपपत्तिः, विज्ञेयस्य ब्रह्मणो विग्रहसम्बन्धाभावादिति–वाच्यम्; तेन विद्याया एव स्तुतत्वेन विज्ञेयस्तुत्यसिद्धेः। यथा च त्वाष्ट्रवधादिविग्रहधर्माणां विद्यास्तुतिपरत्वम्, तथा दर्शितं भाष्ये। तस्माद् देवतालिङ्गानामन्यथासिद्धेर्न प्राणोऽत्र देवतात्मा, किन्तु ब्रह्मलिङ्गेभ्यो ब्रह्मैवेति।।३०।।

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्।।३१।। मा भून्नामाध्यात्मसम्बन्धभूयस्त्वाद् देवतात्मनि पराचीने तदसंभवात् देवतालिङ्गानामन्यथासिद्धेरत्र देवताविशेषः, तथापि प्राणो न ब्रह्म, किं तर्हि? मुख्यप्राणः, जीवो वा, तदुभयं वा भविष्यति। कुतः? अनन्यथासिद्धजीवमुख्यप्राणलिङ्गानां दर्शनात्, अध्यात्मसम्बन्धबाहुल्यस्य तत्रोपपत्तेः, ब्रह्मलिङ्गानां चान्यथासिद्धत्वात्। यथा च जीवमुख्यप्राणलिङ्गानामन्यथासिद्धत्वम्, तथोक्तं भाष्ये, अस्माभिरप्युक्तमधस्तादिति चेत्, न; अतस्तल्लिङ्गान्येवान्यथासिद्धानि, न ब्रह्मलिङ्गानि;

तेषामन्यथानयनात्। कथं पुनर्जीवमुख्यप्राणलिङ्गानि ब्रह्मणि संभवेयु:? उच्यते; जीवधर्मेण, मुख्यप्राणधर्मेण स्वधर्मेण च ब्रह्म त्रिधोपास्यते; तयोर्ब्रह्मप्रतीकत्वेन तद्धर्मवत्तयापि स्वधर्मवत्त्वेनेव ब्रह्मोपासनोपपत्ते:। अन्यत्र तथाऽऽश्रितत्वात्—आस्थिता हि प्रतीकधर्मेणान्यत्र ब्रह्मोपासना। तद्यथा ज्योतिर्वाक्ये औदर्यतेजोधर्मेण, तदुक्तमधस्तात्। इहापि तद्वत् प्रतीकधर्मस्य ब्रह्मणि योगाद् उपासात्रैविध्यं ब्रह्मण उपपद्यते। तस्माद् जीवमुख्यप्राणलिङ्गानामुक्तप्रकारेण ब्रह्मण्युपपन्नत्वादन्यथासिद्धेर्न ब्रह्मलिङ्गानामन्यथाकरणमिति।।

नोपासात्रैविध्यादाश्रितत्वादित्यस्यायं वाऽर्थ:। यदुक्तम्—जीवमुख्यप्राणयोरपीह तल्लिङ्गादुपास्यत्वेन ग्रहणम्—इति, तन्न; एवं सत्युपासात्रैविध्यात्=उपासनात्रैविध्यापत्ते:, अनन्यथासिद्धब्रह्मलिङ्गानामन्यथा परिणेतुमशक्यत्वाद् ब्रह्मोपासनप्यप्यवश्यमाश्रयणीयम्। तथाच तत्त्रैविध्यं न निवारयितुं शक्यते। न चैतदेकस्मिन् वाक्ये युक्तमाश्रयितुम्; वाक्यभेद्प्रसङ्गात्। न चैकवाक्यत्वप्नसिद्धम्; उपक्रमोपसंहाराभ्यामेकवाक्यत्वावगमात्। तस्माद् बह्मोपासनमेवात्र युक्तम्। का तर्हि प्राणशब्दस्य गति रिति चेत्, न; ''प्राणबन्धनं हि सोम्य मन'' इत्यादौ ब्रह्मणि तल्लिङ्गात् प्राणशब्दस्य वृत्तेराश्रितत्वात्, इहापि हिततमोपन्यासादिब्रह्मलिङ्गयोगाद् ब्रह्मणि प्राणशब्दस्य वृत्तिरविरुद्धेति। जीवमुख्यप्राणलिङ्गानि च ब्रह्मपरतया नीतानि भाष्यकृता। *प्रज्ञासाधनप्राणान्तराश्रयत्वादिति* भाष्यम्।। तत्र प्राणान्तराणि श्रोत्रादीनीन्द्रियाणि द्रष्टव्यानि। ननु—एवं सति द्वैविध्यमेव स्यात्, कुतस्त्रैविध्यमिति? नेत्याह—*न च ब्रह्मलिङ्गमन्यपरत्वेन परिणेतुं शक्यमिति*।। सुगममन्यत्।।३१।। *इत्येकादशं तथानुगमाधिकरणम्।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीगोविन्दानन्दपूज्यपादशिष्यनारायणसरस्वतीकृतौ शारीरकमीमांसाभगवत्पादीयभाष्यवार्तिके प्रथमाध्यायस्य प्रथम: पाद: समाप्त:।।१-१।। रामाय नम:।। शुभम्।।

।। इति वार्तिकम् प्रथमः पादः समाप्तम्।।

भामती

अनेकलिङ्गसन्दोहे बलवत्कस्य किं भवेत्।
लिङ्गिनो लिङ्गमित्यत्र चिन्त्यते प्रागचिन्तितम्॥

मुख्यप्राणजीवदेवताब्रह्मणामनेकेषां लिङ्गानि बहुनि संप्लवन्ते, तत्कतमदत्र लिङ्गं, लिङ्गाभासञ्च कतमदित्यत्र विचार्य्यते। न चायमर्थोऽत एव प्राण इत्यत्र विचारितः। स्यादेतत्–हिततमपुरुषार्थसिद्धश्च निखिलभ्रूणहत्यादिपापापरामर्शश्च प्रज्ञात्मत्वं चानन्दादिश्च न मुख्ये प्राणे सम्भवन्ति। तथैष साधु कर्म कारयति, एष लोकाधिपतिरित्याद्यपि। जीवे तु प्रज्ञात्मत्वं कथञ्चिद्भवेदितरेषां त्वसम्भवः। वक्तृत्वञ्च वाक्करणव्यापारवत्त्वं यद्यपि परमात्मनि स्वरूपेण न सम्भवति तथाप्यनन्यथासिद्धबहुब्रह्मलिङ्गविरोधाज्जीवद्वारेण ब्रह्मण्येव कथञ्चित् व्याख्येयम्, जीवस्य ब्रह्मणोऽभेदात्। तथा च श्रुतिः–'यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि' इति वाग्वदनस्य ब्रह्म कारणमित्याह। शरीरधारणमपि यद्यपि मुख्यमाणस्यैव तथापि प्राणव्यापारस्य परमात्मायत्तत्वात्परमात्मन एव। यद्यपि चात्रेन्द्रदेवताया विग्रहवत्या लिङ्गमस्ति, तथाहि, इन्द्रधामगतं प्रतर्दनं प्रतीन्द्र उवाच। मामेव विजानीहीत्युपक्रम्य, प्राणोऽस्मि प्रज्ञात्मेत्यात्मनि प्राणशब्दमुच्चचार। प्रज्ञात्मत्वं चास्योपपद्यते, देवतानामप्रतिहतज्ञानशक्तित्वात्। सामर्थ्यातिशयाच्चेन्द्रस्य हिततम-पुरुषार्थहेतुत्वमपि। मनुष्याधिकारत्वाच्छास्त्रस्य देवान् प्रत्यप्रवृत्तेर्भ्रूणहत्यादिपापापरामर्शस्योपपत्तेः। लोकाधिपत्यं चेन्द्रस्य लोकपालत्वात्। आनन्दादिरूपत्वं च स्वर्गस्यैवानन्दत्वात्। 'आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते' इति स्मृतेश्चोमृतत्वमिन्द्रस्य। त्वाष्ट्रमहनमित्याद्या च विग्रहवत्त्वेन स्तुतिस्तत्रैवोपपद्यते। तथापि परमपुरुषार्थस्यापवर्गस्य परब्रह्मज्ञानादन्यतोऽनवाप्तेः परमानन्दरूपस्य मुख्यस्यामृतत्वस्याजरत्वस्य च ब्रह्मरूपाव्यभिचारादध्यात्मसम्बन्धभूम्नश्च पराचीन्द्रेऽनुपपत्तेः इन्द्रस्य देवताया आत्मनि प्रतिबुद्धस्य चरमदेहस्य वामदेवस्येव प्रारब्धविपाककर्माशयमात्रं भोगेन क्षपयतो ब्रह्मण एव सर्वमेतत्कल्पत इति विग्रहवदिन्द्रजीवप्राणवायुपरित्यागेन ब्रह्मैवात्र प्राणशब्दं प्रतीयत इति पूर्वपक्षाभावादनारभ्यमेतदिति।

अत्रोच्यते–'यो वै प्राणः सा प्रज्ञा वा प्रज्ञा स प्राणः सह ह्येतावस्मिन् शरीरे वसतः

सहोत्क्रामत:' इति यस्यैव प्राणस्य प्रज्ञात्मन उपास्यत्वमुक्तं तस्यैव प्राणस्य प्रज्ञात्मना सहोत्क्रमणमुच्यते। न च ब्रह्मण्यभेदे द्विवचनं, न सहभाव:, न चोत्क्रमणम्। तस्माद्वायुरेव प्राण:। जीवश्च प्रज्ञात्मा सह प्रवृत्तिनिवृत्त्या भक्त्यैकत्वमनयोरुपचरितं यो वै प्राण इत्यादिना। आनन्दामराजरापहतपापत्वादयश्च ब्रह्मणि प्राणे भविष्यन्ति। तस्माद्यथायोगं त्रय एवात्रोपास्या:। न चैषं वाक्यभेदो दोषमावहति। वाक्यार्थावगमस्य पदार्थावगमपूर्वकत्वात्। पदार्थानां चोक्तेन मार्गेण स्वातन्त्र्यात्। तस्मादुपास्यभेदादुपासात्रैविध्यमिति पूर्व: पक्ष:।

सिद्धान्तस्तु—सत्यं पदार्थावगमोपायो वाक्यार्थावगम:, न तु पदार्थावगमपराण्येव पदानि, अपि त्वेकवाक्यार्थावगमपराणि। तमेव त्वेकं वाक्यार्थ पदार्थावगममन्तरेण न शक्नुवन्ति कर्त्तुमित्यन्तरा तदर्थमेव तमप्यवगमयन्ति, तेन पदानि विशिष्टैकार्थावबोधनस्वरसान्येव बलवद्बाधकोपनिपातान्नानार्थबोधपरतां नीयन्ते। यथाहु:—'सम्भवत्येकवाक्यत्वे वाक्यभेदश्च नेष्यते' इति।

तेन यथोपांशुयाजवाक्ये जामितादोषोपक्रमे तत्प्रतिसमाधानोपसंहारे चैक्वाक्यत्वाय प्रजापतिरुपांशु यष्टव्य इत्यादयो न पृथग्विधय: किन्त्वर्थवादा इति निर्णीत, तथेहापि मामेव विजानीहीत्युपक्रम्य प्राणोऽस्मि प्रज्ञात्मेत्युक्तत्वाऽन्ते स एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृत इत्युपसंहाराद् ब्रह्मण्येकवाक्यत्वावगतौ सत्यां जीवमुख्यप्राणलिङ्गे अपि तदनुगुणतया नेतव्ये, अन्यथा वाक्यभेदप्रसङ्गात्। यत् पुनर्भेददर्शन 'सह ह्येतौ' इति तज्ज्ञानक्रियाशक्तिभेदेन बुद्धिप्राणयो: प्रत्यगात्मोपाधिभूतयोर्निर्देश: प्रत्यगात्मानमेवोपलक्षयितुम्। अत एवोपलक्ष्यस्य प्रत्यगात्मस्वरूपस्याभेदमुपलक्षणाभेदेनोपलक्षयति *प्राण एव प्रज्ञात्मा इति*:

तस्मादनन्यथासिद्धब्रह्मलिङ्गानुसारत:। एकवाक्यबलात्प्राणजीवलिङ्गोपपादनम्।।

इति संग्रह:।।२८—३०।।

''न ब्रह्मवाक्यं भवितुमर्हति'' इति। नैष सन्दर्भा ब्रह्मवाक्यमेव भवितुमर्हतीति, किन्तु यथायोगं किञ्चिदत्र जीववाक्यं, किञ्चिन्मुख्यप्राणवाक्यं, किञ्चिद्ब्रह्मवाक्यमित्यर्थ:। *प्रज्ञासाधनप्राणान्तराश्रयत्वाद् इति*। प्राणान्तराणीन्द्रियाणि, तानि हि मुख्ये प्राणे प्रतिष्ठितानि। जीवमुख्यप्राणयोरन्यतर इत्युपक्रममात्रम्। *उभौ इति*। पूर्वपक्षतत्त्वम्। ब्रह्म तु ध्रुवम्। *न ब्रह्म इति *।। न ब्रह्मैवेत्यर्थ:। *दशानां भूतमात्राणाम् इति*। पञ्च शब्दादय: पञ्च पृथिव्यादय इति दश भूतमात्रा:। पञ्च बुद्धिन्द्रियाणि पञ्च बुद्धय इति दश प्रज्ञामात्रा:। तदेवं स्वमतेन व्याख्याय प्राचां वृत्तिकृतां मतेन व्याचष्टे *अथवा इति*। पूर्वं प्राणस्यैकमुपासनमपरं जीवस्यापरं ब्रह्मण

इत्युपासनत्रैविध्येन वाक्यभेदप्रसङ्गो दूषणमुक्तम्, इह तु ब्रह्मण एकस्यैवोपासात्रविशिष्टस्य विधानान्न वाक्यभेद इत्यभिमानः प्राचां वृत्तिकृताम्। तदेतदालोचनीयं, कथं न वाक्यभेद इति युक्तं सोमेन यजेतेत्यादौ सोमादिगुणविशिष्टयागविधानं तद्गुणविशिष्टस्यापूर्वस्य कर्मणोऽप्राप्तस्य विधिविषयत्वात्। इह तु सिद्धरूपं ब्रह्म न विधिविषयो भवितुमर्हति, अभावार्थत्वात्। भावार्थस्य विधिविषयत्वनियमाद्, वाक्यान्तरेभ्यश्च ब्रह्मावगतेः प्राप्तत्वात् तदनूद्याप्राप्तोपासाभावार्थो विधेयस्तस्य च भेदाद्विष्यावृत्तिलक्षणो वाक्यभेदोऽतिस्फुट इति भाष्यकृता नोद्घाटितः। स्वव्याख्यानेनैवोक्तप्रायत्वादिति सर्वमवदातम्।।३१।।

इति भामती प्रथमः पादः समाप्तम्।

श्री कण्ठभाष्य

पुनराशङ्क्य परिहरति-

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्॥२८॥

ननु 'पादोऽस्य सर्वा भूतानि। त्रिपादस्यामृतं दिवि' इत्यत्र द्युसंबन्धप्रत्यभिज्ञानाज्ज्योतिर्वाक्ये परमेश्वरः प्रतिपाद्यत इति न सारम्-उपदेशभेदेन विरोधात् प्रत्यभिज्ञानासिद्धेः। 'त्रिपादस्यामृतं दिवि' इति, 'परो दिवो ज्योतिः' इति विभक्तिभेदेनोपदेशभेदः। अतो विरोध इति चेत्-न, उभयत्रापि विरोधा भावात्, यथा वृक्षाग्रे श्येनः, वृक्षाग्रात् परतः श्येन इति व्यपदेशे। उभयत्रापि वृक्षात्परत्वमेव विवक्षितम्। एवमत्रोभयत्रापि दिवः परत्वमेव विवक्षितम्। अनेन लिङ्गेन परमेश्वर एव पुरुषसूक्तोदितः पुरुष इति सिद्धम्, 'पादोऽस्य विश्वा भूतानि' इत्यत्रापि श्रवणात्। अतो निजैकांशसमाप्तसकलप्रपञ्चं दिवि दीव्यमानं परं ज्योतिः परमेश्वर इति निर्णयः॥ इति ज्योतिरधि करणम्॥११॥

अथ इन्द्रप्राणाधिकरणम्॥१२॥

भगवत्सवितृमण्डले साक्षादुपास्यतया निर्दिष्टस्य परमेश्वरस्य तस्मिन्नधिकरणे विश्वात्मकत्वमुक्तं, तदात्मकतया तदन्येषामुपास्यत्वं नान्यथेति प्रतिपादयितुमिदमधिकरणमारभ्यते-

प्राणस्तथाऽनुगमात्॥२९॥

अस्य कौषीतकोपनिषदि विषयः श्रूयते-'प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्व' इतीन्द्रवचनं विषयः॥ अत्रोपासनाविषयत्वेन प्राणशब्दसामानाधिकरण्येन निर्दिष्ट इन्द्रो वा परमेश्वरो वेति संशयः॥ इह 'प्राणोऽस्मि प्रज्ञात्मा तं माम्' इति प्राणशब्दस्य साक्षादिन्द्रेण सामानाधि करण्यमवगम्यते। 'मामुपास्व' इति तद्विषय एवोपासनाविधिः श्रूयते। तस्य प्राणत्वं वृष्टिद्वारा सकलरक्षकत्वादुपपद्यते। सकलोपास्यत्वं च परमैश्वर्यवत्त्वादुपपन्नम्। तथा हि श्रुतिः-'इन्द्रो राजा जगतो य ईशे' इत्यादिः। तस्मादिन्द्र एवोपास्यतया निर्दिश्यत इति पूर्वः पक्षः॥ सिद्धान्तः परमेश्वर इति। कुतः? आनन्दाजरामृतप्रज्ञात्मादीनां तदसाधारणधर्माणामस्मिन् प्राणशब्दनिर्दिष्टेऽनुगमात् 'एष

प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृतः' इति। 'इन्द्रो राजा' इति श्रुतौ इन्द्रशब्दः ईश्वरविषयः प्रकरणादवगम्यते।।

आशङ्क्य परिहरति-

न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबधभूमा ह्यस्मिन्।।३०।।

नायमुपास्यः परमेश्वरः, उपक्रमे 'मामेव विजानीहि त्रिशीर्षाणं त्वाष्ट्रमहनम्' इत्यादिना प्रज्ञातजीवभावस्येन्द्रस्योपास्यत्वोपदेशात्। अत उपसंहारस्तदनुगुणो नेतव्य इति चेत्-नैतदुचितम्, उपक्रमादारभ्यास्मिन् प्रकरणेऽध्यात्मसंबन्धस्य परमेश्वरधर्मस्य बाहुल्यात्। तथा हि, उपक्रमे तावत् 'यं त्वं मनुष्याय हिततमं मन्यसे' इति हिततमोपासनं प्रारब्धम्। तत् परमेश्वरधर्मः, तदुपासनस्यैव मोक्षसाधनस्य हिततमत्वात्। मध्ये च 'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष ह्येवासाधु कर्म कारयति तं यमधो निनीषते' इति सर्वकर्मकारयितृत्वं श्रूयते। तथा, 'तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः' इति जडचेतनात्मकसकलप्रपञ्चाधारत्वं श्रूयते तच्च परमेश्वरधर्मः। अतः परमेश्वरधर्मबाहुल्यादिहोपास्य इन्द्रो न भवति।।

कथमिन्द्रो जीवत्वादनुपास्योऽपि स्वविषयमुपासनमुपदिशतीत्याशङ्कायामाह-

शास्त्रदृष्ट्या तूपदेशो वामदेववत्।।३१।।

अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' इत्यादिशास्त्रदृष्ट्यासर्वशब्दवाच्यत्वात् परमेश्वरस्य स्वशरीरकतया स्वशब्दवाच्यं परमेश्वरमेवोपास्यत्वेनोपदिष्टवानिन्द्रः। अत इन्द्रशब्देनोपदेशः परमेश्वरस्य। दृष्टान्तमाह-वामदेववत्। वामदेवो हि स्वस्य परमेश्वरात्मत्वदृष्टया 'अहं मनुरभवं सूर्यश्च' इत्युपदिदेश। तद्वदिन्द्रोपदेशः। अथवा-वेदान्तविज्ञानोपलब्धया ब्रह्मात्मसामरस्यभावनया ब्रह्मभावमुपगतस्य विगलितमनुष्यादिदेहविषयकल्पिताहंभावसंकोचस्य संपन्नविष्वाकारपराहंभावस्य वामदेवस्य स्वात्मनः सर्वगतत्वावगमान्मनुसूर्यादिप्रपञ्चभावोक्तिः। एवमिन्द्रस्यापीति निश्चीयते। 'प्राणोस्मि प्रज्ञात्मा' इति प्राणशब्देन परं ब्रह्मोच्यते, तस्यानन्दरूपत्वेन सकलप्राणनहेतुत्वात् 'प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृतः' इति श्रवणात्। तथा च 'अहं ब्रह्मास्मि' 'मामुपास्स्व' इति ब्रह्मदृष्टयोपदेशः। तथा हि कृष्णादयोऽप्यर्जुनादीन् प्रत्युपदिष्टवन्तः।।

पुनराशङ्क्याह-

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासत्रैविध्यादाश्रितत्वादिह तद्योगात्।।३२।।

ब्रह्मज्ञानोपासनया ब्रह्मभावमुपगतस्य विगलितजीवभावस्य तद्रूपदृष्टया स्वस्मिन्नुपास्यत्व-सर्वात्मभावोपदेशो युक्तः। अत्र 'त्रिशीर्षाणं त्वाष्ट्रमहनं' 'यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुः' इत्यादौ जीवलिङ्गं मुख्यप्राणलिङ्गं च दृश्यते। ततोऽयमुपदेशो न युक्त इति चेत्-नैवं वाच्यम्। यतो जीवप्राणशब्दवाच्यत्वं परमेश्वरस्य समुचितम्, उपासनात्रैविध्याद्धेतोः। अत्र परमेश्वरस्य स्वरूपेण भोक्तृशरीरेण भोग्यरूपेण चोपासनं त्रिविधमिह विवक्षितं, आत्मतया भोक्तृभोग्याश्रितत्वेन च तदुपपत्तेः। परमेश्वरस्य स्वरूपोपासनमविलम्बेन मुक्तिहेतुः, अन्यदपि द्वयं कालेन। तस्मादिह परमेश्वरात्मकतयेन्द्रस्योपासनसिद्धिरिति निर्णयः।। इति इन्द्रप्राणाधिकरणम्।।१२।।

इति श्रीकण्ठभाष्य प्रथमः पादः समाप्तम्।।

शिवार्कमणिदीपिका

सैषा चतुष्पदे'ति व्यपदेशः तेषामृच्यत्रार्थवशेन पादव्यवस्थेत्युक्तरूपपादचतुष्टयवत्त्वेन न भवति। किं तु प्राग्वर्णितभूतादिरूपांशचतुष्टयवत्त्वेन। तथा हि-प्रथमवाक्येन तावद्गायत्र्यास्सर्वभूतात्मत्वमुक्तम्। तदनन्तरं या वै सा गायत्री'त्यादिवाक्यत्रयेण तस्याः पृथिवीशरीरहृदयात्मत्वं क्रमेण दर्शितम्। अतो भूतादिशब्दोक्ताश्चत्वारोंशा लब्धा इति तथाभूतांशचतुष्टयवत्त्वेन चतुष्पदत्वव्यपदेश इति युक्तम्। ननु वाग्वै गायत्री'ति वाक्येन गायत्र्या वागात्मत्वमप्युक्तम्। तथा च पूर्वं वाचा सह पञ्चांशा लब्धा इति तद्विषयत्वे पञ्चपदेति स्यात्। न चतुष्पदेति। उच्यते। तस्मिन्वाक्ये प्रसिद्धगायत्र्यामेव वाग्रूपत्वान्वये सति तथाभूतगायत्रीसादृश्येन तच्छरीरकत्वेन वा तत्रत्यगायत्रीशब्दः परमेश्वरपरः। यथा 'नद्यां' घोष इत्युक्त्यनन्तरं विशिष्य 'गम्भीरायां नद्यांधोष' इति वाक्ये नद्यां गम्भीरत्वान्वये सति तथाभूतनदीसम्बन्धित्वेन नदीशब्दः तीरपरः। अतो वागात्मत्वस्य पूर्वमनुक्तत्वात् न चतुष्पदत्वव्यपदेशानुपपत्तिः। ननु, तथासति गायत्रीशब्दोक्ते परमेश्वरे षाड्विध्यान्वयो न सिद्ध्येत्। वाचि गानकर्तृत्वं त्राणकर्तृत्वं चेति द्वे विधे पृथिव्यां सर्वभूतप्रतिष्ठात्वमेतामेव नातिशीयत' इति वाक्येनैतां पृथिवीं कर्मभूमिं सर्वभूतं संसारिजातं नातिशेत इत्यर्थकेनोक्तं सर्वभूतानतिवर्तनीयत्वं चेति द्वे विधे शरीरहृदययोः प्राणप्रतिष्ठात्वं तदनतिवर्तनीयत्वं चेति द्वे विधे इति हि षाड्विध्यमुपपादनीयम्। तत्र पृथिव्याद्यात्मत्वमिव वागात्मत्वमपि यदि परमेश्वरस्य प्राग्वर्णितं स्यात् तदा पृथिव्यादिधर्माणामिव वाग्धर्मयोरपि परमेश्वरधर्मत्वलाभात् तत्र षाड्विध्यान्वयस्सिद्ध्येत् नान्यथेति चेन्मैवं शरीरहृदययोर्ये प्राणप्रतिष्ठात्वतदनतिवर्तनीयत्वे तयोराश्रयभेदाच्चतुष्ट्वेन परिगणनया षाड्विध्यान्वयोपपत्तेः वाग्धर्मत्वेनोक्तयोस्सर्वभूतगानत्राणयोर्वाग्रूपत्वेनोक्तायां गायत्र्यामन्वये सति पृथिव्यादिधर्माणां सर्वभूतप्रतिष्ठात्वादीनां तदात्मभूते परमेश्वर इव गायत्रीधर्मयोस्तयोरपि तदात्मभूते तस्मिन्पर्यवसानेन तदुपपत्तेश्च। गायत्रीसादृश्यानुसन्धानपक्षेऽपि वाग्रूपगायत्रीपर्यवसितयोस्तयोस्तत्सादृश्यरूपतया परमेश्वरेऽपि प्राप्तेः। यद्वा। 'वाग्वै गायत्रीवाग्वा इदं सर्वं भूत' मित्येतत्पर्यन्तं यत्सदृशत्वेन यच्छरीरकत्वेन वा शिवस्योपादानं कार्यं तस्या गायत्र्यास्सर्वभूतात्मत्वेन वा प्रशस्ततरत्वप्रतिपादनार्थम्। परशक्तिरूपेण सर्वभूतात्मिका हि वाक्। तत्सारकार्यतया तद्रूपा गायत्री प्रशस्ततरेति तात्पर्यम्।

'गायति च त्रायते चे'त्येतत्तु सर्वभूतात्मभूतस्य गायत्र्यात्मभूतस्य च परमेश्वरस्यैव तच्छरीरद्वारकधर्मयोः प्रतिपादकम्। अयं परमेश्वरः स्वशरीरभूतसर्वभूतान्तर्गतत्रैवर्णिकात्मना गायति गायत्रीमन्त्रं जपति गायत्रीमन्त्रात्मना च जपतस्तान्त्रक्षतीति। 'आगच्छ वरदे देवि जप्ये मे सन्निधीभव। गायन्तं त्रायसे यस्माद्गायत्री त्वमुदाहृते'ति स्मृतिः। तस्मा'च्चतुष्पदे'ति व्यपदेशो भूतादिरूपांशचतुष्टयवत्त्वेनैवेति नायं छन्दस्युपपद्यते। तदेतत्सर्वमभिप्रत्याह-**भूतपृथिवीति**। नन्वयं भूतादिपादव्यपदेशः क्षोदीयसि छन्दसीवातिमहीयसि परमेश्वरेऽपि नोपपद्यते। न हि परमेश्वरस्वरूपं चतुर्ष्वेव भूतादिषु पर्यवसितमित्याशङ्क्याह-**परमेश्वर एवेति**। परमेश्वर उपपद्यत एवेत्येवकारो भिन्नक्रमः। न ह्यंशचतुष्टयपरिच्छिन्नः परमेश्वरः इति सावधारणमुच्यते। किं त्वंशचतुष्टयवानित्येतावदुपासनार्थं कीर्त्यते। अत एव तावन्मात्ररूपत्वशङ्कानिराकरणार्थं प्रकृतपरमेश्वरविषयतया 'तावानस्ये'ति मन्त्रोऽवतारितः। तेन ह्यस्य परमेश्वरस्य महिमा तावान्पूर्वोक्तांशचतुष्टयपरिमाणः। न चैवं तावन्मात्रपरिच्छिन्न इति शङ्कनीयम्। यतोऽयं पुरुषः परमेश्वरः ततो ज्यायांश्च भवतीत्युक्त्वा तज्ज्यायस्त्वमुत्तरार्धेनाविष्कृतम्। अंशचतुष्टयात्मना विभक्तानि यानि सर्वाणि भूतानि पृथिवीशरीरहृदययुक्तानि तान्यस्यैकः पादः। त्रिपादयं तु तानि सर्वाणि अतिक्रम्य वर्तत इति। ननु, पुरुषसूक्ते प्रकृतेन महिमवर्णनेन प्रसक्तां तत्परिच्छेदशङ्कामपाकर्तुं प्रवृत्तः 'तावानस्ये'ति मन्त्रः कथमेतत्प्रकरणकृतमहिमवर्णनप्रसक्ततत्परिच्छेदशङ्कापाकरणार्थः स्यात्। नैष दोषः। उभयत्रापि प्राचीनमहिमवर्णनस्यार्थत एकत्वात्पुरुषसूक्ते 'स भूमिं सर्वतो वृत्वे'त्युक्त्या भूम्यनतिवर्त्तिभूतशरीरहृदयाक्रमणस्यार्थतस्सिद्धत्वात् तदाक्रमणस्य 'पुरुष एवेदं सर्वं यद्भूतं यच्च भव्य'मिति मत्रतः शरीरशरीरिभावेनाधिष्ठानाधिष्ठातृत्वरूपतापर्यवसानाच्चेति भावः। तस्माद्भूतादिचतुरंशत्वं परमेश्वर उपपद्यत एव॥ एवं 'तावानस्ये'ति मन्त्रस्य छन्दःपरत्वेन प्राक् ब्रह्म न प्रकृतमिति शङ्का पूर्वसूत्राभ्यां निराकृता। इदानीं ब्रह्मणः प्रकृतत्वेऽपि निर्देशभेदाज्ज्योतिर्वाक्यं न ब्रह्मविषयमिति शङ्का निराक्रियत इत्येवं शङ्कान्तरनिराकरणार्थत्वेनोत्तर-सूत्रमवतारयति-**पुनराशङ्क्येति**।।सू।। **उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्**।।२८।।

प्राग्व्यवस्थापितार्थानुवादपूर्वकं तत्र सूत्रोद्भावितां शङ्कां दर्शयति-**नन्वित्यादिना**। वृक्षस्योपरि भ्राम्यति पक्षिणि वृक्षाग्र इति व्यपदेश इव परान्तरिक्षरूपायाः लौकिकाकाशरूपाया वा दिव उपरि सूर्याद्यास्थाने वर्तमाने परमेश्वरे दिवीत्यपि निर्देश उपपद्यते। सप्तम्यास्सामीपिकाधिकरण-विषयत्वसम्भवात् प्रधानप्रकृत्यर्थप्रत्यभिज्ञानिर्वाहाय तदनुसारेण प्रत्ययार्थवर्णनौचित्याच्चेति सौत्र-परिहारांशाभिप्रायं दर्शयति-**उभयत्रापीति**। ननु द्युशब्दस्याद्यस्थानपरत्वमङ्गीकृत्य सप्तम्यौपश्ले-षिकाधिकरणविषयेत्यपि समर्थयितुं शक्यत इति चेत् सत्यम्। तथा सति 'दिवः पर' इति निर्देशोऽनु-पपन्नस्स्यादिति दर्शितं प्राक्। तस्मादिह 'दिवि दिव' इति शब्दौ परान्तरिक्षपराकाशान्यतरपरावित्येव

पपन्नस्स्यादिति दर्शितं प्राक्। तस्मादिह 'दिवि दिव' इति शब्दौ परान्तरिक्षपराकाशान्यतरपरावित्येव युक्तम्। अत एव 'य इमा विश्वा भुवनानि जुह्व'दिति हि परमेश्वरसूक्ते 'परो दिवा पर एना पृथिव्ये'ति मन्त्रगतस्य द्युशब्दस्य परान्तरिक्षपरत्वज्ञापकः पृथिवीसमभिव्याहारो दृश्यते। तत्र 'दिवे'ति 'पृथिव्ये'ति च तृतीया पञ्चम्यर्थे। एना एनया अनयेत्यर्थः। अन्वादेशविषय एनादेशस्तृतीयाया आकारादेशश्च छान्दसः। तथा चास्मात्परपृथिवीलोकरूपात् ब्रह्माण्डात्परान्तरिक्षरूपात्तदुपरितन-मायाकार्यलोकनिकायाच्च परस्वर्गरूपपरमाकाशवर्ती परमेश्वरः पर इत्यर्थः। अत एव च'आदित्प्रत्नस्य रेतसो ज्योतिः पश्यन्ति वासरम्। परो यदि द्युते दिवी'ति सप्तम्या निर्दिष्टस्यापि पर इत्युक्तम्। तेन सप्तम्या निर्देश्यस्य सामीपिकाधिकरणविषयत्वं द्युशब्दस्याद्यस्थानातिरिक्तपरान्तरिक्ष-पराकाशान्यतरपरत्वं चाविष्कृतम्। ननु देवताविशेषपरत्वेन निश्चिते पुरुषसूक्ते पठित'स्यैतावानस्ये'ति मन्त्रस्य छन्दस्तावकत्वेनावधारणायोगात् तदेकविषयस्य गायत्रीप्रकरणस्यास्य छन्दःपरत्वं न सम्भवतीत्युक्तं 'छन्दोऽभिधाना'दिति सूत्रे। तन्न सम्भवति चेन्मासम्भूत्तावता तस्य परमेश्वरपरत्वं न सम्भवति। पुरुषसूक्तस्य हिरण्यगर्भपरतया तद्वत'स्यैतावानि'ति मन्त्रस्य तद्विषयत्वावश्यम्भावेन तदनुरोधादस्यापितत्परत्वस्येव सिद्धेः। तथा च द्युसम्बन्धप्रत्यभिज्ञानात् ज्योतिरप्यादित्यमण्डलस्थितो हिरण्यगर्भ इत्येव सिद्ध्येदित्याशङ्क्याह-**अनेन लिङ्गेनेति**। सर्वभूतपादत्वलिङ्गेन गायत्र्या इव सहस्रशीर्षत्वादिविशिष्टस्य पुरुषसूक्तप्रतिपाद्यपुरुषस्यापि परमेश्वरत्वं सिद्ध्यति। 'तस्माद्विराडजायते' त्यादेः 'लोका ँ्अकल्पय'न्नित्यन्तस्य पुरुषसूक्तान्तर्गतसन्दर्भस्य परमेश्वरसृष्ट-ब्रह्माण्डोदरजातहिरण्यगर्भविषयत्वेऽपि तत्पूर्वोत्तरसन्दर्भयोस्सूक्तविषयतया प्राधान्येन परमेश्वरत्वप्रतिपादकत्वोपपत्तेः। विस्तरेण चैतदध्यायान्त्याधिकरणे समर्थयिष्यते। 'विश्वाभूतानी'ति तैत्तिरीयपाठः। अधिकरणार्थमुपसंहरति-**अतइति। दिवीति**। श्रुत्यनुसारेण सामीप्यसप्तमी। द्युशब्दो वात्र परस्वर्गरूपाद्यस्थानरूपः।। **इति ज्योतिरधिकरणम्**।।११।।

प्रासङ्गिकाधिकरणानि परित्यज्य 'अन्तस्तद्धर्मोपदेशा'दित्यधिकरणेन सङ्गतिं दर्शयन्नुत्तराधिकरणमवतारयति-**भगवत्सवितृमण्डल इति**। 'तस्मादुद्गीथस्तस्मात्त्वेवोद्गातैतस्य हि गाते' त्यन्तरादित्यविद्याप्रकरणगतवाक्येनोद्गातृकर्तृकाणामिन्द्रादिविषयस्तोत्राणां परमेश्वरविषयत्वोक्त्या परमेश्वरस्येन्द्राद्यात्मत्वमुपवर्णितम्। तत्सिद्धेन परमेश्वरात्मकत्वहेतुना इन्द्रादीनां स्वतो मुक्त्यर्थ-मनुपास्यानां तदर्थमुपास्यत्वश्रवणमुपपद्यत इति हेतुहेतुमद्भावसङ्गतिः। यथा स्तोत्रीयाणामिन्द्रादि-महिमप्रतिपादिनीनामृचां तदात्मभूतपरमेश्वरपर्यन्तत्वं तथेन्द्राद्युपासनाविषयश्रुतीनामप्युपपाद्यत इति दृष्टान्तसङ्गतिर्वात्र विवक्षिता। प्रतर्दनाख्यायिकादीनां परमेश्वरे तात्पर्यसमर्थनार्थेनाप्यनेना-धिकरणेनोक्तप्रयोजनमानुषङ्गिकं सिद्ध्यतीति तावता प्रतिपादयितुमिति तुमुन्प्रत्ययः।।सू।।

प्राणस्तथानुगमात्॥२९॥ 'प्रतर्दनो ह दैवोदासिरिन्द्रस्य प्रियं धामोपजगामे'त्यारभ्य 'वरं वृणीष्वे'त्युक्तवत: 'त्वमेव वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस'इति प्रतर्दनेनोक्तस्येन्द्रस्य वचनमिदं श्रूयते 'प्राणोऽस्मी'त्यादि। तत्रत्वाष्ट्रवधादीनामिन्द्रलिङ्गानामानन्दादीनां परमेश्वरलिङ्गानां च बलाबलानवधारणात्संशयमाह-**अत्रेति।** ननु प्राणशब्दश्रवणान्मुख्यप्राणो वेति सन्देहकोटि: प्रदर्शनीयेत्याशङ्क्याह-**प्राणशब्देति।** 'प्राणोऽस्मी'ति सामानाधिकरण्येन प्राणस्यान्यविशेषणत्वप्रतीते: प्राण: प्राधान्येनोपास्यतया प्रतिपाद्यत इति सन्देहो नावतरति। किं तु 'प्राणोऽस्मी'ति वचनं यदीन्द्रलिङ्गानुरोधेन वक्तरि पर्यवस्यति तदेन्द्र: यदि परमेश्वरलिङ्गानुरोधेन तदन्तर्यामिपर्यन्तं धावति तदा परमेश्वर इतीन्द्रपरमेश्वरकोटिक एवात्र सन्देहोऽवतरतीति भाव:। **इन्द्रेणेति।** 'त्रिशीर्षाणं त्वाष्ट्रमहनमरुन्मुखान्यतीन्सालावृकेभ्य: प्रायच्छं बह्वीस्सन्धा अतिक्रम्य दिवि प्रह्लादिनमतृणमहमन्तरिक्षे पौलोमान् पृथिव्यां कालकक्ष्यान् तस्य मे तत्र न लोभ च मीयते' इति श्रुतैस्त्वाष्ट्रवधादिलिङ्गै: प्रसिद्ध एवेन्द्रोऽत्र वक्तावसीयते। अतस्तत्सामानाधिकरण्यात्प्राणशब्दस्य तद्विषयत्वमवसीयत इति भाव:। ननु प्राणशब्दसामानाधिकरण्येनैव 'आनन्दोऽजरोऽमृत'इति परमेश्वरलिङ्गान्यपि श्रूयन्ते। न च तेषामौपसंहारिकत्वेन दुर्बलत्वाद्बाध्यत्वमपि। विरोधाभावात्। 'गौरो विद्वान्देवदत्त उपासनीय' इत्यत्र गौरत्ववैदुष्ययोर्देवदत्तात्मनीवेन्द्रपरमेश्वरलिङ्गजातयोरिन्द्रात्मनि तस्मिन्सद्वारकाद्वारकान्वयोपपत्तेरित्याशङ्क्याह-**तद्विषय एवेति।** तत्र 'हि मामेव विजानीहि एतदेवाहं मनुष्याय हिततमं मन्ये यन्मां विजानीया'मित्यवधारणेन स्वान्तर्यामिपर्यन्तत्वव्यावर्तनपूर्वकं स्वस्यैवोपास्यत्वं प्रतिपाद्यते। अतस्तद्विरोधादानन्दाजरामृतत्वानीन्द्र एवापेक्षिकाणि योजनीयानीति भाव:। **तस्य प्राणत्वमिति।** प्राणयतीति व्युत्पत्त्यात्र प्राणशब्द इति भाव:। ननु 'यं त्वं मनुष्याय हिततमं मन्यसे' 'एतदेवाहं मनुष्याय हिततमं मन्य' इति प्रश्नोत्तरयोर्मनुष्यसामान्ये हिततमत्वोक्त्या सकलोपास्यत्वं प्रतीयते। तत्कथं वृष्टिकामादिमात्रोपास्यस्येन्द्रस्येतयाशङ्क्याह-**सकलोपास्यत्वं चेति।** इन्द्रेण हि 'त्रिशीर्षाण' मित्यादिना 'न लोम न मीयत' इत्यन्तेन स्वस्य सकलपापास्पृष्टत्वमुक्त्वा 'स यो मां विजानीयान्नास्य केन चन कर्मणा लोको मीयते न मातृवधेन पितृवधेन न स्तेयेन न भ्रूणहत्यये'त्युपास्यगुणानुसारिसकलपापासंस्पर्शरूपं फलं स्वोपासकस्योक्तम्। तच्च फलं सर्वेषामीप्सितमिति सर्वोपास्यत्वं युज्यते। न चैतादृशफलप्रदानसामर्थ्यं कथमिन्द्रस्येति शङ्कनीयम्। 'इन्द्रो राजा जगतो य ईशे' 'ईशानमस्य जगतस्सुवर्दृशम' 'इन्द्रो यातोऽवसितस्य राजे' त्यादिश्रुतिभिस्तस्य जगदीश्वरत्वावगमेन तत्र तत्सामर्थ्यसम्भवादिति भाव:। 'प्राणोऽस्मीति निर्दिष्ट: प्राण: परमेश्वर:। तथा 'हिततमं मन्यस' इत्युपक्रम इवानु पश्चादुपसंहारेऽप्यानन्दोऽजरोऽमृत इति परमेश्वरधर्मावगमादिति सूत्रार्थ:। तत्रानुगमादित्यनेनोक्त: औपसंहारिको हेतु'रानन्दाजरामृतप्रज्ञात्मादीना'मित्यादिभाष्येण प्रदर्शित:। उपक्रमहेतु'स्त्विन्द्रो राजेतिश्रुतौ' इति

भाष्येण तदन्यथासिद्धिपरिहारप्रदर्शनमुखेन पश्चाद्दर्शितः। हिततमत्वं ह्युपासनस्य मोक्षसाधनत्वं तद्वाक्यशेषावगतं सर्वपापास्पर्शसाधनत्वं चेत्तदपि फलतो मोक्षपर्य्यवसाय्येव। इदमिन्द्रोपासनस्यापि सम्भवति। इन्द्रस्य सकलजगदीश्वरत्वेन सकलफलप्रदानशक्तत्वादिति शङ्कायाः ख'ल्विन्द्रो राजे'त्यादिश्रुतिर्मूलम्। नैषा श्रुतिरिन्द्रविषया। किं तु तदन्तर्यामिपरमेश्वरविषया। 'इन्द्रस्यात्मानंदशधा चरन्तं' 'इन्द्रस्यात्मानं शतधा चरन्त' 'मिन्द्रस्यात्मा निहितः पञ्चहोते'ति पूर्वापरमन्त्रैः प्रकरणस्य तदन्तर्यामित्वावगमात् एव'भीशानमस्य जगतः सुवर्दृश'मित्यादिकमप्यथर्वशिरःपाठादिहेतुभिः परमेश्वरपरमवगम्यते। अतोऽन्यथासिद्धिरहिताद्धिततमत्वलिङ्गादपि प्राणः परमेश्वर इति भावः।। 'मामेव विजानीही'त्यवधारणमूलशङ्कानिराकरणार्थमुत्तरसूत्रमित्यभिप्रेत्यावतारयति-**आशङ्क्येति**।।सू।। **न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन्**।।३०।। 'आत्मोपदेशा'दिति हेतो'र्मामेव विजानीही'ति सावधारणवाक्येन 'त्रिशीर्षाणं त्वाष्ट्र'मित्यादिना स्वचरितोपन्यासेन च स्वात्मन एवोपास्यत्वोपदेशादित्यर्थमभिप्रेत्य व्याचष्टे-**नायमित्यादिना**। उपसंहार इत्येतद्धिततमत्वो- पक्रमस्याप्युपलक्षणम्। उपक्रमोपसंहारापेक्षयावधारणश्रुत्युपबृंहितं मध्यगतत्वाष्ट्रवधादिलिङ्गबाहुल्यं प्रबलमिति भावः। **उपक्रमादारभ्येति**। तथा च परमेश्वरधर्माणामेव भूयस्त्वादिन्द्रलिङ्गानां भूयस्त्वमसिद्धम्। तत्सत्त्वेऽपि तेषां परमेश्वरधर्माणामिवोपक्रममारभ्योपसंहारपर्यन्तमनुवर्तमानतया भूयस्त्वं सौत्रेणास्मिन्निति पदेन सूचितमसिद्धमिति भावः। **जडचेतनात्मकेति**। यद्यपि पूर्वं 'ता वा एताः दशैव भूतमात्राः अधिप्रज्ञं दश प्रज्ञामात्रा अधिभूत'मिति भूतमात्राभिः सह परस्परापेक्षत्वेनोक्ता दश प्रज्ञामात्रा दशेन्द्रियाणि तथाप्यत्र नेम्यरनाभिदृष्टान्तोपन्यासपूर्वकं भूतामात्राधारत्वेन प्राणाधारत्वेन चोक्तत्वाद्दशसङ्ख्याराहित्याच्च ज्ञानस्वरूपाश्चेतना एव प्रज्ञामात्राशब्देन ग्राह्या इति भावः। **तच्चेति**। **'एष लोकाधिपतिरेष** लोकपाल एष लोकेश' इत्युक्तमौपसंहारिकमानन्दादिकं च परमेश्वरधर्मजातं समुच्चीयते।। 'मामेव विजानीही'ति वचननिर्वाहार्थत्वेनोत्तरसूत्रमवतारयति-**कथमिति**। **जीवत्वादनुपास्योऽपीति**। 'सर्वमन्यत्परित्यज्ये'ति श्रुतेरिति भावः।।सू।। **शास्त्रदृष्ट्या तूपदेशो वामदेववत्**।।३१।। ।।**अनेनेति**। नामव्याकरणं नामवाच्यत्वात्मकनामवैशिष्ट्यसम्पादनं तदुभयं परमेश्वरकर्तृकमित्येतावदेव यद्यपि 'नामरूपे व्याकरवाणी' त्यतः प्रतीयते न तु तन्नामवैशिष्ट्यं रूपवैशिष्ट्यं च परमेश्वरधर्मिकमित्यपि प्रतीयते। तथापि 'तद्धेदं तर्ह्यव्याकृतमासीत्तन्ना- मरूपाभ्यांव्याक्रियते'ति समानार्थश्रुत्यन्तरे नामरूपव्याकरणस्याव्याकृतशब्दपरिगृहीत- प्रलयदशोपसंहृतानभिव्यक्तनामरूपपरमेश्वरपर्यन्ततया स्पष्टमाम्नातत्वादिहापि'बहुस्या'मिति प्राग्वर्णितपारमेश्वरबहुभवनसङ्कल्पानुगुण्यात् 'अनेन जीवेनात्मनानुप्रतिश्ये'ति जीवशरीरकेण स्वात्मना तेजःप्रभृत्यनुप्रवेशोक्तेः तदीयनामरूपव्याकरणस्य स्वात्मपर्यन्ततवावगत्यर्थत्वाच्च नामरूपव्याकरणश्रुत्या परमेश्वरस्य सर्वशब्दवाच्यत्वं सिद्ध्यतीति भावः। आदिशब्दे'नैतदात्म्यमिदं

सर्व'मित्युपरितनवाक्यं 'य आत्मनि तिष्ठ'न्नित्यादि श्रुत्यन्तरं च सर्वशब्दवाच्यत्वोपपादकसार्वात्म्यप्रतिपादकं गृह्यते। **शास्त्रदृष्ट्येति।** शास्त्रमूला दृष्टिः शास्त्रदृष्टिः नामरूपव्याकरणश्रुतिमूला सर्वशब्दवाच्यत्वावगतिः सर्वात्म्यप्रतिपादकशास्त्रमूलयोगाभ्यासप्रभंवा स्वात्मभूतब्रह्मानुभूतिश्च। 'सर्वशब्दवाच्यत्वा'दित्येतत्सर्वात्मत्वादित्यस्याप्युपलक्षणम्। **स्वशरीरकतयेति।** इन्द्रः स्वप्रयुक्तस्य मामिति शब्दस्य स्वात्मभूतपरमात्मपर्यन्तत्वं पश्य'न्मामेव विजानीही'ति स्वशरीरकं परमेश्वरमेवोपास्यमुपदिदेशेत्यर्थः। **इन्द्रशब्देनेति।** इन्द्रविषयेण मामिति शब्देनेत्यर्थः। **वामदेवो हीति।** वामदेवः स्वस्य परमेश्वर आत्मेति दृष्ट्या स्वविषयस्याहमिति शब्दस्य तत्पर्यन्तत्वं स मन्वादीनामप्यात्मेति दृष्ट्या मन्वादिशब्दानां तत्पर्यन्तत्वं चावगच्छ'न्नहं मनु'दित्याद्युपदिदेशेत्यर्थः। एवमिन्द्रस्य तद्दृष्टान्तस्य वामदेवस्य च। परमेश्वरे मामहमितिशब्दयोः प्रयोगस्तयोः स्वान्तर्यामिपरमेश्वरपर्यन्ततावगतिप्रयुक्त इत्युपपादितम्। इदानीं सर्वात्मभूतपरमेश्वरैक्यभावनादाढर्यप्रयुक्तस्स इति। प्रकारान्तरेण सूत्रार्थमाह-**अथवेति।** अयमर्थः। 'त्वं वा अहमस्मि भगवो देवते अहं वै त्वभसी'त्यादि वेदान्तविषयप्रामाण्यात् दहराद्युपासकैः परब्रह्मणा मलमायादिसकलदोषरहितेन सत्यसङ्कल्पत्वादिसकलमङ्गलगुणास्पदेन सकलभोक्तृभोग्यशरीरकेण शिवेन स्वात्मनस्सामरस्यभावनावर्णित धर्मजातविशिष्टतदैक्यभावना कार्येत्येव 'मात्मेति तूपगच्छन्ति ग्राहयन्ति चे' (ब्र० ४-१-३. सू) त्यधिकरणे समर्थयिष्यते। ततश्चिरनिरन्तरासेवितभावनादाढर्येन तेषां वस्तुतस्स्वशरीररीत्या सर्वप्रपञ्चप्रेरणासामर्थ्यरूपे सर्वशरीरकत्वे सर्वदा सत्यपि वातव्याधिदशायां वाताभिभूतशरीरैकदेशप्रेरणासामर्थ्यस्येव संसारदशायां तस्यानभिव्यक्त्या मनुष्यादिशरीरमात्रे परिच्छिन्नो यः कल्पितोऽहंभावस्स्थितस्स विगलितो भवति। विषनिर्हरणमन्त्रैर्गरुडमुपासीनानां वीक्षणमात्रसाध्यविषनिर्हरणसामर्थ्यशालिना गरुडेनैक्यभावनायाः दाढर्यात्तेषां तदसाधारणोक्तरूपसामर्थ्यविशेषणस्येव दहराद्युपासकानामुक्तरूपशिवाभेदभावनासामर्थ्यात् शिवासाधारणसकलप्रपञ्चप्रेरणसामर्थ्यस्याभिव्यक्तिः मनुष्यादिशरीर इव भोग्यभोक्तृरूपे सर्वस्मिन्नपि प्रपञ्चे विजृम्भमाणोऽहंभावश्च प्रवर्तते। उपपद्यते च चिच्छक्तिव्याप्त्या स्वकीयं सर्वगतत्वमवगच्छतां सर्वप्रपञ्चानुप्रवेशेन तत्प्रेरणासामर्थ्यकृतया स्वशरीरत्वावगत्या सर्वस्मिन्नपि संसारितद्भोग्यवर्गरूपे प्रपञ्चे सर्वशरीरत्वप्रयुक्ताहंबुद्धिः। एवं शिवाभेदभावनया शिवसामर्थ्यप्राप्तिस्तृतीयाध्याये 'प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासा'दिति (ब्र० ३-२-२४) सूत्रे प्रदर्शयिष्यते। चिच्छक्तिव्याप्त्या सर्वानुप्रवेशेन तत्पूर्वकसर्वप्रेरणासामर्थ्यात्मकसर्वशरीरत्वरूपं सार्वात्म्यं चतुर्थाध्याये 'प्रदीपवदावेश'इति (ब्र० ४-१-१५.) सूत्रे 'तदपश्यत्तदभवत् प्रजा'स्विति श्रुत्युदाहरणपूर्वकं प्रदर्शयिष्यते। तत्कृता सर्वत्र भोग्यभोक्तरूपे प्रपञ्चेऽहंबुद्धिर्मुक्तिदशायामप्यनुवर्तमाना तत्रैव 'विकारावर्ति च तथाहि स्थितिमाह' इति (ब्र० ४-३-१९.) सूत्रे 'अहमन्नमहमन्नाद' इति

श्रुत्युदाहरणपूर्वकं प्रदर्शयिष्यते। एवं च वामदेवस्य सर्वात्मत्वभावनादार्ढ्याद्यथा स्वस्य मनुसूर्यादिरूपत्वव्यवहारः एवमिह तथाभूतब्रह्माभेदभावनादार्ढ्यान्द्रिस्य ब्रह्माभिप्रायेण 'मा' मिति व्यवहार इति। मामेवेत्येवकारोऽपि ब्रह्माभेदभावनादार्ढ्यादुपपद्यते। **तथा हीति**। तथा तेन प्रकारेण भावनादार्ढ्यकृतशिवाभेददृष्टयैव हि 'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु। सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजे' त्यादि भगवान्कृष्णोऽप्यर्जुनं प्रत्युपदिदेश। अत एव 'कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः। अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्।।' इत्यादिवचनान्वितं गीताशास्त्रमात्रं श्रुत्वापि 'स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तवे'ति शास्त्रान्ते गुरुं प्रत्युक्त्वाप्यर्जुनो यावज्जीवं शिवपूजारत एवावर्तत। भारतयुद्धमध्ये शिवाय कल्पितेन नित्यपूजोपहारेण कृष्णं शिवबुद्ध्यैव चार्चयत एव तदीयस्य पूजोपहारस्य कैलासे शिवसमीपे दर्शनमुक्तम्। द्रोणपर्वणि 'तं चोपहारं विततं नैशं नैत्यिकमात्मनः। ददर्श त्र्यम्बकाभ्याशे वासुदेवे निवेदित'मिति। एवं भगवद्गीतायाः शिवपरत्वे सत्येव 'ज्ञानं तदैश्वरं दिव्यं यथावद्विदितं त्वया। स्वयमेव हृषीकेशः प्रीत्योवाच सनातनम्। गच्छगच्छ स्वकं स्थानं न शोकं कर्तुमर्हसि। भजस्व परया भक्त्या शरण्यं शरणं शिव'मिति कूर्मपुराणेऽर्जुनं प्रति व्यासवचनम्। तत्रैवेश्वरगीतान्ते'नारायणोऽपि भगवान्देवकीतनयो हरिः। अर्जुनाय स्वयं साक्षाद्दत्तवानिदमुत्तमम्।।' इति वचनं च सङ्गच्छते। ननु 'केषु केषु च भावेषु चिन्त्योऽसि भगवन्मये'त्यादि पृष्टवन्तमर्जुनं प्रति 'मन्मना भव मद्भक्त'इत्यादिभगवद्वचनं कथं हि शिवोपासनादिविषयं स्यादिति चेन्न। भगवतः कृष्णस्य स्वचरितवचनतेजोविशेषैः शिवभावभावितत्वं निश्चितवतोऽर्जुनस्य प्रश्नोऽपि शिवोपासनादिविषय इत्युपपत्तेः। ऐतरेयोपनिषदि विश्वामित्रं प्रकृत्य श्रुते 'इन्द्रस्य प्रियं धामोपेयाय तमिन्द्र उवाच ऋषे प्रियं वै मे धामोपागा वरं ते ददामीति। स होवाच त्वामेव विजानीया'मिति सन्दर्भे विश्वामित्रप्रश्नस्य 'तमिन्द्रउवाच प्राणो वा अहमस्म्यृषे प्राणस्त्वं प्राणस्सर्वाणि भूतानि प्राणो ह्येष य एष तपति स एतेन रूपेण सर्वा दिशो विष्टोऽस्मी'त्याद्युत्तरसन्दर्भानुसारेण तथा गतिकल्पनायास्सम्प्रतिपन्नत्वात्। 'दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्। तमेव चाद्य पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी। कथं विद्या महायोगिन् त्वां सदा परिचिन्तयन्। योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम्। एवमुक्त्वा ततो राजन्महायोगीश्वरो हरिः। यत्र योगीश्वर; कृष्णो यत्र पार्थो धनुर्धरः।' इति गीताम्नातासु कृष्णार्जुनसंशयोक्तिषु कृष्णस्येश्वरविषययोगवत्त्वस्य प्रतिपादितत्वेन 'परं हि ब्रह्म कथितं योगयुक्तेन तन्मये'त्यनुगीतारम्भे कृष्णेनैव शिवयोगमास्थाय मया गीतोपदेशः कृत इत्युक्तत्वेन विभूत्यध्याये कृष्णेना'दित्यानामहं विष्णु'रिति स्वपूर्वावताररूपस्येपेन्द्रस्य 'वृष्णीनां वासुदेवोऽस्मी'ति स्वस्य च स्वविभूतिषु परिगणनपूर्वकं विश्वरूपाध्याये 'मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचि' न्निति विपक्षाणां प्रत्यक्षहननात्प्रागेव स्ववीर्यप्रभावनिहतत्वमुपवर्ण्य समयान्तरे स्वरूपमास्थितेन तेन

मोक्षधर्मेषु पार्थं प्रत्येव 'निहतांस्त्वेव पूर्वं त्वं हतवानसि वै रिपून्। अप्रमेयप्रभावं त्वं देवदेवमुमापतिम्। भजस्व नित्यं प्रयतो विश्वेशं हरमव्यय'मिति तेषां शिववीर्यप्रभावनिहतत्वोपदेशेन गीतास्वप्राकृतगुणचरितोपदेशस्य सर्वस्यापि पराहंभावगृहीतशिवविषयत्वस्य व्यक्तिकृतत्वेन च गीतायाः कात्स्न्येन शिवविषयत्वस्यावश्याभ्युपगन्तव्यत्वाच्च। तस्मात्कृष्णस्य 'मन्मना भवे' त्यादिवचनं शिवदृष्ट्यैव। तद्वदिन्द्रवचनमपि। सूत्रगतवामदेवग्रहणमुपलक्षणीकृत्य दृष्टान्तान्तरोपन्यासोऽयम्। अदिशब्देनोक्तवाक्यान्तरदृष्टानामेवंभूतोपदेशानां सङ्ग्रहः। एवं 'मामेव विजानी ही' ति वक्तुरात्मोपदेशस्य निर्वाहः कृतः। त्वाष्ट्रवधादिलिङ्गानामनिर्वाहे कृतनिर्वाहोऽपि न प्रतिष्ठितः स्यादिति तदाशङ्कोद्भावनपूर्वकं तन्निर्वाहार्थत्वेनोत्तरसूत्रमवतारयति-**पुनरिति**।।सू।। **जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्**।।३२।। **युक्त इति**। 'प्राणो वा अहमस्म्यृष'इ ति श्रुत्यन्तर इति शेषः। यद्वा। उपास्यत्वं सार्वात्म्यं चेतीन्द्रवामदेवसम्बन्धिनोः प्रकृताप्रकृतयोरुपादानम्। तथा च ब्रह्मदृष्ट्या वामदेवसार्वात्म्योपदेशवदिन्द्रोपास्यत्वोपदेशो युक्त इत्यर्थः। यद्यत्र त्वाष्ट्रवधादिजीवमुख्यप्राणलिङ्गं न स्यादिति शेषः। अस्ति त्वत्र तदित्याह **अत्र त्विति**। इत्यादावित्यादिशब्देन 'न वाचं विजिज्ञासीत वक्तारं विद्या'दित्यादिकमिन्द्रलिङ्गसहपाठा-द्विशेषपर्यवसायि जीवसामान्यलिङ्गं 'मिदं शरीरं परिगृह्योत्थापयती'त्यादि मुख्यंप्राणलिङ्गं च गृह्यते। मुख्यप्राणलिङ्गमपि मुख्यप्राणसम्बन्धरूपजीवसामान्यलिङ्गोत्थापनद्वारा जीवविशेषपर्यवसायि। ननु प्राणश्रुतौ सत्यां किमिति मुख्यप्राणविषये लिङ्गान्वेषणम्। उच्यते। ऐतरेयोपनिषदि 'त्वामेव विजानीया'मिति पृष्टवन्तं विश्वामित्रं प्रति 'प्राणो वा अहमस्म्यृष'इतीन्द्रवाक्ये प्राणशब्दस्य 'प्राणस्त्व'मित्यादिवाक्यशेषे सर्वात्मत्वप्रपञ्चनानुसारेण ब्रह्मविषयत्वं दृष्टम्। तत्सामान्यादियमपि प्राणश्रुतिर्ब्रह्मविषयेति शङ्का स्यात्। अतो यथा 'यन्मां विजानीया' दित्यन्तवाक्ये 'मा'मितीन्द्रविषयश्रुतौ सत्यामपि ब्रह्मधर्मभूमानमवलम्ब्य वामदेवसार्वात्म्योपदेशवत् ब्रह्मदृष्ट्या मामित्युपदेश इति शङ्कावारणाय मामित्यस्येन्द्रविषयत्वमुपपादयितुं तद्वाक्यशेषत्वाष्ट्रवधादिलिङ्गोपन्यासः। एवं तद्भूमानमवलम्ब्य 'प्राणो वा अहमस्म्यृष'इत्यत्र प्राणशब्दवत् 'प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमुपास्वे'त्यत्रापि ब्रह्मपरः प्राणशब्द इति शङ्कावारणाय तत्र प्राणश्रुतेर्मुख्यप्राणविषयत्वमुपपादयितुमेव तद्वाक्यशेषगतप्राणलिङ्गोपन्यासः। तेनामयर्थः सम्पन्नः। प्रकरणोपक्रमोपसंहारगतत्वेन दूरवर्तिभ्यो ब्रह्मलिङ्गेभ्यो मामित्यस्येन्द्रपरत्वस्पष्टीकरणार्थं प्रवृत्तानां तद्वाक्यशेषगतत्वाष्ट्रवधादिलिङ्गानां प्राणशब्दस्य मुख्यप्राणपरत्वस्पष्टीकरणार्थं प्रवृत्तानामायुर्हेतुत्वादिलिङ्गानां च प्रबलत्वेन तद्विरुद्धानां ब्रह्मलिङ्गानामन्यथा नेयत्वान्मामित्यस्य प्राणशब्दस्य च ब्रह्मविषयत्वमभ्युपगम्य तदुपासनोपदेश इत्युक्तमयुक्तमिति। एवं सौत्रशङ्काभागं व्याख्याय परिहारभागं व्याचष्टे-**नैवं वाच्यमित्यादिना**।

ब्रह्मजीवमुख्यप्राणलिङ्गानां विरोधे हि प्रबलजीवमुख्यप्राणलिङ्गविरोधात् ब्रह्मलिङ्गावगमितं मामिति जीवशब्दस्य प्राणशब्दस्य च परमेश्वरपरत्वं त्यक्तव्यम्। नास्ति तेषां विरोधः। वेदान्तेषु विधीयमाना ब्रह्मण उपासना क्वचित्स्वधर्मविशिष्टत्वेन यथा 'सत्यं ज्ञानमनन्तं ब्रह्मे 'त्यत्र क्वचिच्चेतनधर्मविशिष्टत्वेन यथा 'तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति' इत्यत्र क्वचिदचेतनधर्मविशिष्टत्वेन यथा 'पुरुषेऽन्तःप्रतिष्ठितं वेदे 'त्यत्रेत्येवमुपासनात्रैविध्य-सद्भावादित्येतदर्थपरत्वेनोपासात्रैविध्यादिति सूत्रपदं व्याचष्टे-**यतो जीवेति**। अस्त्वन्यत्र त्रिविधोपासनदर्शनं **प्रकृते** किमायातमित्याकाङ्क्षायामत्रापि त्रिविधोपासनस्य विवक्षितत्वादित्येतदर्थत्वेन 'आश्रितत्वादिहे' ति सूत्रपदद्वयं व्याचष्टे-**अत्र परमेश्वरस्येति**। ननु ब्रह्मजीवमुख्यप्राणधर्मविशिष्टविषयमेकमुपासनमिह विवक्षितं तत्तद्विशिष्टविषयाणि त्रीण्युपासनानि वा। नाद्यः। 'स यो मां विजानीयान्नास्य केन च कर्मणा लोको मीयते तस्मात्तदेवोक्थमुपासीते 'ति जीवमुख्यप्राणयोरपि प्रत्येकमुपासनाविधिश्रवणात्। न द्वितीयः। 'प्राणोऽस्मि प्रज्ञात्मा स एष प्राण एव प्रज्ञात्मे 'त्युपक्रमोपसंहारावगतैकवाक्यत्वभङ्गप्रसङ्गादिति शङ्कानिराकरणार्थं 'तद्योगा 'दिति सूत्रपदमुभयथापि युज्यत इत्येतदर्थपरमभिप्रेत्य व्याचष्टे-**आत्मतयेति**। यदि 'प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमुपास्वे 'त्येतस्मिन्वाक्ये 'आयुः प्राणः प्राणो वा आयुः प्राण एवामृतं यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुः प्राणेन ह्येवामुष्मिन्लोके अमृतत्वमाप्नोती 'ति तदनन्तरवाक्यशेषे प्राणधर्मत्वेनावगताभ्यामायुष्ट्वामृतत्वाभ्यां विशिष्टेन प्राणेन 'त्रिशीर्षाणं त्वाष्ट्रमहन 'मित्यादिपूर्ववाक्ये इन्द्रधर्मत्वेनावगतैस्त्वाष्ट्रहन्तृत्वादिभिर्विशिष्टेनेन्द्रेणोपसंहारे 'प्राण एव प्रज्ञात्मे 'त्येतद्वाक्योपात्तमुपास्यं ब्रह्म प्रत्यभिज्ञाप्य तद्धर्मत्वेनाम्नातैरानन्दादिभिश्व विशिष्टस्य ब्रह्मण एकमेवोपासनं विधीयते। तथा 'स यो मां विजानीया 'दिति वाक्यं त्वाष्ट्रहन्तृत्वादिजीवविशेषणानुचिन्तनफलार्थवादरूपं स्तुतिपरम्। 'उक्थमुपासीते 'ति वाक्यं प्राणविशेषणशरीरोत्थापकत्वगुणोपासनाविधिपरमिति उपपद्यते। यदा ते वाक्ये जीवमुख्यप्राणधर्मविशिष्टब्रह्मोपासनाविधिपरे तदा प्राणोऽस्मीत्यादिवाक्यमायुष्ट्वादिस्वधर्मविशिष्ट-प्राणशब्दोदितसर्वप्राणयितृब्रह्मोपासनाविधिपरम्। 'आयुः प्राण' इत्यादिवाक्यशेषोऽपि ब्रह्मपर एव। न 'प्राणेन नापानेन मर्त्यो जीवति कश्चन। इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रिता 'विति श्रुतेः। प्राणस्यापि प्राणभूतस्य ब्रह्मण एवायुषि मुख्यहेतुत्वात् तत्रैव मुख्यामृतत्वविश्रान्तेश्च प्राणधर्मविशिष्टब्रह्मोपासनाप्रसङ्गः। 'तद्धैक आहुरेकभूयं वै प्राणा गच्छन्ती' त्याद्युत्तरसन्दर्भेण च जीवमुख्यप्राणोपासनयोः प्रत्येकविधिस्वीकारे तयोर्ब्रह्मपर्यन्तत्वासिद्धिप्रसङ्गः। 'स यो मां विजानीया 'दिति विधेर्मुक्तिपर्यायसकलपापासंस्पर्शफलत्वोक्त्या ब्रह्मपर्यन्तत्वसिद्धेः अत एवों' क्थमुपासीते 'ति प्रकृतप्राणोपासनाविधानानन्तरं 'एतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते

प्राणेभ्यो देवा देवेभ्यो लोका' इति प्रकृतप्राणविषयात्मश्रुत्येन्द्रियादिनिस्सरणापादानत्वलिङ्गेन च तस्यापि ब्रह्मपर्यन्तत्वसिद्धेः। तस्मादुभयथापि त्रिविधोपासनाविधानं युज्यत इति भावः। उपासनाभेदपक्षे स्वधर्मविशिष्टब्रह्मोपासनादितरोपासनयोः फलतो वैलक्षण्यं चतुर्थाध्याये वक्ष्यमाणं स्मारयति-**परमेश्वरस्येति**।। ।।

इति इन्द्रप्राणाधिकरणम्।।१२।।

इति श्रीशिवातिवादिमूर्धन्यशिवदर्शनस्थापनधुरन्धरसकलदेवभूदेवप्रतिष्ठापक-श्रीमच्चिन्नबोम्मभूपालहृदयकमलकुहरविहरमाणश्रीसाम्बशिवप्रेरितस्य श्रीमद्भरद्वाजकुल-जलधिकौस्तुभश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ श्रीकण्ठाचार्य-विरचितब्रह्ममीमांसाभाष्यव्याख्यायां शिवादित्यमणिदीपिकाख्यायां प्रथमस्याध्यायस्य प्रथमः पादः।।

इति शिवार्कमणिदीपिका प्रथमः पादः समाप्तम्।।

॥ अथ प्रथमाध्याये द्वितीयः पादः ॥

अथ सर्वत्रप्रसिद्धाधिकरणम् -१-८ ॥

शाङ्करभाष्यम्

प्रथमे पादे "जन्माद्यस्य यतः" इत्याकाशादेः समस्तस्य जगतो जन्मादिकारणं ब्रह्मेत्युक्तम्। तस्य समस्तजगत्कारणस्य ब्रह्मणो व्यापित्वम्, नित्यत्वम्, सर्वशक्तित्वम्, सर्वात्मत्वमित्येवंजातीयका धर्मा उक्ता एव भवन्ति। अर्थान्तरप्रसिद्धानां च केषाञ्चिच्छब्दानां ब्रह्मविषयत्वहेतुप्रतिपादनेन कानिचिद्वाक्यानि स्पष्टब्रह्मलिङ्गानि संदिह्यमानानि ब्रह्मपरतया निर्णीतानि। पुनरप्यन्यानि वाक्यान्यस्पष्टब्रह्मलिङ्गानि संदिह्यन्ते—किं परं ब्रह्म प्रतिपादयन्ति, अहोस्विदर्थान्तरं किंचिदिति। तन्निर्णयाय द्वितीयतृतीयौ पादावारभ्येते॥

सर्वत्र प्रसिद्धोपदेशात्॥१॥ इदमाम्नायते—"सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत। अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति, स क्रतुं कुर्वीत मनोमयः प्राणशरी भारूप" (छा० ३/१४/१/२) इत्यादि॥ तत्र संशयः—किमिह मनोमयत्वादिर्भिधर्मैः शारीर आत्मोपास्यत्वेनोपादिश्यते, आहोस्वित्परं ब्रह्मेति॥

किं तावत् प्राप्तम्? शारीर इति। कुतः? तस्य हि कार्यकारणाधिपतेः प्रसिद्धो मनआदिभिः संबन्धः न परस्य ब्रह्मणः ; "अप्राणो ह्यमनाः शुभ्र" (मु० २/१/२) इत्यादिश्रुतिभ्यः।

ननु—"सर्वं खल्विदं ब्रह्मे" ति स्वशब्देनैव ब्रह्मोपात्तम्, कथमिह शारीर आत्मोपास्य आशङ्क्यते? नैष दोषः ; नेदं वाक्यं ब्रह्मोपासनाविधिपरम्। किं तर्हि? शमविधिपरम्। यत्कारणं "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीते" त्याह। तदुक्तं भवति—यस्मात्सर्वमिदं विकारजातं ब्रह्मैव; तज्जत्वात्तल्लत्वात्तदनत्वाच्च। न च सर्वस्यैकात्मत्वे रागादयः संभवन्ति। तस्माच्छान्त उपासीतेति। न च शमविधिपरत्वे सत्यनेन वाक्येन ब्रह्मोपासनं नियन्तुं शक्यते। उपासनं तु "स क्रतुं कुर्वीते" त्यनेन विधीयते। क्रतुः संकल्पो ध्यानमित्यर्थः। तस्य च विषयत्वेन श्रूयते—"मनोमयः

प्राणशरीर'' इति जीवलिङ्गम्। अतो ब्रूमो जीवविषयमेतदुपासनमिति। ''सर्वकर्मा सर्वकाम'' इत्याद्यपि श्रूयमाणं पर्यायेण जीवविषयमुपपद्यते। ''एष म आत्माऽन्तर्हृदयेऽणीयान्ब्रीहेर्वा यवाद्वे'' ति च हृदयायतनत्वमणीयस्त्वं चाराग्रमात्रस्य जीवस्यावकल्पते, नापरिच्छिन्नस्य ब्रह्मणः। ननु–''ज्यायान् पृथिव्या'' इत्याद्यपि न परिच्छिन्नेऽवकल्पते–इति, अत्र ब्रूमः–न तावदणीयस्त्वं ज्यायस्त्वं चोभयमेकस्मिन् समाश्रयितुं शक्यम्; विरोधात्। अन्यतराश्रयणे च प्रथमश्रुतत्वादणीयस्त्वं युक्तमाश्रयितुम्, ज्यायस्त्वं तु ब्रह्मभावापेक्षया भविष्यतीति। निश्चिते च जीवविषयत्वे यदन्ते ब्रह्मसंकीर्तनम्, ''एतद् ब्रह्मे'' (छा० ३/१४/४) ति, तदपि प्रकृतपरामर्शार्थत्वाज्जीवविषयमेव। तस्माद् मयोमयत्वादिभिर्धर्मैर्जीव उपास्य इति।।

एवं प्राप्ते ब्रूमः–परमेव ब्रह्म मनोमयत्वादिभिर्धर्मैरुपास्यम्। कुतः? *सर्वत्र प्रसिद्धोपदेशात्*।। यत् सर्वेषु प्रसिद्धं ब्रह्मशब्दस्यावलम्बनं जगत्कारणम्, इह च ''सर्वं खल्विदं ब्रह्मे'' ति वाक्योपक्रमे श्रुतम्, तदेव मनोमयत्वादिधर्मैर्विशिष्टमुपदिश्यत इति युक्तम्। एवं च प्रकृतहानाप्रकृतप्रक्रिये न भविष्यतः। ननु–वाक्योपक्रमे शमविधिविवक्षया ब्रह्म निर्दिष्टम्, न स्वविवक्षया–इत्युक्तम्, अत्रोच्यते–यद्यपि शमविधिविवक्षया. ब्रह्म निर्दिष्टम्; तथापि मनोमयत्वादिषूपदिश्यमानेषु तदेव ब्रह्म संनिहितं भवति। जीवस्तु न संनिहितः, न च स्वशब्देनोपात्तः, इति वैषम्यम्।।१।।

विवक्षितगुणोपपत्तेश्च।।२।। वक्तुमिष्टा विवक्षिताः। यद्यप्यपौरुषेये वेदे वक्तुरभावान्नेच्छार्थः संभवति; तथाप्युपादानेन फलेनोपचर्यते। लोके हि यच्छब्दाभिहितमुपादेयं भवति, तद्विवक्षितमित्युच्यते, यदनुपादेयं तदविवक्षितमिति; तद्वद्वेदेऽप्युपादेयत्वेनाभिहितं विवक्षितं भवति, इतरदविवक्षितम्। उपादानानुपादाने तु वेदवाक्यतात्पर्यातात्पर्याभ्यामवगम्येते। तदिह ये विवक्षिता गुणा उपासनायामुपादेयत्वेनोपदिष्टाः सत्यसंकल्पप्रभृतः, ते परस्मिन् ब्रह्मण्युपपद्यन्ते।।

सत्यसंकल्पत्वं हि सृष्टिस्थितिसंहारेष्वप्रतिबद्धशक्तित्वात्परमात्मन एवावकल्पते। परमात्मगुणत्वेन च ''य आत्माऽपहतपाप्मे'' (छा० ८/७/१) त्यत्र ''सत्यकामः सत्यसंकल्प'' इति श्रुतम्। आकाशात्मेति आदिना। आकाशवदात्माऽस्येत्यर्थः। सर्वगतत्वादिभिर्धर्मैः संभवत्यकाशेन साम्यं ब्रह्मणः। ''ज्यायान्पृथिव्या'' इत्यादिना चैतदेव दर्शयति। यदाप्याकाश आत्मा यस्येति व्याख्यायते, तदापि संभवति सर्वजगत्कारणस्य सर्वात्मनो ब्रह्मण आकाशात्मत्वम्। अत एव ''सर्वकर्मे'' त्यादि। एवमिहोपास्यतया विवक्षिता गुणा ब्रह्मण्युपपद्यन्ते। यत्तूक्तम्–''मनोमयः प्राणशरीर'' इति जीवलिङ्गम्, न तद् ब्रह्मण्युपपद्यते–इति, तदपि ब्रह्मण्युपपद्यत इति ब्रूमः। सर्वात्मत्वाद्धि ब्रह्मणो जीवसबन्धीनि मनोमयत्वादीनि ब्रह्मसंबन्धीनि भवन्ति। तथाच ब्रह्मविषये

श्रुतिस्मृती भवतः–''त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी। त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुख'' (श्वे० ४/३) इति ''सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम्। सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठती'' (गी०१३/१३) ति च। ''अप्राणो ह्यमनाः शुभ्र'' इति श्रुतिः शुद्धब्रह्मविषया, इयं तु ''मनोमयः प्राणशरीर'' इति सगुणब्रह्मविषयेति विशेषः। अतो विवक्षितगुणोपपत्तेः परमेव ब्रह्मेहोपास्यत्वेनोपदिष्टमिति गम्यते।।२।।

अनुपपत्तेस्तु न शारीरः।।३।। पूर्वेण सूत्रेण ब्रह्मणि विवक्षितानां गुणानामुपपत्तिरुक्ता, अनेन तु शारीरे तेषामनुपपत्तिरुच्यते। तुशब्दोऽवधारणार्थः। ब्रह्मैवोक्तेन न्यायेन मनोमयत्वादिगुणम्, न तु शारीरो जीवो मनोमयत्वादिगुणः ; यत्कारणम् सत्यसंकल्पः, आकाशात्मा, अवाकी, अनादरः, ज्यायान् पृथिव्या इति चैवंजातीयका गुणा न शारीर आञ्जस्येनोपपद्यन्ते। *शारीर इति*।। शरीरे भव इत्यर्थः।।

ननु–ईश्वरोऽपि शरीरे भवति; सत्यं शरीरे भवति; नतु शरीर एव भवति, ''ज्यायान् पृथिव्या ज्यायानन्तरिक्षात्'' ''आकाशवत्सर्वगतश्च नित्य'' इति च व्यापित्वश्रवणात्। जीवस्तु शरीर एव भवति; तस्य भोगाधिष्ठानाच्छरीरादन्यत्र वृत्त्यभावात्।।३।।

कर्मकर्तृव्यपदेशाच्च।।४।। इतश्च न शारीरो मनोमयत्वादिगुणः, यस्मात्कर्मकर्तृव्यपदेशो भवति–''एतमितः प्रेत्याभिसंभवितास्मी'' (छा० ३/१४/४) ति। एतमिति प्रकृतं मनोमयत्वादिगुणमुपास्यमात्मानं कर्मत्वेन प्राप्यत्वेन व्यपदिशति। अभिसंभवितास्मीति शारीरमुपासकं कर्तृत्वेन प्रापकत्वेन। अभिसंभवितास्मीति=प्राप्तास्मीत्यर्थः। न च सत्यां गतावेकस्य कर्मकर्तृव्यपदेशो युक्तः। तथोपास्योपासकभावोऽपि भेदाधिष्ठान एव। तस्मादपि न शारीरो मनोमयत्वादिविशिष्टः।।४।।

शब्दविशेषात्।।५।। इतश्च शारीरादन्यो मनोमयत्वादिगुणः, यस्माच्छब्दविशेषो भवति समानप्रकरणे श्रुत्यन्तरे–''यथा व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतण्डुलो वैवमयमन्तरात्मन् पुरुषो हिरण्मय'' (शत० ब्रा० १०/६/३/२) इति। शारीरस्यात्मनो यः शब्दोऽभिधायकः सप्तम्यन्तोऽन्तरात्मन्निति, तस्माद्विशिष्टोऽन्यः प्रथमान्तः पुरुषशब्दो मनोमयत्वादिविशिष्टस्यात्मनोऽभिधायकः। तस्मात्तयोर्भेदोऽधिगम्यते।।

स्मृतेश्च।।६।। स्मृतिश्च शारीरपरमात्मनोर्भेदं दर्शयति–''ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायये'' (गी० १८/६१) त्याद्या। अत्राह–कः पुनरयं शारीरो नाम परमात्मनोऽन्यः, यः प्रतिषिध्यते ''अनुपपत्तेस्तु न शारीर'' इत्यादिना?

श्रुतिस्तु–''नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोते'' (बृ० ३/७/२३) त्येवंजातीयका परमात्मनोऽन्यमात्मानं वारयति, तथा स्मृतिरपि–''क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारते'' (गी० १३/२) त्येवंजातीयकेति।।

अत्रोच्यते–सत्यम्; एवमेवैतत्। पर एवात्मा देहेन्द्रियमनोबुद्ध्युपाधिभिः परिच्छिद्यमानो बालैः शारीर इत्युपचर्यते, यथा घटकरकाद्युपाधिवशादपरिच्छिन्नमपि नभः परिच्छिन्नवदवभासते, तद्वत्। तदपेक्षया च कर्मकर्तृत्वादिभेदव्यवहारो न विरुध्यते प्राक् ''तत्त्वमसी'' त्यात्मैकत्वोपदेशग्रहणात्। गृहीते त्वात्मैकत्वे बन्धमोक्षादिसर्वव्यवहारपरिसमाप्तिरेव स्यात्।।६।।

अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च।।७।। अर्भकमल्पमोको नीडम्; ''एष म आत्मान्तर्हृदय'' इति परिच्छिन्नायतनत्वात् स्वशब्देन च ''अणीयान्व्रीहेर्वा यवाद्वे'' त्यणीयस्त्वव्यपदेशात् शारीर एवाराग्रमात्रो जीव इहोपदिश्यते, न सर्वगतः परमात्मेति यदुक्तं तत्परिहर्तव्यम्।।

अत्रोच्यते–नायं दोषः ; न तावत्परिच्छिन्नदेशस्य सर्वगतत्वव्यपदेशः कथमप्युपपद्यते, सर्वगतस्य तु सर्वदेशेषु विद्यमानत्वात्परिच्छिन्नदेशव्यपदेशोऽपि कयाचिदपेक्षया संभवति। यथा समस्तवसुधाधिपतिरपि हि सन्नयोध्याधिपतिरिति व्यपदिश्यते।।

कया पुनरपेक्षया सर्वगतः सन्नीश्वरोऽर्भकौका अणीयांश्च व्यपदिश्यत इति? *निचाय्यत्वादेवमिति ब्रूमः*।। एवमणीयस्त्वादिगुणगणोपेत ईश्वरस्तत्र हृदयपुण्डरीके निचाय्यो द्रष्टव्य उपदिश्यते, यथा शालग्रामे हरिः। तत्रास्य बुद्धिविज्ञानं ग्राहकम्। सर्वगतोऽपीश्वरस्तत्रोपास्यमानः प्रसीदति। व्योमवच्चैतद् द्रष्टव्यम्। यथा सर्वगतमपि सद् व्योम सूचीपाशाद्यपेक्षयाऽर्भकौकोऽणीयश्च व्यपदिश्यते, एवं ब्रह्मापि। तदेवं निचाय्यत्वापेक्षं ब्रह्मणोऽर्भकौकस्त्वमणीयस्त्वं च, न पारमार्थिकम् तत्र यदाशङ्क्यते–हृदयायतनत्वाद् ब्रह्मणो हृदयायतनानां च प्रतिशरीरं भिन्नत्वाद्भिन्नायतनानां च शुकादीनामनेकत्वसावयवत्वादिदोषदर्शनाद् ब्रह्मणोऽपि तत्प्रसङ्गः–इति, तदपि परिहृतं भवति।।७।।

संभोगप्राप्तिरिति चेन्न वैशेष्यात्।।८।। व्योमवत्सर्वगतस्य ब्रह्मणः सर्वप्राणिहृदयसंबन्धात् चिद्रूपतया च शारीरादविशिष्टत्वात् सुखदुःखादिसंभोगोऽप्यविशिष्टः प्रसज्येत। एकत्वाच्च। न हि परस्मादात्मनोऽन्यः कश्चिदात्मा संसारी विद्यते; ''नान्योऽतोऽस्ति विज्ञाते'' (बृ० ३/७/२३) त्यादिश्रुतिभ्यः। तस्मात् परस्यैव संसारसंभोगप्राप्तिरिति चेत्, न; वैशेष्यात्। न तावत्सर्वप्राणिहृदयसंबन्धाच्छारीरवद् ब्रह्मणः संभोगप्रसङ्गः ; वैशेष्यात्। विशेषो हि भवति

शारीरपरमेश्वरयोः। एकः कर्ता भोक्ता धर्माधर्मसाधनः सुखदुःखादिमांश्च, एकस्तद्विपरीतोऽपहतपाप्मत्वादिगुणः। एतस्मादनयोर्विशेषादेकस्य भोगः, नेतरस्य। यदि च संनिधानमात्रेण वस्तुशक्तिमनाश्रित्य कार्यसम्बन्धोऽभ्युपगम्येत, आकाशादीनामपि दाहादिप्रसङ्गः। सर्वगतानेकात्मवादिनामपि समावेतौ चोद्यपरिहारौ। यदपि—एकत्वाद् ब्रह्मण आत्मान्तराभावाच्छारीरस्य भोगेन ब्रह्मणो भोगप्रसङ्गः—इति, अत्र वदामः—इदं तावद् देवानांप्रियः प्रष्टव्यः—कथमयं त्वयाऽऽत्मान्तराभावोऽध्यवसीयत इति? ''तत्त्वमसि'' ''अहं ब्रह्मास्मि'' ''नान्योऽतोऽस्ति विज्ञाते'' त्यादिशास्त्रेभ्य इति चेत, यथाशास्त्रं तर्हि शास्त्रीयोऽर्थः प्रतिपत्तव्यः, न तत्रार्थजरतीयं लभ्यम्। शास्त्रं च ''तत्त्वमसी'' त्यपहतपाप्मत्वादिविशेषणं ब्रह्म शारीरस्यात्मत्वेनोपदिशच्छारीरस्यैव तावदुपभोक्तृत्वं वारयति, कुतस्तदुपभोगेन ब्रह्मण उपभोगप्रसङ्गः? अथागृहीतं शारीरस्य ब्रह्मणैकत्वम्, तदा मिथ्याज्ञाननिमित्तः शारीरस्योपभोगः, न तेन परमार्थरूपस्य ब्रह्मणः संस्पर्शः। न हि बालैस्तलमलिनतादिभिर्व्योम्नि विकल्प्यमाने तलमलिनतादिविशिष्टमेव परामर्थतो व्योम भवति। तदाह—*न वैशेष्यादिति*।। नैकत्वेऽपि शारीरस्योपभोगेन ब्रह्मण उपभोगप्रसङ्गः ; वैशेष्यात्। विशेषो हि भवति मिथ्याज्ञानसम्यग्ज्ञानयोः। मिथ्याज्ञानकल्पित उपभोगः, सम्यग्ज्ञानदृष्टमेकत्वम्। न च मिथ्याज्ञानकल्पितेनोपभोगेन सम्यग्ज्ञानदृष्टं वस्तु संस्पृश्यते। तस्मान्नोपभोगगन्धोऽपि शक्य ईश्वरस्य कल्पयितुम्।।८।।

इति शाङ्करभाष्यम् प्रथमं सर्वत्रप्रसिद्धाधिकरणम् समाप्तम्।।

वार्तिकम्

प्रथमे पादे तावत् "जन्माद्यस्य यत" इत्यारभ्या "नन्दमयोऽभ्यासादि" त्यन्तेन सत्यज्ञानानन्दात्मकं ब्रह्म समस्तस्याकाशादेर्जगतो जन्मादिकारणमित्युक्तम्। अर्थात् तस्य नित्यत्व-विभुत्व सर्वगतत्वसर्वान्तर्यामित्व-सर्वज्ञत्व सर्वशक्तित्व सर्वेश्वरत्व सर्वव्यापित्वादयो गुणा उक्ता एव भवन्ति। न ह्यनेवंगुणकस्य सर्वजगत्कारणत्वं सम्भवति; अर्थसिद्धानां चाधिकरणन्यायसिद्धत्वेन पुनस्तत्साधकन्यायस्यासूत्रणीयत्वात्, "यत्सिद्धावर्थादन्यसिद्धिः सोऽधिकरणसिद्धान्त" इति न्यायवित्समयात्। ननु-एवं तर्हि सर्वज्ञत्वस्याप्यधिकरणसिद्धान्तन्यायेन सिद्धत्वात् तत्सिंद्धयर्थम्-"शास्त्रयोनित्वादि" ति पृथग्न्यायसूत्रणं व्यर्थमिति-चेत्, न, असर्वज्ञस्यैव प्रधानादेर्जगत्कारणत्वमिति पराशङ्कानिरासित्वेन तदुपयोगस्य दर्शितत्वादव्यर्थत्वोपपत्तेः। तेषु च सिद्धेषु ब्रह्मगुणेषु पश्चात् तत्परत्वातत्परत्वाभ्यां सन्दिग्धानि वेदन्तवाक्यानि तैरेव लिङ्गैर्ब्रह्मपरत्वेन निर्णेतव्यानि; तत्प्रसिद्धयधीनत्वात् तन्निर्णयस्य। तत्तत्सिद्धयनन्तरम्-"अन्तस्तद्धर्मोपदेशात्" इत्यारभ्य तद्विचारः प्रवर्तते। तत्र यानि स्पष्टब्रह्मलिङ्गानि वेदान्तवाक्यानि, तानि प्रथमपाद एव निर्णीतानि। यानि त्वस्पष्टब्रह्मलिङ्गानि तन्निर्णयाय द्वितीयतृतीयपादावारभ्येते। न च-अस्पष्टब्रह्मलिङ्गत्वे तद्वाक्येषु तत्परत्वातत्परत्वसन्देह एव न घटत इति-वाच्यम्; तथाप्यर्थान्तरप्रसिद्धाकाशप्राणादिशब्दसमभिव्याहारेण तेषु तत्सन्देहस्य तेषां च शब्दानां ब्रह्मविषयत्वे हुतुप्रतिपादनेन तन्निर्णयस्य च दर्शितत्वात्। अस्पष्टत्वं च ब्रह्मलिङ्गाना तत्त्वेनाप्रतिभानम्, अन्यलिङ्गत्वेन प्रतिभानं वा। एतेन-द्वितीयतृतीयपादाभ्यां प्रथमपादस्य भेदकोपाधिः, कार्यकारणभावसङ्गतिः, पूर्वभावश्च व्याख्यातः-द्रष्टव्याः। द्वितीयतृतीययोस्त्वस्पष्ट-ब्रह्मलिङ्गकवाक्यविषयत्वाविशेषेऽपि प्रायशः सविशेषनिर्विशेषब्रह्मलिङ्गकवाक्यविषयतया भेदः-इति। तत्र यद्यन्यत्र प्रसिद्धान्याकाशादिपदान्युपक्रमपठितानि वाक्यशेषस्थब्रह्मलिङ्गानुसारेणान्यथा व्याख्यातानि, तर्ह्यत्रापि वाक्यशेषपठितजीवलिङ्गानुसारेणोपक्रमस्थं परमात्मनि प्रसिद्धं ब्रह्मपदं व्याख्येयमिति दृष्टान्तसङ्गत्येदमधिकरणमारभ्यते-*सर्वत्र प्रसिद्धोपदेशात्*॥१॥ पादान्तरत्वादेव

नावान्तरसङ्गतिरिति केचित्। छान्दोग्य इदं श्रयते-''सर्व खल्विदं ब्रह्म तज्जलानिति शान्त उपासीताथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूप''-इत्यादि। इदम्=अव्याकृतनामरूपव्याकरणात्मकम्, सर्वम्=जगत्, सत्यज्ञानानन्ताद्वयब्रह्मात्मकम्=ब्रह्मैव। कुतः? तज्जलानिति- यतस्तस्माद् ब्रह्मणो जायते तस्मिंश्च लीयते चेष्टते चेदं सर्वम् अतस्तज्जलान्त्वाद् जगतो ब्रह्मत्वम्; कार्यकारणयोर्लोकेऽव्यतिरेकदर्शनात्। यत एवम्, अत एकत्वाद् रागद्वेषविषयाभावाद् निगृहीतान्तः करणः सन् बक्ष्यमाणमनोमयादिगुणविशिष्टं ब्रह्मोपासीत; तदात्माभिमानपर्यन्तमविच्छिन्नचित्तवृत्तिसन्ततिं तत्र कुर्यादित्यर्थः। कथं पुनरेवमुपासनं पुरुषेण निर्वर्तयितुं शक्यते? तन्निर्वृत्तावपि ततस्तद्भावापत्तिः फलं परलोके स्यादित्यत्र वा किं प्रमाणम्? इति चेत्, नैतदुभयमपि शान्तस्य दुर्घटमित्याह-अथ खलु क्रतुमयः पुरुषः। यतः स्वभावत एव सर्वदा पुरुषो ध्यानप्रधानः ; ''ध्यायतीव लेलायतीव'' ''काममय एवे'' त्यादिश्रुत्यन्तरदर्शनाच्च, अतो ध्यानकरणेऽस्ति तस्य सामर्थ्यम्। न च तत्फलेऽप्यस्ति सन्देहः ; यतः-''यथाक्रतुरस्मिन् लोके भवति तथेतः प्रेत्य भवती'' त्यपि-''तं यथा यथोपासते'' ''यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्'' इत्यादिश्रुतिस्मृतिभ्यां सुप्रसिद्धम्। तस्मात् तदुभयस्य स्वभावसिद्धत्वात् केवलं वहिर्विषयेभ्यश्चित्तविनिवृत्तिर्ब्रह्मध्यानेऽपेक्ष्यते, अतः शान्तस्तत्क्रतुं कुर्वीतेति परमार्थः। तत्र मनोमयत्वादिजीवलिङ्गदर्शनात् ''सर्वकर्मा सर्वकाम'' इत्यादिब्रह्मलिङ्गदर्शनाच्च भवति सन्देहः-किमत्रोभयधर्मदर्शनादुभयधर्मविशिष्टमुभयमुपास्यत्वेनोपदिश्यते, किं वोभयधर्मविशिष्टमेकतरत्-इति।।

किं तावत् प्राप्तम्? उभयमिति। कुतः? उभयधर्मनिर्देशात्, तेषां चासाधारणधर्मत्वेनैक तरस्मिन्ननुवृत्तियोगादिति।।

एवं प्राप्ते ब्रूमः-तदेकतरदेवोपास्यम्, नोभयम्; कुतः? उपास्यभेदेनोपासनाभेदापत्तेः। तथाच वाक्यभेदः। न चैतदिष्टम्: उपक्रमोपसंहाराभ्यामेकवाक्यत्वावगमात्, एकवाक्यत्वे सम्भवति वाक्यभेदानिष्टेश्च। ननु-ब्रह्मगुणानां जीवेऽसम्भवाद् जीवगुणानां ब्रह्मण्यसम्भवाच्च नैकवाक्यत्वसंभवोऽस्ति-इत्युक्तम्, नैष दोषः ; यथा तेषामेतस्मिन् सम्भवः, तथा वक्ष्यते। तस्मात्तयोरेकतरदुपास्यमिति सिद्धम्।।

यदा त्वेकतरदुपास्यम्, तदा सन्दिह्यते-स किं जीवः, किं वा ब्रह्म-इति। किं तावत् प्राप्तम्? जीव एव मनोमयत्वादिभिर्धर्मैरुपास्य इति। कुतः? सर्वत्र प्रसिद्धोपदेशात्=जीवस्यैव हि कार्यकारणाधिपतेः सर्वश्रुतिस्मृतिषु प्रसिद्धस्य मनआदिभिस्सम्बद्धस्येहोपदेशो भवति-''मनोमयः

प्राणशरीर''—इत्यादि। न स परस्य ब्रह्मणो घटते; ''अप्राणो ह्यमना'' इत्यादि श्रुतिशविरोधात्। ननु—''सर्वं खल्विदं ब्रह्मे'' तिवाक्योपक्रमे स्वशब्देन ब्रह्मोपात्तम्, सत्यमुपात्तम्, शमविधेः स्तुतिशेषत्वेन, नोपास्यतया। कुतः? ''सर्वमि'' तिवाक्यस्य शमविधिपरत्वेन ब्रह्मोपासनाविधिपरत्वाभावात्। यत्—उपासीत शान्तः सन् इति ह्यन्यतः प्राप्तोपासनानुवादेन शमगुणो विधीयते—''दध्ना जुहोती'' तिवत्, नोपासनापि; वाक्यभेदप्रसङ्गात्, ''सोमेन यजेते'' तिवद् विशिष्टविधिकल्पनेऽपि गौरवावश्यकत्वात्, ''दण्डीप्रैषवानन्वाहे'' त्यत्रेव विशेष्यानुवादेन विशेषणमात्रे विधौ सम्भवति तद्गौरवाङ्गीकारस्यायुक्तात्वात्। कुतः प्राप्तेरनुवादः? इति चेत्, ''स क्रतुं कुर्वीते'' त्यत इति ब्रूमः। तदुक्तम्— ''क्रतुमित्यादिवाक्येन विहितां क्रतुभावनाम्। अनूद्य सर्वमित्यादिवाक्ये शमगुणे विधिः॥'' इति॥

ननु—विपरीतमिदमुच्यते—यत् क्रतुमित्यादिवाक्यप्राप्तोपासनानुवादेन ''शान्त उपासीते'' त्यत्र शमगुणविधिरिति; यतः ''शान्त उपासीते'' ति पूर्वोपात्तशमगुणविशिष्टोपासनाया एव ''स क्रतुं कुर्वीते'' ति पश्चात् परामर्शो भवति, अन्यथा स इति तच्छब्दानुबन्धानुपपत्तेः, पश्चात् पाठानुपपत्तेश्च। तस्मात्—''य एवं विद्वान् पौर्णमासीं यजत'' इत्यादिवद् मनोमय इत्यादिगुणविधानार्थम्—''शान्त उपासीते'' त्यनेन विहितस्य विशिष्टोपासनस्य ''स क्रतुं कुर्वीते'' त्यनुवादः, न वैपरीत्यमिति—चेत्, नः क्रियानुवादेनानेकगुणविधानानुपपत्तेः। न हि क्रतुभावनामनूद्य मनोमयः प्राणशरीर इत्याद्यनेकगुणविधानं शक्यते कर्तुम्; प्रतिगुणं तदनुवृत्या वाक्यभेदप्रसङ्गात्। तस्मात्—''स क्रतुं कुर्वीते'' त्यनेकगुणविशिष्टकतुभावना विधीयते—''अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाती'' त्यत्रानेकगुणविशिष्टक्रयभावनावत्, ''शान्त उपासीते'' ति तु तदनुवादेन शमगुणमात्रं विधीयत इत्यकामेनाप्यभ्युपगन्तव्यम्। एवं च सति प्रथमपठितमपि शमवाक्यमर्थालोचनया क्रतुवाक्यात् परमेव बोद्धव्यम्; तदर्थोपजीवित्वात्। क्रतुभावनाक्षिप्तकर्तारमुद्दिश्य शमगुणविधानात् स इति तद्विशिष्टकर्तुः परामर्शोपपत्तेः, वक्ष्यमाणस्यापि बुद्धिस्थत्वेन तदा परामर्शाविरोधात्॥

अस्तु नामैवमुपासनानुवादेनास्मिन् वाक्ये शमगुणे विधिः, किमेतावता? एतदतो भवति—सर्वं खल्विदं ब्रह्म तज्जलानि'' ति वाक्यम्—''तेन ह्यन्नं क्रियते'' इतिवद् विधेयशमगुणस्तुतये हेतुवन्निगदार्थवादः, नोपास्यब्रह्मसमर्पणपरः। ननु—अर्थवादत्वेऽपि निर्विषयोपासनानुवादेन शमगुण-विधानानुपपत्तेरुपास्यापेक्षायां तद्वाक्येनैव तत्समर्पणम्—युक्तम, नैवम्; क्रियानुवादेनोभयविधाने वाक्यभेदप्रसङ्गस्योक्तत्वात् तेनैव वाक्येन शमगुणोपास्यब्रह्मविधानानुपपत्तेः, क्रतुवाक्येनैवोपास्य-विशिष्टोपासनाविधानात्, अन्यथा निर्विषयसंकल्पविधेरपर्यवसितत्वेन शमविध्युपजीव्यत्वानुप-

पत्तेरनुपपादकत्वात्। अतः शान्तगुणविधानात् पूर्वमेव "मनोमयः प्राणशरीर" इत्यादिभिर्विषयोपनायकैः पदैः क्रतुवाक्यं स्वार्थस्य सविषयत्वसिध्यर्थं सम्बध्यते। मनोमयादिपदं च कार्यकारणसङ्घातात्मनि जीव एव रूढम्, इति स एव तद्विषयतयाऽवतिष्ठते। तथाच जीवात्मोपरक्तोपासनानुवादेन शमगुणविधानाद् न परत्वात् तदर्थवादगतब्रह्मपदोपात्तब्रह्मणा सा सम्बन्धुमर्हति; उपत्तिशिष्टगुणावरोधात्, अर्थवादत्वेन स्वार्थपरत्वाभावादित्युक्तत्वाच्च। एतेन–अन्यपरादपि वाक्यादपेक्षिततया ब्रह्म देवताधिकरणनयायेन स्वीक्रियत इति–अपास्तम्; मनोमयादिभिः पदैर्जीवविषयसमर्पणेन विषयान्तरस्यानपेक्षितत्वात्।।

ननु–"सर्वकर्मा सर्वकाम" इत्यादिविशेषणं जीवे नोपपद्यते, नैष दोषः ; युगपद् जीवस्य तदनुपपत्तावपि पर्यायेण सर्वकर्मत्वाद्युपपत्तेः। अपि च–"एष म आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वे" ति च हृदयायतनत्वाणीयस्त्वगुणश्रवणं जीवस्यैवावकल्पते; तस्याराग्रमात्रत्वश्रुतेः, न ब्रह्मणः ; तस्यापरिच्छिन्नत्वात्। ननु–"ज्यायान् पृथिव्या" इत्यपरिच्छिन्नपरिमाणमपि श्रयते। तच्च परिच्छिन्ने जीवे नावकल्पत इति–चेत्, एवं तर्हि उभयपरिमाणस्यैकत्र विरोधेनाश्रयितुमशक्यत्वादेकतराश्रयणेनान्यतरस्य बाधे वक्तव्ये प्रथमप्रतीतमणीयस्त्वमाश्रित्य चरमप्रतीतज्यायस्त्वबाधो युक्तः। अपि तराश्रयणेनान्यतरस्य बाधे वक्तव्ये प्रथमप्रतीतमणीयस्त्वमाश्रित्य चरमप्रतीतज्यायस्त्वबाधो युक्तः। अपि च जीवपरिग्रहे ज्यायस्त्वमपि तस्य ब्रह्मभावापेक्षया संभवेदेव, न सर्वात्मना तद्बाधः। ब्रह्मपरिग्रहे त्वणीयस्त्वं तस्य सर्वात्मना बाधितं स्यात्, ब्रह्मत्वविरोधात्। यदपि–वाक्यशेषे स्वशब्देन ब्रह्मसंकीर्तनम्–"एतद् ब्रह्मे" ति, तदपि प्रकृतजीवपरामर्शिनैतदा सामानाधिकरण्याद् देहादिबृंहणकर्तृत्वयोगेन जीवविषयमेव व्याख्येयम्। तस्मान्मनोमयत्वादिभिर्धर्मैर्जीव एवोपास्य इति प्राप्तम्।।

तत्र प्रतिविधीयते–परमेवेह ब्रह्म मनोमयत्वादिभिर्धर्मैरुपास्यम्, न जीवः। कुतः? *सर्वत्र प्रसिद्धोपदेशात्*।। यद् ब्रह्मशब्दस्यालम्बनं सर्ववेदान्तेषु जगत्कारणं प्रसिद्धम्, इहापि वाक्योपक्रमे "सर्वं खल्विदं ब्रह्म तज्जलानि" ति स्वशब्देनोपदिष्टम्, तस्यैव ब्रह्मणो मनोमयत्वादिभिर्धर्मैरुपास्यत्वेनोपदेशात्। एवं च सति प्रकृतहानाप्रकृतप्रक्रिये न भविष्यतः। ननु–उक्तं शमविधिविवक्षया वाक्योपक्रमे– "सर्वं खल्विदं ब्रह्मे" ति ब्रह्म निर्दिष्टम्, न स्वविवक्षयेति। तथाच ब्रह्मणः प्रकृतत्वाभावाद् नोक्तदोष इति–"चेत्, न; शमविधिविवक्षया तन्निर्देशेऽपि संनिधानपठितैर्मनोमयत्वादिभिर्धर्मैः साकाङ्क्षैरन्वययोग्यत्वेन देवताधिकरणन्यायेन स्वविवक्षाया अप्यविरोधात्। न च जीवस्तत्र संनिहितः, न वा स्वशब्देनोपात्तः, यतस्तेन तेषां धर्माणामन्वयः स्यात्। न च–मनोमयप्राणशरीरशब्दाभ्यामेव रूढया जीवोऽभिधीयत इति–वाच्यम्; तयोर्यौगिकत्वेन रूढयसिद्धेः, योगस्य चान्यार्थविशिष्टत्वाद् न जीवमात्रोपस्थापने सामर्थ्यमस्ति।।

तथाहि–मयट्प्रत्ययान्तेन मनोमयशब्देन मनोमयविकारो मनः प्रचुरं वा किञ्चिद् वस्तु सामान्यतोऽभिधीयते। प्राणः शरीरमस्येति समासान्तप्राणशरीरपदेन सर्वनामार्थः संनिहितः कश्चित्। तत्र कस्तावत् मनोमय इत्यपेक्षायां प्राणशरीरपदसामानाधिकरण्यात् प्रकृतः संनिहितश्चेत्यवबुद्ध्यते। सोऽपि क इत्यपेक्षायां जीवस्यासंनिहितत्वादप्रकृतत्वाच्च ब्रह्मणस्त्वतथात्वात् स्वशब्देनाभिधानाच्च तेनैव तदाकाङ्क्षापूरणं युक्तम्। एतेन–मनोमयादिपदैरेवोपक्रमस्थब्रह्मपदमनपेक्ष्योपास्यसमर्पणम्–प्रत्याख्यातम्। ननु–न युक्तम्; मनोमयप्राणशरीरपदयोर्जीव एव समवेतार्थत्वात्, तत्र मनः प्राणसम्बन्धस्य विद्यमानत्वात्, न ब्रह्मणि, "अप्राणो ह्यमना" इति तत्र तत्सम्बन्धप्रतिषेधादिति–चेत्, न; साक्षाद् ब्रह्मणि तत्सम्बन्धप्रतिपेधेऽपि विकारद्वारा तत्सम्बन्धस्याविरुद्धत्वात्। तस्मात् सर्वत्र प्रसिद्धोपदेशाद् ब्रह्मैव मनोमयत्वादिभिर्धर्मैरुपास्यं बोध्यम॥१॥

विवक्षितगुणोपपत्तेश्च॥२॥ यद्यप्यपौरुषेये वेदे विवक्षा नास्ति; तथापि तत्फलमुपादानमस्ति, इति तेन विवक्षितमित्युपचर्यते। लोके हि शब्दाभिहितपदार्थेषु यः पदार्थ आदेयो भवति, स विवक्षित इत्युच्यते, यश्च न, सोऽविवक्षित इति। यथा पशौ 'क्रेया सम्पन्नक्षीरतमा' इत्यत्र गोक्रयणमादेयत्वाद् विवक्षितम्, सम्पन्नक्षीरतमत्वं त्वविवक्षितम्; अन्यार्थत्वेनानादेयत्वात्, उभयोपादाने च वाक्यभेदप्रसङ्गात्। एवं मित्रवाक्येऽपि पदार्थविवक्षाऽविवक्षे दर्शनीये–गौः क्रेया, विषं भुङ्क्ष्वेति। तत्सामान्यदर्शनाद् वेदेऽपि योऽर्थः परिगृह्यत इत्युपयोगो भवति, तद्यथा–"पशुमालभेते" त्यत्र पश्वेकत्वपुंस्त्वे, "ग्रहं संमार्ष्टी" त्यत्र ग्रहत्वं च, यश्च न, सोऽविवक्षित इति; यथा हविरुभयत्वं ग्रहैकत्वं च। ननु–वेदवाक्ये विवक्षाऽविवक्षयोरभाव उपादेयत्वनिश्चयोऽति कुतः स्यादिति–चेत्, नैष दोषः ; तयोस्तात्पर्यातात्पर्याभ्यामेव लिङ्गाभ्यां तत्रावगमात्। तात्पर्यं तु न तत्प्रतीतिच्छयोच्चरितत्वम्, किं तर्हि? तत्प्रत्यायनसामर्थ्यमेवेत्युक्तमधस्तात्। तात्पर्यग्रहस्तु षड्भिरेव लिङ्गैरित्युक्तम्। प्रकृते च सत्यसंकल्पत्वादयो गुणा उपासनायामादेयत्वेनोपदिष्टाः। तेषां च ब्रह्मपरिग्रह उपपत्तिर्भवति। विवक्षितमनोमयत्वादिगुणानामपि ब्रह्मण्युपपत्तिर्दर्शितैवाधस्तनसूत्रे। अत्र च दर्शिता भाष्ये॥२॥

ननु–सत्यसंकल्पत्वादयो गुणा यथा ब्रह्मण्युपपद्यन्ते, तथा जीवेऽपि कस्मिंश्चिद् योगवशादुपपत्स्यन्ते। ततश्च स एवात्रोपास्यः किं न स्यादिति–चेत्, तत्राह–*अनुपपत्तेस्तु न शारीरः*॥३॥ तथाच विषयभेदाद् न सूत्रयोः पौनरुक्तयम्। यद्वा–"विवक्षितगुणोपपत्तेश्चे" त्यनेन मनोमयत्वादीनां जीवधर्मत्वेन प्रसिद्धानां ब्रह्मण्युपपत्तिर्दर्शिता, "अनुपपत्तेस्तु न शारीर" इत्यनेन च सत्यसंकल्पत्वादीनां ब्रह्मगुणानां जीवेऽनुपपत्तिः। यथाच निरवग्रहसत्यसंकल्पत्वादयो योगिनोऽपि नोपपद्यन्ते, तथा वक्ष्यते "जागद्व्यापारवर्जमि" त्यत्र। शेषं भाष्ये॥३॥

इतोऽपि जीवो न मनोमयत्वादिगुणैरुपास्य इत्याह- *कर्मकर्तृव्यपदेशाच्च*॥४॥ "एतमितः प्रेत्याभिसम्भवितास्मी" ति श्रुतिः प्रकृतं मनोमयं शरीरादुत्क्रमणानन्तरमभिसम्भवनकर्मत्वेन शारीरं च तत्कर्तृत्वेन व्यपदिशति। स च मनोमयस्य शारीरत्वे न घटते। न हि स्वात्मानमेव स्वयं देशान्तरं गत्वा प्राप्नोतीति सम्भवति; सर्वदा प्राप्तस्वभावत्वात्, अन्यथाऽऽत्मत्वव्याहतेः। न च-"ब्रह्मविदाप्नोति परम्" इत्यादिवदुपचारात् तदुपपत्तिरिति-वाच्यम्; सत्यां गतावुपचारकल्पनस्यायुक्तत्वात्, उपासनावैयर्थ्यप्रसङ्गाच्च, तत्पूर्वमेव तत्फलस्य प्राप्तत्वात्। उपासिक्रियाया अपूर्वफलत्वेन ब्रह्मविद्याविलक्षणत्वात्। जीवात्मन उपास्यत्वे कर्मकर्तृव्यपदेशविरोधं दर्शयन् सूत्रकारो गोत्वादिवत् समष्टिव्यष्टयात्मकमेकमेव जीवतत्त्वं मन्यते स्म; अन्यथा जीवभेदेन तत्समर्थनोपपत्तेः॥

ननु-जीवैक्येऽपि व्यष्टयात्मना समष्टिरूपमुपास्यं भविष्यति। तथाच रूपभेदाद् न कर्मकर्तृव्यपदेशविरोध इति-चेत्, सत्यम्; तदेव हि मायिकं जीवस्य समष्टिरूपमैश्वरमाचक्षते। अध्यात्मादित्रिविधपरिच्छेदशून्यत्वात् तस्य। न हि स्वतो नित्य-शुद्ध-बुद्ध-मुक्तस्वभावस्य भगवतः परमेश्वरस्य निर्गुणस्य सत्यकामादयो मनोमयत्वादयो वा गुणा उपपद्यन्ते। किं तर्हि?" "हन्तानेन जीवेनात्मनाऽनुप्रविष्य नामरूपे व्याकरवाणि" "तत्सृष्ट्वा तदेवानुप्राविशत्" "स इह प्रविष्ट आनखाग्रेभ्य" इत्यादिश्रुतेर्मायया तस्यैव जीवभावेन व्याकृतनामरूपोपाधिप्रवेशाद् हिरण्यगर्भात्मक-बुद्धेर्गुणा अपि ते सत्यसङ्कल्पत्वादय ईश्वरस्य व्यपदिश्यन्ते; सर्वात्मकत्वात् तस्य। जीवस्य पुनः कार्योपाधित्वाद् यद्यप्येते गुणा मायिका एव; तथाप्यविद्ययाऽध्यात्मादित्रिविधपरिच्छिन्न-देवतिर्यङ्मनुष्यादिकार्यकरणसङ्घाते व्यष्टौ तद्गुणेषु वाऽऽत्मात्मीयत्वाभिमानाद् यथा न तस्य ब्रह्मात्मत्वप्रतिपत्तिः, तथा न समष्टयात्मभावतद्गुणप्रतिपत्तिरपि। तथाच श्रुतिः- "सत्याः कामा अनृतापिधाना" इति। विस्मृत्य च स्वात्मनिष्ठान् तान् गुणानीश्वरात्मन्यारोपयति। एवं च संति श्रुतिप्रामाण्यात् तेन रूपेणेश्वरात्मन्युपासिते भवत्यस्य त्रिविधपरिच्छेदं हित्वा तद्भावापत्तिः, एवं समष्टयात्मभावज्ञानादेव त्रिविधपरिच्छेदनिवृत्तेस्तद्भावापत्तिलक्षणफलसिद्धोर्नोपासनायाः कृत्यमस्तीति -चेत्, न; व्यष्टिसमुदायस्यैव समष्टिरूपत्वात्, समष्टिज्ञानेन व्यष्टिभावानिवृत्तेः। तदभिमाननिवृत्ति-स्तूपासनातस्तद्विरुद्धसमष्टयभिमाननिवृत्तौ स्यात्। तस्मात् समष्टिव्यष्टिरूपभेदेन जीवे स्वरूप-भेदादुपपन्नः कर्मकर्तृव्यपदेशः। एतेन-व्यष्टिजीवान्तरस्योपास्यत्वेन कर्मकर्तृव्यपदेशविरोध-परिहारोऽपिप्रत्युक्तः ; तदुपासनया त्रिविधपरिच्छेदाभिमानलक्षणमृत्युतरणासंभवेन सर्वकामादि-लक्षणफलप्राप्त्यसंभवात्। तस्मात्-युक्तमुक्तं कर्मकर्तृव्यपदेशादीश्वरात्मैव मनोमयत्वादिभिरुपास्य इति॥४॥

शब्दविशेषात् *स्मृतेश्चेति* सूत्रद्वयं निगदव्याव्यातं भाष्येण। सूत्रकाराशयमविद्वान् श्रुतिस्मृतिविरोधम्–''अनुपपत्तेस्तु न शारीर'' इत्यादिसूत्रेषु पश्यन् तान्याक्षिपति–*अत्राहेति*।। सत्यं यद्यपि परस्मादात्मनः शारीरो नाम न कश्चिदस्ति परमार्थतो भिन्नः ; तथापि स एव परमात्मा नभ इव घटकरकादिभिरहंदेहेन्द्रियबुद्ध्याद्युपाधिभिः परिच्छिन्नत्वाकारेण गृह्यमाणः शारीर इति व्यपदिश्यते। तथाच प्राक् तत्त्वमसीत्यात्मैकत्वग्रहणात् तदविद्याकल्पितभेदग्रहणस्य सत्त्वात् तदपेक्षया कर्मकर्तृत्वादिव्यवहारो न विरुद्ध्यत इति परिहरति–*सत्यम्; एवमेतदिति*।।५।।६।।

अर्थकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निवाय्यत्वादेवं व्योमवञ्च।।७।। निगदमस्य भाष्यम्।

संभोगप्राप्तिरिति चेन्न वैशेष्यात्।।८।। यदि सर्वगतस्यापि ब्रह्मणः सर्वप्राणिहृदयसम्बन्धादर्भकौकस्त्वमाकाशस्येव घटकरकाद्युपाधिसम्बन्धादुपासनार्थमङ्गीक्रियते, हन्त तर्हि तस्य चिद्रूपत्वात् तदतिरिक्तजीवाभावाच्च सर्वप्राणिहृदयसम्बद्धसुखदुःखादि-संभोगप्राप्तिरप्यनिवारिता स्यात्। न चैतद् युक्तम्; ''अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशत'' इति श्रुतिव्याकोपापत्तेरिति चेद् भवान् पश्यति, तन्न; वैशेष्यात्=अस्ति चैकहृदयनीडत्वेऽपि जीवब्रह्मणोर्विशेषः ; ''द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्यनश्नन्नन्योऽभिचाकशीती'' ति मन्त्रवर्णात्। विशेषादिति वक्तव्ये वैशेष्यादिति वदन् अत्यन्तवैलक्षण्यं तयोः सूचयति। तथाच श्रुतिः–''छायातपौ ब्रह्मविदो वदन्ती'' ति। न हि संनिधानमात्रेण वस्तुशक्तिमनाश्रित्य भोगप्रसक्तिः। यदि स्यात्, आकाशस्यापि सर्वगतस्य तत्प्रसङ्गः, सर्वगतनानात्मवादिनां सर्वात्मस्वविशेषेण तत्प्रसङ्गश्च। ननु–उक्तं जीवब्रह्मणोरभेदाद् जीवस्य भोगेन ब्रह्मणो भोगप्रसक्तिः स्यात्–इति, तन्न; घटाकाशमहाकाशयोरभेद सत्यपि घटाकाशस्य जलादिसम्बन्धेऽपि महाकाशस्य तददर्शनात्। न च–महाकाशो घटदेशे नास्तीति–वाच्यम्; महत्त्वविरोधात्, तदभेदविरोधाच्च। कुतो वा भवता जीवब्रह्मणोरभेदोऽध्यवसितः? ''तत्त्वमसि'' ''अहं ब्रह्मास्मी'' त्यादिशास्त्रादिति चेत्, एवं तर्हि शास्त्रप्रामाण्यमभ्युपगच्छतो भवतो न युक्तमर्धजरतीयन्यायाश्रयणम्; शास्त्रेणैव जीवब्रह्मणोस्तत्सम्बन्धासम्बन्धयोर्दर्शितत्वात्। अपि च मिथ्याज्ञाननिबन्धनो हि शारीरेऽपि भोगः, न परमार्थत इत्युक्तमधस्तात्। न च ब्रह्मणि मिथ्याज्ञानमस्ति; तस्य तत्र सम्यग्ज्ञानपराहतत्वात्। तस्माद् न शक्यते परमेश्वरे भोगसम्बन्धः कल्पयितुम्–इति।।८।।

इति वार्त्तिकम् प्रथमं सर्वत्रप्रसिद्धाधिकरणम् समाप्तम्।।

प्रदीपः

प्रथमे पादे जिज्ञास्यतया प्रतिज्ञातं ब्रह्म तटस्थलक्षणविधया "जन्माद्यस्य यत" इत्यादिभिः "श्रुतत्वाच्चे" त्यन्तैः सूत्रैः प्रतिपाद्य तस्य स्वरूपलक्षणेनानन्देन लक्षणमानन्दमयाधिकरणेन विविच्य "अन्तस्तद्धर्मोपदेशादि" त्यादिना प्रथमं तटस्थलक्षणलक्षितं सगुणं ब्रह्म ज्योतिरधिकरणान्तैरुदाहरणविशेषु निर्धार्यानन्दमयाधिकरणेनोपसंहृतं स्वरूपचैतन्यं निर्विशेषमेव "शास्त्रदृष्टया तूपदेशो वामदेववदि" तिन्यायेनोदाहरणविशेषमवलम्ब्य विवेचितम्। तथाच साक्षाद् निर्विशेषचैतन्यनिरूपणपरं प्रथमपादेऽधिकरणद्वयं विस्तृतविचारावसरगतम्–आनन्दमयाधिकरणम्, प्राणस्तयानुगमाधिकरणं चेति वस्तुस्थितिः।।

तत्र च स्पष्टब्रह्मलिङ्गान्येव वाक्यानि विचारितानि। द्वितीयतृतीयपादयोस्त्वस्पष्टब्रह्मलिङ्गानि वाक्यानि विचारयिष्यन्ते। अत्रास्पष्टब्रह्मलिङ्गत्वं च निर्णेयवाक्योपक्रमगतसंभाव्यमान-स्वारस्यब्रह्मेतरलिङ्गाभिभूतब्रह्मलिङ्गकत्वम्, तद्भिन्नत्वं स्पष्टब्रह्मलिङ्गत्वम्। अस्ति ह्यन्तरधिकरणादौ तत्; हिरण्यश्मश्रुत्वादीनां जीवब्रह्मसाधारण्याद् न सम्भाव्यमानस्वारस्यजीवलिङ्गत्वम्, इति तेनाभिभूतब्रह्मलिङ्गकत्वाभावात्। आकाशप्राणज्योतिरधिकरणेषु–ब्रह्मलिङ्गस्य ब्रह्मेतरश्रुत्यैवाभिभवः, न तल्लिङ्गेनेति तत्रापि लक्षणसमन्वयः। "प्राणस्तथाऽनुगमादि" त्यत्र तु सर्वेषां लिङ्गानां संभाव्यमानस्वारस्यत्वेन बाध्यबाधकभावायोगेन ब्रह्मेतरलिङ्गाभिभूतब्रह्मलिङ्गकत्वं नास्त्येवेति न दोषः।।

द्वितीयपादे तु–सप्ताधिकरणाणि वर्तन्ते, (१) सर्वत्रप्रसिद्धाधिकरणम्, (२) अत्त्रधिकरणम्, (३) गुहाधिकरणम् (४) अन्तराधिकरणम् (५) अन्तर्याम्यधिकरणम् (६) अदृश्यत्वाधिकरणम्, (७) वैश्वानराधिकरणमिति। तत्र प्रथम-द्वितीय-तुरीय-सप्तमाधिकरणानि सगुणपराणि, तृतीय-पञ्चम-षष्ठानि तु निर्गुणपराणीति सगुणवाक्यानां प्रायिकत्वं द्वितीये पादे। तृतीये तु निर्गुणवाक्यानां प्रायिकत्वं तत्रैवोपक्रमे स्पष्टीकरिष्यते। तथाचास्पष्टब्रह्मलिङ्गकत्वेन साम्येऽपि सगुणनिर्गुणप्रायिकत्वनिबन्धनो द्वितीय-तृतीयपादयोर्विषयविवेकोऽपि व्याख्यातः। तत्र प्रथमं सूत्रम्– *सर्वत्रप्रसिद्धोपदेशादिति*।। तदिदं सर्वं मनसि निधायाह– *प्रथमे पाद

इत्यादिना—पादावारभ्येते इत्यन्तेन*।। अत्र पूर्वतनपाद इव यद्यपि पक्षवाचकशब्दस्य न सूत्रे निर्देशोऽस्ति। तथापि हेतुस्वारस्यात् पक्षसाध्ययोरपि फलतो बोधो भविष्यतीति न दोषः। सर्वत्र=सर्वतादात्म्येन, प्रसिद्धोपदेशात=प्रसिद्धतयोपदिश्यमानत्वाद् ब्रह्मेति तु साध्यमनुवर्तत एव। पक्षस्तु=मनोमयादिपदमित्यर्थात् सिध्यति। यतः—"सर्वं खल्विदं ब्रह्मे" ति सर्वतादात्म्येन प्रसिद्धतया ब्रह्मोपदेशमुक्रम्यैव तद्वाक्यं प्रवर्तते। तस्य चास्ति विशेष्याकाङ्क्षा। अत्र सर्वत्रेति प्रयोगात् "सर्व खल्वि" तिवाक्यस्य न साक्षाद्विषयत्वम्, इति ज्ञाप्यते, इति न तस्य निर्णयवाक्यत्वम्, किन्तु मनोमयादिवाक्यस्यैव। अत्रान्यत्र रूढानां पदानां न पक्षत्वमिति न स्पष्टब्रह्मलिङ्गत्वं कस्मिन्नपि वाक्ये। ब्रह्मपदं तु रूढमपि न पक्ष इति न दोषः।।

अत्रालोचनमर्हन्ति प्रकारणिकानि छान्दोग्यतृतीयाध्यायचतुर्दशखण्डगतानि वाक्यानीमान्येव। तानि यथा—"सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीताथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत।।१।। मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धस्सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः।।२।। एष म आत्माऽनतर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा सर्पपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वा एष म आत्माऽन्तर्हृदये ज्यायान् पृथिव्या ज्यायानन्तरिक्षाद् ज्यायान् दिवो ज्यायानेभ्यो लोकेभ्यः।।३।। सर्वकर्मा सर्वकामस्सर्वगन्धस्सर्वरसः सर्वमिदमभ्यत्तोऽवाक्यनादर एष म आत्माऽन्तर्हृदय एतद् ब्रह्मैतमितः प्रेत्याभिसंभवितास्मीति यस्य स्यादद्धा न विचिकित्साऽस्तीति ह स्माह शाण्डिल्यः शाण्डिल्यः।।४।। इति।।

अस्य खण्डस्य शाण्डिल्यविद्येति नाम। एतत्पूर्वतनखण्डयोर्द्वादशत्रयोदशखण्डयोरपि ज्योतिरधिकरणे संगृहीतयोर्ब्रह्मपरत्वं निर्धारितम्। तत्र च शाण्डिल्यविद्याया ब्रह्मपरत्वं सिद्धवत्कृत्य सन्दंशन्यायेनापि ज्योतिर्वाक्यस्य ब्रह्मपरत्वं व्यवस्थापितम्। तदिदानीं तस्या ब्रह्मपरत्वं निर्धार्यते प्रकरणशुद्ध्यर्थम्। तत्र यद्यपि कारणान्तरैरपि ब्रह्मपरत्वं संभवति; तथाप्यभ्युच्चयार्थमेव सन्दंशन्यायोऽपि विवक्षितः। तत्रैव पादेऽस्यापि विचारस्तु स्पष्टलिङ्गकत्वाभावाद् न प्रसक्त इति बुद्धिस्थत्वात् प्रथमं शण्डिल्यविद्यैव विचार्यते। अत्र शाण्डिल्यविद्याया अपि ब्रह्मपरत्वे—"सर्व खल्वि" ति वाक्ये इदम्पदं ब्रह्मविशेषणम्, तेन च जीवपरत्वे प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गोऽपि सूच्यते। पूर्वपक्षे तु सर्वविशेषणमिति नोक्तशङ्कावसरः। वार्तिके तु सर्वशब्दविशेषणत्वेनैवेदंशब्दः सिद्धान्तपक्षेऽपि योजित इत्यन्यदेतत्।।

अत्र विषयवाक्यं संग्रहीष्यन् भाविनं सिद्धान्तोपयोगं मनसि निधाय निर्णेयवाक्यतः पूर्वतनमपि

वाक्यं संगृह्णाति–*इदमाम्नायते सर्वं खल्वित्यादिना–कुर्वीतेत्यन्तेन*।। अत्र ''स क्रतुं कुर्वीते'' त्युपासनाविधिः, ''शान्त उपासीते'' ति तदुद्देशेन शमविधिः, तदर्थवादः–''सर्वं खल्विदं ब्रह्म तज्जलानि'' ति वाक्यमिति विभागः। यद्यप्यत्र वाक्य उपास्यं न निर्दिश्यते। तथापि परस्पराकाङ्क्षया तदन्वयोग्योपास्यस्वरूपनिरूपणपरं वाक्यमपेक्षितमिति, तदप्युदाहरति–*मनोमय इत्यादिना*।। तथाच ''सर्वं खल्वि'' त्यादेरुपास्यसमर्पकत्वाभावाद् मनोमयवाक्यस्यैव तत्समर्पकत्वाच्च न संशयानवसर इति भावः। अत्र मनोमयादिपदानां सर्वेषां यौगिकत्वाद् न विशेष्यसमर्पकत्वमिति सर्वाणीमानि लिङ्गान्येव। तत्र मनोमयत्व-प्राणशरीरत्वे उपक्रमगते प्रबले जीवलिङ्गे, ताभ्यां च जीवेऽसञ्जातविरोधिनि बुद्धिस्थेऽपराणि ब्रह्मलिङ्गान्यप्यभिभूयन्त इति पूर्वपक्षप्रवृत्त्या संभाव्यसानस्वारस्यजीवलिङ्गाभिभूतब्रह्मलिङ्गकत्वाद् अस्पष्टब्रह्मलिङ्गकत्वाविरोध इति भावः। अत्र विषयवाक्यसंग्रहावसरे–''मनोमयः प्राणशरीरो भारूप'' इत्यादीति निर्देशाद् जीवलिङ्गानामनेकत्वम्, ब्रह्मलिङ्गं त्वेकमिति सूच्यते। यद्यपि ब्रह्मलिङ्गान्येवात्र बहूनि; तथापि प्रबलजीवलिङ्गदृष्टया बाधितत्वाद् एकप्रायत्वमेवेति मन्यते। अत एव ब्रह्मलिङ्गाभिभवोऽपि सूच्यते।।

तत्र संशयं निर्दिशति–*तत्रेत्यादिना–ब्रह्मेत्यन्तेन*।। पूर्वपक्षं संगृह्णाति–*शारीर इत्यादिना–इत्यादिश्रुतिभ्य इत्यन्तेन*।। सर्वत्र प्रसिद्धोपदेशरूपसौत्रहेतुमाशङ्कासमाधानाभ्यां प्रतिक्षिपति पूर्वपक्षी–*नन्वित्यादिना–नियन्तुं शक्यत इत्यन्तेन*।। तत्र नन्विति सिद्धान्तिनां शङ्का, नैष दोष इति पूर्वपक्षिणां तन्निरासः। ''सर्वं खल्विदमि'' तिवाक्यं ''शान्त उपासीते'' ति वाक्यविहितशमविध्यर्थवादः, नोपास्यसमर्पकः ; उपासनाविधिशेषत्वाभावात्, इति पूर्वपक्षिणामाशयः। ननु–''शान्त उपासीते'' त्यस्यैव शमोपासनोभयविधिपरत्वमस्तु, तथाचोपासनाविधेरपि शेषत्वात् ''सर्वं खल्वि'' त्यस्यैवोपास्यसमर्पकत्वमित्यत आह–*उपासनं त्विति*।। विशिष्टविधौ वाक्यभेदात् शममात्रविधिः पूर्वत्र, उत्तरत्रैवोपासनाविधिः। पाठक्रमादर्थक्रमस्य बलीयस्त्वात् ''स क्रतुं कुर्वीत मनोमय.......इत्यादि शान्त उपासीत सर्वं खल्विदं ब्रह्म तज्जलानि'' ति विपरीतक्रमेण वाक्ययोजनाया एवात्र युक्तत्वाद् नोपासनायां सम्बन्धलेशोऽपि ब्रह्मण इति भावः। तदिदमाह–*तस्य च विषयत्वेनेति*।। न केवलं मनोमयत्वप्राणशरीरत्वे, किन्तु सर्वकर्मत्वसर्वकामत्वाणीयस्त्वान्यपि जीवलिङ्गानि भवितुमर्हन्ति। सर्वकर्मत्वादिकं तु पर्यायेण जीवे विवक्षितमित्याह–*पर्यायेणेति*।। ननु–ब्रह्मलिङ्गानां का गतिरिति शङ्कते–*नन्विति*।। जीवलिङ्गेन बाधितत्वाद् यथासंभवं गतिरन्ततो गत्वाऽधो गतिरेव भवत्वित्याह–*अत्र ब्रूम इत्यादिना*।। विरोधात्=बाधात्। एवं तर्हि ज्यायस्त्वादिवाक्यानामप्रामाण्यापत्तिरिति चेत्, तर्हि–कथञ्चन जीवपराण्येव तान्यपि

भवन्त्वित्याह–*ब्रह्मभावेति*।। ननु–''एतद् ब्रह्मे'' ति ब्रह्मश्रुतिविरोधाद् जीवलिङ्गान्येवान्यथा नेयानीत्याशङ्क्याह–*एतद् ब्रह्मेति*।। एतच्छब्दसमभिव्याहाराद् हिरण्यगर्भादिजीवपरमेव तद्युक्तमिति भावः। पूर्वपक्षमुपसंहरति–*तस्मादिति*।।

सिद्धान्तमुपक्रमते–*एवं प्राप्त इति*।। सिद्धान्तपक्षं संगृह्णाति–*परमेवेति*।। अत्रेमे भामती सिद्धान्तकारिके–

''समासः सर्वनामार्थः संनिकृष्टमपेक्षते।
तद्धितार्थोऽपि सामान्यं नापेक्षाया निवर्तकः।।

तस्मादपेक्षितं ब्रह्म ग्राह्यमन्यपरादपि।
तथाच सत्यसंकल्पप्रभृतीना यथार्थता।।''

इति।। सिद्धान्तं प्रतिजानीते–*परमेव ब्रह्मेत्यादिना–न भविष्यत इत्यन्तेन*।। अनेन संनिकृष्टत्वं ब्रह्मणो बोध्यत इति कारिकाप्रथमांशे संनिकृष्टपदं व्याख्यातम्। संनिकृष्टम्=प्रकृतमित्यर्थः। इदमेवाभिप्रेत्येदं ब्रह्मेति योजना पूर्व कृता। ब्रह्मणो न प्रकृतत्वम्; पूर्वोक्तविधयाऽर्थक्रमेणास्य वाक्यस्य मनोमयादिवाक्यानन्तरमेव योजनस्य युक्तत्वात्। तत्र च ब्रह्मपदं स्तावकत्वाद् हेतुवन्निगदाधिकरणन्यायेनाविवक्षितार्थमित्यभिप्रायेणाशङ्कामनुवदति–*नन्विति*।। समाधत्ते–*अत्रोच्यत इत्यादिना–वैषम्यामित्यन्तेन*।। साकाङ्क्षत्वेऽर्थवादस्य हेत्वादिसमर्पकत्वमपि दृश्यते ''न ह्यत्रानूयाजा इज्यन्ते'' ''प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ती'' त्यादौ, अत्रापि तु मनोमयादिपदं तद्धितान्तं समासन्तं च यौगिकं विशेष्यं किञ्चनापेक्षते, इति न हेतुवन्निगदाधिकरणन्यायोऽत्र प्रवर्तते। ''शूर्पेण जुहोती'' त्यादिकं तु हेतुनिरपेक्षं प्रमाणमिति भावः। तदेव=शमविधिशेषतया पठितमेव ब्रह्म। अथवा=शमविधिशेषतया पठितं ब्रह्मैव, जीवस्तु न संनिहित इत्याह–*जीवस्त्वविति*।। ननु–मनोमयपदं जीवे रूढम्, इति स्वशब्देनैव जीवोऽत्र विवक्षित इत्यत आह–*न च स्वशब्देनेति*।। तद्धितान्तत्वेन योगेन सामान्यवाचकत्वाद् न रूढत्वमिति भावः। वैषम्यम्=जीवब्रह्मणोरिति शेषः। ब्रह्म क्लृप्तम्, जीवस्तु कल्प्य इति। यत्रार्थवादेऽन्येषां साधनत्वं कल्प्यम्, विधौ च क्लृप्तम्, तत्र साक्षाद्विध्यर्थ एव गृहीतव्यो नार्थवादकल्पितोऽपीति हेतुवन्निगदाधिकरणसिद्धान्तः, प्रकृते चार्थवादार्थः क्लृप्तः, विध्यर्थस्तु कल्प्य इति पूर्वपक्ष्यभिमतन्यायस्यापि वैषम्यमिति बोध्यम्।।१।।

''तथाच सत्यसंकल्पप्रभृतीनां यथार्थते'' ति भामतीकारिकांशस्तु ''विवक्षितगुणोपपत्तेश्चे'' ति

सूत्रतद्भाष्यसारसंकलनमेव। तथाच सूत्रद्वयं मिलितं सिद्धान्तस्थापकमिति फलितम्। अत एव–"विवक्षितगुणोपपत्तेश्चे" ति चशब्दप्रयोगः। विवक्षितानां मनोमयत्वादीनां गुणानां ब्रह्मण्युपपत्तेरिति तत्सूत्रार्थः। अत्र मनोमयत्वादीनां साधारणधर्मत्वम्, अन्ततः पठितानां सत्यसंकल्पत्वादीनां तु ब्रह्मासाधारणधर्मत्वमिति स्थितौ मनोमयत्व-सर्वकर्मत्व-सर्वकामत्व सर्वगन्धत्व-सर्वरसत्व-सर्वव्यापित्वावाकित्वानादरत्वाणीयस्त्वज्यायस्त्वेषु पञ्चदशु गुणेषु विवक्षितेष मनोमयत्व-प्राणशरीरत्व-सर्वकर्मत्व-सर्वकामत्वाणीयस्त्वानि पञ्च जीवगुणाः पूर्वपक्षाभिमताः, सत्यसंकल्पत्वादयस्तु दश विवक्षिता गुणा ब्रह्मण इति वस्तुस्थितौ बहुत्वात् सत्यसंकल्पत्वाद्यनुसारेणैव विशेष्यव्यवस्था युक्ता, न मनोमयत्वादिभिः। मनोमयत्वादयोऽपि तु ब्रह्मधर्मा अपि भविष्यन्ति; "समारोपस्य रूपेण विषयो रूपवान् भवेदि" तिभामती वचनात्। इदमेवाभिप्रेत्य "तथाच सत्यसंकल्पप्रभृतीनामि" ति कारिका प्रवृत्ता। भाष्यकारोऽपि तथैव मन्यते। एतदुपोद्बलकं भाष्यं तु-*तदिह ये विवक्षिता गुणा उपासनायामुपादेयत्वेनोपदिष्टाः सत्यसंकल्पप्रभृतयस्ते परस्मिन ब्रह्मण्युपपद्यन्त इति*।। *आकाशात्मेत्यादिनेति*।। सत्यसङ्कल्पप्रभृतय इत्यत्रत्यप्रभृत्यर्थादिनाऽऽकाशात्मा गृह्यत इत्यर्थः। मनोमयत्वादीनां ब्रह्मगुणत्वासभवमाशङ्क्य परिहरति-*नन्वित्यादिना-सर्वमावृत्य तिष्ठतीत्यन्तेन*।। ननु-का तर्हि-"अप्राणो ह्यमना" इत्यादिश्रुतीनां गतिरित्यत आह-अप्राण इति*।।२।।

ननु-यथा जीवधर्मा ब्रह्मणि भवन्ति, एवं ब्रह्मधर्मा अपि जीवे भवितुमर्हन्ति। तथाच सत्यसंकल्पप्रभृतीनां यथार्थता जीवपरिग्रहेऽपि भविष्यतीत्यत आह सूत्रकारः-*अनुपपत्तेस्तु न शारीर इति*।।३।। तुशब्दोऽवधारणार्थः। तथाच ब्रह्मैव मनोमयो विवक्षितगुणोपपत्तेः, नतु शारीरः, तत्र विवक्षितगुणानामनुपपत्तेरिति सूत्रार्थः। तदेतदाह-*ब्रह्मैवेत्यादिना*।।

न शारीर आञ्जस्येनोपपद्यन्त इति।। आरोप्यधर्माणामधिष्ठान इवाधिष्ठानधर्माणामारोप्य आरोपायोगाद् न ब्रह्मधर्मा जीवे भवितुमर्हन्ति। न हि स्वरूपत आरोप्यस्याधिष्ठान इवाधिष्ठानस्य स्वरूपत आरोप्येऽध्यासः, किन्त्वधिष्ठानसंसर्गमात्रस्येत्याध्यासभाष्य एव व्यक्तम्। तथाच जीवे सत्यसंकल्पत्वादिसंसर्गाध्यासं गृहीत्वैव सत्यसंकल्पत्वादिकं वक्तव्यम्। तच्च नाञ्जसमिति भावः। सूत्रे शारीरपदेनेश्वरस्य ग्रहणमिति शङ्कायामाह-*शारीर इति*।। शरीरमात्रभवत्वं नेश्वरस्येत्येतदाह*-तस्य भोगेति*।।३।।

कर्मकर्तृव्यपदेशाच्च।।४।। मनोमयस्य कर्मत्वेनान्यस्य कर्तृत्वेन च व्यपदेशाद् मनोमयो न जीव इति सूत्रार्थः। न हि कर्मैव कर्ता भवति। तदिदं विशदयति-*इतश्चेत्यादिना*।। स्पष्टमन्यत्। अधिकं

वार्तिके।।४।। *शब्दविशेषात्*।।५।। शब्दभेदादित्यर्थः। जीवस्य मनोमयसमानस्थात्मनश्च भिन्नशब्दप्रतिपाद्यत्वाद् न मनोमयो जीव इति यावत्।।५।।

"स्मृतेश्च*।।६।। निगदव्याख्यातम्। "नेतरोऽनुपपत्तेरि" त्यादिसूत्रभाष्य उपपादितमेवार्थ-माशङ्कासमाधानाभ्याम्- *अत्राहेत्यादिना* पुनरपि विशदयति, यतः पूर्वं वृत्तिकारमतप्रसङ्गेनैव तदुक्तम्, न तु स्वमतप्रसङ्गेन। अत्र तु स्वमतप्रसङ्गेन स्वीयं वक्तव्यं वृत्तिकारमतेन साम्येऽपि वदति- *अत्राहेत्यादिना*।। एतेन आनन्दमयाधिकरणसूत्रव्याख्या भाष्यकाराणां स्वमतेनैवेति वार्तिकसिद्धान्तोऽपि-परास्तः ; पौनरुक्तयापत्तेः।।६।।

अणीयस्त्वं न ब्रह्मण्युपपद्यत इति शङ्कामनूद्य सूत्रकार एव परिहरति- *अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च*।।७।। सर्वगतस्याणीयस्त्वव्यवहार उपपद्यते, अणीयसस्तु न व्यापकत्वव्यवहारो युक्त इति सदृष्टान्तमनेन सूत्रेण प्रतिपाद्यते। अर्भकौकस्त्वात्= हृदयायतनादिपरिच्छिन्नत्वात्, अणीयस्त्वादिव्यपदेशाच्च न ब्रह्म मनोमय इति चेत्, न; नायं दोषः ; एवं निचाय्यत्वात्=एवं ध्येयत्वेन विवक्षणात्। व्योमवदिति दृष्टान्तः।।७।।

सम्भोगप्राप्तिरिति चेन्न वैशेष्यात्।।८।। मनोमयस्येश्वरस्य हृदयायतनत्वादिना परिच्छेदेन परिच्छिन्नत्वेन तद्देशसम्बन्धाद जीवस्येव भोक्तृत्वप्राप्तिरिति चेत्, न; वैशेष्यात्=वैषम्यादिति सूत्रार्थः। जीवविलक्षणं ब्रह्मेति भावः। भोक्तृत्वं हि मिथ्याज्ञाननिबन्धनम्। तच्च ब्रह्मणो नास्तीति न दोष इति यावत्।। संनिधानमात्रेण भोक्तृत्वं वारयति- *यदि चेत्यादिना-परिहारावित्यन्तेन*।। ब्रह्मातिरिक्तजीवाभावमादाय शङ्का तु यद्यपि नात्र सङ्गता; यतो जीवब्रह्माभेदवादेनैवोक्ताधि-करणप्रवृत्तिः ; तथापि विषयशुद्ध्यर्थ स्वमतं व्यवस्थापयत्याशङ्कापरिहाराभ्यां सुदृढोऽयं सिद्धान्तश्छात्राणां मनसि प्रतिफलत्विति- *यदपीत्यादिना-ईश्वरस्य कल्पयितुमित्यन्तेन*।। *नैकत्वेऽपि*।। नञ उपभोगप्रसङ्ग इत्यनेन सम्बन्धः।।

अत्र "सर्वत्र प्रसिद्धोपदेशादि" त्यनेनार्थवादापूर्वत्वे "विवक्षितगुणोपपत्तेरि" त्यनेनोपपत्तिः, उभाभ्यां मिलिताभ्यामुपक्रमोपसंहारौ, "कर्मकर्तृव्यपदेशादि" त्यनेन फलत्वम्, "शब्दविशेषादि" त्यनेनाभ्यासश्च तात्पर्यग्राहकाणि लिङ्गानि सिद्धान्तबीजानि सूच्यन्ते। "अर्भकौकस्त्वादि" ति सूत्रांशेन तूपपत्तिमात्रं पूर्वपक्षबीजं सूच्यते। तत्रोपक्रममात्रानुगृहीतोपपत्तिमात्रमालाच्यते चेत्, कथञ्चन "विवक्षितगुणोपपत्तेश्चे" ति न्यायेन पूर्वपक्षः, उपक्रमोपसंहारार्थवादादीनामप्यालोचने तु सिद्धान्त इति वस्तुस्थितिः। अत्रान्यर्थार्थवादस्यापि प्रकरणानुगृहीतस्य विशेष्यानुपस्थितौ विशेष्योपस्थापकत्वव्यवस्थापनेन ब्रह्मोपक्रमत्वं व्यवस्थाप्यत उपसंहारैकरूप्यसिद्ध्यर्थम्। तथाच

पूर्वपक्ष उपसंहारविरुद्धोपक्रममात्रसत्त्वेऽपि परमोपक्रमोपसंहारयोरुभयोरानुगुण्यं सिद्धान्त एवेति विवक्षितुगुणसाम्येऽपि तदुपपत्तिस्सिद्धान्त एवेति सूचनार्थमेव–''अनुपपत्तेश्च न शारीर'' इत्यादि सूत्रम्। अत्र ''सम्भोगप्राप्तिरिति चेन्न वैशेष्यादि'' ति सूत्रमेवाभेदेऽपि जीवब्रह्मणोर्भेदोऽपि काल्पनिको वर्तत इति भेदसामानाधिकरण्योपलक्षिताभेद एव तादात्म्यमिति च सिद्धान्ते बीजम्। तत्र विशेषादिति प्रयोक्तव्ये वैशेष्योदिति पदं धर्ममात्रतोऽयं जीवब्रह्मणोर्भेदः, न स्वरूपतोऽपीति सूचयतीत्यद्वैतवादानुगुण्यम्। येषां तु मते जीवब्रह्मणोः स्वरूपतो भेदः, तत्र संभोगप्राप्तिशङ्कैव नोदेतीति सूत्रमिदं वितथमापद्येत। इदं चेश्वरस्योपहितचैतन्यस्य वाधिष्ठानत्वपक्षमादाय। शुद्धचैतन्याधिष्ठानत्वपक्षे तु सगुणब्रह्मणो जीवस्य चोभयोरपि कल्पितत्वात् सद्रूपेण कारणरूपेणैवोभयोरैक्यम्, न कार्यरूपेणापि; ''कार्यात्मना तु नानात्वमभेदः कारणात्मने'' ति न्यायात्। तथाच–सर्वेषां कारणात्मनाऽभेदेऽद्वैतमते घटपटादीनामपि स्वरूपतोऽभेदापत्तिरित्यादिशङ्का अपि निर्मूला इति सूच्यते। औपाधिक एव जीवब्रह्मणोर्भेद इति तु निष्कर्षः। अनेन च सगुणब्रह्मणः कथञ्चन जगत्कर्तृत्वेन जीवैः साकं कर्तृत्वेन साम्यं वर्तते, भोक्तृत्वं तु न कथमपीति द्योत्यते। कार्य ब्रह्म हिरण्यगर्भोऽपि तु जीवविशेष एवेति न ''भोगमात्रसाम्यलिङ्गादि'' ति सूत्रविरोधः। अयं चार्थो वार्तिककारेणापि ''जगद्वयापारवर्जमि'' ति सूत्रानुसन्धानेन सूच्यते। तथाच साङ्ख्यमतेन साकं कारणस्याभोक्तृत्वे न विवादः, किन्तु जीवाभोक्तृत्व एवेति निष्कर्ष इसि दिक्।।

अत्र वाक्यसमन्वयपादेषु सर्वत्राधिकरणेषु सिद्धान्तेनोपक्रमः, मध्य एव पूर्वपक्षनिरासश्चेति नीतिरविकलैव। तत्र यथायोगं द्वितीयादिसूत्रनिरंस्यपक्षः पूर्वपक्ष इति निष्कर्षः। ''अनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च'' ''न सङ्ख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्चे'' ति च पूर्वपक्षनिरासमुखेनाधिकरणप्रवृत्तिस्तु न वाक्यविशेषविचारार्था; पदविशेषार्थनिर्णयार्थत्वात्, मतान्तरप्रक्रियापरामर्शनिषेधतात्पर्यकत्वाच्च। एतेन–''स्मृत्यनवकाशदोषप्रसङ्गाद्'', ''उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि'' ''रचनानुपपत्तेश्च नानुमानम्'' इत्यादिसूत्राण्यपि–व्याख्यातानि। पूर्वपक्षमुखेनाधिकरणप्रवृत्तिस्तु कोटिविशेषनिरास-सूचकशब्दघटितोत्तरसूत्रान्तरवत्त्व एव, नान्यथा। तत्र पूर्वस्य पूर्वपक्षत्वमुतोत्तरस्येति सन्देहस्थले तु सिद्धान्तत्वसूचकोपपत्त्यादिपदसाहित्यं सिद्धान्तत्वसूचकमिति स्वीकर्तव्यम्। तथाच ''कार्य बादरिरस्य गत्युपपत्ते'' रिति पूर्वस्याप्युत्तरपक्षत्वेऽपि न दोषः। न ह्युपपत्तिपद पूर्वपक्षसूत्रे कुत्रापि वर्तत इति दिक्। तथाच पूर्वपादस्य वाक्यसमन्वयपादत्वात् पदमात्रं सूत्रगतं तद्घटितमहावाक्याभिप्रायमेव, अत एवा ''नन्दमयोऽभ्यासादि'' त्यादीनां पुच्छब्रह्मादिवाक्यपरत्वेऽपि न विरोधः। ''ईक्षतेर्नाशब्दमि'' ति परपक्षनिराकरणेनैवाधिकरणप्रवृत्तिस्तु

प्रधानकारणतावादस्य जीवकारणतादिपक्षस्येव श्रौतत्ववादसम्भवनाया अपि विरहसूचनार्थम्। तथाच कृत्वाचिन्तयैव प्रधानशाब्दत्वशङ्केति सूच्यते। तेन चाचेतनत्वेन साम्येऽपि व्योमज्योतिःप्राणादिकारणताशङ्कानां ततो बलीयस्त्वं सूच्यते। ''तत्तु समन्वयादि'' त्यतस्तत्पदानुषङ्गेन ''तदैक्षते'' तिवाक्यघटकतत्पदस्यैव पक्षतायां तु सिद्धान्तमुखेनैवाधिकरणोपक्रमनियमस्य, उत्सूत्रमथवा सूत्रमध्य एव पूर्वपक्षसूचननियमस्य वा वाक्यसमन्वयपादगतस्य न कथमपि व्यभिचारः। पदवाक्योः समन्वयार्थमेवेदं प्रकरणमिति ''एतेन सर्वे व्याख्याता'' इति व्याख्यातपदप्रयोगेण सूच्यते। ततश्च समन्वयाध्याय इति समाख्यायामत्रत्यं व्याख्यातपदमेव मूलम्। एतेन–द्वितीयाध्यायस्याविरोधाध्याय इति नामन्यपि–''वैशेष्यात्तु तद्वाद'' इति सूत्रमेव मूलम्, येन सत्यपि विरोधेऽविरोधोऽपि व्यङ्ग्यते। एवं मुक्तिफलानियमपदमपि तृतीयाध्यायस्य साधनविचारतायां गमकम्। ''अनावृत्तिः शब्दादि'' ति तु फलाध्यायतासूचकम्।।

तत्र प्रथमाध्यायप्रथमपादस्य ब्रह्मेतरलिङ्गादिबाधेन प्रवत्तिरिति–तदीयान्तिमसूत्रे ''जीवमुख्यप्राणलिङ्गान्नेति चेन्न'' त्येतावन्मात्रेण ज्ञाप्यते। उपरितनपादार्थस्तु ब्रह्मेतरलिङ्गप्राबल्येनेत्यपि ''जीवमुख्यप्राणलिङ्गादि'' त्यंशेन सूच्यते। तत्रापि सविशेषप्रधान्यमस्येति विवक्षितगुणोपपत्तेरिति सूत्रेण निर्विशेषप्राधान्यं तृतीयपादस्येति ''आमनन्ति चैनमस्मिन्नि'' त्यौपनिषदत्वसूत्रणेन च ज्ञाप्यते। तुरीयपादे सन्दिग्धपदसमन्वयपादत्वं तु ''पत्यादिशब्देभ्य'' इति शब्दपदेन ज्ञाप्यते।।

एतेन–द्वितीयाध्यायार्थसूचनमपि–व्याख्यातपदप्रयोगेण ज्ञाप्यते। व्याख्यातपदं हि–सामान्यतः समन्वयपरमपि सूत्रकारैर्निरस्तपरतयाऽपि प्रयुज्यते–''एतेन शिष्टापरिग्रहा अपि व्याख्याता'' इत्यत्रेति प्रथमाध्यायार्थसूचनमिव द्वितीयाध्यायार्थसूचनम्, तत्रापि द्वितीयाध्यायप्रथमपादार्थसूचनं च विवक्ष्यते। तत्रापि स्वमतसमर्थनं प्रथमपादार्थ इति ''सर्वधर्मोपपत्तेरि'' त्यत्र धर्मोपपत्तेरित्यंशमात्रविवक्षया विरुद्धांशमात्रे दर्शनान्तराप्रामाण्यमिति द्वितीयपादार्थश्च भावी सूच्यते। तत्र च विरोधचिन्ताया मतान्तरनिरसन एव मुख्यं तात्पर्यमिति ''विप्रतिषेधाच्चे'' ति सूत्रेण द्वितीयद्वितीयान्तिमेन ज्ञाप्यते। ''वैशेष्यात्तु तद्वाद'' इत्यनेन तु न केवलं विरोधेऽप्यविरोध इति दृष्टयाविरोधाध्यायतामात्रं प्रकृतस्य, किन्तूपरि पाञ्चभौतिकस्थूलसूक्ष्मशरीरसम्बन्ध्येव विचार इत्यपि सूच्यते।।

अत्र च–''योनेः शरीरमि'' ति सूत्रमप्युपष्टम्भकम्। इदं तु सूत्रमुपरि शरीरिणो जीवस्यैवावस्थाविशेष स्वरूपविशेषं च भाविनमपि व्यवस्थापयिष्यमाणं सूचयति। एतेन–पूर्वं तु

बादरायणो हेतुव्यपदेशादि'' ति सूत्रमपि–व्याख्यातम्; तेनापि साधानावस्था पूर्वतनाऽत्र विचार्यते, हेतुव्यपदेशादित्यनेन च भावी विद्यैकत्वानेकत्वविचारः सूच्यत इति सम्भवात्। ''दर्शनादि'' त्यन्तिमसूत्रं तु भाविनं ज्ञानतत्साधनविचारं व्यञ्जयति। एतेन–एवं मुक्तिफलानियम इत्यपि–व्याख्यातम्; भाविनः फलविचारस्य सूचनात्।।

अत्र मुक्तिफलानियमसूत्रणेन जीवन्मुक्तिविचारस्तुरीयाध्यायप्रथमपादार्थः स्पष्टीक्रियते भावी। ''भोगेन त्वितरे क्षपयित्वा ततः संपद्यत'' इति संपद्यतेपदप्रयोगस्तु भाविनो गौणमुख्यसाधारणसम्पत्तिविचारस्य ज्ञापक इति निगदव्याख्यातमिदम्। एतेन ''विशेषं च दर्शयती'' ति सूत्रमपि–व्याख्यातम्; सम्पत्तिविशेषः, तत्रापि क्रममुक्तिमुख्यमुक्त्योर्विशेष इति च मुक्तिविषयिणी विशेष चर्चा करिष्यत इति सूचनार्थत्वाद् विशेषपदस्य। तदेवं सर्वेषां पादानां पूर्वोत्तराणामध्यायानां च परस्परं सम्बन्धः प्रतिपाद्यार्थाश्च विशदीक्रियन्ते सूत्रकारैरेवैत्यभिप्रेत्यैव प्रतिपादं पूर्वोत्तरपादसङ्गतिः सङ्गृह्यत इत्यवधेयम्।।८।।

।। इति प्रदीप प्रथमं सर्वत्रप्रसिद्धाधिकरणम् समाप्तम्।।

भामती

अथ द्वितीयं पादमारिप्सुः पूर्वोक्तमर्थं स्मारयति वक्ष्यमाणोपयोगितया *प्रथमे पादे इति*। उत्तरत्र हि ब्रह्मणो व्यापित्वनित्यत्वादयः सिद्धवद्धेतुतयोपदेक्ष्यन्ते। न चैते साक्षात्पूर्वमुपपादिता इति हेतुभावेन न शक्या उपदेष्टुमिति, अत उक्तम् *समस्तजगत्कारणस्य इति*। यद्यप्येते न पूर्वं कण्ठत उक्तास्तथापि ब्रह्मणो जगज्जन्मादिकारणत्वोपपादनेनाधिकरणसिद्धान्तन्यायेनोपक्षिप्ता इत्युपपन्नस्तेषा-मुत्तरत्र हेतुभावेनोपन्यास इत्यर्थः। *अर्थान्तरप्रसिद्धानाञ्च इति*। यत्रार्थान्तरप्रसिद्धा एवाकाशप्राणज्योतिरादयो ब्रह्मणि व्याख्यायन्ते तदव्यभिचारिलिङ्गश्रवणात् तत्र कैव कथा मनोमयादीनामर्थान्तरे प्रसिद्धानां पदानां ब्रह्मगोचरत्वनिर्णयं प्रतीत्यभिप्रायः। पूर्वपक्षाभिप्रायं त्वग्रे दर्शयिष्यामः।

इदमाम्नायते—सर्वं खल्विदं ब्रह्म। कुतः? *तज्जलान् इति*। यतस्तस्माद् ब्रह्मणो जायत इति तज्जम्। तस्मिंश्च लीयत इति तल्लम्। तस्मिंश्चानिति स्थितिकाले चेष्टत ज्ञात वदन् जगत्तस्मात्सर्वं खल्विदं जगद् ब्रह्म। अतः कः कस्मिन् रज्यते कश्च कं द्वेष्टीति रागद्वेषरहितः शान्तः सन्नुपासीत। अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीर इत्यादि।

तत्र संशयः—किमिह मनोमयत्वादिभिर्धर्मैः शारीर आत्मोपास्यत्वेनोपदिश्यते आहोस्विद् ब्रह्मेति? किं तावत्प्राप्तम्? शारीरः जीव इति। कुतः? क्रतुमित्यादिवाक्येन विहितां क्रतुभावनामनूद्य सर्वमित्यादिवाक्यं शमगुणे विधिः। तथा च सर्वं खल्विदं ब्रह्मेति वाक्यं प्रथमपठितमप्यर्थालोचनया परमेव, तदर्थोपजीवित्वात्। एवं स सङ्कल्पविधिः प्रथमो निर्विषयः सन्नपर्य्यवस्यन्विषयापेक्षः स्वयमनिवृत्तो न विध्यन्तरेणोपजीवितुं शक्यः, अनुपपादकत्वात्। तस्माच्छान्ततागुणविधानात् पूर्वमेव मनोमयः प्राणशरीर इत्यादिभिर्विषयोपनायकैः सम्बध्यते। मनोमयादि च कार्यकारणसङ्घातात्मनो जीवात्मन एव निरूढमिति जीवात्मनोपास्येनोपरक्तोपासना न पश्चाद् ब्रह्मणा सम्बद्धुमर्हति,

उत्पत्तिशिष्टगुणावरोधात्। न च सर्वं खल्विदमिति वाक्यं ब्रह्मपरमपि तु शमहेतुवन्निगदार्थवादः शान्तताविधिपरः, शूर्पेण जुहोति तेन ह्यन्नं क्रियत इतिवत्। न चान्यपरादपि ब्रह्मापेक्षिततया स्वीक्रियत इति युक्तम्। मनोमयत्वादिभिधर्मैर्जीवे सुप्रसिद्धैर्जीवविषयसमर्पणेनानपेक्षितत्वात्। सर्वकर्मत्वादि च जीवस्य पर्यायेण भविष्यति। एवं चाणीयस्त्वमप्युपपन्नम्। परमात्मनस्त्वपरिमेयस्य तदनुपपत्तिः। प्रथमावगतेन चाणीयस्त्वेन ज्यायस्त्वं तदनुगुणतया व्याख्येयम्। व्याख्यातं च भाष्यकृता। एवं कर्मकर्तृव्यपदेशः सप्तमीप्रथमान्तता चाभेदेऽपि जीवात्मनि कथञ्चिद्भेदोपचारेण राहोः शिर इतिवद् द्रष्टव्या। एतद् ब्रह्मेति च जीवविषयं जीवस्यापि देहादिबृंहणत्वेन ब्रह्मत्वात्। एवं सत्यसङ्कल्पादयोऽपि परमात्मवर्तिनो जीवेऽपि सम्भवन्ति, तदव्यतिरेकात्। तस्माज्जीव एवोपास्यत्वेन विवक्षितः, न परमात्मेति प्राप्तम्।

एवं प्राप्तेऽभिधीयते—समासः सर्वनामार्थः सन्निकृष्टमपेक्षते।
तद्धितार्थोऽपि सामान्यं नापेक्षाया निवर्त्तकः॥

तस्मादपेक्षितं ब्रह्म ग्राह्यमन्यपरादपि।
तथा च सत्यसङ्कल्पप्रभृतीनां यथार्थता॥

भवेदेतदेवं यदि प्राणशरीर इत्यादीनां साक्षाज्जीववाचकत्वं भवेत्। न त्वेतदस्ति। तथाहि—प्राणः शीरमस्येति सर्वनामार्थो बहुव्रीहिः सन्निहितं च सर्वनामार्थं सम्प्राप्य तदभिधानं पर्य्यवस्येत्। तत्र मनोमयपदं पर्यवसिताभिधानं तदभिधानपर्यवसानायालं, तदेव तु मनोविकारो वा मनः प्रचुरं वा किमर्थमित्यद्यापि न विज्ञायते। तद्येनैष शब्दः समवेतार्थो भवति स समासार्थः। न चैष जीव एव समवेतार्थो न ब्रह्मणीति, तस्याप्राणो ह्यमना इत्यादिभिस्तद्विरहप्रतिपादनादिति युक्तम्। तस्यापि सर्वविकारकारणतया विकाराणां च स्वकारणादभेदात्तेषां च मनोमयतया ब्रह्मणस्तत्कारणस्य मनोमयत्वोपपत्तेः। स्यादेतत्—जीवस्य साक्षात्मनोमयत्वादयो ब्रह्मणस्तु तद्द्वारा, तत्र प्रथमं द्वारस्य बुद्धिस्थत्वात्तदेवोपास्यमस्तु, न पुनर्जघन्यं ब्रह्म, ब्रह्मलिङ्गानि च जीवस्य ब्रह्मणोऽभेदाज्जीवेऽप्युपपत्स्यन्ते। तदेतदत्र सम्प्रधार्यम्—किं ब्रह्मलिङ्गैर्जीवानां तदभिन्नानामस्तु तद्वत्ता, तथा च जीवस्य मनोमयत्वादिभिः प्रथममवगमात्तस्यैवोपास्यत्वम्, उत न जीवस्य ब्रह्मलिङ्गवत्ता तदभिन्नस्यापि, जीवलिङ्गैस्तु ब्रह्म तद्वत्, तथा च ब्रह्मलिङ्गानां दर्शनात् तेषां च जीवेऽनुपपत्तेर्ब्रह्मैवोपास्यमिति? वयं तु पश्यामः—

समारोप्यस्य रूपेण विषयो रूपवान् भवेत्।
विषयस्य तु रूपेण समारोप्यं न रूपवत्॥

समारोपितस्य हि रूपेण भुजङ्गस्य भीषणत्वादिना रज्जू रूपवती, न तु रज्जुरूपेणाभिगम्यत्वादिना भुजङ्गो रूपवान्, तदा भुजङ्गस्यैवाभवात् किं रूपवत्। भुजङ्गदशायां तु न नास्ति वास्तवी रज्जुः। तदिह समारोपितजीवरूपेण वस्तुसद् ब्रह्म रूपवद्युज्यते, न तु ब्रह्मरूपैर्नित्यत्वादिभिर्जीवस्तद्वान् भवितुमर्हति, तस्य तदानीमसम्भवात्। तस्माद् ब्रह्मलिङ्गदर्शनाज्जीवे च तदसम्भवाद् ब्रह्मैवोपास्यं न जीव इति सिद्धम्। एतदुपलक्षणाय च सर्वं खल्विदं ब्रह्मेति वाक्यमुपन्यस्तमिति। *यद्यप्यपौरुषेयः इति*। शास्त्रयोनित्वेऽपीश्वरस्य पूर्वपूर्वसृष्टिरचित-सन्दर्भापेक्षरचनत्वेनास्वातन्त्र्यादपौरुपेयत्वामिधानं, तथा चास्वातन्त्रयेण विवक्षा नास्तीत्युक्तम्। परिग्रहपरित्यागौ चोपादानानुपादाने उक्ते, न तूपादेयत्वमेव। अन्यथोद्देश्यतयाऽनुपादेयस्य ग्रहादेरविवक्षितत्वेन चमसादावपि संमार्गप्रसङ्गात्। तस्मादनुपादेयत्वेऽपि ग्रह उद्देश्यतया परिगृहीतो विवक्षितः। तद्गतं त्वेकत्वमवच्छेदकत्वेन वर्जितमविवक्षितम्। इच्छानिच्छे च भक्तितः। तदिदमुक्तम् *वेदवाक्यतात्पर्यातात्पर्याभ्यामवगम्येते इति*। यत्परं वेदवाक्यं तत्तेनोपात्तं विवक्षितम्, अतत्परेण चानुपात्तमविवक्षितमित्यर्थः॥२॥

स्यादेतत्–यथा सत्यसङ्कल्पादयो ब्रह्मण्युपपद्यन्ते। एव शारोरेऽप्युपपद्यन्ते, शारीरस्य ब्रह्मणोऽभेदात्। शारीरगुणा इव मनोमयत्वादयो ब्रह्मणीत्यत आह सूत्रकारः–अनुपपत्तेस्तु न शारीरः॥३॥

यत्तदवोचाम समारोप्यधर्माः समारोपविषये सम्भवन्ति, न तु विषयधर्माः समारोप्य इति। तस्येत उत्थानम्। अत्राह चोदकः *कः पुनरयं शारीरो नाम इति*। न तावद्भेदप्रतिषेधाद्भेदव्यपदेशाच्च भेदाभेदावेकत्र भाविकौ भवितुमर्हतो विरोधादित्युक्तम्। तस्मादेकमिह तात्त्विकमतात्त्विकं चेतरत्। तत्र पौर्वापर्य्येणाद्वैतप्रतिपादनपरत्वाद्वेदान्तानां द्वैतग्राहिणश्च मानान्तरस्याभावात्तद्बाधनाच्च, तेनाद्वैतमेव परमार्थः। तथा चानुपपत्तेस्त्वित्याद्यसङ्गतार्थमित्यर्थः। परिहरति *सत्यमेवमेतत्, पर एवात्मा देहेन्द्रियमनोबुद्ध्युपाधिभिरवच्छिद्यमानो बालैः शारीर इत्युपचर्य्यते*। अनाद्यविद्यावच्छेदलब्ध-जीवभावः पर एवात्मा स्वतो भेदेनावभासते। तादृशाच्च जीवानामविद्या, न तु निरुपाधिनो ब्रह्मणः। न चाविद्यायां सत्यां जीवात्मविभागः, सति च जीवात्मविभागे तदाश्रयाऽविद्येत्यन्योन्याश्रयमिति साम्प्रतम्। अनादित्वेन जीवाविद्ययोर्बीजाङ्कुरवदनवक्लुप्तेरयोगात्। न च सर्वज्ञस्य सर्वशक्तेश्च स्वतः

कुतोऽकस्मात्संसारिता, यो हि परतन्त्रः सोऽन्येन बन्धनागारे प्रवेश्येत, न तु स्वतन्त्रः, इति वाच्यम्। नहि तद्भागस्य जीवस्य सम्प्रतितनो बन्धनागारप्रवेशिता येनानुयुज्येत, किन्त्वियमनादिः पूर्वपूर्वकर्माविद्यासंस्कारनिबन्धना नानुयोगमर्हति। न चैतावता ईश्वरस्यानीशता, नह्युपकरणाद्यपेक्षिता कर्तुः स्वातन्त्र्यं विहन्ति। तस्माद्यत्किञ्चिदेतदपीति।

विशेषादिति वक्तव्ये वैशेव्याभिधानमात्यन्तिकं विशेषं प्रतिपादयितुम्। यथा ह्यविद्याकल्पितः सुखादिसम्भोगोऽविद्यात्मन एव जीवस्य युज्यते, न तु निर्मृष्टनिखिलाविद्यातद्वासनस्य शुद्धबुद्धमुक्तस्वभावस्य परमात्मन, इत्यर्थः। शेषमतिरोहितार्थम।।३–८।।

इति भामती प्रथमं सर्वत्र प्रसिद्धाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

ब्रह्मबोधकानां वेदान्तवाक्यानामानन्त्यात् प्रतिवाक्यं विचारानुपपत्तेः सन्दिग्धानां केषांचिद्विचारेण तन्न्यायैस्तादृशानामपि निर्णयो भवतीति कतिचिदेव वाक्यानि तात्पर्यलिङ्गसमन्वयेन ब्रह्मबोधकानि सूत्रितानि। तेषु कतिचित् स्पष्टलिङ्गानि प्रथमपादे विचारितानि, कतिचित् अनतिस्पष्टलिङ्गानि द्वितीयपादे विचार्यन्ते-

॥सू॥ सर्वत्र प्रसिद्धोपदेशात्॥१॥

छान्दोग्ये श्रूयतेऽस्य विषयः 'मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः' इत्यादि॥

अत्र मनोमयत्वादिधर्मकः श्रूयमाणः पुरुषः परमेश्वरो वा जीवो वेति संशयः॥ जीव इति पूर्वः पक्षः। कुतः? तस्य प्रत्यासन्नत्वात्। 'अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत' इति कर्मवशादिह परत्र च परिभ्रमन् जीवः प्रस्तुतः पूर्वम्। तदनन्तरं 'मनोमयः' इति श्रूयते। अत एव मनोमयत्वादिधर्मको जीवः। मनोमयत्वप्राणशरीरत्वादेकं च संसारिलक्षणं न परमेश्वरलिङ्गम्। सति यथार्थे असंकल्पः इति सत्यसंकल्पत्वमपि संसारिधर्मत्वेन योजनीयम्। अतः सर्वथा मनोमयत्वादिधर्मको जीव एव, न परमेश्वरः॥ इति प्राप्ते ब्रूमः - परमेश्वर एव मनोमयत्वादिधर्मकः। कुतः? परब्रह्मणः परमेश्वरस्यैवोपक्रमे 'सर्वं स्वल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इति सर्वकारणत्वेनोपास्यत्वेनोपदेशात्। श्रुतितात्पर्यं च - तज्जलान् इदं सर्वं ब्रह्माधीनजनमस्थितिध्वंसकम्। एतत् सर्वं चिदचिद्रूपं ब्रह्म खलु इति शान्त उपासीत ब्रह्म इति; यथा सागरे संपन्नजन्मस्थितिविलयं फेनबुद्बुदकदम्बकं तद्रूपमेव दृश्यते तथा शक्तिमति ब्रह्मणि संपन्नजन्मादिकं तन्मयमेव। तदतिरिक्तं किंचन नोपलभ्यते। तथाहि अथर्वशिरसि निरूपितमीश्वरेण 'अहमेकः प्रथममासं वर्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्तः' इति। ततश्च तेन 'ब्रह्माहम्' इत्यादिना विश्वरूपत्वमात्मनः प्रपञ्चितम्। तत्र विश्वरूपत्वे 'सोन्तरादन्तरं प्राविशत्'

(श्वे०) इत्यनुप्रवेश एव हेतुरुक्तः। अतो ब्रह्मणाऽपृथक्सिद्धजन्मस्थितिप्रवृत्तिकत्वात् अस्य जगतस्तद्व्यतिरिक्तता नास्ति। तथाऽभियुक्ता वदन्ति-

'शक्तयोऽस्य जगत् कृत्स्नं शक्तिमांस्तु महेश्वरः। शक्तिस्तु शक्तिमद्रूपात् व्यतिरेकं न गच्छति।। तादात्म्यमनयोर्नित्यं वह्निदाहिकयोरिव। शक्तिशक्तिमतोर्यस्मादभेदः सर्वदा स्थितः।। अतस्तद्धर्मधर्मित्वात् परा शक्तिः परात्मनः। न वह्नेर्दाहिका शक्तिः व्यतिरिक्ता विभाव्यते:।। इत्यादि। वायुसंहितायां च-

'शक्तयादि च पृथिव्यन्तं शिवतत्त्वसमुद्भवम्। तेनैकेन तु तद्व्याप्तं मृदा कुम्भादिकं यथा।। पराऽस्य विविधा शक्तिः प्रबोधानन्दरूपिणी। एकानेकस्वरूपेण भाति भानोरिव प्रभा'।। इति।। 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।।' (श्वे. ६.८) 'एकएव रुद्रो न द्वितीयाय तस्थुर्य इमाँल्लोकानीशत ईशिनीभिः।।' (श्वे. ३.२) इत्यादयश्च परब्रह्मणः स्वाभाविकानन्तजगज्जननशासनपालन शक्तिमत्त्वं श्रुतयो वदन्ति।। किं बहुनाश्रुतिस्मृतीतिहासपुराणाभियुक्तसूक्तिप्रामाण्यात् सकलचिदचित्प्रपञ्चमहाविश्रूतिरूपा महासंविदानन्दसत्ता देशकालादिपरिच्छेदशून्या स्वाभाविकी परमशक्तिः परब्रह्मणः शिवस्य स्वरूपं च गुणश्च भवति। तद्व्यतिरेकेण परब्रह्मणः सर्वज्ञत्वं सर्वशक्तित्वसर्वकारणत्व सर्वनियन्तृत्व सर्वोपास्यत्व सर्वानुग्राहकत्वसर्वपुरुषार्थहेतुत्वादिकं सर्वगतत्वं च न संभवति। किंच-महेश्वरशिव महादेवरुद्रादिपरमाख्यानामभिधेयत्वं च न संभवति। तथा च सर्वचिदचित्प्रपञ्चशरीरविशिष्टं ब्रह्म सर्वशब्दवाच्यम्। यथा नीलशब्दो न केवलं स्वस्यैव वाचकः, किंतु स्वविशिष्टस्योत्पलस्यापि, तथा प्रपञ्चशब्दोऽपि ब्रह्मणः। तस्मात् सर्वशब्दवाच्यत्वं ब्रह्मणः 'सर्वो वै रुद्रः' (महाना० १६) इत्यादय उपादयन्ति। ततः 'सर्वं खल्विदं ब्रह्म (छा० ३.४) इति सर्वचिदचित्प्रपञ्चशरीरं ब्रह्माभिधीयते। ततो ब्रह्मस्वरूपतत्वात् प्रपञ्चस्य द्वेषाद्यविषयत्वाच्छान्तएव ब्रह्मोपासीतेति। एतमर्थं पौराणिकी भणितिरप्यभिव्यनक्ति-विग्रहं देवदेवस्य जगदेतच्चराचरम्। एतमर्थं न जानन्ति पशवः पाशगौरवात्।। विद्येति चेतनां प्राहुस्तथाऽविद्यामचेतनाम्। विद्याऽविद्यात्मकं सर्वं विश्वं विश्वगुरोर्विश्रोः।। रूपमस्य न संदेहो विश्वं तस्य वशे यतः। सत्वे साधौ च सच्छब्दः सद्भिरेव प्रयुज्यते।। विपरीते त्वसच्छब्दः कथ्यते वेदवादिश्रिः। सच्जासच्च जगद्विश्वं शरीरं परमेष्ठिनः।। वृक्षस्य मूलसेकेन शाखाः पुष्यन्ति वै यथा। शिवस्य पूजया तद्वत् पुष्यत्यस्य वपुर्जगत्।। आत्मा तस्याष्टमी मूर्तिः शिवस्य परमात्मनः। व्यापिकेतरमूर्तीनां विश्वं तस्माच्छिवात्मकम्।। देहिनो .यस्य कस्यापि निग्रहः क्रियते यदि। अनिष्टमष्टमूर्तेस्तन्नात्र कार्या विचारणा।। सर्वोपकारकरणं सर्वानुग्रहणं तथा। सर्वाभयप्रदानं च

शिवस्याराधनं विदुः।। इत्यादिका'। अतः सर्वाकारत्वात् ब्रह्मणः 'सर्वं ब्रह्म' इति शान्त उपासीत इति' समञ्जसमेव। तस्मादुपास्त्वेनोपक्रमगतं ब्रह्मैव मनोमयत्वादिधर्मकम्। न च मनोमयत्वादिकं संसारिणो लक्षणम्। उपास्याकारपरिग्रहादस्य परिच्छेदसंभवात्। यदुक्तं क्रतुमयस्य जीवस्य प्रस्तुतत्वान्मनोमयो जीव इति, तदयुक्तम्, उत्पत्तिशिष्टब्रह्मावरुद्धायामुपासनायामवान्तरप्राप्तस्य जीवस्य प्रवेशयितुमशक्यत्वात्ः यथा विश्वेदेवावरुद्धायामामिक्षायां वाजिनां न प्रवेशः। अतो ब्रह्मैव मनोमयत्वादिधर्मवत्त्वेनोपास्यमिति।। उपक्रमगतं ब्रह्मैव मनोमयत्वादिविशिष्टमित्युक्ते अवान्तरसिद्धस्य जीवस्य प्रसङ्गोऽनर्थकः स्यादित्याशङ्कायामाह-

।।सू०।। विवक्षितगुणोपपत्तेश्च।।२।।

सत्यसंकल्पत्वसर्वकामत्वादीनां विवक्षितानां गुणानां ब्रह्मण्येवोपपत्तेश्च तदेवोपास्यम्, अवान्तरसिद्धस्तु जीवः उपासकः तदाकाङ्क्षायोगादिति।। इति सर्वत्रप्रसिद्धाधिकरणम्।।१।।

अथ अनुपपत्त्यधिकरणम्।।२।।

इह सामान्येन जीवस्योपास्यत्वं नास्ति, किंतूपासकत्वमिति निरूपितम्। पुनरपि सकलजीवसमष्टिरूपहिरण्यगर्भोपादानभूतस्य नारायणस्यापि विश्वाधिकब्रह्मविषयकमुपासकत्वं, नोपास्यत्वमित्यभिधातुमिदमधिकरणमारभ्यते-

।।सू।। अनुपपत्तेस्तु न शारीरः।।३।।

अस्य महोपनिषदि श्रूयते विषयः 'पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम्। नारायणं महाज्ञेयम्' इत्यादि।। अत्र विश्वपतित्वादिलक्षणयुक्ततया नारायणशब्दवाच्यो मूर्त्यात्मा परमेश्वरोऽन्यो वेति संदेहः।। 'सहस्रशीर्षं देवम्' इत्यारभ्य सहस्रशीर्षत्वादिविधेयत्वेन नारायणस्य मूर्त्यात्मन एवोद्देश्यत्वेनाभ्यासात्, 'समुद्रेऽन्तं विश्वशम्भुवम्' इति समुद्रशायित्वादितल्लिङ्गाच्च, तत्पर्यायवाचकाच्युतहरिशब्दादिप्रयोगाच्च, नारायण एव मूर्त्यात्मा विश्वपतित्वादिना लिङ्गेन प्रतिपाद्यत इति पूर्वः पक्षः।। सिद्धान्तस्तु-नाराणात्मा महेश्वर इति। कुतः? विश्वपतित्वादीनां परमेश्वरधर्माणां तदर्थान्तरे नारायणेऽनुपपत्तेः। 'पशूनां पतये' 'वृक्षाणां पतये' 'जगतां पतये' (तै.सं. ४.५.) इत्यादिना परमेश्वर एव निखिलभुवनाधिपत्यमभ्यस्यते। 'एको हि रुद्रो न द्वितीयाय तस्थुर्य इमाँल्लोकानीशतईशिनीभिः' (श्वे० ३.२) इति रुद्रव्यतिरिक्तस्य जगदीश्वरत्वं निषिध्यते। 'विश्वाधिकोरुद्रः' (महाना० १०) इति विश्वाधिकत्वं च तस्यैव श्रूयते। अतो विश्वपतित्वादिलक्षणो नारायणात्मा परमेश्वर इति समीचीनम्।। ननु 'नारायणात्मा' इति

नारायणान्तर्यामी परमेश्वर इति हृदयम्। तदयुक्तं; 'नारायणपरं ब्रह्म' इति नारायणस्य परब्रह्मभावमुक्त्वा 'पद्मकोशप्रतीकाशम्' इत्यादिना पुरुषस्य हृदयपुण्डरीकस्थानमुक्त्वा 'तस्य मध्ये वह्निशिखा' इत्यादिना जीवस्वरूपमुक्त्वा 'तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः' इति परमात्मत्वेन जीवान्तर्यामित्वेन तस्योपास्यत्वमवगम्यते। 'स ब्रह्मा स' शिवः' इत्यदिना तद्विश्रूतित्वं ब्रह्मशिवादीनामुच्यते। अतो नारायण एव विश्वपतिः परब्रह्मभूतो जीवान्तर्यामित्वेनोपास्य इति तदात्मकत्वेन तदधिकत्वं तदुपास्यत्वं च परमेश्वरस्य वक्तुमयुक्तमित्यत आह-

।।सू।। कर्मकर्तृव्यपदेशात्।।४।।

कर्मत्वं कर्तृत्वं च व्यपदिश्यते तत्र ध्यातृध्येययोः परमेश्वरनारायणयोः कथं? 'पद्मकोशप्रतीकाशम्' इति प्रकृतस्य नारायणस्यैव हृदयमुच्यते 'परमात्मा व्यवस्थितः' इति परमेश्वर एव परमात्मा तदन्तर्वर्तितया ध्येयत्वेनोच्यते। ततो ध्यातृत्वेन नारायणस्य ध्येयत्वेन परमेश्वरस्य च कर्मत्वं कर्तृत्वं च व्यपदिश्यते। अतो नारायणादन्य एवोपास्यः परमात्मा। 'स ब्रह्मा स शिवः' इत्यादिना ब्रह्मविष्णुरुद्रेन्द्रादिप्रपञ्चविभूतिविशिष्टत्वं परमेश्वरस्योपदिश्यते। अत्र विष्णोरग्रहणेऽपि कैवल्योपनिषदि श्रूयते। 'हृत्पुण्डरीकं विरजम्' इत्यादिना हृदयपुण्डरीकं प्रस्तुत्य, 'उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्। ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात्। स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्। स एव विष्णुः स प्राणः स कालोऽग्निः।। (कैव)' इत्यादि। तन्यायोऽत्राध्याहार्यः। 'यो वै रुद्रः स भगवान् भूर्भुवःसुवर्यश्च ब्रह्मा तस्मै वै नमो नमः यश्च विष्णुः, यश्च महेश्वरः' इत्याद्यथर्वश्रुतिरपि द्रष्टव्या। अत्र विश्रूतित्वेन ब्रह्मशिवयोर्मध्ये विष्णोरग्रहणं परमेश्वरोपासकतया तस्य प्रस्तुतत्वादित्यविरोधः।। 'सहस्रशीर्षा पुरुषः' इत्यारभ्य प्रस्तुतस्य पुरुषस्य 'पादोऽस्य विश्वा भूतानि' इति निजैकांशजगद्विशिष्टत्वमुच्यते। 'सहस्त्रशीर्षं देवम्' इति स एवात्र नारायण इति बोध्यते। स चायं 'नारायणपरं ब्रह्म' इति ब्रह्मत्वेनोच्यते। ब्रह्मैव हि सर्वोपास्यम्। कथमस्य तथाभूतस्यान्यं प्रत्युपासकत्वमित्यत आह-

।।सू।। शब्दविशेषात्।।५।।

'नारायणपरं ब्रह्म' इति शब्दविशेष एव नारायणात् परमिति ब्रह्म प्रतिपादयति। अतो नारायणादन्यदेव परं ब्रह्मोपास्यम्। परब्रह्मणः सहस्त्रशीर्षत्वादिविशिष्टपुरुषरूपेण जगदुपादानत्वात्। परब्रह्मात्मकस्य तस्य जगदाकारत्वमिति वक्ष्यामः 'प्रकृतिश्च' (ब्र० २.१.२३) इत्यधिकरणे।।

नारायणस्योपासकत्वे प्रमाणान्तरमाह-

।।सू।। स्मृतेश्च।।६।।

'एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः। दर्शयामास पार्थाय परमं रूपमैश्वरम्।। (भ०गी११. ९) इति स्मृतेश्च महायोगस्वामिनो नारायणस्य परमेश्वरविषयो योगः समाधिरभिव्यज्यते। अत्र, 'अहं यथावदाराध्यः कृष्णेनाक्लिष्टकर्मणा। तस्मादिष्टतमः कृष्णादन्यो मम न विद्यते।।' इति अश्वत्थामानं प्रति परमेश्वरवचनं च। तस्मादन्यन्नारायणादुपास्यं परं ब्रह्म।। पुनरनुपपत्तिमाशङ्क्याह-

।।सू।। अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च।।७।।

'नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा। तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः।।' इति स्वल्पवह्निशिखान्तर्वर्तितया स्वल्पाश्रयत्वादल्पत्वव्यपदेशाच्चायं व्यापी न परमेश्वर इति चेत्-न, उपास्यत्वात् तथाव्यपदेशः; न स्वरूपाल्पत्वात् व्योमवत् स्वरूपमहत्त्वस्य सिद्धत्वात्- यथा घटादिषूपहितस्य व्योम्नस्तदुपाधिवशादल्पत्वं स्वरूपतो महत्त्वं च। ततो न विरोधः।। पुनराशङ्क्य परिहरति-

।।सू।। संभोगप्राप्तिरिति चेन्न वैशेष्यात्।।८।।

यदुक्तं 'नारायणपरं ब्रह्म' इति नारायणात् परं तदुपास्यं ब्रह्म, तदेव हि 'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षम्' इत्युच्यते। तत्र परमशक्त्युमाशबलाकारतया कृष्णपिङ्गलं कृशानुरेतस्कतया चोर्ध्वरेतस्कं, त्रिलोचनतया विरूपाक्षं, पुरि पूर्वोक्तदहरपुण्डरीके शेत इति पुरुषं, ऋतं सत्यं मनोवाग्विपर्यासरहितं परं ब्रह्म इति लक्षणम्। अतोऽस्य त्रिलोचनत्वादिलक्षणशरीर-संबन्धात् शरीरगतसुखदुःखादिसंभोगप्राप्तिरिति चेत्-न, वैशेष्यात्। सुखदुःखभोगहेतुभ्यो जीवशरीरेभ्यो ब्रह्मरूपस्यास्ति हि वैशेष्यम्; इच्छागृहीतत्वादस्य, तेषां कर्ममूलत्वाच्च। अत एव श्रूयते परमेश्वरः 'अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः' इति संसारिशरीरधर्मरहितत्वेन। न चैवं संसारी जीवः। अत एवाप्राकृतानि पापजरामरणशोकादिरहितानि स्वेच्छासंपादितानि लीलामङ्गरूपाणि परमेश्वरस्य 'स्थिरेभिरङ्गैः पुरुरूप उग्रः' इत्यादिषुः स्थिराणि नित्यानि विज्ञायन्ते। अतः परब्रह्मण परमेश्वरस्य जीवाद्वैशेष्यान्न तद्वच्छरीरादिगतदोषप्राप्तिः। अत्र खलूपक्रमादिभिर्लेङ्गैर्विरूपाक्षं ब्रह्म सर्वोत्कृष्टमुपास्यमिति युक्तमेव। तथा हि उपक्रमे-'अणोरणीयान्' (ऋ.सं. २.७.१७) इत्यादिना 'महिमानमीशम्' (महाना. १०.) इत्यन्तेन सकलजन्तुहृदयगुहावर्तित्वेन स्वप्रसादातिशयवीतशोकपुरुषदर्शनविषयत्वेन च महिमातिशयवानीशः प्रस्तुतः। पुनः 'सप्त प्राणाः प्रभवन्ति तस्मात्' (महाना. १०.) इत्यादिना स एव परमशक्तिमान् प्राणादिजगदुपादानत्वेन निरूपितः। ततश्च, 'यो देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिः। हिरण्यगर्भं पश्यत जायमानम्'

(महाना. १०) इति विश्वाधिकत्वेन सर्वज्ञत्वेन सकलकार्यप्रथमहिरण्गर्भजनकत्वेन च निमित्तभूतः परामृष्टः। स एव ततः 'परेण नाकम्' (महाना १०) इति पराकाशगुहावर्ती त्यक्तफलकमोनुष्ठायिनां वेदान्तात्पर्यवेदिनां यतीनां जितेन्द्रियाणां 'परामृतात्परिमुच्यन्ति' (महाना. १०.) इति परामृतरूपतया प्राप्तत्वेन वर्णितः। कस्तत्प्राप्तावुपाय इति प्राप्ते 'दहरं विपाप्मम्' (महाना. १०.) इति दहरपुण्डरीके यद्वस्तु तदुपास्यमिति सामान्येनोक्तम्। तत् किमित्याकाङ्क्षायां, 'यः परः स महेश्वरः' (महाना १०.) इति महेश्वराख्यं तदुपवर्णितम्। तत् किंरूपमित्याकाङ्क्षायां 'ऋतं सत्यम्' (महाना १०.) इत्यादिना विरूपाक्षत्वादिलक्षणरूपमित्युपसंहृतम्। तत्रावान्तरवाक्यसिद्धो नारायणः पूर्वाधिकरणन्यायादुपासकत्वेनान्वेतीति युक्तम्। अत्र सर्वेषामुपासनेऽधिकारस्य सद्भावेऽपि नारायणग्रहणमस्याधिक्यार्थम्। तदिहोपास्येन विरूपाक्षेण ब्रह्मणा तदुपासकस्य नारायणस्याभेदभावनया तद्धर्मैरस्य प्रतिपादनमुपारनस्य तदात्मन इति समीचीनम्।। इत्यनुपपत्त्यधिकरणम्।।२।।,

इति श्रीकण्ठभाष्यम् प्रथमं सर्वत्र प्रसिद्धाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

पूर्वोत्तरपादयोरर्थभेदप्रदर्शनपूर्वकं सङ्गतिं दर्शयति-**ब्रह्मबोधकवाक्यानामिति।** स्पष्टानतिस्पष्टब्रह्मलिङ्गवाक्यविषयत्वोक्त्या पादयोरर्थभेदश्चावसरसङ्गतिश्चेत्युभयं दर्शितम्। स्पष्टब्रह्मलिङ्गवाक्येष्वविचारितेष्वपि बहुषु सत्सु कथं तद्विचारं परिसमाप्य वाक्यान्तरविचार: प्रस्तूयत इत्याशङ्क्य न्यायसाम्येन शक्यार्थनिर्णयतया तेषां विचारितप्रायत्वमुक्तम्।।सू।। **सर्वत्र प्रसिद्धोपदेशात्**।।१।। 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत।' 'अथ खलु क्रतुमय: पुरुषो यथाक्रतुरस्ँमील्लोके पुरुषो भवति तथेत: प्रेत्य भवति स क्रतुं कुर्वीते' ति प्रकृत्य श्रूयते 'मनोमय: प्राणशरीर' इत्यादि। तत्र मनोमयादिशब्दानां पूर्वप्रस्तुतब्रह्मपुरुषान्यतरपरत्वानिर्धारणात् ब्रह्मपरत्वेऽपि ब्रह्मशब्दस्य शिवजीवान्यतरपरत्वानिर्धारणात् शिवपरत्वे'ऽप्युपासीत' 'क्रतुं कुर्वीते'ति वाक्यद्वयश्रुतोपासनैक्यभेदानवधारणाच्च संशयमाहअत्रेति। 'स क्रतुं कुर्वीते'ति तत्पदेन जीवपरामर्शिा समानाधिकरणानां तत्समानलिङ्गानां मनोमयादिपदानां तदन्वये सम्भवति विप्रकृष्टवाक्यान्तरश्रुतभिन्नलिङ्गब्रह्मान्वयकल्पनमयुक्तम्। न च तथा सति तेषामुपासक-विशेषणत्वापत्त्या 'स आत्मानं मनोमयं प्राणशरीरं भारूपमाकाशात्मानं कामरूपिणं मनोजवसं सत्यसङ्कल्पं सत्यधृति सर्वगन्धं सर्वरसं सर्वा अनुदिश: प्रभूतं सर्वमिदमभ्यात्तमवाकमनादर 'मित्यग्निरहस्यगतसमानप्रकरणवाक्यविरोध:। कस्य क्रतुमिति प्रतिसम्बन्ध्याकाङ्क्षायां' मन्तधौं येनादर्शनमिच्छंति (पा०१-४-२८-सू.) इत्यत्रेवान्तरङ्गत्वात् स्वात्मन इति लभ्यते। स्वात्मा चोक्तमनोमयत्वादिविशेषणविशिष्टो बुद्धिसन्निहित इति तेषामिहोपासकविशेषणत्वेऽप्यर्थादुपास्य-विशेषणत्वपर्यवसानादित्याशयेन पूर्वपक्षयति-**जीव इति।** स्यादेतत्। 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीते'त्यत्र विहितां ब्रह्मोपासनामनूद्य तत्र गुणमात्रविधायकं 'स क्रतुं कुर्वीते'त्यादिवाक्यं न तु गुणविशिष्टकर्मविधायकम्। अग्निहोत्रविधिसन्निहितदध्यादिवाक्यवत्तत्र गुणमात्रविधिसम्भवे विशिष्टविधिगौरवाङ्गीकारायोगात्। तथा चोत्पत्तिशिष्टब्रह्मावरुद्धायामुपासनायां जीवस्योपास्य-त्वेनान्वयायोगात् न तदन्वयो मनोमयत्वादीनामुपास्यगुणानां किं तु तेषां ब्रह्मान्वय एव युक्त:। ननु तत्राप्युत्पत्तिशिष्टसार्वात्म्यावरोधान्मनोमयत्वाद्यन्वयो न सम्भवति। न च

सार्वात्म्यमुपासनाविधिवाक्यस्थं न सम्भवति। सर्वं खल्विदं ब्रह्म तज्जत्वादिहेतुनेति खलुशब्दकृतेन प्रसिद्धवन्निर्देशेन 'तज्जला'नित्यन्तस्योपासनविध्येकवाक्यत्वानिवारणात् किं तु शान्त्युपायप्रदर्शकवाक्यान्तरगतमनस्सार्वात्म्यं तत्र नोपास्यगुण इति शङ्क्यम्। उपासनविध्याकाङ्क्षया ब्रह्मण इव तद्‌गुणस्याप्यन्यार्थसन्निधानत एव ग्रहणोपपत्तेरिति चेत्। मैवम्। एकस्यामुपासनायां स्वतन्त्रोपास्यद्वयाभावादेकोपास्यावरुद्धायामुपास्यान्तरान्वयासम्भवेऽप्येकस्मिन्नुपास्ये बहुगुण-वैशिष्ट्योपासनसद्भावादेकगुणावरुद्धेऽप्युपास्ये तदविरुद्धगुणान्तरान्वयोपपत्तेः। नन्वस्त्वेवं तथाप्यत्र नोत्पत्तिशिष्टगुणावरोधः। उपक्रमे जीवोपासनाया एव विधानात्। हेयपशुपक्षिसरीसृपादि-सर्वात्मत्वस्यानादिसंसारभाजि जीव इव निर्दोषे ब्रह्मण्यसम्भवेन 'इदं ब्रह्मागच्छती'त्यादिश्रुत्यन्तरेषु जीवेऽपि ब्रह्मशब्दप्रयोगदर्शनेन चात्र ब्रह्मशब्दस्य जीवपरत्वादिति चेन्न। तस्य प्रसिद्धिप्राचुर्येण यौगिकार्थपौष्कल्येन 'गायत्री वा इदं सर्व'मित्यारभ्य 'ब्रह्मप्रकरणानुवृत्त्या चात्र ब्रह्मपरत्वस्यैवोचित्वात्। ब्रह्मणस्सार्वात्म्यं सर्वशरीरत्वं न तु तत्तादात्म्यमिति हेयतादात्म्येन न तस्य दोषवत्त्वप्रसङ्गः। शरीरगतदोषाणां शरीरिण्यप्रसङ्गादिति द्वितीयाध्याये समर्थयिष्यमाणत्वेनात्र ब्रह्मणि सार्वात्म्यानुपपत्तिशङ्कानवकाशाच्च। प्रत्युत यस्य जीवस्य यावन्ति शरीराणि तावदात्मत्वमेव तस्य न त्वसङ्कुचितं सर्वात्मत्वमिति जीव एव सार्वात्म्यानुपपत्तेः स्पष्टत्वाच्च तथाभूतस्य सङ्कुचितसार्वात्म्यस्यान्यत्र द्वेषादिवर्जनरूपशान्तावनुपयोगेनात्र तद्‌ग्रहणानुपपत्तेश्च। तस्मादुत्पत्तिशिष्टब्रह्मावरुद्धायामुपासनायामुपास्यत्वेनानन्विते जीवे मनोमयत्वादीनामुपास्य-गुणानामन्वयासम्भवात्तेषामुपास्यब्रह्मान्वय एव युक्त इत्याशङ्कानिराकरणार्थमाह-**मनोमयत्वेति।** अयमाशयः। यद्यपि मयटो विकारप्राचुर्याद्यनेकार्थसाधारण्यात् 'प्राणश्शरीरमस्ये'ति वचनस्य येन केन चित्सम्बन्धेन निर्वोढुं शक्यत्वाच्च नियन्तृत्वादिरूपमनःप्राणसम्बन्धवति ब्रह्मण्यपि 'मनोमयः प्राणशरीर'इत्येतद्योजयितुं शक्यम्। तथापि मनःप्राणसम्बन्धप्रतिपादने तदभावप्रतिपादन इव तयोर्जीवेन सहोपकरणोपकरणीभावलक्षणसम्बन्ध एव लोकवेदयोः प्रसिद्धतरो ग्राह्यः। न तु ब्रह्मणा सह तयोरप्रसिद्धसम्बन्धः। प्रसिद्धसम्बन्धे प्रथमं बुद्ध्यवतारात्। अत एव ख'ल्वप्राणो ह्यमना'इति ब्रह्मणि मनःप्राणनिषेधो झटिति स्वारस्येनैव बुद्धिमारोहति न तु घटवति भूतले घटाभाववद्भूतलमित्याप्तवाक्यमनुपपन्नतया शङ्कितं सत्समवायसम्बन्धेन घटाभाववत्त्वपरमित्युप-पादनमिवा'प्राणो ह्यमना'इति श्रुतिवाक्यं नियन्तृत्वादिसम्बन्धेन मनःप्राणवति ब्रह्मणि कथमप्राणत्वममनस्त्वं चेत्यनुपपन्नार्थतया शङ्कितं सद्भोगोपकरणोपकरणीभावेन मनःप्राणाभाववत्त्व-परमित्युपपादनमपेक्षते। न च वाच्यं मनःप्राणयोर्जीवसम्बन्धप्रसिद्धावपि मनोमयप्राणशरीरशब्दौ 'मनोमयः प्राणशरीरनेता' 'य एषोऽन्तर्हृदय आकाशस्तस्मिन्नयं पुरुषो मनोमय' इत्यादिश्रुतिषु ब्रह्मण्येव प्रसिद्धौ, अतोऽर्थानुसन्धानात्पूर्वमेव बुद्धिस्थया शब्दप्रसिद्ध्या तयोर्ब्रह्मपरत्वसिद्धौ तत्र

सम्भवति मन:प्राणसम्बन्धे पर्यवसानं स्यादिति। श्रुत्यन्तरेष्वपि प्रसिद्धसम्बन्धानुसारेण तयोर्जीवपरत्वमपेक्ष्यैव तद्द्वारा ब्रह्मणि पर्यवसानात् इह प्रथमं बुद्धिस्थस्य जीवस्य ग्रहणे सम्भवति तमतिलङ्घ्य तद्द्वारा ब्रह्मणि पर्यवसानकल्पनाया: 'त्रि: प्रथमामन्वाह त्रिरुत्तमा'मिति विहितस्य सामिधेन्यभ्यासस्य प्रथमप्रतीतस्थानधर्मत्वमतिलङ्घ्य तद्द्वारा प्रवोवाजीयादिऋग्धर्मकल्पना-वदयुक्तत्वात्। न चात्रोपरितनसत्यसङ्कल्पत्वादिब्रह्मलिङ्गानुसारेण तथाकल्पनं युक्तमिति शङ्क्यम्। 'सत्यसङ्कल्प'इत्यस्य सति ब्रह्मण्यसङ्कल्प: सङ्कल्परहित इति जीवे व्याख्यातुं शक्यत्वा'त्सर्वकर्मा सर्वकाम'इत्यादेर्जीवे पर्यायेणोपपत्ते: युगपद्ब्रह्मण्यप्यसम्भवात् 'एष आत्मान्तर्हृदये' 'ज्यायान्दिव'इत्यादे'रेषम आत्मान्तर्हृदयेऽणीयान्व्रीहेर्वा यवाद्वे'त्यादिपूर्ववाक्यश्रुताणीयस्त्वानुसारेण मुक्तिकालभाविविचिच्छक्तिव्याप्तिविषयत्वोपपत्ते:। एवं ज्यायस्त्ववचनमारभ्य भाव्यवस्थाविषयत्वे सत्येव तदनन्तरश्रुतस्य 'सर्वकर्मा सर्वकाम: सर्वगन्ध:'इत्यादेर्मुक्त्यवस्थाभावि-विशुद्धसर्वकामत्वादिविषयत्वेनापौनरुक्त्यं लभ्यते। एवं च 'एतमित: प्रेत्याभिसम्भवितास्मी'ति प्राप्यप्राप्तृभावनिर्देशोऽपि साधकफलावस्थाभेदेन सङ्गच्छते। तस्मान्मनोमयत्वादिगुणानां प्रथमवाक्योपक्रान्तब्रह्मान्वयित्वे वाक्यशेषश्रुतमनोमयत्वप्राणशरीरत्वाणीयस्त्वलिङ्गसमानविभक्तिक जीवपरतत्पदमनोमयादिपदसमभिव्याहारात्मकवाक्यरूपबहुप्रमाणानुसारेण तत्तदुपरितनसत्यसङ्कल्प-त्वज्यायस्त्वादिलिङ्गवदुपक्रमगतापि ब्रह्मश्रुतिर्भाविविचिच्छक्तिव्याप्त्यभिप्राया जीवे योजनीया। तदभिप्रायैव हि मनोमयादिवाक्यशेषे ज्यायस्त्वोक्त्यनन्तरमेव तद्ब्रह्मेति श्रुतिरपि नेया। एवं 'सर्वं खल्विद'मित्युक्तं सार्वात्म्यमपि भाव्यवस्थाविषयत्वेन योजनीयम्। अस्ति हि मुक्तस्य सर्वसांसारिकभोग्यभोक्तृत्ववर्गाधिष्ठानसामर्थ्यलक्षणं सार्वात्म्यम्। अत एव तस्य पूर्वाधिकरणे विश्वाकारपराहम्भाव उक्त:। अत एव च बृहदारण्यके 'यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्त'इति ब्रह्मविद्याफलत्वेन 'सर्वमेधो दशरात्रो राजा यजेत य: कामयेत सर्वमिदं भवेय'मित्यादिषु सर्वमेधादिविधिषु मोक्षपर्यवसाय्यन्त:करणशुद्ध्यर्थकर्मफलत्वेन च सार्वात्म्यं श्रूयत इति। अथोच्येत जीवस्य सार्वात्म्यमात्रसम्भवेऽपि 'सर्वं खल्विदं ब्रह्म तज्जला'निति जन्मादिकारणत्वप्रयुक्ततयात्र श्रूयमाणं निरङ्कुशं सार्वात्म्यं न सम्भवति। अत: परमेव ब्रह्मात्र ब्रह्मशब्दोक्तमिति तत्राह-**सर्वथेति।** यदि मनोमयत्वादीनामव्यवहितनिर्दिष्टजीवान्वय: यदि वा व्यवहितनिर्दिष्टब्रह्मान्वय: ब्रह्मशब्दश्च यदि जीवपर: यदि वा परब्रह्मपर: सर्वथापि मनोमयत्वादिगुणको जीव इत्यर्थ:। अत्रायमाशय:। प्रथमपक्षाश्रयणे द्वितीयपक्षेऽपि ब्रह्मशब्दस्य जीवपक्षाश्रयणे चोक्तसाध्यसिद्धौ न किञ्चिद्वक्तव्यमस्ति। तृतीयपक्षाश्रयणेऽपि नोत्पत्तिशिष्ट: ब्रह्मावरोधो दोष:। मनोमयत्वादिगुणकस्य जीवस्योपासनान्तरान्वयाङ्गीकारात्। न हि सर्वात्मब्रह्मोपासनानुवादेन मनोमयत्वाद्यनेकगुणविधानं सम्भवति। विद्वद्वाक्यश्रुतयागानुवादेनेव अष्टाकपालादिद्रव्याणामग्न्यादिदेवतानां च विधानम्। यदाहु:।

'प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः। अप्राप्ते तु विधीयेरन्बहवोऽप्येकयत्नत' इति। अत उभयत्राप्युपासनाद्वयं विधीयत इति युक्तम्। 'त्रिवृदग्निष्टुदग्निष्टोमस्तस्य वायव्यास्वेकविंशमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो यजेत' 'एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेते'ति वाकयद्वय इव यागद्वयम्। न चानेकगुणश्रवणयुक्तवाक्य एवोपासनाविधाने सति 'सर्वं खल्वि'त्यादौ तदनुवादेन तदङ्गशम-मात्रविधिरस्त्विति वाच्यम्। तावता सर्वात्मकस्य ब्रह्मण उपास्यत्वासिद्धेर्विधीयमान-शमोपायप्रदर्शकार्थवादे तच्छ्रवणस्यान्यार्थत्वाद्वाक्यप्रमाणान्वितमनोमयत्वादिगुणकजीवो-पासनायामपि शमगुणविधिसम्भवात्। शतपथब्राह्मणेऽग्निरहस्ये 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीते' ति स्थाने 'सत्यं ब्रह्मेत्युपासीते' ति सत्यत्वविशिष्टब्रह्मोपासनां विधाय 'अथ खलु क्रतुमयोऽयं पुरुषः स यावत्क्रतुरयमस्माल्लोकात्प्रेत्यैवंक्रतुरिहामुं लोकं प्रेत्याभिसम्भवती'ति तत्क्रतुन्यायप्रदर्शनपूर्वकं 'स आत्मानमुपासीते'त्यादिना मनोमयत्वादिगुणकविद्याप्रपञ्चनेनात्रापि स्थानप्रमाणबलात्सर्वात्मत्वविशिष्टब्रह्मोपासनाविधानप्रतीतेश्च। न च तथापि क्वचित्सत्यत्वमुपास्यविशेषणमन्यत्र सार्वात्म्यमिति रूपभेदादैकार्थ्यालाभः। सत्यशब्दस्य 'सच्च त्यच्चाभव'दितिश्रुत्युक्तरीत्या परोक्षापरोक्षात्मकसर्वप्रपञ्चभावरूपसार्वात्म्यपरत्वोपपत्तेः। न च तथा सति 'सर्वं खल्वि'त्यादौ मनोमयत्वादिगुणकविद्योपास्ये सार्वात्म्यगुणमात्रविधिरस्तु। शान्तग्रहणं 'शान्तो दान्त उपरत'इत्यादिश्रुत्यन्तरविहितशमानुवादकं भविष्यति। तथा च तज्जलत्वादिहेतुकसार्वात्म्यस्य जीवेऽनुपपत्तेः मनोमयत्वादिगुणकोपासना ब्रह्मोपासनैव पर्यवस्येदिति वाच्यम्। तथापि सार्थवादस्य शमस्यापि विधेयत्वावश्यंभावेन तत्प्रयुक्तानेकगुणविध्यपरिहारात्। न च तर्हि 'स क्रतुं कुर्वीते'त्यत्र मनोमयत्वाद्युपास्यगुणविधानं माभूत्तच्छब्दनिर्दिष्टोपासक-विशेषणस्य'एतभितः प्रेत्याभिसम्भवितास्मी'ति तत्क्रतुन्यायानुसन्धानमात्रस्य तदङ्गत्वेन विधानमस्त्विति शङ्कनीयम्। तथा सति मनोमयत्वादिगुणकीर्तनवैयर्थ्यप्रसङ्गात् अग्निरहस्यब्राह्मणानुसारेण तेषामुपास्यगुणत्वावश्यम्भावाच्च। अतः क्रतुवाक्येऽप्युपासनान्तर-विधानावश्यंभावे सति तत्रोपासकात्मैव प्रागुक्तन्यायैरुपास्यत्वेनान्वेति न तु विध्यन्तरान्वितं ब्रह्म। अतस्स एव मनोमयत्वादिगुणक इति युक्तम्। एवं सति मनोमयत्वादिस्वारस्यमप्युपपद्यते। अथोच्यते मनोमयत्वं प्राणशरीरत्वं च न प्राकृतमनःप्राणोपकरणकत्वरूपं ग्राह्यम्। किंत्वीश्वरस्य मुक्तानां च निरतिशयानन्दानुभवसाधकं यन्मनस्तत्प्रधानत्वं मनोमयत्वम्। प्राणयन्तीतिव्युत्पत्त्या प्राणशब्दोक्तजीवनियन्तृत्वं प्राणशरीरत्वम्। अनुपदप्रदर्शिततत्क्रतुन्यायानुगुण्येन तयोरहेयगुणरूपत्वेन योजनीयत्वात्। ततश्च 'सत्यसङ्कल्प' इत्यादेरपि क्लिष्टयोजनाया अकर्तव्यत्वात्

बलवदनेकब्रह्मलिङ्गविरुद्धसामानाधिकरण्यरूपं वाक्यं बाधित्वा मनोमयत्वादीनां पूर्वोपासनोपास्यत्वेन प्रकृते ब्रह्मण्यन्वयोऽभ्युपगन्तुं युक्तः। पुल्लिङ्ग'मेष म आत्मे'तिविशेष्यान्तरसत्त्वादुपपद्यते। अनेकगुणविधानं तद्विशिष्टोपासनान्तरविधानादुपपद्यते। अणीयस्त्वं ज्यायसोऽपि हृदयावच्छेदादुपपद्यत इति। तत्रेदं वक्तव्यम्। यथा मनोमयत्वं प्राणशरीरत्वं च तत्क्रतुन्यायानुगुण्येन मुक्तेश्वरसाधारणं व्याख्येयं तथैव सत्यसङ्कल्पत्वादिकमपि व्याख्येयम्। न तु ब्रह्मासाधारणनित्याविर्भूतसत्यसङ्कल्पत्वादिरूपं तद्व्याख्येयम्। तेष्वपि तत्क्रतुन्यायानुरोधस्यावश्यकत्वात्। तथा च लिङ्गानां जीवेश्वरसाधारणत्वेन तद्विरोधाभावाद्वाक्यं न बाध्यमिति वाक्यबलान्मनोमयत्वादीनामुपासकजीवविशेषणत्वमेव युक्तमिति। एवं च यदि ब्रह्मलिङ्गतस्तदधिकरणोदाहृतविषयवाक्यानां जीवपरत्वनिरासेन ब्रह्मपरत्वनिर्णयोऽप्याक्षिप्तो भवेत् भवत्विति पूर्वपक्षाभिप्रायः। मनोमयत्वादिगुणक इत्यध्याहृतपक्षे परमेश्वर इत्यनुवृत्तसाध्यं योजयित्वा सूत्रं तत्र हेतुसमर्पकत्वेन व्याचष्टे-**परमेश्वर एवेत्यादिना।** अनेन सौत्रहेतुरित्थं व्याख्यातः। सर्वत्र सर्वेषु वेदान्तेषु प्रसिद्धस्य सर्वप्रपञ्चजन्मादिकारणत्वहेतुकसार्वात्म्यवत्तया विश्रुतस्य परस्य ब्रह्मण उपदेशात् 'सर्वं खल्वि'त्याद्युपक्रमे उपास्यत्वेन प्रतिपादनादिति। अनेन हेतुना प्रकृतसाध्यसिद्धिमुपपादयिष्यन्नेव सिद्धिपरिहारार्थमुपक्रमवाक्यार्थमाह-**श्रुतितात्पर्यमिति।** जायत इति जम्। लीयत इति लम्। उभयत्र डप्रत्ययः। अनिति जीवतीत्यन्। क्विप्प्रत्ययः। जलानिति निम्नोन्नतवद्विशेषणसमासः। तस्य तदिति ब्रह्मपरामर्शिना सर्वनाम्ना तत्तदुचितसम्बन्धपर्यवसायिनि सम्बन्धसामान्ये षष्ठीसमास इत्यभिप्रेत्य तज्जलानिति पदं व्याचष्टे-ब्रह्म। खलुशब्देन ब्रह्मणस्सर्वप्रपञ्चजन्मस्थितिलयकारणत्वहेतुकं सार्वात्म्यं सकलवेदान्तप्रसिद्धमित्येतत् द्योत्यत इति दर्शयितुं भिन्नक्रमतया तस्य योजनम्। प्रसिद्धं खल्वेतद्बहुभवनसङ्कल्पादिप्रतिपादकेषु वेदान्तवाक्येषु। ननु ब्रह्मणस्सर्वप्रपञ्चजन्मादिकारणत्वेऽपि कथं सर्वप्रपञ्चात्मकत्वम्। ब्रह्मप्रपञ्चयोरान्तर्गणिकभेदाङ्गीकारादित्याशङ्क्य दृष्टान्तेन तदुपपादयति-**यथेति।** ननु तर्हि सागरवद्ब्रह्मणः परिणामित्वं स्यादित्याशङ्क्याह-**शक्तिमतीति।** यथा सागरे पवनादिसङ्क्षोभ्योपरितनपरिणामः वीचीफेनबुद्बुदप्रपञ्चः एवं ब्रह्मणि तदिच्छासङ्क्षोभ्यमाणतदाश्रितशक्तिपरिणामः सर्वोऽयं प्रपञ्च इति भावः। अयं विशेषोऽत्रैव प्रकरणे समाम्नातेनाकाशात्मनेति विशेषणेन लब्धः। परमाकाशरूपायाश्चिच्छक्तेरधिष्ठातेति तदर्थः। ननु भेदे सत्येव कथं तदतिरिक्तानुपलम्भ इत्याशङ्क्य तथोपनिषदि व्यवहारो दृश्यत इत्याह-**तथाहीति।** अथर्वशिरसि भूतवर्तमानभविष्यदात्मकसकलप्रपञ्चरूपत्वं तद्व्यतिरिक्ताभावं चोक्त्वा परमेश्वरस्य प्रपञ्चानुप्रवेशस्तत्र हेतुत्वेनोक्तः। अनुप्रवेशस्तत्कर्मकर्तृभेदापेक्ष इति भेदे सत्येव ताद्रूप्यतदव्यतिरेकव्यवहारो दृष्ट इत्यर्थः। ननु महदेतदिन्द्रजालं सत्येव भेदे ताद्रूप्यं तदव्यतिरेकश्चेति

तत्राह-**अतइति। अपृथक्सिद्धेति।** ब्रह्मापेक्षया पृथग्भूतेऽन्यत्र वस्तुनि सिद्धा ब्रह्मणः पृथक्सिद्धा। अतथाभूतस्थितिक्रियाव्यापारत्वादित्यर्थः। अनेन नाभेदस्ताद्रूप्यं न वा भेदो व्यतिरेकः किं तु घटनैल्यन्यायेनायुतसिद्धिस्ताद्रूप्यं युतसिद्धिर्व्यतिरेक इत्युक्तं भवति। ननु तथापि चिच्छक्तिपरिणामस्य प्रपञ्चस्य चिच्छक्त्यैवापृथक्सिद्धिस्स्यात् न तु परमेश्वरेरेणेत्याशङ्क्य चिच्छक्तेः परमेश्वरापृथक्सिद्धत्वात्कार्यस्य तदात्मकस्य प्रपञ्चस्यापि तदपृथक्सिद्धिरित्यभिप्रेत्य चिच्छक्तेः परमेश्वरापृथक्सिद्धौ प्रमाणमाह-**तथाभियुक्ता इति। शक्तय इति।** जगत्कृत्स्नमस्य परमेश्वरस्य शक्तयः तदीयशक्तिपरिणामभेदाः। महेश्वरः शक्तिमान्। नित्ययोगे मतुप्। नित्यानपायिशक्तिकः। अत एव भगवती शक्तिः शक्तिमदीश्वरस्वरूपाव्यतिरेकं पृथक्सिद्धिं न वाञ्छति नानुमन्यते। किं तु चन्द्रचन्द्रिकान्यायेन ब्रह्मापृथक्सिद्धैव भवति। विष्णुपुराणेऽप्येवमुक्तम्। 'एकदेशस्थितस्येन्दोर्ज्योत्स्ना विस्तारिणी यथा। परस्य ब्रह्मणश्शक्तिस्तथैवमखिलं जगत्। तत्राप्यासन्नरूपत्वबहुत्वस्वल्पतामयः। ज्योत्स्नाभेदोऽस्ति तच्छक्तेस्तद्वन्मैत्रेय विद्यते। ब्रह्मविष्णुशिव ब्रह्मन्प्रधाना ब्रह्मशक्तयः। ततो देवाश्च मैत्रेय न्यूना यक्षादयस्ततः। ततो मनुष्याः पशवो मृगपक्षिसरीसृपाः। न्यूना न्यूनतराश्चैव वृक्षगुल्मादयस्ततः' इति। अत्र परस्य ब्रह्मण इति न विष्णुरुच्यते। ब्रह्मविष्णुशिवा इति तस्य ब्रह्मशक्तिमध्ये पाठात्तदनन्तरं 'सर्वशक्तिमयं विष्णोस्स्वरूपं ब्रह्मणोऽपर'मिति विष्णुं प्रकृत्य 'स परस्सर्वशक्तीनां ब्रह्मणस्समनन्तर' इति तस्य सर्वेषां ब्रह्मविष्ण्वादीनां ब्रह्मशक्तीना मध्य उत्कर्षस्य ब्रह्मापेक्षया परत्वस्य चोक्तेः। किं तु 'अत्ता चराचरग्रहणा(ब्र॰ १-२-१० सू॰) दित्यधिकरणे त्रिमूर्त्यत्तीर्णः सेत्स्यन्परमशिवः परमेश्वर उच्यते। 'सर्वासामेव शक्तीनां ब्रह्मविष्णुशिवात्मकाः। प्रधानांशास्स्मृता देवाः शक्तयः परमात्मनः। आभ्यः परस्ताद्भगवान्परमात्मा सनातनः। गीयते सर्वशक्त्यात्मा शूलपाणिर्महेश्वरः॥' इति कूर्मपुराणवचनैकार्थ्यात्। एवमनयोर्वह्निदाहकशक्त्योरिव नित्यं तादात्म्यं नित्य आश्रयाश्रयिभावः। यस्मादेवं शक्तिशक्तिमतोरभेदः घटपटन्यायेन स्वतन्त्रपृथगवस्थानरूपभेदाभावः सर्वदा स्थितः, अतः परमेश्वरस्य तया शक्त्या धर्मिणः घटत्वादिधर्मवन्नित्यपरतन्त्रधर्मवत्त्वात् सा परा शक्तिः परमात्मन एव कदाचिदपि नान्यस्य। नापि स्वतन्त्रा। न हि वह्नेर्दाहिका शक्तिः कदापि तदन्याश्रितत्वेन वा ततः पृथक्सिद्धा वा विभाव्यत इत्यर्थः। **शक्त्यादीति।** शक्तिराद्याया नित्यसिद्धायाश्शक्तेराद्य उन्मेशः 'प्रज्ञा च तस्मात्प्रसृता पुराणी'ति प्रसिद्धः। पृथिवी 'अद्भ्यः पृथिवी'ति श्रवणात्तत्वेषु चरमकार्यभूता भूमिः। तत्र 'मृदा कुम्भादिकं यथे'त्यनेन मृद्धटन्यायेन शक्तिकार्यस्य कृत्स्नस्यापि प्रपञ्चस्य परमेश्वरापृथक्सिद्धिर्दर्शिता। एवं सकलप्रपञ्चाकारपरिणामिनी परमाकाशपरमानन्दरूपा पराशक्तिरपृथग्भावेन परब्रह्माश्रितेति दर्शितम्। कथमेवंभूता परब्रह्मभिन्ना सा 'यद्वैतद्ब्रह्मे'ति 'इदं वाव

तद्योऽयं बहिर्धा पुरुषादाकाश आनन्दो ब्रह्मे'त्यादिश्रुतिषु ब्रह्मेति व्यपदिश्यत इत्याकाङ्क्षायां परब्रह्मणः परब्रह्मत्वं सर्वज्ञत्वसर्वकारणत्वाद्युपलक्षितं ज्ञानक्रियाशक्त्याद्यनन्ताकारविजृम्भ णशालिन्यां तस्यामेवायत्तमित्यन्तरङ्गत्वेनाभेदोपचारात्सापि तथा व्यपदिश्यत इति प्रदर्शयितुं तस्या एव ज्ञानक्रियाशक्त्याद्यनन्तशक्तिरूपत्वे प्रदेशान्तरस्थं वायुसंहितावचनमुदाहरति-परेति। अस्य परमेश्वरस्य। विविधा विविधाकारविजृम्भणक्षमा। परा उत्कृष्टा। प्रबोधानन्दरूपिणी प्रकृष्टो बोधः प्रकाशः समन्तात्प्रकाशमानः परमाकाशः आनन्दः 'स एको ब्रह्मण आनन्द'इत्युक्तो निरतिशयानन्दः तद्रूपिणी शक्तिर्वस्तुत एकैव सती ज्ञातव्येष्टव्यकर्तव्यस्रष्टव्यपालनीय-संहार्यबद्धव्यानुग्राह्यादिप्रतियोगिभेदात् ज्ञानेच्छाक्रियासृष्टिपालनसंहारतिरोधानानुग्रहशक्त्याद्यनन्ता-कारेण भाति। 'एका सती बहुधोषो व्युच्छस्यजीर्णा त्वं जरयसि सर्वमन्य'दिति श्रुतेः। यथैकैव भानोः प्रभा तदपृथक्सिद्धा मण्डलरूपेण त्रैलोक्यं व्याप्य स्थिता द्रावणीयशोषणीयदहनीयजतुजलतूलादिप्रतियोगिभेदाद्द्रावणशोषणदाहतापस्फोटशक्त्याद्यनन्ताकारेण व्यपदिश्यते तद्वदित्यर्थः। अत्रार्थे मूलश्रुतिमुदाहरति-**परास्येति।** अत्र शक्तिरित्येकवचनादौपाधिकं विविधत्वमिति स्पष्टम्। एतदौपाधिकमेव विविधत्व'मेक एव रुद्र'इत्यादिश्रुतिषूच्यत इत्याशयेनोदाहरति-**एक इति।** अस्यास्सर्वप्रकारेण परब्रह्मोपकारकत्वमाक्षेपालङ्कारेण दर्शयति-**किं बहुनेति। सकलेति।** सकलचिदचित्प्रपञ्च एव महाविभूतिः परब्रह्मणः महदैश्वर्यम्। **महासंविदिति।** महच्छब्दस्संविदादिषु त्रिष्वपि सम्बध्यते। ततश्च 'तस्य भासा सर्वमिदं विभाती'तिश्रुतेस्सकलप्रपञ्चावभासकमहासंविद्रूपा 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'तिश्रुतेस्सकलप्रपञ्चवैषयिकानन्दशीकरनिकरसमुद्रायमाणपरमानन्दरूपा। 'तथा हि तां समाश्रित्य सन्तोऽन्ये सा स्वतस्सती'ति शिवशास्त्रोक्तरीत्या 'घटस्सन्पटस्स'न्नित्यादिरूपेण सर्वप्रपञ्चानुविद्धमहासत्तारूपा चेत्यर्थः। ननु 'स्वरूपं च गुणश्चे'ति कथमभिन्नत्वेन गुणैकरूपत्वादित्याशङ्क्याह-**तव्द्यतिरेकेणेति।** ब्रह्म हि स्वमात्रप्रकाशज्ञप्तिरूपं निर्विकारम्। तस्य सर्वज्ञत्वसर्वकारणत्वादिकं शक्त्यपेक्षमित्यर्थः। सर्वगतत्वं व्यापकत्वम्। तदपि व्यापकस्वभावशक्त्यायत्तम्। एवं प्रभारूपायाश्शक्तेर्व्यापकत्वाभावे प्रभावतः परब्रह्मणः तामतिलङ्घ्य देशान्तरव्यापनायोगात्। यद्वा। सर्वगतत्वं सर्वत्रगतिमत्त्वम्। प्रसिद्धं हि पूजायामावाहनविसर्जनकालयोर्हृदयद्वादशान्तादिस्थानेषु गतिमत्त्वं परब्रह्मणश्शिवस्य कामिकादिवचनेषु। प्रसिद्धं च भक्तानुजिघृक्षया तत्रतत्र गतिमत्त्वं 'पिनाकं विभ्रदागही'त्यादिश्रुतिषु। सर्वमिदं स्वतो गतिरहितस्य शक्तिपरिणामविशेषोपाधिकमचिन्त्यशक्तियोगात्स्वाभाविकमेवेति समर्थनीयम्। अतएव कामिके 'सर्वगस्य शिवस्येह कथमावाहनं प्रभो। यद्यावाहनमिष्टं स्यात्सर्वगत्वं विहन्यते।।' इति पृष्टवत ऋषीन्प्रति परमेश्वरेण 'आमूलाग्रस्थितस्याग्नेरभिव्यक्तिर्यथा तरौ। तद्वदेकत्र

चिच्छक्तिर्व्यापकस्य न बाध्यते।' इत्येकं पक्षमुक्त्वा पुनः पक्षद्वयमुक्तम्। 'यथात्मनस्तनुद्वारा स्यातामिह गमागमौ। तद्वन्मन्त्रतनुद्वारा शिवस्येष्टौ गमागमौ। अचिन्त्यशक्तियुक्तत्वाद्व्यापकोऽ-व्यापकश्च सः। सतनुस्तनुभिन्नो वा सर्वकृत्सर्वगश्शिवः॥' इति। अतस्तस्य गतिमत्त्वमपि शक्त्यधीनमेव समर्थनीयमिति भावः। अभिधेयत्वं चेति। नामप्रवृत्तिनिमित्तगुणानां शक्त्यधीनत्वादिति भावः। एवं परब्रह्मणस्सकलचेतनाचेतनवैलक्षण्यप्रयोजकषडङ्गदशाव्ययादिनिखिल- मङ्गलगुण-निर्वाहिका शक्तिः। अतस्तामनपेक्ष्य परब्रह्मणस्स्वरूपमित्येव वक्तुं नार्हमित्यभिप्रेत्य प्राक् 'स्वरूपं चे'त्युक्तम्। तथैव वेदान्तेष्वपि तदैक्योपदेश इति तात्पर्यम्। ननूक्तरीत्या ब्रह्मणस्स्वापृथक्सिद्धशक्तिपरिणामभूतसर्वप्रपञ्चजन्मादिकारणत्वहेतुना तदपृथक्सिद्धिमात्रं सिद्ध्यति न तु सर्वात्मत्वम्। न च तदेवात्र पारिभाषिकं सर्वात्मत्वं विवक्षितमिति वाच्यम्। तावता ब्रह्मभिन्नप्रपञ्चपरयोरिदंसर्वशब्दयोर्ब्रह्मणि प्रवृत्तेरनिर्वाहात्प्रपञ्चब्रह्मनियम्यत्वावगतिमात्रस्य शान्ति-हेतुत्वासम्भवाच्चेत्याशङ्क्याह-**तथा चेति**। ब्रह्मणस्सर्वकारणत्वहेतुना सर्वानुप्रवेशस्तावत्सिद्ध्यति। 'तत्सृष्ट्वा तदेवानुप्राविश'दिति श्रुतेः। ततस्सर्वनियन्तृत्व सिद्ध्यति। 'अन्तःप्रविष्टः शास्ता जनाना'मिति श्रुतेः। ततः सर्वशरीरत्वं सिद्ध्यति। 'यः पृथिव्यां तिष्ठ'न्नित्यन्तर्यामिब्राह्मणे नियम्यस्य पृथिव्यादेः सर्वस्याऽपि प्रपञ्चस्य नियन्तृशरीरत्वश्रवणात्। इदमेव जगज्जन्मादिकारणत्वहेतुना परम्परया सिद्ध्यत्सर्वशरीरत्वमिह सर्वातमत्वं विवक्षितम्। इदं च 'सर्वमिदं ब्रह्मे'ति समानाधिकरणनिर्देशस्य तावदुपपादकं भवत्येव।' 'ब्रह्मणो विद्वान्' 'ब्राह्मणो बृहस्पतिसवेन यजेते'त्यादिलौकिक- वैदिकव्यवहारेषु शरीरवाचिशब्दानां शरीरिपर्यन्तत्वदर्शनादिति भावः। स्यादेतत्। शरीरवाचिना शरीरिपर्यन्तत्वमसिद्धम्। तथानुशासनाभावात्। लौकिकवैदिकव्यवहारयोश्शरीरात्मभ्रम-सिद्धार्थावलम्बनत्वोपपत्तेः। अस्ति च भ्रमसिद्धार्थावलम्बनो वैदिकव्यवहारः 'उत्ताना वै देवगवा वहन्ती'त्यादिः। तथा च पर्यायेण सुरनतिर्यगादिसर्वदेहेष्वात्मभ्रमवति जीव एव 'सर्वं खल्विदं ब्रह्मे'त्ययं भ्रमसिद्धसार्वात्म्यनिर्देश उपपद्यते न तु परब्रह्मणि सर्वशरीरकत्वमात्रवति तत्तादात्म्यभ्रमरहित इत्याशङ्क्याह यथेति। स्वस्य स्वीयस्य स्वाभिधेयस्य नीलस्येत्यर्थः। स्यादेतत्। गुणवचनेभ्यो मतुब्लोपो वक्तव्य'इति व्याकरणानुसाराल्लुप्तमतुबन्तो नीलशब्दो नीलमुत्पलमिति नीलविशिष्टद्रव्यपरः प्रयुज्यते न केवलः। व्याकरणानभिज्ञानां तु गुणगुणिनोरभेदभ्रमेण नीलशब्दस्य नीलविशिष्टे शक्तिभ्रमेण तत्र लाक्षणिकत्वाभिप्रायेण गुणगुणिनोरभेदोपचारेण वा नीलमुत्पलमिति व्यवहार इत्यसिद्धं नीलशब्दस्य नीलविशिष्टद्रव्यवाचकत्वम्। 'घटस्य नीलं रूपं' 'तद्वा यदेतदादित्यस्य लोहितं रूप'मित्यादिलौकिकवैदिकप्रयोगानुसारेण नीलादिशब्दनां गुणमात्र-शक्त्यवश्यंभावे तयैवोक्तरीतिभिश्चरितार्थतया गुणविशिष्टे शक्त्यन्तरकल्पनायोगात्। ननु, तादृशेषु

प्रयोगेषु विशिष्टशक्तानां नीलादिपदानां केवले गुणे लक्षणास्त्विति चेन्न। तथासति 'अरुणयैकहायन्या गवा सोमं क्रीणाती' त्यत्रारुणापदमुख्यवृत्त्यनुसारेणारुण्यविशिष्टद्रव्यस्य क्रयसाधनत्वापत्त्या तत्र गुणद्रव्ययोः प्रत्येकं तुल्यवत्क्रयसाधनत्वेनान्वय इति पूर्वमीमांसकप्रवादसिद्धारुणाधिकरणन्यायविरोधापत्तेः। ननु, पूर्वमीमांसकानां तथाप्रावादसद्भावेऽपि किंचिद्रव्यगतमारुण्यं किंचिद्वर्णमेकहायनीद्रव्यं च क्रयसाधनमिति न तेषां मतं किं तु शब्दान्वयवेलायां गुणद्रव्ययोः प्रत्येकं क्रयसाधनत्वप्रतीतावप्यमूर्तस्यारुण्यस्य द्रव्यपरिच्छेदद्वारं विना साक्षात्क्रयसाधनत्वायोगेन परिच्छेद्यद्रव्यान्वयाकाङ्क्ष्यार्थसिद्धेन पार्ष्ठिकेन समभिव्याहृतैकहायनीद्रव्यान्वयेनारुण्यविशिष्टमेकहायनीद्रव्यं च क्रयसाधनमित्येव तेषामभिमतम्१। तथा च फलतो विशेषाभावादर्थैकत्वे 'द्रव्यगुणयोरैककर्म्यान्नियमस्स्या' (जै॰ ३.३.१५.) दित्यरुणाधिकरणसूत्रमारुण्यविशिष्टद्रव्यस्य क्रयसाधनत्वविषयतयैव व्याख्यायताम्। अर्थैकत्वे 'अरुणयैकहायन्ये' त्यारुण्यविशिष्टद्रव्यैकहायनीद्रव्यवाचिपदयोस्सामानाधिकरण्येनार्थैकत्वे सिद्धे सति द्रव्यगुणयोररुणयेति पदेनैव विशेषणविशेष्यभावेन संसृष्टयाभिहितयोः क्रयाख्यैककर्मान्वयाविरोधादरुणिम्नः क्रयसाधनभूतैकहायन्यन्वयनियमः स्यादिति। अनेनेत्थं पूर्वपक्षशङ्का निरस्ता भवति। एकहायनीद्रव्यस्य क्रयसम्बन्धविधायकेनैव वाक्येनारुण्यसम्बन्धोऽपि विधातुं तु शक्य इत्यरुणयेत्यनेन पृथग्वाक्यभूतेन प्राकरणिकसकलकरणान्वय्यारुण्यं विधीयत इति नात्र शङ्कनीयम्। न ह्यारुण्यस्य द्रव्यमात्रसम्बन्ध एकहायनीद्रव्यसम्बन्धे वा क्रयसम्बन्ध इव वाक्यव्यापारापेक्षास्ति। अरुणापदेनैव गुणविशिष्टद्रव्यवाचकेनारुण्यस्य द्रव्यमात्रसम्बन्धसिद्धेः 'अरुण्यैकहायन्ये'ति पदद्वयसामानाधिकरण्येन एकहायनीद्रव्यसम्बन्धसिद्धेश्च। यथा'रक्तःपटो भवती'त्यत्र रागगुणस्य रक्तपदेनैव द्रव्यमात्रसम्बन्धे पटपदसामानाधिकरण्येन पटरूपद्रव्यविशेषसम्बन्धे च सिद्धे सति वाक्यं रक्तपदस्य भवनसम्बन्धमात्रे व्याप्रियत इति रागस्य विवक्षितभवत्पटस्य सम्बन्धनियमस्सिद्ध्यति। एवमिहाप्यारुण्यस्य क्रयसाधनैकहायनीसम्बन्धनियमस्सिद्ध्यतीति तस्माद्गुणवाचिशब्दानां द्रव्यपर्यन्ततायां नास्त्यरुणाधिकरणन्यायविरोधात इति चेत्स्यादेतदेवं यद्येकहायनीवाक्यसङ्घटनभात्रपरिहार्योऽयं विरोधः स्यात्। नत्वेवमरुणाधिकरणसमर्थितस्य समानविभक्त्यन्तपदनिर्दिष्टयोरपि द्रव्यगुणयोः परस्परसम्बन्धं विना वैयधिकरण्येन क्रियाविशेषणतयान्वयनियमस्यानङ्गीकारे ह्यन्यत्रानिष्टं प्रसज्यते। अन्यथा दशमे 'प्राजापत्यो नैवारश्चरुस्सप्तदशशरावो भवति'ति वाजपेयप्रकरणविहितायामिष्टौ 'चतुरो मुष्टीन्निर्वपती'ति प्रकृतौ विहिते चतुर्मुष्टिनिर्वापेऽतिदेशतः प्राप्ते चतुर्भिर्मुष्टिभिस्सप्तदशशरावपरिमाणचरुद्रव्यानिष्पत्तेः सङ्ख्यामुष्ट्यन्यतरलोपेऽवश्यकर्तव्ये मुष्टीनां साक्षान्निर्वापक्रियाङ्गानां प्रधानगुणत्वाच्चतुस्सङ्ख्याया

मुष्टिविशेषणभूताया अङ्गगुणत्वात् अङ्गगुणस्य प्रधानगुणेन विरोधे 'अङ्गगुणलोपस्याङ्गगुणविरोधे च तादर्थ्या'दित्यधिकरणनिर्णीतत्वात्सङ्ख्यालोप इत्येवं 'मुष्टिलोपात्तु सङ्ख्यायास्तद्गुणत्वा'दिति (जै॰) सूत्रेण पूर्वपक्षं कृत्वा सङ्ख्यामुष्ट्योरुभयोरपि परस्परान्वयं विना क्रियाशेषत्वेनान्वयात् समप्राधान्येन गुणप्रधानभावकृतविशेषाभावे च मुख्यानुग्रहस्य 'मुख्यं वा पूर्वचोदनाल्लोकव'दित्यधिकरणे निर्णीतत्वात् सङ्ख्यानुग्रहो मुष्टिलोपश्चेत्येवं 'न निर्वापशेषत्वा'दिति (जै॰-)सूत्रेण सिद्धान्तितम्। अत्र हि गुणशब्दानां द्रव्यपर्यन्तवाचकत्वाभ्युपगमे पूर्वपक्षन्यायो दृढो भवेत्। तस्मात्तेषां गुणमात्रवाचित्वमङ्गीकृत्यैवारुणाधिकरणन्यायः प्रवर्तनीयः। आकृत्यधिकरणन्यायेन गुणशब्दः गुणमात्रवचनः। तथापि 'अरुणः पटो भवती'त्यादिकारकविभक्तिरहितप्रयोगेषु पटादिपदसामानाधिकरण्यबलाल्लक्षणया द्रव्यपर्यन्तो भवति। न चेहापि पिङ्गाक्ष्येकहायनीपदसामानाधिकरण्यवशाद्द्रव्यपर्यन्तताभ्युपगन्तव्या। बलवत्या करणकारकाभिधायिन्या विभक्तिश्रुत्या प्रातिपदिकार्थस्यारुण्यस्य कारकत्वरूपे क्रियाविशेषणत्वेऽभिधीयमाने तद्विहाय द्रव्यपरपदसामानाधिकरण्यरूपवाक्यप्रमाणमवलम्ब्य 'द्रव्योपसर्जनकत्वकल्पनायोगा'दिति (जै॰) सूत्रमपि वार्तिकादिप्रदर्शितप्रकारेणैव व्याख्यातव्यम्। 'अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाती'त्येतावताऽर्थैकत्वरूप एकवाक्यत्वे प्रतीयमाने तदनुसारेण द्रव्यगुणयोः पिङ्गाक्ष्येकहायनीपदोक्तस्य द्रव्यस्य अरुणापदोक्तस्य गुणस्य च नियमः स्यात्। परस्परान्वयनियमो न भवेत्। कुतः। ऐककर्म्यादेककार्यत्वात्क्रयरूपैकक्रियासाधनत्वादिति यावत्। गुणद्रव्ययोर्हि विभक्तिश्रुतिभिरभिधीयमानं क्रियासामान्यशेषत्वं विशेषाकाङ्क्षायां समभिव्याहृतक्रीणातिपदसमर्पितक्रयात्मकैकक्रियाशेषत्वरूपं पर्यवस्येत्। ततश्च गुणस्य साक्षात्क्रियां साधयितुमसमर्थस्य द्रव्यपरिच्छेदरूपद्वाराकाङ्क्षया द्रव्यस्य परिच्छेदकगुणाकाङ्क्षया चार्थिकेन पार्ष्ठिकान्वयेनान्योन्यान्वयनियमः पर्यवस्येदिति। एवं चामूर्तस्यारुण्यस्य क्रयसाधनत्वायोगात् अरुणयेत्येतदगत्या वाक्यभेदेन प्राकरणिककरणभूतसकलद्रव्यान्वयीति पूर्वपक्षशङ्कापि निरस्ता भवतीति। एवमरुणाधिकरणन्यायसिद्धावेव तदवलम्बनः सङ्ख्यामुष्ट्यधिकरणन्यायः प्रवर्तते। तस्माद्गुणमात्रवाचिनो नीलादिशब्दा भवन्तु वा ते द्रव्यपर्यन्ताः। तावता प्रकृते का सङ्गतिः। न हि तावता विशेषणवाचिनः सर्वेशब्दास्तद्विशिष्टधर्मिपर्यन्ता इति नियमस्सिद्ध्यति। दण्डादिशब्देषु स्वात्मविशिष्टपुरुषाद्यनभिधायिषु व्यभिचारात्। न च विशेषणतैकस्वभाववाचिनां तथा नियमः। प्रपञ्चस्यापि ब्रह्मविशेषणत्वनियमासिद्धेः। 'ब्रह्म सर्वात्मभूत'मिति व्यवहारे तद्विशेषणस्यापि प्रपञ्चस्य 'सर्वं ब्रह्मणी' त्यादिव्यवहारे तद्विशेष्यत्वस्य ब्रह्मानवगाहिलौकिकव्यवहारे स्वातन्त्र्यस्य च दर्शनात्। न चापृथक्सिद्धधर्मवाचिना तथा नियमः। हस्तादिशब्दानां शरीरपर्यंतत्वादर्शनात् आत्मवियुक्तस्य शरीरस्य शोषणविशरणादिदर्शनेनात्मापृथक्सिद्धेरिव शरीरवियुक्तानां हस्तादीनामपि

तद्दर्शनेन शरीरापृथक्सिद्धेस्सिद्धयविशेषात् देहादिशब्दानामात्मपर्यन्तत्वादर्शनाच्चेत्याशङ्क्याह- **तस्मादिति।** अयमाशय:। नीलादिशब्दास्तावद्गुणविशिष्टद्रव्यस्यापि वाचका:। नीलमुत्पलमित्यादिसमानाधिकरणव्यवहारदर्शनात्। न च मतुब्लोपात्तन्निर्वाह:। मतुब्लोपानुशासनस्य हि मतुब्लोपेनैव द्रव्याभिधानमिति नाभिप्राय:। शब्दाभावस्य शब्दकार्यकारित्वाभावात्। नापि लुप्तेन स्मृतेन मतुपा तदभिधानमिति तदभिप्राय:। मतुब्लोपस्य · सिद्धशब्दान्वाख्यानार्थं वैयाकरणकल्पितत्वेन वस्तुतस्तत्र लुप्तस्य मतुपोऽभावात्। तस्मान्मतुब्लोपानुशासनेनापि नीलादिशब्दानां गुणविशिष्टद्रव्यवाचकत्वमेव सिद्य्धति। मतुबश्रवणे तल्लोपानुशासनबलात् तदर्थप्रत्ययावश्यंभावेच सति नीलादिशब्दानामिव तज्जनकत्वपर्यवसानात् किमर्थं तर्हि मतुब्लोपानुशासनम्। समानाधिकरणव्यवहारादेव हि नीलादिशब्दानां गुणविशिष्टद्रव्यवाचकत्वं सिद्धयति। उच्यते। सन्ति नीलादिशब्दा: केवलगुणवाचका अपि। 'घटस्य नीलो गुण' इत्यादिव्यधिकरणव्यवहाराणामपि दर्शनात्। तथा च यथा गुणविशिष्टद्रव्यवाचिनां नीलादिशब्दानां निष्कृष्टगुणपरत्वविवक्षायां नैल्यं नीलत्वं नीलिमेति भावप्रत्यय: तथा तेषां निष्कृष्टगुणवाचिनां द्रव्यपरत्वविवक्षायां मतुप्प्रत्ययोऽपि भवेत्। दृश्यते हि पुण्यपापादिशब्दाना 'मयं पुरुष: पुण्य: अयं पाप:' 'अस्य पुण्यमस्य पाप' मित्यादिद्विविधव्यवहारदर्शनात् धर्माधर्मादिमात्रवाचकत्वेन तद्धर्मिपर्यन्तत्वेन च द्विविधानां धर्माधर्ममात्रवाचकानां धर्मिपर्यन्तत्वविवक्षायां पुण्यवान्पापवानित्यादिर्मतुबन्तव्यवहार:। तथात्रापि तत्प्राप्तौ तव्द्यावृत्त्यर्थं मतुब्लोपानुशासनम्। तेन द्रव्यपर्यन्ता एव नीलादिशब्दा: द्रव्येषु प्रयोक्तव्या:। गुणमात्रपर्यवसायिनोऽप्यभेदोपचारविवक्षायां प्रयोक्तव्या:। यथा-'साक्षान्नीलगुण एवेयं वनिता नीलमेवेय'मिति कदापि गुणमात्रपर्यवसितानां द्रव्यपर्यन्तत्वविवक्षायां मतुबन्तप्रयोगो नास्तीति सिद्धयति। वार्तिककृताऽपि 'गुणवचनेभ्यो मतुपो लु'गित्यनुशासनानन्तरमिदमेव तस्य प्रयोजनमुक्त'मव्यतिरेकात्सिद्धमिति चेद्दृष्टोऽव्यतिरेक'इति। अत्राव्यतिरेक: अव्यभिचार:। ततश्च शुक्लादिशब्दैरभिधीयमानानां गुणानां गुण्यव्यभिचारात् गुणिना सहैवाभिधानात् शुक्लादिशब्दशक्त्यैव गुण्यभिधानसिद्धेर्मतुब्लोपानुशासनं व्यर्थमिति शङ्का। 'वस्त्रस्य शुक्ल' इति गुणाभिधानस्य गुणिव्यभिचारो दृष्ट:। अत: केवलगुणाभिधायकशब्दस्य द्रव्यपर्यन्तत्वविवक्षायां ततो मतुपि प्राप्ते लुगनुशासनमिति परिहार:। एतेन नीलादिशब्दा गुणमात्रवाचिन एव। अभेदोपचारावलम्बनस्तु 'नीलमुत्पल'मित्यादि समानाधिकरणनिर्देशो 'नीलमेवेय'मितिनिर्देशवदित्यपि शंका निरस्ता। गुणविशिष्टद्रव्यवाचिनां नीलादिशब्दानां भावे गुणवाचिनां नीलिमादिशब्दानामनिष्पत्तिप्रसंगात्। गुणवाचिभ्यो भावप्रत्ययोत्पत्तौ हि तेषां गुणगतधर्मवाचित्वमेव स्यात्। न तु गुणवाचित्वम्। एतेनैवाभेदभ्रमशक्तिभ्रमाभ्यां समानाधिकरणनिर्देशनिर्वाहोऽप्यपास्त:। न चायमभ्रान्तव्यवहारसाधारणो निर्वाह:। ननु तथापि

गुणमात्रवाचकानां नीलादिशब्दानां तद्विशिष्टेषु द्रव्येषु लक्षणया समानाधिकरणव्यवहारः सम्भवति। तत्सम्भवे च न तेष्वपि शक्त्यन्तरं कल्पनीयम्। गौरवात्। एवं च लक्षणानियमार्थं मतुब्लोपानुशासनम्। लक्षणीयपरनीलादिशब्दाद्भावप्रत्ययेन नीलिमादिशब्दनिष्पत्तिरिति सर्वं सङ्गच्छते। अरुणाधिकरणन्यायश्चैवं समञ्जसो भवति। धर्मिण्यपि शक्त्यङ्गीकारे ह्यरुणाशब्दस्य पिङ्गाक्ष्येकहायनीशब्दसामानाधिकरण्यस्वारस्येन धर्मिपरत्वशङ्का प्रसज्यते। उच्यते। स्यादेतदेवं यदि नीलादिशब्दानां विषयशक्त्यङ्गीकारे गौरवं स्यात्। न त्वेवं तदनङ्गीकार एव गौरवम्। तथा हि-तेषां गुणगुण्युभययशक्तिपक्षे गुणमात्रशक्तिपक्षे च गुणगतो नीलत्वादिरेव प्रवृत्तिनिमित्तम्। किं त्वाद्यपक्षे साक्षात्परम्परया वेति विशेषमनपेक्ष्य यत्रयत्रापृथक्सिद्धाश्रये नीलत्वादिकं वर्तते तत्र सर्वत्रापि नीलादिशब्दप्रवृत्तौ तन्निमित्तं भवति। द्वितीयपक्षे तु यत्र साक्षादपृथक्सिद्धाश्रये वर्तते तत्र तत्प्रवृत्तौ निमित्तमिति विशेषणीयम्। अतोऽत्र गौरवं स्पष्टमेव। ततश्च लाघवानुगृहीतप्रमाणसिद्धया साक्षात्परम्परया साधारणगुणगतनीलत्वाद्याश्रयविषययैकयैव शक्त्या गुणशब्दानां गुणगुण्यभयवाचकत्वे सत्यरुणवाक्ये गुणिपरिग्रहे विभक्तेः शब्दसाधुत्वमात्रार्थतया वैयर्थ्यं स्यात्। गुणिगतकरणकारकत्वस्य समानाधिकरणपदान्तरगततृतीयाविभक्तिलब्धत्वात्। न च गुणपरिग्रहेण तद्गतकरणकारकत्वार्थतया सार्थकत्वे सम्भवति वैयर्थ्याङ्गीकारो युक्तः। न च द्रव्यैकपरपिङ्गाक्ष्येकहायनीपदगतविभक्तिद्वयवदरुणापदगतविभक्तावनन्यगतिकत्वमस्ति। अरुणापदस्य गुणार्थपरिग्रहेण तत्सार्थकत्वसमर्थनसम्भवादिति न्यायमालोच्य तस्य गुणार्थपरिग्रहः कृतः। तथा च यत्र गुणशब्दे गुणार्थपरिग्रहलभ्य (फल) तृतीयादिकारकविभक्तिश्रवणमस्ति तत्र तदर्थवत्त्वाय पदान्तरसामानाधिकरण्यमनादृत्य गुणार्थपरिग्रहः। यत्र तन्नास्ति 'पिशङ्गी पष्ठौही दक्षिणा' यस्योभावग्नी अनुगता' वित्यादौ तत्र श्रुतसामानाधिकरण्यानादरहेत्वभावात् गुण्यर्थपरिग्रह इति सर्वमुपपद्यते। अनया दिशा शरीरवाचिनो देवमनुष्यब्राह्मणादिशब्दा अपि आत्मपर्यन्ताः। न च तथा सति शरीरादिशब्दानामप्यात्मपरता स्यादिति वाच्यम्। तत्प्रवृत्तिनिमित्तस्य शरीरत्वस्य साक्षात्स्वापृथक्सिद्धाश्रय एव प्रवृतिनिमित्तत्वात्। देवमनुष्यादिशब्दानामिव तेषामात्मपर्यंत-प्रयोगाभावेनातिप्रसंगवारणार्थं साक्षात्त्वविशेषणस्यापेक्षितत्वात्। अत एव रूपरसादिशब्दानां द्रव्यपर्यन्तत्वं हस्तादिशब्दानां शरीरपर्यन्तत्वं वा नास्ति। तत्रापि व्यवहारानुसारेण साक्षात्त्वविशेषणापेक्षणात्। न च क्वचित्तदनपेक्षणमात्रेण सर्वत्र तदनपेक्षणं भवति। अपत्यशब्दस्य साक्षात्परम्परासाधारण्यने जन्यचेतनवृत्तित्वेऽपि पुत्रशब्दस्य साक्षाज्जन्यचेतन एव वृत्तिदर्शनात्। तस्मान्नीलादिशब्दानां द्रव्यपर्यन्तत्वदर्शनात् तद्रीत्या प्रपञ्चशब्दानामपि ब्रह्मपर्यन्तत्वं युक्तम्। 'नीलो घट' इत्यादिवत् 'सर्वो वै रुद्र' इत्यादिप्रयोगदर्शनेन तेषां नीलादिशब्दसमानत्वात्। नन्वनुपदमेवोक्तं 'रूपरसादिशब्दाः शरीरादिशब्दाः हस्तादिशब्दाश्च साक्षात्स्वप्रवृत्तिनिमित्ताश्रयस्यैव वाचका' इति।

तथा च सर्वे शब्दा नीलारुणदेवमनुष्यादिशब्दसमाना न भवन्तीति कथं नीलादिशब्दरीत्या सर्वे शब्दा ब्रह्मवाचकाः सिद्ध्येयुः। सत्यम्। येषां शब्दानां स्वप्रवृत्तिनिमित्ताश्रयमात्रे शक्तिः सम्भवति तेषु नीलादिशब्दन्यायोपन्यासः येषां शक्तौ तदाश्रये साक्षात्त्वविशेषणमपेक्षितं तेषां ब्रह्मवाचकत्वं न नीलादिशब्दन्यायने सिद्ध्यति। किंतु 'सर्वो वै रुद्र' इत्यादिसामानाधिकरण्यं बहुभवनसङ्कल्पो नामरूपव्याकरणमिति प्रमाणैः सिद्ध्यति। अत एव भाष्ये 'तस्मात्सर्वशब्दवाच्यत्वं ब्रह्मण'इति नीलारुणादेवमनुष्यादिशब्दानामपृथक्सिद्धस्वाश्रयसामान्यवाचित्वात् ब्रह्मणः सर्वशब्दवाच्यत्वं प्रसाध्यापि निर्णीतस्य हेतोरव्यापित्वमालोच्य ''सर्वो वै रुद्र'' इत्यादय उपपादयन्ती''ति व्यापकानि हेत्वन्तराण्युपन्यस्तानि। एवं च रूपादिशब्दानां साक्षात्स्वाश्रय एव शक्तिरिति व्यवस्था नीलादिशब्दशक्तिवत् तस्याः घटादिपर्यन्तत्वं माभूदिति तन्मात्रव्यावर्तनार्थेति न तथा नामरूपव्याकरणश्रुत्यादिसिद्धा ब्रह्मणशशक्तिर्व्यावर्त्यत इति सर्वं समञ्जसम्। एवमुपपादितं 'सर्वं खल्विदं ब्रह्मे'ति वाक्यस्य विवक्षितमर्थमुपसंहरति-**तत इति।** तद्वाक्यार्थस्य शान्तावुपयोगमाह-**ततो ब्रह्मस्वरूपत्वादिति।** यतः प्रपञ्चो ब्रह्मशरीरमतः प्रसिद्धतदीयदिव्यविग्रहवत्तस्य पूज्यत्वेन द्वेषतत्प्रयुक्तनिग्रहाद्यनर्हत्वात्ततो निवृत्तस्सन् ब्रह्मोपासीतेति। यद्यप्युपासनाकर्मत्वेन ब्रह्म न श्रूयते, तथाप्युपासनस्य कर्माकाङ्क्षायां शान्तिहेतूपदेशवाक्ये सन्निहितं सर्वात्मकं ब्रह्मैव तत्कर्मत्वेनान्वेति। अत एव समानप्रकरणे वाजसनेयके 'सत्यं ब्रह्मेत्युपासीते'ति श्रूयत इति भावः। ननु नामरूपव्याकरणश्रुत्याद्यनुसारेण नीलादिशब्दशक्त्यनुसारेण च सर्वशब्दवाच्यं ब्रह्म, ततः 'सर्वं खल्विदं ब्रह्मे'ति निर्देशश्चोपपद्यतां नाम; न तु ब्रह्म सर्वशरीरकम्। सर्वस्य द्रव्यगुणकर्मादिरूपस्य प्रपञ्चस्य शरीरत्वासम्भवात्। द्रव्यैकरूपं हि शरीरम्। नापि सर्वद्रव्यशरीरकं ब्रह्मेति युक्तम्। हस्तपादादिसंस्थानविशेषरहितानां काष्ठलोष्टादीनां शरीरत्वासम्भवात्। ननु, मनुष्यपशुपक्षिसरीसृपतरुगुल्मलतादिसकलशरीरसाधारणस्यैकस्यानुगतस्य संस्थानविशेषस्याभावात् संस्थानविशेषकृतं न शरीरलक्षणं, किं तु यस्य यद्द्रव्यं सर्वात्मना धार्यं नियम्यं शेषभूतं वा तत्तस्य शरीरमिति तल्लक्षणम्। अतः प्रपञ्चस्य ब्रह्मशरीरत्वमुक्तलक्षणयोगाद्युक्तमिति चेन्मैवम्। सर्वात्मनेत्यस्य धार्यत्वादीनां तदेकप्रतिसम्बन्धित्वमर्थ इत्यन्ययोगव्यवच्छेदपरत्वाङ्गीकारे परमेश्वरस्यापि धार्यनियम्यशेषभूतास्मदादिशरीरेष्वव्याप्तेः। यावदवस्थानं तद्धार्यत्वादिनियमस्तदर्थ इत्ययोगव्यवच्छेदपरत्वाङ्गीकारेऽपि तेष्वव्याप्तेः। स्वप्नसमये शरीरान्निष्क्रान्तस्य मूर्छादशाया-मत्यन्ताक्षमस्य च जीवस्य शयाने शरीरे तद्धार्यत्वनियम्यत्वतच्छेषत्वाभावात्। धार्यत्वादि-योग्यताविवक्षायां चैत्रशरीरस्य मैत्रादीन्प्रत्यपि शरीररत्वापत्तेः। सर्वेषामपि हि सर्वं शरीरं सर्वदा धार्यत्वादियोग्यमेव। परशरीरानुप्रवेशादिधारणहेत्वाद्यसमवधानात् परं तद्धारणाद्यभावः। तत एव पिशाचः परशरीरमनुप्रविष्टः तद्धारयति स्वाभिमतकार्येषु नियच्छति तत्प्रयुक्तसुखभोगेन तच्छेषि

च भवति। भृतिग्रहणदानादिभिश्च परे परशरीरस्य धारयितारो नियन्तारश्शेषिणश्च भवन्ति। संस्कारद्रव्यसंयोजनपूर्वकं हस्तेन धृत्वाग्नौ प्रतापनेन निष्पादितेषु तत्कालमेव भक्षितेषु भक्ष्यविशेषेष्वतिव्याप्तेश्च। नैतानि लक्षणानि शरीरस्य। चैत्रप्राणाः तद्वता चैत्रेण धार्यन्ते प्राणायामक्रियासु च नियम्यन्ते प्राणायामप्रयुक्तव्याधिनिवृत्त्यादिफलभाजस्तस्य शेषाश्च भवन्ति। न चैते तस्य शरीराणीति व्यवह्रियन्ते। प्राणेन्द्रियादिषु तत्तदभिमानिदेवतानामहमभिमानविषयतया शरीरभूतेष्वव्याप्तेश्च। प्राणेन्द्रियादयो हि प्राकृतसर्गोत्पन्नाः प्राकृतप्रलयपर्यन्तावस्थायिनः। न च तदधिदेवतानां प्रतिमन्वन्तरं नवनवानां मध्ये का चिदपि देवता यावत्प्राणेन्द्रियाद्यवस्थानं तेषां धारयित्री नियन्त्री शेषीभूता वास्ति। अतो नास्ति तल्लक्षणं येन काष्ठलोष्टादिकमपि शरीरत्वेन सङ्गृह्येत। तस्मात्प्रपञ्चस्य ब्रह्मशरीरत्वायोगात् 'यस्य पृथिवी शरीर'मित्यादिव्यपदेशस्य तन्नियम्यत्वमात्रेणौपचारिकत्वात्प्रपञ्चस्य ब्रह्मशरीरत्वेन द्वेषाद्यनर्हतया शान्तस्सन्नुपासीतेति वाक्यार्थवर्णनं न सङ्गच्छत इत्याशङ्क्य शरीरलक्षणप्रदर्शनेनोक्तवाकयार्थोपपादकं वायुसंहितावचनमुदाहरति-**तथा हीति।** विग्रहमिति छान्दसो लिङ्गव्यत्ययः। अनेन श्लोकेन सामान्यतः सर्वपपञ्चस्य परमेश्वरशरीरत्वं दर्शितम्। द्वितीयश्लोकेन विशिष्य चेतनाचेतनात्मकस्य तस्य तच्छरीरत्वं दर्शितम्। तस्य द्वितीयार्धे 'रूपमेव न सन्देह' इत्युक्त्या प्रपञ्चस्य तच्छरीरत्वं मुख्यमेव न त्वौपचारिकमिति दर्शितम्। तदुपपादनार्थं शरीरलक्षणसूचनपूर्वकं प्रपञ्चे तदनुगतिं 'विश्वं तस्य वशे यत' इत्युक्त्या दर्शिता। अनेन वश्यत्वरूपं नियम्यत्वं शरीरलक्षणमिति सूचितम्। स्वामिनियम्यभृत्यादिष्वतिव्याप्तिवारणार्थं यो यद्व्यापनेन नियच्छति तत्तस्य शरीरमिति तल्लक्षणं विशेषणेन परिष्कर्तुं द्वितीयार्धे विभोरिति विशेषणेन तस्य स्वनियम्यप्रपञ्चव्यापकत्वमुक्तम्। तदभिप्रायेणैव तत्र नामाष्टकनिर्वचनप्रकरणेऽप्युक्तम्। 'शिवतत्त्वादिभूम्यन्तं पृथिव्यादि घटादि च। व्याप्याधितिष्ठति शिवस्तस्माद्विष्णुरुदाहृतः॥' इति॥ स्वामी भृत्यासंस्पृष्टस्तं नियच्छति नाविको नावमारुह्य नियच्छन्नपि तदेकदेशे वर्तते। कृत्रिमव्याघ्रः पुमान् व्याघ्राकृतिदारुचर्मादियन्त्रमनुप्रविश्य नियच्छन्नपि न तद्व्याप्याधितिष्ठति। हस्तपादादिकं वियुक्तावस्थापन्नं कदाचित्प्रेरणादिनाधितिष्ठन्नपि व्याप्य नाधितिष्ठतीति न तेष्वतिव्याप्तिः। परस्परसंयोगविशेषरूपावस्थाविशेषापन्नं तु हस्तपादादिकं शरीरमेवेति तस्य लक्ष्यत्वात् तत्र नातिव्याप्तिः। प्राणेन्द्रियवर्गस्यापि लिङ्गशरीरान्तर्गतत्वेन लक्ष्यत्वात्तत्रापि नातिव्याप्ति। संसारिणश्चिच्छक्तिव्याप्त्या स्वशरीरे नियम्यप्रदेशानधिष्ठायैव नियच्छन्ति। मुक्ताश्चिच्छक्तिव्याप्त्यैव विश्वमधिष्ठाय नियच्छन्तीति न क्वाप्यव्याप्तिः। इदं च जगज्जन्मादिब्रह्मलक्षणवत् कादाचित्कमुपलक्षणतया लक्षणं, न विशेषणतया। अतस्सुषुप्तशरीरस्य शरीरत्वापत्तिरिति दोषस्य नावकाशः। न चैवं सति मुक्तौ यावदधिष्ठास्यति चैत्रस्तावतस्तं प्रति संसारावस्थायामपि शरीरत्वापत्तिर्दोषः। इष्टापत्तेः। अत एव मनुष्यादिशरीरमात्रविषय-

परिच्छिन्नाहंभावस्य भ्रान्तिरूपत्वं भाष्ये तत्रतत्राविष्कृतम्। इदमेव शरीरलक्षणं सूचयितुं 'यः पृथिव्यां तिष्ठ'न्नित्याद्यन्तर्यामिब्राह्मणे परमेश्वरस्य पृथिव्यादिषु बहिरन्तश्च व्याप्तिदर्शनपूर्वकं पृथिव्यादेस्तन्नियम्यत्वमुक्तम्। एवं परमेश्वरस्य सर्वप्रपञ्चशरीरकत्वे लक्षणमुखेन सिद्धे साधुष्विवासाधुष्वपकारिष्वपि परमेश्वरशरीरत्वभावना द्वेषनिग्रहबुद्ध्यादित्यागोपयोगिनी कार्येति 'सत्ये साधौ चे'ति गाधारूपेणश्लोकेन दर्शितम्। एव प्रपञ्चपरमेश्वरयोः शरीरशरीरिभावे सति यथा परमेश्वरः पूजया तुष्यति एवं प्रपञ्चानुग्रहेण परमेश्वरस्तुष्यतीति सूचयितुं 'वृक्षस्य मूलसेकेने'ति श्लोकेन दृष्टान्तांश उपन्यस्तः। लिङ्गपुराणादिषु परमेश्वरमूर्त्यष्टकपरिगणनप्रकरणे 'भूम्यम्भोऽग्निमरुद्व्योमभास्करा दीक्षितश्शशी'ति विशिष्य यज्वनां परिगणनात् तव्द्यतिरिक्तचेतनानां परमेश्वरशरीरत्वं नास्तीति यज्वस्वेव परमेश्वरशरीरत्वभावनया द्वेषनिग्रहादिबुद्धिस्त्यक्तव्येति शङ्कावारणार्थ 'मात्मा तस्याष्टमी मूर्ति'रिति श्लोकेन सर्वचेतनानां तच्छरीरत्वं विशिष्य दर्शितम्'। अनेनैव श्लोकेन मूर्त्यकष्टमध्ये विशिष्य भूतानां परिगणनात् अन्येषामचेतनानां तच्छरीरत्वं नास्तीति शङ्कापि 'विश्वं तस्माच्छिवात्मक' मित्युक्त्या निराकृता। सर्वेषामात्मनां परमेश्वरशरीरत्वे हि भूतव्यतिरिक्तमायाकालनियत्याद्यभिमानिचेतनानामपि तच्छरीरत्वसिद्धौ तन्नियम्यानां मायाकालाद्यचेतनानामपि कैमुतिकन्यायेन परमेश्वरनियम्यत्वं सिद्ध्यति। किमर्थं तर्हि परमेश्वरस्य मूर्त्यष्टकपरिगणने केषुचित्पुराणेषु चेतनस्थाने यज्वनां परिगणनं सर्वेष्वपि पुराणेष्वचेतनस्थाने भूतानां परिगणनम्। उच्यते। नेदं परिसङ्ख्यार्थं परिगणनं, किंत्वर्चनोपयोगिभवशर्वरुद्रादिनामभेदविधानार्थम्। यथा सप्तरात्रादीनामहर्गणानां दीक्षणीयादिष्वहरन्तेषु सत्स्वपि 'ज्योतिष्टोमोऽग्निष्टोमो गौरुक्थ्यआयुरुक्थ्यः अभिजिदग्निष्टोमः विश्वजिदग्निष्टोमः सर्वजिदग्निष्टोमस्सर्वस्तोमोऽतिरात्र' इत्यादिवाक्यैर्विशिष्य सौत्यानामह्नामनुकीर्तनं धर्मातिदेशोपयोगि ज्योतिष्टोमगवायुरादीनामभेद-विधानार्थम्। अथवा 'स्थानेष्वेतेषु ये रुद्रं ध्यायन्ति प्रणमन्ति च। तेषामष्टतनुर्देवो ददाति परमं पद'मिति वाक्यशेषानुसारादुपासनाविधानार्थम्। यथा प्राणेष्वेकादशसु सत्स्वपि विद्याविशेषे 'सप्त प्राणाः प्रभवन्ति तस्मा'दिति तेषां सप्तसङ्ख्याकीर्तनं तत्रत्योपासनाविशेषलाभार्थम्। अथवा सर्वेष्वपि लैङ्गादिपुराणेषु मूर्त्यष्टकपरिगणने पृथिव्यादेरेकैकस्या मूर्तेस्सर्वलोकोपकारकत्वेन स्तुतिदर्शनात् स्तुत्यर्थं विशिष्य परिगणनम्। यथा सर्वासु विद्यासु सतोऽप्यर्चिरादिमार्गस्य पञ्चाग्निविद्यायामुपकोसलविद्यायां च विशिष्य कीर्तनं स्तुत्यर्थम्। एवं च जगन्मूर्तेः परमेश्वरस्याष्टमूर्तिरिति नामाप्यष्टानां मूर्तीनां केनचिद्विशेषेणोपपद्यते। यथा षड्विंशताऽहोभिर्निर्वर्त्यस्यापि क्रतोर्द्वादशाह इति नाम सौत्यानामह्नां प्राधान्येन विशेषणं यथा वा षडग्निगोचराया विद्यायाः पञ्चाग्निविद्येति नाम पञ्चानामग्नीनां सम्पादकत्वेन विशेषणम्। प्रपञ्चेनायमर्थोऽस्माभिश्शिवतत्वविवेके निरूपितो द्रष्टव्यः। एवं परमेश्वरस्यासङ्कुचितसकल-

प्रपञ्चशरीरकत्वसिद्धेः क्वचिदपि द्वेषेण निग्रहबुद्धिर्न कार्या, किंतु शिवमूर्तित्वबहुमानेन शिवाराधनरूपानुग्रहबुद्धिरेव कार्येति 'देहिनो यस्य कस्यापी'त्यादिश्लोकद्वयेन दर्शितम्। उपपादितं 'सर्वं खल्वि'त्यादिवाक्यार्थवर्णनमुपसंहरति-**अत इति**। अत्रेदं चिन्त्यते। 'सर्व खल्विदं ब्रह्म तज्जला'निति श्रुतिवाक्यस्य सर्वमिदं जगत् ब्रह्माधीनजन्मस्थितिध्वंसवत्त्वात् सागरबुद्बुदन्यायेन ब्रह्मापृथक्सिद्धमित्यर्थे तात्पर्यं वर्णयित्वा प्रपञ्चस्य ब्रह्मापृथक्सिद्धिमात्रेण कथं ब्रह्मप्रपञ्चशब्दयोर्भिन्नार्थवाचिनोस्सामानाधिकरण्यमित्याकाङ्क्षायां तदुपपादनार्थमपृथक्सिद्ध-प्रकारवाचिशब्दानां प्रकारिपर्यन्तत्वं व्युत्पादितम्। इदं व्यधिकरणम्। प्रपञ्चे ब्रह्मशब्दप्रवृत्त्युपपादनाय प्रकारिवाचिशब्दानामपृथक्सिद्धप्रकारपर्यन्तत्वं हि व्युत्पपादनीयम्। न च प्राचीनग्रन्थस्यापि ब्रह्म स्वापृथक्सिद्धसर्वप्रपञ्चरूपप्रकारविशिष्टमिति श्रुत्यर्थवर्णन एव तात्पर्यं न तु सर्वं जगद्ब्रह्मापृथक्सिद्धमिति श्रुत्यर्थवर्णन इति शङ्कनीयम्। 'तज्जलानिदंसर्वंब्रह्माधीन-जन्मस्थितिध्वंसकमेतत्सर्वं चिदचिद्रूपं ब्रह्म ख'ल्विति भाष्यस्य जगद्ब्रह्मणोःप्रथमचरमनिर्देशेन खलुशब्दस्योपदिश्यमानार्थप्रसिद्धिद्योतकत्वसिद्धये भिन्नक्रमयोजनेन च सर्वं ब्रह्मापृथक्सिद्धमिति श्रुत्यर्थवर्णनपरत्वस्य स्पष्टं प्रतीतेः। न च प्रकारवाचिशब्दानां प्रकारिपर्यन्तत्वस्याग्रे यत्नेन व्युत्पाद्यमानस्य वैयधिकरण्यपरिहाराय प्राचीनग्रन्थगतं प्रथमचरमनिर्देशादिमात्रमन्यथा योजनीयमिति वाच्यम्। श्रुतौ सर्वशब्दस्य सर्वजगदपृथक्सिद्धब्रह्मपर्यन्तत्वकल्पने तज्जलानित्यस्यानन्वयापत्तेः। न हि तस्य ब्रह्मविशेषणतया पदार्थैकदेशे जगत्यन्वयस्सम्भवति। नापि ब्रह्माधीनजन्मस्थितिध्वंसरहिते ब्रह्मण्यन्वयस्सम्भवति। न च 'तज्जला'नित्यस्यापि ब्रह्माधीनजन्मस्थितिध्वंसवज्जगद-पृथक्सिद्धब्रह्मपर्यन्तत्वं वाच्यम्। तथा सति सर्वमिदं जगत् ब्रह्माधीनजन्मस्थिति-ध्वंसवत्त्वातदपृथक्सिद्धं तदपृथक्सिद्धत्वात्तव्द्यपदेशार्हमित्येवं सर्वं ब्रह्मेति समानाधिकरण-निर्देशोपपादकतया तज्जलानित्यस्यान्वयाभावप्रसङ्गात्। न चेष्टापत्तिः। यद्यतो जायते येनैव हेतुनावतिष्ठते यत्रैव लीयते तत्तस्मात्स्वजननादिकारणान्न व्यतिरिच्यते तदपृथक्सिद्धमेव भवतीति सामान्यव्याप्तौ यथा सागरे सम्पन्नजन्मस्थितिविलयं बुद्बुदकदम्बकं तद्रूपमेव दृश्यत इति दृष्टान्तोपपादनेन सागरबुद्बुदनिकरस्य सागरापृथक्सिद्धतया सर्वोऽयं सागर इति सागरव्यपदेशार्हत्ववज्जगतस्सर्वस्य ब्रह्मापृथक्सिद्धतया ब्रह्मव्यपदेशार्हत्वमिति 'सर्वं ब्रह्मे' ति समानाधिकरणनिर्देशोपपादकतया 'तज्जला' नित्येतदन्वयस्फुटीकरणात्। तस्मा 'त्सर्वं खल्विदं ब्रह्मे' तिवाक्यार्थवर्णनं पूर्वोत्तरविरोधादसङ्घटितमिव प्रतिभाति। एवं 'ततो ब्रह्मस्वरूपत्वात्प्रपञ्चस्य द्वेषाद्यविषयत्वात् शान्त एव ब्रह्मोपासीतेति' वाक्यार्थवर्णनमपि। 'तज्जला' निति हेतुना हि ब्रह्मप्रपञ्चयोस्सागरबुद्बुदन्यायेनापृथक्सिद्धिमात्रसिद्धिः प्राक्समर्थिता। न पुनः प्रपञ्चस्य

ब्रह्मरूपत्वसिद्धिः। तदनन्तरमुदाहृतेन 'विग्रहं देवदेवस्ये'ति पुराणवचनेन तत्सिद्धिरिति चेत्। किं ततः। न हि तावता 'तज्जला'निति हेत्वविषयतया 'सर्वं खल्विदं ब्रह्मे'ति वाक्येनास्पृष्टं तत्तदनन्तरमितिकरणेन हेतूकर्तुं शक्यम्। तस्मात्सर्वमिदं श्रुतितात्पर्यवर्णनमसङ्घटितमिवाभाति। अत्रेदं समाधानम्। 'सर्वं खल्विदं ब्रह्मे'ति वाक्येन स्वार्थे प्रतिपादिते कुत स्सर्वमिदं ब्रह्मेति भिन्नयोरभेदानुपपत्त्या तदुपपादकहेत्वाकाङ्क्षायां हेतुगर्भविशेषणसमर्पकं 'तज्जला'निति वाक्यं पश्चात्प्रवर्तते। 'पर्वतो वह्निमा'निति वाक्यानन्तरं 'यतो धूमवा'नितिवाक्यवत्। न तु तज्जलान् सर्वमिदं ब्रह्मेति प्रथममेव सर्वविशेषणतयान्वेति। प्रतिज्ञावाक्यानन्तरमेव हेत्वाकाङ्क्षोदयात् सर्वं ब्रह्मेति वाक्येन ब्रह्मणो बुद्धिसन्निधानसम्पादनाभावे तत्पदस्य ब्रह्मपरामर्शित्वासम्भवात्। ततश्च 'तज्जला'निति हेतुवाक्ये विशेष्यसमर्पकतया सर्वपदमनुषञ्जनीयम्। तन्निष्कृष्टप्रपञ्चपरमिति तज्जलानित्यस्यान्वयोपपत्तिः। एवं 'तज्जला'निति सर्व स्य ब्रह्माधीनजन्मस्थितिलयवत्त्वकीर्तनेन ब्रह्मणस्सर्वप्रपञ्चजन्मस्थितिलयकारणत्वमपि सिद्ध्यतीति सोऽत्र हेतुः। तस्य हेतोः ब्रह्म सर्त्त्वात्मेति ब्रह्मणस्सर्वशरीरकत्वं साध्यम्। यद्यपि सर्वस्य ब्रह्मशरीरत्वे साध्येऽभ्युपगम्यमाने 'तज्जला'नित्यस्य श्रौतार्थ एव हेतुर्भवति। प्रथमचरमश्रुतयोरुद्देश्यविधेयभावव्यवस्थाप्यादृता भवति। प्रपञ्चे ब्रह्मशरीरत्वस्य तस्मिन्द्वेषाद्यभावहेतोः 'सर्वं खल्विदं ब्रह्मे'त्यतः साक्षाल्लाभश्च भवतीति श्रुत्यनुषक्तसर्वब्रह्मशब्दयोरैकार्थ्यं च लभ्यते। तथापि ब्रह्मश्रुतिविरोधान्न तथाभ्युपगमो युक्तः। ब्रह्मश्रुतिर्हि ब्रह्मशरीरभूतप्रपञ्चपरतां नीता पीडिता स्यात्। सर्वश्रुतिस्तु सर्वशरीरकब्रह्मपरतां नीतापि न पीडिता भवति। अपृथक्सिद्धप्रकारवाचिनां प्रकारिपर्यन्तत्वस्य शरीरवाचिनां शरीरिपर्यन्तत्वस्य च व्युत्पत्तिसिद्धत्वात्। ततश्च ब्रह्मश्रुत्यनुग्रहाय 'तज्जला'नित्यत्र सामनसंवित्संवेद्यस्यार्थान्तरस्य हेतुत्वेन ग्रहणमुचितम्। न हि तत्र श्रौतार्थस्य हेतुत्ववाचिनी पञ्चमीविभक्तिरस्ति। किं तु योग्यतामात्रेण हेतुत्वं ग्राह्यम्। योग्यता तु श्रौतार्थसमानसंवित्संवेद्येऽर्थान्तर एव ब्रह्मश्रुत्यनुसारेणावधार्यते। श्रुतानुषक्तसर्वब्रह्मशब्दयोरैकार्थ्यस्यापि न हानिः। प्रपञ्चवाचिशब्दप्रवृत्तिनिमित्तानां साक्षात्परंपरासाधारण्येनापृथक्सिद्धस्वाश्रयमात्रे शब्दप्रवृत्तिनिमित्ततायास्समर्थितत्वेन सर्वशब्दः प्रपञ्चे ब्रह्मणि चाभिधेये प्रवृत्तिनिमित्तभेदाभावात् प्रपञ्चब्रह्मणोरुद्देश्यविधेयभावज्ञापकः। पदयोः प्रथमचरमभावस्तु वाक्यप्रमाणरूपत्वाद्ब्रह्मश्रुत्यनुग्रहाय बाध्यः। 'सर्वं खल्विदं ब्रह्मे'त्युक्तार्थस्य हेतुसमर्पकस्येतिकरणस्य श्रुतित्वेऽपि ब्रह्मश्रुतिगर्भवाक्ये प्रवृत्तिमपेक्ष्य तदर्थस्येतिकरणेन हेतुत्वं वक्तव्यमिति प्रथमप्रवृत्तब्रह्मश्रुत्यनुग्रहाय ब्रह्मणस्सर्वशरीरत्वे प्रतिपाद्यमाने तत्समानसंवित्संवेद्यं सर्वस्य ब्रह्मशरीरत्वं तेन हेतुतयोच्यत इति समर्थनीयम्। यद्यपि सागरबुद्बुदन्यायाश्रयणे 'तज्जला'निति हेतुना ब्रह्मप्रञ्चयोरपृथक्सिद्धिमात्रं सिद्ध्यति। तथापि 'तत्सृष्ट्वा तदेवानुप्राविशत्' 'अन्तःप्रविष्टः शास्ता जनानां' 'य आत्मनि तिष्ठन्नात्मनोऽन्तरः' इत्यादिश्रुत्यन्तरालोचने तज्जत्वसमानसंवित्संवेद्येन तत्स्रष्टृत्वेन

तदनत्वसमानसंवित्संवेद्येन तत्प्राणायितृत्वेन च ब्रह्मणः सर्वमनुप्रविश्य तन्नियन्तृत्वलक्षणं तच्छरीरकत्वमपि सिद्ध्यति। तस्मात्तज्जलानिति हेतुवाक्यलब्धेन सर्वस्रष्टृत्वादिना 'सर्वं खल्विदं ब्रह्मे'ति वाक्यप्रतिपाद्यं ब्रह्मणस्सर्वशरीरकत्वं तद्वाक्यलब्धेन प्रपञ्चस्य ब्रह्मशरीरत्वेन द्वेषाद्यनर्हत्वं चोपपादितं भवतीत्युपपन्नमिदमुदाहृतश्रुतितात्पर्यवर्णनम्। 'तज्जलानिदं सर्व' मित्यादिभाष्ये विधेयस्य पश्चान्निर्देष्टव्यस्य प्रथमनिर्देशः। 'सर्वं खल्विद'मित्यादिव्याख्येयश्रुत्यनुसारेण प्रसिद्धिद्योतकस्य खलुशब्दस्य ब्रह्मान्वयतया योजनं ब्रह्मण उद्देश्यत्वज्ञापनाय अत एवहि 'आकाशो वै नाम नामरूपयोर्निर्वहिते'तिश्रुत्यन्तरे 'वै नामेति' प्रसिद्धिद्योतकनिपातसमुदायस्योद्देश्यान्वयो दृष्टः। यदि तूद्देश्यस्य वस्तुतः प्रसिद्धिमात्रेणोद्देशतोपपत्तेः विधेयस्यैव स्थलान्तरसिद्ध्युपन्यासेनोपपादनीयत्वात्तत्र 'वे नामे'तिनिपातसमुदायः उद्देश्यान्वय्यपि विधेयत्वेन प्रसिद्धिद्योतको न स्वरूपेणेति मतं तर्ह्यत्रापि तथास्तु। 'तज्जला'नित्यस्य हेतुसमर्पकवाक्यान्तरत्वेऽपि सर्वविशेषणं तदिति प्रदर्शनाय तज्जलानिदं सर्वमित्येकवाक्यतयोपन्यासः। यद्वा भिन्नवाक्यतयैवोपन्यासः। 'तज्जलानिदं सर्व'मिति प्रथमं हेतुवाक्योपन्यासः। प्रतिज्ञावाक्यगतस्येदंशब्दस्य तत्र प्रयोजनाभावेनानपेक्षितत्वात् हेतुवाक्ये विशेष्यवाचकपदापेक्षणाच्च 'यस्य येनार्थसम्बन्धो दूरस्थेनापि तेन सः। अर्थतो ह्यसमर्थानामानन्तर्यमकारण'मिति वार्तिकोक्तरीत्या हेतुवाक्येऽन्वयः। एवं च सर्वशब्दस्यानुषङ्गो न कार्य इत्यभिप्रेत्य सर्वमिदमित्यन्वयी दर्शितः। इदंशब्दः प्रतिज्ञावाक्यप्रस्तुतसर्वपरामर्शीति ज्ञापनार्थं सर्वपदं न तु तव्द्याख्येयपदम्। ततश्च ब्रह्माधीनजन्मस्थितिध्वंसकमेतदित्येतावदेव हेतुवाक्यव्याख्यानं सर्वं चिदचिद्रूपमिति प्रतिज्ञावाक्यगतसर्वपदव्याख्यानं चिदचिदात्मकं सर्वं वस्तुरूपमपृथक्सिद्धधर्मशरीरं वास्येति तथोक्तम्। न च प्रतिज्ञावाक्यगतसर्वशब्दस्य ब्रह्मपर्यन्तत्वे तदर्थपरामर्शिन इदंशब्दस्यापि तत्पर्यन्तत्वनियमः। तज्जलानित्येतदन्वयौचित्येन विशेषणभूत-प्रपञ्चमात्रपर्यवसायित्वोपपत्तेः। 'त्रेधा तंडुलान्विभजे'दित्यत्र दार्शिकहविर्मात्रोपलक्षकस्य तण्डुलपदस्यार्थैकदेशानां तण्डुलानां मध्यमादिवाक्यगतसर्वनामभिः परमर्शदर्शनात्। सागरबुद्बुददृष्टान्तेन ब्रह्मप्रपञ्चयोरपृथक्सिद्धिमात्रं भाष्ये कण्ठत उक्तम्। तयोरात्मशरीरभावः श्रुत्यन्तरालोचनेन सिद्ध्यतीति कण्ठतो नोदाहृतः। तस्मात्सर्वमिदं श्रुत्यर्थवर्णनं समञ्जसमेव। निर्णीतमर्थं प्रकृतसाध्ये हेतुत्वेन सङ्गमयति-**तस्मादिति।** ननु मनोमयत्वादिकं जीवलिङ्गं ब्रह्मविशेषणत्वेन नान्वेति। इत्युक्तमनूद्य निराकरोति-**नचेति। उपास्याकारेति।** 'मनोमयः प्राणशरीर'इत्यारभ्य 'एतमितः प्रेत्याभिसम्भवितास्मी' त्यन्तेन सन्दर्भेणोपास्याकारः परिगृह्यत इति तावदभ्युपगन्तव्यम्। अन्यथा तदनुक्रमणवैयर्थ्यात्। न च सांसारिकं मनःप्राणोपकरणकत्वं हेयमुपास्याकारो भवितुमर्हति। अव्यवहितवाक्योक्ततत्क्रतुन्यायविरोधात्। अतः 'प्राणारामं मनआनन्द' मिति श्रुतिसिद्धं ब्रह्मणो यन्निरतिशयानन्दानुभवसाधनमनश्शालित्वं यच्च प्राणन्तीति

व्युत्पत्त्या प्राणशब्दोक्तानां संसारिणां नियमने सामर्थ्यं तदुभयं मनोमयत्वं प्राणशरीरत्वं चेति तत एव लिङ्गात् संसारिव्यावृत्तमनोमयत्वादिविशिष्टं ब्रह्मेति परिच्छेदस्सम्भवतीत्यर्थः। ननु मनोमयत्वादिशब्दानां तच्छब्दनिर्दिष्टोपासकविशेषणत्वमेव युक्तम्। लिंगविभक्त्यैकरूप्येण तत्समभिव्याहृतत्वात्। तथात्वेऽप्युपास्याकारत्वमविरुद्धम्। तस्यैवोपास्यत्वपर्यवसानादित्युक्तमनूद्य निराकरोति-**यदुक्तमिति।** उपासके संसारदशायामसम्भवदप्युक्तरूपमुपादेयं मनोमयत्वं प्राणशरीरत्वं च मुक्तौ सम्भवति। 'मनसैतान्कामान्पश्यन् रमते य एते ब्रह्मलोक' इति श्रुतेः सार्वात्म्यफलश्रुतेश्चेति शङ्कितुर्हृदयम्। **उत्पत्तिशिष्टेति।** यथा 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिन' मित्यत्रामिक्षावरुद्धे वैश्वदेवयागे वाजिनरूपद्रव्यान्तरप्रवेशो न सम्भवति। उत्पत्तिवाक्यसंसिद्धं कर्म सर्वमनूद्यते। 'न चाश्रितगुणे शक्यं तद्विरोधि गुणान्तर' मिति गुणाधिकरणोक्तन्यायात्। एवमिहापि ब्रह्मरूपोपास्यावरुद्धायामुपासनायां जीवरूपोपास्यान्तरप्रवेशो न सम्भवतीत्यर्थः। अयमाशयः। 'मनोमयः प्राणशरीर' इत्यादीनां प्रथमान्तानां न तत्पदोपात्तजीवविशेषणसमर्पकतयान्वयः। किं तु 'स क्रतुं कुर्वीते' त्यनूदितसार्वात्म्यब्रह्मोपासनां प्रति प्रकारसमर्पकतया। 'एतमितः प्रेत्याभिसंभवितास्मी' त्येतदनन्तरमितिकरणबलादनेन प्रकारेण 'क्रतुं कुर्वीते' त्यन्वयप्रतीतेः तथान्वये सत्येव 'एष म आत्मान्तर्हृदय' इति वाक्यसामञ्जस्याच्च। तस्योपासनाप्रकाराभिनयपरत्वं विना स्वतन्त्रश्रुतिवाक्यत्वे म इत्यस्यान्वयसाञ्जस्याभावात्। तथा सत्येव च 'एष म आत्मान्तर्हृदय' इति वाक्यानां त्रिः पाठस्य 'सर्वकर्मा सर्वकाम' इत्यादिवाक्यानां द्विःपाठस्य च 'प्रायणीयं प्रथममहः चतुर्विंशं द्वितीयं चत्वारोऽभिप्लवाः षडहा एकः प्रष्ठ्य षडहस्स मासस्स द्वितीयः स तृतीयस्स चतुर्थस्स पञ्चमस्त्रयोऽभिप्लवाः षडहा एकः प्रष्ठ्यषडह' इत्यादौ गावामयनिकाहः क्लृप्तिवाक्ये अभिप्लवषडहादिशब्दानामसकृत्पाठस्य तत्रतत्र स्थाने षडाहाद्यनुष्ठानाभ्यासार्थत्वेनेव तत्रतत्र स्थाने हृदयान्तर्वर्तित्वाद्यनुसन्धानाभ्यासार्थत्वेन सार्थक्यात् तेषां वाक्यानामुपास्ये तत्तद्धर्मसद्भावमात्रबोधकश्रुतिवाक्यत्वे तद्वैयर्थ्यात्। न च विहितोपासनानुवादेन मनोमयत्वाद्यनेकगुणविधाने वाक्यभेदः। तेषामितिकरणोक्तेन प्रकारभावेनैकरूपेण विधेयत्वात्। न चविधेयतावच्छेदकरूपैक्येविधेयपदार्थश्रुतरूपान्तरभेदो वाक्यभेदावहः। अत एव 'यदग्नये च प्रजापतये च सायं जुहोती' तिवाक्यस्याग्निहोत्रदेवतात्वेनाग्निप्रजापतिविधायकत्वपक्षे चतुर्थीद्वयेनप्रातिपदिकार्थगतदेवतात्वकल्पकेन लाघवादुभयानुगतकदेवतात्वकल्पनादग्नि-प्रजापत्योर्विधेयताच्छेदकैक्येन वाक्यभेदः परिहृतः। 'गौश्चाश्वश्चाश्वतरश्च गर्दभाश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणे'तिज्योतिष्टोमदक्षिणाविधिवाक्ये गवादीनां दक्षिणात्वेनैकेन रूपेण विधेयत्वात्तथैव वाक्यभेदः परिहृतः। गवाद्यात्मिकैकैव दक्षिणा ज्योतिष्टोमस्य न तु गवादयः प्रत्येकं दक्षिणा इति च सिद्धं कृत्वा 'अथैष भूर्वैश्वदेवः तस्य

धेनुर्दक्षिणे'तिभूनामकतद्विकृतिविशेषविहितया धेनुदक्षिणया सर्वेषां गवादीनां प्राकृतदक्षिणाद्रव्याणां निवृत्तिः न तु गोत्वलिङ्गेन गोमात्रस्येति तस्य धेनुरिति 'गवां प्रकृतौ विभक्तचोदितत्वा'दित्यधिकरणे निरूपितम्। यद्वा श्रुताविति शब्दः क्रमरूपं मनोमयत्वादीनां प्रकारमाचष्टे इति अनेन मनोमयत्वाद्यनुसन्धानक्रमेण क्रतुं कुर्वीतेति। तथा च वितितिरूप एकः क्रम एवात्र विधेयः। मनोमयत्वादीनामुपास्यगुणानां विधानं तु तत्क्रमविधानादाक्षेपतो लभ्यते प्रष्ठगतसर्वताविधानादिवत्प्रष्ठानाम्। अथवा मनोमयत्वाद्यनेकगुणविशिष्ट उपासनाप्रयोगोऽत्र विधीयते। उपासनाया विहितत्वेऽपि सम्भवति तत्प्रयोगस्याविहितस्य विधानम्। यद्यपि प्रयोगमन्तरेणोपासनस्यानिष्पत्तेः प्रयोगविधिरर्थाल्लभ्यते, तथाप्येकेन वाक्येनानेकगुणविधिनिर्वाहाय प्रागेवाक्षेपप्रवृत्तेरनेकगुणविशिष्टस्य प्रयोगस्य विधानमुपपद्यते। एवं प्रयोगविधिमाश्रित्यैवाभ्युदयेष्टिगतमध्यमादिवाक्येषु वाक्यभेदं केचन परिहरन्ति। तथा हि-'वि वा एतं प्रजया पशुभिरर्धयति वर्धयत्स्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति त्रेधातण्डुलान्विभजेद्ये मध्यमास्स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं येऽणिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरु'मिति श्रूयते। चतुर्दश्याममावास्याभ्रान्त्या दर्शोपक्रमं कृतवतः तत्प्रायश्चित्तविधानमिदम्। अत्र त्रेधा तण्डुलान्विभजेदिति तण्डुलानां मध्यमादिभावेन त्रेधाविभागो न विधीयते मध्यमादिवाक्यैस्तत्सिद्धेः। किं तु सर्वेषां दार्शिकहविषां पूर्वदेवताभ्योऽपनयो विधीयते। विभजेदित्युक्ते ह्ययमर्थोऽवगम्यते। यानि संयुक्तानि तानि विभजेदिति। तण्डुलादीनि च हवींषि देवताभिस्संयुक्तानि। अतस्तण्डुलशब्दो विभागकर्मत्वेनार्थतः प्राप्तानां दार्शिकहविषामुपलक्षक इति तेषां पूर्वदेवतापनयो विधीयत इति युक्तम्। अपनीतपूर्वदेवतानां तेषां हविषां मध्यमादिवाक्यैर्देवतान्तरसंयोजनं क्रियते न तु द्रव्यदेवताविशिष्टं कर्मान्तरं विधीयत इत्यभ्युदयपेटिकायां निरूपितम्। तत्र मध्यमादिवाक्यानां प्रकृते दर्शकर्मणि देवतान्तरसंयोजनपरत्वे वाक्यभेदः प्रसज्यते। कथं दर्शद्रव्येष्वग्न्यादिदेवतानां विधानं देवतासु दातृत्वादिगुणविधानं चेति त्रिष्वपि वाक्येषु तावदेको वाक्यभेदः। दधिशृतवाक्ययोः स्थविष्ठानां दध्यणिष्ठानां शृतं चाधिकरणविधेयमित्यपरो वाक्यभेदः। तयोः स्थविष्ठानामणिष्ठानां च चरुभावोऽपि विधेय इत्यन्यो वाक्यभेदः। यद्युच्येत नैते वाक्यभेदाः प्रसरन्ति। कथम्। दातृप्रदातृशिपिविष्टशब्दानामग्न्यादिपदसामानाधिकरण्यात्। पदद्वयप्रतिपादितं विशिष्टं देवताकारकमेकमेव विधेयं न तु देवतास्तद्गुणाश्च प्रत्येकं विधेयाः। अभ्युदयेष्टिप्रकरणे 'सह श्रपयती'ति वचनमस्ति। तद्देवतैक्यात् तद्धि स्थविष्ठयोःशृताणिष्ठयोश्च सहपाकविषयम्। ततश्च स्थविष्ठानामणिष्ठनां च तण्डुलानामल्पत्वाद्दधिशृतयोर्भूयस्त्वाच्च तण्डुलानां चरुत्वं दधिशृतयोरधिकरणत्वं चार्थात्प्राप्नोति। अर्थप्राप्तं च तत्सर्वमनूद्यते। तत्तद्गुणविशिष्टं देवताकारकमेव

विधीयते मध्यमानां तण्डुलानामग्निर्देवता स्थविष्ठानां दघ्नः चन्द्रः प्रदाता अणिष्ठानां शृतस्य च विष्णुः शिपिविष्ट इति। अतो नैवं वाक्यभेद आप्नोति। तथापि प्रकारान्तरेण वाक्यभेदः स्यादेव। दधिवाक्ये दध्नि स्थविष्ठेषु च प्रत्येकं देवतासंयोजनात्। इयांस्तु भेदः। पूर्वस्मिन्पक्षे स्थविष्ठेषु देवता प्रणीता कार्ये दधि च विधेयं क्षोदिष्ठेषु देवता प्रणीता कार्ये शृतं च विधेयमिति विधेयभेदाद्वाक्यभेदः। 'सह श्रपयती' ति वाक्यसत्त्वमभ्युपगम्य प्रवृत्ते द्वितीयपक्षे स्थविष्ठेषु शृतेषु च दध्नि च क्षोदिष्ठेषु देवता विधेयेत्युद्देशभेदाद्वाक्यभेद इति। एवं प्रसक्तं वाक्यभेदमनेकगुणविशिष्टप्रयोगविध्याश्रयणेन परिहरन्ति। तत्र प्रयोगविध्याश्रयणपक्षे दूषणान्यस्माभिर्विधिरसायने दर्शितानि। तथापि यत्रानेकगुणश्रवणेऽपि प्रकृतहानाप्रकृतकल्पनापूर्वककर्मान्तरकल्पनागौरवपरिहारार्थं प्रकृतकर्मविषयत्वं वक्तव्यं तत्र वाक्यभेदपरिहारार्थं प्रयोगविध्याश्रयणं दृष्टमित्येतावति दृष्टान्तोऽयमुपन्यस्तः। अथवा। अस्मिन्वाक्ये विशिष्य का वाक्यभेदशङ्का। दहरविद्यादिष्वपि ह्युत्पत्तिवाक्यबहिर्भूतान्यपहतपाप्मत्वाद्यनेकगुणश्रवणानि दृश्यन्ते। तेषु यदि वाक्यभेदः सोढः इहापि स सोढव्यः। यदि तुवर्णितानां वाक्यभेदपरिहारोपायानामन्यतमः कश्चिदन्यो वा उपायोऽन्विष्यते इहापि स एवान्विष्यतामित्यलं प्रपञ्चेन। एवं प्राग्विहितायामेवोपासनायां मनोमयत्वादिगुणवाद इति स्थिते ब्रह्मावरुद्धायां तस्यां जीवान्वयो न सम्भवतीति मनोमयत्वादीनामुपास्यगुणानां न जीवविशेषणतयान्वयः किं तु ब्रह्मविशेषणतयेति युक्तम्। ननु ब्रह्मरूपोपास्यान्वितत्वेनावगतायामुपासनायां मनोमयत्वाद्यन्वयः केन प्रमाणेनावसीयते। 'स क्रतुं कुर्वीते' त्यादिना 'अभिसंभवितास्मी' त्यन्तेन प्रकृतोपासनमनूद्य मनोमयत्वादिगततत्प्रकारसमर्पणार्थेतिकारणान्वितेन वाक्यप्रमाणेनेति चेत्तर्हि वाक्यादन्यार्थसन्निधानस्यातिदुर्बलत्वात्तेन ब्रह्मण उपास्यतयान्वयो न सिद्ध्येत्। दुर्बलमपि सन्निधानं वाक्यस्योपजीव्यत्वमात्रे प्रबलमिति चेन्न। उपासनानुवादे तद्विधानमात्रस्योपजीव्यत्वात्। न च विषयरहितमुपासनं विधातुं शक्यम्। येनोपासनविधानोपयुक्तं विषयसमर्पणमिति तदर्थमस्यार्थस्य सन्निधानमुपजीव्यं स्यात्। सम्भवति 'ह्यग्निहोत्रं जुहोती' ति होममात्रविधानवदुपासनामात्रविधानं विहितहोमानुवादेन द्रव्यविधानवद्विहितोपासनानुवादेनोपास्यविधानं च। तथापि सन्निधानेनोपास्यसमर्पणं प्रथमप्रवृत्तत्वाद्बलवदिति चेत् न, विषयसमर्पणार्थप्रमाणाभावं निश्चित्य ह्यन्यार्थसन्निधानतो विषयग्रहणमपेक्षणीयम्। पश्चादपि तादर्थ्येन प्रमाणावतारसद्भावे तु तन्नापेक्षणीयम्। अतस्तस्य प्रथमप्रवृत्त्युक्तिर्भ्रान्तिकृतैव। तस्मादिह नास्त्युत्पत्तिशिष्टगुणावरोध इति चेन्मैवम्। मनोमयादिवाक्येन प्रकृतोपासनायामुपास्यगतप्रकारमात्रस्य हि समर्पणं क्रियते न तु साक्षादुपास्यस्य विशेष्यस्यापि। मनोमय इत्यारभ्यान्वयिनेतिकरणेन मनोमयत्वादेः 'एतं मनोमयत्वादिविशिष्टं प्राप्तास्मी' त्येतदन्तस्य सर्वस्याप्यर्थजातस्य प्रकारतापादनात्। तथा च मनोमयत्वादिप्रकारेण किमुपासीतेति तद्विशेष्याकाङ्क्षायामाकाङ्क्षितविशेष्यसमर्पकमन्यार्थसन्निधानं

वाक्यानुकूलत्वात् न वाक्येन बाध्यम्। यद्यप्युपासनोत्पत्तिवाक्ये ब्रह्मण इव तदनुवादवाक्ये जीवस्याप्यन्यार्थसन्निधानमस्ति। तथापि प्रथमश्रुतत्वादुत्पत्तिवाक्यगतत्वाच्च प्रथमं ब्रह्मान्वये सति पश्चान्न जीवान्वय इति युक्तमुत्पत्तिशिष्टगुणावरोधवचनम्। यद्यप्युत्पत्तिशिष्टगुणावरोधे सति तु श्रूयमाणं तद्विरुद्धं गुणान्तरंस्वात्मसंगतियोग्यं कर्मान्तरं गमयेदितिगुणाधिकरणन्यायः। इह तु नास्ति तथाकर्मान्तरावगतिः। जीवस्याहत्योपास्यंत्वेन श्रवणाभावात्। तस्मादुत्पत्तिशिष्टगुणावरुद्धे कर्मणि न तद्विरुद्धगुणान्वय इत्येतावत्यंशे दृष्टान्ततया गुणाधिकरणन्यायोपन्यासः। तस्माच्छान्दोग्याग्निरहस्ययोस्सर्वात्मत्वेनोपक्रान्तं ब्रह्मैव मनोमयत्वादिगुणकम्। अत एव बृहदारण्यके शाण्डिल्यविद्यायां 'मनोमयोऽयं पुरुषो भास्सत्य, मित्यादिना मनोमयत्वादिगुणानां सत्यशब्दोक्तस्य सार्वात्म्यस्य च समुच्चयो दर्शित इति सर्वं समञ्जसम्।। उत्तरसूत्रमवतारयितुमाशङ्कते-**ब्रह्मैवेति**। अयमाशयः। 'स क्रतुं कुर्वीते' त्यत्र 'यथाक्रतुरस्मिँल्लोके पुरुष' इति प्रकृतः पुरुषो निर्दिश्यते। तन्निर्देशो न तद्विशेषणत्वेन फलविशेषप्रतिपत्त्यर्थः। फलविशेषविशिष्टत्वेन पूर्वं तस्याप्रकृतत्वात्। नाप्युपास्यगुणानुसारिफलसामान्यप्रतिपत्त्यर्थः। तत्प्रतिपत्तेर्यथाक्रतुवाक्यैनैव सिद्धत्वात्। नाप्युपासनाकर्तृपुरुषसामान्यप्रतिपत्त्यर्थः। उपासनायाः कर्तृव्यभिचारेणार्थादेव तत्सिद्धेः। अतो मनोमयत्वादीनां ब्रह्मविशेषणत्वे तन्निर्देशोऽनर्थक एव स्यात्। तेषामुपासकपुरुषविशेषणत्वे तु विशेषणप्रतिपत्यर्थत्वेन सार्थको भवति। अस्ति ह्यर्थसिद्धस्यापि विशेष्यस्य विशेषणप्रतिपत्त्यर्थो निर्देशः। यथा 'उमां स पश्यन्नृजुनैव चक्षुषे'ति। तस्माज्जीवनिर्देशानर्थक्यपरिहाराय मनोमयत्वादीनां तद्विशेषणत्वमभ्युपगन्तव्यम्। तथा च सत्युपास्यगुणान्वयादन्यार्थनिर्दिष्टस्यापि जीवस्योपास्यत्वमुपास्यभेदादुपासनान्यत्वं च भवदभ्युपगन्तव्यमित्याशङ्कानिवारणार्थमिदं सूत्रमिति। ।सू।। **विवक्षितगुणोपपत्तेश्च**।।२।। **सत्यसङ्कल्पत्वेति**। सत्यसङ्कल्पत्वमवितथसङ्कल्पत्वं न तु सद्विषये सङ्कल्पराहित्यम्। श्रुत्यन्तरप्रसिद्ध्यहेयगुणत्वसिद्ध्याद्यनुसारेणैकपद्यस्योचितत्वात्। तच्च स्वाभाविकं नित्याविर्भूतं ब्राह्ममेव ग्राह्यम्। न तु मुक्तौ हेत्वन्तराधीनाविर्भावम्। हेत्वाक्षेपकल्पनागौरवात्। सर्वकर्मत्वं सर्वप्रपञ्चरूपकार्यवत्त्वम्। कर्मशब्दस्य बालाक्यधिकरणन्यायेन कार्यमात्रपरत्वात्। सर्वकामत्वं सर्वं कामयत इति व्युत्पत्त्या सकलसृज्यविषयकामनावत्त्वं सर्वकल्पनानुयायिसकलभोग्यवस्तुशालित्वं वा। एतेन'सर्वगन्धस्सर्वरस' इति व्याख्यातम्। 'सर्वमिदमभ्यात्त'इत्युपासनाकालवृत्तिसकलप्रपञ्चव्यापित्वं तात्कालिकं न तूपासकस्य मुक्तिकाले भविष्यत्तात्कालिकप्रपञ्चव्यापित्वम्। अवाकित्वमुपासनाकाले वागिन्द्रियोपलक्षित-सकलेन्द्रियराहित्यम्। वाकिशब्दो वाग्वाचिनो वाक्यशब्दादिनिप्रत्ययस्य तदस्यास्तीति वर्तमानार्थे विहितत्वात्। अतस्सत्यसङ्कल्पत्वादिकं ब्रह्मण्येवोपपद्यते न जीव इत्यर्थः। नन्वत्रैव प्रकरणे

तत्क्रतुन्यायप्रतिपादनात्तदनुसारेण ये गुणा मुक्तौ उपासकेन प्राप्तुं शक्यास्तत्परत्वेनैव सत्यसङ्कल्पादिशब्दाः व्याख्यातव्याः न तु ब्रह्मसाधारणगुणपरत्वेनेतिं चेत न, तत्क्रतुन्यायस्य जगव्द्यापारवर्जाधिकरणानुसारेण ब्रह्मासाधारणगुणातिरिक्तगुणविषयत्वात्। अन्यथा 'एष सर्वेश्वरः एष भूतपालः एष भूतपतिः एष सेतुर्विधारण एषां लोकानामसम्भेदाये' त्यादिवाक्यैस्तासु तासु विद्यासु प्रपञ्चितानां सर्वेश्वरत्वसर्वाधारत्वसर्वकारणत्वादिगुणानामनुपास्यत्वप्रसङ्गात् ब्रह्मण्युपासनाकालेऽप्याविर्भाववतः सत्यसङ्कल्पत्वादीनुपासीनस्य मुक्तिकाले तदाविर्भावसत्तामात्रेण तत्र तत्क्रतुन्यायप्रवृत्त्युपपत्तेश्च। 'तथेतः प्रेत्य भवती'ति हि श्रूयते। न खल्विदानीमयं यथाभूतगुणः तथाभूतगुणोऽस्य पुत्रो भवितेति व्यवहारकाले पितृगुणानां पुत्रगुणानां च वर्तमानत्वभविष्यत्त्ववैषम्ये सत्यपि यथा तथेति साम्यप्रतिपादनं च दृश्यते। अपि चाहंग्रहवतीषु ब्रह्मोपासनास्वहमर्थो जीवो भाविनार्चिरादिगतिमत्त्वसत्यसङ्कल्पत्वादिनोपासनीय इति तद्विषयत्वेनापि तत्क्रतुन्याय उपपद्यते। वस्तुतस्तूपास्यप्राप्तिरूपफलविषयस्तत्क्रतुन्याय इति 'कार्यं बादरि' (ब्र० ४.३.७.) रित्यधिकरणे दर्शयिष्यते। 'तं यथायथोपासते तथैव भवन्ती'ति श्रुतिस्तु परमेश्वरं भक्ताः येनयेन प्रकारेणाम्बासहितत्वार्धनारीश्वरत्वादिना वस्त्रभूषणादिविशेषेण चोपासते तेभ्यस्तथैवाविर्भवतीत्येवंपरत्वेनोपपद्यते। 'यादृशाकारयोगेन यजन्ते साधकाः स्वयम्। भासते तादृगाकारश्चिन्तामणिरिवेश्वर' इति शिवागमे श्रूयते। तस्मात्सत्यसङ्कल्पत्वादयो ब्रह्मण्येवोपपद्यन्ते। 'एतमितः प्रेत्याभिसम्भवितास्मी 'त्युपास्योपासकयोः कर्मकर्तृभावनिर्देशः छान्दोग्ये'एष म आत्मान्तर्हृदय' इति वाजसनेयके 'एवमयमन्तरात्मन् पुरुषो हिरण्मय'इति तयोरसमानविभक्तिनिर्देशश्च ब्रह्मण्युपास्य एवोपपद्यते। तस्माद्ब्रह्वाञ्जस्यानुरोधेनाकाङ्क्षितस्याप्यर्थप्राप्तस्योपासकस्यानुवादकं 'स' इति पदमित्यङ्गीकरणीय- मिति भावः। यद्वा 'एतमितः प्रेत्याभिसम्भवितास्मी'त्यनन्तरं 'यस्य स्यादद्धा न विचिकित्सास्ती'ति श्रूयते। तस्यायमर्थः। अभिसम्भवितास्मीत्यन्तेन यः प्रकार उक्तः अयं प्रकारो यस्माद्धा सत्यो निश्चितस्स्यात्। न तु विचिकित्सा संशयोऽस्तीति। अत्र यच्छब्दस्य प्रतिनिर्देशसापेक्षत्वात् तत्प्रतिनिर्देशार्थः 'स क्रतुं कुर्वीते'त्यत्र तच्छब्दः। एवं मनोमयत्वाद्युपास्यगुणजाततदुपासनाक्रमोपास्यप्राप्तिरूपफलेषु यथा संशयलेशोऽपि न प्रसरति तथा श्रवणमननाभ्यां निश्चित्योपासनमारभेतेत्येवं 'स क्रतु'मित्यादे'र्न विचिकित्सास्तीत्यन्तस्यार्थः पर्यवस्यति। अस्मिन्पक्षे 'अभिसम्भवितास्मी'त्येतदनन्तरमितिशब्द उपासनाप्रप्रकारनिर्देशकतया क्रतुवाक्येन नान्वेति। किंतूपासनापूर्वभाविश्रवणादिसाध्यनिश्चयप्रकारतया 'यस्य स्या'दित्यादिनान्वेति। मनोमयत्वादेरुपासनाप्रकारत्वं त्वर्थात्सिद्ध्यति। अन्यथा तन्निश्चयस्योपासनापेक्षितत्वायोगात्। सूत्रे विवक्षितविशेषणेन तत्क्रतुन्यायविरोधात् ब्रह्मासाधारणगुणा न विवक्षिता इति शङ्का निराकृता।

ब्रह्मण्युपपत्त्या च जीवेऽनुपपत्तिर्विवक्षिता। तया बह्वाञ्जस्यानुरोधा 'त्स' इत्येतस्यैकस्यानुवादकत्व-मग्रिमतच्छब्दप्रतिनिर्देशकत्वं वा कल्पयितुं युक्तमिति सूचितम्। अत्र सत्यसङ्कल्पादि-शब्दस्वरसप्रतीतानां नित्याविर्भूतसत्यसङ्कल्पत्वादीनां जगत्स्रष्टृत्वाद्याक्षिप्ततया श्रुत्यन्तरप्रसिद्ध्या च ब्रह्मलिङ्गत्वेन स्पष्टानामपि पूर्वपक्षदशायामुपास्यब्रह्मगुणत्वासम्भवशङ्काकलुषितत्वादनतिस्पष्टतेति पादसङ्गतिः।।

इति सर्वत्रप्रसिद्धाधिकरणम्।।१।।

अथ अनुपपत्त्यधिकरणम्।।२।।

यथा शाण्डिल्यविद्यायां जीवसामान्यस्य प्रसङ्गो नोपास्यत्वेन किं तूपासकत्वेन। तथैव चेतनमध्ये सर्वोत्कृष्टस्य नारायणस्य नारायणानुवाके प्रसङ्गोऽपीति दृष्टान्तसङ्गतिं दर्शयन्नुत्तराधिकरणमवतारयति-**इहेति**।।सू।। **अनुपपत्तेस्तु न शारीरः**।।३।। तैत्तिरीयोपनिषदि 'पतिं विश्वस्ये'त्यादिकमुदाहृत्य तत्र विश्वपतित्वानन्येश्वरत्वादिधर्मैः प्रतिपाद्यः पञ्चकृत्याधिकारिषु मूर्त्यात्मसु पञ्चसु पञ्चमो नारायणाख्यो मूर्त्यात्मा उत मूर्त्यात्मातीतः परमेश्वर इति तयोर्मध्ये कस्य विश्वपतित्वादिकं युक्तमित्यनवधारणत्संशयमाह-**महोपनिषदीत्यादिना**। यद्यपि नारायणस्तत्र विश्वतित्वादिधर्मैः प्रतिपाद्य इति स्पष्टमेव। तथापि नारायणः स्वकीयैस्तैः प्रतिपाद्यः उत परमेश्वराभेददृष्ट्यवलम्बनैस्तदीयैरिति संशयार्थो द्रष्टव्यः। अत्रैवं पूर्वपक्षः। श्रुतिरेव भगवती विश्वपतित्वादिधर्मेषु प्रमाणम्। श्रुतिश्च 'पतिं विश्वस्ये'त्यादिना नारायणस्य तान्प्रतिपादयति। अत्र हि नारायणमुद्दिश्य विश्वपतित्वादयोऽभिधीयन्ते। द्वितीयानां 'येनावृतं स्वं च दिवं महीं चे'त्यादाविव प्रथमार्थत्वा'त्तत्वं नारायणः परः''व्याप्य नारायणः स्थित'इत्यादिप्रथमान्तसामानाधिकरण्यात्। न च प्रथमानामेव 'भूयस्सृष्ट्वा पतयस्तथेश'इत्यादाविव द्वितीयार्थत्वं कल्प्यतामिति वाच्यम्। प्रथमान्तत्वे विनैव क्रियाध्याहारमुद्देश्यविधेयभावेनान्वयोपपत्तेः। द्वितीयान्तत्वे 'उपासीते'ति क्रियाध्याहारप्रसङ्गात्। यद्यपि रुद्राध्याये रुद्रस्यापि विश्वपतित्वादिकं श्रुतं तथापि तस्य नमस्कारैरिष्टानिष्टप्राप्ति-निवृत्तिप्रार्थनालिङ्गैस्स्तुतिपरत्वावसायात्। स्तुतिपरवाक्येभ्यस्तत्वपरवाक्यस्य प्रबलत्त्वात्तदनुसारेण विश्वपतित्वादिकं नारायणस्यासाधारणधर्म इत्यभ्युपगन्तव्यम्। नच नारायणानुवाकस्यान्यपरत्वं शङ्कितुं शक्यम्। नारायणनामाभ्यासेनाच्युतानन्तहरिनामनिर्देशेन समुद्रशायित्वलिङ्गेन चावगमितस्य तत्परत्वस्याविचलत्वात्। तस्माद्देवतान्तरेषु विश्वपतित्वादिश्रवणं परिच्छिन्नकतिपयैश्वर्यादिपरतया योजनीयम्। अत एव लोकाक्षिगृह्ये कृच्छ्राङ्गहोममन्त्रे 'ष्वग्नये पृथिव्यधिपतये स्वाहे' त्यारभ्य 'ब्रह्मणे लोकाधिपतये स्वाहे' त्यन्तैरेकादशभिर्मन्त्रैरग्निसोमवायुसूर्येन्द्रयमवरुणकुबेरमहासेनरुद्रब्रह्मणां

पृथिवीनक्षत्रान्तरिक्षद्युसुरप्रेतसलिलयक्षसेनाभूतलोकेष्वेकैकस्मिन्नाधिपत्यमुक्त्वा 'विष्णवे सर्वाधिपतये स्वाहे'तिमन्त्रेण नारायणस्य सर्वाधिपत्यमुक्तम्। तस्मादिह नारायण एव विश्वपतित्वादिधर्मैर्निर्दिश्यत इति। अत्रायं सिद्धान्तः। नारायणस्यात्मभूतः परमेश्वर एव विश्वपतित्वादिधर्मशाली न तु मूर्त्यात्मा नारायणः। स तु तदभेदभावनाभ्यासदार्ढ्येन तदभेदमापन्नस्तद्धर्मैर्व्यपदिश्यते न स्वकीयैः। तत्र विश्वपतित्वाद्यनुपपत्तेः। रुद्राध्याये हि परमेश्वरस्य प्रपञ्चान्तर्गतैकैकवस्त्वाधिपत्यप्रदर्शनेन सर्वाधिपत्यं स्थिरीक्रियते। तस्य न तावन्नमस्कारयोगेन दौर्बल्यम्। तद्योगो हि नमस्कार्यमहिमसमर्पकाणां विशेषणानामर्थविवक्षामेवोपोद्बलयति नत्वर्थविवक्षां वारयति। 'नमस्कृत्य हि वसीयांसमुपचरन्ती' ति श्रुतौ 'सर्वं रुद्रेति वै प्राहुर्मुनयस्तत्त्वदर्शिनः। नमस्कारेण सहितं गौरवात्परमेष्ठिनः॥' इति। 'सर्वो वै रुद्र' इत्यादिमन्त्रतात्पर्यकथनार्थलैङ्गपुराणवचने च नमस्कारस्य विषयोत्कर्षप्रयुक्तत्वप्रतिपादनात् नमस्कार्योत्कर्षगवेषणे श्रुतविशेषणसमर्पितोत्कर्षमपहायोत्कर्षान्तर-परिग्रहायोगात्। तथा च रुद्राध्यायगतेनानितरसाधारणेन नमस्कारभूयस्त्वेन नमस्कार्यस्य सर्वोत्कर्ष-स्सिद्ध्यन्नमस्कारघटिततत्तन्मन्त्रगतनमस्कार्यविशेषणसमर्पितसर्वाधिपत्यादिरूप एव सिद्ध्यति। प्रार्थनायाः स्तुतिलिङ्गेन दौर्बल्यं भवदपि यत्र मन्त्रे सा दृश्यते तत्रैव भवेत् नान्यत्रापि। अन्यथा पुरुषसूक्तैकवाक्यतापन्नोत्तरनारायणावसानगतेन प्रार्थनालिङ्गेन सूक्तद्वयस्यापि स्तुतिपरत्वं प्रसज्यते। तस्माद्रुद्राध्यायेऽपि येषुयेषु मन्त्रेषु प्रार्थना दृश्यते तद्गतप्रार्थनीयविशेषणानां स्तावकत्वकल्पनेऽपि नान्यत्र तत्कल्पनावकाशः। तथापि नारायणमुद्दिश्य विश्वपतित्वादिविधानैदंपर्येण प्रवृत्तं वाक्यं नमस्कारपरवाक्येभ्यस्तादर्थ्येन विश्वपतित्वादिसमर्पकेभ्यः प्रबलमिति चेन्न। 'पतिं विश्वस्ये'त्यादेरपि तद्विधानैदंपर्यासिद्धेः। द्वितीयान्तानां 'तद्विश्वमुपजीवती'ति श्रुतसकर्मकक्रियान्वये सम्भवति द्वितीयार्थप्रहाणायोगात्। 'अनन्तमव्ययं कविं समुद्रेऽन्तं विश्वशम्भुव'मिति द्वितीयान्तपदानां 'यस्य येनार्थसम्बन्ध' इति न्यायेन प्रथमान्तपदेभ्यः प्राचीनया क्रिययान्वयोपपत्तेः प्रथमान्तानां भिन्नवाक्यत्वोपपत्तेः सर्वत्र प्रथमार्थकल्पने बहुधा वाक्यभेदस्याश्रयणीयत्वात् द्वितीयान्तेषु तदर्थात्यागे प्रथमान्तपदघटितमन्त्रयोरेव तदाश्रयणेन लाघवात्। अपि च श्वेताश्वतरोपनिषदि 'एको हि रुद्र' इति मन्त्रे शिवव्यतिरिक्तस्य जगदीश्वरत्वं निषिध्यते। तस्य ह्ययमर्थः। एक एव रुद्रः न तत्र द्वितीयस्तिष्ठति। किं सर्वात्मना निषिध्यते। न। य इमाँल्लोकानीशनीभिश्शक्तिभिरिष्टे तादृग्द्वितीयो निषिध्यत इति। श्वेताश्वतर एव 'यो देवाना'मिति मन्त्रे तस्य विश्वाधिकत्वं च श्रूयते। तद्विश्वपतित्वलिङ्गम्। तदन्यस्य विश्वपतित्वे तस्य तदधिकत्वासिद्धेः। यद्यप्यत्र प्रार्थनारूपं स्तुतिलिङ्गं दृश्यते तथाप्यत्र यच्छब्दयोगेनानूद्यमानस्य विश्वाधिकत्वस्य प्रापकप्रमाणसोपक्षत्वात्तत्रैव श्वेताश्वतरे श्रूयमाणं 'तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतानां परमं च दैवतम्। पतिं पतीनां परमं परस्ताद्विदाम देवं भुवनेशमीड्यम्। न तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च

तस्य लिङ्गम्। स कारणं कारणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिप' इत्यादिकं शब्दतोऽर्थतश्च तत्प्रापकं प्रमाणमिति ततो निर्विवादविश्वाधिकत्वसिद्धिरनुसन्धेया। 'नन्वग्निर्वै देवानामवमो विष्णुः परमः तदन्तरेण सर्वा अन्या देवता'इति बह्वृचब्राह्मणे विष्णोस्सर्वदेवतोत्कर्षश्श्रूयत इति चेन्मैवम्। आग्नावैष्णवपुरोडाशार्थवादस्यास्य 'अग्निर्मुखं प्रथमो देवताना' 'मग्निरेतु प्रथमो देवताना' 'मग्निस्सर्वा देवता' 'अग्निमुखा वै देवाः' 'राजानौ वा एतौ देवतानां यदग्नीषोमा'वित्यादिश्रुतिभि'र्यथाग्निर्देवतानां स्यादृतूनां कुसुमाकरः। द्विपदां ब्राह्मणश्श्रेष्ठ' इत्यादिस्मृतिभिः 'हुताशनपुरोगमा' इत्यादिविष्णुपुराणादिलिङ्गैश्चाग्नेरुत्कर्षप्रतीतेस्सर्वदेवतान्यूनत्वायोगेनाग्निरवम इत्यंशे कांश्चिद्देवताविशेषान्प्रत्यग्नेरवमत्वपरतया सङ्कुचितार्थत्वस्यासदालम्बनार्थवादत्वरूपस्य वक्तव्यतया तत्समभिव्याहृते 'विष्णुः परम'इत्यंशेऽपि तथा तस्योचितत्वात्। यत्त्विममर्थवादमवलम्ब्य 'ग्रहणार्थं च पूर्वमिष्टेस्तदर्थत्वा'दिति (जै०) पूर्वतन्त्राधिकरणे सिद्धान्तवर्णनं तदविवक्षितार्थं कञ्चिदर्थवादमवलम्ब्य प्रवृत्ते पूर्वपक्षे तथाभूतमेवार्थवादान्तरमवलम्ब्य तन्निराकरणार्थ 'महृदयवाचामहृदया एव प्रतिवाचो भवन्ती'ति न्यायेन प्रवृत्तं कृत्वाचिन्तारूपमिति तत्रैवाधिकरणे व्यक्तम्। एतेन 'विश्वस्मादिन्द्र उत्तरः। न किरिन्द्र त्वदुत्तर'इत्यादिमन्त्रेष्विन्द्रादीनामपि विश्वोत्तरत्वं दृश्यत इत्यपि शङ्का निरस्ता। कर्मविधिस्तावकार्थवादवत् कर्मान्वयिपदार्थस्मृत्यर्थानां मन्त्राणामप्यन्यपरत्वाविशेषेणानन्यपरवेदान्तप्रतिपन्नार्थविरुद्धार्थसमर्पणाक्षमत्वात्कर्मान्वयिपदार्थे ष्वसमर्थानामत एवानूहनीयानां तद्विशेषणानां मन्त्रेषु बहुलमुपलब्धेश्च। 'इयमेव सा या प्रथमा व्यौच्छ'दित्यादौ इष्टकासु परमेश्वरीयधर्मारोपेण स्तुतिवदिन्द्रे परमेश्वरधर्मारोपेण स्तुतिसम्भवाच्च। अपि चाथर्वशिखायां ध्येयनिर्धारणार्थे 'ध्यायीतेशान'मित्यादिसन्दर्भे स्वाभाविकनिरतिशयैश्वर्यवानत एव सकलफलप्रदानशक्तश्शिवो मुमुक्षुभिर्ध्येय इति प्रतिज्ञाय ब्रह्मादयः किं न तादृशाः येन ते तैर्ध्येया न स्यु'रित्याकाङ्क्षायां तेषां शिवादुत्पत्तिवर्णनेन ते परिच्छिन्नैश्वर्या इति सूचयित्वा शिवोऽपि कुतश्चिदुत्पन्नश्चेत्सोऽपि तथा स्यादित्याशङ्कापरिहारार्थं तस्योत्पत्त्यभावं प्रतिपाद्य सोपपत्तिकमनितरसाधारणं तस्य सर्वैश्वर्यमुपसंहृतम्। तदेतत्सर्वं'मत्ता चराचरग्रहणा' (ब्र० १-२-९ सू) दित्यनन्तराधिकरणे स्फुटीकरिष्यते। ततश्च ब्रह्मादीनां ध्येयत्वव्यवच्छेदायैश्वर्य- परिच्छेददोषमुद्भाव्य ध्येयत्वेनोपदिष्टस्य शिवस्य तद्दोषपरिजिहीर्षया निरतिशयैश्वर्यप्रतिपादनं सङ्कुचितैश्वर्यपरत्वे अन्यत्रोद्भावितदोषपरिहारालाभेन सङ्कोचासहिष्णुत्वात् सर्वलोकगत्याकाशानन्तत्वप्रतिपादनवदन्यथासिद्धम्। उदाहृतमन्यच्च देवतान्तरैश्वर्यप्रतिपादनं चातुर्मास्यफले क्षयिष्णुन्यक्षय्यत्वव्यपदेशवत् सङ्कुचितार्थपरं नेतुं शक्यमन्यथासिद्धम्। 'ब्रह्मादयोऽपि लोकानां सर्गस्थित्यन्तहेतवः। निग्रहानुग्रहं प्राप्ताः शिवस्य वशवर्तिनः। शिवः पुनर्न कस्यापि निग्रहानुग्रहास्पदम्।

अतोऽनतिशयैश्वर्यं तस्यैवेति सुनिश्चित'मिति पुराणरीत्या प्रवृत्तत्वेन व्यस्तोत्कर्षापकर्षासहिष्णुत्वादप्यनन्यथसिद्धम् उपपत्तिरूपतात्पर्यलिङ्गत्वादपि प्रबलम्। न चैवंभूतं नारायणस्य विश्वपतित्वादिवर्णनम्। लोकाक्षिगृह्याम्नातो 'विष्णवे सर्वाधिपतय'इति मन्त्रो न पूर्वमन्त्रप्रतिपन्नेभ्योऽग्न्यादिदेवेभ्यो व्यवच्छिद्य नारायणे सर्वैश्वर्यप्रतिपादकः। द्वादशसु होमेषु प्रत्येकं विनियुक्तानां मन्त्राणामेकवाक्यत्वाभावात् प्रत्येकं चतुर्थ्यन्तानामग्न्यादिपदानां शिखावाक्यान्तर्गतपदानामिव केभ्यश्चित्सर्वैश्वर्यव्यवच्छेदे क्वचित्तत्प्रतिपादने च सामर्थ्याभावाच्च। तत्र च 'रुद्राय भूताधिपतये स्वाहे'ति मन्त्राम्नातो रुद्रो लोकपालः। इन्द्रादिप्रायपाठात्। लोकपालरुद्रश्च शिवकलाविर्भावयुक्तः कश्चिद्गणनाथः। कूर्मपुराणे लोकपालपुर्यष्टकवर्णनप्रस्तावे 'तस्याश्च पूर्वदिग्भागे शङ्करस्य शुभा पुरी। नाम्ना यशोवती पुण्या सर्वेषां सुदुरासदा। तत्रेशानस्य भवनं रुद्राविष्टतनोश्शुभम्। गणेश्वरस्य विपुलं तत्रास्ते स गणैर्वृत' इति श्लोकैस्तथाविष्करणात्। तस्मादिह नारायणस्यात्मभूतः परमेश्वर एव विश्वपतित्वादिधर्मैः प्रतिपाद्यत इति सूत्रे शारीरपदं मूर्त्यात्मपरतया प्रयुक्तम्। ब्रह्मविष्णुरुद्रेश्वरसदाशिवानां मूर्तयो हि पञ्चकृत्यकारिण्यः शिवस्य साधारण्यो मूर्तयः। ब्रह्मादयस्त्वसाधारण्येन तास्वेकैकाभिमानिनो मूर्त्यात्मान इति। शारीरपदमपि तत्रतत्र शरीरे भव इति व्युत्पत्त्या तत्समानार्थम्।। एवं पूर्वपक्षसिद्धान्तप्रकारं सूत्रार्थं च शब्दगत्यार्थगत्या च 'सहस्रशीर्षं देय'मित्यारभ्येत्यादिना 'नारायणात्मा परमेश्वरः श्रूयत इति समीचीन' मित्यन्तेन सन्दर्भेण सङ्ग्रहेण प्रदर्श्योत्तरसूत्रमवतारयितुमाशङ्कते-**नन्विति।** अयमर्थः। नारायणस्यात्मा तदन्तर्यामी परमेश्वर इत्ययुक्तम्। नारायणः खल्वत्र परं ब्रह्मेति श्रूयते। अतस्स एवान्तर्यामीति युक्तम्। उपरितनसन्दर्भपर्यालोचनयापि तथैव स्पष्टमवसीयते। तत्र ह्युपासकस्य हृदयपुण्डरीकं प्रस्तुत्य 'तस्य मध्ये महा'नित्यादिना 'सन्तापयति स्वं देह' मिति देहस्वामित्वलिङ्गावगमितं जीवात्मानमग्निशब्दलक्षितं तन्मध्यगतमुक्त्वा 'तस्य मध्ये वह्निशिखे'त्यादिना तत्प्रभारूपान्तर्हृदयचिच्छक्तिं हृदयपुण्डरीकमुकुलावच्छेदकृतदीर्घभावेन दीपशिखाकारां तन्मध्यगतामुक्त्वा तन्मध्ये तदन्तर्यामितया निर्दिश्यमानः परमात्मा प्रकृतो नारायण एव भवेत्। न च 'पद्मकोशप्रतीकाश' मित्यादिना वर्ण्यमानं हृदयपुण्डरीकं नाशब्दनिर्दिष्टस्योपासकस्य। किं तु प्राक्शब्दसन्निधापितस्य नारायणस्यैव। यथा 'हृदयस्याग्रेऽवद्यती' त्यत्र निर्दिष्टं हृदयं प्राक्प्रस्तुतस्य पशोरेव न तु यजमानस्य। अतो नारायणस्योपासकत्वपर्यवसानान्नायमुपास्यः परमात्मा। किं तु पूर्वानुवाके 'यः परस्स महेश्वर' इति प्रस्तुतः शिव एवेति वाच्यम्। प्राक् परं ब्रह्म परं ज्योतिः परमात्मेति प्रतिपादितस्य नारायणस्योपासकत्वेनान्वयायोगात्। अतः 'य एषोऽक्षिणि पुरुषो दृश्यत'इत्यत्रोपासकाक्षिवदुपासकहृदयमुपासनास्थानत्वेन निर्दिश्यते। तन्मध्यवर्ती परमात्मा चाव्यवहितप्रकृतो नारायणः न तु व्यवहितप्रकृतश्शिव इति युक्तम्।

'आत्मा नारायणः पर'इति नारायणस्यैव प्राक्परमात्मत्वेनोक्तत्वात् उपास्यपरमात्मविभूतिषु 'स ब्रह्मा स शिवस्सेन्द्र' इति शिवस्य परिगणनाच्च। ननु, प्रागुपास्यत्वेन निर्दिष्टस्योपासनास्थानवर्तित्वप्रतिपादनमुचितम्। शिव एव च 'तस्मिन्यदन्तस्तदुपासितव्य'मिति पूर्वानुवाकविहितायामुपासनायामुपास्यत्वेन निर्दिष्टः। तत्रोपास्यपरस्य यत्पदस्य पूर्वापरमन्त्रगतरुद्रमहेश्वरनामसमर्पितशिवपर्यवसायित्वात्। मैवम्। 'सहस्रशीर्षं देव'मित्यारभ्य नारायणगुणकीर्तनवैयर्थ्यपरिहाराय तदुपासनविधेः कल्पनीयत्वेन तस्याप्युपास्यत्वेन प्रकृतत्वात्। एतेन 'पद्मकोशप्रतीकाश'मित्यादेः पूर्वानुवाकविहितशिवोपासनासम्बन्धिहृदयपुण्डरीकसंस्पर्शात्तदपेक्षितगुणविधिपरत्वमवसीयत इत्यपि शङ्का निरस्ता। नारायणगुणकीर्तनकल्प्यतदुपासनविधिना शिवोपासनाप्रकरणस्य विच्छिन्नत्वात्। न च जुह्वादीनामव्यभिचरितक्रतुसम्बन्धवद्धृदयस्याव्यभिचरितशिवोपासनासम्बन्धोऽस्ति। येन प्रकरणाभावेऽपि जुह्वादिद्वारेण पर्णतादीनां क्रत्वन्वयवद्धृदयद्वारेण तद्धर्माणां वाक्यद्वारेण तदन्वयो भवेत्। उपासनासम्बन्ध एव हि हृदयस्य नाव्यभिचरितः। लौकिकचिन्तादिसाधारण्यात्। अत एव 'शुक्रं प्रविध्य हृदयं प्रविध्ये'त्यादिमन्त्राणां हृदयद्वारेण न विद्याङ्गत्वम्। तस्मान्नारायणगुणकीर्तनसामर्थ्यकल्प्योपासनोपास्यत्वेन प्रकृतस्स एवोपासकहृदयपुण्डरीकमध्यगतजीवान्तर्यामित्वेन प्रतिपाद्य उपास्य इति शिवस्य तदन्तर्यामित्वं तदुपास्यत्वं च वक्तुमयुक्तमित्येवमाशङ्कानिराकरणार्थमिदं सूत्रमिति।।सू।। **कर्मकर्तृव्यपदेशात्**।।४।। कर्मकर्तृपदद्वयं भावप्रधानमभिप्रेत्य साध्याहारं सूत्रं व्याचष्टे-**कर्मत्वमिति। प्रकृतस्येति।** 'य एषोऽक्षिणी'त्यत्र शब्दसन्निधापितस्य कस्यचित्सम्बन्धिोऽभावात् उपासकस्याक्षि गृह्यते। इह शब्दसन्निधापिते सम्बन्धिनि लभ्ये नातथाभूतः सम्बन्धी ग्राह्यः। 'नारायणपरं ब्रह्मे'त्यादिकं सहस्रशीर्षत्वादिगुणकीर्तनं च नोपासकत्वान्वयविरोधीति समर्थयिष्यत इति भावः। **परमेश्वर एवेति**। परमेश्वर एव 'परमात्मा व्यवस्थित' इत्युक्तः परमात्मा नारायणहृदयपुण्डरीकमध्यवर्तित्वेनोच्यते ध्येयत्वेन हेतुनेति योजना। ध्येय एव हि ध्यानस्थानवर्तित्वेन वक्तुमुचितः। ध्येयत्वं च परमेश्वरस्यैव पूर्वानुवाके प्रतिपन्नम्। तत्र च परमात्मशब्दोऽपि वर्तितुमर्हति। 'अणोरणीया'निति विद्योपक्रममन्त्रे तस्य महामहिमयुक्तात्मनः प्रस्तुतत्वादिति भावः। नन्वेतावता परमेश्वरस्यैवादित्यपुरुषान्तर्वर्तित्वेनेव नारायणहृदयपुण्डरीकवह्निशिखामध्यवर्तित्वेनास्मदाद्युपास्यत्वमत्र लभ्यते न तु नारायणोपास्यत्वमपि। तथा च कथं 'कर्मकर्तृव्यपदेशा'दिति सूत्रोपपत्तिरित्याशङ्क्याह-**तत इति।** यस्मात्प्रकृतो नारायणो हृदयपुण्डरीकसम्बन्धित्वेनान्वेति ततो हृदयपुण्डरीकवर्तित्वेनोक्तस्य पूर्वानुवाके हृदयवदुपास्यत्वस्य दृष्टतयात्रापि नारायणहृदयपुण्डरीकवर्तित्वेनोक्तस्य नारायणोपास्यत्वप्रतीतौ तन्निर्वाहाय 'महाज्ञेय'मिति नारायणविशेषणम्। महान् 'धातुः प्रसादान्महिमानमीश'मिति प्राङ्हत्त्वेन वर्णितो भवादिनामाष्टकान्तर्गतमहान्नामा च परमेश्वरो ज्ञेयः उपास्योऽस्येत्येवमर्थकं वक्तुमुचितमिति तेन

विशेषणेन परमेश्वरनारायणयोर्ध्यानक्रियायां कर्मकर्तृभावो व्यपदिश्यत इत्यर्थः। एवं 'महाज्ञेय'मिति विशेषणस्य सिद्धान्तोपयोगित्वं सूचयितुमेव भाष्ये तावत्पर्यन्तं विषयवाक्यं लिखितम्। **तन्यायोऽत्रेति।** तथैवात्रापि विष्णोरुपास्यविभूत्यन्तर्गतिर्विवक्षितेत्यभ्युपगन्तव्यम्। विध्यैक्यादिति भावः। ब्रह्मविष्णुरुद्राणां परमेश्वरविभूतित्वं श्रुत्यन्तरे सिद्धमित्युदाहरति-**यो वै रुद्र इति।** नारायणानुवाके विष्णोरुपास्यविभूतिविवक्षायामपि तदनभिधानमुपासकत्वनिर्देशेनैव तल्लाभादित्याह-**अत्रेति।** उत्तरसूत्रमवतारयितुमाशङ्कते-**सहस्रशीर्षेति।** पुरुषसूक्ते सहस्रशीर्षत्वादिविशिष्टं पुरुषमुपक्रम्य तस्य निजैकांशसमाप्तजगद्विशिष्टतया सकलजगदुपादानत्वमुक्तम्। स एव पुरुषो नारायणानुवाकेऽपि 'सहस्रशीर्ष'मित्यारभ्य 'व्याप्य नारायणः स्थित'इत्यन्तेन प्रतिपाद्यते। स च पुरुषः परं ब्रह्मेति युक्तम्। ततोऽन्यत्र जगदुपादानत्वासम्भवात्। 'उतामृतत्वस्येशानः' 'नान्यः पन्था'इत्यादिलिङ्गैः पुरुषसूक्तस्य च परब्रह्मविषयत्वावगमात्। आहत्य चात्र परं ब्रह्मेति प्रतिपाद्यते। ब्रह्म च सर्वोपास्यं प्रसिद्धम्। अतस्तस्यान्योपासकत्वेनान्वयकथनमयुक्तमिति शङ्कानिराकरणार्थमुत्तर-सूत्रमित्यर्थः।।सू।। **शब्दविशेषात्**।।५।। **नारायणपरमिति।** समस्तपदरूपादत्रत्यशब्दविशेषादेव नारायणाद्भिन्नं ब्रह्म प्रतीयते। अतो नारायण एव ब्रह्मेति शङ्कात्र नावकाशमासादयतीति भावः। कथं तर्हि तस्य जगदुपादानत्वोक्तिरित्याशङ्क्य सहस्रशीर्षत्वादिविशिष्टनारायणाख्यपुरुषावस्थस्य परमेश्वरस्य जगदुपादानतायाः प्रकृत्यधिकरणे व्यवस्थापयिष्यमाणत्वात्तत्रापि तदुक्तिरुपपद्यत इत्याह-**परब्रह्मण इति।** 'नारायणपरं ब्रह्मे'ति मन्त्रेणापि प्रकृत्यधिकरणे व्युत्पादयिष्यमाणः स एवार्थः प्रतिपाद्यते। तत्र हि 'विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवती'ति विश्वस्य पुरुषपारतन्त्र्यरूपं तदुपजीवकत्वं पुरुषस्य च विश्वात्मकत्वमुक्तम्। 'पतिं विश्वस्ये'त्यनन्तरमन्त्रे च तदेव विश्वात्मत्वमनूदितम्। तर्हि ब्रह्मणः किं न विश्वात्मत्वमित्याकाङ्क्षायां तस्यैव विश्वात्मत्वं विश्वोपादानत्वरूपं पुरुषावस्थाद्वारकमित्यनेन मन्त्रेण प्रतिपाद्यते। तत्र 'नारायणपरं ब्रह्मे'त्यनेनैतदुच्यते। शिवाख्यं पर ब्रह्म नारायणपरं नारायणप्रधानम्। नारायणपरतन्त्रमिति यावत्। निरतिशयस्वातन्त्र्यशालिनः कथं वा पारतन्त्र्यमित्याकाङ्क्षायामुच्यते 'तत्वं नारायणः परः' परो नारायणश्चिच्छक्त्यवस्थारूप आदिनारायणः शक्त्यादिपृथिव्यन्तसकलतत्वात्मकः। तदुपादानत्वात्। अतः परब्रह्मणो जगदात्मना भवनं पुरुषावस्थाद्वारकमिति तस्य तत्पारतन्त्र्यमुक्तमिति भावः। एवं जडोपादानतायां परब्रह्मणः पुरुषावस्थापत्त्यपेक्षत्वमुक्तम्। चेतनोपादानतायां तदुच्यते। 'नारायणपरो ज्योतिः' प्रकाशात्मकं चेतनोपादानतावस्थं ब्रह्मापि नारायणपरः। पूर्ववद्व्याख्येयम्। लिङ्गव्यत्ययश्छान्दसः। तत्र हेतुरुच्यते'आत्मा नारायणः परः'। परो नारायणः आत्मा सर्वोऽपि चेतनवर्गः। तदुपादानत्वादिति। इत्थमेव यजुर्वेदारण्यकभाष्ये भट्टभास्करेणापि व्याख्यातोऽयं मन्त्रः। यत्तु भाष्ये 'नारायणपर'मित्यस्य 'नारायणात्पर'मिति विवरणं तदर्थसिद्धंस्य नारायणभिन्नत्वस्य

प्रकटनार्थम्। तथैवार्थपरिग्रहे तु नारायणपरमित्यनेनैवार्थसिद्धस्यानुवादो 'नारायणः पर' इति। ब्रह्मणो नारायणभिन्नत्वे हि नारायणोऽपि तद्भिन्नो भवति। उत्तरनारायणे 'नारायणपरो ज्योतिरात्मे'त्येकं वाक्यम्। त'न्नारायणः पर' इति तत्सिद्धार्थानुवादः। अस्मिन्पक्षे न विश्वात्मत्वोपपादकोऽयं मन्त्रः किं तूपास्योपासकभावाक्षिप्तप्रधानोपसर्जनभावोपपादक इति विशेषः। ननु 'नारायणपरं ब्रह्मे'त्यस्य नारायणः परं ब्रह्मेत्येवार्थः। विभक्त्यश्रवणं तु 'सुपां सुलु'गित्यादिना तल्लोपादित्यभ्युपगन्तव्यम्। 'अहमेव परं ब्रह्म परं तत्वं पितामह। अहमेव परं ज्योतिः परमात्मा त्वहं विभुः।' इति लिङ्गपुराणे तदुपबृंहणदर्शनादिति चेदुच्यते। अयं श्लोकस्तत्र महालिङ्गप्रादुर्भावात्पूर्वं ब्रह्मनारायणयोः परस्परोत्कर्षविवादप्रस्तावे ब्रह्माणं प्रति नारायणोक्तिरूपः। अनन्तरं तद्विवादप्रशमनार्थोऽद्भूत-महालिङ्गमध्यसन्निहितस्य शिवस्य वचनैः 'पश्यतं मां महादेवं भयं सर्वं विमुच्यताम्। युवां प्रसूतौ गात्राभ्यां मम पूर्वं महाबलौ। त्रिधा भिन्नोऽस्म्यहं विष्णो ब्रह्मविष्णुभवाख्यया। सर्गरक्षालयगुणैर्निष्कलः परमेश्वरः। संमोहं त्यज विष्णो त्व'मित्यादिभिः तत्रैवापोदितः कथमर्थतत्त्वव्यवस्थापकः। प्रत्युत मोहावस्थावचनत्वाविष्करणेन भ्रान्तिगृहीतमन्त्रार्थोपन्यासोऽयम्। मन्त्रार्थस्तु गूढोऽन्यः इत्येव तदाशयः स्पष्टं प्रतिभाति। तात्पर्यसङ्ग्रहे त्वाचार्यैः नारायणेत्येतद्भिन्नं पदमिति प्रौढिवादेनाभ्युपगम्य नारायणस्य परब्रह्मत्वादिकं विश्वपतित्वादिकमिवोपास्यगतमेव तदभेदभावनादार्ढ्यसिद्धमुपन्यस्तमित्युपपादितम्। 'ब्रह्मोच्यते परमसौ परमं च तत्वं ज्योतिः परं च परमेश्वर पद्मनाभः। त्वद्भावनैकरसिकस्त्वदनन्यभावान्मन्त्री यथा गरुडभावनया गरुत्मान्।' इति। तत्रायमाशयः। 'ऋतं सत्य' मित्युपास्यरूपसमर्पकेऽग्रिमानुवाके तस्यापि परब्रह्मभावः श्रूयते। न चोभयोस्स युक्तः। नाप्युपासकः परं ब्रह्म उपास्यस्तदन्य इति युक्तम्। तस्मादुक्तैव रीतिरनुसर्तव्या। न चाभेदभावनासिद्धा उपास्यधर्मा उपासकेनैव स्वगतत्वेन वर्ण्यन्ते न तु तटस्थवचनैरिति नियमोऽस्ति। 'उत्ताना वै देवगवा वहन्ती'त्यादिवदन्यभ्रमसिद्धस्याप्यन्येनानुवदितुं युक्तत्वादिति।। नारायणस्य हृदयसम्बन्धान्महाज्ञेयमिति विशेषणाच्च सिद्धं परमेश्वरोपासकत्वमुपबृंहणने दृढीकर्तु-मुत्तरसूत्रमित्याह-**नारायणस्येति**।।सू।। **स्मृतेश्च**।।६।। **अभिव्यज्यत इति**। महायोगेश्वर इति श्रीकृष्णस्य योगनिष्ठामुक्त्वा तत्सामर्थ्यात्पारमेश्वरप्रदर्शनोक्त्या तद्योगः परमेश्वरविषय इति ज्ञाप्यते। गरुडभावनां विना गारुडरूपस्येव परमेश्वरभावनां विना तदीयरूपस्यान्येन प्रदर्शयितुमशक्यत्वात्। परमेश्वरभावनासामर्थ्यादेव दधीचेनापि तदीयं रूपं प्रदर्शितमिति लिङ्गपुराणादिषु दक्षदधीचसंवादे प्रतिपादितत्वाच्चेति भावः। 'दिव्यं ददामि ते चक्षुः पश्य में योगमैश्वर'मिति पूर्वश्लोके कृष्णस्य परमेश्वरविषयो योगः कण्ठतः प्रतिपादितः। तथापि कृष्णेन दर्शितं रूपं पारमेश्वरमित्येतदपि ज्ञापयितुमयं श्लोक उदाहृतः। यत्त्वाश्वमेधिके 'द्रष्टुमिच्छामि ते रूपमैश्वरं तन्निदर्शये'त्युदङ्कप्रार्थनायां 'ततस्स तस्मै प्रीतात्मा दर्शयामास तद्वपुः। शाश्वतं वैष्णवं

धीमान्ददृशे यद्धनञ्जय'इति तस्मै कृष्णेन प्रदर्शिते रूपे वैष्णवपदं तदुपक्रमानुसारेणैश्वरपरम्। नामाष्टकादिषु शिवेऽपि विष्णुनाम्नः प्रसिद्धेः। 'तद्दृष्ट्वा परमं रूपं विष्णोर्वैष्णवमद्भुतम्। विस्मयं च ययौ विप्रस्तद्दृष्ट्वा पारमेश्वर'मिति तदनन्तरश्लोके विष्णोरित्यनेनैव विष्णुसम्बन्धित्वे सिद्धे वैष्णवमित्यस्यैश्वरविषयतयैवापौनरुक्त्यस्य वक्तव्यत्वाच्च कृष्णस्य परमेश्वरतया दर्शनेन विस्मयप्रदर्शनाच्च। 'संहरस्व पुनर्देव रूपमक्षय्यमुत्तमम्। पुनस्त्वां स्वेन रूपेण द्रष्टुमिच्छामि शाश्वत'मित्यनन्तरश्लोके पुनः परिग्राह्ये प्राचीनरूपे स्वकीयविशेषणत्वेनैतस्यान्यदीयत्वविभावनाच्च। 'अहं यथावदाराध्य'इति सौषुप्तिके पर्वणि अश्वत्थामानं प्रति परमेश्वरवचने यथावदाराधनं विवक्षितम्। 'तस्मादिष्टतम'इत्यादिवाक्यशेषात्। 'यथान्तरोपचारेण नरः स्त्रीषु प्रसीदति। तथान्तरेण ध्यानेन प्रसीदति महेश्वरः। बहिःकर्मकरा यद्वन्नातीव फलभागिनः। दृष्टा नरेन्द्रभवने तद्वदत्रापि कर्मिणः। हिंसादोषविनिर्मुक्तो विशुद्धश्चित्तसाधनैः। ध्यानयज्ञः परस्तस्मादपवर्गफलप्रदः।' इत्यादिवचनैरुपासकस्यैवात्यन्तं परमेश्वरप्रसादविषयत्वावगमादित्येतदभिप्रायेणैतदपि वचनमुदाहृतम्। यद्यपि 'देवदेवस्त्वचिन्त्यात्मा अजय्यो विष्णुरव्ययः। सर्वरूपं भवं ज्ञात्वा लिङ्गेऽर्चयति तं प्रभुम्। तस्मिन्नभ्यधिकां प्रीतिं करोति वृषभध्वजः।' इत्यादिभिर्द्रोणपर्वादिवचनैर्नारायणस्य बाह्या परमेश्वरार्चा ततः परमेश्वरस्य तस्मिऽधिका प्रीतिश्च प्रतिपन्ना। इहापि 'सत्यशौचार्जवत्यागैस्तपसा नियमेन च। क्षान्त्या भक्त्या च धृत्या च कर्मणा मनसा गिरे'ति पूर्वश्लोकानुरोधात्कायिकार्चनादिरूपमपि यथावत्समाराधनमिह विवक्षितमिति प्रतीयते। 'तस्मादिष्टतमोऽन्यो नास्ती'तिवाक्यशेषावगतात्यन्तशिवप्रीतिकरत्वलिङ्गात् तदाराधनमिह महायोगरूपं मानसमेव प्रधानं विवक्षितम्। कायिकादिकं तु तदङ्गतयेत्यवसीयत इति भावः।। ननूत्तरसूत्रेणोद्भाव्य निराक्रियमाणा परमेश्वरेऽल्पौकस्त्वानुपपत्तिशङ्का न पूर्वपक्षिणस्सङ्गच्छते। 'तस्याश्शिखाया मध्ये परमात्मा व्यवस्थित'इति निर्दिश्यमान उपास्यो नारायणः न तु परमेश्वर इति पूर्वपक्षशङ्कानिराकरणं हि कर्मकर्तृव्यपदेशसूत्रमारभ्य प्रस्तुतम्। अल्पौकस्त्वानुपपत्तिशङ्का च परमेश्वर इव जगदुपादानतया व्यापिनि नारायणेऽपि तुल्या। अतश्शङ्कावकाशाभावादुत्तरसूत्रस्य तन्निराकरणार्थत्वमनुपपन्नमित्याशङ्क्यावतारयति-**पुनरिति।** अयमाशयः। अल्पौकस्त्वादयमुपास्यः परमात्मा न व्यापी परमेश्वरः किं तु जीवविशेषः कश्चिदितीह शङ्का न तु सर्वजगदुपादानभूतो नारायण इति शङ्का। इह जीव उपास्य इति शङ्कायाः कः प्रसङ्ग इति चेत् य एव नारायण उपास्य इति शङ्कायाः प्रसङ्गः सः। न ह्यत्र नारायण उपास्यः परमात्मेति मुख्यः पूर्वपक्षः। किं तु 'पतिं विश्वस्ये'त्यादौ नारायणः स्वकीयैरेव विश्वपतित्वादिभिः प्रतिपाद्यः न तूपास्यपरमात्माभेदभावनाप्राप्तैस्तदीयैरित्येवंरूपः। तदुपयोगितया परनारायण उपास्यः परमात्मा न तु शिवः येनोपास्यशिवाभेदभावनासिद्धैस्तदीयैर्विश्वपतित्वादिभिर्नारायणः प्रतिपाद्यो भवेदिति शङ्का कर्मकर्तृसूत्रमारभ्य निराकृता। इह तु

सूत्रे जीवरूपः कश्चिद्देवताविशेष उपास्यः परमात्मा। अणीयसस्तस्याल्पौकस्त्वोपपत्तेः। तथा च न तदुपासकश्चिच्छक्त्यवस्थारूपो नारायणः। नापि विश्वपतित्वादयस्तस्य सन्ति धर्माः। येन तदभेदभावनासिद्धैस्तैर्नारायणः प्रतिपाद्यो भवेदिति शङ्का निराक्रियत इति।।सू।। **अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च**।।७।। अर्भकशब्दोऽल्पत्वलक्षकः। ओको हृदयपुण्डरीकावच्छिन्नवह्निशिखारूपं परमात्मन उपासनास्थानमल्पमिति वस्तुस्वभावादवगम्यते। 'नीवारशूकवत्तन्वी'त्यल्पत्वव्यपदेशादप्यवगम्यते। अतोऽल्पस्थानत्वान्नायं परमात्मा व्यापी परमेश्वरः किं तु कश्चिज्जीवरूपो देवताविशेष इति शङ्काभागस्यार्थमाह-**नीवारेति**। उपास्ये पूर्वानुवाकश्रुतैरीशरुद्रमहादेवमहेश्वरनाम- भिरुत्तरानुवाकश्रुतेन विरूपाक्षत्वादिविशिष्टविग्रहेण 'परं ब्रह्म' ति श्रवणेन चावगम्यमानस्य परमेश्वरभावस्याविचलत्वादल्पस्थानत्वश्रवणमेवाल्पस्थानतया ध्येयत्वाभिप्रायेण नेतव्यम्। तथा च ध्यानार्थेनाल्पस्थानत्वेनाविरोधात् आकाशवत्सर्वगत एव परमेश्वर इति परिहारभागस्यार्थं दर्शयति-**नेत्यादिना**। ननूत्तरसूत्रेण परमेश्वरस्य शरीरित्वप्रयुक्तदोष निराकरणं क्रियते। पूर्वमन्तरादित्यविद्याधिकरणे तन्निराकरणं कृतम्। अग्रेऽपि गुहाधिकरणे भोक्त्रापत्त्यधिकरणे च करिष्यते। अतो नात्र तच्छङ्कावकाशोऽस्तीत्याशङ्क्यावतारयति-**पुनरिति**। इहाधिकरणे परमेश्वरस्यासाधारणविग्रहविशेषेण शरीरित्वप्रयुक्तदोषशङ्का तदीयविग्रहस्येतरशरीर-विलक्षणत्वसमर्थनेन निराक्रियते। गुहाधिकरणे तस्यास्मदादिशरीरानुप्रवेशेन शरीरित्वप्रयुक्ता दोषशङ्का श्रुतिबलेन निराकरिष्यते। भोक्त्रापत्त्यधिकरणे सकलचिदचिच्छरीरकत्वप्रयुक्ता सा लोकदृष्टान्तबलेन निराकरिष्यते। अन्तरादित्यविद्याधिकरणे तु वक्ष्यमाणन्यायावष्टम्भेन भाष्यमात्रे तन्निराकरणं कृतम्। न तत्सूत्रारूढमतो नास्य सूत्रस्य वैयर्थ्यमित्याशयः।।सू।। **सम्भोगप्राप्तिरिति चेन्न वैशेष्यात्**।।८।। **अतोऽस्य त्रिलोचनत्वादीति**। 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ती'ति श्रुतेः सशरीरत्वे सुखदुःखादिकमवर्जनीयम्। अतो नायमुपास्यः परमात्मा परमेश्वरः। किं तु लोकपालरुद्रवत्कश्चन रुद्रविशेष इत्यभ्युपगन्तव्यमिति भावः। तदभिप्रायेणैव पूर्वसूत्रनिराकरणीयापि शङ्का सा तत्रेशमहेश्वरश्रुतिभ्यां तत्समभिव्याहृततया सर्वदेवप्रथमहिरण्यगर्भस्रष्टृविषयतया संसाररुग्द्राव-कत्वप्रवृत्तिनिमित्तया रुद्रश्रुत्याऽग्रिमानुवाकश्रुतस्य विग्रहस्य पारमेश्वरत्वप्रसिद्ध्या ब्रह्मश्रुत्या च निराकृता। इह तु परमेश्वरस्य दुःखादिप्रसङ्गान्नास्ति स्वतो विग्रहः। कदाचिद्विरूपाक्षत्वादिविशिष्टेषु रुद्रविशेषाणां विग्रहेष्वाविर्भावसत्त्वात् तथाभूतविग्रहत्वव्यपदेशः। अत एव 'स्थाने संशयितुं विप्रा'इति वायुसंहिताध्याये सदाशिवादिविग्रहेष्वेव तस्याविर्भाव उक्तः। अतोऽत्र कश्चन रुद्रविशेष एवोक्तरूपविग्रहाभिमान्यत्रोपास्यः प्रतिपाद्यते। तत्र कादाचित्कपरमेश्वरावेशसद्भावमात्रेणोपचारात्त-स्मिन्परमेश्वरनामादिश्रवणमिति शङ्का। परमेश्वरस्य विग्रहवत्त्वे दोषाप्रसक्तेः। कैवल्योपनिषदादिषु

तदीयदिव्यविग्रहप्रसिद्धेर्नात्र तदीयश्रुतिलिङ्गानां क्लिष्टगत्यान्यत्र नयनं कार्यम्। वायुसंहितायां सदाशिवादिविग्रहेष्वेव तस्याविर्भाव इति प्रतिपादनं तद्वत्प्राकृतो विग्रहस्तस्यासाधारणो नास्तीत्येवमर्थं न तु विग्रहमात्रनिरासार्थम्। तस्यास्संहिताया उपक्रम एव 'अप्राकृतवपुः श्रीमान् लक्ष्यलक्षणवर्जित'इत्यादिश्रवणात्तदुत्तरभागेतदसाधारणसाम्बविग्रहवर्णनदर्शनाच्चेत्येवमत्र निराक्रियत इति विशेषः। परमेश्वरविग्रहस्याप्राकृतत्वेनास्मदादिशरीरेभ्यो विशेषान्न तद्वत्त्वेन सुखदुःखदोषप्रसङ्ग इति परिहाराभिप्रायमाह-**नेत्यादिना**। वैशेष्यं विशेषः। स्वार्थे ष्यञ्। वैशेष्यादित्यस्यास्मदादिभ्यः परमेश्वरस्य शक्तिविशेषवत्त्वरूपवैलक्षण्यपरत्वेनार्थान्तरमाह-**अतः परब्रह्मण इति**। नन्वेवमस्या दहरविद्यायाः परमेश्वर उपास्य इति निर्णयोऽनुपपन्नः। नारायणस्यैव तदुपास्यत्वात्। तस्यैव हि नारायणानुवाके भूयान्महिमा वर्णितः। न च वाच्यं पूर्वानुवाके 'तस्मिन्यदन्तस्तदुपासितव्य' मित्युपासनाविधिः श्रूयते। तत्रैव चोपासनाफलं श्रूयते 'परामृतात्परिमुच्यन्ति सर्वे' इति। तत्र चोपास्यपरस्य यत्पदस्य 'यो देवानां' 'यद्वेदादा' विति पूर्वोत्तरमन्त्रप्रयुक्तरुद्रमहेश्वरशब्दनिर्दिष्टे परमेश्वरे पर्यवसानं स्यात्। अत उत्पत्तिशिष्टोपास्यान्तरावरुद्धायामुपासनायां नारायणस्योपास्यत्वेनान्वयासम्भवात्परिशेषादुपासकत्वेनैवान्वयः स्यादिति। उत्पत्तिशिष्टगुणान्तरावरोधासिद्धेः उदाहृतपूर्वापरमत्रयोरपि नारायणपरत्वात्। तथा हि 'यो देवाना' मित्यादिना हिरण्यगर्भकारणत्वानुवादो 'नारायणाद्ब्रह्मा जायत'इत्यादिपुरोवादानुसारेण नारायणविषय इति रुद्रपदस्य तस्मिन्नेव कथंचिद्वृत्तिः कल्पनीया। 'यद्वेदादा'विति मन्त्रस्यायमर्थः। 'प्रणवाद्या मुने वेदाः प्रणवे पर्यवस्थिता'इति स्मृतेर्वेदानामुत्पत्तिलयस्थानतया तदाद्यन्तयोः 'प्रतिष्ठितः स्वरः ॐकारः। तस्य प्रकृतिरकारः। 'अकारो वै सर्वा वा'गित्यकारस्य सर्ववाक्प्रकृतित्वश्रवणात्। तस्मिन्स्वरप्रकृतावकारे लीनस्याकारात्मतां प्राप्तस्य तस्योङ्कारस्य यः परो वाच्यः। 'इदंपरः' 'तत्पर' इत्यादौ वाच्ये परपदप्रयोगदर्शनात्। स महेश्वरः। इत्थं सर्वशब्द जालप्रकृतितया निखिलवाचकोत्कृष्टाकारवाच्यस्य निखिलवाच्योत्कर्षो युक्त इत्यौचितीमवलम्ब्याकारवाच्यस्य सर्वेश्वरत्वप्रतिपादकोऽयं मन्त्रो नारायणपर एव पर्यवस्यति। अत एवाग्रे 'सहस्रशीर्षं देव' मित्यारभ्य नारायणस्यैव महिमवर्णनं दृश्यते। तस्मादत्र परमेश्वरस्योपास्यत्वनिर्णयो न युक्त इत्याशङ्कां मनसि निधायोपक्रमादिभिस्तथा निर्णयस्य युक्तत्वमुपपादयितुमुपक्रमते-**अत्र खल्विति**। उपक्रमस्य तावदीशश्रुत्या परमेश्वरविषयत्वमुपपादयति-**उपक्रम इति**। अनन्तरसन्दर्भस्यापि तमेव परमेश्वरमीशशब्देनोपक्रान्तं सर्वनाम्ना परामृश्य प्रवृत्तत्वान्नान्यविषयत्वशङ्कावकाश इत्याह-**पुनरिति**। 'यो देवाना'मिति मन्त्रस्य तु स्पष्टं परमेश्वरविषयत्वमित्याह-**ततश्चेति**। 'निमित्तभूतः परामृष्ट' इत्यस्यायमभिप्रायः। यच्छब्दयोगेनानुवाद्यतया प्रतीयमानस्यापि हिरण्यगर्भजनयितृत्वस्य 'नारायणाद्ब्रह्मा जायत'इति न

पुरोवादः। इहानूद्यमानस्य रुद्रशब्दवाच्यपरमेश्वरगतहिरण्यगर्भजनयितृत्वस्य ततः प्राप्त्यभावात्। न ह्यनूद्यमानार्थप्रापकस्य पुरोवादत्वं कल्पयितुं युक्तम्। तथा सति 'यदाग्नेयोऽष्टाकपालो' 'य एवं विद्वान्साम्ना स्तुवीते'त्यादीनामपि यत्किञ्चित्पुरोवादकल्पनया तदनुवादकत्वाभ्युपगमापत्तेः। नारायणे रुद्रपदस्य लक्षणया 'नारायणाद्ब्रह्मा जायते' इत्यस्य प्रापकत्वमुपपद्यत इति चेन्न। अन्योन्याश्रयापत्तेः। रुद्रशब्दस्य नारायणे लक्षणासिद्धौ हि तस्य प्रापकतोपपत्त्याऽस्य तदनुवादत्वं सिद्ध्यति सिद्धे च तदनुवादत्वे लक्षणाकल्पनमिति। तस्मादनुगुणपुरोवादासम्भवेऽस्य 'य एवं विद्वान् साम्ना स्तुवीते'तिवदननुवादकत्वमेव भवेत्। सम्भवति चास्यानुगुणपुरोवादः 'ब्रह्मविष्णुरुद्रेन्द्रास्ते सम्प्रसूयन्त 'इत्यादिः। यदि तु द्वयोर्हिरण्यगर्भकारणत्वं न सम्भवेत् तदा रुद्रशब्दस्य वा नारायणे लक्षणा कल्प्येत। नारायणशब्दस्य वा परमेश्वरे। सम्भवति तु द्वयोरपि तत्कारणत्वं निमित्तोपादानभावेनेति। एतदभिप्रायेणैव एतदधिकरणारम्भभाष्येऽपि 'हिरण्यगर्भोपादानस्ये'ति नारायणो विशेषितः। यो' देवाना'मिति मन्त्रानन्तरमाम्नातो 'यस्मात्परं नापरमस्ति किञ्चि'दिति मन्त्रः। तस्य शिवविषयत्वं 'यस्मात्परतरं नास्ति नापरं च परात्मनः। न ज्यायोऽस्ति न चाणीयो नमस्तस्मै स्वयंभुवे।। येनेदमखिलं व्याप्तं यन्मया मूर्तयः स्मृताः। तस्मै शिवाय महते नमः सूक्ष्माक्षरात्मन' इत्याश्वलायने स्पष्टीकृतम्। तदनन्तरं 'न कर्मणा न प्रजया धनेन' 'वेदान्तविज्ञानसुनिश्चितार्था'इति मन्त्रद्वयमाम्नायते। तद्वर्णितपरमेश्वरप्राप्त्युपायतदुपासनाविध्याकाङ्क्षानुकूलतया परमेश्वरप्राप्तेर्महाफलत्वप्रतिपादकमिति दर्शयति-**स एवेति।** नाकस्सुखैकरूपं परमाकाशात्मकमुमापतेराद्यं स्थानम्। तं परेण तस्योपरि भूमौ या गुहा परमेश्वरस्य दिव्यमन्दिरं तत्र निहितं सन्निहितमिति प्राप्तेः स्थानमुक्तं पूर्वमन्त्रे। तस्य स्थानस्य मुक्तप्राप्यत्वमुत्तरमन्त्रेण विवृतम्। तत्र 'सन्यासयोगाद्यतयश्शुद्धसत्वा'इत्यस्य विवरणं-**त्यक्तफलकर्मानुष्ठायिनामिति।** यतिशब्दोऽत्र न चतुर्थाश्रमपरः। गृहस्स्थादीनामप्युपासनाधिकारात्। किं तु 'ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च त' इति कोशदर्शनात् जितेन्द्रियमात्रपर इत्याह-**यतीनामिति।** परामृतशब्दो नित्यमुक्तस्य परमेश्वरस्य वाचकः। तस्माल्ल्यब्लोपे पञ्चमीत्यभिप्रेत्य व्याचष्टे-**प्राप्यत्वेन वर्णित इति। महेश्वराख्यं तदुपवर्णितमिति।** अत्रायमाशयः। 'यद्वेदादा'विति मन्त्रस्य न तावदुपक्रमानुरोधेन नारायणविषयतयार्थवर्णनम्। ईशरुद्रामृतश्रुतिभिस्तस्य शिवविषयत्वेन व्यवस्थितत्वात्। नाप्युपसंहारानुरोधेन। 'ऋतं सत्य' मित्युपसंहारस्यापि विरूपाक्षश्रुत्यादिभिस्तथात्वात्। नापि 'सहस्रशीर्षं देव' मित्याद्यग्रिमसन्दर्भानुरोधेन। तस्योपक्रमोपसंहारैकरूप्यावगतशिवविषयत्वानुरोधेनोत्पत्तिशिष्टोपास्यावरोधेन च परिशेषात् 'पद्मकोशप्रतीकाश' मित्यादिलिङ्गात् 'महाज्ञेय' मिति विशेषणसामर्थ्याच्चोपासकविषयत्वपर्यवसानात्। नाप्यस्मिन्नेव मन्त्रे विधेयानुरोधेन। 'यः परः स महेश्वर' इति विधेयसमर्पकस्य महेश्वरपदस्य श्रुतिस्मृत्यभिधानकोशलोकप्रसिद्धिभिः शिवासाधारणत्वात्। नाप्यनुवादानुरोधेन। अनुवाद्यभागस्य विधान्तरेणाप्यर्थोत्प्रेक्षणसम्भवेना-

व्यवस्थितार्थत्वात्। तथा हि 'अग्निमीळे पुरोहितं' 'योनिस्समुद्रो बन्धुः' 'समानं वर'मित्येषु श्रुतानामकारोकारमकाराणां वेदादिमध्यान्तवर्णत्वप्रसिद्धेरकारो वेदादौ प्रोक्तः स्वरः स एव तदन्ते प्रतिष्ठितः 'समानं वर'मित्यत्रोपान्त्यः। ततः परं स्वाराभावेन तस्यैवान्त्यस्वरत्वात्। तस्य प्रकृतिलीनस्य। प्रकृतिर्विष्णुः। 'वासुदेवः परा प्रकृति'रिति श्रवणात्। तस्मिन् लीनस्य वाच्यवाचकभावेनाभेदं प्राप्तस्य 'वाच्यवाचकयोर्भेदो नात्यन्तं विद्यते क्वचिदि'ति वायूक्तेः। तस्य वेदान्त्यभागपाठगमिताभ्यर्हितभावाकारवाच्यस्य प्रकृतिरूपस्य विष्णोः। परः प्रधानभूतः। 'प्रकृतिस्त्वं पुमान्रुद्रस्त्वयि तद्वीर्यमाहितम्। त्वन्नाभिपङ्कजाज्जातः पञ्चवक्त्रः पितामह'इत्यादिषु विष्णुरूपां प्रकृतिं प्रति पुरुषत्वेन 'प्रसिद्धस्स महेश्वर'इति तन्मन्त्रार्थ उत्प्रेक्षितुं शक्यते। अथवास्य मन्त्रस्य यजुर्वेदपठितत्वात् वेदोऽत्र यजुर्वेदः। तस्यादौ पठितः स्वर इकारः 'इषेत्वे'ति। स एव तदन्तेऽपि प्रतिष्ठितः 'एव तपती'ति। प्रकृतिर्लक्ष्मीः। 'तत्र श्रीरभवद्देवी कमलायतनलोचने'त्युपक्रम्य 'मूलप्रकृतिरव्यये'ति कौर्मे प्रयोगात्तस्यां वाच्यवाचकभावेन लग्नस्य दीर्घभावं प्राप्तस्येति यावत्। ईकारस्य लक्ष्मीवाचकत्वात् तस्य यः परः। पञ्चमीविषये षष्ठी। तस्माद्य उत्तरो वर्णः स महेश्वरः। उकारवाच्यो महेश्वर इत्युक्तं भवति। इत्युत्प्रेक्षितुं शक्यते। अकारवाच्यो महेश्वर इति तदर्थोत्प्रेक्षायामपि शिव एव तदर्थ इत्यपि वक्तुं शक्यते। प्रणवस्य ह्यकारो न प्रकृतिः 'अकारो वै सर्वा वा' गिति श्रुतें'रोङ्कारेण सर्वा वाक्सन्तृण्णे'तिवत्स्तावकत्वात्। किं तु 'मात्रामात्राः प्रतिमात्राः कृत्वे'ति तापनीयश्रुतौ उत्तरोत्तरमात्राणां पूर्वपूर्वमात्रालयस्थानत्वप्रतिपादनात् 'यावसाने चतुर्थ्यर्धमात्रे'ति व्यपदिष्टः प्रणवः सूक्ष्मावस्थारूपत्वेन प्रसिद्धो नादस्तत्प्रकृतिः। भागवतेऽपि तथैवोक्तम्। तत्र हि'समाहितात्मनो ब्रह्मन्ब्रह्मणः परमेष्ठिनः। हृदाकाशादभून्नाद'इति प्रस्तुत्य 'ततोऽभूत्त्रिवृदोङ्कार' इत्युक्तम्। नादस्य तु शिव एवार्थः। 'एवं तिसृभिरेवैतन्मात्राभिरखिलं त्रिधा। अभिधाय शिवात्मानं बोधयत्यर्धमात्रये'त्याद्यथर्वशिखानुसारिपुराणवचनात्। सर्वथायं मन्त्रः पदस्वारस्यानुरोधादुपक्रमाद्यनुरोधाच्च शिवविषय एवेति। **तत्किंरूपमित्याकाङ्क्षायामिति।** 'ऋतं सत्य'मिति मन्त्रस्तावत्प्रकृतविद्यायां रूपसमर्पक इति प्रकरणानुवृत्त्यावसीयते। 'अथवा परमात्मानं परमानन्दविग्रह'मित्यादिभिः योगयाज्ञवल्क्यादिवचनैश्च तथावसीयते। स च विरूपाक्षश्रुत्या तदीययौगिकार्थत्रिलोचनत्वप्रसिद्ध्यतिशयलिङ्गेन 'कृष्णपिङ्गल' मित्युमासाहित्यलिङ्गेन 'ऊर्ध्वरेत' मित्यूर्ध्वज्वलनात्मकवह्निरेतस्त्वलिङ्गेन 'उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठ' मित्येतद्विद्यापेक्षितोपास्यस्वरूपसमर्पककैवल्योपनिषन्मन्त्रैकार्थ्येन तस्य मन्त्रस्य 'नमस्कुर्यान्महादेव-मृतं सत्यमितीश्वरम्। निवेदयीत चात्मानं यो ब्रह्माणमितीश्वरे॥' इति, कूर्मपुराणे, शिवपूजाविधौ शिवनमस्कारे विनियोगविधानेन बोधायनसूत्रे 'अथातो महादेवस्य पादोदकप्राशनविधिं व्याख्यास्याम' इत्युपपक्रम्य 'ऋतं सत्य' मिति मन्त्रेण प्राशये'दिति शिवपादोदकप्राशने

विनियोगविधानेन च शिवपरमित्यपि स्पष्टमवसीयत इति भावः। एवं च सति मध्ये प्रसक्तस्य नारायणस्य 'स क्रतुं कुर्वीते'ति प्रसक्तस्य जीवस्येवोपासकत्वेनान्वय इत्येव युक्तमिति भावः। नन्वत्र नारायणस्योपासकत्ववर्णनं किमन्येषामस्मिन्नुपासने अधिकारव्यावर्तनार्थं नेत्याह-**अत्रेति।** पूर्वानुवाके 'वेदान्तविज्ञानसुनिश्चितार्था'इति मन्त्रेण सर्वेषामधिकारप्रदर्शनान्नेतरेषामधिकारव्यवच्छेदार्थं नारायणग्रहणम्। किं तु विशिष्टपुरुषानुष्ठितत्वेनास्योपासनस्यातिशयाविष्करणार्थमित्यर्थः। तस्मादस्मिन्नेव प्रकरणे परमेश्वरनारायणयोरुपास्योपासकभावप्रतिपादनात्परमेश्वराभेदभावना-सिद्धैर्विश्वपतित्वादिभिस्तदीयैर्धर्मैर्नारायणस्य वर्णनमित्येतदुपपद्यत इत्यधिकरणार्थमुपसंहरति-**तदिहेति।** पारमेश्वरत्वेन प्रसिद्धानामपि विश्वपतित्वादीनामन्यदीयत्वप्रत्यायकश्रुतिप्राबल्यशङ्कया पूर्वपक्षदशायां नातिस्पष्टतेति पादसङ्गतिः।। **इति अनुपपत्त्यधिकरणम्॥२॥**

इति शिवार्कमणिदीपिका प्रथमं सर्वत्र प्रसिद्धाधिकरणम् समाप्तम्

अथ अत्तृधिकरणम् ॥ सू॰ ९–१० ॥

शाङ्करभाष्यम्

अत्ता चराचरग्रहणात्।।९।। कठवल्लीषु पठयते–"यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः। मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स" (१/२/२४) इति। अत्र कश्चिदोदनोपसेचनसूचितोऽत्ता प्रतीयते। तत्रं किमग्निरत्ता स्यात्, उत जीवः, अथवा परमात्मेति संशयः ; विशेषानवधारणात्, त्रयाणां चाग्निजीवपरमात्मनामस्मिन् ग्रन्थे प्रश्नोपन्यासोपलब्धेः।।

किं तावत् प्राप्तम्? अग्निरत्तेति। कुतः? "अग्निरन्नाद" (बृ॰ १/४/६) इति श्रुतिप्रसिद्धाभ्याम्। जीवो वाऽत्ता स्यात्; "तयोरन्यः पिप्पलं स्वाद्वत्ती" ति दर्शनात्, न परमात्मा; "अनश्नन्नन्योऽभिचाकशीती" (मुण्ड॰ ३/१/१) ति दर्शनादिति।।

एवं प्राप्ते ब्रूमः–अत्ताऽत्र परमात्मा भवितुमर्हति। कुतः? चराचरस्य ग्रहणात्। चरांचरं हि स्थावरजङ्गमं मृत्यूपसेचनमिहाद्यत्वेन प्रतीयते। तादृशस्य चाद्यस्य न परमात्मनोऽन्यः कात्स्न्र्येनात्ता संभवति। परमात्मा तु विकारजातं संहरन् सर्वमत्तीत्युपपद्यते। ननु–इह चराचरग्रहणं नोपलभ्यते, कथं सिद्धवच्चराचरग्रहणं हेतुत्वेनोपादीयते? नैष दोषः ; मृत्यूपसेचनत्वेन सर्वस्य प्राणिनिकायस्य प्रतीयमानत्वात्, ब्रह्मक्षत्रयोश्च प्राधान्यात्प्रदर्शनार्थत्वोपपत्तेः।।

यत्तु परमात्मनोऽपि नात्तृत्वं संभवति; "अनश्नन्नन्योऽभिचाकशीती" ति दर्शनात्–इति, अत्रोच्यते–कर्मफलभोगस्य प्रतिषेधकमेतद्दर्शनम्; तस्य संनिहितत्वात्, न विकारसंहारस्य प्रतिषेकम्; सर्ववेदान्तेषु सृष्टिस्थितिसंहारकारणत्वेन ब्रह्मणः प्रसिद्धत्वात्। तस्मात् परमात्मैवेहात्ता भवितुमर्हति।।९।।

प्रकरणाच्च।।१०।। इतश्च परमात्मैवेहात्ता भवितुमर्हति; यत्कारणं प्रकरणमिदं परमात्मनः–"न जायते मियते वा विपश्चिदि" (कठ॰ १/२/१८) त्यादि। प्रकृतग्रहणं च न्याय्यम्। "क इत्था वेद यत्र स" इति च दुर्विज्ञानत्वं परमात्मलिङ्गम्।।१०।।

इति शाङ्करभाष्यम् द्वितीयअत्तृधिकरणम् समाप्तम्

वार्तिकम्

अत्ता चराचरग्रहणात्।।९।। यदि–"अनश्नन्नन्योऽभिचाकशीती" ति विशेषश्रुतेर्न परमात्मनः संभोगप्राप्तिरित्युच्यते, एवं तर्हि–"यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः। मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स" इति मन्त्रेण स्वसामर्थ्यात्प्रकाश्यमानोऽत्ता न परमात्मा भवेत्, तस्य पूर्वन्यायेनात्तत्वायोगात्। ओदनतदुपसेचनसम्बन्धितया श्रूयमाणो योग्यतयाऽत्तैव सर्वनामार्थ इति निश्चीयते। स च जीवो भवितुमर्हति। कुतः? चराचरात्मकं विश्वमेवात्रौदनेन गृह्यते; ब्रह्मक्षत्रपदयोस्त्ववयुत्यानुवादत्वेन तत्प्रदर्शनार्थत्वात्। विश्वं चान्नं जीवस्य; "तयोरन्यः पिप्पलं स्वाद्वत्ति" "सप्तान्नानि मेधया तपसाऽजनयत्पिते" त्यादिश्रुत्यन्तरात्, "जीवो जीवस्य जीवनम्" इति स्मृतेश्च।।

यद्येकस्य जीवस्य सर्वान्नात्तृत्वं नोपपद्यते दृष्टविरोधादित्याग्रहः, तर्हि अग्निरेवात्राऽत्ता; "अग्निरन्नाद" इति श्रुत्यन्तरात्, तस्याप्यत्र प्रकृतत्वात्।।

यद्यग्निप्रकरणस्य समाप्तत्वाद् न तदनुवृत्तिरित्याग्रहः, तर्हि पञ्चवृत्तिः प्राण एवात्ताऽस्तु; "यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतम्" इति तदनुवृत्तिदर्शनात्, तस्य चाशनायापिपासावत्त्वेनान्नात्तृत्वस्य श्रुतिस्मृतिप्रसिद्धेः, "योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति" "अनश्नन्नन्योऽभिवाकशीती" त्यादिश्रुतेर्न परमात्मा प्रकृतत्वेऽप्यत्तेति।।

एवं प्राप्ते ब्रूमः-ओदनसम्बन्धसूचितोऽत्ताऽत्र परमात्मा भवितुमर्हति, न जीवाद्यन्यतमः ; कुतः? अन्नत्वेन चराचरस्य ग्रहणात्। स्नेहद्रव्यस्थानीयेन मृत्युनोपसिक्तं यावद् ब्रह्मक्षत्रोपलक्षितं स्थावरजङ्गमात्मकं विश्वम्, तत्सर्वमिहोदनत्वेन परिगृह्यत इत्युक्तम। न च परमात्मनोऽन्यस्य कात्स्न्येन तदत्तृत्वमुपपद्यते; असामर्थ्यात्, प्रत्युत स्वस्यैव स्वेनानदनात्।।

ननु-परमात्मनोऽपि तन्नोपपद्यते; 'अनश्नन्नन्योऽभिचाकशीति" ति तस्य तत्प्रतिवेधादित्युक्तमिति–चेत्, नैष दोषः ; पिप्पलं स्वाद्वत्ती" ति कर्मफलभोगस्य संनिधानात्, तस्यैव–"अनश्नन्नि" ति परमात्मनि प्रतिषेधात्। अत्तृत्वमिह न चर्वणम्, निगरणं वा, भोग्यसम्बन्धो वोच्यते; असंभवात्, न हि ब्रह्मक्षत्रादिलक्षणं जगत् केनचिदेकेन चर्व्यते, निगीर्यते, भुज्यत इत्येतत् संभवति। किं तर्हि? नाशयितृत्वम्; "मृत्युर्यस्योपसेचनमि" ति श्रुतिसामर्थ्यात्। तच्च परमात्मनि

संभवति; ''यत्प्रयन्त्यभिसंविशन्ती'' ति श्रुत्यन्तरात्। तस्मात् परमात्मैवेह सर्वसंहारकर्ताऽत्ता परिगृह्यते। अग्न्यादेश्चापरिग्रहे कारणं पूर्वमेवोक्तम्।।

यदपि पञ्चवृत्तिप्राणस्यात्तृत्वमभिहितम्, तच्च तस्येहानुपक्रमादेव परास्तम्। न च-''यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतम्'' इत्यत्र पञ्चवृत्तिप्राणः प्राणशब्देन परिगृह्यत इति-वाच्यम्; सर्वजगच्चेष्टाश्रयत्वेन ब्रह्मण एव तत्र प्राणशब्दत्वात्, ''यदेष आकाश आनन्दो न स्यात्'' ''को ह्येवान्यात् कः प्राण्यादि'' ति च श्रुत्यन्तरे तथात्वेन ब्रह्मण एवावगमात्।।९।।

प्रकरणाच्च।।१०।। ''न जायते म्रियत'' इत्यादिना ब्रह्मप्रकरणस्य प्रतीयमानत्वात् ततोऽपि परमात्माऽत्तेत्यवगच्छामः। चकारात् ''क इत्था वेद यत्र स'' इति दुर्ज्ञानत्वप्रतिपादनं परमात्मनोऽत्तृत्वे लिङ्गमिति दर्शयति।।

इति वार्त्तिकम् द्वितीयअत्तृधिकरणम् समाप्तम्

प्रदीपः

अत्ता चराचरग्रहणात्।।९।। अत्ता, परमात्मा, चराचरात्तृत्वात्। अत्र पूर्वपक्षेऽत्तृत्वं भोक्तृत्वम्, सिद्धान्ते संहर्तृत्वम्। तत्र यदि भोक्तृत्वम् तर्हि पूर्वसूत्रे परमात्मनस्तन्निषेधाद् जीवोऽग्निर्वाऽत्ता, यदि संहर्तृत्वम्, तर्हि परमात्मा। तस्य ब्रह्मलिङ्गत्ववर्णनाद् जन्मादीनां प्रत्येकलक्षणत्वमिति पर इति विवेकः। पूर्वाधिकरणेऽत्तृत्वं ब्रह्मणो निरस्तम्, अत्र तु तत्समर्थ्यत ति प्रत्युदाहरणसङ्गतिः, अथवा-प्रासङ्गिकी सङ्गतिः ; भोक्तृत्वबोधकवाक्यान्तरोपस्थितेः।।

अत्ताऽत्र निर्विशेषचैतन्याध्यस्ततया प्रतिपाद्यत इति सिद्धान्ताद्, निर्विशेषब्रह्मणो दुर्ज्ञानत्वं पर्यवस्यतीति सिद्धान्तदृष्ट्या निर्गुणब्रह्मपरमेवेदं वाक्यम्, पूर्वपक्षदृष्ट्या तु सविशेषब्रह्मपरमिति विवेकः। तत्र सिद्धान्ते वरत्रयातिरेकेण न प्रश्नान्तरम्, पूर्वपक्षे तु सविशेषब्रह्मविषयप्रश्नान्तरमपि स्वीक्रियत इति निष्कर्षः। इदं तु वाक्यं कठोपनिषदि वर्तते, इति प्रकृतोपयुक्तानि प्राकरणिकानि वाक्यानि संगृह्णीमः।।

तानि यथा-कठोपनिषदि हि मृत्युनचिकेतः संवादे मृत्युना दत्तेषु त्रिषु वरेषु प्रथमेन पितृसौमनस्थं द्वितीयेनाग्निविद्यां च वरित्वा तृतीयवरतया-"येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके। एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीय" इत्यात्मविद्या नचिकेतसा वृता। तत्र च मृत्युना बहुशः प्रलोभितमपि नचिकेतसम्-"यस्मिन्निदं विचिकित्सन्ति मृत्यो यत्संपराये महति ब्रहि नस्तत्। योऽयं वरो गूढमनुप्रविष्टो नान्यं तस्मान्नचिकेता वृणीत" इति प्रतिवदन्तं बहुशः स्तुत्वाऽन्ततः-"कामस्याप्तिं जगतः प्रतिष्ठां क्रतोरानन्त्यमभयस्य पारम्। स्तोमं महदुरुगायं प्रतिष्ठां दृष्ट्वा धृत्या धीरो नचिकेतोऽत्यस्त्राक्षीः" इत्यभिमुखीकृत्यात्मविद्यामुपदिदेश मृत्युः-"तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्टं पुराणम्। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति। एतच्छ्रुत्वा संपरिगृह्य मर्त्यः प्रवृह्य धर्म्यमणुमेताप्य स मोदते मोदनीयं हि लब्ध्वा विवृतं सद्म नचिकेतसं मन्ये। अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्। अन्यत्र भूताच्च भव्याच्च यत्तत् पश्यसि तद्वद।। सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति। यदिच्छन्तो ब्रह्मचर्य चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्।। एतद्ध्येवाक्षरं ब्रह्म ह्येतदेवाक्षरं परम्। एतद्ध्येवाक्षरं ज्ञात्वा यो

यदिच्छति तस्य तत्।। एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्। एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते।। न जायते म्रियते वा विपश्चिद् नायं कुतश्चिद् न बभूव कश्चित्। अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।। हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्। उभौ तौ न विजानीतो नायं हन्ति न हन्यते।। अणोरणीयान् महतो महीयानात्माऽस्य जन्तोर्निहितो गुहायाम्। तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः।। आसीनो दूरं व्रजति शयानो याति सर्वतः। कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति।। अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्। महान्तं विभुमात्मानं मत्वा धीरो न शोचति।। नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्।। नाविरतो दुश्चरितान्नाशान्तो नासमाहितः। नाशान्तमनसो वापि प्रज्ञानेनैनमाप्नुयात्।। यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः। मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः।।'' इति।।

अत्रान्यत्र धर्मादित्यादि प्रश्नान्तरमिति पूर्वपक्षिणो मन्यन्ते, सिद्धन्तिनस्तु तृतीयस्यैव प्रश्नस्य स्पष्टीकरणार्थमयं प्रश्नः, न स्वतन्त्रं वरदानातिरेकेण प्रश्नान्तरमिति। ''न जायते म्रियते वे'' त्यादिवाक्यानां तृतीयप्रश्नविषयत्व एव स्वारस्यम्। अत्र-''तं दुर्दर्शमि'' त्युपदेशवाक्ये गूढत्वम्, अध्यात्मयोगेन ज्ञेयत्वं च प्रतिपाद्यमानं धर्माधर्माद्यतीतत्वमेव विषयीकरोति। अत एव-''अन्यत्र धर्मादि'' तिवाक्ये-''यत्तत् पश्यसि तद् वदे'' ति तत्पदप्रयोग उपपद्यते। तृतीयवरस्यैवोपक्रमे-''वक्ता चास्य त्वादृगन्यो न लभ्य'' इति श्रूयमाण एवार्थः ''कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हती'' त्युपसंहारेऽपि मृत्युवाक्येन प्रतिपाद्यत इति तावदन्तैकवाक्यता स्वतन्त्रप्रश्नान्तरकल्पने नोपपद्यते। तथाच स्थूलसूक्ष्मशरीरविवेकेनोपदिश्यमान . आत्मा जीवस्याप्यधिष्ठानं तुरीयं चैतन्यमेवेत्यकामैरपि स्वीकर्तव्यम्। इदं च न केवलं व्यष्टयपेक्षया, किन्तु समष्टयपेक्षयापीति बोधनार्थमेव-समष्टयात्मनोऽप्यधिष्ठानतया स्वरूपचैतन्यं प्रतिपाद्यते-''यस्य ब्रह्म च क्षत्रं चे'' ति। तथाच सिद्धान्तमते तुरीयचैतन्याधिष्ठिततया सगुणब्रह्मणोऽपि निरूपणं नाप्रासङ्गिकम्। पूर्वपक्षिमते तु-स्वतन्त्रप्रश्नकल्पना, प्रकृततृतीयवरस्यास्पष्टीकरणम्, ''क इत्था वेद यत्र स'' इत्यत्र यत्रपदार्थानन्वयः, चराचरभक्षणायोगस्य जीवादौ कल्पनमप्रासङ्गिकमित्यादिदूषणानि समापतन्ति। सर्वथा त्वत्तृत्वमत्र संहर्तृत्वरूपमिति विवेचनार्थमधिकरणारम्भस्त्वपेक्षित एव; अन्यथा संशयानिवृत्तेरिति निष्कर्षः।।

विषयवाक्यं संगृह्णाति-*कठवल्लीष्वित्यादिना*।। संशयं प्रदर्शयति-*तत्रेत्यादिना*।। *अग्निरिति*।। द्वितीयप्रश्नविषयत्वेन तस्यापि प्रकरणादिति भावः। *जीव इति*।। ''येयं प्रेत'' इति तृतीयप्रश्नविषयतया तस्य प्रकरणादिति भावः। परमात्मेति ।। दुर्दर्शत्वादिभिर्जीवातिरिक्तात्मन एव

प्रकरणार्थत्वावगमात् तस्य च समष्ट्यात्माधिष्ठानत्वस्यापि विवक्षणीयत्वेन समष्ट्यात्मैवात्र परमात्मपदेन व्यपदिश्यते, न तु प्राकरणिकं तुरीय चैतन्यमिति भावः।। *विशेषानवधारणादिति*।। परमात्मनोऽनत्तृत्वाद्, अग्नेः प्रकरणस्य समाप्तत्वात्, जीवेऽपि दुर्दर्शत्वाद्यसंभवात् त्रयातिरिक्तस्य च वर्णनासंभवाद् यः कोऽपि कथं चनात्रात्तेति विवक्षणीय इति भावः।

एकैकस्मिन् पक्षेऽपि वाक्यं योजयति-*अग्निरत्तेत्यादिना*।। ननु-''यस्य ब्रह्म चे'' ति वाक्ये कथं चराचरग्रहणमित्यत आह-*चराचरं हीत्यादिना*।। उपसेचनम्=ओदनमिश्रण-साधनद्रवद्रव्यविशेषः। *संहरन् सर्वमत्तीति*।। तथाच संहर्तृत्मेवात्रात्तत्वमिति न पूर्वाधिकरणविरोधः। अन्यत् स्पष्टम्। अत्राधिकरणे-अत्तापदं स्वतन्त्रविषयवाक्यान्तरसूचकमित्यधिकरणान्तरम्। अत्र अत्तृत्वरूपब्रह्मेतरलिङ्गेन ब्रह्मलिङ्गानामभिभवाद् अस्पष्टब्रह्मलिङ्गत्वम्। अत्र परमात्मपदेन तुरीयचैतन्याधिष्ठितं सगुणं ब्रह्मैव समष्ट्यात्मकं विवक्ष्यते; ''एष सर्वेश्वर'' इति श्रुत्यन्तरे तत्र सर्वेश्वरव्यपदेशादिति मत्तव्यम्।।९।।

तुरीयचैतन्यस्यैवात्र प्रकरणात् तदतिरिक्तं तदधिष्ठितं च स्वरूपमेवात्रात्तृपदार्थ इत्याह-*इतश्च परमात्मैवेति*। सर्वेश्वरः समष्टयत्मेत्यर्थः। न हि तुरीये संहर्तृत्वादिकमपि भवतीति भावः। प्रकरणमिदं परमात्मनः, इत्यत्र परमात्मपदं तुरीयचैतन्यपरमेव। प्रकृतग्रहणं च न्याय्यम्। यत्रेत्यत्र यत्रपदेनेति शेषः। पूर्वपक्षिणां मते तु यत्रेत्यनेन सगुणब्रह्मणो विवक्षणापत्त्या प्रकरणविरोधो विशद एव। अथवा-सर्वत्र परमात्मपदेन तुरीयस्यैव ग्रहणम्, यत्रेति त्वभेदे सप्तमीति मन्तव्यम्। अस्मिन् पक्षे तु यथाश्रुतमेव भाष्यम्।।१०।।

इति प्रदीपः द्वितीयअत्तृधिकरणम् समाप्तम्

भामती

कठवल्लीषु पठयते—

'यस्य च ब्रह्म च क्षत्रं चोभे भवत ओदनः।
मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः॥' इति॥

अत्र चादनीयौदनोपसेचनसूचितः कञ्चिदत्ता प्रतीयते। अत्तृत्वं भोक्तृता वा संहर्तृता वा स्यात्। न च प्रस्तुतस्य परमात्मनो भोक्तृतास्ति, 'अनश्नन्नन्योऽभिचाकशीति' इति श्रुत्या भोक्तृताप्रतिषेधात् जीवात्मनश्च भोक्तृताविधानात् *तयोरन्यः पिप्पलं स्वाद्वत्ति इति*। तद्यदि भोक्तृत्वमत्तृत्वं ततो मुक्तसंशयं जीवात्मैव प्रतिपत्तव्यः ब्रह्मक्षत्त्रादि चास्य कार्य्यकारणसङ्घातो भोगायतनतया वा साक्षाद्वा सम्भवति भोग्यम। अथ तु संहर्तृता भोक्तृता ततस्त्रयाणामग्निजीवपरमात्मनां प्रश्नोपन्यासोपलब्धेः संहर्तृत्वस्याविशेषाद्भवति संशयः। किमत्ता अग्निराहो जीव उताहो परमात्मेति? अत्रौदनस्य भोग्यत्वेन लोके प्रसिद्धेर्भोक्तृत्वमेव प्रथमं बुद्धौ विपरिवर्त्तते, चरमं तु संहर्तृत्वमिति भोक्तैवात्ता। तथा च जीव एव। *न जायते म्रियते इति* च तस्यैव स्तुतिः, संहारकालेऽपि संस्कारमात्रेण तस्यावस्थानात्। दुर्ज्ञानत्वं च तस्य सूक्ष्मत्वात्। तस्माज्जीव एवात्तेहोपास्यत इति प्राप्तम्। यदि तु संहर्तृत्वमर्तृत्वं तथाप्यग्निरत्ता *अग्निरन्नादः इति*। श्रुतिप्रसिद्धिभ्याम्। एवं प्राप्तेऽभिधीयते। अत्तात्र परमात्मा, कुतः, चराचरग्रहणात्* उभे यस्यौदनः इति*। *मुत्युर्यस्योपसेचनम् इति*। च श्रूयते तत्र यदि जीवस्य भोगायतनतया तत्साधनतया च कार्य्यकरणसङ्घातः स्थितः न तर्ह्योदनः। नह्योदनो भोगायतनं, नापि भेगसाधनम्, अपि तु भोग्यः। न च भोगायतनस्य भोगसाधनस्य वा भोग्यत्वं मुख्यम्। न चात्र मृत्युरुपसेचनतया कल्प्यते। न च जीवस्य कार्य्यकरणसङ्घातो ब्रह्मक्षत्त्रादिरूपो भक्ष्यः, कस्यचित् क्रूरसत्त्वस्य व्याघ्रादेः कश्चिद्भवेत्, न तु सर्वः सर्वस्य जीवस्य। तेन ब्रह्मक्षत्त्रविषयमपि जीवस्यात्तृत्वं न व्याप्नोति किमङ्ग पुनर्मृत्यूपसेचनप्राप्तं चराचरम्। न चौदनपदात् प्रथमावगतभोग्यत्वानुरोधेन यथासम्भवमत्तृत्वं योज्यत इत युक्तम्। नह्योदनपदं श्रुत्या भोग्यत्वमाह, किन्तु लक्षणया। न च लाक्षणिकभोग्यत्वानुरोधेन *मृत्युर्यस्योपसेचनम् इति* च *ब्रह्मक्षत्त्रं च इति*

श्रुतो सङ्कोचमर्हतः। न च ब्रह्मक्षत्रे एवात्र विवक्षिते। मृत्यूपसेचनेन प्राणभृन्मात्रोपस्थापनात्। प्राणिषु प्रधानत्वेन च ब्रह्मक्षत्त्रोपन्यासस्योपपत्तेः। अन्यनिवृत्तेरशाब्दत्वात्, अनर्थत्वाच्च। तथा च चराचरसंहर्तृत्वं परमात्मन एव, नाग्नेः, नापि जीवस्य। तया च *न जायते म्रियते वा विपश्चिद् इति*। ब्रह्मणः प्रकृतस्य न हानं भविष्यति *क इत्था वेद यत्र सः इति* च दुर्ज्ञानत्वमुपपत्स्यते। जीवस्य तु सर्वलोकप्रसिद्धस्य न दुर्ज्ञानता। तस्मादत्त्ता परमात्मैवेति सिद्धम्।।१०।।

इति भामती द्वितीयअत्तृधिकरणम् समाप्तम्

श्री कण्ठभाष्य

अथ अत्त्रधिकरणम्।।३।।

'यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः। मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः'।। (कठ. २.२५) इति श्रूयतेऽस्य विषयः।। इह मृत्युपसेचनमिलितब्रह्मक्षत्रोपलक्षितनिखिल-चिदचित्प्रपञ्चकबलभोक्तृतया श्रूयमाणः परमेश्वरोऽन्यो वेति संशयः। परमकारुणिकस्य सर्वानुग्राहकस्य सकलभक्षकत्वमनुचितम्। हिंसारूपं हि परप्राणविमोचनम्। हिंसाप्रवृत्तेः क्रोध एव मूलाङ्कुरः। क्रोधस्य चामङ्गलगुणस्य मोह एव मूलकन्दः। तस्य सर्वसंहारनिदानस्य तम एव प्रकृतिः। अतस्तामसः सर्वसंहर्ता।। तामसत्वं नाम आवृतज्ञानादिमत्त्वान्निष्प्रकाशत्वम्। सर्वसंहर्तृ ब्रह्मेत्युक्ते तस्य नित्यशुद्धस्य निरुपाधिकमङ्गलाकरस्य निस्संसारकलङ्कस्य अज्ञानतमोमोहक्रोधा-दिकामङ्गलगुणसंकरप्रसङ्गः। स्वरूपलक्षणतया निर्णीतं सर्वज्ञत्वनित्यतृप्तत्वादिकमनर्थमेव स्यात्। तस्मात् ब्रह्मणोऽन्य एतादृशगुणः संहर्ता भवतीति पूर्वः पक्षः।। सिद्धान्तस्तु-ब्रह्मैव सर्वसंहर्तृत्वेन श्रूयते। कुतः? चराचरग्रहणात्। यदुक्तं निखिलचराचरप्रपञ्चभोक्तृत्वमयुक्तमिति तदेव ब्रह्मत्वे लक्षणं, परिच्छिन्नशक्तेर्जीवस्य सकलचराचरसंहरणसामर्थ्याभावात् 'तस्मा उपसंहर्त्रे महाग्रासाय वै नमः' इति परमेश्वरस्याथर्वशिरसि श्रूयते सर्वसंहर्तृभावो, न क्वचिज्जीवस्य। 'य इमा विश्वा भुवनानि जुह्वत्' (ऋ. सं. ८.३.१६)।। इति ब्रह्मणो निजप्रकाशवह्नौ निखिलभुवनहव्यहौतृत्वमवगम्यते। न चैवमस्ति जीवस्य सामर्थ्यं हव्यकोटिनिविष्टस्य। स्वेतरमखिलं चराचरं चिदचित्प्रपञ्चं स्वात्मनि संहृत्य यदा वर्तते परमेश्वरः तदा सर्वमिदं निरस्तचन्द्रसूर्यादिप्रकाशतया विध्वस्तरात्रिदिनादिकालविभागम् अपगतनामरूपविशेषतया स्थूलसूक्ष्मदेवमनुष्यादिव्यवहारशून्यं तमोमात्रं वर्तते। स एक एव परमेश्वरो निरङ्कुशप्रकाशः सर्वसाक्षी तदानीमपि परिशिष्यते। तथा हि श्रुतिः -'यदा तमस्तन्नदिवा न रात्रिर्न सन्न चासच्छिव एव केवलः।' (श्वे. ४.१८.) इति। अत्र 'न सन्न चासत्' इति सदसतोः पशुपाशयोर्न स्वरूपसत्ता निषिध्यते, किं तु नामरूपविभागार्हं स्थूलत्वम्। ननु, नित्यप्रकाशे शिवे परब्रह्मणि सत्यपि

कथं तमोमयं जगदिति चेत्-न, स्वयंप्रकाशस्य सर्वसाक्षिणः शिवस्य का हानिः। नामरूपशून्यतया ग्रहणायोग्येषु विषयेषु विहतकरणशरीरशक्तीनां जीवानां प्रपञ्चग्रहणं नास्ति मलतिरोहितस्वज्ञानकरणतया शिवस्य स्वप्रकाशरूपस्यापि पूर्वमिव दर्शनं नास्ति। तस्मात् निरस्तसमस्तकार्यविशेषज्ञाना परमसुषुप्तिमयी महावस्था तमइत्युच्यते। तथा हि स्मृतिः 'आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्' (मनु. १. ५.) इति। नामरूपविभागानर्हसूक्ष्मचिद- चित्प्रपञ्चशक्ति-विशिष्टतया शिवः केवल इत्युच्यते। स पुनः सर्गकाले स्वसङ्कल्पमात्रेण समावायिकारणनिरपेक्षमेव स्वस्मात् प्रथमशक्तिपरिस्फुरणपूर्वकं पूर्वतत्तन्नामविशिष्टमेव सकलं चिदचिदर्थजातं सृजति प्रकाशयति। तथाऽभियुक्तसूक्तिः-'चिदात्मैव हि देवोऽन्तः स्थितमिच्छावशाद्बहिः। योगीव निरुपादानमर्थजातं प्रकाशयेत्।।' इति।। ननु, 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' (श्वे० ४. १०) 'तस्माद्विराडजायत' (पुरु०) इत्यादिश्रुत्या मायापुरुषयोरुपादानत्वं श्रूयते। कथं निरुपादनत्वमिति चेत्-सत्यम्, यथा वटनिष्पत्तौ कुलालस्य स्वशरीरपृथक्त्वेन मृत्पिण्ड उपादानं दृश्यते, तथा न परमेश्वरात् पृथक्सिद्धं मायाद्युपादानं, मायादिरूपात् परमेश्वराज्जगदुत्पत्तेः। अतो न विरोधः। ततः स्वरूपापृथगवस्थानसूक्ष्ममायापुरुषः परमेश्वर एव स्वयमुपादानमपीत्युच्यते। तथाऽथर्वशिखायाम्-'ध्यायीतेशानं प्रध्यायितव्यं सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते सर्वाणि चेन्द्रियाणि सह भूतैर्न कारणं कारणानां धाता ध्याता कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः शंभुराकाशमध्ये' इति श्रूयते। ततः सर्वभूतानां यत्र संहारस्तत एव सर्वेषामुत्पत्तिरिति अनन्तानां तेषां यावत् संहतिस्तावत् तत्रैवानन्तशक्तौ शिवे स्थितिः इति सर्वसंहर्ता शिव एव ब्रह्मशब्दाभिधेयः।। यदुक्तं संहारस्य हिंसारूपत्वात् तन्मूलक्रोधाद्यनर्थगुणसंबन्धो ब्रह्मणो भवेत् इति, तदविचारवाग्विलासः। क्रोधा-दिमूलस्य तमोगुणस्य प्राकृतधर्मत्वात्। 'उमासहायं परमेश्वरं प्रभुम्' इत्यारभ्य 'समस्तसाक्षिं तमसः परस्तात्' (कैव) इति श्रुतिरेव भगवती प्रमाणं परमेश्वरस्य तमसः परत्वे। पौराणिकी भणितिरपि परमेश्वरे मोहादिनिवर्तकज्ञानादीनां नित्यसंबन्धमाह-'ज्ञानं वैराग्यमैश्वर्यं तपस्सत्यं क्षमा धृतिः। सृष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव च।। अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे।।' इति। 'अशेषविषयामोघशुद्धबुद्धिविजृम्भणः। आत्मशक्त्यमृतास्वादप्रमोदरसिको युवा।।' इत्यादि च। असंकुचितविश्वः परमेश्वरो हि सिसृक्षुः 'सोऽकामयत बहु स्याम्' (ते.२.६) इति बहुप्रपञ्चभवनायात्मनो मायालक्षणामिच्छारूपां शक्तिमाश्रयति। 'स तपोऽतप्यत' इति तपस्स्वरूपिकया ज्ञानात्मिकया शक्त्या सकलजीवकर्मानुगुणतत्तच्छरीरसामग्रीमालोचयति। आलोच्य च संकल्पितसकलकरणविदग्धया क्रियाशक्त्या 'इदं सर्वमसृजत' इतीच्छाशक्तिभित्तौ निखिलजगच्चित्रमुन्मीलयति। 'तत् सृष्ट्वा, तदेवानुप्राविशत्' इति सकलकार्यजातमनुविश्य

शक्तित्रयसंबन्धेन त्रिगुणभिन्नमूर्तित्रयादिप्रपञ्चरूपो भवति। तदिह सर्वशक्तेः सर्वज्ञस्य शिवस्य महिमा केन विज्ञायते। अतः सर्वसंहर्ता परमेश्वर इति॥

॥सू०॥ प्रकरणाच्च॥१०॥

'महान्तं विभुमात्मानं मत्वा धीरो न शोचति' (कठ. २.२२) 'नायमात्मा प्रवचनेन लभ्यः' इति परमेश्वरस्यैव प्रकरणम्। अतश्च परं ब्रह्म परमेश्वरः सर्वसंहर्ता नान्य इति सिद्धम्॥

इति श्रीकण्ठभाष्यम् द्वितीयअत्तृधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

अथ अत्त्रधिकरणम्।।३।। सू० **अत्ता चराचरग्रहणात्**।।९।। 'यस्य ब्रह्म च क्षत्रं चे'ति मन्त्रे ब्रह्मक्षत्रयोः षष्ठीनिर्दिष्टस्य यस्योदनत्वेन रूपणं कृतं स तयोर्भोक्तेति तदोदनत्वरूपणबलात्प्रतीयते। तत्र यदि ब्रह्मक्षत्रयोरोदनशब्दस्य गौणवृत्तौ भोज्यत्वरूपः प्रसिद्धौदनवृत्तिर्विशेषाकारो निमित्तं स्यात् तदा तयोः प्रसिद्धौदनरीत्या खादिता व्याघ्रादिजीवस्तद्भोक्ता भवेत्। यदि भोज्यत्वापेक्षया सामान्यरूपो भोग्यत्वाकारो निमित्तं भवेत् तदा स्त्रीभृत्यादिरूपेण तयोरुपभोक्ता जीवस्तद्भोक्ता भवेत्। तत्र यद्यपि विशेषाकारस्य गौणवृत्तिनिमित्तत्वसम्भवे सामान्याकारस्तथात्वेन न परिगृह्यते। अत एव 'सिंहो देवदत्त' इत्यादौ क्रौर्यादिविशेषाकार एव गौणवृत्तिनिमित्तं न तु द्रव्यत्वादिसामान्याकार इति लोके दृश्यते। अत एव च पूर्वतन्त्रे 'उद्गातृचमसमेकस्य श्रुतिसंयोगा' (जै० सू०) दित्यधिकरणे 'प्रैतु होतुश्चमसः प्रब्रह्मणः प्रोद्गातृणां प्रयजमानस्ये'त्यध्वर्युप्तैषगतस्योद्गातृपदस्य बहुवचनानुसारेणाजहल्लक्षणया बहुषु प्रवृत्तौ वक्तव्यायामुद्गातृगणमात्रवृत्तिविशेषाकारस्तन्निमित्तं न तु षोडशर्त्विक्साधारणस्सामान्याकार इति निरूपितम्। तथाप्यत्र विनाश्यत्वरूपसामान्याकार एव गौणवृत्तिनिमित्तम्। अतस्संहर्तैव भोक्तेति विशेषणमुखेनोपपादनपूर्वकं संहर्ता किं परमेश्वरः उत सङ्कर्षणरुद्रादिरूपस्तमोगुणोपाधिको देवताविशेषो वेति परमेश्वरस्य संहर्तृत्वसम्भवासम्भवाभ्यां संशयं दर्शयति-**मृत्यूपसेचनेति।** अयमाशयः। अस्मिन्मन्त्रे अन्यदपि रूपकं क्रियते 'मृत्युर्यस्योपसेचन'मिति। उपसेचनं नाम तदुच्यते ॐदनो येन दधिपयःप्रभृतिना तद्भोजनायोपसिच्यते। 'दध्नोपसिच्य भुङ्क्ते' 'पयसोपसिच्य भुङ्क्त' इत्यादिव्यवहारदर्शनात्। ततश्च मृत्योरुपसेचनत्वरूपणबलादोदनत्वेन निरूपितयोर्ब्रह्मक्षत्रयोर्मृत्युमिश्रणं प्रतीयते। तेन ब्रह्मक्षत्रयोरोदनत्वेन रूपितयोरत्ता संहर्त्ता। अदनं संहारः। संहार्यत्वरूपमद्यत्वमोदनशब्दस्य गौणवृत्तौ निमित्तमित्येतत्सर्वं लभ्यते। मृत्युरूपोपसेचनमिश्रणस्य संहाररूप एव ह्यदने उपयोगः न खादनरूपे नाप्युपभोगरूपे। शब्दप्रवृत्तिनिमित्तसंदेहे च समभिव्याहृतपदान्तरार्थसामर्थ्योपस्थितप्रवृत्तिनिमित्तसत्त्वे तदेव ग्राह्यं न पुरुषबुद्धिकल्पनीयमन्यत्। अत एव 'इमां स्पृष्ट्वोद्गायेदिमां हि विश्वा भूतान्युपजीवन्ती'ति वाक्ये 'इमा'मिति सर्वनाम्नस्सर्वभूतोपजीव्यत्वलिङ्गोपस्थितं पृथिवीत्वं प्रवृत्तिनिमित्तं गृह्यते न त्वन्यदौदुम्बरीत्वादिकम्। तच्च संहाररूपमदनं न केवलं ब्रह्मक्षत्रयोरेवात्र

विवक्षितम्। किंतु तदुपलक्षितस्य सर्वस्यापि चराचरस्येत्यपि मृत्योरुपसेचनत्वरूपणादेवावगम्यते। यथा ह्युपसेचनमोदनादनोपयोगितया स्वयं तथैवाद्यमानं च भवतीति। मृत्योरुपसेचनरूपणबलात्प्रतीयमानस्य मृत्युना सह तत्संसृष्टसंहारस्य प्रलय एव भावात् प्रलये सर्वस्य चराचरस्य संहारप्रसिद्धेः। तस्मात्सकलप्रपञ्चसंहर्तैवानेन मन्त्रेण प्रतिपाद्यत इति। अत्र संशयप्रदर्शकवाक्येन पूर्वाधिकरणसङ्गतिरित्थं सूचिता। त्रिमूर्त्यत्तीर्णं परमशिवाख्यं परं ब्रह्म सकलवेदान्तप्रतिपाद्यमिति निर्णेतुं प्रवृत्तमिदं शास्त्रम्। केचित्त्रयाणां ब्रह्मविष्णुरुद्राणामन्यतम एव परं ब्रह्म न तदुत्तीर्णं तत्वान्तरमस्तीति मन्यन्ते। तत्प्रबोधनाय परब्रह्मणो हिरण्यगर्भातिरिक्तत्वं तस्य हिरण्यगर्भस्य च शेषशेषिभावप्रदर्शनेन पूर्वपादे हिरण्यगर्भाधिकरणे समर्थितम्। पूर्वाधिकरणे तस्य नारायणस्य चोपासकभावप्रदर्शनेनैव तदतिरिक्तत्वमपि समर्थितम्। तत्प्रसङ्गात्संहाररुद्रातिरिक्तमनेनाधिकरणेन प्रदर्श्यत इति। यद्यप्यस्मिन्नधिकरणे परब्रह्मणः संहाररुद्रस्य चोपास्योपासकभावादिर्न प्रदर्श्यते। तथापि तयोर्भेदं सिद्धं कृत्वा 'यस्य बह्म च क्षत्रं चे'ति मन्त्रस्य संहाररुद्रपरत्वेन पूर्वपक्षस्य निरासार्थः परब्रह्मपरत्वेन सिद्धान्तः प्रवर्तत इति तेन तयोर्भेदावगतिसिद्धिः। एवं तदुभयभेदसिद्धवत्कारेणाधिकरणप्रवृत्तिं सूचयितुमेव भाष्ये 'तदन्यो वे'ति तद्भिन्नत्वपुरस्कारेण संहाररुद्रविषया पूर्वपक्षकोटिरुपन्यस्ता। परमेश्वरस्य संहर्तृत्वासम्भवमुपपादयन् पूर्वपक्षयति-**परमकारुणिकस्येति। अनुचितमिति।** न हि सर्वदा करुणया सर्वाननुजिघृक्षन्किञ्चिदपि हिंस्यादिति भावः। न केवलं परमेश्वरस्य संहारप्रवृत्त्यसम्भवः तद्विरोधिकरुणावत्त्वात् किंतु तत्कारणक्रोधतमोगुणाभावादपीत्याह-**हिंसारूपं हीति।** यद्यपि परप्राणविमोचनमात्रं न हिंसा। क्रतुषु पशुप्राणविमोचनं पशूनामपि गतिप्रदत्वान्न हिंसेति तृतीयाध्याये समर्थयिष्यमाणत्वात्। तथाप्यवैधं तत्तथेति तात्पर्यम्। **मूलाङ्कुर इति।** वक्ष्यमाणमोहकन्दप्रभवायाः परहिंसाविषवीरुधः **प्रथमाङ्कुर** इत्यर्थः। अस्तु क्रोधोऽपि परमेश्वरस्य तत्राह-**क्रोधस्य चेति।** क्रोधो हि पुरुषाणां परोपद्रवपर्यवसायित्वाच्च हेयस्सर्वथैवामङ्गलगुणः स क्वचिदपि कथञ्चिदपि यथा नोद्भवेत् तथाभिज्ञैः प्रयतितव्यमिति वस्तुस्थितिः। अतः पुरुषाणां क्रोधोदये वस्तुतत्त्वानभिज्ञानरूपस्तमोगुणाविर्भावाधीनो मोह एव मूलमित्यर्थः। ननु, रुद्रस्य तामसत्वं तमउपाधिकत्वमात्रं न तु प्राकृतानामिव तमसाऽभिभवः। अतस्तस्य तामसत्वेऽपि ज्ञानावरणं न सम्भवतीत्याशङ्क्याह-**तामसत्वं नामेति।** तमोगुणावृतज्ञानादिमत्त्वरूपं हि तामसत्वं लोके प्रसिद्धम्। रुद्रेऽपि तत्तथाभूतमेवाङ्गीकर्तुं युक्तम्। लोकप्रसिद्ध्यनुरोधात्। तस्मिन् तमोऽभिभवकार्यक्रोधसंहार-प्रवृत्तिसम्प्रतिपत्तेश्चेति भावः। ननु, हिंसायाः क्रोधैकमूलत्वावधारणमयुक्तम्। अस्ति हि मांसचर्माद्यपेक्षया धनलिप्सया परोपचिकीर्षया वा हिंसा। अस्ति च लीलामात्ररूपा। लोकवत्तु लीलाकैवल्य'मिति (ब्र० २.१.३३.) सूत्रे च जगव्द्यापारः परब्रह्मणो लीलेति स्थापयिष्यते। सत्यम्।

क्रोधात्मकः प्रपञ्चसंहर्ता रुद्रस्तावत्प्रसिद्धोऽस्ति। तद्विषयत्वेऽस्य मन्त्रस्य सम्भवत्यन्यविषयत्वं परिकल्प्य तस्य हिंसाव्यापारप्रवृत्तौ मूलान्तरान्वेषणायां गौरवमिति पूर्वपक्षी मन्यते। प्रसिद्धं हि 'अहं च भवतो वक्रात्कल्पान्ते घोररूपधृत्। शूलपाणिर्भविष्यामि क्रोधजस्तव पुत्रक।।' इत्यादिषु रुद्रस्य क्रोधप्रभवत्वं क्रोधजत्वं च। तामसत्वं च तस्य प्रसिद्धमेव। तदेतदभिप्रेत्योक्तम् **अतस्तामसस्सर्वसंहर्तेति**। ननु, गुणमूर्तीरनुप्रविश्य परमेश्वर एव जगव्द्यापारान्करोतीति मर्यादा 'अयस्यग्निसमाविष्टे दाहोऽग्नेरेव नायसः। मूर्त्यात्मस्वेवमैश्वर्यमीश्वरस्यैव नात्मना'मित्यादिशास्त्रप्रसिद्धा। अतश्चतुर्मुखस्य स्रष्टृत्ववन्नारायणस्य पालयितृत्ववच्च रुद्रस्य संहर्तृत्वमपि पारमेश्वरं स्यादिति चेन्न। गुणमूर्तिचरितेष्वपि यानि लोकानुग्रहरूपाणि सच्चरितानि तानि पारमेश्वराणि विपरीतानि तत्तद्गुणमूर्तिचरितानीति व्यवस्थाङ्गीकारात्। 'सर्वं शिवोऽनुगृह्णाति न निगृह्णाति कंचन। निगृह्णतां तु ये दोषाश्शिवे तेषामसम्भवात्। लोकानुग्रहणायैव शिवेन परमात्मना। सदाशिवादयस्सर्वे मूर्त्यात्मानोऽप्यधिष्ठिताः।। मूर्त्यात्मस्वपि रागाद्या दोषास्सन्त्येव वस्तुतः। तथापि तेषामेवैते न शिवस्य तु सर्वथे'त्यादिशास्त्रप्रामाण्यात्। अत एव नीललोहितनियुक्तेन भैरवेण ब्रह्मपञ्चमशिरोलवने कृते तत्कालमाविर्भूतेन परमेश्वरेण ब्रह्मणे जीवनं दत्वा नीललोहितरुद्राय 'मैवमित्थं क्रूरकर्म कार्षी'रित्युपदिष्टमिति कूर्मपुराणे प्रपञ्चितम्। ननु, परमेश्वरस्यापि सर्वसंहर्तृत्वमवश्यमङ्गीकरणीयम्। 'यतो वा इमानी' त्यादिश्रुतौ तस्य प्रपञ्चोत्पत्तिस्थितिलयकारणत्वश्रवणात् 'एकैकं जालं बहुधा विकुर्वन्नस्मिन्क्षेत्रे संहरत्येष देवः। भूयस्सृष्ट्वा पतयस्तथेशस्सर्वाधिपत्यं कुरुते महात्मे'तिश्वेताश्वतरोपनिषदि विशिष्य संहर्तृत्वश्रवणाच्चेत्याशङ्क्याह-**सर्वसंहर्तृब्रह्मेत्युक्त इति**। क्रोधादिकेत्यादिशब्देन रागो गृह्यते। तथा च परमेश्वरस्य संहर्तृत्वं क्रोधाधीनं चेत् क्रोधस्य ज्ञानावरणमूलकत्वात्तस्य सर्वज्ञत्वभङ्गः। रागमूलकं चेन्नित्यतृप्तत्वभङ्गः। न च परानुग्रहार्थं तत्संहार्यस्य ततोऽनुग्रहाभावात् तदन्यानुग्रहार्थमित्यपि न सार्वत्रिकम्। सार्वदिकनिर्व्याजनिरतिशयकरुणाशालिनो निग्राह्ये तदन्यत्र न करुणाया अविशिष्टत्वात्। अतः परमेश्वरस्य संहर्तृत्वायोगात् 'यत्प्रयन्ती' त्यादिरुपादानत्वेन लयाधिष्ठानत्वपरतया 'अस्मिन् क्षेत्रे संहरति' इत्यादिश्रुतिः सद्वारकान्वयपरतया च योजनीयेति भावः। तस्मात्क्रोधादिगुणकस्संहर्ता परमेश्वरादन्यः स एव चोदाहृतमन्त्रप्रतिपाद्य इति पूर्वपक्षमुपसंहरति-**तस्मादिति**। सर्वसंहर्तृत्वं परमेश्वरस्यैव सम्भवति नान्यस्येत्युपपादनपूर्वकं तेनैव लिङ्गेनोदाहृतमन्त्रप्रतिपाद्यः परमेश्वर इति सिद्धान्तयति-**सिद्धान्तस्त्विति**। अयमाशयः। नानेन मन्त्रेण किञ्चित्प्रलयगतं चराचरसंहर्तृत्वमुच्यते किं तु पूर्वोत्तरसकलप्रलयानुयायि। प्रकरणोपपदादिसङ्कोचकाभावात् चराचरगतस्योदनभावस्य लटा वर्तमानत्वव्यपदेशाच्च। न हि तस्य

वर्तमानत्वमेतद्वाक्यश्रवणसमये तत्सत्त्वमपेक्ष्य समर्थयितुं शक्यम्। किं तु पूर्वोत्तरप्रलयानुयायित्वेन प्रारब्धापरिसमाप्तित्वमपेक्ष्य समर्थनीयम्। अस्ति हि तत्कालसमत्यामपि क्रियायां पूर्वोत्तरकालानुयायित्वेन प्रारब्धापरिसमाप्ततामात्रमपेक्ष्य वर्तमानत्वव्यवहारः। यथा 'चैत्रसकाशे वयमधीमह'इत्यनध्यायदिवसेष्वपि व्यवहारः। यथा वा 'मधुरायां वसामी'ति ग्रामान्तरगमनेऽपि व्यवहारः। अत एवैतादृशप्रयोगेषु 'वर्तमाने लडि'ति सूत्रतो लटः प्राप्तिर्नास्तीति तेषु तदनुशासनार्थं सूत्रान्तरमारम्भणीयमिति एवं शब्दवार्तिककृता कात्यायनेन 'प्रवृत्तस्याविरामे शिष्या भवन्त्यवर्तमानत्वा'दिति वार्तिकेन पूर्वपक्षं कृत्वा 'न्याय्या त्वारम्भानपवर्गा'दिति वार्तिकेन तत्रापि वर्तमानता न्याय्या प्रारब्धापरिसमाप्तत्वादिति सिद्धान्तितम्। एवं सकलप्रलयानुयायिन्येतन्मन्त्रप्रतिपाद्ये संहारव्यापारे प्रतिकल्पं भिन्नस्य परिच्छिन्नशक्तिकस्य गुणिरुद्रस्य न सामर्थ्यमस्ति। न च गुणिरुद्रसामान्यविषयोऽयं मन्त्रो योजनीयः। पूर्वोत्तरप्रलयद्वयानुयायिनः प्रपञ्चसंहर्तृत्वस्य वर्तमानापदेशलब्धस्य गुणिरुद्रे क्वचिदप्यसम्भवेन सकलविशेषव्यावृत्तस्य सामान्येऽप्यसम्भवात् तस्यैवं मुख्यैकाश्रयत्वे सम्भवति गृहद्वये सकलपाकसामग्रीन्यायेन योजयितुमयुक्तत्वाच्च। तस्मात्परमेश्वरस्यैवेदं पूर्वोत्तरसकलप्रलयानुयायिनःसर्वप्रपञ्चसंहर्तृत्वं तदेव चानेन मन्त्रेणोच्यत इति।

तस्मा इति। 'जगद्धितं वा एतदक्षरं प्राजापत्यं सूक्ष्मं सौम्यं पुरुषमग्राह्यमग्राह्येण वायुं वायव्येन सोमं सौम्येन ग्रसति, स्वेन तेजसे'ति पूर्ववाक्ये प्रणवाक्षरमात्रात्रयदेवताग्रसितृत्वं यदुक्तं तद्विशिष्टायेति तस्मा इत्यनेनोच्यते। 'महाग्रासाये'त्यनेन गोबलीवर्दन्यायेन तदतिरिक्तसर्वप्रपञ्चग्रसितृत्वमुच्यते। ग्रसितृत्वमत्र न खादितृत्वमुपभोक्तृत्वं वा किं तु संहर्तृत्वम् 'उपसंहर्त्रे'इति विशेषणेन ख्याप्यते। ततश्चोदाहृतमन्त्रस्थस्य 'उपसंहर्त्रे' इत्यस्य कस्येति प्रतियोग्याकाङ्क्षायां 'सर्वजगद्धितं वा एतदक्षर'मित्यत्र सन्निहितं सर्वं जगत्प्रतियोगित्वेनान्वेति। 'अधिकं वा स्याद्बह्वर्थत्वादितरैस्सन्निधाना'दिति न्यायेनान्यार्थसन्निहितस्यापि प्रतियोगितयान्वयोपपत्तेरि-त्यन्यार्थसन्निहितसर्वजगदन्वयेन महदुपपदेन च सर्वसंहर्तृत्वसिद्धिरस्पष्टेति तत्स्पष्टीकरणार्थं सर्वसंहर्तृभावविषयत्वसिद्धये 'य इमा विश्वा भुवनानि जुह्वदृषिर्होता निषसादा पिता नः। स आशिषा द्रविणमिच्छमानः परमच्छदो वर आविवेशे'ति मन्त्र उदाहृतः। अस्यायमर्थः। ऋषिः सकलवेदद्रष्टा। नः अस्माकम्। पिता जनयिता। इमानि सर्वाणि भुवनानि जुह्वत्सन् होता निषसाद होमकर्ता स्वयमेवावशिष्टस्सन्निविष्टः। अनेन स्वमात्रावशेषवचनेन स्वप्रकाशचिद्रुपः स्वयमेव होमाधारोऽग्निरित्यपि लब्धम्। प्रसिद्धं चाथर्वशिखायां परमेश्वरस्य संवर्तकाग्निरूपत्वम्। तत्र हि परमेश्वरध्यानसाधनत्वेनोपक्रान्तस्य प्रणवस्य ध्यानार्थमकारोकारमकारमात्राभिस्सर्वात्मत्ववर्णनं प्रस्तुत्य मात्रात्रयस्य पृथिव्यन्तरिक्षस्वर्गलोकऋग्यजुस्सामवेदब्रह्मविष्णुरुद्राद्यात्मत्वमुक्त्वा 'यावसानेऽस्य चतुर्थ्यर्धमात्रा सा सोमलोक ॐङ्कारस्साथर्वणैर्मन्त्रैरथर्ववेदस्संवर्त-

कोऽग्नि 'रित्यादिनार्धमात्राया: 'तदूर्ध्वमुन्मनालोकात्सोमलोकमलौकिकम्। सोमस्सहोमया यत्र नित्यं निवसतीश्वर' इति पुराणप्रसिद्धोन्मनान्तसकलभुवनातीतोमासहितपरमेश्वरलोकाथर्ववेदपरमेश्वरात्मत्वाद्युक्तिसमये परमेश्वरे संवर्तकाग्निशब्द: प्रयुक्त:। एवं प्रलयकाले सर्वं स्वात्मन्युपसंहृत्य स्वमात्रावशेषेण स्थित: परमेश्वर:। आशिषा। आशीरिच्छा। 'आशीरुरगदंष्ट्रायां शुभवाक्याभिलाषयो 'रिति कोशकारस्मरणात्। तया। स्वात्मन इच्छाशक्त्या। द्रविणं स्वविभूतिरूपं प्रपञ्चमिच्छमान: स्वेच्छाशक्तिरूपेणोपादानेन सुवर्णेन कुण्डलमिव प्रपञ्चं सिसृक्षन्। परमच्छद: सङ्कल्पमात्रसृष्टप्रपञ्चरूपोत्कृष्टनिजाच्छादनस्तद्विशिष्टो भूत्वा। वरे उत्कृष्टे परमच्छदत्वेन प्रागुक्ते प्रपञ्चे आविवेश अन्तर्यामितया प्रविष्ट इति। अत्र यद्यपि विश्वशब्दस्सामस्त्यवाच्यस्ति तथापि भुवनशब्दस्य लोकसंस्थानवाचित्वात् भूर्भुवस्सुवरित्यादिसमस्तभुवनसंहर्तृत्वमेव प्रतीयते। न तु चेतनाचेतनात्मकसर्वप्रपञ्चसंहर्तृत्वम्। तत्तु 'होता निषसादे 'ति होतृमात्रावशेषोक्तिसामर्थ्यात् भुवनशब्दस्य कार्यमात्रपरत्वमुपपाद्य समर्थनीयम्। तत्समर्थनसिद्धये 'होता निषसादे 'त्यस्य परमेश्वरमात्रावशेषपरत्वं मन्त्रान्तरैकार्थ्येन स्पष्टीकर्तुं मन्त्रान्तरं तदर्थोपन्यासपूर्वकमुदाहरति- **स्वेतरमखिलमित्यादिना।** 'न सन्न चास 'दित्यत्र स्वतस्साधुर्जीववर्ग: सच्छब्देनोक्त: तयोरसाधुत्वापादक: पाशवर्गस्त्वसच्छब्देनेत्यभिप्रेत्य तयोस्स्वरूपेणात्र न निषेध:। नित्यत्वात्। किं तु नामरूपविभागार्हेण स्थूलरूपेणेति व्याचष्टे-**अत्रेति।** 'तम एवे 'त्येतत्पशुवर्गं प्रत्युच्यते न तु शिवं प्रति। तं प्रति सर्वस्य सर्वदा प्रकाशमानत्वात् इत्यमुमर्थं शङ्कोत्तराभ्यां दर्शयति-**नन्वित्यादिना।** ननु मा भूत् जीवानां प्रलये प्रपञ्चावभास:, शिवावभासस्तु स्यात् तस्य स्वप्रकाशत्वात्, अतस्तम एवेत्युक्तिरयुक्तेत्याशङ्क्याह-**मलतिरोहितेति।** शिवस्य स्वस्मै प्रकाशत इत्येव स्वयंप्रकाश: न तु जीवेभ्य: प्रकाशत इत्यपि। अतो जीवानां शिवावभास: तदीयज्ञानैरेवेष्टव्य:। तानि मलावृतानीति तैस्तदानीमवभासो नास्तीत्यर्थ:। **पूर्वमिवेति।** यथा सर्गकाले जीवानां शिवदर्शनं नास्ति तथा प्रलयकालेऽपीत्यर्थ:। अत: तम एवेत्युक्तिरुपपद्यतइत्याह-**'आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्। अप्रतर्क्यमनिर्देश्यं प्रसुप्तमिव सर्वत' इति।** अत्र 'तमोभूत 'मित्येतदुत्तरविशेषणै: प्रत्यक्षादिप्रमाणाप्रवृत्त्योपपाद्यते। तत्रा 'प्रज्ञातमलक्षण' मित्यनेनेदमित्थमित्यसाधारणधर्ममुखेन परिच्छिन्दत: प्रत्यक्षस्याप्रवृत्तिर्दर्शिता। अप्रतर्क्यमित्यनुमानस्य। अनिर्देश्यमिति शब्दस्य। तथापि 'शिव एव केवल 'इत्युक्तिरनुपपन्ना। सूक्ष्मरूपेण पशुपाशवर्गसद्भावादित्याशङ्क्याह-**नामरूपेति।** सूक्ष्मचिदचिद्विशिष्ट एव केवलशिव इत्युच्यते। न तु विशेष्यमात्रमित्यर्थ:। एवं 'यदा तमो' मन्त्रपूर्वार्धैकार्थ्येन 'होता निषसादे 'त्यनेन सिद्ध: प्रलये परमेश्वरस्य तन्मात्रावशेष: प्रपञ्चित:। अथ तदुत्तरार्धैकार्थ्येन 'स आशिषा द्रविण 'मित्यादिना सिद्ध: तस्य सर्गादौ निमित्तोपादानभावेन प्रपञ्चकारणभाव: प्रपञ्च्यते **'स पुनस्सर्गकाल' इत्यादिना। स्वसङ्कल्पमात्रेणेति।** इच्छमान इति

हेतौ शानच्प्रत्ययः। परस्मैपदिनोऽपि छान्दसः शानच्। हेतुत्वमात्रेच्छाया अवधारणगर्भत्वं विवक्षितम्। इच्छामात्रस्य कुलालादिसाधारण्यादित्यभिप्रेत्य मात्रशब्दः। तस्य व्यवच्छेद्यमाह-**समवायिकारण-निरपेक्षमिति।** कुलालस्य स्वपृथक्सिद्धमृत्पिण्डसम्भरण इव परमेश्वरस्य स्वपृक्सिद्धप्रपञ्चोपादान-सम्भरणे नैरपेक्ष्यं विवक्षितम्। तदेतदुत्तरत्र भाष्य एव स्फुटीभविष्यति। **स्वस्मात्प्रथमशक्ति-परिस्फुरणपूर्वकमिति** 'प्रज्ञा च तस्मात्प्रसृता पुराणी'त्येतदैकार्थ्याविष्करणम्। प्रथमशक्तिपरिस्फुरणपूर्वकं तत्स्फुरणरूपसङ्कल्पमात्रेण सृजतीत्यन्वयः। सृजतीत्येतत्सत्कार्य-वादमनुसृत्य व्याचष्टे-**प्रकाशयतीति।** नामरूपसम्बन्धेन व्यवहारार्हतयाभिव्यञ्जयतीत्यर्थः। अन्तस्स्थितमनभिव्यक्तनामरूपतया स्वात्मनि स्थितं बहिरभिव्यक्तनामरूपतया प्रकाशयेदित्यर्थः। निरुपादानमित्येतत् स्वपृथक्सिद्धोपादाननैरपेक्ष्यपरमिति शङ्कोत्तराभ्यां दर्शयति-**नन्वित्यादिना।** विविधं राजनीति विराट् हिरण्मयमण्डम्। **मायादिरूपादिति।** माया पुरुषश्च रूपमपृथक्सिद्धधर्मोऽस्येति मायादिरूपः। **स्वरूपेति।** स्वरूपात् स्वात्मनः अपृथगवस्थानं यतोस्तथाभूतौ सूक्ष्मौ जडचेतनप्रपञ्चाकारपरिणामात्प्रागव्यक्तौ मायापुरुषावस्मिन्निति तथोक्तः। ननु 'तस्माद्विराडजायते' त्यतः प्राक् 'सहस्रशीर्षा पुरुष' इत्यारभ्य परमेश्वर एव प्रस्तुतः न तु नारायणरूपः पुरुषः। सत्यम्। 'तस्माद्विराडजायत। विरोजो अधि पुरुष' इति प्रकृतात्परमेश्वरात् जडस्य ब्रह्माण्डस्य सकलचेतनसमष्टिरूपस्य हिरण्यगर्भस्य च जननोक्तिसामर्थ्यात्तदुभयोपादान-त्वयोग्यानभिव्यक्तमायापुरुषविशिष्ट एव परमेश्वरः प्राक्प्रकृतोऽवसीयत इति तात्पर्यम्। 'उपादानमपी' त्यपिशब्देन निमित्तत्वसङ्ग्रहः। ब्रह्मविष्णुरुद्रादिसकलचेतनाचेतनप्रपञ्चनिमित्तो-पादानभावे 'स आशिषे' त्यादेस्तात्पर्यं श्रुत्यन्तरैकार्थ्येनाविष्कर्तुं श्रुत्यन्तरमुदाहरति **तथेति।** अथर्वशिखायां 'भगवन्किमादौ प्रयुक्तं ध्यानं ध्यायितव्यम्। किं तत् ध्यानं को वा ध्याता कश्च ध्येय' इत्यथर्वाणं ब्रह्मणः पुत्रं प्रति पिप्पलादप्रभृतीनामृषीणां ध्यानसाधनमन्त्रध्यातृध्येयविषये प्रश्नचतुष्टये प्रश्नत्रयप्रतिवचनानन्तरं ध्येयनिर्धारणार्थमाम्नायते 'ध्यायीतेशानं प्रध्यायितव्य'मित्यादि। अस्यार्थः। प्रध्यायितव्यं मुमुक्षुभिः प्रकर्षेण ध्यातुमर्हम्। 'आदेच उपदेशेऽशिति'(पा० ६-१-४५ सू) इत्यात्वाभाव इडागमश्छान्दसः। ईशानं परमेश्वरं ध्यायीत। आत्मनेपदं छान्दसम्। स एव मुमुक्षुभिः प्रध्यातुमर्हो न ब्रह्मादय इत्यत्रोपपादकत्वेन तस्य ब्रह्मादिकारणत्वमुच्यते। सर्वमिदं सुरनरतिर्यगादिभूतजातम्। ब्रह्मविष्णुरुद्रेन्द्राः। तत्प्रधानत्वात्ताच्छब्द्यम्। देवदत्त एव सर्वोऽयं ग्राम इतिवत्। इन्द्रशब्द ईश्वरपरः सदाशिवस्याप्युपलक्षकः। ते सर्वप्रधानभूता ब्रह्मविष्णुरुद्रेश्वरसदाशिवा अपि सम्प्रसूयन्ते सम्यगनुपचरितत्वेनौवोत्पद्यन्ते। प्रकृतादीशानादिति शेषः। भूतेन्द्रियग्रहणं दृष्टान्तार्थम्। जडवर्गसमानयोगक्षेमत एव तेऽपि तस्मादुत्पद्यन्त इति भावः। यदि ब्रह्मादिकारणभूत ईशानोऽपि

कुतश्चित्सम्प्रसूयते तदा तद्वदेव सोऽपि ध्यातव्यो न भवेदित्याशङ्क्य तस्योत्पत्त्यभाव उपन्यस्यते-न **कारणं कारणानां धाता ध्यातेति**। सम्प्रसूयत इति वचनविपरिणामेनानुषङ्गः। कारणानां सृष्ट्यादिपञ्चकृत्याधिकारिणां प्रागुक्तानां ब्रह्मादीनां कारणमुपादानं धाता धारयिता ध्याता निमित्तत्वेन सृष्टयादिसङ्कल्पकर्ता एवंभूत ईशानः कुतश्चिदपि न सम्प्रसूयत इत्यर्थः। अतस्सर्वकारणभूतः परमेश्वर एव ध्यातव्य इत्युच्यते **कारणं त्विति**। तुशब्द इतरेषां जन्मवतां ध्येयत्वव्यवच्छेदार्थः। 'शिव एको ध्येयः शिवशङ्करः सर्वमन्यत्परित्यज्ये'ति ह्यन्ते वक्ष्यते। स्वयं जन्मरहित एव मुमुक्षुभिः प्रपदनीय इति श्वेताश्वतरोपनिषद्यप्युक्तम्। 'अजात इत्येव कश्चिद्भीरुः प्रपद्यते रुद्र यत्ते दक्षिणं मुखं तेन मा पाहि नित्य'मिति। उपबृंहितं च शिवपुराणे-'अजातमिममेवैकं मत्वा जन्मनि भीरवः। रुद्रस्यास्य प्रपद्यन्ते रक्षार्थं दक्षिणं मुख'मिति सर्वकारणभूतः परमेश्वरो जन्मरहितत्वादिव सर्वेश्वरत्वेन सकलपुरुषार्थप्रदानशक्तत्वादपि मुमुक्षुभिर्ध्यातव्य इत्यभिप्रेत्य **'सर्वैश्वर्यसम्पन्न'** इत्युक्तम्। यद्वा प्रागीशानपदेनैव ताच्छील्यार्थशानजन्ततया स्वाभाविक-निरतिशयैश्वर्यपरेणेयमुपपत्तिस्सूचिता। ब्रह्मादीनामुत्पत्त्युक्तिस्तु तेषां ध्येयत्वोपयोगिता-दृगैश्वर्यव्यवच्छेदार्थं न तु साक्षाद्ध्येयत्वव्यवच्छेदार्थम्। ईशानस्योत्पत्त्यभावोक्तिस्तु ब्रह्मादिषूद्भावितस्यैश्वर्यपरिच्छेदहेतोर्दोषस्य परिहारेण प्राङ्निर्दिष्टतादृगैश्वर्योपपादनार्थम्। एवमुप-पादितस्य तस्यानुवदः **'सर्वैश्वर्यसम्पन्न'** इति। न केवलं सर्वैश्वर्यसम्पत्तिरुपन्यस्तोपपत्त्यावसीयते किं तु सर्वेश्वर इति नाम्नापीत्यभिप्रेत्य **'सर्वेश्वर'** इत्युक्तम्। सर्वेश्वर इत्यपि हि तस्य नामास्तीति 'अकारं ब्रह्माणं नाभावुकारं विष्णुं हृदये मकारं रुद्रं भ्रूमध्ये ॐकारं सर्वेश्वरं द्वादशान्त'इति तापनीयप्रयोगादवगम्यते। शम्भुर्निरतिशयानन्दरूपो निरतिशयानन्दहेतुर्वा। आकाशमध्ये चिद्गगनमध्ये। एवमस्याश्श्रुतेरुपबृंहणं शिवपुराणे दृश्यते। 'यस्मात्सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रपूर्वकम्। सह भूतेन्द्रियैस्सर्वैः प्रथमं सम्प्रसूयते। कारणानां च यो धाता ध्याता परमकारणम्। न सम्प्रसूयते तस्मात्कुतश्चन कदाचन। स सर्वैश्वर्यसम्पन्नो नाम्ना सर्वेश्वरः स्वयम्। सर्वैर्मुमुक्षुभिर्ध्येयः शम्भुराकाशमध्यग'इति। हरिवंशेऽप्येवमुपबृंहणं दृश्यते। तत्र हि परमेश्वरं प्रति कृष्णवचनम्। 'अहं ब्रह्मा कपिलोऽथाप्यनन्तः पुत्रास्सर्वे ब्रह्मणश्चातिवीराः। त्वत्तस्सर्वे देवदव प्रसूता एवं सर्वैः कारणात्मा त्वमीड्य'इति। एवं च कारणात्मत्वात्सर्वेश इत्यर्थः। एतेन 'कारणं तु ध्येय'इति श्रुतिः 'नारायणाद्ब्रह्मा जायत'इत्यादिश्रुत्यन्तरसिद्धकारणानुवादेन तस्य ध्येयत्वविधायिनी न स्वयं कस्यचित्कारण-त्वप्रतिपादिनी। ध्येयप्रश्नोत्तरत्वात्। अतः पुरोवादानुसारेण कारणपदसमानाधिकरणः शम्भुशब्दो नारायणपर इति निरस्तम्। ध्येयप्रश्नोत्तरमध्ये परमेश्वर एव ध्येय इत्यस्योपपादनाय 'सर्वमिद'मित्यारभ्य तस्य जगत्कारणताया अपि प्रतिपादनात् प्रकृतार्थानुवादसम्भवे च पुरोवादान्तरापेक्षायोगात्। न च ब्रह्मादीनां प्रसूतिमात्रमुक्तं न तु प्रकृतादीशानादिति शङ्क्यम्।

प्रसूतेरपादानापेक्षायां सन्निहितस्येशानस्यैव तथात्वेनान्वयौचित्यात्। ईशानस्य ध्येयत्वोक्तिप्रस्तावे ब्रह्मादीनां प्रसूत्युक्तेर्ध्येयोत्कर्षपर्यवसानं विनान्वयासम्भवेन तत्पर्यवसानार्थं ध्येयत्वेन वर्णितादीशानात्तत्प्रसूतिपरत्वस्यावश्यवक्तव्यत्वाच्च। 'न कारणं कारणानां धाता ध्याते'ति वाक्ये ब्रह्मादिवत्तत्कारणस्यापि कुतश्चित्प्रसूतौ स एवोत्कृष्टतया ध्येयः स्यात् न तत्प्रसूत ईशान इति शङ्कावारणार्थं प्रवृत्ते धातृध्यातृशब्दयोः पुल्लिङ्गदर्शनेन तद्विशेष्यतयेशानपदानुषङ्गावगतेश्च। न च तयोः शम्भुपदेनान्वयः। 'कारणं त्वि'त्यत्र तुशब्देन तत्र वाक्योपक्रमप्रतीतेः। अपि च 'कारणं त्वि'ति वाक्ये निर्दिष्टस्य कारणस्य प्रतियोग्याकाङ्क्षायां प्राक्प्रसूतिमत्त्वेनोक्तानां ब्रह्मादीनामेव प्रतियोगित्वेनान्वयो भवति। अपरिमिताधिकरणन्यायेन सन्निहितप्रतियोग्यन्वयौचित्यात्। न च नारायणस्य त्रिमूर्तिकारणत्वं श्रुत्यन्तरे क्वचिदपि प्रतिपन्नमस्ति। येनात्र तदनुवादो भवेत्। तस्मान्यायोपबृंहणाभ्यां ब्रह्मादिकारणत्वेन प्राक्प्रतिपादितस्येशानस्यानुवाद इति युक्तम्। नन्वस्तु तथैव, तथाप्यनुवादो नारायणविषयः स्यात्। ध्येयनिर्धारणस्य नारायणविषयत्वात्। अथर्वशिखायामुपक्रमे हि प्रणवस्य मात्रात्रयं ब्रह्मविष्णुरुद्रदेवत्यमुक्त्वा 'याऽवसानेऽस्य चतुर्थ्यर्धमात्रा सा सर्ववर्णा पुरुषदेवत्ये'त्युक्तम्। उपसंहारे मात्रात्रयवाच्यान्ब्रह्मविष्णुरुद्रान्ध्यानसाधनध्यानध्यातृरूपानुक्त्वा प्राणं मनसि सह करणैर्नादान्ते परमात्मनि सम्प्रतिष्ठाप्य 'ध्यायीतेशान'मिति ध्येयप्रश्नोत्तरे नादान्तविषेणेनार्धमात्रवाच्यः पुरुषो ध्येय इत्याविष्कृतम्। स तु पुरुषो नारायण एव। 'यथा शङ्करशब्दोऽयं महादेवेऽवतिष्ठते। तथा पुरुषशब्दोऽयं वासुदेवेऽवतिष्ठते।।' इत्यादिपुराणवचनैः 'पुरुषो हवै नारायणोऽकामयते'त्यादिश्रौतप्रयोगैः 'न यस्य देवी न पितामहो वा नेन्द्रो न चाग्निर्वरुणो न मृत्युः। प्रभावमद्यापि विदन्ति रुद्रं तमादिदेवं पुरुषो ददर्शे'त्यादिपौराणिकप्रयोगैः 'संहृत्य लोकान्पुरुषोऽधिशेत' इत्याद्यभियुक्तप्रयोगैश्च पुरुषशब्दस्य नारायणवाचित्वावगमात्। एवं चोपक्रमानुसारेणोपसंहारगता ईशानशम्भुशिवशब्दा नारायण एव योजयितव्या इति चेत्। मैवम्। उपक्रमगतैकश्रुत्यपेक्षयोपसंहारगतबहुश्रुतीनां प्रबलतया तदनुसारेण पुरुषश्रुतेरेव शिवे योजयितुमुचितत्वात्। पुरुषदेवत्येत्यतः प्राक् 'यावसानेऽस्य चतुर्थ्यर्धमात्रा स सोमलोक' इत्यर्धमात्रायाः शिवलोकत्वोक्तिदर्शनेनोपक्रमस्य नारायणविषयत्वासिद्धेश्चोदाहृतपरमोपक्रमा 'दोङ्कारः प्रलयः प्रणवस्तारो विष्णुः ब्रह्म प्रकाशो विद्युव्द्यापी' त्योङ्कारनामनिर्वचने व्यापनाव्द्यापी महादेव इति वाच्यवाचकयोरभेदोपचारमाश्रित्य महादेवशब्देन नामनिर्देशात् उपसंहारे शिवनाम्नां प्रयोगेण च अथर्वशिखायाः कार्त्स्न्येन शिवपरत्वस्यैव स्पष्टं प्रतीतेश्च। 'पुरुषो नाम सम्पूर्णः शिवस्सत्यादिलक्षणः। न विष्णुर्न विरिञ्चश्च न रुद्रो नापरः पुमा' नित्यादिपौराणिकवचनैः 'पुरुषो वै रुद्रः'-'पुरुषस्य विद्महे सहस्राक्षस्य महादेवस्य धीमही' त्यादिवैदिकप्रयोगैश्च पुरुषशब्दस्य

शिववाचकत्वस्याप्यवगतेश्च। बर्हिराज्याधिकरणन्यायानुसरणे चेतनसामान्यशक्त्यैव तत्रतत्र विशिष्य प्रयोगाणामुपपन्नत्वेन च पुरुषशब्दस्य क्वचिदपि विशिष्य शक्त्यसिद्धेश्च। ब्रह्मदेवत्या विष्णुदेवत्या रुद्रदेवत्येति प्रणवमात्रादेवतानां तत्तदसाधारणनाम्ना निर्देशप्रायपाठस्यै'कादेया द्वादश देयाश्चतुर्विंशतिर्देयाः सहस्रं देयमपरिमितं देय'मित्याधानदक्षिणाकल्पभेदश्रुतौ दक्षिणासङ्ख्यानां तत्तदसाधारणशब्देन निर्देशप्रायपाठस्य बहुलत्वसामान्यशक्त्यैव सहस्राधिकबहुत्वपर्यवसायिन्यपरिमितशब्द इव चेतनसामान्यशक्त्यैवोपपन्नविशेषप्रयोगे पुरुषशब्दे त्यागस्यादोषत्वात्। तस्मादुपपन्नमिदमुदाहृतमथर्वशिखावाक्यं परमेश्वरस्य ब्रह्मविष्णुरुद्रादिसकलजगन्निमित्तोपादानभावं प्रतिपादयतीति। एवं प्रपञ्चस्याभिन्ननिमित्तत्वोपादानत्वसिद्धौ तस्य यत्र लयः तत्कृत एव संहारो वाच्य इति 'यत्प्रयन्त्यभिसंविशन्ती'तिश्रुत्यालोचनयापि परमेश्वरस्य सर्वसंहर्तृत्वं सिद्ध्यतीति सूचयन्नेव 'य इमा विश्वे'तिमन्त्रोदाहरणेन समर्थितं तस्य सर्वसंहर्तृत्वमुपसंहरति-**तत इति**। ब्रह्मशब्दाभिधेयः शिव एव सर्वसंहर्तेत्यन्वयः। उदाहृते मन्त्रे-'आशिषे'ति-'वरआविवेशे'ति विशेषणद्वयमुदाहरिष्यमाण- दशाव्ययवचनतात्पर्यवचने स्पष्टीभविष्यतीति मत्वा परमेश्वरस्य संहर्तृत्वे पूर्वपक्ष्यापादितं दोषं परिहर्तुमनुभाषते **यदुक्तमिति**। अयमत्र परिहाराभिसन्धिः। द्विविधो निग्रहः अनुग्रहोद्देश्यः तदनुद्देश्यश्च। आद्यस्त्रिविधः। निग्राह्यानुग्रहार्थः तदितरानुग्रहार्थः उभयानुग्रहार्थश्च। सदाचारानुवर्तनाद्यर्थः। पुत्रादिनिग्रह आद्यः। स तु सर्वथा न दोषः। द्वितीयस्तु उत्कृष्टानुग्रहार्थमपकृष्टनिग्रहः। 'एकस्मिन्यत्र निधनं प्रापिते दुष्टचारिणि। बहूनां भवति क्षेमं तत्र पुण्यप्रदो वध' इत्यादिवचनप्रामाण्यान्न दोषः। यथा राज्ञां मृगयासु प्रजानुग्रहार्थं व्याघ्रादिवधः। चोरादिवध उभयानुग्रहार्थः। तेन हि प्रजानुग्रह इव 'राजाभिधृतदण्डास्तु कृत्वा पापानि मानवाः। निर्मलाः स्वर्गमायान्ति सन्तस्सुकृतिनो यथे'ति वचनप्रामाण्यात् चोरानुग्रहश्च भवति। प्रत्युत त्रिविधोऽप्ययं निग्रहो गुण एव। उक्तत्रिविधनिग्रहान्तर्भूतस्सर्वोऽपि परमेश्वरकृत्यभूतस्संहारः। तत्र प्रपञ्चस्थितिकाले दैत्यादिनिग्रह उभयानुग्रहार्थः। हिंस्रतिर्यग्जातिनिग्रहस्तदन्यानुग्रहार्थः। नरकादिनिपातनरूपः निग्रहः पापक्षपणेन तत्तदनुग्रहार्थः। अयं त्रिविधो निग्रहः तत्तदधिकृतदेवमनुष्यादिमूर्तिद्वारकः। महाप्रलये सर्वसंहारः साक्षात्पारमेश्वरः। स तु संसाराध्वचिरगतागतखिन्नानां महासुषुप्त्यापादनेन तत्तदनुग्रहार्थः। एवं परमेश्वरकर्तृकाणां निग्रहाणामनुग्रहार्थत्वेनादोषत्वं गुणत्वं च वायुसंहितायां प्रपञ्चितम्। 'ये पुत्रनिग्रहाः केचिद्ब्रह्मादिषु निदर्शिताः। तेऽपि लोकहितायैव कृताः श्रीकण्ठमूर्तिना। अण्डस्यास्याधिपत्यं हि श्रीकण्ठस्य न संशयः। श्रीकण्ठाख्यां शिवो मूर्तिं क्रीडन्तीमधितिष्ठति। सदोषा एव देवाद्या निगृहीता यथोचितम्। ततस्तेऽपि विपाप्मानः प्रजाश्च विगतज्वराः। निग्रहोऽपि स्वरूपेण विदुषां न जुगुप्सितः। अत एव

हि दण्ड्येषु दण्डो राज्ञां प्रशस्यते। यत्सिद्धिरीश्वरत्वेन कार्यवर्गस्य कृत्स्नशः। न स चेदीशतां कुर्याज्जगतः कथमीश्वरः। हिते सदा निषण्णानामीश्वरस्स्यान्निदर्शनम्। स कथं दूष्यते सद्भिरसतामेव निग्रहात्। सर्वोऽपि निग्रहो लोके न च विद्वेषपूर्वकः। न हि द्वेष्टि पिता पुत्रं यो निगृह्यापि शिक्ष्ये'दिति। एवं च यद्यपि परमेश्वरस्य क्वचित्क्वचिद्दैत्यादिसंहारे क्रोधस्सम्भावितः। तथापि नासौ तमोमूलकः। 'तमसः परस्ता'दित्यादिवचनविरोधात्। किं तु 'क्रोधमाहारयन् तीव्र'मिति रामायणोक्तरीत्या दुष्टनिग्रहार्थमाहार्यस्तद्वश्य एवेति।। **ज्ञानं वैराग्यमिति।।** ज्ञानं सकलप्रपञ्चगताशेषविशेषापरोक्ष्यम्। वैराग्यं निरतिशयस्वात्मानन्दानुभवप्रयुक्तं सकलविषयवैतृष्ण्यम्। ऐश्वर्यं सकलप्रपञ्चनियमनशीलत्वम्। तपः सृष्टिकाले स्रष्टव्यवस्तुजातालोचनम्। सत्यमनृतराहित्यम्। वेदागमादिसत्यैकरूपवचनवक्तृत्वं वाक्षिमा भक्तापराधसहिष्णुत्वं-नमस्सहमानाये'तिश्रुतिप्रसिद्धम्। धृतिर्धैर्यम्। 'इमा रुद्राय स्थिरधन्वने गिरः" स्थिराय स्थिरधन्वने नम'इति श्रुतिप्रसिद्धं जगद्धारणं वा। स्रष्टृत्वं प्रपञ्चनिर्मातृत्वम्। आत्मसम्बोधः स्वात्मानन्दामृतास्वादः। अधिष्ठातृत्वं प्रपञ्चरूपं शरीरमनुप्रविश्य वर्तमानत्वम्। **नित्यमिति।** कानिचित्स्वरूपनित्यतया कानिचित्प्रवाहनित्यतया तिष्ठन्तीत्यर्थः। अत्र ज्ञानात्मसम्बोधयोर्विवक्षितं भेदं सम्मत्यन्तरोदाहरणव्याजेन दर्शयति-**अशेषविषयेति।** तपश्शब्दोऽत्र न कृच्छ्रचान्द्रायणादिपरः। किं तु सृष्टिकाले स्रष्टव्यालोचनरूपज्ञानशक्तिपर इति दर्शयन्प्रसङ्गादिच्छाज्ञानक्रियाशक्तीनां सृष्टावुपयोगप्रकारमाह-**असङ्कुचितविश्वाव इत्यादिना।** मायारूपामित्यनेन सिसृक्षारूपेच्छाशक्तिरेव जगदुपादानत्वेन प्रसिद्धा मायेति दर्शितम्। तदेवेच्छाशक्तिभित्तावित्यनेनाप्याविष्कृतम्। 'आशिषे'ति प्रागुदाहृतमन्त्रगतविशेषणप्रमाणकमेतत्। अधिष्ठातृत्वं प्रपञ्चानुप्रवेशरूपं तद्धेतुकप्रपञ्चनियमनरूपादैश्वर्याद्भिन्नमिति दर्शयितुं 'सत्सृष्ट्वे'त्यादिकमुक्तम्। 'सोऽकामयत बहु स्या'मित्यादिश्रुत्युदाहरणेषु सर्वेषु 'इति 'श्रुत्युक्तप्रकारणे'ति शेषो द्रष्टव्यः। **शक्तित्रयेति।** ज्ञानेच्छाक्रियाशक्तिमध्ये क्वचित्किञ्चित्प्राधान्येन रजस्सत्वतमोभिस्त्रिगुणैर्ब्रह्मविष्णुरुद्राणामुपाधिरूपैर्ब्रह्मविष्णुरुद्राणां तनुरूपैश्च भिन्नं परस्परविलक्षणं यन्मूर्तित्रयं तत्प्रमुखप्रपञ्चशरीरो भवतीत्यर्थः। नन्वस्मिन्मन्त्रे प्रतिपाद्यस्सर्वसंहर्ता परमेश्वर इत्यनुपपन्नम्। तस्य प्रतिष्ठात्वेन वर्ण्यमानः परमेश्वर इति प्रतीतेरित्याशङ्कानिवारणाय 'यत्र स'इत्यस्य विवक्षितमर्थं दर्शयति-**तदिहेति।** तत्तस्मात्सर्वसंहारस्य परमेश्वरकर्तृकत्वादिह सर्वसंहारे निमित्ते सर्वज्ञस्य सर्वशक्तेस्सर्वसंहारोपयोगिसार्वज्ञ्यसर्वशक्तिमतःपरमेश्वरस्य महिमा न केनाप्यवधारयितुं शक्य इति 'क इत्था वेद यत्र स' इत्येतदर्थानुवादः। अयमाशयः। यस्य सर्वसंहर्तृत्वमुक्तं तत्र खलु सर्वविषयकज्ञानशक्तिमत्त्वेनापरिच्छेद्यमहिमत्वमन्वेति न तु तदधिकरणे। अतस्सर्वसंहर्तृत्वस्योपन्यासपूर्वकमपरिच्छेद्यमहिमत्वाक्तिः संहर्तृविषयैव भवतीति तन्निर्वाहाय यत्रेति

पदं छान्दसत्वात्प्रथमार्थ एव योजनीयमिति। सूत्रार्थमुपसंहरति-**अत इति।** सू।। **प्रकरणाच्च**।।१०।। यत्रेत्यस्य प्रथमान्ततायाः अवश्यवक्तव्यत्वात् संहर्तुः परमेश्वरत्वाभावे तत्प्रकरणं विरुध्येतेति भावः।। अस्मिन्नधिकरणे सिद्धान्तोपपादकं सर्वसंहर्तृत्वलिङ्गं पञ्चकृत्यकारिणः परमेश्वरस्य धर्म इति स्पष्टमेव तल्लिङ्गम्। तथापि परमकारुणिकस्य संहर्तृत्वं न सम्भवतीति शङ्कानिराकरणे-नोपपादनीयत्वात् नातिस्पष्टमिति पादसङ्गतिः। अत्र पूर्वपक्षसिद्धान्तयोस्संहाररुद्रात्परमेश्वरो भिन्नत्वेन व्यवहृतस्सर्वसंहर्ता परमेश्वरो न तु संहाररुद्र इति सिद्धान्तव्यवस्थापनार्थं भाष्ये सूत्राभिप्रेतश्रुत्यन्तरोपन्यासेन सृज्यात्संहार्यच्च ततः स्रष्टा संहर्ता च परमेश्वरो भिन्नत्वेनोपपादितश्च। ततश्च विषयवाक्ये मृत्युशब्दोऽवान्तरसंहाराधिकारित्वाविशेषान्मृत्युयमचित्रगुप्तादीनामिव संहाररुद्रस्याप्युलक्षक इति श्रुत्यन्तरानुसारेण विषयवाक्यतोऽपि तत्सिद्धिरिति भाष्याभिप्रायः। एवं हिरण्यगर्भाधिकरणशारीराधिकरणाभ्यामनेनाधिकरणेन च त्रिमूर्त्युत्तीर्णत्वेन सिद्धे परमेश्वरे परमशिवे सर्वेषां वेदान्तानामिह समन्वयः प्रतिपाद्य इति सिद्धम्। यत्तु पुराणेषु क्वचित्क्वचिद्धिरण्यगर्भस्य नाराणयस्य संहाररुद्रस्य वा त्रिमूर्त्युत्तीर्णत्ववचनं तत्सर्वं तत्तद्विभूतिभूताधिकारिपुरुषापेक्षम्। सन्ति खलु त्रिमूर्तीनामधिकारिपुरुषास्तत्र तत्रावान्तरसृष्टिस्थितिसंहारकारिणः। यथा हिरण्यगर्भस्य विराट्कालपुरुषाः नारायणस्यानिरुद्धप्रद्युम्नसङ्कर्षणाः संहाररुद्रस्य भवमृडहराः। एते च वायुसंहितायां निरूपिताः। न च ब्रह्मविष्णुरुद्राणां प्रत्येकं त्रिमूर्तिरूपाधिकारिपुरुषवत्त्वाभ्युपगमे शिवस्य त्रिमूर्त्युत्तीर्णत्ववचनानां भवमृडहरातीतसंहाररुद्रविषयत्वसम्भवेन प्रधानत्रिमूर्त्युत्तीर्णपरमशिवा-सिद्धिप्रसङ्गः। वायुसंहितायामेव 'सृजत्यशेषमीशस्य शासनाच्चतुराननः। तिसृभिर्मूर्तिभिश्चापि पाति चान्ते निहन्ति च। विष्णुः पालयते विश्वं विश्वयोनेर्नियोगतः। सृजते ग्रसते चापि स्वकाभिस्तनुभिस्त्रिभिः।। हरत्येतज्जगत्सर्वं हरस्तस्यैव शासनात्। सृजत्येतच्च विश्वात्मा त्रिधा भिन्नस्तु रक्षति।।' इति स्वस्वव्यूहभूतमूर्तित्रयातीतप्रधानमूर्तित्रयपरत्वने परमशिवस्य निरूपणात्। अतो नात्र कश्चिद्विरोध इति सर्वं समञ्जसम।। ।।

इति शिवार्कमणिदीपिका द्वितीयअत्तृधिकरणम् समाप्तम्

अथ गुहाधिकरणम् ॥ सू॰ ११-१२ ॥

शाङ्करभाष्यम्

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्।।११।। कठवल्लीष्वेव पठयते-''ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे। छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेता'' (काठ॰ १/३/१) इति। तत्र संशयः-किमिह बुद्धिजीवौ निर्दिष्टौ, उत जीवपरमात्मानाविति। यदि बुद्धिजीवौ, ततो बुद्धिप्रधानात्कार्यकरणसङ्घाताद्विलक्षणो जीवः प्रतिपादितो भवति। तदपीह प्रतिपादयितव्यम्; ''येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके। एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेश वरस्तृतीयः।'' (कठ॰ १/१/२०) इति पृष्टत्वात्। अथ जीवपरमात्मानौ, ततो जीवाद्विलक्षणः परमात्मा प्रतिपादितो भवति। तदपीह प्रतिपादयितव्यम्; ''अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृतात्। अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वद।।'' (कठ॰ १/२/१४) इति पृष्टत्वात्।।

अत्राहाक्षेप्ता-उभावप्येतौ पक्षौ न संभवतः ; कस्मात्? ऋतपानं कर्मफलोपभोगः ; ''सुकृतस्य लोक'' इति लिङ्गात्। तच्चेतनस्य क्षेत्रज्ञस्य संभवति, नाचेतनाया बुद्धेः। ''पिबन्तौ'' इति च द्विवचनेन द्वयोः पानं दर्शयति श्रुतिः। अतो बुद्धिक्षेत्रज्ञपक्षस्तावन्न संभवति। अत एव क्षेत्रज्ञपरमात्मपक्षोऽपि न संभवति; चेतनेऽपि परमात्मन्यृतपानाभावात्, ''अनश्नन्नन्योऽऽभिचाकशीती'' ति मन्त्रवर्णादिति।।

अत्रोच्यते-नैष दोषः ; छत्रिणो गच्छन्तीत्येकेनापि छत्रिणा बहूनां छत्रित्वोपचारदर्शनाद् एवमेकेनापि पिबता द्वौ पिबन्तावुच्येते। यद्वा जीवस्तावत पिबति, इश्वरस्तु पाययति। पाययन्नपि पिबतीत्युच्यते; पाचयितर्यपि पक्तृत्वप्रसिद्धिदर्शनात्। बुद्धिक्षेत्रज्ञपरिग्रहोऽपि संभवति; करणे कर्तृत्वोपचारात्। एधांसि पचन्तीति प्रयोगदर्शनात्। न चाध्यात्माधिकारेऽन्यौ कौचिदृतं पिबन्तौ संभवतः। तस्माद् बुद्धिजीवौ स्याताम्, जीवपरमात्मानौ वेति संशयः।।

किं तावत् प्राप्तम्? बुद्धिक्षेत्रज्ञाविति। कुतः? ''गुहां प्रविष्टावि'' ति विशेषणात्। यदि शरीरं गुहा, यदि वा हृदयम्, उभयथाऽपि बुद्धिक्षेत्रज्ञौ गुहां प्रविष्टावुपपद्येते। न च सति संभवे सर्वगतस्य ब्रह्मणो विशिष्टदेशत्वं युक्तं कल्पयितुम्। सुकृतस्य लोक इति च कर्मगोचरातिक्रमं दर्शयति,

परमात्मा तु न सुकृतस्य वा दुष्कृतस्य वा गोचरे वर्तते; "न कर्मणा वर्धते नो कनीयान्" इति श्रुतेः। "छायातपावि" ति च चेतनाचेतनयोर्निर्देश उपपद्यते; छायातपवत्परस्परविलक्षणत्वात्। तस्माद् बुद्धिक्षेत्रज्ञाविहोच्येयातामिति।।

एवं प्राप्ते ब्रूमः–विज्ञानात्मपरमात्मानाविहोच्येयाताम्। कस्मात्? आत्मानौ हि=तावुभावपि चेतनौ समानस्वभावौ। संख्याश्रवणे च समानस्वभावेष्वेव लोके प्रतीतिर्दृश्यते– अस्य गोर्द्वितीयोऽन्वेष्टव्य इत्युक्ते गौरेव द्वितीयोऽन्विष्यते, नाश्वः पुरुषो वा। तदिह ऋतपानेन लिङ्गेन निश्चिते विज्ञानात्मनि, द्वितीयान्वेषणायां समानस्वभावश्चेतनः परमात्मैव प्रतीयते।।

ननु–उक्तं गुहाहितत्वदर्शनान्न परमात्मा प्रत्येतव्य इति? गुहाहितत्वदर्शनादेव परमात्मा प्रत्येतव्य इति वदामः। गुहाहितत्वं तु श्रुतिस्मृतिष्वसकृत्परमात्मन एव दृश्यते–"गुहाहितं गह्वरेष्ठं पुराणम्" (कठ० १/२/१२) "यो वेद निहितं गुहायां परमे व्योमन्" (तै० २/१) "आत्मानमन्विच्छ गुहां प्रविष्टम्" इत्याद्यासु। सर्वगतस्यापि ब्रह्मण उपलब्ध्यर्थो देशविशेषोपदेशो न विरुध्यत इत्येतदप्युक्तमेव। सुकृतलोकवर्तित्वं तु छत्रित्ववदेकस्मिन्नपि वर्तमानमुभयोरविरुद्धम्। छायातपावित्यप्यविरुद्धम्; छायातपवत्परस्परविलक्षणत्वात्संसारित्वासंसारित्वयोः। अविद्याकृतत्वात्संसारित्वस्य, परमार्थिकत्वाच्चासंसारित्वस्य। तस्माद्विज्ञानात्मपरमात्मानौ गुहां प्रविष्टौ गृह्येते।।११।।

कुतश्च विज्ञानात्मपरमात्मानौ गृह्येते? *विशेषणाच्च*।।१२।। विशेषणं च विज्ञानात्मपरमात्मनोरेव भवति। "आत्मानं रथिनं विद्धि शरीरं रथमेव त्वि" (का० १/३/३) त्यादिना परेण ग्रन्थेन रथिरथादिरूपककल्पनया विज्ञानात्मांन रथिनं संसारमोक्षयोर्गन्तारं कल्पयति। "सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्" (का० १/३/९) इति च परमात्मानं गन्तव्यम्। तथा "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाती" (का० १/२/१२) इति पूर्वस्मिन्नपि ग्रन्थे मन्तृमन्तव्यत्वेनैतावेव विशेषितौ। प्रकरणं चेदं परमात्मनः। "ब्रह्मविदो वदन्ती" ति वक्तृविशेषोपादानं परमात्मपरिग्रहे घटते। तस्मादिह जीवपरमात्मानावुच्येयाताम्।।

एष एव न्यायो "द्वा सुपर्णा सयुजा सखाया" (मुण्ड० ३/१/१) इत्येवमादिष्वपि। तत्रापि ह्यध्यात्माधिकारान्न प्राकृतौ सुपर्णावुच्येते। "तयोरन्यः पिप्पलं स्वाद्वत्ती" त्यदनलिङ्गाद्विज्ञानात्मा भवति। "अनश्नन्नन्योऽभिचाकशीती" त्यनशनचेतनत्वाभ्यां परमात्मा। अनन्तरे च मन्त्रे तावेव द्रष्टृद्रष्टव्यभावेन विशिनष्टि–"समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक" (मुण्ड० ३/१/२) इति।।

अपर आह–''द्वा सुपर्णे'' ति नेयमृगस्याधिकरणस्य सिद्धान्तं भजते; पैङ्गिरहस्यब्राह्मणेनान्यथा व्याख्यातत्वात्–''तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वमनश्नन्नन्योऽभिचाकशीतीत्यनश्नन्नन्योऽभिपश्यतीति ज्ञस्तावेतौ सत्त्वक्षेत्रज्ञावि'' ति। सत्त्वशब्दो जीवः, क्षेत्रज्ञशब्दः परमात्मेति यदुच्यते, तन्न; सत्त्वक्षेत्रज्ञशब्दयोरन्तः करणशारीरपरतया प्रसिद्धत्वात् तत्रैव च व्याख्यातत्वात्–''तदेतत्सत्त्वं येन स्वप्नं पश्यति अथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञस्तावेतौ सत्त्वक्षेत्रज्ञावि'' ति। नाप्यस्याधिकरणस्य पूर्वपक्षं भजते। न ह्यत्र शारीरः क्षेत्रज्ञः कर्तृत्वभोक्तृत्वादिना संसारधर्मेणोपेतो विवक्ष्यते, कथं तर्हि? सर्वसंसारधर्मातीतो ब्रह्मस्वभावश्चैतन्यमात्रस्वरूपः ; ''अनश्नन्नन्योऽभिचाकशीति'' ''अनश्नन्नन्योऽभिपश्यतीति ज्ञ'' इति वचनात्। ''तत्त्वमसि'' ''क्षेत्रज्ञं चापि मां विद्धी'' (गी० १/३/२/) त्यादिश्रुतिभ्यश्च। तावता च विद्योपसंहारदर्शनमेवमेवावकल्पते–''तावेतौ सत्त्वक्षेत्रज्ञौ न ह वा एवंबिदि किंचन रज आध्वंसत'' इत्यादि॥

कथं पुनरस्मिन् पक्षे ''तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वम्'' इत्यचेतने सत्त्वे भोक्तृत्वचनमिति? उच्यते–नेयं श्रुतिरचेतनस्य सत्त्वस्य भोक्तृत्वं वक्ष्यामीति प्रवृत्ता। किं तर्हि? चेतनस्य क्षेत्रज्ञस्य-भोक्तृत्वं ब्रह्मस्वभावतां च वक्ष्यामीति। तदर्थं सुखादिविक्रियावति सत्त्वे भोक्तृत्वमध्यारोपयति। इदं हि कर्तृत्वं भोक्तृत्वं च सत्त्वक्षेत्रज्ञयोरितरेतरस्वभावाविवेककृतं कल्प्यते, परामर्थतस्तु नान्यतरस्यापि सम्भवति; अचेतनत्वात्सत्त्वस्य, अविक्रियत्वाच्च क्षेत्रज्ञस्य। अविद्याप्रत्युपस्थापितस्वभावत्वाच्च सत्त्वस्य सुतरां न संभवति। तथाच श्रुतिः–'' यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येदि'' त्यादिना स्वप्नदृष्टहस्त्यादिव्यवहारवदविद्याविषय एव कर्तृत्वादिव्यवहारं दर्शयति। ''यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदि'' (बृ० ४/५/१५) त्यादिना च विवेकिनः कर्तृत्वादिव्यहाराभावं दर्शयति॥१२॥

इति शाङ्करभाष्यम् तृतीयं गुहाधिकरणम् समाप्तम्

वार्तिकम्

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्।।११।। कठवल्लीष्वेवायं मन्त्रः पठयते—"ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे। छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेता" इति। लोके=भूरादौ, सुकृतस्य=स्वयं कृतस्य, धर्माधर्माख्यस्य कर्मणः, ऋतम्=अनुष्ठानोत्तरमवश्यम्भावि फलम्, पिबन्तौ=भुञ्जानौ, किं विशिष्टौ सन्तौ गुहाम्-गुहायाम्, शरीरे, हृत्पुण्डरीकान्तर्बिलेवा, परमे=उत्कृष्टे, उत्कृष्टत्वे हेतुः—परार्धे=परस्य ब्रह्मणः, अर्धे=स्थाने, प्रविष्टौ= आकाशमिव घटकरकादौ संनिविष्टौ, छायातपौ=तमः प्रकाशाविव परस्परविरुद्धस्वभावौ, वदन्ति=कथयन्ति, के? ब्रह्मविदः=कृतब्रह्मात्मैकत्वसाक्षात्काराः। न केवलं ब्रह्मविद एव तौ तथा वदन्ति, किं तर्हि? कर्मिणोऽपीत्याह—*पञ्चाग्नयो ये च पञ्चाग्नयः=पञ्चैव गार्हपत्यादयो येषां ते। तथा त्रिश्चितो नाचिकेतोऽग्निर्यैः त्रिणाचिकेताः। चकारात् तेऽपि वदन्तीति सम्बन्धः।।

तत्र त्रयाणां बुद्धि-जीव-परमात्मनां हृदयगुहायां प्रविष्टत्वविरोधात् तेषां मध्ये द्वयोरिह कर्मफलपातृत्वेनानूद्य विरुद्धस्वभावत्वमुच्यत इति नियामककारणाश्रवणात् विरुद्धस्वभावत्वस्य च बुद्धिजीवयोर्जडाजडस्वभावत्वेन जीवपरमात्मनोश्च शुद्धाशुद्धस्वभावत्वेन संभवाद् भवति संशयः—किमिह पिबन्ताविति बुद्धिजीवौ निर्दिष्टौ, किं वा जीवपरमात्मानौ—इति। ननु—त्रयाणां प्रविष्टानां मध्ये द्वयोर्ग्रहणे, अथवा बुद्धिपरमात्मानाविति कोटयन्तरस्यापि संभवात् किमिति द्विकोटिक एव सन्देहो व्यपदिश्यते, न त्रिकोटिरिति—चेत्, नैष दोषः ; बुद्धिपरमात्मनोर्जीवसाहित्यं विहाय कर्मफलपातृत्वानुपपत्तेः। बुद्धिपरमात्मानौ हि न कर्मफलपातारौ मुख्यौ जडत्वशुद्धत्वाभ्याम्। किं तर्हि पातृसाहित्यं निमित्तीकृत्य छत्रिवत् सृष्टिवच्चोपचारात्तयोः पातृत्वव्यपदेशः। कर्मफलपाता च मुख्यो जीव एव। न चैवं तत्पातृत्वव्यपदेशसिद्धार्थजीवसाहित्ये विवक्षिते द्वित्वमुपपद्यते, येन पिबन्ताविति बुद्धीश्वरयोर्ग्रहणसंभावना स्यात्; जीवसहभावेन तेषां बहुत्वात्। एतेन—पाचयितरि तत्करणे च काष्ठादौ पक्तरीव पक्तृत्वव्यपदेशदर्शनात् तयोरपि स्वव्यापारे कर्तृत्वात् सर्वकारकव्यापारसमुदायस्यैव पाकत्वात् तद्वद् बुद्धीश्वरयोरपि पानकरणत्वहेतुकर्तृत्वाभ्यामवान्तर-व्यापारमपेक्ष्य मुख्यपानकर्तृत्वोपपत्तेश्छत्रिन्यायेन साहित्यविवक्षाया अभावाद् न द्विवचनविरोध

इति–अपास्तम्; तथापि तयोस्तत्र स्वतन्त्राकर्तृत्वेन स्वातन्त्र्यव्यपदेशानुपपत्तेः। छत्रिन्यायेन लक्षणया तद्व्यपदेशे च न काचिदनुपपत्तिः। तस्माद् द्विकोटिक एव विमर्शो युक्तः–किमिह बुद्धिजीवौ निर्दिष्टौ, उत जीवपरमात्मानौ–इति संभवात्।। किं भवति प्रयोजनम्? उच्यते; यदि पूर्वः पक्षः, तदा बुद्धेरुपलक्षणत्वात् तत्प्रधानात् कार्यकरणसङ्घातात् विशुद्धस्वभावत्वेन विलक्षणो जीवोऽस्मिन् मन्त्रे प्रतिपादितो भवति। तद्वैलक्षण्यमपीह जीवस्य प्रतिपादनीयम्; "येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैक" इति तद्व्यतिरिक्तजीवास्तित्वस्य पृष्टत्वात्। अथोत्तरः पक्षः, तदा जीवात्मनो विलक्षणः परमात्मा प्रतिपादितो भवति; "अन्यत्र धर्मादन्यत्राधर्मादि" त्यादिना तस्यापि पृष्टत्वात्। ननु– एवं तर्हि नानयोः पक्षयोः प्रयोजने कश्चिद् विशेषोऽस्ति; अर्थत एकप्रयोजनत्वात्। कथम्? यदि कार्यकरणसङ्घाताद्विलक्षणं जीवस्वरूपं प्रतिपाद्यते, यदि वा कार्यकरणसङ्घातविशिष्टात् जीवाद्विलक्षणं ब्रह्मस्वरूपम्, उभयथा ब्रह्मस्वरूपमेवात्मनः प्रतिपादितं भवति। न हि कार्यकरणसङ्घाताद्विलक्षणं जीवस्वरूपं ब्रह्मणो व्यतिरिच्यते, न वा कार्यकारणसङ्घातात्माभिमानिनो जीवाद्विलक्षणं ब्रह्मस्वरूपम्; तद्विलक्षणजीवस्वरूपात् "तत्त्वमस्यहं ब्रह्मास्मी" त्यादितदभेदबोधकशास्त्रविरोधात्। तस्मादुभयोरपि पक्षयोः प्रयोजनाभेदाद् नारब्धव्यमिद-मधिकरणमिति–चेत्, सत्यमेतत्; तथापि जीवेशस्वरूपयोः प्रश्नभेददर्शनाद् अत्यन्ता भेदे तदनुपपत्तेरस्ति ब्रह्मस्वरूपाद् जीवस्वरूपस्य केनचिदंशेन भेदोऽहिकुण्डलादिवत्; तत्त्वमस्यादि-वाक्यस्याभेदांशमादायाप्युपपत्तेरिति मन्यते पूर्वपक्षी। एवं च सति जीवस्याप्यत्र प्रतिपाद्यत्वेन प्रकरणसत्त्वाद् अत्रापि जीव एवेति पूर्वाधिकरणमप्याक्षिप्तं भवति। इयमेव पूर्वोत्तराधिकरणयोः सङ्गतिः। सिद्धान्ते तु जीवब्रह्मस्वरूपयोरत्यन्ताभेदस्य तत्वमस्यादिवाक्येन तात्पर्यतोऽधिगमाद् अहिकुण्डलादिवत् तयोर्भेदाभेदस्य निराकरिष्यमाणत्वाच्च "येयं प्रेत" इत्यादिना जीवास्तित्वस्य पृष्टस्यैव–"अन्यत्र धर्मादि" त्यादिना तत्स्वरूपाधिगमाय पुनः पृष्टत्वात् प्रष्टव्यभेदसिद्धेः प्रकरणाभेदादीश्वरस्वरूपमेवाविद्यापरिकल्पितजीवाद्विलक्षणं सिद्धं प्रतिपाद्यत इति पूर्वपक्षप्रयोजनवैलक्षण्यात् प्रयोजनसिद्धिः। तस्मात् पक्षयोः प्रयोजनभेदादुपपन्नोऽधिकरणारम्भ इति।।

ननु–तथापि नोपपन्नः ; उभयपक्षस्याप्यसंभवात्, बुद्धीश्वरयोर्जडत्वशुद्धत्वाभ्यां कर्मफलभोक्तत्वानुपपत्तेस्तदन्यतरेण कर्मफलभोक्तुः सद्वितीयत्वानुपपत्तेरिति–चेत्, न; उक्तोत्तरत्वात्। उक्तमेतत् छत्रिन्यायेन हेतुकरणयोरवान्तरव्यापारापेक्षया वा तयोस्तदुपपत्तेरिति। तस्मादुपपन्नः संशयः।।

किं तावत् प्राप्तम्? बुद्धिक्षेत्राविह पातारौ गृह्येते, न जीवपरमात्मानाविति। कुतः? गुहां प्रविष्टाविति विशेषणसामर्थ्यात्। प्रवेशो नाम देशान्तरादभ्यन्तरेऽवस्थानम्। प्रकृते च

देशान्तरप्रवेशाश्रयं गुहाशब्दवाच्यं शरीरम्, हृदयं वा। न च परमात्मनस्तत्रोक्तलक्षणप्रवेश उपद्यते; सर्वगतत्वव्याघातात्, बुद्धिजीवयोस्त्वाराग्रमात्रत्वादिहलोकपरलोकगामित्वाच्च तदनुपपत्तिः। अपिचाविवक्षितप्रसक्तप्रतिषेधो हि विशेषणाभिधानस्य प्रयोजनम्; अन्यथा तदभिधानवैयर्थ्यापत्तेः। तदुक्तं वृद्धैः–"व्यावर्तकं हि विशेषणं नाम भवती" ति। प्रकृते च पाययितुरपि जीवस्य द्वितीयत्वेन पातृतया तद्ग्रहणप्रसक्तौ गुहां प्रविष्टाविति विशेषणेन योग्यतता तत्सद्वितीयत्वेन बुद्धिमेव ग्राहयित्वा तदप्रविष्टः पाययिता विनिवार्यत इति युक्तमुत्पश्यामः। एतेन–सर्वगतस्यापि ब्रह्मण आकाशस्येव घटादिदेशप्रवेशित्वमुपचाराद् विशिष्टदेशप्रवेशित्वमविरुद्धमिति–प्रत्याख्यातम्। अपि च "सुकृतस्य लोक" इति कर्मसाध्यलोकानतिक्रमं तयोर्दर्शयति। स च परमात्मनः परिग्रहे न संभवेत्; "न कर्मणा वर्धते नो कनीयान्" इति श्रुतेः। अपिच छायातपावित्यन्तवैक्षयप्रतिपादनं बुद्धिजीवयोः परिग्रहे घटते; तयोरेव चेतनाचेतनत्वाभ्यामत्यन्तविलक्षणत्वात्, न जीवेश्वरयोः ; तयोश्चेतनत्वैकत्वाभ्यामवैलक्षणात्। तस्माद् बुद्धिजीवयोरेवेह ग्रहणम्, न जीवपरमात्मनोः–इति।।

एवं प्राप्ते ब्रूमः–गुहां प्रविष्टाविति विशेषितौ कर्मफलपातारौ जीवात्मपरमात्मानावेव भवितुमर्हतः, न बुद्धिजीवौ। कुतः? हि=यस्माद् आत्मानौ तौ। किमतो यद्येवम्? एतदतो भवति–आत्मत्वेन तयोश्चेतनत्वात् सारूप्यं सिद्धयति, बुद्धिजीवयोस्तु तदभावाद् न सारूप्यमस्ति। जीवसरूपस्य हि परमात्मनः तत्सद्वितीयस्येह ग्रहणं युक्तम्। कुतः? तद्दर्शनात्=लोके हि सरूपेण सद्वितीयस्य प्रयोगो दृश्यते। तथा–लोके गौः सद्वितीय इत्युक्ते तत्सरूपं गवान्तरं प्रतीयते, न तद्विरूपमश्वादि, तद्वदिहापि लोकवेदाधिकरणस्यायेन वैदिकप्रयोगस्यापि लोकप्रयोगानुसारित्वात् "ऋतं पिबन्तौ" इत्यत्र कर्मफलभोगसम्बन्धादेकस्य पूर्वोक्तन्यायेन जीवत्वेऽवधारिते तस्य सद्वितीयः कोऽन्यः कर्मफलपातेत्यपेक्षायां तत्सरूपः परमात्मैव बुद्धिस्थो भवति न तद्विरूपा बुद्धिः; लोकदर्शनविरोधात्। न च परमात्मनो गुहाप्रवेशासंभवः ; प्रथमजातसरूपप्रत्ययानुसारेण तस्य व्याख्येयत्वात्, "स इह प्रविष्ट आनखाग्रेभ्यः" "तत्सृष्टवा तदेवानुप्राविशत्" "जीवेनात्मनाऽनुप्रविश्ये" ति श्रुतिषु परमात्मनः प्रवेशोपदेशदर्शनाच्च, सालिग्रामे विष्णुरितिवत् सर्वगतस्यापि परमात्मनो दृष्टयर्थत्वेन गुहानिहितत्वोपदेशस्याविरुद्धत्वादित्युक्तत्वात्, "गुहाहितं गह्वरेष्ठं पुराणम्" "यो वेद निहितं गुहायाम्" "आत्मानमन्विच्छ गुहां प्रविष्टम्" "पितामहाच्चोर्ध्वगतात् पिता चे" त्यादिश्रुतिस्मृतिषु परमात्मन एव तथात्वोपदेशात्। सुकृतलोकवर्तित्वं छत्रिवदेकस्मिन्नपि वर्तमानमुभयोरविरुद्धमित्युक्तमेव। अविद्याकल्पितसंसारित्वासंसारित्वाभ्यां जीवेशयोरेकत्वेऽपि छायातपवद्विरुद्ध स्वभावत्वमप्युपपन्नं भवति; रजतत्वस्येवाज्ञातपरमार्थशुक्तित्वेनाविद्याकल्पितसंसारित्वस्य परमार्थसताऽसंसारित्वेनाविरोधात्। तस्माद् गुहां प्रविष्टाविह जीवात्मपरमात्मानौ गृह्येते।।११।।

विशेषणाच्च।।१२।। इतोऽपि जीवात्मपरमात्मानावेवेह गृह्येते, न बुद्धिजीवौ; यतः ''आत्मानं रथिनं विद्धी'' त्यादिना ''सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्'' इत्यन्तेन मन्त्रभागेन गन्तृगन्तव्यभावेन स्वप्रधानयतया तावेव विशिनष्टि। यद्यपि ''बुद्धिं तु सारथिं विद्धि'' इति बुद्धेरपीहोपन्यासोऽस्ति; तथापि रथादिभावेन शरीराद्युपन्यासवद् अन्यगुणतयोपन्यासाद् न तस्या इह ग्रहणम्। जीवात्मपरमात्मनोरभेदाज्ञापनायेह रथरूपकादिकल्पना क्रियते। अतस्तावेवाभिन्नतया ज्ञातव्यत्वेन स्वप्रधानौ, नान्ये; तदर्थत्वादन्येषाम्। तथा पूर्वस्मिन्नपि ग्रन्थे मन्तृमन्तव्यत्वेन तावेव विशिष्येते–''तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाती''ति। प्रकरणमपि तयोर्विशेषकम्; तयोरेव प्रश्नविषयत्वेन प्रकृतत्वात्। तथा ''छायातपौ ब्रह्मविदो वदन्ती'' ति ब्रह्मकर्तृत्वलक्षणं वक्तृविशेषणमपि जीवसद्वितीयत्वेन ब्रह्मपरिग्रहे साधकं भवति। ये हि यद्वस्तु जानन्ति, ते तद्विविच्य वक्तुं शन्कुवन्ति; अन्यथा तद्वैयर्थ्यापत्तेः। ''पञ्चाग्नय'' इतिवत्स्तुत्यर्थत्वाद् न वैयर्थ्यमिति चेत्, न, स्वार्थपरत्वे संभवति स्तुतिपरत्वकल्पनानुपपत्तेः, स्तुतिलक्षणाविशये श्रुतेर्न्याय्यत्वात्। तस्माद् गुहां प्रविष्टाविह जीवपरमात्मानौ गृह्येते–इति।।

केचित्तु–इममेव न्यायम्–''द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वद्वत्त्यनश्नन्नन्योऽभिचाकशीती'' त्यत्राप्यतिदिशन्ति; तत्राप्यस्य न्यायस्य योजयितुं शक्यत्वात्। तथाहि–अध्यात्माधिकारादिह तावद् न लौकिकौ पतङ्गौ सुपर्णौ ग्राह्यौ, नापि प्रसिद्धस्तरुर्वृक्षः, न वाऽऽश्वत्थं फलं पिप्पलम्; तेषामध्यात्माधिकारे निष्प्रयोजनत्वेन कथनानुपपत्तेः। किं तर्हि–''श्येनेनाभिचरन् यजेते'' त्यत्र कर्मविशेषे श्येनशब्दवत्, ''अजामेकां लोहित शुक्लकृष्णाम्'' इत्यत्र मूलप्रकृतावजाशब्दवच्च गुणेन विशिष्टक्रियायोगेन वाऽऽहारार्थमिह वृक्ष उच्यते, वृक्षवत् विनाशधर्मित्वाच्छरीरस्य, व्रश्चूच्छेदने इत्यस्य वृक्ष इति रूपनिष्पत्तेर्वा। तस्य च धर्माधर्मपुष्पकस्य–''एषोऽश्वत्थः सनातन'' इति श्रुतिस्मृतिभ्याम् अश्वः स्थायित्वेन चाश्वत्थत्वाभिधानात् तत्फलं सुख दुःखे अपि पिप्पलमुच्यते। बुद्धिजीवौ जीवपरमात्मानौ वा सुपर्णौ देहाद् देहान्तरे सुष्ठु पतनात् पतङ्गाविव वृक्षाद् वृक्षान्तरे। तौ च ताविव परस्परसहभावित्वेन सयुजौ, अत एव ताविव सखायौ। कुतस्तयोः सहभावित्वमिति चेत्, यतः समानं वृक्षं परिषस्वजाते=एकस्मिन्नेव शरीरवृक्षे कृतपरिषङ्गौ। तर्हि पतङ्गवदुभावपि शरीराश्वत्थफलसुखदुःखलक्षणं पिप्पलं भुञ्जाते? नेत्याह–तयोरन्यः=एकतरः, पिप्पलम्=सुखदुःखलक्षणं तत्फलम्, स्वादु=आस्वादितं यथा स्यात्, तथा, अत्ति=भुङ्क्ते, अन्यस्त्वनश्नन्=केवलम्, अभिचाकशीति=पश्यतीत्यर्थः। तत्र यः सुखदुःखभोक्ता, स जीव एव,

यस्त्वनश्नन्नभिचाकशीति, स च बुद्धिरीश्वरो वेति विशये–बुद्धिरेव; शरीरसम्बन्धात्। अनशनं च जडत्वात्, द्रष्टृत्वं च तत्करणत्वात्तस्य–इति।।

एवं प्राप्ते ब्रूमः- परमेश्वर एवेह जीवसद्वितीयो गृह्यते, न बुद्धिः। कुतः? अनन्तरमन्त्रवर्णे जौवात्मपरमात्मनोरेव–''समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक'' इत्यत्र द्रष्टृद्रष्टव्यभावेन तयोर्दर्शनात्, इहापि तदध्यवसानस्यैवोचितत्वात्, तथा परमात्मन एव श्रुत्यन्तरेऽनशनद्रष्टृत्वादिधर्मदर्शनात्–''न तदश्नाति किञ्चन'' ''अदृष्टो द्रष्टा'' इति च श्रुत्यन्तरमिति, ब्राह्मणवाक्याविरोधेन तत्रोक्तन्यायावतारानुपपत्तेः, पैङ्गिरहस्यब्राह्मणेनास्य मन्त्रस्यान्यथा व्याख्यानात्। ''तयोरन्यः पिप्पलं स्वद्वत्तीति सत्त्वम्, अनश्नन्नन्योऽभिचाकशीतीत्यनश्नन्नभिपश्यतीति ज्ञस्तावेतौ सत्वक्षेत्रज्ञावि'' ति हि तद् ब्राह्मणम्। ननु–ब्राह्मणवाक्ये सत्त्वशब्देन जीवात्मा परिगृह्यते, क्षेत्रज्ञशब्देन च परमात्मा, तथाच सिद्धान्तपक्षेण श्रुतेरेकार्थत्वाद् न तद्विरोध इति–चेत्, न; सत्त्वक्षेत्रज्ञशब्दयोर्बुद्धिजीवयोर्लोके प्रसिद्धत्वात् तद्विरोधेनान्यार्थकल्पनानुपपत्तेः। अपिच तस्मिन्नेव ब्राह्मणे वाक्यशेषे सत्त्वक्षेत्रज्ञशब्दौ बुद्धिजीवपरतया व्याख्यातौ–''तदेतत्सत्वं यः स्वप्नं पश्यति अथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञस्तावेतौ सत्त्वक्षेत्रज्ञौ''–इति।।

ननु–एवं तर्हि अस्याधिकरणस्य पूर्वपक्ष एवात्रास्तु; ब्राह्मणवाक्यानुसारित्वादिति–चेत्, न, असिद्धेः। न ह्यत्र कर्तृत्वभोक्तृत्वाद्युपेतः संसारी क्षेत्रज्ञः प्रतिपाद्यतया तववक्ष्यते, येन ब्राह्मणानुसारितया पूर्वपक्षसिद्धिः स्यात्ः तस्य सर्वप्रत्यक्षसिद्धत्वेनाप्रतिपाद्यत्वात्, निष्प्रयोजनत्वाच्च तत्प्रतिपादनस्य। किं तर्हि? सर्वसंसारधर्मातीतो ब्रह्मस्वभावचैतन्यस्वरूपः; ''अनश्नन्नन्योऽभिचाकशीत्यनश्नन्नभिपश्यतीति ज्ञ इति ब्राह्मणवचनात्। न हि जीवस्य शुद्धस्वरूपं ब्रह्मणोऽतिरिक्तम्; 'तत्त्वमसि' ''क्षेत्रज्ञं चापि मां विद्धी' ति श्रुतिस्मृतिशतेभ्यस्तस्य ब्रह्माभेदसिद्धेः। अपिच इतोऽपि क्षेत्रज्ञस्य सर्वसंसारातीतशुद्धब्रह्मस्वरूपपरत्वं मन्त्रस्यानेन ब्राह्मणवाक्येन व्याख्यायत इत्यध्यवसीयते; यतस्तावतैव विद्योपसंहारः क्रियते–''तावेतौ सत्त्वक्षेत्रज्ञौ न ह वा एवंविदि किञ्चन रज आध्वंसत'' इत्यादि। अचेतनाया बुद्धेः कर्मफलभोक्तृत्वानुपपत्तेर्नेवं ब्राह्मणेन व्याख्यानं युक्तमिति चेत, न; चेतनाभोक्तृत्वपतिपादनपरत्वात्तस्य वाक्यस्य स्वार्थे तात्पर्याभावात्। अविद्याप्रत्युपस्थापितबुद्ध्युपाधिकृतं ह्यात्मनः कर्तृत्वभोक्तृत्वादि, न स्वतः ; अविक्रियत्वादित्येवंपरं हि तद्वाक्यम्, न बुद्धेरचेतनायाः कर्तृत्वभोक्तृत्वादिकथनपरम्, इत्यत्र न काचिदनुपपत्तिः–इति।।१२।।

इति वार्तिकम् तृतीयं गुहाधिकरणम् समाप्तम्

प्रदीपः

गुहां प्रविष्टौ, आत्मानौ=जीवात्मपरमात्मानौ, तद्दर्शनात्=समानस्वभावबोधकद्विवच-नान्तशब्दबोध्यत्वादिति सूत्राशयः। पूर्वाधिकरणेऽत्तृत्वस्य परमात्मनि संहर्तृत्वरूपत्वव्यवस्थापनाद् ऋतपानकर्तृत्वस्य सर्वथा तत्र बाधाद् न परमात्मपरिग्रहसंभावनापीति प्रत्यवस्थानात् प्रासङ्गिकी सङ्गतिः। तथाच ऋतपानकर्तृत्वाद्यब्रह्मलिङ्गस्यैवात्र प्राधान्याद् ब्रह्मविद्वर्ण्यमानत्वादि-ब्रह्मलिङ्गाभिभावादस्पष्टब्रह्मलिङ्गत्वम्। इदमप्यधिकरणं पूर्वाधिकरणवद् निर्विशेषपरमेव, प्रसङ्गात्तु प्रवर्तते। एतेन–सविशेषपादेऽत्र पूर्वाधिकरणस्य न सङ्गतिरिति शङ्कापि–न सावसरा।।

इदमप्यधिकरणं पूर्वाधिकरणविषयवाक्यानन्तरं प्रवृत्तम्–"ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे। छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः" इति वाक्यमेव गोचरयति।।

अत्र गुहाप्रविष्टत्वमेव पूर्वोत्तरपक्षयोरुभयोरपि साधारणम्, ऋतपानकर्तृत्वादौ तु नैकरूप्यमिति गुहां प्रविष्टाविति सूत्रप्रवृत्तिः। अत्र तृतीयप्रश्नस्य परलोकगन्ता जीवः, तदगन्ता जीव इति पक्षद्वयविचिकित्सार्थत्वात्–प्रथमाध्यायद्वितीयवल्लया तुरीयचैतन्यस्य परमार्थतो जीवत्वभिप्रेत्य तस्य धर्माधर्माद्यतीतत्वादिवर्णनाद् जीवस्य परलोकागमनपक्षः समर्थितः। साम्प्रतन्तु परलोकगन्ता जीव इति पक्षोऽपि नासाधुः ; तादृशस्याप्यात्मनः कस्यचन विद्यमानत्वात्। सोऽपि "गुहाहितं गह्वरेष्ठमि" त्युक्तरीत्या गुहाहित एव, परं तु न स प्राप्यस्थानम्, किन्तु प्रापक एवेति विवेचनार्थ प्रवृत्तम्–"ऋतं पिबन्तावि" ति वाक्यमिति निरूपणार्थमिदमधिकरणम्। तेन चाहमर्थाद् जीवाद् विलक्षणः प्रत्यगात्मा तुरीयचैतन्यमेव तत्त्वमस्यादिमहावाक्यार्थः। तथाच तृतीयवरप्रश्नोत्तरस्यैवोत्तरत्राप्यनुवृत्तिरिति फलति। जीवो ह्यानन्दमयो विज्ञानमयान्तगुहासु प्रविष्टः, परमात्मा तु सर्वान्तरो विज्ञानमयस्याप्यन्तर इति गुहाप्रविष्टत्वमुभयसाधारणमेव। तत्र मनोमयान्तगुहासु विज्ञानमयानन्दमययोः प्रवेशाद् गुहां प्रविष्टौ बुद्धिजीवौ वा, उत जीवपरमात्मानौ वेति संशयो भवति। तत्र ऋतपानकर्तृत्वं बुद्धावचेतनत्वाद् बाधितम्, परमात्मनि तुरीयत्वाद् बाधितम्, उभयत्र तु गौणम्। छायातपत्वं तु बुद्धिजीवयोः स्वरसम्, जीवपरमात्मनोस्तु न स्वरसम्। ब्रह्मविद्वर्ण्यमानत्वं जीवपरमात्मनोर्ग्रहणे स्वरसम्, अन्यत्र न स्वरसम्। तत्र पूर्वपक्षेऽहमर्थ एवात्मा, द्वितीयपक्षे तु नाहमर्थो मुख्यात्मेति फलभेदो विशदः।।

तथाच–"अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्। अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यत" इति महच्छब्दवाच्यतयाऽऽनुमानिकाधिकरणभाष्यप्रतिपादिताद् रथित्वेन रूपिताद् आत्मनः परत्वमप्युपसंहृतमुपपद्यते। तथाच सर्वं प्रकरणं जीवपरमात्मपक्षपरिग्रह एव सुष्टु लगति। बुद्धिजीवाविति पक्षस्तु छायातपत्वस्वारस्यमेवानुसृत्य। सर्वथा तु–अकर्तुरपि कर्तृत्वेन व्यपदेशाद्यविरोधेन जीवतुरीयचैतन्ययोरप्यात्मत्वेन समानस्वभावत्वेऽपि "सम्भोगप्राप्तिरिति चेन्न वैशेष्यादि" ति सूत्रप्रतिपादितवैशेष्यमुपसंहर्तुमिदमधिकरणमपेक्षितमेव।।

अत्रोपयुक्तानि प्राकरणिकानि वाक्यानि संगृह्यन्ते। तानि यथा–"ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे। छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः।। यः सेतुरीजानामक्षरं ब्रह्म यत् परम्। अभयं तितीर्षतां पारं नाचिकेतं शकेमहि।। आत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनःप्रग्रहमेव च।। इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्। आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः।।... ... ... यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः। स तु तत्पदमाप्नोति यस्माद्भूयो न जायते।। विज्ञानसारथिर्यस्तु मनः प्रग्रहवान् नरः। सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्। इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः। महतः परमव्यक्तमव्यक्तात् पुरुषः परः।। पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः।"–इति।। अत्र बुद्धिजीवपरमात्मानस्त्रयः प्रकरणे प्रतिपाद्यन्त इति स्थितेऽपि "पिबन्तावि"त्यादिद्विवचनमहिम्ना द्वयोरेव विवक्षणीयत्वाद् बुद्धिपरमात्मनोरुभयोरपि ऋतपानकर्तृत्वाभावेन पिबन्तावित्यस्यात्यन्तिकबाधापत्त्या बुद्धिजीवपक्षः, जीवपरमात्मपक्षस्तु संशयावरे प्रदर्शितः।।

तत्र बुद्धिजीवाविति पूर्वपक्षः, जीवपरमात्मानाविति सिद्धन्तः। तत्र प्रथमे रथिसारथ्योर्ग्रहणम्, द्वितीये रथिप्राप्ययोरिति मन्तव्यम्। अत्र विषयवाक्यं संगृह्णाति–*कठवल्लीष्वेवेति*।। संशयं दर्शयति–*तत्रेत्यादिना*।। बुद्धिजीवपक्षस्यौचित्यं दर्शयति–*यदि बुद्धिजीवावित्यादिना–पृष्टत्वादित्यन्तेन*।। जीवपरमात्मपक्षौचित्यमाह–*अथेत्यादिना–तद्वदेति पृष्टत्वादिन्तेन*।। कोटिद्वयमप्याक्षिपति–*अत्राहेत्यादिना–मन्त्रवर्णादित्यन्तेन*।। "येयं प्रेते . विचिकित्से" ति लोकान्तरगमनपक्षे कार्यकरणसंघातवैलक्षण्यं जीवस्यावलम्बते। अत उपरितनः सन्दर्भो यदि परलोकगमनं जीवस्य समर्थयते, तर्हि पूर्वपक्षः। यदि परलोकागमनेनात्रैव ब्रह्मभावो विवक्ष्यते, तर्हि सिद्धान्तपक्ष इति भावः। ऋतपानासंभावाद् आक्षेपः। अत्र परिहरति–*नैष दोष इति*।। छत्रिन्यायेन पिबन्ताविति निर्देश इति भावः। *एकेनापीति*।। कस्याप्यच्छत्रित्वे तु न छत्रिन्याय इति न बुद्धिपरमात्मनाविति पक्षान्तरप्रसङ्ग इति सूच्यते। पिबन्ताविति प्रयोज्यप्रयोजकोभयविधकर्तृत्वपरम्।

दृष्टं हि प्रयोजककर्तर्यपि विना णिचमाख्यातप्रयोगः–"यावतोऽश्वान् प्रतिगृह्णीयादि" त्यादिस्थल इति भावः।।

पूर्वपक्षं संगृह्णाति–*बुद्धिक्षेत्रज्ञाविति*।। मनोमयान्तगुहात्वाभिप्रायेण पूर्वपक्ष इत्याह–*यदि शरीरमित्यादिना*।। ब्रह्मेतरलिङ्गे प्रबले संगृह्णाति–*सुकृतस्येति*।। छायातपाविति चेति*।। अनेन चास्पष्टब्रह्मलिङ्गत्वं समन्वितं भवति। सिद्धान्तपक्षं संगृह्णाति–*विज्ञानात्मेति*।। क्षेत्रज्ञपरमात्मानावित्यर्थः। अत्र पक्षे विज्ञानमयान्ता गुहा विवक्षितेति सूचनार्थमेव विज्ञानात्मपदं क्षेत्रज्ञपदपरित्यागेन; विज्ञानस्य बुद्धेरात्मा विज्ञानात्मेति विग्रहात्। 'आत्मानौ' इति सौत्रं पदं व्याचष्टे–*आत्मानौ हि=चेतनाविति*।। आत्मशब्दस्य चेतनवाचित्वात्। तद्दर्शनादिति व्याचष्टे–*सङ्ख्याश्रवणे चेति*।। अत्रेमे भामतीकारिके–

ऋतपानेन जीवात्मा निश्चितोऽस्य द्वितीयता।
ब्रह्मणैव सरूपेण, न तु बुद्ध्या विरूपया।।
प्रथमं सद्वितीयत्वे ब्रह्मणाऽवगते सति।
गुहाश्रयत्वं चरमं व्याख्येयमविरोधतः।।

इति। अत्र गुहा श्रयत्वं विज्ञानमयान्तगुहात्वपक्षेणैवोभयसाधारणं वक्तव्यम्। वस्तुतस्तु–आनन्दमयान्तगुहात्वमादायैव गुहाश्रयत्वमत्र वक्तव्यम्। अत एव पूर्वतनाध्याये गुहाहितमिति तुरीयमधिकृत्य प्रवृत्तमुपपद्यते। उभयसाधारण्यं तु तस्यापि छत्रिन्यायेनैवावगन्तव्यम्। इदमत्र बोध्यम्–जीवस्य गुहाश्रयत्वं निश्चितम्, अन्वत्तु गुहाश्रितं किमिति जिज्ञासायाम्–बुद्धेर्गुहानिहितत्वस्यान्यत्र कुत्राप्यश्रवणात् तुरीयस्य च पूर्वाध्यायान्ते गुहाहितमिति तदाम्नानात् तुरीयस्यैवापरस्योत्थितिर्न जीवस्येति सिद्धान्तिनां युक्तिसूचनार्थमेव–गुहां प्रविष्टाविति सूत्रोपक्रमः। तदिदं सूचयति भाष्यकारः–*गुहाहितत्वं त्विति*।। अन्यत् स्पष्टम्।।११।।

विशेषणाच्च।।१२।। प्राप्यप्रापकभावेन विशेषणाद् विज्ञानात्मपरमात्मनोः, तावेवात्र प्रतिपाद्यौ। बुद्धिजीवयोस्तु रथिसारथित्वं रूप्यते। तत्र वाक्यपरिसमाप्तिर्हि प्राप्यप्रापकव्यवस्थयैव भवति; अतस्तयोरेवात्र ग्रहणम्; "सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमि" त्युपसंहारादित्याह–*विशेषणं चेत्यादिना*। "द्वा सुपर्णे" ति वाक्यस्यैतद्विषतयां केषाञ्चनाभिमतामनूद्य निरस्यति–*द्वा सुपर्णेत्यादिना*।। शेषं स्पष्टम्।।१२।।

इति प्रदीपः तृतीयं गुहाधिकरणम् समाप्तम्

भामती

संशयमाह– *तत्र इति*। पूर्वपक्षे प्रयोजनमाह *यदि बुद्धिजीवौ इति*। सिद्धान्ते प्रयोजनमाह *अथ जीवपरमात्मानौ इति*। औत्सर्गिकस्य मुख्यताबलात् पूर्वसिद्धान्तपक्षासम्भवेन पक्षान्तरं कल्पयिष्यत इति मन्वानः संशयमाक्षिपति *अत्राह आक्षेप्तेति*। ऋतं सत्यमवश्यम्भावीति यावत्। समाधत्ते *अत्रोच्यते इति*। आध्यात्मिकाधिकारादन्यौ तावत्पातारावशक्यौ कल्पयितुम्। तदिह बुद्धेरचैतन्येन परमात्मनश्च भोक्तृत्वनिषेधेन जीवात्मैवैकः पाता परिशिष्यत इति सृष्टीरुपदधातीतिवद् द्विवचनानुरोधादपिबत्संसृष्टतां स्वार्थस्य पिवच्छब्दो लक्षयन् स्वार्थमजहन्नितरेतरयुक्तपिबदपिबत्परो भवतीत्यर्थः। अस्तु वा मुख्य एव, तथापि न दोष इत्याह *यद्वा इति*। स्वातन्त्र्यलक्षणं हि कर्तृत्वं तच्च पातुरिव पाययितुरप्यस्तीति सोऽपि कर्त्ता। अत एव चाहुः "यः कारयति स करोत्येव इति।" एवं करणस्यापि स्वातन्त्र्यविवक्षया कथञ्चित्कर्तृत्वं, यथा काष्ठानि पचन्तीति। तस्मान्मुख्यत्वेऽप्यविरोध इति।

तदेवं संशयं समाधाय पूर्वपक्षं गृह्याति *बुद्धिक्षेत्रज्ञौ इति*।

नियताधारता बुद्धिजीवसम्भविनी न हि।
क्लेशात् कल्पयितुं युक्ता सर्वगे परमात्मनि॥

न च पिवन्तावितिवत्प्रविष्टपदमपि लाक्षणिकं युक्तं, सति मुख्यार्थत्वे लाक्षणिकार्थत्वायोगात्। बुद्धिजीवयोश्च गुहाप्रवेशोपपत्तेः। अपि च सुकृतस्य लोक इति सुकृतलोकत्र्यवस्थानेन कर्मगोचरानतिक्रम उक्तः। बुद्धिजीवौ च कर्मगोचरमनतिक्रान्तौ। जीवो हि भोक्तृतया बुद्धिश्च भोगसाधनतया धर्मस्य गोचरे स्थितौ, न तु ब्रह्म; तस्यातदायत्तत्वात्। किञ्च छायातपाविति तमःप्रकाशावुक्तौ। न च जीवः परमात्मनोऽभिन्नस्तमः, प्रकाशरूपत्वात्। बुद्धिस्तु जडतया तम इति शक्योपदेष्टुम्। तस्माद् बुद्धिजीवावत्र कथ्येते। तत्रापि प्रेते विचिकित्सापनुत्तये बुद्धेर्भेदेन परलोकी जीवो दर्शनीय इति बुद्धिरुच्यते।

एवं प्राप्तेऽभिधीयते–

ऋतपानेन जीवात्मा निश्चितोऽस्य द्वितीयता।
ब्रह्मणैव सरूपेण न तु बुद्ध्या विरूपया॥

प्रथमं सद्वितीयत्वे ब्रह्मणोऽवगते सति।
गुहाश्रयत्वं चरमं व्याख्येयमविरोधतः॥

गौः सद्वितीयेत्युक्ते सजातीयेनैव गवान्तरेणावगम्यते, न तु विजातीयेनाश्वादिना। तदिह चेतनो जीवः सरूपेण चेतनान्तरेणैव ब्रह्मणा सद्वितीयः प्रतीयते, न त्वचेतनया विरूपया बुद्ध्या। तदेवममृतं पिबन्तावित्यत्र प्रथममवगते ब्रह्मणि तदनुरोधेन चरमं गुहाश्रयत्वं शालग्रामे हरिरितिवद् व्याख्येयम्। बहुलं हि गुहाश्रयत्वं ब्रह्मणः श्रुतय आहुः। तदिदमुक्तं *तद्दर्शनादिति*। तस्य ब्रह्मणो गुहाश्रयत्वस्य श्रुतिषु दर्शनादिति। एवं च प्रथमावगतब्रह्मानुरोधेन सुकृतलोकवर्त्तित्वमपि तस्य लक्षणया क्वचिन्न्यायेन गमयितव्यम्। छायातपत्वमपि जीवस्याविद्याश्रयतया ब्रह्मणश्च शुद्धप्रकाशस्वभावस्य तदनाश्रयतया मन्तव्यम्। इममेव न्यायं द्वा सुपर्णेत्यत्राप्युदाहरणे कृत्वाचिन्तया योजयति *एष एव न्याय इति*। अत्रापि किं बुद्धिजीवौ उत जीवपरमात्मानाविति संशय्य करणरूपाया अपि बुद्धेरेषांसि पचन्तीतिवत् कर्तृत्वोपचाराद् बुद्धिजीवाविह पूर्वपक्षयित्वा सिद्धान्तयतव्यम्। सिद्धान्तश्च भाष्यकृता स्फोरितः। तद्दर्शनादिति च 'समाने वृक्षे पुरुषो निमग्नः' इत्यत्र मन्त्रे। न खलु मुख्ये कर्तृत्वे सम्भवति करणे कर्तृत्वोपचारो युक्त इति कृत्वाचिन्तामुद्घाटयति *अपर आह*। *सत्त्वं* दुद्धिः। त्रङ्कते *सत्त्वशब्दः इति*। धिद्धान्तार्थ ब्राह्मणं व्याचष्टे इत्यर्थः। निराकरोति *तन्न इति*। *येन स्वप्नं पश्यति इति*। येनेति करणमुपदिशति, ततश्च भिन्नं कर्तारं क्षेत्रज्ञम *यो यं शारीर उपद्रष्टा इज्ञि*। अस्तु तर्ह्यस्याधिकरणस्य पूर्वपक्ष एव ब्राह्मणार्थः, वचनविरोबे न्यायस्याभासत्वादित्यत आह। *नाप्यस्याधिकरणस्य पूर्वपक्षं भजते इति*। एवं हि पूर्वपक्षमस्य भजेत, यदि हि क्षेत्रज्ञे संसारिणि पर्यवस्येत्। तस्य तु ब्रह्मरूपतायां पर्यवस्यन्न पूर्वपक्षमपि स्वीकरीतीत्यर्थः। अपि च *तावेतौ सत्त्वक्षेत्रज्ञौ न ह वा एवंविदि किञ्चन रज आध्वंसते इति*। रजोऽविद्या नाध्वंसनं न संश्लेषमेवंविदि करोति एवावतैव विद्योपसंहाराज्जीवस्य ब्रह्मात्मतापरतास्य लक्ष्यत इत्याह *तावता च इति। चोदयति* कथं पुनः इति*। निराकरोति *उच्यते–नेयं श्रुतिः इति*। अनश्नन् जीवो ब्रह्माभिचाकशीतीत्युक्ते शङ्क्येत, यदि जीवो ब्रह्मात्मा नाश्नाति, कथं तर्ह्यस्मिन् भोक्तृत्वावगमः, चैतन्यसमानाधिकरणं हि भोक्तृत्वमवभासत इति। तन्निरासायाह श्रुतिः *तयोरन्यः पिप्पल स्वाद्वत्ति इति*। एतदुक्तं भवसि–नेदं भोक्तृत्वं जीवस्य तत्त्वतः, अपि तु बुद्धिसत्त्वं सुखादिरूपपरिणतं चितिच्छायापत्त्योपपन्नचैतन्यमिव भुङ्क्ते, न तु तत्त्वतो जीवः परमात्मा भुङ्क्ते। तदेतदध्यासभाष्ये कृतव्याख्यानम्। तदनेन कृत्वाचिन्तोद्घाटिता॥१२॥

इति भामती तृतीयं गुहाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

इहाधिकरणे सर्वसंहर्तृत्वलक्षणेन सिद्धस्य परमेश्वरस्य 'द्वा सुपर्णा' (श्वे. ४.६) इत्यादिना प्रसिद्धं स्वविश्रूतिजीवसाहचर्यमभिव्यञ्जयितुमधिकरणान्तरारम्भः-

।सू०।। गुहा प्रविष्टावात्मानौ हि तद्दर्शनात्।।११।।

'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे। छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः।। (कठ. ३.१) इति श्रूयतेऽस्य विषयः।। इह सुकृतस्थाने परार्धे ब्राह्मणादिशरीरे हृदयगुहां प्रविष्टौ फलभोक्तारौ छायातपाविवविलक्षणौ कौचित् श्रूयेते; तावेतौ बुद्धिजीवौ जीवपरमेश्वरौ वेति संदेहः।। बुद्धिजीवावेव तौ। कुतः? 'ऋतं पिबन्तौ' इति भोक्तृत्वावगमात्। परमेश्वरस्य न भोक्तृत्वम्, 'अनश्नन्नन्यो अभिचाकशीति' (श्वे० ४.६) इति दर्शनात्। बुद्धिजीवयोर्भोक्तृत्वं प्रसिद्धमेव। किंच-जीवेश्वरयोश्चेतनरूपयोश्छायातपवदतीव वैलक्षण्यं नास्ति। बुद्धेरचेतनत्वादस्ति जीवाद्वैषम्यम्। तदेवं बुद्धिजीवौ।। इति प्राप्ते ब्रूमः- जीव-परमेश्वरावेव गुहागतौ, तयोरेव 'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्' (कठ० २.१२) इति गुहाप्रवेशदर्शनात्। यदुक्तमीश्वरस्य न भोक्तृत्वमिति तदपि न युज्यते; 'प्राणारामं मनआनन्दम्' (तै० १.६) इति ब्रह्मणोऽप्यात्मारामस्य मनोमात्रविषयस्वरूपानन्दभोगदर्शनात्। तथा पुराणं च- 'आत्मशक्त्यमृतास्वादप्रमोदरसिको युवा। अनन्तपरमानन्दमकरन्दमधुव्रतः।।' इत्यादि। जीवस्य स्वकर्मफलभोक्तृत्वं प्रसिद्धम्। एवं च तयोर्भोगस्य साधारणत्वेन श्रवणेऽपि तत्र विशेषः समाश्रीयते भोक्तृविशेषात्, यथा 'राजभृत्यावन्नं भुञ्जाते' इत्यत्र तत्तदुचितान्नविशेषः। यदुक्त तयोर्न वैषम्यमिति, तन्नः, यतो 'नित्यो नित्यानां चेतनश्चेतनानां' (कठ० ५.१३..) इत्यादिश्रुत्या नित्यत्वचेतनत्वादिना जीवेश्वरयोः साम्येऽपि वैषम्यमनादिमलसंबन्धभावाभावाभ्यां संभवति। 'ज्ञाज्ञौद्वावजावीशानीशौ' इत्यादिश्रुत्या (श्वे० ५.९.) ज्ञत्वाज्ञत्वस्वातन्त्र्यास्वातन्त्रयादिधर्मवैषम्यं चावगम्यते।। ननु कथमेतयोः शरीरसंबन्धे समानेऽपि कस्यचिदज्ञत्वादिकानर्थसंबन्धः, कस्यचिदनर्थाभावः,. इति चेत्-न,

सुखदुःखयोर्नैकाश्रयत्वं प्रयोजकं, किं तु स्वातन्त्र्यास्वातन्त्र्यमेव। तथाहि श्रुतिः-'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः॥' (मु० ३.१) इति। अस्याः श्रुतेः सांप्रदायिकोऽर्थः जीवोऽयमनादिना कर्मनिगडेन बद्धः तत्तत्फलभोगानुगुणमायामयबहुकलेबरप्रविष्टो दुर्वारतापसंघातमनुश्रवन् अनीशया पारवश्येन तद्व्यपोहितुमकुशल एव मुह्यमानः शोचति महामोहनिबन्धनशोजलधिमग्नः वर्तते। स्वप्रेरकतया स्वजुष्टं सर्वानुग्राहकमीशमुमासहितं यदा पुनरस्य प्रसादेन पश्यति अपरोक्षेण जानाति तदाऽस्य महिमानं निरतिशयं अपहतशोकः प्राप्नोतीति। अतः स्वतन्त्रस्य शिवस्यानादिमुक्तस्य शरीरसंबन्धेऽपि जीववन्न तद्गतदोषापत्तिः। तस्माज्जीवपरमेश्वरौ गुहागतौ॥ पुनरुपपत्तिमाह-

॥सू०॥ विशेषणाच्च॥१२॥

किंच - जीवपरमेश्वरावस्मिन् प्रकरणे विशेष्येते, 'न जायते म्रियते वा विपश्चित्' (कठ० २.१८.२०.) इत्यादिना जीवः, 'अणोरणीयान् महतो महीयान्' इत्यादिना परमेश्वरः। एतद्विशेषणं जीवबुद्धिपक्षे कथं संभवतीति? अतो जीवपरमेश्वरावेव गुहां प्रविश्य प्रेर्यप्रेरश्रावेन शरीरशरीरिश्रावेन चाश्रिताविति निर्णयः॥

इति श्रीकण्ठभाष्यम् तृतीय गुहाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

सङ्गतिं सूचयन्नुत्तराधिकरणमवतारयति-**इहेति।** पूर्वाधिकरणे संहाररुद्रासम्भावितसर्वसंहर्तृत्वेन त्रिमूर्त्युत्तीर्णः परमेश्वरः प्रसाधितः। तत्प्रसाधनोपयोगिभाष्यलिखिताथर्वशिखादिश्रुतिसद्भावसंसूचनेनाथर्वशिखाद्युक्तप्रकारेण मुमुक्षुभिः स एव ब्रह्मविष्णुरुद्रादिसकलेतरपरित्यागेनोपासनया साक्षात्करणीय इति च सूचितम्। तदनुपपन्नम्। अथर्वशिखादिषून्मनान्तसकलभुवनातीतसोमलोकवर्तित्वेन श्रुतस्य 'हरिश्चाहं च रुद्रश्च तथान्ये च सुरासुराः। तपोभिरुग्रैरद्यापि तस्य दर्शनकाङ्क्षिणः।।' इत्यादिषु चतुर्मुखादिवचनेषु मूर्त्यात्मभिरपि दुर्दर्शत्वेन प्रसिद्धस्य तस्यास्मदादिभिरुपासनया साक्षात्कर्तुमशक्यत्वादित्याशङ्कानिवारणाय तस्य सदोपासकसहचरितत्वेन नित्यसौलभ्यं व्यञ्जयितुमधिकरणान्तरारम्भ इत्याक्षेपिकी सङ्गतिरिति भावः। ननु तथा महाप्रभुः परमेश्वरः केन हेतुनास्मदादीनां साक्षात्कारसौकर्याय साहचर्यमनुमोदेतेत्याकाङ्क्षायां निरतिशयवात्सल्यरूपेण सख्येनेति विभावनाय सख्यप्रतिपादकस्य 'द्वा सुपर्णे'ति मन्त्रस्योपन्यासः। तथाभूते वात्सल्ये हेतुसंसूचनाय स्वविभूतिभूतेति विशेषणम्। गोस्वामिनो गोष्विव स्वकीयेषु वात्सल्यं युक्तमिति भावः।।सू०।। **गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्**।।१९।। विषयवाक्यमुदाहृत्य तदर्थोपन्यासेन संशयबीजसूचनपूर्वकं संशयं दर्शयति-**ऋतमिति**।। **सुकृतस्थान इति**।। लोक्यतेऽस्मिन्नित्यधिकरणसाधनो लोकशब्दः। ततश्च सुकृतानुष्ठानमस्मिन् दृश्यत इत्यर्थलाभे सति सुकृतस्थान इत्यर्थः पर्यवस्यतीति भावः। परार्धमुपासनाद्यधिकारसम्पादकत्वेनोत्कृष्टं परस्योपासनाद्यधिकारसम्पादकत्वेनोत्कृष्टस्यात्मनोऽर्धं स्थानमिति वा परार्धम्। उभयथापि ब्राह्मणादिशरीरमुच्यत इत्यभिप्रेत्य व्याचष्टे- **परार्ध इति।। परा उत्कृष्टा** मा मतिः ब्रह्मविद्या यस्मिन् जायते तत्परमम्। एभिर्विशेषणैरुपासनाधिकारिणां **ब्राह्मणादीनामनुग्रहाय** विशिष्य तेषां शरीरे हृदयगुहायामुपासनासाक्षात्कारयोग्येन **सूक्ष्मरूपेण प्रविष्टस्य** परमेश्वरस्योपासकसौलभ्यार्थं तत्साहचर्यमनेन मन्त्रेण प्रतिपाद्यत इति प्रतीयते। अन्यथैषां विशेषणानां वैयर्थ्यात्। 'हृदयगुहा'मिति गुहामित्यस्यार्थोपन्यासः। ऋतं पिबन्तावववितथं भोगं भुञ्जानावित्यस्य 'फलभोक्तारा'वित्यर्थोपन्यासः। 'छायातपाविव विलक्षणा'विति छायातपावित्यस्यार्थोपन्यासः। एभिर्विशषणैः परमेश्वरस्य तत्साहचर्यं न प्रतिपाद्यते। तस्य भोक्तृत्वापत्त्या मनुष्यादिहृदयगुहाप्रविष्टत्वायोगात्। 'अनश्नन्नि'तिश्रुत्या

तस्याभोक्तृत्वावगमात् उभयोश्चेतनत्वेन छायातपवदतिवैलक्षण्यासम्भवाच्च। किं तु **बुद्धेरेव** तस्साहचर्यं प्रतिपाद्यते। तस्य भोगोपकरणभूतायास्तस्याश्चक्षुषो रूपग्राहकत्वेनेव भोक्तृत्वेन व्यपदेशार्हत्वात्। मुख्यतया भोक्तृत्वेनैव साङ्ख्यादिप्रसिद्धिसद्भावाच्च जडत्वेन जीवविलक्षणत्वाच्चेति प्रतीयते। एवं स्थानविशेषणानां स्थानिविशेषणानां च परस्परविरुद्धार्थोपनायकत्वे सति विशेषणवैयर्थ्यापेक्षया विशेषणानुपपत्तेर्बलवत्त्वात्तत्रापि 'ऋतं पिबन्ता'वित्यस्यापि श्रुत्यन्तरप्रसिद्धस्वस्वानन्दभोक्तृत्वविषयत्वेनोपपत्तेः छायातपवद्वैलक्षण्यस्य यथाकथञ्चित्समर्थयितुं शक्यत्वाच्च। परमेश्वरस्य दुःखभोक्तृत्वापादकत्वशङ्कास्पदगुहाप्रवेशसम्भवासम्भवाभ्यां संशय इत्येव मुख्यतः पर्यवस्यति। ननु यथा वस्तुतो बुद्धेरभोक्तृत्वेऽप्यौपचारिको भोक्तृत्वव्यपदेशो भोगोपकरणत्वात्तथा परमेश्वरस्यापि भोगप्रयोजकत्वादुपपद्यते। अपि च भोगप्रयोजके परमेश्वरे भोगकर्तृत्वसामान्यमस्तीति मुख्य एव तद्व्यपदेशस्सम्भवति। एवं च भोक्तृत्वमुख्यतानुसारेण स्थानविशेषणसाफल्यानुसारेण च छायातपनिर्देशो जडचेतनत्वरूपात्यन्तवैलक्षण्याभावेऽपि अज्ञत्वसर्वज्ञत्वादिवैषम्यमात्रावलम्बनस्स्यादित्याशङ्क्याह-**तदेवमिति।** प्रकारवाचिना शब्देनायं पूर्वपक्षप्रकारोऽनुसंहितः। यदि ब्राह्मणादिशरीरानुप्रविष्टो जीवद्वितीयश्चेतनो भवेत् तदा जीववदेव तस्यापि मनुष्यशरीरानुप्रवेशप्रयुक्तं तत्कृतसुखदुःखादिभोक्तृत्वमज्ञत्वादिना तदवैलक्षण्यं चानिवार्यम्। तस्मादेकस्मिन्ब्राह्मणादिशरीरे मुख्यभोक्तृत्वादियुक्तचेतनद्वयासम्भवेन जीवद्वितीयस्याचेतनत्वावश्यम्भावात् बुद्धिरेव तद्द्वितीयेत्यभ्युपगन्तव्यम्। एवं च सत्यग्रिमसन्दर्भानुरोधोऽपि लभ्यते। अग्रे हि 'आत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव चे'त्यादिमन्त्रवाक्यैर्जीवशरीरबुद्ध्यादीनां रथिरथसारथ्यादिभावं कल्पयित्वान्ते 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पद' मित्यनेन रथसारथ्यादिमज्जीवप्राप्यमध्वनः सर्वस्यापि पारभूतं परमेश्वरस्थानमिति वर्णितम्। तत्र रथिसारथिरूपेण वर्णितयोर्जीवबुद्ध्योरेव शरीराख्यरथप्रवेशोऽपेक्ष्यते न तु प्राप्तृप्राप्ययोर्जीवपरमेश्वरयोरिति सौत्र'मात्माना'विति पदं साध्यनिर्देशार्थं हिशब्दमवधारणार्थं च व्याचष्टे-**जीवपरमेश्वरावेवेति।** 'तद्दर्शना'दिति हेतौ तत्पदं पक्षविशेषणगुहाप्रवेशपरामर्शि। 'सर्वनाम्नानुसन्धिः वृत्तिछन्नस्ये'ति शब्दविद्भिरुक्तत्वेनान्योपसर्जनस्यापि सर्वनाम्ना परामर्शसम्भवादित्यभिप्रेत्य व्याचष्टे-**तयोरिति।** परमेश्वरस्य गुहाप्रवेशदर्शने 'तं दुर्दर्श'मिति मन्त्र उदाहृतः। जीवस्य तद्दर्शने तु 'या प्राणेन सम्भवत्यदितिर्देवतामयी। गुहां प्रविश्य तिष्ठन्ती या भूतेभिर्व्यजायते'ति मन्त्र उदाहार्यः। जीवस्य गुहाप्रवेशे पूर्वपक्षिणो विवादाभावादयं मन्त्रः कण्ठतो भाष्ये नोदाहृतः। कर्मफलमत्तीत्यदितिर्जीवः प्राणेन सम्भवति सह वर्तते। देवशब्दादिन्द्रियवाचिनः स्वार्थे तल्प्रत्यय इति देवतामयी चक्षुरादीन्द्रियप्रधानभूता। भूतेभिर्व्यजायत देहाकारविपरिणतभूतोपाधिकं जननं प्राप्तेति मन्त्रार्थः। एवमेतत्प्रकरणगतयोरेव मन्त्रयोर्जीवपरौ गुहाप्रविष्टत्वेन

निर्दिष्टाविति तयोरेवात्रापि ग्रहणं युक्तमिति भावः। 'ऋतं पिबन्ता' विति विशेषणं छत्रिन्यायेन। लक्षणां स्वतन्त्रप्रयोजकानुगतकर्तृत्वसामान्यविवक्षां चानपेक्ष्य द्वयोरपि मुख्यस्वतन्त्रभोक्तृत्वं विषयतयोपपादयति-**यदुक्तमित्यादिना**। स्यादेतत्। 'ऋतं पिबन्ता'वित्यस्य परमेश्वरेऽपि तदुचितानन्दभोक्तृत्वविषयतया 'छायातपा' वित्यस्य 'ज्ञाज्ञौ द्वा' वित्यादिश्रुत्यन्तर-सिद्धवैलक्षण्यविषयतया च सङ्गतावपि गुहाप्रवेशः परमेश्वरे न सङ्गच्छते। तस्य मनुष्यादिशरीरप्रवेशे मनुष्यादेरिव तत्प्रयुक्तदुःखभोक्तृत्वप्रसङ्गात् परशरीरानुप्रविष्टस्यापि पिशाचादेस्तत्ताडनादिना-दुःखदर्शनात्। अत 'स्तं दुर्दर्श' मिति मन्त्रे 'तत्सृष्ट्वा तदेवानुप्राविशत्' 'अन्तः प्रविष्टः शास्ता जनानामित्यादिश्रुत्यन्तरेषु च परमेश्वरस्य मनुष्यादिशरीरप्रवेशश्रवणं गौणतया नेतव्यम्। यथा राजकीयानां देशव्याप्तिरेव राज्ञो देशव्यप्तिरिति व्यपदिश्यते तथा परमेश्वरनियम्यत्वादिना तदीयानां जीवानां सुरनरतिर्यगादिशरीरानुप्रवेशः परमेश्वरस्य तत्प्रवेश इति व्यपदिश्यते। यद्वा। 'मीमांसायामस्य प्रवेश' इत्यादिव्यवहार इव 'गूढमनुप्रविष्ट' मित्यादिषु प्रवेशशब्दो ज्ञानपरः। तथा च सकलप्राणिहृदयगुहान्तर्गताशेषवृत्तान्ताभिज्ञत्वं तेनोच्यते। न च 'गुहां प्रविष्टा'वित्यत्रापि प्रवेशशब्दः परमेश्वरे तथा योजयितुं शक्यः। जीवतद्द्वितीययोरुभयोरप्यत्र प्रवेशश्रवणेन आद्ययोजनाया असङ्घटनात्। राजकीयव्याप्तेरेव राजव्याप्तित्वोपचारस्थले राजतदीया देशं व्याप्नुवन्तीति व्यपदेशादर्शनात् छत्र्यच्छत्रिसाधारणैकसार्थवर्तित्ववदिह मुख्यगौणसङ्ग्राहकस्यैकस्य शब्दवृत्तिनिमित्तस्याभावात् वृत्तिद्वयविरोधेन छायातपावित्यस्यावृतानावृतप्रकाशतापरत्वे तेनैव सार्वज्ञ्यस्य सिद्धतया तत्पौनरुक्त्यप्रसङ्गेन च द्वितीययोजनाया अप्यसङ्घटनात्। तस्माद्गुहां प्रविष्टौ बुद्धिजीवावित्येवाभ्युपगन्तव्यम्। उपरितनरथिसारथिकल्पनानुगुण्यादित्यभिप्रेत्याशङ्कते-**नन्विति**। सौत्रेणावधारणेन सूचितं परिहारमाह-**सुखेति**। कस्य चित्किञ्चिदाश्रयतस्तत्कृतसुखदुःखभोक्तृत्वे तदाश्रयत्वमेव न प्रयोजकं येन तदाश्रयतोऽन्यस्यापि तद्भवेत् किं त्वस्वातन्त्र्यमपीत्यर्थः। एवकारोऽस्वातन्त्र्यस्य मुख्यकारणत्वाभिप्रायः। 'भोक्त्रापत्ते' रित्यधिकरणेऽपि परमेश्वरस्य चिदचिदात्मकसकलप्रपञ्चशरीरत्वे मनुष्यादिवच्छरीरित्वप्रयुक्तं सुखदुःखभोक्तृत्वं स्यादिति पूर्वपक्षनिराकरणार्थमेव वक्ष्यते'न खलु शरीरित्वप्रयुक्तमनिष्टभोक्तृत्वं किं तु पराधीनप्रयुक्तमेवे'ति। तथापि न पौनरुक्त्यम्। यतस्तत्रास्वातन्त्र्यस्य प्रयोजकत्वं लौकिकयुक्त्या स्थापयिष्यते। अत एव तत्र 'लोकव'दिति सूत्रम्। यथा लोके राज्ञः सशरीरत्वेऽप्यनन्यवश्यस्य न स्वाज्ञाननुवृत्तिकृतानिष्टप्रसङ्ग इति भोक्तृत्वं नेतरसमानमिति। इह तु तच्छ्रुत्या स्थाप्यते। तदर्थमेवावधारणमित्यभिप्रेत्य श्रुतिमुदाहरति-**तथा हीति**। समाने एकस्मिन्वृक्षे शरीररूप आश्रय इत्यर्थः। अनेनैकशरीराश्रयत्वस्य तत्कृतसुखदुःखभोक्तृतायामतन्त्रत्वं दर्शितम्। निमग्न इत्यनेन

जीवस्य शरीरानुप्रवेशेनागाधजलमज्जनेनेव तत्कृतक्लेशभाक्त्वं दर्शितम्। 'ईश ऐश्वर्य' इतिधातोर्भावे'गुरोश्च हल' (पा० ३.३.१०३.) इति आकारप्रत्यये सति ईशाशब्दः ऐश्वर्यवाची अनीशया पारतन्त्र्येणेत्यर्थः। मुह्यमान इति ताच्छील्ये शानच्प्रत्ययः। अनादिसिद्धाज्ञानावृत इत्यर्थः। जुष्टम् उपासनामुखेन सेवितम्। अन्यं शरीरानुप्रवेशेऽपि तत्कृतक्लेशभाक्त्वाभावेन स्वविलक्षणम्। ईशा स्वातन्त्र्यरूपा शक्तिः साऽस्यास्तीति मत्वर्थीयोऽच्प्रत्यय इति। ईशम् उमासहितमित्यर्थः। अस्य महिमानं सार्वज्ञ्यादिरूपम्। इति प्राप्नोति। एतेर्लटि गुणाभावश्छान्दसः। 'संज्ञापूर्वकविधिरनित्य'इति वा गुणाभावः। एवं पदार्थान्मनसि निधाय मन्त्रवाक्यतात्पर्यं दर्शयति-**अस्या इति। मायामयेति।** प्राकृतकलेबराणामप्युपलक्षणम्। अनीशायाः शोके हेतुत्वं तापसङ्घातप्रतीकाराक्षमत्वद्वारक-मित्यभिप्रेत्य **'तं व्यपोहितुमकुशल'** इत्युक्तम्। उपासनापि सर्वानुग्राहकपरमेश्वरप्रेरणाधीनेति 'स्वप्रेरकतयो'त्यादिना दर्शितम्। एवं शरीराश्रयणप्रयुक्तसुखदुःखभोक्तृतायाः पारतन्त्र्यप्रयुक्तत्वात् स्वतत्रस्य परमेश्वरस्य मनुष्यादिशरीरानुप्रवेशेऽपि न तत्प्रयुक्तदोषसप्रसङ्ग इत्युपसंहरति-**अत इति॥** उत्तरसूत्रमवतारयति **पुनरिति।** रथिसारथिकल्पनानुगुण्येन बुद्धिजीवावेव गुहाप्रविष्टौ वाच्याविति शङ्कावारणाय युक्त्यन्तरमुच्यत इत्याशयः।।सू०।। **विशेषणाच्च**।।१२।। **जीवपरमेश्वराविति।** अयमाशयः। पूर्वोत्तरसन्दर्भपर्यालोचनायामपि गुहाप्रविष्टौ जीवपरमेश्वरावेव लभ्येते। 'न जायते म्रियते" अणोरणीया'नित्यादिमन्त्रेषु जीवपरावुपक्षिप्य 'तमक्रतुं पश्यति वीतशोक'इत्यादिप्रदेशेषु द्रष्टृदृश्यभावेन तौ विशेष्येते। तत्र जीवस्य द्रष्टृत्वं दृश्यपरसन्निकर्षापेक्षम्। यदि तयोरेव गुहाप्रवेशवर्णने तात्पर्यं कल्प्येत तदा स्थानविशेषणमहिम्ना परोपासनानिरतब्राह्मणाणादिहृदय-गुहासूपासनातज्जन्यसाक्षात्कारविषयत्वयोग्येन सूक्ष्मरूपेण परमेश्वरस्योपासकसन्निकर्षप्रतिपादक-त्वेनाकाङ्क्षितार्थसमर्पकोऽयं मन्त्रः उपपादितो भवेत्। बुद्धिजीवपरत्वे तदाकाङ्क्षापूरणमपि न भवेत्। 'तं दुर्दर्श'मित्यादिषु गुहाहितत्वादिवर्णनस्य सकलचेतनाचेतनसाधारणान्तर्यामिविषय-तयाप्युपपन्नत्वेनात्र स्थानविशेषणमहिम्नेव तत्र केनचिदुपायेन विशिष्योपासकहृदयेषूपासना-साक्षात्कारविषयत्वयोग्येन प्राप्यरूपभिन्नेन केनचित्सूक्ष्मरूपेणोपासकसन्निकर्षप्रतिपादन-स्यापेक्षितस्यान्यतोऽलाभात्। रथिसारथिरूपयोर्जीवबुद्ध्योः शरीररूपरथाश्रयत्वप्रतिपादनं तु नापेक्षितम्। तस्य प्रसिद्धत्वात्। अपिच रथिरथादिकल्पनं न परप्राप्त्यर्थम्। रथत्वादिना कल्पितेनोपासनोपयुक्तेन शरीरेण सोमलोकस्थस्य तस्य प्राप्त्यसम्भवात्। किं तु तद्ज्ञानप्राप्त्यर्थम्। रथसारथ्यादीनामभिमतदेशं प्राप्तुकामेन रथिनेव ज्ञानं प्राप्तुकामेन शरीरेन्द्रियप्रभृतीनां वशीकरणीयत्वात्। 'यस्तु विज्ञानवान्भवति युक्तेन मनसा सह। तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथे'रिति ज्ञानोपायभूतस्य तेषां वशीकरणस्य तत्रैवोच्यमानत्वाच्च। तथा च ज्ञानोपायत्वेन

रथसारथ्यादिकल्पनमपि दर्शनरूपज्ञानापेक्षितदृश्यसन्निकर्षसिद्धये परस्य गुहाप्रवेशप्रतिपादनमपेक्षत इति तदनुरोधेऽपि गुहाप्रविष्टौ जीवपरावेव सिद्ध्यत इति। **एतद्विशेषणमिति।** जीवपरयोर्द्रष्टृदृश्यभावेन विशेषणं बुद्धिजीवपक्षे कथं निराकाङ्क्षं भवतीत्यर्थः। अधिकरणार्थमुपसंहरति-**अतो जीवेति।** अत्र गुहाप्रवेशस्य श्रुत्यन्तरप्रसिद्ध्या ब्रह्मधर्मत्वेन स्पष्टस्यापि पूर्वपक्षदशायां ब्रह्मधर्मत्वासम्भवशङ्काकलुषितत्वान्नातिस्पष्टतेति पादसङ्गतिः।।

इति शिवार्कमणिदीपिका तृतीयं गुहाधिकरणम् समाप्तम्

अथ अन्तराधिकरणम् ॥ सू॰ १३–१७ ॥

शाङ्करभाष्यम्

अन्तर उपपत्तेः।।१३।। "य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेति। तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छती" (छ॰ ४/१५/१) त्यादि श्रूयते। तत्र संशयः–किमयं प्रतिबिम्बात्माऽक्ष्यधिकरणो निर्दिश्यते, अथवा विज्ञानात्मा, उत देवतात्मेन्द्रियस्याधिष्ठाता, अथवेश्वर इति।।

किं तावत् प्राप्तम्? छायात्मा पुरुषप्रतिरूप इति। कुतः? तस्य दृष्यमानत्वप्रसिद्धेः, "य एषोऽक्षिणि पुरुषो दृश्यत" इति च प्रसिद्धवदुपदेशात्। विज्ञानात्मनो वाऽयं निर्देश इति युक्तम्। स हि चक्षुषा रूपं पश्यञ्चक्षुषि संनिहितो भवति। आत्मशब्दश्चास्मिन् पक्षेऽनुकूलो भवति। आदित्यपुरुषो वा चाक्षुषोऽनुग्राहकः प्रतीयते; "रश्मिभिरेषोऽस्मिन्प्रतिष्ठित" (बृ॰ ५/५/२) इति श्रुतेः, अमृतत्वादीनां च देवतात्मन्यपि कथञ्चित्संभवात्। नेश्वरः ; स्थानविशेषनिर्देशादित्येव।।

एवं प्राप्ते ब्रूमः–परमेश्वर एवाक्षण्यभ्यन्तरः पुरुष इहोपदिष्ट इति। कस्मात्? उपपत्तेः। उपपद्यते हि परमेश्वर गुणजातमिहोपदिश्यमानम्। आत्मत्वं तावन्मुख्यया वृत्त्या परमेश्वर उपपद्यते; "स आत्मा तत्त्वमसी" ति श्रुतेः। अमृतत्वाभयत्वे च तस्मिन्नसकृच्छ्रुतौ श्रूयेते। तथा परमेश्वरानुरूपमेतदक्षिस्थानम्। यथाहि परमेश्वरः सर्वदोषैरलिप्तः ; अपहतपाप्मत्वादिश्रवणात्, तथाऽक्षिस्थांन सर्वलेपरहितमुपदिष्टम्; "तद्यद्यप्यस्मिन् सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छती" ति श्रुतेः। संयद्वामत्वादिगुणोपदेशश्च तस्मिन्नवकल्पते। "एतं संयद्वाम इत्याचक्षते एतं हि सर्वाणि वामान्यभिसंयन्ति"। "एष उ एव वामनीरेष हि सर्वाणि वामानि नयति"। "एष उ एव भामनीरेष हि सर्वेषु लोकेषु भाती" (छा॰ ४/१५/२/३/४) ति च। अत उपपत्तेरन्तरः परमेश्वरः।।१३।।

स्थानादिव्यपदेशाच्च।।१४।। कथं पुनराकाशवत्सर्वगतस्य ब्रह्मणोऽक्ष्यल्पस्थानमुपपद्यत इति? अत्रोच्यते–भवेदेषाऽनवक्लृप्तिः, यद्येतदेवैकं स्थानमस्य निर्दिष्टं भवेत्। सन्ति ह्यन्यान्यपि

पृथिव्यादीनि स्थानान्यस्य निर्दिष्टानि–"यः पृथिव्यां तिष्ठन्" (बृ० ३/७/३) इत्यादिना। तेषु हि चक्षुरपि निर्दिष्टम्–"यश्चक्षुषि तिष्ठन्" इति। "स्थानादिव्यपदेशादि" त्यादिग्रहणेनैतद् दर्शयति–न केवलं स्थानमेवैकमनुचितं ब्रह्मणो निर्दिश्यमानं दृश्यते, किं तर्हि? नाम, रूपमित्येवंजातीयकमप्यनामरूपस्य ब्रह्मणोऽनुचितं निर्दिश्यमानं दृश्यते–"तस्योदिति नाम" "हिरण्यश्मश्रुरि" (छा० १/६/७/६) इत्यादि। निर्गुणमपि सद् ब्रह्म नामरूपगतैर्गुणैः सगुणमुपासनार्थं तत्र तत्रोपदिश्यत इत्येतदप्युक्तमेव। सर्वगतस्यापि ब्रह्मण उपलब्ध्यर्थं स्थानविशेषो न विरुध्यते, शालग्राम इव विष्णोरित्येतदप्युक्तमेव।।१४।।

सुखविशिष्टाभिधानादेव च।।१५।। अपि च नैवात्र विवदितव्यम्–किं ब्रह्मास्मिन् वाक्येऽभिधीयते, न वेति। सुखविशिष्टाभिधानादेव ब्रह्मत्वं सिद्धम्। सुखविशिष्टं हि ब्रह्म, यदा वाक्योपक्रमे प्राकान्तम्–"प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे" ति, तदेवेहाभिहितम्; प्रकतपरिग्रहस्य न्याय्यत्वात्, "आचर्यस्तु ते गतिं वक्ते" (छा० ४/१४/१) ति च गतिमात्राभिधानप्रतिज्ञानात्।।

कथं पुनर्वाक्योपक्रमे सुखविशिष्टं ब्रह्म विज्ञायत इति? उच्यते–"प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे" त्येदग्नीनां वचनं श्रुत्वोपकोसल उवाच–"विजानाम्यहं यत्प्राणो ब्रह्म कं च खं च तु न विजानामी" ति। तत्रेदं प्रतिवचनम्–"यद्वाव कं तदेव खं यदेव खं तदेव कम्" (छा० ४/१०/५) इति। तत्र खंशब्दो भूताकाशे निरूढो लोके। यदि तस्य विशेषणत्वेन कंशब्दः सुखवाची नोपादीयेत, तथा सति केवले भूताकाशे ब्रह्मशब्दो नामादिष्विव प्रतीकाभिप्रायेण प्रयुक्त इति प्रतीतिः स्यात्। तथा कंशब्दस्य विषयेन्द्रियसंपर्कजनिते सामये सुखे प्रसिद्धत्वात यदि तस्य खंशब्दो विशेषणत्वेन नोपादीयेत, लौकिकं सुखं ब्रह्मेति प्रतीतिः स्यात्। इतरेतरविशेषितौ तु कंखंशब्दौ सुखात्मकं ब्रह्म गमयतः। तत्र द्वितीये ब्रह्मशब्देऽनुपादीयमाने, कं खं ब्रह्मेत्येवोच्यमाने, कंशब्दस्य विशेषणत्वेनैवोपयुक्तत्वात्सुखस्य गुणस्याध्येयत्वं स्यात्, तन्माभूत्, इत्युभयोः कंखशब्दयो-र्ब्रह्मशब्दशिरस्त्वम्–"कं ब्रह्म खं ब्रह्मे" ति। इष्टं हि सुखस्यापि गुणिवद्धेययत्वम्। तदेवं वाक्योपक्रमे सुखविशिष्टं ब्रह्मोपदिष्टम्। प्रत्येकं च गार्हपत्यादयोऽग्नयः स्वं स्वं महिमानमुपदिश्य–"एषा सोम्य तेऽस्मद्विद्यात्मविद्या चे" इत्युपसंहरन्तः पूर्वत्र ब्रह्म निर्दिष्टमिति ज्ञापयन्ति। "आचार्यस्तु ते गतिं वक्ते" ति च गतिमात्राभिधानप्रतिज्ञानमर्थान्तरविवक्षां वारयति। "यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यत" (छा० ४/१४/३) इति चाक्षिस्थानं पुरुषं विजानतः पापेनानुपघातं ब्रुवन्नक्षिस्थानस्य पुरुषस्य ब्रह्मत्वं दर्शयति। तस्मात् प्रकृतस्यैव ब्रह्मणोऽक्षिस्थानतां संयद्वामत्वादिगुणतां चोक्त्वार्चिरादिकां तद्विदो गतिं वक्ष्यामीत्युपक्रमते–"य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचे" (छा० ४/१५/१) इति।।१५।।

श्रुतोपनिषत्कगत्यभिधानाच्च।।१६।। इतश्चाक्षिस्थानः पुरुषः परमेश्वरः, यस्माच्छ्रुतो-पनिषत्कस्य श्रुतरहस्यविज्ञानस्य ब्रह्मविदो या गतिर्देवयानाख्या प्रसिद्धा श्रुतौ–"अथोत्तरेण तपसा

ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्यादित्यमभिजयन्त। एतद्वै प्राणानामायतनमेतदमृतमभयमेतत्परायणमेतस्मान्न पुनरावर्तन्त'' (प्रश्न० १/१०) इति, स्मृतावपि-''अग्निर्ज्योतिरहः शुल्कः षण्मासा उत्तरायणम्। तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः''।। (गी० ८/२४) इति। सैवेहाक्षिपुरुषविदोऽभिधीयमाना दृश्यते-''अथ यदु चैवास्मिच्छव्यं कुर्वन्ति यदि च नार्चिषमेवाभिसंभवन्ती'' त्युपक्रम्य ''आदित्याञ्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः। स एनान्ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते'' (छा० ४/१५/५) इति। तदिह ब्रह्मविद्विषयया प्रसिद्धया गत्याऽक्षिस्थानस्य ब्रह्मत्वं निश्चीयते।।१६।।

*अनवस्थितेरसंभवाच्च नेतरः।।१७।। यत्पुनरूक्तम्-छायात्मा, विज्ञानात्मा, देवतात्मा वा स्यादक्षिस्थानः-इति, अत्रोच्यते-न छायात्मादिरितर इह ग्रहणमर्हति। कस्मात्? अनवस्थितेः। न तावच्छायात्मनश्चक्षुषि नित्यमवस्थानं संभवति। यदैव हि कश्चित्पुरुषश्चक्षुरासीदति, तदा चक्षुषि पुरुषच्छाया दृश्यते, अपगते तस्मिन्न दृश्यते। ''य एषोऽक्षिणि पुरुषः'' इति च श्रुतिः संनिधानात्स्वचक्षुषि दृश्यमानं पुरुषमुपास्यत्वेनोपदिशति। न चोपासनाकाले छायाकरं कञ्चित्पुरुषं चक्षुः समीपे संनिधाप्योपास्त इति युक्तं कल्पयितुम्। ''अस्यैव शरीरस्य नाशमन्वेष नश्यती'' (छा० ८/९/१) ति श्रुतिश्छायात्मनोऽप्यनवस्थितत्वं दर्शयति। असम्भवाच्च तस्मिन्नमृतत्वादीनां गुणानां न छायात्मनि प्रतीतिः।। तथा विज्ञानात्मनोऽपि साधारणे कृत्स्नशरीरन्द्रियसंबन्धे सति चक्षुष्येवावस्थितत्वं वक्तुं न शक्यम्। ब्रह्मणस्तु व्यापिनोऽपि दृष्ट उपलब्ध्यर्थो हृदयादिदेशविशेषसंबन्धः। समानश्च विज्ञानात्मन्यप्यमृतत्वादीनां गुणानां सम्बन्धः। यद्यपि विज्ञनात्मा परमात्मनोऽनन्य एव; तथाप्यविद्याकामकर्मकृतं तस्मिन्मर्त्यत्वमध्यारोपितं भयं चेत्यमृतत्वाभयत्वे नोपपद्येते। संयद्वामत्वादयश्चैतस्मिन्नैश्वर्यादनुपपन्ना एव। देवतात्मनस्तु ''रश्मिभिरेषोऽस्मिन्प्रतिष्ठित'' इति श्रुतेर्यद्यपि चक्षुष्यवस्थानं स्यात्, तथाप्यात्मत्वं तावन्न संभवति; पराग्रूपत्वात्। अमृतत्वादयोऽपि न संभवन्ति; उत्पत्तिप्रलयश्रवणात्। अमरत्वमपि देवानां चिरकालावस्थानापेक्षम्। ऐश्वर्यमपि परमेश्वरायत्तम, न स्वाभाविकम्; ''भीषाऽस्माद्वातः पवते। भीषोदेति सूर्यः। भीषाऽस्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चम'' (तै० २/८) इति मन्त्रवर्णात्। तस्मात्परमेश्वर एवायमक्षिस्थानः प्रत्येतव्यः। अस्मिंश्च पक्षे ''दृश्यत'' इति प्रसिद्धवदुपादानं शास्त्राद्यपेक्षं विद्वद्विषयं प्ररोचनार्थमिति व्याख्येयम्।।१७।।

इति शाङ्करभाष्यम् चतुर्थमन्तराधिकरणम् समाप्तम्

वार्तिकम्

* अन्तर उपपत्ते*:॥१३॥ यथा ''ऋतं पिबन्तावि'' त्यत्र प्रथमावगतौ जीवपरमात्मानौ, तदनुसारेण च पश्चादवगतगुहाप्रवेशादयो व्याख्याता:, तद्वदत्रापि–''य एषोऽक्षिणि पुरुषो दृश्यत'' इति प्रथमावगतच्छायात्मानुसारेण पश्चात् श्रूयमाणा अमृताभयत्वादयो गुणा: कथञ्चित् स्तुत्या व्याख्येया इति पूर्वापराधिकरणयोर्दृष्टान्तसङ्गतिर्वेदितव्या। ''य एषोऽक्षिणि पुरुषो दृश्यत'' इत्यत्र किं लौकिकं चाक्षुषं प्रत्यक्षदर्शनमभिप्रेतम्, किं वा शास्त्रजनितं योगिनां दर्शनमिति। यदि चाद्य: पक्ष:, तदा छायात्मैवास्मिन् वाक्य उपास्त्यर्थं परिगृहीतो भविष्यति। अथ द्वितीय:, तदापि किं जीव:, उत देवतात्मा, किं वा परमात्मेति सन्देह:॥

''अन्तस्तद्धर्मोपदेशादि'' ति न्यायेन तं निरस्य परमात्मपरत्वं परिगृहीष्यत इति। एतेन–''अन्तस्तद्धर्मोपदेशादि'' ति न्यायेनास्य गतार्थत्वशङ्कापि प्रत्युक्ता–भवति; दर्शनस्य लौकिकत्वशास्त्रीयत्वाभ्यामधिकसंशयस्य सत्त्वात्॥

तत्र–''एष दृश्यत'' इत्येवं तावद् लोके चाक्षुषज्ञानविषय एव पदार्थे प्रयुज्यते, न शास्त्रैकसमधिगम्ये; अदर्शनात्। लोकानुसारेण च वेदार्थावधारणमित्यसकृदावेदितम्। न चातीन्द्रियं शास्त्रमात्रसमधिगम्यं निरधिष्ठानं ब्रह्म तथा। न च चरमप्रतीताभयत्वामृतत्वादिगुणानुसारेण प्रथमप्रतीतं चाक्षुषत्वमन्यथयितुं युक्तम्; वैपरीत्यस्यैव पूर्वाधिकरणन्यायेनोचिततवादित्युक्तमस्माभि: सङ्गतिं प्रदर्शयद्भि:। तस्मात् छायात्मैव चाक्षुषोऽत्रोपास्यत्वेन परिगृह्यते। तस्य च पुरुषत्वं पुरुषप्रतिबिम्बत्वेन तदाकारत्वात्। आत्मत्वं चाक्षितारकव्यापनात्, स्वरूपत्वाद्वा। अमृतत्वं कतिपयक्षणावस्थानयोगात्। अभयत्वमचेतनत्वात्। ब्रह्मत्वं चोक्तामृतत्वादिधर्मयोगाद् ब्रह्मप्रतीकत्वाद्वा। एवं वामनीत्वादयोऽपि यथाकथञ्चिद् गुणवादेन नेया:। यदि व कथञ्चित् 'दृश्यते' इति शास्त्रदृष्टयभिप्रायं व्याख्यायेत, तथापि जीवो देवतात्मा वा परिगृह्येत। जीवो हि चक्षुषा रूपं पश्यन् चक्षुषि संनिहितो भवति। आत्मशब्दश्च तत्रानुकूलो भवति। आदित्यपुरुषस्यापि चक्षुरनुग्राहकत्वात् तथात्वं घटते। अमृतत्वाभयत्वदिकं चाञ्जसं स्यात॥

ननु–वाक्योपक्रमे–"प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे" ति सुखविशिष्टं प्राणाख्यं ब्रह्मोपक्रान्तम्, तस्यैव प्रकरणादिहानुवृत्तिर्युक्ता, न तत्प्रकरणबाधेनाकस्मात् छायात्मादेः परिग्रहो युक्त इति–चेत्, नैवम्; तद्धि अग्नीनां वाक्यम्, एतच्चाचार्यवाक्यम्; अतो वक्तृभेदेन प्रकरणभेदाद् नाग्निवाक्येनाचार्यवाक्यार्थो नियन्तुं शक्यते। ननु–"आचार्यस्तु ते गतिं वक्ते" त्यग्निवाक्यादेव तत्प्रकरणस्यासमाप्तत्वावगमात् तदर्थशेषस्तदाचार्यवाक्येन पूर्यत इति निश्चीयते, नैतदेवम्; "आचार्यस्तु ते गतिं वक्ते" त्यग्निवाक्यस्य गत्यन्तराभिप्रायत्वेन परिशिष्टाभिप्रायत्वाभावात्। भिन्नवक्तृकयोर्वाक्ययोर्नियम्यनियामकभावानुपपत्तेरित्युक्तत्वात्। तस्मात् छायात्माऽत्र परिगृह्यते, न परमेश्वरः ; स्थानविशेषादिति।।

एवं प्राप्त उच्यते–य एषोऽक्षण्यन्तरः पुरुष उपदिश्यते–"य एषोऽक्षिणि पुरुषो दृश्यत" इति, स परमेश्वरो भवितुमर्हति। कुतः? उपपत्तेः। उपपद्यते हीहोपदिश्यमानं गुणजातं तस्मिन् परिगृहीते, नान्यस्मिन् छायापुरुषादौ। तत्रात्मत्वं तावद् मुख्यया वृत्त्या परमात्मन्येवोपपद्यते; "स आत्मा तत्त्वमसी" त्यादिश्रुतेः। अमृतत्वाभयत्वे अपि तस्मिन्नेव; सर्वश्रुतिषु तयोरसकृदुपदेशात्।।

तथा–"एतं हि संयद्वाम इत्याचक्षते एतं हि सर्वाणि वामान्यभिसंयन्ति" "एष उएव वामनीरेष एव सर्वाणि वामानि नयति" "एष ह्येव भामनीरेष हि सर्वेषु लोकेषु भाति" इति संयद्वामत्वादिगुणोपदेशः परमेश्वर एवावकल्पते; तत्र समवेतार्थत्वात्। छायापुरुषादिष्वसमवेतार्थः। कथम्? शोभनानि कर्मफलानीह वामानीत्युच्यन्ते; वन संभजने इत्यस्य रूपनिष्पत्तेः। तानि वामानि संयन्ति=सङ्गच्छमानानि=उत्पद्यमानानि येन, स संयद्वामः परमात्मा; पुण्यफलनिष्पत्तेस्तद्धेतुकत्वात्। तान्येव वामानि पुरुषं नयतीति वामनीः। तथा भामनीः=भामानि, ज्ञानानीति यावत्; तानि लोके नयतीति भामनीः। न चैवंविधः परमेश्वरादन्यो भवितुमर्हति; "एष ह्येव साधु कर्म कारयति यमूर्ध्वं निनीषते" "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाती" त्यादिश्रुतेस्तस्यैव तथात्वात्। स्थानविशेषसंस्तवोऽपि परमेश्वरपक्ष एव घटते; परमेश्वरानुरूपत्वेनाक्षिस्थानसंस्तवात्– "तद्यद्यप्यस्मिन् सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छती" ति। एतदुक्तं भवति–यथा हि परमेश्वरः सर्वदोषैरलिप्तः ; अपहतपाप्मत्वादिगुणश्रवणात्, तथाऽक्षिस्थानं सर्वलेपरहितत्वात्परमेश्व रस्य योग्यमिति। तस्माद् विवक्षितधर्मजातोपपत्तेरक्ष्यन्तरः परमेश्वर इह परिगृह्यत इति।।१३।।

कथं पुनराकाशवत्सर्वगतस्य ब्रह्मणोऽक्ष्यल्पस्थानत्वमुपपद्यतामित्युक्तमिति–चेत्, तत्राह– *स्थानादिव्यपदेशाच्च*।।१४।। सुगममस्य भाष्यम्। *इत्येतदप्युक्तमेवेति*।। "अन्तस्तद्धर्मोपदेशादि" त्यत्रेति शेषः।।

सुखविशिष्टाभिधानादेव च॥१५॥ यदुक्तम्–उपक्रमानुसारेणामृताभयत्वादयो गुणाः पश्चात् प्रतीयमानाः कथञ्चित् स्तुत्या नेयाः–इति, तदनेन सूत्रेण परिह्रियते। यद्युपक्रमानुसारेण वाक्यशेषो व्याख्येय इति भवदभिमतम्, अस्तु नाम; नैतावता भवदभिमतच्छायात्मादिपरिग्रहसिद्धिः, नाप्यमृतत्वाभयत्वादीनामविवक्षा। कुतः? उपक्रान्तस्य सुखविशिष्टस्य ब्रह्मण एवेहाभिधानात्। ''प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे'' ति हि वक्योपक्रमे यत् सुखविशिष्टं ब्रह्मोपक्रान्तम्, तदेव हि प्रकृतम् ''य एषोऽक्षिणि पुरुषो दृश्यत'' इत्यत्र सर्वनामपदाभ्यामभिधीयते; सर्वनाम्नो बुद्धिस्थपरामर्शित्वात्, अन्यथा तदनुपपत्तेः। तदिदमुक्तम्– *प्रकृतपरिग्रहस्य न्याय्यत्वादिति*॥

ननु–उक्तं पूर्वोत्तरवाक्ययोर्नैकवाक्यत्वमस्ति; भिन्नवक्तृकत्वात्, ''प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे'' ति ह्यग्नीनां वाक्यम्, ''य एषोऽक्षिणि पुरुषो दृश्यत'' इति चाचार्यस्य। न च भिन्नकर्तृवाक्यस्थं सर्वनाम्ना परामृष्टुं शक्यते; अतिप्रसङ्गात्, शाब्दन्यायविरोधाच्च। तस्माद्वाक्यभेदाद् न सर्वनाम्ना पूर्ववाक्योपक्रान्तं सुखादिविशिष्टं ब्रह्म परामृश्यते। किं तर्हि? ततोऽन्य एव प्रत्यक्षसिद्धः छायापुरुष इति–चेत्, न; अपौरुषेये वेदे वक्त्रभावेन तद्भेदासिद्धेः, श्रुतेरेव प्रतिपत्तिसौकार्यायगुणविशिष्टादिभावेन प्रवर्तनात्। अस्तु वा यथाप्रतीति वक्तृभेदः तथापि न वाक्यभेदोऽस्ति, येनोपास्यान्तरनिर्देशः स्यात्। कुतः? अग्निभिरेव–''आचार्यस्तु ते गतिं वक्ते'' त्याचार्यस्य गतिमात्राभिधानप्रतिज्ञानात्॥

एवं ह्याख्यायिका छान्दोग्ये दृष्टा–''उपकोसलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवास। स तस्याचार्यस्य द्वादश वर्षानग्नीनुपचचार। स चाचार्योऽन्यान् ब्रह्मचारिणः स्वाध्यायं ग्राहयित्वा समावर्तयामास। तमेवैकमुपकोसलं न समावर्तयामास जायया च तत्समावर्तनार्थं प्रार्थितोऽपयनादायैव तद्वचनं ग्रामान्तरं प्रोषितवानाचार्यः। प्रोषिते चाचार्येऽतिसंतप्तमानसमग्निपरि-चरणकुशलमुपकोसलमुपावेक्ष्य त्रयोऽपि गार्हपत्यादयोऽग्नयः करुणापराधीनचेतसः श्रद्धानायास्मै भक्ताय समेत्य ब्रह्मविद्यामुचिरे–''प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म। अथोपकोसलस्तानुवाच विजानाम्यहं प्राणो ब्रह्मेति कं च खं च तु ब्रह्म न जानामी'' ति। प्राणो हि सूत्रात्मा विभूतिमत्तया ब्रह्मस्वरूपाविर्भावाद् भवेद् ब्रह्म, कं च तु खं च कथं ब्रह्म स्यात्? न हि विषयेन्द्रियसंपर्कजं लोकसिद्धमनित्यं सुखं भूताकाशं चाचेतनं ब्रह्म भवितुमर्हतीत्यभिप्रायः। तथैनमग्नयः प्रत्यूचुः ''यद्वाव कं तदेव खं यदेव खं तदेव कमि'' ति। तथाच कंखंशब्दौ समानाधिकरणौ परस्परविशेषणविशेष्यभावापन्नेऽर्थे प्रवर्तमानौ रूढयर्थ परित्यज्य व्यापकसुखात्मकं ब्रह्म गमयतः, अतो नोक्तशङ्कावकाशः। भाष्ये तु शब्दयोर्विशेषणविशेष्यभावकथनं स्वार्थद्वारैव, न स्वत इति मन्तव्यम्; अर्थयोरेव तथात्वात्, शब्दयोस्तु सामानाधिकरण्यमात्रात्। एतेन–''आदित्यो

ब्रह्मेत्युपासीते'' त्यादिवत् प्रतीकमेवास्मिन् वाक्येऽभिधीयते, न ब्रह्मेत्याशङ्कापि श्रुत्या—निराकारि। यथाच तत्, तथा विशेषणकृत्यं दर्शयता भाष्यकारेण दर्शितम्। एवं संभूय ब्रह्मविद्यामुक्त्वाऽग्नयः प्रत्येकं स्वस्वविषयां विद्यामुक्तवन्तः—''पृथिव्यग्निरन्नमादित्यमि''. त्यादिना। पुनस्त एनं संभूयोचुः—एषा सोम्य तेऽस्मद्विद्या=प्रत्येकमुक्ता, आत्मविद्या च=या चास्माभिः संभूय पूर्वमुक्ता—''प्राणो ब्रह्म कं ब्रह्म कं ब्रह्मे'' ति। तथाऽस्तु, ब्रह्मविद्यायाः फलप्राप्तये तवाचार्यः जाबालो गतिम्=अर्चिरादिमार्गम्, वक्ता=वक्ष्यति, इत्युक्त्वाऽऽचार्यशापभीताः सन्तोऽग्नयो निरवशेषां ब्रह्मविद्यामनुक्त्वोपरेमिरे। ततोऽग्निवाक्यादवसीयते— पूर्वाभिहितब्रह्मविद्याशेषगतिमात्रम-वशिष्टमग्निभिरनुक्तमाचार्येणाभिधातव्यम्, नोपास्यान्तरमुपासान्तरं वा। ननु—एवं तर्हि अक्षिस्थानं वामनीत्वादिगुणश्च किमर्थमाचार्येणाभिधीयते? नैष दोषः ; गतिपदस्यावशिष्टोपलक्षणार्थत्वात्। तस्माद् गुणविधानार्थं पूर्वोपक्रान्तसुखविशिष्टं ब्रह्मैवात्र सर्वनामभ्यां परामृश्यते, न छायात्मा।।

एतेन—यदुक्तम्—दृश्यत इति प्रत्यक्षदर्शनं ब्रह्मणि नोपद्यते—इति, तदपि कृतब्रह्मसाक्षात्कारस्याचार्यस्य स्वदृष्टयभिप्रायम्, शास्त्रदृष्टयभिप्रायं वा व्याख्येयम्; ''तद्धैतत् पश्यन्नृषिर्वामदेवः प्रतिपेद'' इत्यादौ शास्त्रीयदर्शनेऽपि दृशेः प्रयोगदर्शनात्। अपि च सर्वनाम्नो विशेषणाभिधानत्वेन स्वार्थस्य विशेष्यसापेक्षतयाऽनिष्पन्नाभिधानत्वात् संनिहितपदान्तरार्थं विशेष्यं प्राप्यैव भवति सर्वनाम स्वार्थाभिधातृ, प्रकृते च ''य एष'' इति सर्वनामनी विशेष्यापेक्षत्वात् स्वतोऽपर्यवसिताभिधाने यावत् तत्संनिहिताः पुरुषात्मादिशब्दा विशेष्याभिधायकाः स्वार्थं नाभिदधति, तावद् नार्थतुषस्याप्यभिधातृणी भवेताम्। न च तद्वत् पुरुषार्थशब्दयोः स्वार्थाभिधाने सर्वनामापेक्षाऽस्ति; तयोः स्वरसतो जीवपरमात्मनोरन्यतराभिधातृत्वात्। तथा च तदभिन्नस्य सर्वनामार्थस्य कुतश्चाक्षुषता? न हि जीवपरमात्मनोरन्यतरस्य चाक्षुषप्रत्यक्षदर्शनमस्ति। तस्माद् निरपेक्षपुरुषपदप्रत्यायनार्थोनुरोधेनापि ''य एष दृश्यत'' इति यथासंभवं व्याख्येयम्। तच्च व्याख्यातमस्माभिः पूर्वमेव शास्त्रदृष्टयभिप्रायम्; शास्त्रीयदर्शनस्यैव विदुषो दृढतया प्रत्यक्षवदुपचारात्। अपि च तदेव चरमं प्रथमानुगुणतया नीयते, यद् नेतुं शक्यते, अल्पं च भवति। इह चामृतत्वाभयत्वादयो बहवः, अशक्याश्च तदनुगुणतया नेतुम्। न हि स्वसत्ताक्षणावस्थानमात्राद् अमृतं भवति; तथा सति किं नाम नामृतं स्यात्? इति व्यर्थ ममृतपदं भवेत्। भयाभये अपि चेतनधर्मौ नाचेतने संभवतः। एवं वामनीत्वादयो ब्रह्मणोऽन्यत्र नेतुमशक्या एवेत्युक्तमेव। प्रत्यक्षव्यपदेशो ह्युपपादित एव ब्रह्मण्यधस्तात्।।१५।।

श्रुतोपनिषत्कगत्यभिधानाच्च।।१६।। निगदमस्य भाष्यम्। एतच्चाभ्युच्चयमात्रम्; अब्रह्मविदामपि पञ्चाग्निविदामर्चिरादिमार्गश्रवणात् श्रुतोपनिषत्कस्यैव तद्गतिरिति नियमाभावात्

तदभिधानमात्रेणाक्षिपुरुषस्य ब्रह्मत्वनिश्चयानुपपत्तेः। यद्वा–सगुणब्रह्मविदामेवेयं गतिरित्यस्ति नियमः; "अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मानमन्विष्यादित्यमभिजयन्त" इति श्रुतेः, तद्गतेर्ब्रह्मप्रापकत्वाच्चाब्रह्मविदां तत्प्राप्त्यनुपपत्तेः। या च पञ्चाग्निविदामर्चिरादिगतिः श्रूयते, स वाचनिकी भविष्यति; नास्ति वचनस्यातिभारः। "ये च ग्राम इत्थं विदुर्ये चारण्ये श्रद्धां तपः सत्यमित्युपासते, तेऽर्चिषमभिसंभवन्ती" ति वचनम्। तस्मात् "यदाहवनीये जुहोती" तिवत् सामान्यतः श्रुतोपनिषत्कस्यैवेयं गतिः, कुत्रचित् "पदे जुहोती" तिवद् विशेषवचनादन्यसम्बन्धित्वमित्युपपन्नमस्य हेतुत्वमिति। शव्यम्=शवसम्बन्धि; दाहादिलक्षणं कर्मेति यावत्।।१६।।

एवं स्वपक्ष उपपत्तिमुक्त्वा परपेक्षेऽनुपपत्तिं दर्शयति स्म सूत्रकारः–*अनवस्थितेरसंभवाच्च नेतरः*।।१७।। इतरः=परपक्ष इत्यर्थः। हेतुद्वयं तु छायात्मादिपक्षे यथासंभवं योजनीयम्, योजितं तु भाष्यकृता–*न तावदिति*।। ननु–मा भूत् छायात्मनो नित्यमवस्थानं चक्षुषि, उपासनाकाले कदाचित्तु पुरुषान्तरसंनिधानात् तदवस्थाने तदुपासनासिद्धिरिति–चेत्, न; तथा सति–"य एषोऽक्षिणि पुरुषो दृश्यत" इति नित्यवत् तच्छ्रवणविरोधापत्तेः। न च–एवं तर्हि पुरुषान्तरमुपासनाकाले सर्वदा चक्षुः समीपे संनिधाप्य छायात्मोपास्यत इति कल्पनीयमिति–वाच्यम्; कल्पनागौरवापत्तेरित्याह–*न चोपासनाकाल इति*।। इतोऽपि छायात्मनोऽनवस्थितत्वमित्याह–*अस्यैवेति*।। शिष्टाक्षरं स्पष्टम्।।१७।।

इति वार्त्तिकम चतुर्थमन्तराधिकरणम् समाप्तम्

प्रदीपः

* अन्तर उपपत्तेः*।।१३।। अक्ष्यन्तरः, परमात्मा, उपपत्तेः= तदसाधारणधर्मवत्त्वादिति सूत्रार्थः।।

"अन्तस्तद्धर्मोपदेशादि" त्येनेनास्य गतार्थत्वं तु न संभवति; अधिकाशङ्कासंभवात्। सा हीयम्– "य एषोऽक्षिणी पुरुषो दृश्यत" इत्यत्र हि एष दृश्यत इति निर्देशः प्रत्यक्षे प्रतिबिम्ब एव भवति, न तु परोक्षे ब्रह्मणि; अत उपक्रमवशात् पूर्वाधिकरणन्यायेन ब्रह्मेतरलिङ्गमेव प्रबलं भवति, तेन तु ब्रह्मलिङ्गानां दुर्बलानामन्यथा नयनम्, अन्तरधिकरणविषयवाक्ये तु हिरण्यश्मश्रुत्वादिक-मुपक्रमगतमपि न ब्रह्मेतरासाधारणमिति न तेन ब्रह्मलिङ्गाभिभव इति स्पष्टब्रह्मलिङ्गकत्वम्, नात्रेवास्पष्टब्रह्मलिङ्गकत्वमिति। एतेन–पादसङ्गतिरधिकरणसङ्गतिश्च सूच्यते। "ऋतं पिबन्तावि" त्युपक्रमावगतजीवपरमात्मानुगुण्येनैवोत्तराणामिवात्राप्युपक्रमानुसारेणैवोपसंहारनयना-दितिशङ्कानिराकरणेन दृष्टान्तसङ्गतिरेवानन्तरा। अत्रानुसन्धेया भामतीकारिका–

एष दृश्यत इत्येतत् प्रत्यक्षेऽर्थे प्रयुज्यते।
परोक्षं ब्रह्म न तथा, प्रतिबिम्बे तु युज्यते।।१।।
उपक्रमवशात् पूर्वमितरेषां हि वर्णनम्।
कृतं न्यायेन येनैव, स खल्वत्रानुषज्यते।।२।।

इति। अत्रानुसन्धेयानि विषयवाक्यानि छान्दोग्यतुरीयाध्यायदशमैकादशद्वादश-त्रयोदशचतुर्दशपञ्चदशखण्डगतानि। तत्र दशमादिचतुर्दशान्तैः खण्डैः कामलायनमुपकोसलं ब्रह्मचर्ये वसन्तमेकं विहायान्यान् ब्रह्मचारिणः समावर्त्य सत्यकामे जाबाले प्रोषिते सति नितरां दुःखितमनशनव्रतधारिणं चोपकोसलं दृष्टाऽग्नयस्त्रयोऽपि दयया तस्मै "प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे" त्युपादिशन्। उपकोसलस्त्ववदत्–"विजानाम्यहं यत् प्राणो ब्रह्म कं च तु खं च न जानामीति। ते होचुर्यद्वाव कं तदेव खं यदेव कमिति प्राणं च हास्मै तदाकाशं चोचुः। अनन्तरं गार्हपत्यान्वाहार्यपचनाहवनीयाः स्वस्वविद्यामप्युपदिश्योचुः–उपकोसलैषा सोम्यास्मद्विद्या चात्मविद्या चाचार्यस्तु ते गतिं वक्तेति। प्रत्यागत आवर्यस्तु "ब्रह्मविद इव ते मुखं भाति को नु खलु त्वानुशशासे" त्यपृच्छदुपकोसलम्। अथ–अग्निभिरिदरिदमुपदिष्टमिति तेन कथिते–लोकान्वाव

किल सोम्य तेऽवोचन्नहं तु ते तद्वक्ष्यामि यथा पुष्करपलाश आपो न संश्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यत इत्याचार्य उवाच। उपकोसलस्तु प्राह–ब्रवीतु मे भगवानिति। तस्मै होवाचाचार्य इतीमेऽर्थाः प्रतिपादिताः। पञ्चदशखण्डस्तु–"य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेति तद्यद्यप्यस्मिन् सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छति॥१॥ एतं संयद्वाम इत्याचक्षते एतं हि सर्वाणि वामानि (कर्मफलानि) अभिसंयन्ति य एवं वेद॥२॥ एष तु एव वामनीरेष हि सर्वाणि वामानि नयति सर्वाणि वामानि नयति य एवं वेद॥३॥ एष तु भामनीरेष हि सर्वेषु लोकेषु भाति सर्वेषु लोकेषु भाति य एवं वेद॥४॥ अथ यदु चैवास्मिन् शव्यं कुर्वन्ति यदि च नार्चिषमेवाभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद् यान् षडुदङ्ङेति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः॥५॥ स एनान् ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्त नावर्तन्ते नावर्तन्ते" इति॥

अत्र प्रत्यक्षदर्शनमेकं छायापुरुषलिङ्गम्, आत्मत्वामृतत्वाभयत्वासङ्गत्व-संयद्वामत्व-वामनीत्व-भामनीत्वा-र्चिरादिमार्गप्राप्यत्वानि ब्रह्मलिङ्गानि, इति तत्र संशयावसरः ; प्रत्यक्षदर्शनमसाधारणमब्रह्मलिङ्गम्, अन्यानि तु ब्रह्मसाधारणलिङ्गानि, इति समबलत्वात्। तत्रोपक्रमरूपबलवत्प्रमाणान्तरस्याप्युपष्टम्भाद् ब्रह्मलिङ्गान्येव दुर्बलानीति पूर्वपक्षयुक्तिः। प्राणो ब्रह्मेति परमोपक्रमस्यैव समादरणीयत्वात् तस्य च ब्रह्मविषयत्वात् "एष दृश्यत" इत्यस्यापि शास्त्रीयदृष्टया कथञ्चनोपपत्तेश्चेतरलिङ्गमेव दुर्बलमिति सिद्धान्तयक्तिः॥

अत्राधिकाणे–"अन्तर उपपत्तेः" "स्थानादिव्यपदेशाच्च" "सुखविशिष्टाभिधानादेव च" "श्रुतोपनिषत्कगत्यभिधानाच्च" "अनवस्थितेरसंभवाच्च नेतर" इति पञ्च सूत्राणि। तत्र प्रथमसूत्रेणात्मत्वामृतत्वादिधर्मैर्ब्रह्मपरत्वं व्यवस्थाप्यते; विप्रतिषेधे भूयसां स्यात् स्वधर्मत्वमिति न्यायात्, द्वितीयं तु सूत्रमक्ष्यन्तरत्वं न परमात्मनोऽपि विरुद्धमिति बोधनद्वारा'ऽन्तस्तद्धर्मोपदेशादि" त्यनेन तस्मिन्नंशे गतार्थत्वसूचनद्वारा प्रकृतपक्षसमर्थनार्थम्। उपक्रमवशाद् एष दृश्यत इति प्रत्यक्षदर्शनप्रबलतामालम्ब्याधिकाशङ्कानिराकरणार्थ तु ब्रह्मविषयपरमोपक्रमस्यैव व्यवस्थापकत्वनिर्णयकं तृतीयं सूत्रम्। तुरीयं सूत्रं तु–"प्राणो ब्रह्मे" त्यादिवाक्यानामक्ष्यादिवाक्येन नैकवाक्यतेति न तस्य परमोपक्रमत्वमिति शङ्कानिराकरणर्थम्। पञ्चमं तु दृश्यमानत्वस्य न प्रतिबिम्बलिङ्गत्वम्, इति पूर्वपक्षस्य नोत्थितिरेवेति निरूपणार्थम्। तथाच समबलेषु बहूनां लिङ्गानामेव प्राबल्यम्, इति न्यायनिष्कर्षः॥

अयं च पूर्वतन्त्रसिद्ध एव; तथापि बहूनामपि प्रबलोपक्रमाबष्टब्धैकलिङ्गविरोधोऽपि यदि न भवेत्, तदानीमेव प्राबल्यमिति सूचनार्थमिदमधिकरणमिति भावः। इदमधिकरणं पूर्वोक्तबिधया सगुणब्रह्मपरमेव, न निर्गुणब्रह्मपरम्। तथाच–''श्रुतोपनिषत्कगत्यभिधानादि'' ति गतिप्राप्यत्वं ब्रह्मणोऽत्र प्रतिपादितम्–''कार्य बादरिरस्य गत्युपपत्ते'' रिति वक्ष्यमाणन्यायेन कार्यब्रह्मविषयमेवेति न विरोधः। अत्र ''श्रुतोपनिषत्के'' ति श्रवणमात्रस्य निर्देशाद् न साक्षात्कृतब्रह्मविषयापि गतिरिति न विरोधः। एतेन–मध्यपरामर्शस्यास्य सगुणविषयत्वाद् वैश्वानराधिकरणस्यान्तिमस्यापि तथात्वात् सगुणवाक्यप्राधान्यमस्य सर्वत्रप्रसिद्धाधिकरणस्याप्युक्रमगतस्यानुसारेण-विशदीकृतम्। अत्रेयं भामतीसिद्धान्तकारिका–

''अनिष्पन्नाभिधाने द्वे सर्वनामपदे सती॥
प्राप्य संनिहितस्यार्थे भवेतामभिधातृणी॥''

इति। अनया तु–य एष इति सर्वनामसम्बद्धं दर्शनं प्रकरणानुसारेणैव निर्णेयम्, प्रकरणं च ब्रह्मण इति शास्त्रीयमेव दर्शनमत्र दृश्यतेपदार्थ इति सूच्यते॥

यद्यपि–''सर्वत्र प्रसिद्धोपदेशादि'' त्यत्रापि–''समासः सर्वनामार्थः संनिकृष्टमपेक्षते। तद्धितार्थोऽपि सामान्यं नापेक्षाया निवर्तकः।'' इति सर्वनामार्थस्य तत्समभिव्याहृतस्य वा सामान्यस्य न व्यवस्थापकत्वमिति व्यवस्थापनेन तेनैवाधिकरणेन गतार्थत्वशङ्कोदेति; तथापि यदेतद् दृश्यते, तद्भयङ्करमित्यादिस्थल इव एषपदमहिम्ना सर्वनामार्थोऽपि विशेष इति प्रतीतेर्न गतार्थतेति मन्तव्यम्। इदं रजतमितत्यादाविदम्पदार्थस्यापि विशेषपरत्वम्। एषपदस्याप्यनिष्पन्नाभिधानत्वोक्तिस्तु भामत्या उपरितनवाक्यांशान्वयं विनैवोपपदार्थस्याप्यनिर्णयाभिप्रायैव। तथाच–''य एषोऽक्षिणि पुरुषो दृश्यत'' इत्यस्य स्वतन्त्रं वाक्यत्वम्, ''एष आत्मे'' त्यादीनामपि स्वतन्त्रवाक्यान्तरत्वमिति पूर्वपक्षे योजना। सिद्धान्ते तु सर्वेषामेकवाक्यत्वमिति व्यवस्था। तथाच सर्वनामार्थनिश्चायकत्वं यदाऽन्यपरस्यापि वाक्यस्य, तदा किमु वाक्यम् स्ववाक्यैकदेशस्येति निष्कर्षः। अधिकं वार्तिकादवगन्तव्यम्॥१३॥

सुखविशिष्टाभिधानादेव च॥१४॥ सुखविशिष्टस्य ब्रह्मणोऽत्र प्रकरणेऽभिधानात् परमोपक्रमानुसारेणैव प्रकरणार्थनिर्णय इति भावः। अन्यत् सुगमम्॥१५॥१६॥१७॥

इति प्रदीप चतुर्थमन्तराधिकरणम् समाप्तम्

भामती

नन्वन्तस्तद्धर्मोपदेशादित्यनेनैवैतद् गतार्थम्। सन्ति खल्वत्राप्यमृतत्वादयो ब्रह्मधर्मा: प्रतिविम्बजीवदेवतास्वसम्भविन:। तस्माद् ब्रह्मधर्मोपदेशाद् ब्रह्मैवात्र विवक्षितम्। साक्षाच्च ब्रह्म शब्दोपादानात्। उच्यते–

एष दृश्यत इत्येतत् प्रत्यक्षेऽर्थे प्रयुज्यते।
परोक्षं ब्रह्म न तथा प्रतिबिम्बे तु युज्यते॥

उपक्रमवशात् पूर्वमितरेषां हि वर्णनम्।
कृतं न्यायेन येनैव स खल्वत्रानुषज्यते॥

ऋतं पिबन्तावित्यत्र हि जीवपरमात्मानौ प्रथमावगताविति तदनुरोधेन गुहाप्रवेशादय: पश्चादवगता व्याख्याता:, तद्वदिहापि य एषोऽक्षिणि पुरुषो दृश्यत इति प्रत्यक्षाभिधानात् प्रथममवगते छायापुरुषे तदनुरोधेनामृतत्वाभ्यत्वादय: स्तुत्या कथञ्चिद् व्याख्येया:। तत्र चामृतत्वं कतिपयक्षणावस्थानादृ, अभयत्वमचेतनत्वात्, पुरुषत्वं पुरुषाकारत्वाद्, आत्म्त्वं कनीनिकायां व्यापनात्, ब्रह्मरूपत्वमुक्तरूपामृतत्वादियोगात्। एवं वामनीत्वादयोऽप्यस्य स्तुत्यैव कथञ्चिन्नेतव्या:। कञ्च खं चेत्यादि तु वाक्यमग्नीनां नाचार्यवाक्यं नियन्तुमर्हति। आचार्यस्तु ते गतिं वक्तेति च गत्यन्तराभिप्रायं, न तूक्तपरिशिष्टाभिप्रायम्। तस्माच्छायापुरुष एवात्रोपास्य इति पूर्व: पक्ष:। सम्भवमात्रेण तु जीवदेवते उपन्यस्ते, बाधकान्तरोपदर्शनाय चैष दृश्यत इत्यस्यात्राभावात्। अन्तस्तद्धर्मोपदेशादित्यनेन निराकृतत्वात्।

एवं प्राप्त उच्यते– 'य:' 'एष:' इति।

अनिष्पन्नाभिधाने द्वे सर्वनामपदे सती।
प्राप्य सन्निहितस्यार्थं भवेतामभिधातृणी॥

सन्निहिताश्च पुरुषात्मादिशब्दास्ते च न यावत् स्वार्थमभिदधति तावत्सर्वनामभ्यां

नार्थतुषोऽप्यभिधीयत इति कुतस्तदर्थस्यापरोक्षता। पुरुषात्माशब्दौ च सर्वनामनिरपेक्षौ स्वरसतो जीवे वा परमात्मनि वा वर्त्तेते इति। न च तयोश्चक्षुषि प्रत्यक्षदर्शनमिति निरपेक्षपुरुषपदप्रत्यायितार्थानुरोधेन य एष इति दृश्यत इति च यथासम्भवं व्याख्येयम्। व्याख्यातञ्च सिद्धवदुपादानं शास्त्राद्यपेक्षं विद्वद्विषयं प्ररोचनार्थम्। विदुषः शास्त्रत उपलब्धिरेव दृडतया प्रत्यक्षवदुपचर्यते प्रशंसार्थमित्यर्थः। अपि च तदेव चरमं प्रधमानुगुणतया नीयते यन्नेतुं शक्यम्, अल्पञ्च। इह त्वमृतत्वादयो बहवश्चाशक्याश्च नेतुम्। न हि स्वसत्ताक्षणावस्थानमात्रममृतत्वं भवति। तथा सति किं नाम नामृतं स्यादिति व्यर्थममृतपदम्। भयाभये अपि चेतनधर्मौं नाचेतने सम्भवतः। एवं वामनीत्वादयोऽप्यन्यत्र ब्रह्मणो नेतुमशक्याः। प्रत्यक्षव्यपदेशश्चोपपादितः। तदिदमुक्तम् *उपपत्तेः इति*। एतदमृतमभयमेतद् ब्रह्मेत्युक्ते स्यादाशङ्का–ननु सर्वगतस्येश्वरस्य कस्माद्विशेषेण चक्षुरेव स्थानमुपदिश्यत इति, तत्परिहरति श्रुतिः *तद्यद्यप्यस्मिन् सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छति इति*। वर्त्मनी पक्ष्मस्थाने। एतदुक्तं भवति–निर्लेपस्येश्वरस्य निर्क्षेपं चक्षुरेव स्थानमुनुरूपमिति। तदिदमुक्तं *तथा परमेश्वरानुरूपम इति*। *संयद्वामादिगुणोपदेशश्च तस्मिन् *ब्रह्मणि*। *कल्पते* घटते, समवेतार्थत्वात्। प्रतिबिम्बादिषु त्वसमवेतार्थः। वननीयानि सम्भजनीयानि पुण्यकलानि वामानि। संयन्ति संगच्छमानानि वामान्यनेनेति संयद्वामः परमात्मा। तत्कारणत्वात् पुण्यफलोत्पनेः। तेन पुण्यफलानि संगच्छन्ते। स एव पुण्यफलानि वामानि नयति लोकमिति वामनीः। एष एव भामनीः। भामानि भानानि तानि नयति लोकमिति भामनीः। तदुक्तं श्रुत्या–'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' इति॥१३॥

आशङ्कोत्तरमिदं सूत्रम्। आशङ्कामाह *कथं पुनरिति*। स्थानिनो हि स्थानं महद् दृष्टम्। यथा यादसामब्धिः। तत्कथमत्यल्पं चक्षुरधिष्ठानं परमात्मनः परममहत इति शङ्कार्थः। परिहरति *अत्रोच्यते इति*। स्थानान्यादयो येषां ते स्थानादयो नामरूपप्रकारास्तेषां व्यपदेशात् सर्वगतस्यैकस्थाननियमो नावकल्पते, न तु नानास्थानत्वं नभस इव नानासूचीपाशादिस्थानत्वम्। विशेषतस्तु ब्रह्मणस्तानि तान्युपासनास्थानानीति तैरस्य युक्तो व्यपदेशः॥१४॥

अपि च प्रकृतानुसारादपि ब्रह्मैवात्र प्रत्येतव्यं, न तु प्रतिविम्बजीवदेवता इत्याह सूत्रकारः– *सुखविशिष्टाभिधानादेव च*। एवं खलूपाख्यायते–उपकोसलो ह वै कामलायनः सत्यकामे आवात्के ब्रह्मचर्य्यमुवास, तस्याचार्यस्य द्वादश वर्षाण्यग्नीनुपचचार, स चाचार्योऽन्यान् ब्रह्मचारिणः स्वाध्यायं ग्राहयित्वा समावर्त्तयामास, तमेवैकमुपकोसलं न समावर्त्तयति स्म, जायया च तत्समावर्त्तनायार्थितोऽपि तद्वचनमवधीर्याचार्यः प्रोषितवान्।

ततोऽतिदूनमानसमग्निपरिचरणकुशलमुपेत्य त्रयोऽग्नयः करुणापराधीनचेतसः श्रद्दधानायाऽस्मै दृढभक्तये समेत्य ब्रह्मविद्यामूचिरे–प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति। अथोपकोसल उवाच–विजानाम्यहं प्राणो ब्रह्मेति, स हि सूत्रात्मा विभूतिमत्तया ब्रह्मरूपाविर्भावाद् ब्रह्मेति, किन्तु कं च खं च ब्रह्मेत्येतन्न विजानामि, नहि विषयेन्द्रियसम्पर्कजं सुखमनित्यं लोकसिद्धं खं च भूताकाशमचेतनं ब्रह्म भवितुमर्हति। अयैनमग्नयः प्रत्यूचुः–यद्वाव कं तदेव खं यदेव खं तदेव कमिति। एवं संभूयोक्त्वा प्रत्येकं च स्वविषयां विद्यामूचुः– पृथिव्यग्निरन्नमादित्य इत्यादिना। पुनस्त एनं संभूयोचु–एषा सोम्य तेऽस्मद्विद्या प्रत्येकमुक्ता स्वविषया विद्या, आत्मविद्या चास्माभिः संभूय पूर्वमुक्ता–प्राणो ब्रह्म क ब्रह्म खं ब्रह्मेति, आचार्यस्तु ते गतिं वक्ता। ब्रह्मविद्येयमुक्तास्माभिर्गतिमात्रं त्ववशिष्टं नोक्तम्, तत्तु विद्याफलप्राप्तये जावालस्तवाचार्यो वक्ष्यतीत्युक्त्वाऽग्नय उपरेमिरे। एवं व्यवस्थिते यद्वाव कं तदेव खं यदेव खं तदेव कमित्येतद् व्याचष्टे भाष्यकारः *तत्र खंशब्दः इति*। *प्रतीकाभिप्रायेण इति*। आश्रयान्तरप्रत्ययस्याश्रयान्तरे क्षेपः प्रतीकः, यथा ब्रह्मशब्दः परमात्मविषयो नामादिषु क्षिप्यते–इदमेव तद् ब्रह्म ज्ञेयं यन्नामेति। तथेदमेव तद् ब्रह्म यद् भूताकाशमिति प्रतीतिः स्यात्। न चैतत्प्रतीकत्वमिष्टम्। लौकिकस्य सुखस्य साधनपारतन्त्र्यं क्षयिष्णुता चामयस्तेन सह वर्त्तत इति सामयं सुखम्। तदेवं व्यतिरेके दोषमुक्त्वोभयान्वये गुणमाह *इतरेतरविशेषितौ तु इति*। तदर्थयोर्विशेषित्वाच्छब्दावपि विशेषितावुच्येते। सुखशब्दसमानाधिकरणो हि खंशब्दो भूताकाशमर्थं परित्यज्य ब्रह्मणि गुणयोगेन वर्त्तते। तादृशा च खेन सुखं विशिष्यमाणं सामयाद्व्यावृत्तं निरामयं भवति। तस्मादुपपन्नमुभयोपादानम। ब्रह्मशब्दाभ्यासस्य प्रयोजनमाह *तत्र द्वितीय इति*। ब्रह्मपदं कंपदस्योपरि प्रयुज्यमानं शिरः, एवं खंपदस्यापि ब्रह्मपरं शिरो ययोः कंखंपदयोस्ते ब्रह्मशिरसी, तयोर्भावो ब्रह्मशिरस्त्वम्। अस्तु प्रस्तुते किमायातमित्यत आह *तदेवं वाक्योपक्रम इति*। नन्वग्निभिः पूर्वं निर्दिश्यतां ब्रह्म, य एषोक्षणीत्याचार्यवाक्येऽपि तदेवानुर्त्तनीयमिति तु कुत इत्याह *आचार्यस्तु ते गतिं वक्तेति च गतिमात्राभिधानम् इति*। यद्यप्येते भिन्नवक्तृणी वाक्ये, तथापि पूर्वेण वक्त्रा एकवाक्यतां गमिते गतिमात्राभिधानात्। किमुक्तं मवति–तुभ्यं ब्रह्मविद्याऽस्माभिरुपदिष्टा, तद्विदस्तु गतिर्नोक्ता, तां च किञ्चिदधिकमाध्येयं पूरयित्वाऽऽचार्यो वक्ष्यतीति। तदनेन पूर्वासंबद्धार्थान्तरविवक्षा वारितेति। अथैवमग्निभिरुपदिष्टे प्रोषित आचार्यः कालेनाजगाम, आगतश्च वीक्ष्येपकोशलमुवाच, ब्रह्मविद इव त सोम्य मुखं प्रसन्नं भाति, कोऽनु त्वामनुशशासेति, उपकोशलस्तु ह्रीणो भीतश्च को नु मामनुशिष्याद् भगवन्! प्रोषिते त्वयीत्यापाततोऽपज्ञाय निर्बध्यमानो यथावदग्नीनामनुशासन-मवोचत्। तदनुश्रुत्य चाचार्यः सुचिरं क्लिष्ट उपकोशले समुपजातदयार्द्रहृदयः प्रत्युवाच–सोम्य किल तुभ्यमग्नयो न ब्रह्म साकल्येनावोचन्, तदहं तुभ्यं साकल्येन वक्ष्यामि, यदनुभवमाहात्म्याद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म

न शिलष्यत इति। एवमुक्तवत्याचार्य आहोपकोशलः–ब्रवीतु मे भगवानिति। तस्मै होवाचाचायोऽर्चिरादिकां गतिं वक्तुमनाः, यदुक्तमग्निभिः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति तत्पूरणाय एवोक्षणि पुरुषो दृश्यते इत्यादि। एतदुक्तं भवति–आचार्येण ये यत् सुखं ब्रह्माक्षिस्थनं संयद्वामं वामनो भामनीत्येवंगुणकं प्राणसहितमुपासते, ते सर्वेऽपहतपाप्मानोऽन्यत्कर्म कुर्वन्तु मा वाकार्षुः, अर्चिषमर्चिरभिमानिनीं देवतामभिसम्भवन्ति प्रतिपद्यन्ते, अर्चिषोऽहरहर्देवताम् अह्नः आपूर्यमाणपक्षम्, शुक्लपक्षदेवताम, ततः षण्मासान् येषु मासेषूत्तरां दिशमेति सविता, ते षण्मासा उत्तरायणं, तद्देवतां प्रतिपद्यन्ते, तेभ्यो मासेभ्यः सवत्सरदेवताम्, तत आदित्यम्, आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतं, तत्र स्थितानेतान् पुरुषः कश्चिद् ब्रह्मलोकादवतीर्यामानवोऽमानव्यां सृष्टौ भदो ब्रह्मलोकभव इति यावत्, स तादृशः पुरुष एतान् सत्यलोकस्थं कार्यं ब्रह्म गमयति। स एष देवपथो दवैरर्चिरादिभिर्नेतृभिरुपलक्षित इति देवपथः, स एव ब्रह्मणा गन्तव्येनोपलक्षित इति ब्रह्मपथः, एतेन पया प्रतिपद्यमानाः सत्यलोकस्थं ब्रह्म इमं मानवं मनोः सर्गं किं भूतमावर्तं जन्मजरामरणपौनः पुन्यमावृत्तिस्तत्कर्त्ताऽऽवर्तो मानवो लोकस्तं नावर्त्तन्ते। तथा च स्मृतिः–

'ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्॥'

तदनेनोपाख्यानव्याख्यानेन "श्रुतोपनिषत्कगत्यभिधानाच्च"–

इत्यपि सूत्रं व्याख्यातम्॥१६॥

य एषोऽक्षिणीति नित्यवत् श्रुतमनित्ये छायापुरुषे नावकल्पते। कल्पनागौरवं चास्मिन् पक्षे प्रसज्यत इत्याह *न चोपासनाकाल इति*। *तथा विज्ञानात्मनोऽपि इति*। विज्ञानात्मनो हि न प्रदेशे उपासनाऽन्यत्र दृष्टचरो, ब्रह्मणस्तु तत्र श्रुतपूर्वेत्यर्थः। *भीषा* भिया। *अस्मात्* ब्रह्मणः। शेषमतिरोहितार्थम्॥१७॥

इति भामती चतुर्थमन्तराधिकरणम् समाप्तम्

श्री कण्ठभाष्य

हृदयगुहान्तर्वर्तितयोपास्यस्य परमेश्वरस्येहोपासनस्थानान्तरमुच्यते–

।।सू०।। अन्तर उपपत्तेः।।१३।।

छान्दोग्ये श्रूयतेऽस्य विषयः 'य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्म' इत्यादि।। इहामृतत्वादिलक्षणोऽक्ष्यन्तः श्रूयमाणः पुरुषः ईश्वरो वा अन्यो वा?।। इति संशये परमेश्वरादन्य इति वदामः, परमेश्वरस्य 'दहरं विपाप्मम्' (महाना. १०.११.) 'पद्मकोशप्रतीकाशम्' इत्यादिषु हृदयपुण्डरीक एव सन्निधानश्रवणात्। जीवस्य तु रूपादिग्रहणे चक्षुरिन्द्रियप्रवेशोऽस्ति, मनःसंबन्धात्। स एवाक्षिपुरुषः। अथवा छायापुरुषः। इति प्राप्ते निरूपयामः–परमेश्वर एवाक्ष्यन्तः पुरुष इति, निरुपाधिकामृतत्वाभयत्वादीनामस्मिन्नेवोपपत्तेः।।

यदुक्तमक्ष्यन्तः स्थितिरीश्वरस्य न श्रुतेति तत्राह–

।।सू।। स्थानादिव्यपदेशाच्च।।१४।।

'यश्चक्षुषि तिष्ठन् चक्षुषोऽन्तरो यं चक्षुर्न वेद यस्य चक्षुः शरीरं यश्चक्षुरन्तरो यमयति एष त आत्माऽन्तर्याम्यमृतः' (वृह० ५.७) इत्यादिश्रुत्या चक्षुःस्थितिनियमनादिकमीश्वरस्य व्यपदिश्यते। अतः पर एवायमीश्वरः।। छायापुरुषपक्षे पुनरनुपपत्तिमाह–

।।सू।। सुखविशिष्टाभिधानादेव च।।१५।।

'कं ब्रह्म खं ब्रह्म' इति पूर्वमस्य सुखविशिष्टतयाऽभिधानादेवायमीश्वरः। न हि छायापुरुषे सुखसंभवः।। यदुक्तमक्षिपुरुषस्य जवीरूपत्वं तत्राह–

अत एव स ब्रह्म।।१६।।

यत एव भवभयभीतायोपकोसलाय ब्रह्मजिज्ञासवे 'कं ब्रह्म खं ब्रह्म' इत्युपक्रम्योपदिष्टं 'यदेव

कं तदेव खं यदेव खं तदेव कम्' इति, अत एव खशब्दाभिधेय आकाशः परमेव ब्रह्म। किमीदृशोपपत्तिरस्ति जीवस्य? न हि जीवे निरतिशयसुखसंभवः। अतो यदेव पूर्वमपरिच्छिन्नसुखरूपतया प्रकृतं ब्रह्म तदेवाक्ष्याधारतया प्रतिपाद्यत इत्यक्ष्यन्तः पुरुषः परमेश्वर इति।। पूर्वपक्षे पुनरियमप्यनुपपत्तिरित्याह-

।।सू०।। **श्रुतोपनिषत्कगत्यभिधानाच्च**।।१७।।

श्रुतब्रह्मस्वरूपाणामधिगन्तव्याया अर्चिरादिगतेः अक्षिपुरुषं श्रुतवतः 'अर्चिषमेवाभिसंभवन्त्यर्चिषोऽहरह्नः' इत्यादिना 'तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयत्येष देवपथो ब्रह्मपथः, एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते', इत्यन्तेनाभिधानान्नासौ जीवश्छायापुरुषो वा, किं त्वीश्वर एव।।

इति श्रीकण्ठभाष्यम् चतुर्थमन्तराधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

सङ्गतिं दर्शयन्नुत्तराधिकरणमवतारयति-**हृदयगुहेति।** उपासकनेदिष्ठोपासनास्थानप्रदर्शन-प्रसङ्गात्तथाभूतस्यैवोपासनास्थानान्तरस्य प्रदर्शनार्थमधिकरणान्तरमारभ्यत इत्यर्थः।।सू।। **अन्तर उपपत्तेः**।।१३।। विषयवाक्यमुदाहृत्य संशयं दर्शयति-**छान्दोग्य इत्यादिना।** नन्वमृतत्वादिलक्षण इति धर्मिणं निर्दिश्य परमेश्वरस्तदन्यो वेति कथं सन्दिह्यते। परमेश्वरैकान्तिका एव ह्यमृतत्वाभयत्वब्रह्मत्वश्रुतयः। तदनन्तरम'प्येतं संयद्वाम इत्याचक्षते। एतं हि सर्वाणि वामान्यभिसंयन्ति सर्वाण्येनं वामान्यभिसंयन्ति य एवं वेदे'त्यादिना संयद्वामत्ववामनीत्वभामनीत्वादि-स्वस्वानुगुणफलपर्यवसायित्वेन बलवन्ति ब्रह्मलिङ्गानि प्रतिपाद्यन्ते। पुष्करपलाशवाक्येनार्चिरा-दिवाक्येन च ब्रह्मविद्याफलत्वेन प्रसिद्धं सकलपापानाश्लेषब्रह्मप्राप्तिलक्षणं फलमिह प्रतिपाद्यते। प्रकरणादयमक्षिपुरुषः परमेश्वरोऽवसीयते। एवं छान्दोगानामुपनिषद्युपाख्यायते। उपकोसलः कामलायनः सत्यकाममाचार्यमुपसन्नः तस्य द्वादशवर्षाण्यग्नीन्परिचरन्नास्त। तस्मै ब्रह्मोपदेशमकृत्वैवाचार्ये प्रोषिते सत्याधिव्याधिपरवशमनश्नन्तं तादाद्याचार्याग्निपरिचर्यायामवहितं तमवेक्ष्य गार्हपत्यदक्षिणाग्न्याहवनीयास्त्रयोऽप्यग्नयस्सम्भूय करुणया तस्मै 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे'त्यादिना ब्रह्मविद्यामुपदिश्य प्रत्येकं च स्वस्वविषयां विद्यां 'य एष आदित्ये पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मी'त्यादिना 'य एष चन्द्रमसि पुरुषो दृश्यत'इत्यादिना 'य एष विद्युति पुरुष'इत्यादिना चोपदिदिशुः। तदनन्तरं सर्वेऽग्नयस्सम्भूयै'षा सोम्य तेऽस्मद्विद्या चात्मविद्या चेत्यभिधाया'चार्याद्ध्येव विद्या विदिता साधिष्ठं प्राप'दिति श्रुत्यनुसारेण स्वोपदिष्टविद्या तदाचार्यकर्तृकगत्युपदेशेन साधिष्ठत्वं प्राप्नोत्वित्यालोच्या'चार्यस्तु ते गतिं वक्ते'त्यवोचन्। ततः प्रत्यागत आचार्यः प्रसन्नमुखमुपकोसलं वीक्ष्य 'ब्रह्मविद इव वै सोम्य ते मुखं भाति को नु त्वामनुशशासे'ति पृष्ट्वा सहाग्निभिर्भीते तस्मिन्नग्नयोऽस्मा उपदिदिशुरिति निश्चित्य'किन्नु सोम्य किलतेऽवोच'न्निति पृष्ट्वा एतावदुपादिशन्निति तेनोक्ते तत्र वक्तव्यशेषोऽस्तीत्यवधार्य 'अहं तु ते तद्वक्ष्यामि यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यते' इति स्ववक्तव्य प्रतिज्ञाय 'ब्रवीतु मे भगवा' निति तेन प्रार्थितः संयद्वामत्वादिगुणकमक्षिपुरुषमुपदिश्य तदुपासकस्या 'र्चिषमेवाभिसम्भवन्ती' त्यादिना 'एष देवपथो ब्रह्मपथः एतेन प्रतिपद्यमाना इमं मानवमावर्तं

नावर्तन्ते' इत्यन्तेनार्चिरादिमार्गप्राप्त्यन्तं पुनरावृत्तिरहितं ब्रह्मप्राप्तिफलमुपदिदेशेति। अतः प्रकृतब्रह्मविद्यायामेव स्थानगुणविशेषोपदेशार्थं 'यएषोऽक्षिणी' त्यादि प्रवृत्तमित्यवसीयते। 'य एष' इति सर्वनामश्रुत्योः प्रकृतपरामर्शित्वस्वाभाव्यादपि तथावसीयते। एवं च कथमिहाक्षिपुरुषः परमेश्वरादन्य इति कोटेरुत्थानं परमेश्वरादन्यश्च भवन्नयं वक्ष्यमाणपूर्वपक्षानुसारेण जीवः प्रतिबिम्बो वा स्यात्। नोभयथापिं सङ्गच्छते। न हि परमेश्वरपक्षे श्रुतिलिङ्गवाक्यप्रकरणवज्जीवपक्षे प्रतिबिम्बपक्षे वा श्रुतिलिङ्गादिषु किञ्चिदपि प्रमाणं शङ्कास्पदमस्ति। अक्षिस्थत्वलिङ्गमस्तीति चेत् न। 'यश्चक्षुषि तिष्ठन्त एषोऽन्तरक्षिणि पुरुषो दृश्यते सैव ऋक् तत्साम तदुक्थं तद्यजुस्तद्ब्रह्मे'त्यादिश्रुत्यन्तरेषु परमेश्वरेऽपि श्रुतत्वेन साधारणत्वात्। तस्मादनुपपन्नोऽयं संशय इति चेदुच्यते। अमृतत्वादिलक्षण इति संशये सिद्धान्तकोटेर्बीजोपन्यासः। अक्ष्यन्तश्श्रूयमाण इति पूर्वपक्षकोटेः। यथा चाक्ष्याधारत्वं परमेश्वराद्व्यावृत्तममृतत्वादीनां प्रतिबन्दीभवितुं क्षमं च भवति तथानुपदमेव पूर्वपक्षोपपादनेन स्पष्टीकरिष्यामः। **परमेश्वरस्येति।** अयमाशयः। अक्ष्याधारत्वं स्वमहिमप्रतिष्ठस्य परमेश्वरस्य मुख्यं तावन्न सम्भवति। रूपविशेषावच्छेदोपाधिकमौपचारिकं सम्भवदपि तदङ्गीकरणीयम्। यद्यनन्यथासिद्धमक्ष्यन्तश्श्रूयमाणस्य परमेश्वरत्वगमकं श्रुतिलिङ्गादिषु किञ्चिदिह जागृयात्। न त्वेतदस्ति। आत्मब्रह्मश्रुत्योस्संयद्वामत्वादिगुणश्रवणस्य चेतिशब्दशिरस्कत्वेन 'मनो ब्रह्मे'त्यादिवदत-स्मिंस्तद्रूपप्रत्ययपरत्वावगमात् तत्समभिव्याहारेणामृतत्वादिश्रवणानामपि तन्मात्रपरत्वावगमात्। अमृतत्वाभयत्वयोर्मुक्तौ सत्त्वेन तच्छ्रवणयोर्भाव्यवस्थाविषयत्वेनोपपत्तेश्च। अब्रह्मोपासनयाप्यु-दाहृतफलानां वैवाहिकवरवधूदर्शनेनाभ्युदयवद्वचनबलादुपपत्तेः। न ह्यब्रह्मविदामर्चिरादिमार्गो नास्तीति नियमः। अब्रह्मविदामेव पञ्चाग्निविद्योपासकानां 'तद्य इत्थं विदु'रित्यादिवचनबलेन तदभ्युपगमात्। ब्रह्मप्रकरणानुवृत्तिरप्यसिद्धा। 'प्राणो ब्रह्मे'त्यादे'र्मनोब्रह्मे'त्यादिसारूप्येण ब्रह्मदृष्टिविधिपरत्वात्। तस्य ब्रह्मोपासनापरत्वेऽपि तदग्निवाक्यं 'य एषोऽक्षिणी'त्याचार्यवाक्यमिति वक्तृभेदादग्निविद्यादि-भिर्व्यवधानाच्च। न चा'चार्यस्तु ते गतिं वक्ते'ति ब्रह्मोपासनान्वय्याचार्यवक्तव्यशेषश्रवणादग्निविद्यानां तदङ्गत्वाच्च न वक्तृभेदाग्निविद्योपदेशाभ्यां तत्प्रकरणविच्छेदो भवेदिति वाच्यम्। गत्यभिधान-मात्रस्याचार्यवक्तव्यतया परिशेषितत्वेनार्चिराद्यभिधानस्य तदन्वयलाभेऽपि स्थानगुणयोरा-चार्यवक्तव्यत्वेनापरिशेषिततया 'य एषोऽक्षिणी'त्यादेः प्रकृते ब्रह्मण्यक्षिस्थानसंयद्वामत्वादिगुण-विधायकत्वेनान्वयालाभात्। अग्निभिरे'षा सोम्य तेऽस्मद्विधा चात्मविद्या चे'ति विद्यां निरपेक्षमुपदिष्टतयोपसंहृत्य गतिमात्रमाचार्येणोपदेष्टव्यमिति परिशेषितेऽप्याचार्योऽग्न्युपदिष्टस्य ब्रह्मणोऽक्षिस्थानं संयद्वामत्वादिगुणजातं चाधिकमुपदेष्टव्यमस्तीत्यालोच्य स्वयमुप दिदेशेति

तदन्वयसमर्थने अग्नीनामनृतवादित्वस्यानभिज्ञत्वस्य वा प्रसङ्गात्। अपहते 'पापकृत्यां लोकी भवति सर्वमायुरेति जोग्जीवति नास्यावरपुरुषाः क्षीयन्ते उप वयं तं भुञ्जामोऽस्मिंश्च

लोकेऽमुष्मिंश्चे'त्यग्निविद्यानां पृथक्फलश्रवणेन प्रकृतविद्यात्वाभावाच्च। नन्विहाक्षिपुरुषोपन्यासानन्तरमर्चिरादिगतिः न प्रकृतब्रह्मवित्प्राप्यत्वेन कीर्तिता न वा ताटस्थ्येन। किं तु 'य एवं वेदे'त्यक्षिपुरुषविदमुपक्षिप्य 'अथ यदु चैवास्मि'न्नित्यादिना' तत्प्राप्यत्वेन कीर्तिता। तथा चाग्निभिस्स्वो-पदिष्टब्रह्मवित्प्राप्यगतेराचार्यवक्तव्यत्वेन परिशेषितायास्तेनाक्षिपुरुषवित्प्राप्यत्वेनोपदिष्टत्वादक्षिपुरुषः प्रकृतं ब्रह्मैवेति चेन्नैवम्। आचार्यस्स्वयमपि विद्यान्तरमुपदिश्य तदर्थमर्चिरादिगतिमुपदेक्ष्यतीत्येतदग्नयो निश्चित्य तत्सर्वमनुद्भाव्य यां गतिमाचार्य उपदेक्ष्यति सा प्रकृतब्रह्मविदोऽपीत्यभिप्रायेणा'चार्यस्तु ते गतिं वक्ते'त्यग्नयो ऽवोचन्नित्युपपादनसम्भवे तन्मात्रमवलम्ब्य निरपेक्षतयोपसंहताया बहुविद्यान्तरव्यवहितायाः पुनस्स्थानगुणविध्यङ्गीकारायोगात्। तस्माद्दहरविद्यादिषु हृदयपुण्डरीकाधारस्येवाक्ष्याधारस्यात्र ब्रह्मत्वे दृढश्रुतिलिङ्गादिप्रमाणाभावात् ब्रह्मणो हृदयपुण्डरीकाधारत्वमिवाक्ष्याधारत्वमिहौपचारिकं नाश्रयणीयम्। जीवपरिग्रहेण तस्य मुख्यतयोपपादनसम्भवात्। जीवो हि ब्रह्मश्रितो न ब्रह्मवत् स्वमहिमप्रतिष्ठः। जिज्ञासितार्थग्रहणाय मनसा सह सञ्चरन् रूपादिग्रहणकाले मनसोऽक्षिसंयोगे स्वयमपि तत्संयुक्तस्सन्मुख्यतयैव भवत्यक्ष्याश्रितः। एतेन'यश्चक्षुषि तिष्ठन् य एषोऽन्तरक्षिणी'त्यादिश्रुतिषु ब्रह्मणोऽप्यक्ष्याधारत्वं प्रसिद्धमिति निरस्तम्। स्वमहिमप्रतिष्ठे तस्मिन्मुख्यस्य तस्यासम्भंवात्। अमुख्यपरिग्रहस्य च मुख्ये सम्भवत्ययुक्तत्वात्। वस्तुतस्तु,ब्रह्मणो हृदयपुण्डरीकाधारत्वस्येवाक्ष्याधारत्वस्य नास्त्यमुख्यस्यापि प्रसिद्धिः। 'यः पृथिव्यां तिष्ठ'न्नित्यादेरन्तर्यामिब्राह्मणस्य 'स एवाधस्तात् स उपरिष्टादाकाशवत्सर्वगतश्च नित्य'इत्यादिश्रुत्यन्तरवदपरिच्छिन्नस्य ब्रह्मणः सर्वानुस्यूतिमात्रविषयत्वात् 'य एषोऽन्तरक्षिणीत्यादेः प्रकृतविषयवाक्यवज्जीवपरत्वसम्भवात्। न चा 'न्तस्तद्धर्मोपदेशा' (ब्र॰ १. १.२१. सू.) दित्यधिकरणे तस्य ब्रह्मविषयत्वं सिद्धमिति वाच्यम्। सर्वपापोदयलिङ्गेन आदित्यान्तर्वर्त्येव ब्रह्म नाक्ष्यन्तर्वर्तीत्यधिकाशङ्काया इहैव निवर्तनीयत्वात्। न चोभयत्रापि निर्णायकलिङ्गं तुल्यमिति शङ्कनीयम्। सर्वपापोदयलिङ्गस्यान्तरादित्यवर्तिन्तयेव श्रवणात् 'तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामे'ति नाम्नोऽतिदेशान्नामप्रवृत्तिनिमित्तत्वेन सर्वपापोदयोऽपि तत्र प्राप्नुयादिति चेन्न। नामातिदेशस्य तत्प्रवृत्तिनिमित्तप्रापकत्वनियमाभावात्। 'घनसारश्चन्द्रसंज्ञ'इत्यादिदर्शनात् सर्वपापोदयलिङ्गेन आदित्यान्तर्वर्ति ब्रह्मेति सिद्धौ तन्नामरूपातिदेशविषयस्य 'तन्नामनामा तद्रूपस्तत्कार्यकरणक्षमः। तत्तुल्यव्यवहारश्च तदाज्ञापरिपालक'इति निर्दिष्टस्य संहाररुद्रस्येव स्वरसतस्ततो भेदप्रतीत्या तस्मिन्ब्रह्मासाधारणसर्वपापोदयव्यतिरेकस्यैव प्राप्तेश्च। न च सर्वलोककामेश्वरत्वलिङ्गेन तस्य ब्रह्मत्वसिद्धिः। तल्लिङ्गसिद्धेरक्ष्यादित्यान्तर्वर्तिपुरुषद्वयैक्यसिद्ध्यधीनत्वस्य तत्रैवाधिकरणे दर्शितत्वेन

तद्भेदशङ्कायां तदसिद्धेः। न च 'सैव ऋक्तत्साम तदुक्थं तद्यजुस्तद्ब्रह्मे'तिश्रुतेन सार्वात्म्येनाक्षिपुरुषस्य ब्रह्मत्वसिद्धिः। ऋक्सामाद्यात्मकत्वस्य तैत्तिरीयोपनिषदादिषु मण्डलाभिमानिनि जीवेऽपि प्रसिद्धत्वात् ऋक्सामादिसमभिव्याहारेण तत्र ब्रह्मशब्दस्यापि वेदसामान्यपरत्वौचित्यात्। न च ऋक्सामगेष्णत्वेन तस्य तत्सिद्धिः। ऋक्सामयोः पृथिव्याद्यात्मकत्वस्येव तस्याप्यक्षिपुरुषे ध्यानार्थोपपत्तेः। एतेन 'तद्य इमे वीणायां गायन्ति एतं ते गायन्ती'ति लौकिकगानेऽप्यनुवृत्तत्वं ब्रह्मलिङ्गमित्यपि शङ्का निरस्ता। 'सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैस्सन्तं गायन्ती' तिवत्तस्यासदर्थवादत्वात्। तस्मादिहाक्षिपुरुषो जीव इत्येव युक्तम्। न च तस्मिन्नुपासकसाक्षात्कारविषये ब्रह्मणीव दृश्यत्वोक्तिर्नान्वेतीति वाच्यम्। तस्य प्रथमप्रवृत्ताक्षिस्थत्वलिङ्गानुसारेण ज्ञेयत्वमात्रपरत्वोपपत्तेः। यदि दृश्यत्वं मुख्यमुपपादनीयं तर्ह्ययमक्षिपुरुषः प्रतिबिम्बोऽस्तु तत्र चाक्षुषसाक्षात्कारविषये मुख्यस्य तस्य सम्भवात् ब्रह्मण्यपि तदसंभवात्। न च पुरुषश्रुतिश्चेतनवाचिनी नाचेतने प्रतिबिम्बे सङ्गच्छत इति वाच्यम्। 'य एष' इति प्रसिद्धिलिङ्गेन दृश्यत्वलिङ्गेन च सन्दृष्टायास्तस्याः पुरुषप्रतिबिम्बविषयत्वकल्पनोपपत्तेः। देवदत्तप्रतिबिम्बे देवदत्तव्यवहारदर्शनादिति। एवं जीवः प्रतिबिम्बो वाक्षिपुरुषः न तु परमेश्वर इति प्राप्ते पूर्वपक्षद्वयव्यावर्तकं सिद्धान्तमाह-**परमेश्वर एवेति**। **निरुपाधिकेति**। यत्रोच्यमानस्यार्थस्याप्तवचनसम्बन्धः प्रतिपाद्यः तत्रेतिशब्दो नार्थविवक्षां वारयति यथा-'इति ह स्मोपाध्यायः कथयति।' तस्मादिहामृतत्वादीनामाचार्यवचनसम्बन्धस्य प्रतिपाद्यत्वात् इतिशब्दो 'मनो ब्रह्मे'त्यादाविव नार्थविवक्षाया वारकः। स्वाभाविकं चामृतत्वादिकं जीवस्य न सम्भवति प्रतिबिम्बस्य तु कथमपि न सम्भवति। अतोऽमृतत्वादिकं परमेश्वर एवोपपद्यते। अतो ब्रह्मश्रुत्यमृतत्वाभयत्वसंयद्वामत्ववामनीत्वभामनीत्वलिङ्गैर्बहुभि' रेतद्ब्रह्मे'त्यादिवाक्यापादितसम्बन्धैरक्षिपुरुषस्य ब्रह्मत्वनिश्चये सत्यक्ष्याधारत्वमेकमौपचारिकं नेतव्यम्। उपक्रमस्थैकप्रमाणापेक्षयोपरितनानेक-प्रमाणानां बलवत्त्वस्य पूर्वं निर्णीतत्वादिति भावः।। अक्ष्याधारत्वमौपचारिकमपि परमेश्वरे न प्रसिद्धमस्ति इति शङ्कोत्तरत्वेनोत्तरसूत्रमवतारयति-**यदुक्तमिति**।।सू।। स्थानादिव्यपदेशाच्च।।१४।। अन्तर्यामिब्राह्मणे तिष्ठन्नित्यवस्थानवाचकशब्दस्यापि श्रूयमाणत्वात् ब्रह्मणः स्वमहिमप्रतिष्ठस्याप्यौपचारिकमक्ष्याधारत्वं विवक्षितमिति गम्यते। इह दृश्यत इत्युपासनाकाले वर्तमानत्वव्यपदेशादपि तस्य तद्विवक्षितमिति गम्यते। न हि रूपग्रहणकालबिम्बसन्निधानकालयोरिवोपासनाकाले जीवप्रतिबिम्बयोरक्षिस्थितिस्सम्भवति। ननु, 'नेत्रस्थं जाग्रतं विद्यात्कण्ठे स्वप्नं विनिर्दिशेत्। सुषुप्तौ हृदयस्थं तु तुरीयं मूर्धनि स्थित'मिति जागरदशायां सर्वस्यापि जीवस्याक्षिस्थत्वश्रवणात् उपासनाकालेऽक्ष्यभिमुखबिम्बसन्निधापन-सम्भवाच्च तत्काले तयोरक्षिस्थितिस्सम्भवतीति चेन्न। 'तुरीयं मूर्धनी'त्युपासनाकाले तु तुरीयशब्दोक्तजीवस्य मूर्धनि स्थितिश्रवणेन नासाग्रन्यस्तदृष्टिके तस्मिन्काले

बिम्बसन्निधापनकल्पनागौरवाभ्युपगमेऽपि प्रतिबिम्बोदयानुपपत्त्या च तदसम्भवात्। तस्मात्तन्नियन्तुः परमेश्वरस्य नियमनार्थमुपासनाकालेऽप्यक्षिणि सन्निधानमस्तीति स एवेहाक्ष्याधारोऽस्त्विति तदेव तस्यौपचारिकमक्ष्याधारत्वमिह विवक्षितमित्यभ्युपगन्तव्यम्। न चाक्ष्यभिमानिन आदित्यजीवस्याप्युपासनाकालसाधारणी तत्र स्थितिरस्तीति स एवेहाक्ष्याधारोऽस्त्विति शङ्क्यम्। 'रश्मिभिरेषोऽस्मिन्प्रतिष्ठित'इति श्रुतेस्तत्परिग्रहेऽप्यक्ष्याधारत्वस्यौपचारिकत्वानपायेन तं परिगृह्य ब्रह्मश्रुत्याद्युपेक्षणायोगात्। तदेतत्सर्वमभिप्रेत्य सूत्रे 'स्थानादी'त्यादिग्रहणमपि कृतमिति मत्वा भाष्ये तद्विवरणार्थं 'नियमनादिक'मित्युक्तम्। तत्रादिशब्देन तु 'य एषोऽन्तरक्षिणी'ति श्रुतिमपि प्रागितिशब्देन प्रकारवाचिना सङ्गृहीतामभिप्रेत्य तत्प्रतिपाद्यस्याक्ष्याधारस्य परमेश्वरत्वसाधकं सार्वात्म्यादिकं सङ्गृहीतम्। न ह्यादित्यजीवस्य ऋक्सामाद्यात्मकत्वं मुख्यं सम्भवति यदि तस्याक्ष्याधारत्वं मुख्यं सम्भवेत्तदा प्रथमश्रुतमुख्यत्वलोभादौपचारिकमपि तत्परिगृह्येत। तदपिरश्मिद्वाराक्षिणि प्रतिष्ठिते तस्मिन्मुख्यं न सम्भवतीत्युक्तम्। सर्वपापोदितत्वमपि तस्य परमेश्वरत्वसाधकम्। यथा खल्वग्निहोत्रनाम्नः कौण्डपायिनामयने कर्मण्युपदिष्टस्य 'सिंहो देवदत्त' इत्यादिवत्सिद्धधर्मावलम्बनगौणत्वसम्भवेऽप्यनुष्ठानोपयोगिधर्मलाभाय 'पिष्टपिण्डाः सिंहाः क्रियन्ता'मित्यत्रेव साध्यधर्मावलम्बनगौणत्वमङ्गीकृत्य तस्य नैयमिकाग्निहोत्राङ्ग-कलापप्रापकत्वमुक्तम्। तथाप्यक्षिपुरुषेऽतिदिष्टस्योदितिनाम्नः कर्पूरेऽतिदिष्टस्य चन्द्रनामजातस्येव क्लृप्तप्रवृत्तिनिमित्तं विनाभिधायकत्वसम्भवेऽप्युपासनोपयोगिगुणलाभाय क्लृप्तप्रवृत्तिनिमित्ता-वलम्बनाभिधायकत्वमङ्गीकृत्य तस्यादित्यपुरुषश्रुतसर्वपापोदितत्वतत्फलप्रापकत्वं वक्तुं युक्तमिति भावः। अतो जीवप्रतिबिम्बग्रहणासम्भवात् परमेश्वर एवायमक्षिपुरुष इत्याह-**अतः पर एवायमिति**॥ एवं पूर्वपक्षद्वयसाधारणसिद्धान्तो दर्शितः। उत्तरसूत्रं प्रतिबिम्बपूर्वपक्षानुपपत्तिप्रदर्शनार्थत्वेना-वतारयति-**छायेति**।।सू।। **सुखविशिष्टाभिधानादेव च**।।१५।। सुखविशिष्टाभिधानादिति। **कं ब्रह्मेति**। कशब्दः सुखवाची नीलादिशब्दवत्प्रकारिपर्यन्त इति भावः। ननु प्राणादिषु प्रत्येकं ब्रह्मपदयोगा'न्नाम ब्रह्म" मनो ब्रह्मे'त्यादाविव ब्रह्मदृष्टिविधिपरत्वं युक्तम्। अत एव 'प्राणं च हास्मै तदाकाशं चोचु'रिति प्राणादिशब्देन निगमनं दृश्यते। प्राणादिप्रधानत्वात्। ब्रह्मप्रधानत्वे हि ब्रह्मशब्देन निगमनं स्यात्। अतो नात्र ब्रह्म प्रकृतमस्ति। येन 'य एष' इति सर्वनाम्नोः प्रकृतपरामर्शित्वादक्षिपुरुषो ब्रह्म भवदिति चेदुच्यते। नेदं ब्रह्मदृष्टिविधानं 'प्राणो ब्रह्मे'त्याद्युपदेशानन्तरं 'विजानाम्यहं यत्प्राणो ब्रह्मे'ति' कं च तु खं च न विजानामी'त्युपकोसलप्रश्नस्य' यव्द्यापकं तदेव खं यदेव खं तदेव क'मिति तदुत्तरस्य चानन्वयप्रसङ्गात्। न हि 'प्राणो ब्रह्मे'त्यादीनां प्राणादिषु ब्रह्मदृष्टिविधिपरत्वेन वाक्यत्रयरूपतायामाद्यस्य वाक्यस्यार्थं जानामि अन्ययोरर्थं न जानामीति विशिष्य प्रश्नस्यावकाशोऽस्ति। न वा कखशब्दोक्तयोरैक्येनोत्तरं सङ्गच्छते। 'यद्व्यापकं तदेव ख'मिति

वैषयिकसुखे भूताकाशदृष्टिपरं 'यदेव खं तदेव क'मिति भूताकाशे वैषयिकसुखदृष्टिपरमित्येवं योजनायामपि 'कं ब्रह्म" खं ब्रह्मे'त्यनयोरर्थाज्ञानेन पृष्टवन्तं प्रति तदुत्तरत्वेनान्वयो न सङ्गच्छते। न हि कयोश्चिद्विध्योरभिप्रायाज्ञानेन प्रश्नस्य विध्यन्तरवचनमुत्तरं भवति। तस्मादित्थं प्रश्नोत्तरे योजनीये। 'प्राणो ब्रह्मे'ति वाक्यस्यार्थं जानामि। ब्रह्मणि हि सकलजगत्प्राणयितृत्वमुपास्यगुण इत्युपपद्यते। कखशब्दयुक्तवाक्यद्वयार्थं तु न जानामि। यदि हि प्राणत्ववत् कशब्दोक्तसुखरूपत्वं खशब्दोक्तपरमव्योमरूपत्वं चोपास्यगुणान्तरं विवक्षितं स्यात् तदा 'कं ख' मित्येतावदेव वक्तव्यं भवेत्। तथा सति प्राणत्वादिगुणविशिष्टं ब्रह्मोपास्यमित्येकेनेव वाक्येन विहितं भवति। 'कं ब्रह्म खं ब्रह्मे'ति प्रत्येकं ब्रह्मशब्दयोगेन पुनर्वाक्यद्वयं किमर्थम्। प्राणसुखभूताकाशेषु ब्रह्मदृष्टिविधयस्त्रयोऽत्रेति वक्तुं न शक्यते। न हि मोक्षार्थमेकां ब्रह्मविद्यामर्थयमानं मां प्रत्यब्रह्मविद्या बह्वीर्भवंत उपदिशेयुरिति प्रश्नाभिप्रायः। उत्तरस्य त्वयमभिप्रायः। यदि 'प्राणो ब्रह्म कं ख'मित्येतावदुच्येत तदा 'यदेष आकाश आनन्दो न स्या'दितिश्रुतावाकाशानन्दशब्दयोरिव कखशब्दयार्विशेषणविशेष्यभावेनान्वयात् परमव्योमात्मकसुखरूपत्वमेकमेवोपास्यगुण इति लभ्यते। न तु परमव्योमात्मकसुखरूपत्वं सुखात्मकपरमव्योमरूपत्वं चोपास्यगुणद्वयमिति। तथोपास्यगुणद्वयं चेह विवक्षितम्। तल्लाभाय कखशब्दोक्तयोस्सुखपरमव्योम्नोस्स्वातन्त्र्येण ब्रह्मविशेषणत्वं प्रकटयितुं 'कं ब्रह्म खं ब्रह्मे'ति प्रत्येकं ब्रह्मशब्दयुक्तं वाक्यद्वयं कृतम्। यद्यपि तेन वाक्यद्वयेन सुखरूपत्वं परमव्योमरूपत्वं च ब्रह्मणस्स्वतन्त्रं विशेषणद्वयमिति तावदेव लभ्यते न तु तस्य विशेषणद्वयस्य परस्परविशेषितत्वमपि। तथापि 'यव्द्यापकं तदेव खं येदव खं तदेव क'मिति परस्परविशेषितसुखपरमव्योमप्रदर्शकवाक्यद्वयरूपोत्तरवशा'त्कं ब्रह्म खं ब्रह्मे'त्यत्रापि तावत्पर्यन्तविवक्षास्तीत्यवसीयत इति तस्मा'त्कं ब्रह्म खं ब्रह्मे'ति वाक्यद्वयनिर्दिष्टं परं ब्रह्मैव न तु ब्रह्मदृष्टिविशिष्टं वैषयिकं सुखं भूताकाशं च। कखशब्दोक्तयोस्सुखाकाशयोरग्रे परस्परवैशिष्ट्याभिधानाद्वैषयिकसुखभूताकाशयोस्तदसम्भवात्। अस्मिन्नप्यर्थे सूत्रमित्थं पक्षाध्याहारेण योजनीयम्। 'कं ब्रह्मे'तिवाक्यनिर्दिष्टं परं ब्रह्म न तु ब्रह्मदृष्टिविशिष्टं वैषयिकं सुखम्। सुखविशिष्टाभिधानादेव सुखेषु यद्विशिष्टं परमव्योमात्मकं निरतिशयं सुखं तस्य कशब्देनाभिधानादित्यर्थः। तथा'खं ब्रह्मे'ति वाक्यनिर्दिष्टं च परं ब्रह्म न तु तद्दृष्टिविशिष्टो भूताकाशः। सुखविशिष्टाभिधानादेव शोभनं यत्खं सुखात्मकं परमं व्योम तस्य खशब्देनाभिधानादित्यर्थः। एवं सूत्रस्यान्यदपि प्रयोजनद्वयमभिप्रेत्यैव सुखविशिष्टाभिधानादिति गुरु सूत्रं कृतम्। अन्यथा लाघवार्थमत्रधिकरणद्युभ्वाद्यधिकरणयोरिव 'प्रकरणा' दित्येव सूत्रमकरिष्यत। एवकारश्च योजनान्तरविवक्षायामेवार्थवान्। यस्सुखविशिष्टाभिधानादिति हेतुरक्षिपुरुषस्य ब्रह्मत्वे साध्ये स एव हेत्वसिद्धिपरिहारार्थे 'कं ब्रह्म खं ब्रह्मे'त्यत्र निर्दिष्टस्य ब्रह्मत्वे साध्येऽपि हेतुः।

हेतुवाक्यस्यार्थः परं तत्र तत्र भिद्यत इति। एवं प्रश्नोत्तरपर्यालोचनया दृष्टिविध्यसम्भवे सिद्धे सत्युपक्रमानुसारेण 'प्राणं च हास्मै तदाकाशं चोचु'रिति निगमनवाक्यं ब्रह्मण्युपास्यगुणत्रयोपसंहारार्थं न तु ब्रह्मदृष्टयालम्बनत्रयोपसंहारार्थमिति योजनीयम्। प्राणं प्राणत्वगुणविशिष्टं तत्सुखात्मकमाकाशं परमव्योमात्मकं च ब्रह्माग्नय ऊचुरिति तदर्थो वर्णनीयः। ननु माभू'त्कं ब्रह्म खं ब्रह्मे'त्यत्र वैषयिकसुखभूताकाशयोर्ब्रह्मदृष्टिविधानम्। इहाक्षिपुरुषत्वेन शङ्क्यमानस्य प्रतिबिम्बस्यैवारोपितसुखविशेषविशिष्टत्वेन तत्र निर्देशोऽस्त्वित्याशङ्क्याह-**न हीति।** अनारोपितार्थग्रहणे सम्भवत्यारोपितार्थग्रहणमयुक्तमिति भावः। अयमप्यर्थ 'स्सुखविशिष्टाभिधानादेवे' ति सूत्रेणैव लम्भनीयः। अत्र छायापुरुषत्वानुपपत्तौ सौत्रेण चकारेण हेत्वन्तरं समुच्चीयते। यतो मोक्षार्थं ब्रह्मविद्यामर्थयमानाय 'कं ब्रह्मे' त्याद्युपदेशः। अतो नात्र निर्दिष्टः प्रतिबिम्बः किं तु ब्रह्मैवेति। एवं 'कं ब्रह्मे'त्यादौ निर्दिष्टः प्रतिबिम्ब इति शङ्कानिराकरणार्थं चकारसमुच्चितेन हेत्वन्तरेण। तत्र निर्दिष्टो जीव इति शङ्का निराकरणार्थतयोत्तरसूत्रमवतारयति-**यदुक्तमिति।** 'कं ब्रह्मे'त्यादौ निर्दिष्टस्य जीवत्वे निराकृते सत्यक्षिपुरुषस्य पूर्वपक्षिशङ्कितं जीवत्वं निराकृतं भवतीत्यभिप्रेत्य यदुक्तमक्षिपुरुषस्येत्यनुवादः।।सू।। **अत एव स ब्रह्म**।।१६।। **भवभयभीतायेति।** ननु भवभयभीत्या ब्रह्मजिज्ञासुरुपकोसल इति कुतोऽवसीयते। तत्र 'व्याधिभिः परिपूर्णोऽस्मी'त्याचार्यजायां प्रत्युपकोसलवाक्यं सांसारिकेषु विषयेषु व्याधित्वारोपेण संसारनिन्दापरमतोऽयं तथावसीयत इति चेत् न। तत्र व्याधिशब्दस्य बहुकालं गुरुकुलवासेनाप्युपदेशो न लब्ध इति चिन्ताप्रयुक्तव्याधिविशेषपरत्वात्। एवं हि तत्र पूर्वप्रसङ्गः। उपकोसले द्वादशवर्षाण्यग्निपरिचरणपूर्वकं गुरुकुलवासं कृतवत्याचार्ये च तत्सहागतानन्यानन्तेवासिनस्समावर्त्यापि तमसमावर्त्यैव प्रवासोद्युक्ते तं दृष्ट्वा तज्जायया सम्यगयमग्नीनुपकोसलः पर्यचारीदस्मा अनुपदिश्य प्रवासे अग्नय एव त्वां शपेयुरतोऽवश्यमयमुपदिश्य समावर्तनीय इति प्रार्थितेऽपि तदविगणय्य प्रोषिते सत्युपकोसलश्चिन्तापरीतः तत्प्रयुक्तव्याध्यभिभूतः अनश्नन्नेव कञ्चित्कालमग्नीन्परिचचार। तमाचार्यजायोवाच 'ब्रह्मचारिन्नशान किन्नु नाश्नासी'ति। तत्र खल्विदं प्रतिवचनं 'व्याधिभिः परिपूर्णोऽस्मि नाशिष्यामी'ति। अतः प्रक्रमानुसारेणात्र व्याधिशब्दस्य उपदेशालाभप्रयुक्तचिन्ताकृतव्याधिविशेषपरत्वमेव युक्तम्। उच्यते। 'उपकोसलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवासे'त्युपक्रमे तावदुपकोसलस्य ब्रह्मचर्यवासः श्रूयते। स 'त्वेकशतं ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवासे'त्यत्रेव ब्रह्मोपदेशलाभार्थव्रतग्रहणपूर्वकगुरुकुलवासरूपः। न तु वेदग्रहणार्थं प्रसिद्धोपकुर्वाणब्रह्मचर्यवासरूपः। अग्रे वेदोपदेशस्याकीर्तनात् उपासनातत्फलयोरेव कीर्तनात्। तस्माद्ब्रह्मोपदेशार्थगुरुकुलवासलिङ्गादेवायं भवभयभीत्या ब्रह्मजिज्ञासुरवसीयते। अत एवातिचिरं गुरुकुलक्लिष्टायैव ब्रह्मविद्योपदेष्टव्येति मत्वा वेदोपदेशार्थिषु समावर्तितेष्वप्ययमाचार्येण

न समावर्तित इत्यपि सङ्गच्छत इत्याशयः। **किमीदृशेति**। भवभयभीतायोपदेश्यत्वं जीवस्य नोपपद्यत इत्यर्थः। पूर्वं 'कं ब्रह्मे'त्यादि छायापुरुष एव नोपपद्यत इत्युक्तम्। तत्रायमाशयः। 'प्राणो ब्रह्मे'त्येतज्जीवेऽपि प्राणसम्बन्धादुपपद्यते। 'कं ब्रह्म खं ब्रह्मे'त्येतच्च यत्किञ्चिद्धर्मावलम्बनभूताकाशसाम्यवल्लौकिकसुखसम्बन्धादुपपद्यत इति। अत एव पूर्वसूत्रे चशब्दसमुच्चित एव हेतुरस्मिन्सूत्रे सर्वनाम्ना परामर्शनीयत्वेन व्याख्यातः। इदानीमभ्युपगमवादं त्यक्त्वा वस्तुतः 'कं ब्रह्मे'त्यादि जीवेऽपि नोपपद्यत इत्याह-**न हि जीव इति**।। खशब्देन परमाकाशवाचिना भूताकाशवदनवच्छिन्नत्वलक्षकेण वा विशेषणात् सुखं निरतिशयमिति लभ्यते। अन्यथा लौकिकसुखसाधारण्ये खशब्दोपात्तविशेषणवैयर्थ्यापत्तेः। तथाभूतं सुखं न जीवे सम्भवतीत्यर्थः। नन्वस्तु'कं ब्रह्मे'त्यादौ निर्दिष्टं परं ब्रह्म। तथापि वक्तृभेदादग्निविद्याव्यवधानाच्च तत्प्रकरणाननुवृत्तेरक्षिपुरुषो जीवः प्रतिबिम्बो वा स्यादित्याशङ्कानिराकरणायाह-**अत इति। अयमाशयः**। वक्तृभेदस्तावन्न प्रकरणविच्छेदकः। 'आचार्यस्तु ते गतिं वक्ते'ति वाक्येन आचार्यवचनजातं न स्वातन्त्र्येण किञ्चिदुपदेशार्थं प्रवृत्तं किं त्वग्न्युपदिष्टावशेषितपूरणार्थमेव प्रवृत्तमित्यवगमात्। नन्वग्निभिर्गतिमात्रस्याचार्येण वक्तव्यतयावशेषितत्वात् प्रकृतस्य ब्रह्मणस्स्थानस्य गुणजातस्य च वक्तव्यत्वेनानवशेषितत्वात् अग्न्युपदष्टियां ब्रह्मविद्यायां देवयानगतिमात्रस्यान्वयो भवेत् न त्वक्षिवाक्यार्थस्य। तथापि सर्वनाम्नः प्रकृतपरामर्शित्वस्वाभाव्यादक्षिपुरुषः प्रकृतं ब्रह्म भवेदिति चेन्न। अत्रैव गार्हपत्यादिविद्यासु 'य एष' इति पदानां प्रकृतब्रह्मपरामर्शित्वाभावदर्शनात्। य 'द्येषा सोम्य ते अस्मद्विद्या चात्मविद्या चे' त्यग्निभिस्स्वविद्यानामात्मविद्यायाश्च भेदेन कीर्तितत्वात् तत्र सर्वनाम्नः प्रकृतपरामर्शित्वं त्यक्तव्यं तर्ह्यत्रापि गतिमात्रस्यावशेषिंतत्वाद्विद्याया निरपेक्षमुपदिष्टत्वेनोपसंहृतत्वाच्च तस्य प्रकृतपरत्वं त्यक्तव्यमिति तुल्यम्। अक्षिविद्यायाः प्रकृतब्रह्मविद्यातः पात्नीवतपशुयागात्तदनन्तरश्रुताज्ययागस्येव भिन्नत्वेऽप्यक्षिविद्याया गतिरेव प्रकृतब्रह्मविद्याया अपीत्यभिप्रायेणा 'चार्यस्तु ते गतिं वक्ते' ति वचनोपपत्तेरिति चेत् उच्यते। 'आचार्यस्तु ते गतिं वक्ते' त्यत्र गतिशब्दः करणव्युत्पत्त्या देवयानमार्गपरो न भवति। किं तु कर्मव्युत्पत्त्या प्रकृतब्रह्मविद्याफलपरः। प्रथमं फल एवाकाङ्क्षोदयात्। लोकान्तरभोग्यफल-निर्देशानन्तरमेव तत्प्राप्त्युपायमार्गाकाङ्क्षोदयौचित्यात्। न च प्राक् ब्रह्मविद्यायाः फलं निर्दिष्टं तदङ्गभूतानामग्निविद्यानामेव हि परं 'लोकीभवती'त्यादिना फलमर्थवादेन वर्णितम्। अत एवाचार्यो 'लोकान्वाव किल सोम्य तेऽवोचन् अहं तु ते तद्वक्ष्यामी'त्यग्नयः स्वविद्याफलभूतानग्निलोकादीनेवावोचन् न तु ब्रह्मविद्याया महत्फलं तदहं वक्ष्यामीति प्रतिजज्ञे। तस्मात्ततः प्रभृति यद्यावदाचार्यवाक्यं 'मानवमावर्तं नावर्तन्त' इत्येतत्पर्यन्तं तत्सर्वमग्न्यवशेषितफल-रूपगत्यभिधानमेव। तथाहि-प्रथमं तावत्पुष्करपलाशवाक्यं फलवर्णनात्मकमिति निर्विवादम्।

तदुपपादक: तदनन्तरमक्षिस्थानोपदेश:। यदक्षिस्थानोपदेशानन्तरमक्षिस्थानिनो माहात्म्येनैव सर्पिरुदकाद्यश्लेषं वर्णयति तेन सकलपापश्लेषविदूरं स्वोचितेऽक्षिस्थाने विद्यमानं ब्रह्मोपासनीयमिति विधिर्लभ्यमानस्तत्क्रतुन्यायेन वर्णितफलोपपादको भवति। सलेपेऽप्यक्षिण स्थानिमहात्म्यायत्तसर्पिरादिलेपराहित्योक्ति: स्तुतिमात्रमिति तत: स्थानिनो निर्लेपत्वासिद्धे: न तस्य फलोपपादकत्वमिति चेन्न। तस्यास्स्तुतित्वेऽपि हि तथाभूतस्तुतिद्वारतया श्रुत्यन्तरेषु निर्लेपत्वेन प्रसिद्धस्य परमात्मन एव स्थानितया ग्रहणं प्राप्नोति। यथा 'द्वयो: प्रणयन्ति तस्माद्द्वाभ्यामेती' त्यत्र 'प्रणयनवतोर्द्वयो: पर्वणो: महिम्ना चातुर्मास्याख्यो यज्ञ एव गच्छती' ति हेतुहेतुमद्भाववर्णनस्य स्तुतित्वेऽपि स्तुतिनिर्वाहकतया 'ऊरू वा एतौ यज्ञस्य यद्वरुणप्रधासास्साकमेधाश्चे' त्यर्थवादान्तरे ऊरुत्वेन संस्तुतयोर्वरुणप्रघाससाकमेधपर्वणोरेव द्वयोरिति शब्दार्थतया ग्रहणम्। एवं 'सर्वाण्येवैनं वामान्यभिसंयन्ति य एवं वेद सर्वाणि वामानि नयति य एवं वेद सर्वेषु लोकेषु भाति य एवं वेदे'ति वाक्यान्यपि फलवर्णनात्मकानि। आद्येन वाक्येन हि सङ्कल्पमात्रसाध्यनिखिलाभिमतवस्तुप्राप्तिमत्त्वं दहरविद्यायां ब्रह्मविद्याफलत्वेन प्रसिद्धं वर्ण्यते। द्वितीयवाक्येन स्वभक्तेष्टसकलवस्तुप्रापकत्वं 'यं यं लोकं मनसा संविभाति'इत्यादिश्रुतौ तत्फलत्वेन प्रसिद्धं वर्ण्यते। तृतीयवाक्येन 'स स्वाराड्भवति तेषां सर्वेषु लोकेषु कामचारो भवती'त्यादिश्रुतिप्रसिद्धं तत्फलं वर्ण्यते। तत्तत्फलोपपादकत्वेन च तत्तद्वाक्येभ्य: प्राक् ब्रह्मण: संयद्वामत्ववामनीत्वभामनीत्वगुणा विधीयन्ते। अग्रे 'इमं मानवमावर्तं नावर्तन्त' इति ब्रह्मप्राप्त्यनन्तरमानावृत्तिलक्षणं फलं वर्ण्यते। तच्चामृतत्वाभ्यत्वविशिष्टतया 'अथ मर्त्योऽमृतो भवति। अथ सोऽभयं गतो भवती' त्यादिश्रुतिषु प्रसिद्धमिति तदुपपादकत्वेनामृतत्वाभयत्वगुणौ विधीयेते। एवमाचार्यस्सोपपादकं फलं वक्ष्यति फलोपपादकत्वेनैव स्थानगुणविधानमपि लप्स्यत इति कृत्स्नस्याप्याचार्यवाक्यस्य सोपपादकफलप्रदर्शनपरत्वमभिप्रेत्य 'आचार्यस्तु ते गतिं वक्ते'त्यत्र गतिमात्राभिधानपरिशेष: कृत:। तदतिरेकेण विद्या चोपदिष्टत्वेनोपसंहृतेति सर्वं सङ्गच्छते। यदि'त्वाचार्यस्तु ते गतिं वक्ते'त्यत्र गतिशब्दो देवयानमार्गपर: तदापि सङ्गच्छत एव। तदा हि गतिशब्दो मार्गस्योपदेश्यत्वाभिप्रायो न वर्णनीय:। अत्र मार्गस्यानुपदेशेऽपि दहरवैश्वानरविद्यादिष्विव 'अनियमस्सर्वेषा' (ब्र० ३.३.३२ सू०) मित्यधिकरणे प्रदर्शयिष्यमाणेन न्यायेन पञ्चाग्निविद्योपदिष्टस्यैव तस्य प्राप्तिसम्भवात्। किं तु मार्गानुबन्धिनां विद्यान्तरसाधारणैतद्विद्यामात्रासाधारणरूपाणां केषाञ्चिद्विशेषाणामुपदेश्यत्वाभिप्रायो वर्णनीय:। तत्रै 'तेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्त' इति विद्यान्तरसाधारण: पञ्चाग्निविद्यायामनुपदिष्टो विशेष:। 'अथ यदु चैवास्मिन्शव्यं कुर्वन्ति यदु च नार्चिषमेवाभिसंयंतीत्ये'तद्विद्यामात्रासाधारणो विशेष:। अस्य ह्ययमर्थ:। अस्मिन्नक्षिपुरुषोपासके मृते पुत्रादयश्शवकर्म पैतृमेधिकसंस्कारादिकं यदि कुर्वन्ति, यदि वा न कुर्वन्ति, उभयथापि तस्यार्चिरादिगतिप्राप्तिरवश्यंभाविनीति। अनेन

विद्यान्तरोपासकानां शवकर्माकरणेऽर्चिरादिगतिप्राप्तौ कञ्चित्कालं प्रतिबन्ध उन्नीयते इत्यक्षिविद्यायामयमसाधारणो विशेषः। एवमेवाक्षिस्थानं संयद्वामत्वादिगुणजातमपि तस्यामसाधारणे विशेष इति तस्यापि देवयानमार्गप्राप्यफलोपपादकत्वेन तदनुबन्धित्वात् गतिशब्देन परिग्रहोऽस्तीति न काचिदसङ्गतिः। सर्वोऽप्ययमर्थः 'श्रुतोपनिषत्कगत्यभिधाना'दित्युत्तरसूत्रेण विवक्षितः। तत्राद्यपरिहारे श्रुतोपनिषत्कस्य श्रुतसुखाकाशरूपब्रह्मण उपकोसलस्याचार्यवक्तव्यत्वेनाग्निभिरवशेषिताया: फलरूपाया गतेः कृत्स्नेनाप्याचार्यवाक्येनाभिधानात्तत्प्रकरणविच्छेदाशङ्का न कार्येत्यर्थः। द्वितीयपरिहारे गतेरित्यस्य मार्गरूपगत्यनुबन्धिविशेषणमित्यर्थ इति विशेषः। तस्माद्वक्तृभेदेन तावन्न प्रकरणविच्छेदशङ्कावकाशः। अत एव नाग्निविद्याभिर्व्यवधानेनापि वक्तृभेद इति तद्वत विद्यान्तरव्यवधानेना'प्याचार्यस्तु त'इति वाक्यापादितस्य एकवाक्यत्वस्य क्षत्यसम्भवात्। किं चाग्निविद्यानां प्रकृतब्रह्मविद्याङ्गत्वादपि न व्यवधायकत्वं तदङ्गत्वं च तदुपक्रमोपसंहारमध्यपातित्वा'दथहैन'मिति पूर्वप्रकृतापेक्षावाचकेनाथशब्देनाग्निविद्यानां ब्रह्मविद्यायाश्च सम्बन्धावगमाच्च सिद्ध्यति। न चा'पहते पापकृत्या'मित्यादिना फलान्तरप्रतिपादनादङ्गत्वासम्भवः। तेषां वाक्यानां ब्रह्मविद्यायामग्निविद्यानामङ्गतायां द्वारप्रदर्शनार्थतया तदंगानुगुणत्वात्। तथा हि 'अपहते पापकृत्या'मिति वाक्येन तासां ब्रह्मोपासनानुवृत्तिप्रतिबन्धकदुरितनिवृत्तिकत्वमुच्येत। 'लोकीभवती'तिवाक्येन'स एवैनं देवयानं पन्थानमासाद्याग्निलोकमागच्छती'त्यादिश्रुतिष्वर्चिरादिमार्गे प्रथमपर्वत्वेन श्रुताग्निलोकप्रापकत्वमुच्यते। अग्न्युपासनानामग्निलोकप्राप्तिफलकत्वौचित्यात्। यद्यपि ब्रह्मोपासन एवार्चिरादिपर्वप्राप्तिर्लभ्यत इति तदर्थं नोपासनान्तरमपेक्ष्यते। तथापि विदुषो देहपातानन्तरमेवार्चिरादिगतिप्राप्तौ प्रतिबन्धकसद्भावेऽपि तत्तिरस्कृत्य तदानीमेव तत्प्रापकत्वमनेनोच्यते। ततश्चाग्निविद्यारूपाङ्गविशेषानुग्रहप्रयुक्त एवार्थोऽ'थ यदुचैवास्मिन्नि'त्यादिना प्रदर्श्यत इति तदपि वाक्यमुपपन्नतरं भवति। 'सर्वमायुरेती'ति वाक्येन ब्रह्मोपासनायास्साक्षात्कारपर्यन्तत्वसिद्धये यावदायुरपेक्षितं तस्य सर्वस्य प्राप्तिरुच्यते। 'ज्योग्जीवती'ति वाक्येन 'आप्रायणमहरहरनुवर्तनीयायामुपासनायां प्रत्यहं प्रवृत्तौ प्रतिबन्धकानामर्थप्राप्तिरोग-निवृत्त्याद्युपायचिन्ताक्लेशानामप्रासङ्गाय ज्योगुज्वलं धनधान्यादिसमृद्धं रोगानभिभूतं च जीवनमुच्यते। 'नास्यावरपुरुषाः क्षीयन्त'इति वाक्येन 'नास्याब्रह्मवित्कुले भवती'ति श्रुत्यन्तरे ब्रह्मविद्याफलत्वेन प्रसिद्धस्य पुत्रपौत्रादीनां ब्रह्मवित्त्वस्यानुगुणं तेषां सत्कर्मभिरक्षीणत्वमुच्यते। 'उप वयं तं भुञ्जाम' इति वाक्येन ब्रह्मोपासनारम्भप्रभृति ब्रह्मप्राप्तिपर्यन्तं मध्येसम्भावितसकलविघ्ननिवारणेनाग्नीनां समीपे सन्निधायोपासकपरिपालकत्वमुच्यते। एवं ब्रह्मविद्याफलानुगुणफलकत्वेन तदङ्गत्वादपि नाग्निविद्याना व्यवधायकत्वम्। अतः प्रकरणानुवृत्तेरसन्दिग्धतया 'य एष' इति सर्वनाम्नोर्बाधकाभावेन प्रकृतब्रह्मपरामर्शित्वा'देतद्ब्रह्मे'ति वाक्येन प्रकृतब्रह्मरूपताप्रत्यभिज्ञानाच्चाक्षिपुरुषः प्रकृतं परमेव

ब्रह्मेति।। उत्तरसूत्रमवतारयति-**पूर्वपक्ष इति**।। पूर्वपक्षद्वय इत्यर्थः। यद्यपि पूर्वपक्षद्वयनिराकरणार्थं सूत्रं तदर्थसूत्रान्तरसङ्गतमेकैकपूर्वपक्षनिराकरणार्थसूत्रद्वयात्प्रागेव कर्तव्यं तथापि गतिमात्राभिधानपरिशेषात् स्थानगुणाभिधानं न प्रकृतब्रह्मविद्यान्वयीति शङ्कावारणार्थमनेन सूत्रेणार्थान्तरस्यापि विवक्षितत्वात्तदर्थसङ्गत्यात्र कृतम्।।सू०।। **श्रुतोपनिषत्कगत्यभिधानाच्च**।।१७।। जीवगतागत-चिन्तकानां वचनबलाद्भवन्त्यप्यर्चिरादिगतिर्ब्रह्मविदामेवेत्युत्सर्गो बाधकाभावान्नापवाद्यत इति भावः। अत्र ब्रह्मश्रुत्यादीनामितिशब्दशिरस्कत्वेनाविवक्षितार्थत्वशङ्काकुलितत्वाद्ब्रह्मप्रकरणानुबन्धस्य सतोऽपि मार्गाभिधानमात्रविषयत्वशङ्काक्रान्तत्वान्नातिस्पष्टतेति पादसङ्गतिः।।

इति शिवार्कमणिदीपिका चतुर्थमन्तराधिकरणम् समाप्तम्

अथ अन्तर्याम्यधिकरणम् ॥ सू॰ १८–२० ॥

शाङ्करभाष्यम्

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्।।१८।। ''य इमं च लोकं पर च लोकं सर्वाणि च भूतानि योऽन्तरो यमयती'' त्युपक्रम्य श्रूयते–''यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो य पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृत'' (बृह॰ ३/७/१/२) इत्यादि। अत्राधिदैवतमधिलोकमधिवेदमधियज्ञमधिभूतमध्यात्मं च कश्चिदन्तरवस्थितो यमयिताऽन्तर्यामीति श्रूयते। स किमधिदैवाद्यभिमानी देवतात्मा कश्चित्, किं वा प्राप्ताणिमाद्यैश्वर्यः कश्चिद्योगी, किं वा परमात्मा, किंवाऽर्थान्तरं किंचित्, इत्यपूर्वसंज्ञादर्शनात्संशयः।।

किं तावन्नः प्रतिभाति? संज्ञाया अप्रसिद्धत्वात्संज्ञिनाऽप्यप्रसिद्धेनार्थान्तरेण केनचिद्भवितव्यभिति। अथवा–नानिरूपितरूपमर्थान्तरं शक्यमस्त्यभ्युपगन्तुम्। अन्तर्यामिशब्दश्चान्तर्यमनयोगेन प्रवृत्तो नात्यन्तमप्रसिद्धः। तस्मात् पृथिव्याद्यभिमानी कश्चिद् देवोऽन्तर्यामी स्यात्। तथाच श्रूयते–''पृथिव्येव यस्यायतनमग्निर्लोको मनो ज्योतिरि'' (बृह॰ ३/९/१०) त्यादि। स च कार्यकरणवत्त्वात्पृथिव्यादीनन्तस्तिष्ठन् यमयति, इति युक्तं देवतात्मनो यमयितृत्वम्। योगिनो वा कस्यचित्सिद्धस्य सर्वानुप्रवेशेन यमयितृत्वं स्यात्, न तु परमात्मा प्रतीयेत; अकार्यकरणत्वादिति।।

एवं प्राप्त इदमुच्यते–योऽन्तर्याम्यधिदैवादिषु श्रूयते, स परमात्मैव स्यात्,नान्य इति। कुतः? *तद्धर्मव्यपदेशात्*।। तस्य हि परमात्मनो धर्मा इह निर्दिश्यमाना दृश्यन्ते। पृथिव्यादि तावदधिदैवादिभेदभिन्नं समस्तं विकारजातमन्तस्तिष्ठन्यमयतीति परमात्मनो यमयितृत्वं धर्म उपपद्यते; सर्वविकारकारणत्वे सति सर्वशक्त्युपपत्तेः। ''एष त आत्माऽन्तर्याम्यमृत'' इति चात्मत्वामृतत्वे मुख्ये परमात्मन उपपद्येते। ''यं पृथिवी न वेदे'' ति च पृथिवीदेवताया अविज्ञेयमन्तर्यामिणं ब्रुवन् देवतात्मनोऽन्यमन्तर्यामिणं दर्शयति। पृथिवी देवता ह्यहमस्मि पृथिवीत्यात्मानां विजानीयात्। तथा हि–''अदृष्टोऽश्रुत'' इत्यादिव्यपदेशो रूपादिविहीनत्वात्परमात्मन उपपद्यत इति।।

यत्तु–अकार्यकरणस्य परमात्मनो यमयितृत्वं नोपपद्यते–इति, नैष दोषः ; यन्नियच्छति, तत्कार्यकरणैरेव तस्य कार्यकरणोपपत्तेः। तस्याप्यन्यो नियन्तेत्यनवस्थादोषश्च न सभवति; भेदाभावात्। भेदे हि सत्यनवस्थोपपत्तिः। तस्मात्परमात्मैवाऽन्तर्यामी॥१८॥

न च स्मार्तमतद्धर्माभिलापात्॥१९॥ स्यादेतत्–अदृष्टत्वादयो धर्माः साङ्ख्यस्मृतिकल्पितस्य प्रधानस्याप्युपपद्यन्ते; रूपादिहीनतया तस्य तैरभ्युपगमात्, ''अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वत'' (मनु० १/५) इति हि स्मरन्ति। तस्यापि नियन्तृत्वं सर्वविकारकारणत्वादुपपद्यते। तस्मात्प्रधानमन्तर्यामिशब्दं स्यात्॥

''ईक्षतेर्नाशब्दम्'' (ब्र० १/१/५) इत्यत्र निराकृतमपि सत् प्रधानमिहाद्रष्टत्वादिव्यपदेशसंभवेन पुनराशङ्क्यते। अत उत्तरमुच्यते–न च स्मार्तं प्रधानमन्तर्यामिशब्दं भवितुमर्हति। कस्मात्? *अतद्धर्माभिलापात्*॥ यद्यप्यदृष्टत्वादिव्यपदेशः प्रधानस्य सम्भवति; तथापि न द्रष्टृत्वादिव्यपदेशः सम्भवति; प्रधानस्याचेतनत्वेन तैरभ्युपगमात्। ''अदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाते'' (बृह० ३/७/२३) ति हि वाक्यशेष इह भवति। आत्मत्वमंपि न प्रधानस्योपपद्यते॥१९॥

यदि प्रधानमात्मत्वद्रष्टृत्वाद्यसंभवान्नान्तर्याम्यभ्युपगम्यते, शारीरस्तर्ह्यन्तर्यामी भवतु। शारीरो हि चेतनत्वाद् द्रष्टा श्रोता मन्ता विज्ञाता च भवति। आत्मा च प्रत्यक्त्वात्। अमृतश्च धर्माधर्मफलोपभोगोपपत्तेः। अद्रष्टत्वादयश्च धर्माः शारीरे प्रसिद्धाः ; दर्शनादिक्रियायाः कर्तरि प्रवृत्तिविरोधात्, ''न दृष्टेर्द्रष्टारं पश्येरि'' (बृ० ३/४/२) त्यादिश्रुतिभ्यश्च। तस्य च कार्यकरणसङ्घातमन्तर्यमयितुं शीलम्; भोक्तृत्वात्। तस्माच्छारीरोऽन्तयामाति॥

अत उत्तरं पठति–*शारीरश्चोभयेऽपि हि भेदेनैनमधीयते*॥२०॥ नेति पूर्वसूत्रादनुवर्तते। शारीरश्च नान्तर्यामीष्यते। कस्मात्? यद्यपि द्रष्टृत्वादयो धर्मास्तस्य संभवन्ति; तथापि घटाकाशवदुपाधिपरिच्छिन्नत्वान्न कात्स्न्येंन पृथिव्यादिष्वन्तरवस्थातुं नियन्तुं च शन्कोति। अपि चोभयेऽपि हि शाखिनः काण्वा माध्यन्दिनाश्चान्तर्यामिणो भेदेनैनं शारीरं पृथिव्यादिवदधिष्ठानत्वेन नियम्यत्वेन चाधीयते। ''यो विज्ञाने तिष्ठन्'' (बृ० ३/७/२२) इति काण्वाः, ''य आत्मनि तिष्ठन्'' इति माध्यन्दिनाः। ''य आत्मनि तिष्ठन्'' इत्यस्मिंस्तावत्पाठे भवत्यात्मशब्दः शारीरस्य वाचकः। ''यो विज्ञाने तिष्ठन्'' इत्यस्मिन्नपि पाठे विज्ञानशब्देन शारीर उच्यते। विज्ञानमयो हि शारीरः। तसमाच्छारीरादन्य ईश्वरोऽन्तर्यामीति सिद्धम्। कथं पुनरेकस्मिन्देहे द्वौ द्रष्टारावुपपद्येते–यश्चायमीश्वरोऽन्तर्यामी, यश्चायमितरः शारीरः? का पुनरिहानुपपत्तिः? ''नान्योऽतोऽस्ति द्रष्टे'' त्यादि श्रुतिवचनं विरुध्येत। अत्र हि प्रकृतादन्तर्यामिणोऽन्यं द्रष्टारम्,

श्रोतारम्, मन्तारम्, विज्ञातारं प्रतिषेधति? नियन्त्रन्तरप्रतिषेधार्थमेतद्वचनमिति चेत्, न; नियन्त्रन्तराप्रसङ्गात्,अविशेषश्रवणाच्च।।

अत्रोच्यते–अविद्याप्रत्युपस्थापितकार्यकरणोपाधिनिमित्तोऽयं शारीरान्तर्यामिणोर्भेदव्यपदेशः, न पारमार्थिकः। एको हि प्रत्यगात्मा भवति, न द्वौ प्रत्यगात्मानौ संभवतः। एकस्यैव तु भेदव्यवहार उपाधिकृतः–यथा घटाकाशो महाकाश इति। ततश्च ज्ञातृज्ञेयादिभेदश्रुतयः प्रत्यक्षादीनि च प्रमाणाणि संसारानुभवो विधिप्रतिषेधशास्त्रं चेति सर्वमेतदुपपद्यते। तथाच श्रुतिः–''यत्र हि द्वैतमिव भवति तदितर इतरं पश्यती'' त्यविद्याविषये सर्वं व्यवहारं दर्शयति। ''यत्र त्वस्य सर्वमात्मैवाभूतत्केन कं पश्येदि'' ति विद्याविषये सर्वं व्यवहारं वारयति।।२०।।

इति शाङ्करभाष्यम् पञ्चममन्तर्याम्यधिकरणम् समाप्तम्

वार्तिकम्

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्।।१८।। पूर्वाधिकरणेन तावत् सर्वगतस्य ब्रह्मणो नाक्षिस्थानत्वोपपत्तिरित्याशङ्कायां ''स्थानादिव्यपदेशाच्चे'' त्यनेन सर्वगतस्यापि ब्रह्मणोऽन्यत्र-''यः पृथिव्यां तिष्ठन्नि'' त्यादिना पृथिव्यादिस्थानव्यपदेशदर्शनाद् इहापि तद्वदक्षिस्थानत्वव्यपदेशो-पयत्तिरित्युक्तम्। तत्र पृथिव्यादिस्थानत्वमप्यन्तर्यामिब्राह्मणे ब्रह्मणोऽसिद्धम्, तदन्तर्यामित्वेन तत्र ब्रह्मणोऽर्थान्तरस्य परिग्रहात्, इति पूर्वाक्षेपेणास्याधिकरणस्य प्रवृत्तिः।।

तत्रैतत् सन्दिह्यते-''एष त आत्माऽन्तर्याम्यमृत'' इत्यत्र किमन्तर्यामिशब्दोऽश्ववाला-दिशब्दवद्रूढया स्वार्थमभिधत्ते, किं वा पाचकादिशब्दवद् योगेन। तत्र यद्याद्यः, तदा लोकेऽन्तर्यामीतिसंज्ञायाः कस्मिँश्चिदप्यर्थेऽप्रसिद्धत्वाद् श्रूपाहवनीयादिवत् संज्ञिनाऽप्यप्रसिद्धेन केनचिदर्थान्तरेण भवितव्यम्। तथाच तदेव पृथिव्यादिशरीरमन्तर्यामि, न ब्रह्मेति सिद्धयति। द्वितीयेऽपि किं सशरीरस्यन्तर्यामित्वमुच्यते, किं वाऽशरीरस्य। यदा सशरीरस्य, तदा किं क्षेत्रज्ञस्य, किं वा देवतात्मनः, उत योगसिद्धस्य कस्यचित्। द्वितीयेऽपि परकल्पितप्रधानस्य, किं वा ब्रह्मण इति। एते पक्षा यथास्थानं चिन्तयिष्यन्ते। तत्र क्षेत्रज्ञप्रधानपक्षयोः सक्षाद् वक्ष्यमाणसूत्रारूढत्वेन स्पष्टत्वाद् न तौ संशयमध्ये भाष्यकारेणोपात्तौ। यद्वा-पृथिव्याद्यभिमानिदेवतापक्षपरिग्रहेणैव क्षेत्रज्ञपक्षः परिगृहीतः ; तस्या अपि क्षेत्रज्ञत्वात्, अर्थान्तरपरिग्रहेण च प्रधानपक्षः, इति न किञ्चदमनुपपन्नम्।।

चरमोपात्तमपि रूढिपखमर्थानुसारेण प्रथममाशङ्कते-*संज्ञाया अप्रसिद्धत्वादिति*।। यूपाहवनीयादिवदित्याशयः। ''निर्मन्थ्येनेष्टकाः पचन्ती'' त्यत्र निर्मन्थ्यपशब्दवत् कृतावयवशक्ति-हारेणान्तर्यामिशब्दस्य प्रसिद्धार्थत्वोपपत्तौ समुदायशक्तिकल्पनयाऽनिरूपितस्वरूपार्थान्तरास्तित्व-कल्पनस्य प्रमाणाभावेन कर्तुमशक्यत्वाद् योगवृत्तिरेवात्रोपास्येति पूर्वपक्षं हित्वा पक्षान्तरमादत्ते-*अथवा नानि रूपितरूपमिति*।। योगपक्षेऽपि सशरीस्यैव तक्षादेः स्वशरीरेन्द्रियवास्यादि नियमदर्शनादत्रापि सशरीरेण पृथिव्यादिनियन्त्रा भवितव्यम्। स च पृथिव्याद्यभिमान्यग्न्यादिदेव एव

स्यात्। तथाच श्रुतिः-"पृथिव्येव यस्यायतनमग्निर्लोक" इत्यादिः। यदि ब्रूयादग्न्यादिदेवतात्मनः प्रत्येकं पृथिव्याद्यधिष्ठानतया सर्वनियन्तृत्वं नोपपद्यत इति, तर्हि योगी कश्चिदणिमाद्यैश्वर्य-युक्तोऽत्रान्तर्याम्यस्तु; तस्यैश्वर्यवशेनं सर्वान्तर्यामित्वोपपत्तेः, अदृष्टाश्रुतत्वाद्युपपत्तेश्च, न परमात्मा; अशरीरत्वादिति पूर्वपक्षमाह= *तस्मादिति*।। योगवृत्तिबलादित्यर्थः।।

सूत्रपदानि पूरयित्वा व्याचष्टे- *योऽन्तर्याम्यधिदैवादिषु श्रयत इति*।। "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेदे" त्यादिना "यस्तनयित्नौ तिष्ठन्नि" त्यन्तेनाधिदेवे "यः सर्वेषु लोकेष्वि" त्यादिनाधिलोके, "यः सर्वेषु वेदेष्वि" त्यादिनाऽधिवेदे, "यः सर्वेषु भूतेष्वि" दिनाऽधिभूते, "यः प्राणेष्वि" त्यादिना "यः आत्मनि तिष्ठन्नि" त्यन्तेन प्राणाद्यत्मान्ते चाध्यात्मे योऽयमेकवचननिर्देशात् सर्वत्र प्रत्यभिज्ञायमानत्वाच्चैकोऽन्तर्यामी श्रूयते, स परामात्मैव स्यात्, नान्य इति प्रतिज्ञावाक्ययोजना। तथाचैकस्याधिदैवादिष्वन्तर्यामिणः सिद्धत्वात् सर्वान्तर्यामित्वलक्षण-परमात्मधर्मव्यपदेशप्रदर्शनमुपपद्यते; अन्यथा तदसिद्धेरितिं।।

ननु-परमात्मनोऽपि देवतात्मादिवदसामर्थ्याद् न सर्वनियन्तृत्वमुपपद्यते, न हि तस्यापि सर्वनियमनसामर्थ्यास्तित्वे किञ्चित् प्रमाणमस्तीति-चेत्, नेत्याह- *सर्वविकारकारणत्वे सति सर्वशक्तयुपपत्तेरिति*।। *एष त इति*।। अनिर्वचनीवदेवताधिकार आत्मत्वामृतत्वयोरापेक्षिक-त्वेनामुख्यत्वादित्याशयः। "तं दुर्दर्शं गूढमनुप्रविष्टमि" ति श्रुत्यन्तरात् पृथिव्यादिदेवता-दुर्विज्ञेयत्वमपि परमात्मलिङ्गमित्याह- *यं पृथिवी न वेदेति चेति*।। अत्र पृथिवीशब्देन तदभिमानिदेवताभिधानादित्याशयः। देवतान्यत्वे हेतुः- *पृथिवी देवता हीति*।। "न हि दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं श्रृणुया" इति श्रुत्यन्तरादिदमपि परमात्मलिङ्गमित्याह- *तथा हि-"अदृष्टोऽश्रुत" इत्यादिव्यपदेश इति*।।

पूर्वपक्षवीजमनुभाष्य दूषयति- *यत्त्वित्यादिना*।। इदमत्राकूतम्-किं तक्षादिदृष्टान्तेन सर्वनियन्तुरपि ब्रह्मणः कार्यकरणवत्त्वं साध्यते, किं वा-"अप्राणो ह्यमना" इत्यादिश्रुतेर्ब्रह्मणस्तदभावात् तक्षादिवैलक्षण्येन तन्नियन्तृत्वाभाव इति। तत्र न तावदन्त्यः ; "सर्वस्य बशी सर्वस्येशान" "सर्वमयं प्रशास्ती" त्यादिश्रुतिविरोधेन कालात्ययादिष्टत्वादित्यभिप्रेत्याह- *नैप दोष इति*।। आद्येऽपि किं कार्यकरणवत्त्वमात्रम्, किं वा तक्षादिवदेव। नान्त्यः ; तेन सर्वनियमनासंभवात्, अनवस्थाप्रसङ्गाच्च-पृथिव्यादिवत् सोऽप्यन्येन नियमयति, पुनः सोऽप्यन्येनेत्यनवस्था। आद्यपक्षस्तु ब्रह्मणि न विरुद्धयत इत्याह- *यान् नियच्छति, तत्कार्यकरणैरैव तस्य कार्यकरणौपपत्तेरिति*।। यान्=पृथिव्यादिदेवताप्रभृतीन, ब्रह्मनियच्छति, तत्कार्यकरणैः तथकार्यकरणैः=पृथिव्यादिभिरेव, तस्य=ब्रह्मणः, कार्यकरणवत्त्वोपपत्तेरित्यर्थः। तथाच "यस्य पृथिवी

शरीरमि'' त्यादिश्रुतेर्नानिष्टप्रसक्तिरिति भावः। ननु–यस्तावत् पृथिव्यादिकार्यकरणाद्यात्माभिमानी क्षेत्रज्ञः, स तावद् भोक्तृत्वात् तदध्यक्षत्वाच्च नियन्ता वाच्यः ; अन्यथा भोक्तृत्वाद्यनुपपत्तेः। एवं सति तेनैव तन्नियमनसिद्धौ नियन्त्रन्तरकल्पनं व्यर्थं स्यात्। न व्यर्थम्; सर्वकार्यकरणनियमनार्थत्वात्, तदध्यक्षस्य नियन्तुर्नियमनार्थत्वाच्च; ''यश्चात्मनि तिष्ठन्नात्मानमन्तरो यमयती'' ति श्रुतेरिति–चेत्, एवं तर्हि मा भूत् कार्यकरणसङ्घातमादायानवस्था; तत्कार्यकरणैरेव तन्नियमनात्। नियन्त्रनवस्था तु भविष्यति; नियन्तुरपि नियमनाभ्युपगमे तस्या दुष्परिहरत्वादिति, नेत्याह–*तस्याप्यन्यो नियन्तेत्यनवस्था दोषश्च न संभवति भेदाभावादिति*।। एतदेव विशदयति–*भेदे हि सत्यनवस्थोपपत्तिरिति*।। आपत्तिरित्यर्थः।।

अयमभिप्रायः–तव मते ह्यनवस्था दोषः स्यात् ; देवतात्मनो योगिनो वा क्षेत्रज्ञात्मनो भिन्नत्वात्, स्वस्य क्षेत्रज्ञत्वाविशेषेण कार्योपाधित्वाविशेषेण च स्वातन्त्र्यानर्हत्वाद् नियन्त्रन्तरापेक्षत्वात्, अस्मन्मते तु नायं दोषः ; ब्रह्मणः सर्वाभेदात्। न चैवं नियम्यसर्वाभेदे ब्रह्मणो न नियन्तृत्वोपपत्तिः; कार्यकारणोपाधिभेदेन मृदादेरिव घटशरावादेरभेदेऽपि नियम्यनियामकभावाविरोधात्, कारणोपाधेरविद्यायाश्चानादित्वादित्युक्तत्वादिति।।१८।।

स्यादेतत्–यदि पुनः सर्वकारणोपाधितयैव ब्रह्मणः सर्वान्तर्यामित्वमुच्यते, न पुनः स्वतः ; भेदाभावात्, कूटस्थत्वाच्च तदनुपपत्तेः, एवं तर्हि साङ्ख्यस्मृतिसिद्धं सर्वकारणं प्रधानमेवास्तु साक्षात् सर्वान्तर्यामि; गुणानां परस्परवृत्तिनियामकत्वस्य तैरभ्युपगमात्, अत एव नानवस्था दोषोऽपि। अदृष्टत्वादिधर्मव्यपदेशोऽपि तत्रोपपद्यते; साङ्ख्यैस्तथात्वेन तस्य स्मरणात्। स्मृतिश्च भाष्य उदाहृता। तस्मात् प्रधानमेवात्रान्तर्याम्यस्तु, न ब्रह्मेति। एवं प्राप्ते पठति–*न च स्मार्तमतद्धर्माभिलापात्*।।१९।। चोऽप्यर्थः। तस्य प्रधानस्य धर्मः, न तद्धर्मः=द्रष्टृत्वादिः, तस्याभिलापादित्यर्थः। शेषं भाष्ये।।१९।।

सूत्रान्तरमवतारयितुमाशङ्कते–*यदि प्रधानमिति*।। *दर्शनादिक्रियायाः कर्तरि प्रवृत्तिविरोधादिति*।। प्रवृत्तिः=विषयतया व्याप्तिः। न हि स्वाश्रया क्रिया स्वात्मानं विषयीकर्तुमलम्; गमिक्रियादौ तद्विरोधस्य दर्शनादित्यर्थः। श्रुतितोऽपि शारीरस्याद्रष्टृत्वादि-सिद्धिरित्याह–*न दृष्टेर्द्रष्टारं पश्येरित्यादिश्रुतिभ्यश्चेति*।। दृष्टिरत्र चक्षुरिन्द्रियकरणिका बुद्धिवृत्तिर्विवक्षिता, तस्याः कर्तारम्=प्रमातारं न तथा गृह्णीया इति श्रुतेरर्थ इति पूर्वपक्षाभिप्रायः।।

वस्तुतस्तु–दृष्टेः प्रत्यग्भूततया विद्यमानं नित्यविज्ञानघनं तत्साक्षिणं न तया विषयीकुर्याः। न ह्ययः पिण्डः स्वप्रत्यग्भूतमग्निं दहति। किं तर्हि? तत्सम्बन्धं प्राप्य तदन्यमेव दहतीति श्रुतेरर्थः ;

प्रकाशयिता सवितेतिवत् तृच उपाचारार्थत्वात् तद्वाक्यस्य शुद्धात्मप्रतिपादनपरत्वात्, तत्प्रकरणात्। अन्यथाऽनुवादमात्रत्वापत्तेः, प्रकरणबाधापत्तेश्चेति। चार्थमाहि- *नेति पूर्वसूत्रादनुवर्तत इति*।। उपलक्षणमेतत्- ''अतद्धर्माभिलापादि'' ति हेतुरप्यनुवर्तते। तं व्याचष्टे- *यद्यपीत्यदिना*।। हेत्वन्तरपरतया सूत्रावयवं व्याचष्टे- *अपि चेति*।। नियन्त्रणावस्थापरिहाराय ''भेदाभावादि'' ति हेतुं वदता परिहतापि दृष्टृद्रयप्रसक्तिर्मन्दबुद्धिव्युत्पादनाय पुनरुत्थाप्यते- *कथं पुनरित्यादिना*।। असकृद्वक्तव्यमिति न्यायात्।

''नान्योऽतोऽस्ति द्रष्टे'' ति श्रुतेरीश्वरातिरिक्तनियन्त्रन्तरप्रतिषेधे तात्पर्यम्; तदेकनियन्तृत्वस्यैव तद्वाक्ये प्रतिपाद्यत्वात्, न तदतिरिक्तद्रष्ट्रदिप्रतिषेधे; प्रत्यक्षविरोधात्। शङ्कते- *नियन्त्रन्तरप्रतिषेधार्थमेतद्वचनमिति चेदिति*।। पूर्वपक्षी परिहरति- *न; नियन्त्रन्तराप्रसङ्गात्, अविशेषश्रवणाच्चेति*।। प्रसक्तं हि प्रतिषिद्ध्यते। न च द्रष्ट्रन्तरादिवद् नियन्त्रन्तरप्रसक्तिरस्ति। न च तक्षादिदृष्टान्तेन तत्प्रसक्तिः ; निराकृतत्वात्, ''नान्योऽतोऽस्ति नियन्ते'' त्यनुवादमात्रत्वात्। अस्तु वा यथाकथञ्चित् प्रसक्तिः, तथाप्यविशेष श्रवणाद् न द्रष्टन्तरमस्तीति वक्तुं शक्यते। यथा ''नान्योऽतोऽस्ति नियन्ते'' ति श्रुतम्, तथा ''नान्योऽतोऽस्ति द्रष्टे'' त्यप्यविशेषेण श्रुतमिति। एवं च सति शारीरस्य ब्रह्माभिन्नत्वात् सूत्रकारस्य तदन्तर्यामित्वप्रतिषेधो न युक्त इत्याक्षेप्तुरभिप्रायः। आविद्यकलोकसिद्धभेदमादाय प्रतिषेधोपपत्तिरिति समाचष्टे- *अत्रोच्यत इत्यादिना*।। *न द्वौ प्रत्यगात्मानौ संभवत इति*।। द्वयोः प्रत्यक्त्वविरोधात्, सर्वान्तरत्वस्यैव प्रत्यक्त्वादित्यभिप्रायः। *ज्ञातृज्ञेयादिभेदश्रुतय इति*।। ''यो वेद निहितं गुहायाम्'' ''तमेव धीरो विज्ञाय'' ''आत्मन्येवात्मानं पश्येदि'' त्याद्याः श्रुतय इत्यर्थः।।२०।।

इति वार्तिकम् पञ्चममन्तर्याम्यधिकरणम् समाप्तम्

प्रदीपः

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्।।१८।। अधिदैवादिष्वन्तर्यामी, परमात्मा; उपदिश्यमानपरमात्मधर्मवत्त्वादिति सूत्रार्थः। आदिपदेनाधिलोकाधिवेदाधियज्ञाधिभूताध्यात्मानां ग्रहणम्।।

एष आत्माऽन्तर्यामीति बहवः पर्याया अधिदैवादिभेदेनाम्नायन्ते। तत्र पृथिवीनियन्ताऽऽत्माऽन्तर्यामी, अपां नियन्ताऽऽत्माऽन्तर्यामी, एवमग्नेरन्तरिक्षस्य वायोर्दिव आदित्यस्य दिशां चन्द्रतरकयोराकाशस्य तमसः सर्वभूतानां प्राणस्य वाचश्चक्षुषः श्रोत्रस्य मनसो विज्ञानस्य रेतसश्च नियन्ताऽत्माऽन्तर्यामीति। सर्वेषां वाक्यानां भिन्नवाक्यत्वे पूर्वपक्षः, एकवाक्यत्वे सिद्धान्तः, इति किमिमानि सर्वाण्येकवाक्योन्येकब्रह्मप्रतिपादकानि, उत भिन्नवाक्यानि तत्तदभिमानिदेवतादिप्रतिपादकानीति संशयः। तदिदमुक्तम्—*स किमधिदैवाद्यभिमानीति*।। न हि सर्वाभिमानी कश्चन देवतात्मा प्रसिद्ध इति भावः। सिद्धान्तं निर्दिशति—*योऽन्तर्यामीत्यादिना*।। कोऽयं परमात्मधर्म इत्यत आह—*पृथिव्यादि तावदिति*—*समस्तं विकारजातमिति च*।। अनेन सर्वेषां वाक्यानामेकवाक्यत्वमेव युक्तम्, न तु भिन्नवाक्यत्वमिति सूच्यते। युक्तं चैतत्। अत एव—बृहदारण्य औद्दालकिनाऽऽरुणिना—आथर्वणकबन्धकाप्यसंवादक्रमेण "वेत्थ नु त्वं काप्य तमन्तर्यामिणं य इमं च लोकं च परं च लोकं सर्वाणि भूतानि योऽन्तरो यमयतीति सोऽब्रवीत् पतञ्जलः काप्यो नाहं तं भगवन् वेदेति सोऽब्रवीत् पतञ्जलं काप्यं याज्ञिकांश्च यो वै काप्यैतत् सूत्रं विद्यात् तं चान्तर्यामिणमिति स ब्रह्मवित् स लोकवित् स वेदवित् स भूतवित् स आत्मवित् स सर्वविदिति तेभ्योऽब्रवीत् तदहं वेद तच्चेत् त्वं याज्ञवल्क्य सूत्रमविद्वांस्तं चान्तर्यामिणं ब्रह्मगवीरुदजसे मूर्धा ते विपतिष्यतीति वेद वा अहं गौतम तत्सूत्रं तं चान्तर्यामिणमिति यो वा इदं कश्चिद् ब्रूयाद्वेद वेदेति यथा वेत्थ तथा ब्रूही" ति याज्ञवल्क्ये पृष्टे प्रत्युत्तरति स्म याज्ञवल्क्यः "वायुर्वाव गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्ति तस्माद्वै गौतम पुरुषं प्रेतमाहुर्व्यस्त्रंसिषतास्थाङ्गानीति वायुना हि गौतम सूत्रेण संदृब्धानि भवन्ती" ति। अनन्तरं तेन—"एवमेवैतद्याज्ञवल्यान्तर्यामिणं ब्रूही" त्यन्तर्यामिप्रश्ने प्रवृत्तानीमानि वाक्यानि—"यः पृथिव्यां तिष्ठन्नि" त्यादीनि—"आरुणिरुपरराम" त्यन्तानि। तत्रैक एवान्तर्यामी

प्रश्नविषय इति सर्वेषामुत्तरवाक्यानामप्येकान्तर्यामिपरत्वमेव स्वीकर्तव्यम्। प्रश्नवाक्ये सर्वविकारयमयितृत्वमनवयुत्याम्नातम्, उत्तरवाक्यैस्त्ववयुत्येत्येव वाक्यार्थ इति न पूर्वपक्षोपपत्तिः ; प्रश्नोत्तरयोरन्यथा वैयधिकरण्यापत्तेः। इदमधिकरणं निर्गुणब्रह्मपरम्, इति नाद्वैतमतेऽपि दोष इत्यभिप्रायेणाह- *तथा हि-''अदृष्टोऽश्रुत'' इति इत्यादिव्यपदेशो रूपादिविहीनत्वात्परमात्मन इति*।। एवमपि न परमात्मनो नियन्तृत्वानुपपत्तिरिति शङ्कोत्तराभ्यां सगृह्यते- *यत्त्वकार्यकरणस्येत्यादिना-कार्यकारणोपपत्तेरित्यन्तेन*।। अन्तर्यामिब्राह्मणस्य सगुणपरत्वे तु तस्याप्यन्तर्याम्यन्तरं कल्पनीयं स्यादित्यनवस्था दोषः, स्वमते तु नायं दोष इत्याह- *तस्याप्यन्य इत्यादिना*।। परमात्मैव=निर्विशेषात्मैवेत्यर्थः। अत्र भिन्नवाक्यावगततत्तदभूतनियन्तृत्वेन ब्रह्मलिङ्गेन समस्तविकारयमयितृत्वरूपब्रह्मलिङ्गाभिभावाद् अस्पष्टब्रह्मलिङ्गकत्वम्। पूर्वाधिकरण आत्मब्रह्मादिप्रसिद्धपदसमाभिव्याहारादिवद् अत्रान्तर्यामिपदार्थस्य प्रसिद्ध्यभावाद् आक्षेपसङ्गतिः।।

अत्रानुसन्धेयानि विषयवाक्यानीमानि-''यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथीवीमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः। योऽप्सु तिष्ठन्नद्भ्योऽन्तरो यमापो न विदुर्यस्यापः शरीरं योऽपोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः।। योऽग्नौ तिष्ठन.......अमृतः। याऽन्तरिक्षे तिष्ठन्.........अमृतः। यो वायौ तिष्ठन्.........अमृतः। यो दिवि तिष्ठन्.........अमृतः। य आदित्ये तिष्ठन्.........अमृतः। यो दिक्षु तिष्ठन्.........अमृतः। यश्चन्द्रतारके तिष्ठन् चन्द्रतारकादन्तरः.........अमृतः। य आकाशे तिष्ठन्.........अमृतः। यस्तमसि तिष्ठन्.........अमृतः। यस्तेजसि तिष्ठन्.........अमृतः। इत्यधिदैवतमथाभिभूतम्। यः सर्वेषु भूतेषु तिष्ठन्.........अमृत इत्यधिभूतमथाध्यात्मम्। यः प्राणे तिष्ठन्.........अमृतः। यो वाचि तिष्ठन्.........अमृतः। यश्चक्षुषि तिष्ठन्.........अमृतः। यः श्रोत्रे तिष्ठन्.........अमृतः। यो मनसि तिष्ठन्.........अमृतः। यस्त्वचि तिष्ठन्.........अमृतः। यो विज्ञाने तिष्ठन्.........अमृतः। यो रेतसि तिष्ठन् रेतसोऽन्तरो यं रेतो न वेद यस्य रेतः शरीरं यो रेतोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतोदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ताऽनिज्ञातो विज्ञाता नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति मन्ता नान्योऽतोऽस्ति विज्ञातैष त आत्माऽन्तर्याम्यमृतोऽतोऽन्यदार्तं ततो होद्दालक आरुणिरुपरराम'' ति बृहदारण्यकतृतीयाध्याय-सप्तमब्राह्मणगतानि तृतीयादीनि त्रयोविंशान्तानि वाक्यानि।।

अत्रान्तिमपर्यायवाक्यस्याद्वितीयब्रह्मपरत्वमवश्यं स्वीकर्तव्यम्, इति तदेकवाक्यतायामपरेपामपि तत्रैव पर्यवसानमिति निष्कर्षः। अयं चार्थः सूत्रे''ऽधिदैवादिषु'' इति प्रयोगेण सूच्यते। अन्तर्यामी हि साधिकरणकोऽधिदैवाधिभूताध्यात्मपर्यायेषु सर्वेष्वेवाम्नायते, नान्तिमपर्यायमात्रे। तथाचान्तिम-

पर्यायस्य ब्रह्मपरत्वे न संदेहलेशोऽपीति तदेकवाक्यतयाऽऽदिमाधिदैवतापिर्यायाणामपि परमात्मपरत्वमिति सूच्यते।।१८।।

अत्र साङ्ख्याः प्रत्यवतिष्टन्तेऽन्तिमपर्यायस्य प्रधानपरत्वमेव, नाद्वितीयब्रह्मपरत्वमिति। तदिदमाशङ्क्य निरस्यति सूत्रकारः–*न च स्मार्तमतद्धर्माभिलापादिति*।।१९।। स्मार्तम्=आनुमानिकम्। अनुमानस्याप्यनुभवान्तराधीनत्वात् स्मृतिपदेन ग्रहणम्, न तु मन्वादिस्मृतीनामिव प्रसिद्धं वेदमूलकत्वमभिप्रेत्य। अत एव–स्मृत्यन्तरविरोधेन कापिलस्मृत्यप्रामाण्यव्यवस्थोपपद्यते; अन्यथा विकल्पापत्तेः, वस्तुनि च विकल्पायोगात् स्मृतिद्वयस्याप्यप्रामाण्यमेव कारणस्वरूपे सूत्रकाराणामिति स्यात्। अतद्धर्माः=तद्विरुद्वर्माः ; नञो विरोधार्थत्वाद् अज्ञानादिपद इवेति भावः। प्रधानविरुद्धदृष्टवत्वादिधर्माम्नानाद् नान्तिमपर्यास्य प्रधानपरत्वम्, ब्रह्मणि तु न किमपि विरुद्धमित्याशयः। पूर्वोक्तं प्रत्यवस्थानं संगृह्णाति–*स्यादेतदित्यादिना*।। ननु–प्रधानस्यानुमेयस्य कथमदृष्टत्वमित्यत आह–*रूपादिहीनतया तस्येति*।। अदृष्टत्वपदेन प्रत्यक्षाविषयत्वस्यैव विवक्षणादनुमेयस्यापि तस्यादृष्टत्वमुपपद्यत एवेति भावः। अत्र प्रमाणमाह–*अप्रतर्क्यमिति*।। विशेषानुमानाविषय इत्यर्थः। प्रसुप्तमिव स्थितम्=साम्यावस्थापन्नसत्त्वरजस्तमोगुणात्मकम्। तस्यापि=प्रधानस्यापि *सर्वविकारकारणत्वादिति*।। प्रधानं तु न विकृतिरिति न तस्यापि नियन्त्रपेक्षेति भावः।।

ईक्षत्यधिकरणेन गतार्थत्वं निरस्यति–*ईक्षतेरिति*।। समाधत्ते–*न चेति*।। अन्तर्यामी, न प्रधानम्, प्रधानविरुद्धधर्मवत्त्वादित्यनुमानप्रयोगोऽत्र विवक्षितः। प्रधानविरुद्धधर्मान् निर्दिशति–*द्रष्टृत्वादिव्यपदेश इति*।।१९।।

शारीरान्तर्यामित्वपक्षमाशङ्क्य निराकरणार्थं सूत्रम्–*शारीरश्चोभयेऽपि हि भेदेनैनमधीयत इति*।।२०।। यद्यपि पृथिव्याद्यभिमानिदेवताया इव जीवस्यापि सर्वविकारनियन्तृत्वं न संभवति; वाक्यभेदापत्तेः, तथापि जीवस्य वस्तुगत्यैकत्वाद् अनुगतचैतन्यांशेन सर्वनियन्तृत्वमविरुद्धमित्यभि-प्रायेणाशङ्का। समाधानं तु–जीवस्यान्तर्यामित्वं यद्यनुगतचैतन्यांशेन, तर्हि जीवस्यान्तर्यामी चैतन्यस्वरूपमिति पर्यवस्यति। तथाच ब्रह्मण एवान्तर्यामित्वे पर्यवसानम्; "उत्तराच्चेदा-विर्भूतस्वरूपस्तु" इति वक्ष्यमाणन्यायेन तस्यैव ब्रह्मत्वात्। तथाच जीवत्वेनान्तर्यामित्वं यदि विवक्ष्यते, तर्हि वाक्यभेदापत्तिः, पृथिव्यादौ तस्य नियन्तृत्वासिद्धिः, जीवस्याप्यन्तर्याम्यन्तर-निर्देशानुपपत्तिश्च। यदि तु ब्रह्मरूपेण, तर्हि तु ब्रह्मपक्ष एव पर्यवसानम्–इति।।

तत्र जीवस्यात्मत्वामृतत्वद्रष्टृत्वादीनां संभवेन पूर्वपक्षस्वरूपमाह–*शारीरो हीति*।।

ननु–आत्मत्वं हि व्यापकत्वेन परमात्मन एव मुख्यम्, न तु परिच्छिन्नस्य जीवस्येत्यत आह– *आत्मा चेति।। प्रत्यक्त्वादिति*।। अहम्प्रत्ययविषयत्वादित्यर्थः। *नेति पूर्वसूत्रादनुवर्तत इति*।। शारीरश्चेति चशब्दसामर्थ्यादिति भावः।। जीवस्य पृथिव्यादिनियन्तृत्वं जीवत्वेनासम्भवदुक्तिकमित्याह– *तथापि घटाकाशवदित्यादिना*।। नियन्तुं न शक्यते; जीवस्य परिच्छिन्नस्यानधिष्ठानत्वेनाकारणत्वात्। न केवलमकारणत्वेन न नियन्तृत्वम्, किन्तु तस्यापि परिच्छिन्नस्य कार्यकोटौ नियम्यकोटौ वा श्रुतौ निर्देशादपीत्याह– *अपि चेति*।। अत्र चशब्दस्य देहलीदीपन्यायेन हेतावप्यन्वयमभिप्रेत्य प्रथमो हेतुः। द्वितीयस्तु शाब्दो हेतुरिति निष्कर्षः। अनेन चात्मत्वं शारीरात्मनि बाधितमिति सूच्यते। न ह्यहंप्रत्ययार्थः आत्मा, किन्त्वात्मानात्मशबलित एवेति बहुशो विवेचितमिति भावः। ननु–पृथिव्यादौ ब्रह्मणश्चैतन्यस्य शारीरातिरिक्तस्यान्तर्यामित्वं संभवतु नाम, शारीरस्यापि तदेवान्तर्यामीति कथम्? एकस्मिन् शरीरे द्वयोर्द्रष्ट्रोरसंभवात्, इति शङ्कते– *कथमिति*।। गुहां प्रविष्टाविति न्यायेनात्मद्वयावस्थानं न विरुद्धम्; आत्मभेदश्च काल्पनिकः, न पारमार्थिकः। "समारोपस्य रूपेण विषयो रूपवान् भवेदि" ति सर्वत्रप्रसिद्धादिकरणोक्तन्यायेन तु ब्रह्मणोऽपि द्रष्टृत्वव्यपदेशो व्यवहारदशाभिप्रायेणोपपद्यत इत्याद्यभिप्रेत्य समाधत्ते– *अत्रोच्यत इति*।। तथाच जीवस्याप्यहंप्रत्ययविषयस्याधिष्ठानं निर्विशेष चैतन्यमेवात्रान्तर्यामितया विवक्ष्यत इति मुख्यनिर्विशेषब्रह्मपरमेवेदमधिकरणम्, न तु गौणब्रह्मपरम्। न हि गौणब्रह्मणोऽन्तर्यामित्व एकस्मिन् देहे द्रष्टृद्वयसंभव इति भावः। अत एव–स सर्वविदित्यादिनाऽन्तर्यामिविज्ञानेन सर्वविज्ञानं प्रतिपादितमुपपद्यते; एकविज्ञानेन सर्वविज्ञानस्य निर्विशेषवादं बिना स्वरसमनुपपत्तेः। अत एव ह्यतोऽन्यदार्तमिति पृथिव्यादितमोऽन्तस्य बाध्यत्वं प्रतिपादितमुपपद्यते; मतान्तरे तु शरीरिणो मुख्यात्मत्वविवक्षायामतोऽन्यत् किं वा विवक्ष्येत; पृथिव्यादिशरीरापृथक्सिद्धशरीरव्यतिरिक्तस्य शरीरकोटौ वाऽप्रविष्टस्यान्यस्यार्तत्वयोग्य- स्यासम्भवात्। तदिदं सर्वमभिप्रेत्याह–ततश्च ज्ञातज्ञेयादिभेदश्रुतय इति।।२०।।

इति प्रदीपः पञ्चममन्तर्याम्यधिकरणम् समाप्तम्

भामती

स्वकर्मोपार्जितं देहं तेनान्यच्च नियच्छति।
तक्षादिरशरीरस्तु नात्मान्तर्यामितां भजेत्॥

प्रवृत्तिनियमनलक्षणं हि कार्य्यं चेतनस्य शरीरिणः स्वशरीरेन्द्रियादौ वा शरीरेण वा वास्यादौ दृष्टं नाशरीरस्य ब्रह्मणो भवितुमर्हति। नहि जातु वटाङ्कुरः कुटजवीजाज्जायते। तदनेन जन्माद्यस्य यत इत्येतदप्याक्षिप्तं वेदितव्यम्। तस्मात्परमात्मनः शरीररेन्द्रियादिरहितस्यान्तर्यामित्वाभावात् प्रधानस्य वा पृथिव्याद्यभिमानवत्या देवताया वाऽणिमाद्यैश्वर्य्ययोगिनो योगिनो वा जीवात्मनो वाऽन्तर्यामिता स्यात्। तत्र यद्यपि प्रधानस्यादृष्टत्वाश्रुतत्वामतत्वाविज्ञातत्वानि सन्ति, तथापि तस्याचेतनस्य द्रष्टृत्वश्रोतृत्वमन्तृत्वविज्ञातृत्वानां श्रुतानामभावाद् अनात्मत्वाच्चैष त आत्मेति श्रुतेरनुपपत्तेर्न प्रधानस्यान्तर्य्यामिता। यद्यपि पृथिव्याद्यभिमानिनो देवस्यात्मत्वमस्ति, अदृष्टत्वादयश्च सह द्रष्टृत्वादिभिरुपपद्यन्ते, शरीरेन्द्रियादियोगश्च, पृथिव्येव यस्यायतनमग्निर्लोको मनोज्योतिरित्यादिश्रुतेः तथापि तस्य प्रतिनियतनियमनाद् 'यः सर्वान् लोकानन्तरो यमयति यः सर्वाणि भूतान्यन्तरो यमयति' इति श्रुतिविरोधादनुपपत्तेः, योगी तु यद्यपि लोकभूतवशितया सर्वान् लोकान् सर्वाणि च भूतानि नियन्तुमर्हति तत्र तत्रानेकविधदेहेन्द्रियादिनिर्माणेन स एकधा भवति त्रिधा भवतीत्यादिरुतिभ्यः, तथापि जगद्व्यापारवर्जं प्रकरणादिति वक्ष्यमाणेन न्यायेन विकारविषये विद्यासिद्धानां व्यापाराभावात्सोऽपि नान्तर्यामी। तस्मात् पारिशेष्याज्जीव एव चेतनो देहेन्द्रियादिमान् द्रष्टृत्वादिसम्पन्नः स्वयमदृश्यादिः स्वात्मनि वृत्तिविरोधादमृतश्च देहनाशेऽप्यनाशात्। अन्यथाऽऽमुष्मिक-फलोपभोगाभावेन कृतविप्रणाशाकृताभ्यागमप्रसङ्गात्। य आत्मनि तिष्ठन्निति चाभेदेऽपि कथञ्चिद्भेदोपचारात् स भगवः कस्मिन् प्रतिष्ठितः स्वे महिम्नीतिवत्। यगात्मा न वेदेति च स्वात्मनि वृत्तिविरोधाभिप्रायम्। यस्यात्मा शरीरमित्यादि च सर्व स्वे महिम्नीतिवद्योजनीयं, यदि पुनरात्मनोऽपि नियन्तुरन्यो नियन्ता भवेद् वेदिता वा ततस्तस्याप्यन्य इत्यनवस्था स्यात्। सर्वलोकभूतनियन्तृत्वञ्च जीवस्यादृष्टद्वारा, तदुपार्जितौ हि धर्माधर्मौ नियच्छत इत्यनया द्वारा जीवो नियच्छति। एकवचनञ्च जात्यभिपायम्। तस्माज्जीवात्मैवान्तर्यामी, न परमात्मेति।

एवं प्राप्तेऽभिधीयते–

देहेन्द्रियादिनियमे नास्य देहेन्द्रियान्तरम्।
तत्कर्मोपार्जितं तच्चेंत्तदविद्यार्जितं जगत्॥

श्रुतिस्मृतीतिहासपुराणेषु तावदत्र भवतः सर्वज्ञस्य सर्वशक्तेः परमेश्वरस्य जगद्यीनित्वमवगम्यते। न तत् पृथग्जनसाधारण्यानुमानाभासेनागमविरोधिना शक्यमपह्नोतुम्। तथा च सर्व विकारजातं तदविद्याशक्तिपरिणामस्तस्य शरीरेन्द्रियस्थाने वर्त्तत इर्ति यथायथं पृथिव्यादिदेवतादिकार्यकरणस्तानेव पृथिव्यादिदेवतादीन् शक्नोति नियन्तुम्। न चानवस्था, न हि निवन्त्रन्तरं तेन नियम्यते, किन्तु यो जीवो निथन्ता लोकसिद्धः स परमात्मैवोपाध्यवच्छेदकल्पितभेदस्तथा व्याख्यायत इत्यसकृदावेदितं, तत् कुतो नियन्त्रन्तरं? कुतश्चानवस्था? तथा च नान्योऽतोऽस्ति द्रष्टेत्याद्या अपि श्रुतय उपपन्नार्थाः। परमार्थतोऽन्तर्यामिणोऽन्यस्य जीवात्मनो द्रष्टुरभावात्। अविद्याकल्पितजीवपरमात्मभेदाश्रयास्तु ज्ञातृज्ञेयभेदश्रुतयः प्रत्यक्षादीनि प्रमाणानि संसारानुभवो विधिनिषेघशास्त्राणि च। एवं चाधिदैवादिष्वेकस्यैवान्तर्यामिणः प्रत्यभिज्ञानं समञ्जसं भवति, यः सर्वान् लोकान् यः सर्वाणि भूतानीत्यत्र य इत्येकवचनमुपपद्यते। अमृतत्वञ्च परमात्मनि समञ्जसं नान्यत्र। य आत्मनि तिष्ठन्नित्यादौ चाभेदेऽपि भेदोपचारक्लेशो न भविष्यति। तस्मात्परमात्मान्तर्यामी न जीवादिरिति सिद्धम्। पृथिव्यादिस्तनयित्न्वन्तमधिदैवम्। यः सर्वेषु लोकेष्वित्यधिलोकम्। यः सर्वेषु वेदेष्वित्यधिवेदम्। यः सर्वेषु यज्ञेष्वित्यधियज्ञम्। यः सर्वेषु भूतेष्वित्यधिभूतम्। प्राणाद्यात्मान्तमध्यात्मम्। संज्ञाया अप्रसिद्धत्वादित्युपक्रममात्रं पूर्वः पक्षः। *दर्शनादिक्रियायाः कर्त्तरि प्रवृत्तिविरोधात्*। कर्त्तरि आत्मनि प्रवृत्तिविरोधादित्थर्थः॥१८–२०॥

इति भामती पञ्चममन्तर्याभ्याधिकरणम् समाप्तम्

अथ अनवस्थित्यधिकरणम्॥६॥

॥सू०॥ अनवस्थितेरसंभवाच्च नेतरः॥१८॥

अस्य महोपनिषदि श्रूयते विषयः – 'अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः। ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक्॥' इत्यादि॥ इहाङ्गुष्ठमात्रत्वादिविशिष्टः परमेश्वरो वाऽन्यो वेति संशयः॥ प्राणाग्निहोत्रप्रकरणात् 'अङ्गुष्ठमात्रः' इत्यल्पत्वव्यपदेशाच्च अयं प्राणवायुरेव पञ्चानामाहुतीनां श्रोक्ताऽवगम्यते। न चास्य भोक्तृत्वानुपपत्तिः, 'आपश्च पृथिवी चान्नमत्तारौ वह्निमारुतौ' इत्यादिषु वायोरपि भोक्तृत्वप्रसिद्धेः। सर्वथाऽयं प्राणवायुरिति पूर्वः पक्षः॥ परमेश्वर एवेति सिद्धान्तः, सकलजगदीशत्वविष्वभुक्त्वादीनां धर्माणामन्यत्राभिधानेऽनवस्थानात्, असंभवाच्च तत्र तेषाम्। अत ईश्वर एवैतादृशः। तस्य प्राणरूपत्वेनाप्युपास्यत्वमुच्यते, 'प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः' इति प्राणाधारत्वेन तस्य श्रवणात्। अङ्गुष्ठमात्रपरिमाणस्योपास्यत्वादित्यविरोधः। प्राणवायोः श्रोक्तृत्वसिद्धावपि 'विश्वभुक्' इत्येतत् न संभवति। अतोऽयमीश्वर एव प्राणाग्निहोत्राराध्यत्वेन प्राणरूपः प्रतिपाद्यत इति सिद्धम्॥

इत्यनवस्थित्यधिकरणम्॥६॥

अथ अनतर्याम्यधिकरणम्॥७॥

सर्वज्ञस्य सर्वशक्तः सर्वानुग्राहकस्य विभोरपि शिवस्य परब्रह्मणः सवितृमण्डल-पुरुषहृदयपुण्डरीकादिषूपासनाय स्थितिरुपपादिता सर्वत्र तां प्रतिपादयितुमिदमधिकरणमारभ्यते-

॥सू०॥ **अन्तर्याम्यधिदैवाधिलोकादिषु तद्धर्मव्यपदेशात्॥१९॥**

अन्तर्यामिब्राह्मणेऽस्य विषयः श्रूयते 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति एष त आत्माऽन्तर्याम्यमृतः'-इति॥ एवं पृथिवीमारभ्य

प्रतिपर्यायमात्मतत्त्वपर्यन्तमखिलवस्त्वन्तर्यामितया श्रूयमाणः परमेश्वरो जीवो विराट्पुरुषो वा प्रधानं वेति संशयः। स्वोपार्जितविचित्रफलभोगाय सकलभूतेन्द्रियानुप्रवेशो जीवस्य युज्यते। सकलचेतनोपादानतया सर्वभूतानुप्रवेशो विराट्पुरुषस्य युक्तः। अथवा। महदादिरूपेण परिणतत्वात् प्रधानस्य सर्वव्यापकत्वमुचितम्। 'विश्वाधिको रुद्रः' (मंहाना० १०.) इति विश्वाधिकत्वेन निखिलविकारोत्तीर्णस्य परमेश्वरस्य विकाररूपप्रपञ्चानुप्रवेशो न घटते। ततः परमेश्वरमन्तरेण जीवादिष्वेकतमः स्यादन्तर्यामी॥

इति पूर्वपक्षे प्राप्ते ब्रूमः - पृथिव्याद्यन्तर्यामितया श्रूयमाणः परमेश्वर एव, सर्वान्तरत्वादितद्धर्मव्यपदेशात्। अथर्वशिरसि च 'सोन्तरादन्तरं प्राविशत्' इति परमेश्वरस्यैव सर्वात्मतयाऽनुप्रवेशदर्शनात्। 'स त आत्माऽन्तर्याम्यमृतः' इति शिव एवानादिमुक्तोऽमृत इत्युच्यते, 'एतानि वा अमृतस्य नामधेयानि' (जाबा०३.) इति श्रवणात्। यथा 'विश्वाधिको रुद्रः' इति विश्वाधिकत्वं परमेश्वरस्य श्रूयते, तथा विश्वरूपत्वमपि 'सर्वो वै रुद्रः' इत्यादिषु। सर्वविकारानुप्रवेशेऽपि तद्विकारस्पर्शलेशोऽपि नास्तीति खलु प्रतिपार्यायममृतशब्दप्रयोगः। अथर्वशिरसि च 'यो वै रुद्रः स भगवान् भूर्भुवस्सुवर्यश्च ब्रह्मा तस्मै वै नमो नमः' इत्यादिना ब्रह्मविष्णुरुद्रोमालक्ष्मीसरस्वतीगणेशस्कन्देन्द्रादिलोकपालश्रूरादिसप्तलोकपृथिव्यादिपञ्चभूतसूर्यसोमग्रह-नक्षत्रकालादिरूपेण प्रत्येकमभ्यासतो निरूप्यते परमेश्वरः। तत्रापि सकलचिदचित्तत्वानुप्रवेशाद-स्यापुरुषार्थसंबन्धो भवेदिति शङ्कायां प्रतिपर्यायमैश्वर्यादिमङ्गलगुणसंबन्धाभिधायिभगवच्छव्दप्रयोगः कृतः। ततः सर्वाधिकः सर्वात्मा च शिवः परमेश्वर इति युक्तमेव॥ यदुक्तं प्रधानादीनामन्तर्यामित्वमुचितमिति, तत् परिहरति-

।सू०॥ न च स्मार्तमतद्धर्माभिलापाच्छारीरश्च॥२०॥

न च स्मार्तं प्रधानमन्तर्यामीति श्रुतं, तस्य विकारजडत्वादिधर्मानभिलापात्। न शारीरो विराट्पुरुषश्च, तस्य सकलनियामकत्वाद्यनुपपत्तेः॥

इति श्रीकण्ठभाष्य पञ्चममन्तर्याम्यधिकरणम् समाप्तम्

अनवस्थितेरसम्भवाच्च नेतरः॥१८॥ इहापि पूर्वाधिकरण इवोपासकनेदिष्ठस्थानान्तरोक्तिरिति प्रासङ्गिकसङ्गतिः स्पष्टेति भाष्ये न प्रदर्शिता। दृष्टान्तप्रत्युदाहरणरूपं सङ्गत्यन्तरमपि पूर्वपक्षोपन्यासेन स्फुटीभविष्यतीति विषयवाक्यमुदाहृत्य प्राणलिङ्गप्रकरणयोर्ब्रह्मलिङ्गयोश्च बलाबलानवधारणात्संशयं दर्शयति-**अस्येति।** यथा ब्रह्मप्रकरणादक्षिपुरुषो ब्रह्म तथा प्राणाग्निहोत्रप्रकरणादङ्गुष्ठमात्रः प्राण इति पूर्वपक्षयति-**प्राणेति। अङ्गुष्ठेति।** नन्वङ्गुष्ठपरिमाणत्वं सकलशरीरव्यापिनि प्राणेऽपि न सम्भवति अङ्गुष्ठसमाश्रयणोपाधिकं तु तत् ब्रह्मण्यपि सम्भवतीति चेन्न। ब्रह्मणि मुख्यस्याङ्गुष्ठसमाश्रयणस्यासम्भवेन तदुपाधिकस्य तस्य ब्रह्मण्यनुपपत्तेः। अङ्गुष्ठावच्छेदोपाधिकस्य तस्य ब्रह्मणि सम्भवेऽप्यत्र 'समाश्रित' इति समाश्रयणोपाधिकस्यैव तस्य ग्राह्यत्वात्। न चाक्ष्याधारत्वमिवाङ्गुष्ठसमाश्रयणममुख्यं ग्राह्यम्। तथेहामुख्यग्रहणहेत्वभावात्। 'ईशस्सर्वस्य जगत' इत्यस्य धारणेन पतनाभावं सम्पाद्य स्थानासनगमनादिषु सर्वेषामपि देहान्नियच्छति प्राणेऽप्युपपत्तेः। 'ईशानमस्य जगतस्सुवर्दृशमीशानमिन्द्र तस्थुष' इति निर्दिष्टस्थावरप्रतिद्वंद्विजङ्गममात्रपरतया जगच्छब्दस्य प्रयुक्ततया तथेहापि कार्यसामान्यपरत्वमपहाय जङ्गममात्रपरत्वाभ्युपगमोपपत्तेः। तस्य कार्यसामान्यपरत्वेऽपि वचनबलात्प्राणस्यापि सर्वजगदीश्वरत्वोपपत्तेश्च। ब्रह्मप्रकरणे सर्वैश्वर्यश्रवणादेव हि ब्रह्मणस्तदभ्युपगम्यते। इह 'प्राणे निविष्टोऽमृतं जुहोमी'त्यादिमन्त्रोपक्रमे प्राणप्रकरणेऽस्मिन् 'ईशस्सर्वस्य जगत' इति श्रवणे जाग्रति प्राणस्यापि किमिति तन्नाभ्युपगन्तव्यम्। तस्यापि ब्रह्मण इव महामहिमा श्रूयते। 'यथा वा अरा नाभौ समर्पिता एवमस्मिन्प्राण्यो सर्वं समर्पित'मिति भूमविद्यायां सर्वाधारत्वं तावच्छ्रूयते। तथा 'प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राणस्स्वसा प्राण आचार्य' इति हितप्रवर्तकत्वसंरक्षकत्वादिगुणयोगात्पितृमात्राद्यात्मना रूपणं दृश्यते। एवं प्राणसंवादादिष्वपि प्राणस्य भूयांसि महामहिमश्रवणानि। एवं च 'विश्वभुगि'ति विशेषणमपि विश्वं भुनक्ति पालयतीत्यर्थकतया प्राणे सुयोजमिति स्पष्टमेव। भुजेरभ्यवहारार्थत्वेऽपि नासङ्गतिः। पञ्चवृतेः प्राणस्य सकलप्राणाहुत्युद्देश्यत्वात्। 'अत्तारौ वह्निमारुता'विति श्रवणाच्चेति भावः। **सर्वथेति।** यदि जगच्छब्दो जङ्गमपरः कार्यसामान्यपरो वा यदि भुजिः पालनार्थः अदनार्थो वा सर्वथाप्यङ्गुष्ठमात्रः प्राणः

तल्लिङ्गप्रकरणयोर्बाधकाभावादिति भावः। **परमेश्वर एवेति।** जगच्छब्दोऽत्र रूढ्या भूतादिषु लोकेषु वा वर्तते। रूढिसम्भवे योगग्रहणायोगात्। विश्वशब्दश्च भुजिविषयत्वयोग्यसामस्त्यपरः न तु प्राणाहुतिसामस्त्यपरः। सङ्कोचे कारणाभावात्। न च सर्वलोकेश्वरत्वं विश्वभोक्तृत्वं च ब्रह्मणीव प्राणेऽप्यभ्युपगन्तुं शक्यम्। श्रुतिवशादभ्युपगम्यतामिति चेन्न। तथा सति 'इन्द्रो यातोवसितस्य राजा। आत्वा विशन्त्विन्दवः। समुद्रमिव सिन्धवः। न त्वामिन्द्रातिरिच्यते।' इत्यादिश्रुत्यनुसारेणेन्द्रादिष्वपि तयोरभ्युपगन्तव्यत्वेनाव्यवस्थाप्रसङ्गात्। प्राणे तयोरसम्भवाच्च। 'एतस्माज्जायते प्राण' इति ब्रह्मसृज्यत्वेन 'न प्राणेन नापानेन मर्त्यो जीवति कश्चन। इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रिता'विति ब्रह्माश्रयाधीनस्वकार्यकरणशक्तिकत्वेन च **प्राणः** श्रूयते। कथमयमसङ्कुचितसकलजगदनपेक्षेशिता स्यात्। कथं चासङ्कुचितसकलभोक्ता स्यात्। कथं च निरङ्कुशप्रभवितृपरप्रभुशब्दोक्तसकलोत्पादकः स्यात्। भूमविद्यायां प्राणशब्दस्तु जीवपरः। तस्य मुख्यप्राणपरत्वेऽपि जीव इव तत्रापि सर्वाधारत्वमौपचारिकं पितृत्वादिवचनं प्राण एव पित्रादिः न तु शरीरमित्यन्वयव्यतिरेकाभ्यां प्रदर्शनपरम्। तदेतद्भूमविद्यायां स्पष्टीभविष्यति। तस्मादुदाहृतलिङ्गद्वयानुसारात परब्रह्मरूपः शिव एवायमिति भावः। ननु प्राणाग्निहोत्रमन्त्रप्रकरणाम्नानादुपक्रमगतलिङ्गवशाच्च प्राणाहुत्याराधितप्राणविषय एवायं मन्त्रस्स्यादित्याशङ्क्य प्रकरणमविरोधेन सङ्गमयति-**तस्येति। प्राणरूपत्वेनेति।** 'प्राणे निविष्ट' इत्यादिमन्त्रेषु प्राणादिशब्दास्तदन्तर्यामिपर्यन्ताः। तेषामन्तर्यामिण्यपि शक्त्यविशेषादिति भावः। ननु साक्षात्त्वस्यौत्सर्गिकत्वात् प्राणादिप्रवृत्तिनिमित्तसाक्षादाश्रयाः मुख्यप्राणवृत्तय एव तैरभिधीयेरन् प्रसिद्धिप्राचुर्याच्चेत्याशङ्क्य तेषां तदतिलङ्घनेनान्तर्यामिपर्यन्तत्वे प्रमाणमाह-**प्राणानामिति।** 'तेनान्नेनाप्यायस्वे'ति मन्त्रशेषः। 'अङ्गुष्ठमात्रः पुरुष' इति मन्त्रात्प्राक् 'प्राणानां ग्रन्थिरसी'त्यादिमन्त्र अम्नायते। तेन परमेश्वरं प्रति प्रार्थना क्रियते। त्वं खलु प्राणानां ग्रन्थिः ग्रथयिता निश्चितत्वेन व्यवस्थापकोऽसि। अतस्त्वमन्तकस्संहारकर्ता रुद्रो भूत्वा मां प्रविश। तेन कालाग्निरुद्रात्मना रूपेणाशितमन्नं पक्त्वा अन्नवीर्येण मामाप्यायितं कुर्विति मन्त्रार्थः। 'रुद्रो वा एष यदग्निस्तस्यैते तनुवौ घोरान्या शिवान्ये'ति परमेश्वरस्य द्विविधं रूपं प्रसिद्धम्। तस्य भोजनकाले जाठराग्निज्वालाशान्त्यर्थं शिवरूपेणान्तर्भोक्तृतया सन्निधानं 'प्राणे निविष्टोऽमृतं जुहोमी'ति 'शिवो मा विशाप्रदाहाये'त्यादिभिः प्राणाहुतिमन्त्रैः प्रार्थितम्। भोजनानन्तरं जठराभिमर्शनमन्त्रेणानेन भुक्तान्नपरिणामकृतदेहाप्यायनेन प्राणानां निश्चलतया देहेऽवस्थानसिद्धये रुद्ररूपेणान्तःपक्तृतया सन्निधानं प्रार्थ्यते। अतोऽत्र मन्त्राणामन्तर्यामिप्रधानत्वात् 'प्राणे निविष्ट' इत्यादिमन्त्राणां 'प्राणात्मनि त्वय्यभिनिविष्टो भक्तस्सन्नमृतं जुहोमी'त्यादिरर्थो ग्राह्य इति भावः। लिङ्गमुपपादयति-अङ्गुष्ठमात्रेति। अङ्गुष्ठपरिमाणरूपमुपास्यगतं तद्रूपावच्छेदेनाङ्गुष्ठसमाश्रयणमङ्गुष्ठपरिमाणत्वं चोपपद्यत इति भावः। जठराभिमर्शानन्तरं दक्षिणपादाङ्गुष्ठे पाणिजलस्रावणार्थोऽयं मन्त्रः। ततश्च

ब्रह्माण्डमूलभूताधारलोकस्थितकालाग्निरुद्रात्मना पिण्डाधारभूते पादाङ्गुष्ठे परमेश्वरं ध्यात्वा तत्प्रीत्यर्थं पाणिजलस्रावणमनेन मन्त्रेण कर्तव्यमिति पर्यवस्यति। ननु विश्वभुक्त्वं प्राणवायौ न सम्भवतीत्युक्तं तदनुपपन्नम्। 'सर्व एव हार्योजनस्य लिप्सन्त' इत्यत्र सर्वशब्दस्य सोमयागे कर्मकर्तृत्वेन प्रकृतेष्विवात्र विश्वशब्दस्य हविष्ट्वेन प्रकृतेषु प्राणाहुतिद्रव्येषु सङ्कोचसम्भवादित्याशङ्क्याह-**प्राणवायोरिति।** हार्योजनभक्षणे निरङ्कुशसर्वपुरुषान्वयासम्भवात् प्रकरणं सङ्कोचकमङ्गीकृतम्। इह विश्वभुगित्यस्यासङ्कुचितसकलहव्य-कव्यभोक्तृपरमेश्वरविषयत्वसम्भवान्न प्रकरणं सङ्कोचकमङ्गीकर्तव्यमिति भावः। नन्वत्राङ्गुष्ठमात्रस्य परमेश्वरस्योपास्यत्वं व्यवहृतं तदनुपपन्नम्। प्राणाग्निहोत्रकर्मान्वयिदेवतारूपपरमेश्वरप्रकाशकानां मन्त्राणामुपास्यसमर्पकत्वाभावादित्याशङ्कां निराकुर्वन्नधिकरणार्थमुपसंहरति-**अत इति।** कर्माराध्यत्वेन प्रतिपाद्यस्यापि कर्मकाले ध्यातव्यत्वमस्तीत्येतावतोपास्यत्वमुक्तमिति न विरोध इति भावः। कर्मान्वयिदेवताविचारात्मकस्याधिकरणस्य मुमुक्षूपास्यविचारात्मकेऽस्मिन् शास्त्रे प्रवर्तनस्य फलं वैश्वानराधिकरणे प्रदर्शयिष्यामः।।

इति अनवस्थित्यधिकरणम्।।६।।

सङ्गतिप्रदर्शनपूर्वकमुत्तराधिकरणमवतारयति-**सर्वज्ञस्येति।** विभुत्वोपपादकं सर्वज्ञत्वादि-विशेषणत्रयम्। सर्वज्ञत्वं सकलप्रपञ्चापरोक्षीकरणम्। सर्वशक्तिमत्त्वं तदुपादानत्वं सर्वानुग्राहकत्वं तत्सत्तास्फूर्तिप्रदत्वम्।।सू।। **अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्**।।१९।। बृहदारण्योपनिषद्गतं विषयवाक्यमुदाहरति-**अन्तर्यामिब्राह्मण इति।** 'स त आत्मे'ति माध्यंदिनपाठः। 'एष त' इति तु काण्वपाठः-**पृथिवीमारभ्येति।** पृथिवीजलाग्न्यन्तरिक्षवाय्वादित्यदिक्चन्द्रतारकातमः प्रभृतिष्वात्म-पर्यन्तेष्वखिलवस्तुष्वन्तर्यामितया श्रूयमाणः परमेश्वरस्तदन्यो वेति परमेश्वरे हेयसकलप्रपञ्चानुप्रवेशसम्भवासम्भवाभ्यां प्रथमं संशयः। ततस्तदन्यकोटौ जीवो विराट्पुरुषः प्रधानं वेति। पृथिव्याद्यनुप्रवेशस्य जीवादित्रयसाधारण्यात्संशयः। जीवपक्षे तावत्सर्वानुप्रवेशमुपपादयति-**स्वोपार्जितेति।** एकस्य जीवस्य सकलप्रपञ्चानुप्रवेशाभावात्पृथिव्यादिपर्यायगता यच्छब्दास्तदधिष्ठातृजीवविशेषपराः। 'इमं च लोकं परं च लोकं सर्वाणि च भूतानि योऽन्तरो यमयती'त्येकवचनं जीवसमुदायाभिप्रायम्। 'आत्मनि तिष्ठ'न्नित्याद्यात्मेश्वरत्ववन्नियन्त्रन्त-राभावाभिप्रायम्। 'यं पृथिवी न वेदे'त्यादिकं निष्कृष्टस्वरूपाज्ञानाभिप्रायं च जीवे योजनीयम्। द्वितीयपूर्वपक्षमुपपादयतिसकलेति। अस्मिन्पक्षे 'य' इत्येकवचनं विज्ञानात्मनियन्तृत्वं च मुख्यमुपपद्यते। सुबालोपनिषदि 'यस्य पृथिवी शरीरं यः पृथिवीमन्तरे सञ्चरन्यं पृथिवी न वेद यस्यापः शरीर'मित्याद्युपक्र'म्यैष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको

नारायण'इत्यन्तर्यामिणि नारायणपदप्रयोगोऽपि सङ्गच्छते। यद्यत्र विराट्पुरुषः सहस्रशीर्षत्वादिविशिष्टश्चिच्छक्त्यवस्थारूपः परनारायणो विवक्षितः, यदि वा हिरण्यगर्भ उभयथापि सङ्गच्छते। उभयत्रापि नारायणशब्दप्रसिद्धेः प्राग्दर्शितत्वात्। अथवेत्यनेन तृतीयपूर्वपक्षे स्वारस्याभावो व्यञ्जितः। अचेतनस्य प्रधानस्य व्यापकत्वेऽपि तस्मि'न्नदृष्टो द्रष्टा अश्रुतः श्रोता अमतो मन्ता अविज्ञातो विज्ञाते'ति वाक्यशेषे श्रुतानामदृष्टत्वादीनां सम्भवेऽपि द्रष्टृत्वादिनामात्मश्रुतेर्नियन्तृत्वस्य मुख्यतया तस्मिन्नसम्भवात्। ननु परमेश्वरस्यापि व्यापकत्वात्तस्मिन्नपि सर्वप्रपञ्चनियन्तृत्वं सम्भवतीति कथं पूर्वपक्षे तत्प्रतिक्षेप इत्याशङ्क्याह-**विश्वाधिक इति।** अयमाशयः। परमेश्वरस्य सर्वान्तर्यामित्वं पृथिव्यादिस्थानेषु शरीरविशेषवत्तया जीवविभुत्ववादे जीवसाधारणेन व्यापकतामात्रेण वा। आद्ये रेतोमूत्रपुरीषादिसकलहेयवस्त्वनुप्रविष्टशरीरवत्तया परमेश्वरस्य विश्वाधिकत्वभङ्गप्रसङ्गः। द्वितीये नियन्तृत्वासंभवप्रसङ्गः। शरीरवतामेव तक्षादीनां वास्यादिनियन्तृत्वदर्शनात् स्वशरीरनियमनेऽपि तेनैव शरीरेण शरीरवत्त्वात्। न च परमेश्वरोऽपि नियम्यपृथिव्यादिशरीरेणैव शरीरवा'न्यस्य पृथिवी शरीर'मित्याद्याम्नानादिति वाच्यम्। अन्येन नियम्यमानस्य शरीरस्य नियमने शरीरान्तरेण शरीरवत्त्वस्य प्रयोजकत्वदर्शनेन पृथिव्यादिशरीराणां च तत्तदभिमानिजीवैर्नियम्यमानत्वेन तन्नियमने शरीरान्तरावश्यंभावात्। शरीरान्तरं विना स्वमहिमप्रतिष्ठे ब्रह्मणि 'यः पृथिव्यां तिष्ठ'न्नित्यादिषु श्रुतायाः पृथिव्यादिषु स्थितेरुपपादनासम्भवाच्च। अपि च 'अदृष्टो द्रष्टे'त्यादिवाक्यशेषे दर्शनादीनि परमेश्वरविषयसाक्षात्कारश्रवणमनननिदिध्यासनरूपाणि वाच्यानि। 'आत्मा वारे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्यः आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनात्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते' इत्यादिवाक्यानुक्रमणैकरूप्यात्। न च परमेश्वरे श्रवणमननदिदिध्यासनसाक्षात्कारविषयत्वं तद्वत्त्वं च जीव इव सम्भवति। न चात्र दर्शनादीनि चक्षुश्श्रोत्रमनोबुद्धिजन्यज्ञानानि विवक्षणीयानि। तथा विवक्षयापि चक्षुरादिजन्यज्ञानरहिते परमेश्वरे द्रष्टृत्वाद्यनिर्वाहात्। तर्हि दर्शनादीनि रूपालोकनादिरूपाणि विवक्षणीयानीति चेन्न। तथा सति 'नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोते' त्यादिसमनन्तरसन्दर्भस्यानन्वयापत्तेः। न हि परमेश्वरव्यतिरेकेण रूपालोकनादिमानन्यो नास्तीति निषेद्धुं शक्यम्। न च तस्य 'तस्मिन् ग्रामे अयमेक एव सर्वनियामक' इति वाक्यानन्तरं 'नान्यः पुरुषोऽस्ती'ति वाक्यस्य प्राग्वर्णितसर्वनियामकत्वविशिष्टपुरुषान्तरनिषेधपरत्ववत्प्रस्तुत-सर्वनियन्तृत्वादिविशिष्टद्रष्ट्रन्तरनिषेधपरत्वं कल्पनीयम्। तत्र प्रमाणान्तराविरोधाय सङ्कोचकल्पनेऽप्यत्र परमेश्वरान्यविषयत्वेनासङ्कोचसम्भवे सङ्कोचकल्पनायोगात्। अपि च रूपशब्दौ चक्षुश्श्रोत्रयोरिव मनोबुध्द्योर्नासाधारणविषयौ स्तः। येन मननविज्ञानशब्दौ न तत्साक्षात्कारवाचिनौ स्याताम्। ततश्चात्र मन्ता विज्ञातेत्यनयोर्मनननिदिध्यासनपरत्वं मनोबुद्धिकरणकज्ञानपरत्वं वा वाच्यम्।

तत्समभिव्याहारतः श्रोता द्रष्टेत्यनयोरपि वेदान्तश्रवणतन्मूलपरमेश्वरसाक्षात्कारपरत्वं श्रावणचाक्षुषसाक्षात्कारपरत्वं वा वक्तुमुचितम्। अवश्यं च दर्शनश्रवणशब्दौ चाक्षुषश्रावणसाक्षात्कारवाचकावित्येवाभ्युपगन्तव्यम्। न तु रूपशब्दसाक्षात्कारवाचकाविति। तथात्वे 'रूपं दृष्टं शब्दश्श्रुत' इत्यादिप्रयोगाणा'मिन्द्र इन्द्राणीपति'रित्यादिवत् 'घटो दृष्ट'इत्यादिप्रयोगाणां 'वरुण इन्द्राणीपति'रित्यादिप्रयोगवच्चासामञ्जस्यं स्फुटीभवेत्। न च तयोश्चक्षुश्श्रोत्रकरणकज्ञानत्वप्रवृत्तिनिमित्तकत्वे पश्यामि शृणोमीत्यनुभवयोस्तदभानप्रसङ्गः चक्षुश्श्रोत्रयोरयोग्यत्वादिति वाच्यम्। चक्षुःश्रोत्ररूपकरणविशेषप्रयोज्यजातिविशेषयोस्तत्प्रवृत्तिनिमित्तत्वेनोक्तानुभवविषयत्वोपपत्तेः। कथं तर्हि **'पश्यत्यचक्षुः स शृणोत्यकर्णः'** इति **प्रयोगः।** तत्राचक्षुरकर्णइति विशेषणसमभिव्याहारानुपपत्त्या पश्यतिशृणोत्योश्चाक्षुषश्रावणसाक्षात्कारविषयत्वयोग्यसर्वार्थगोचरसाक्षात्कारविषयिणी लक्षणा कल्प्यते। दर्शनादिशब्दो रूपालोकनादिवाचक इत्यङ्गीकारेऽपि हि रूपालोकनविषयत्वयोग्यरूपतदाश्रयादिरूपसर्वार्थगोचरसाक्षात्कारविषयिणी लक्षणा कल्पनीया। अन्यथा 'पश्यत्यचक्षु'रित्यस्य चक्षुरभावेऽपि रूपं साक्षात्करोतीत्यर्थलाभे सति विशिष्य रूपग्रहणसामर्थ्येन तदाश्रयादिसाक्षात्काराभावप्रतीतिप्रसङ्गात्। न चेह तथा 'द्रष्टा श्रोते'त्यादिषु दृशिधात्वादीनां लक्षणा कल्पनीया। तेषां परमेश्वरान्यविषयत्वेन मुख्यार्थपरिग्रहापत्तेः। अतः परमेश्वरादन्योऽयमन्तर्यामीति। सूत्रं व्याकुर्वन् सिद्धान्तयति-**पृथिव्यादीति।** अघिदैवाधिलोकादिष्वन्तर्यामीत्यस्य व्याख्यानं 'पृथिव्याद्यन्तर्यामी'ति। अन्तर्यामिब्राह्मणे पृथिव्यादिस्तनयित्वन्तमधिदैवं यस्सर्वेषु लोकेष्वित्यधिलोकं यस्सर्वेषु वेदेष्वित्यधिवेदं' यस्सर्वेषु यज्ञेष्वित्यधियज्ञं यस्सर्वेषु भूतेष्वित्यधिभूतं प्राणवाक्चक्षुश्श्रोत्राद्यात्मान्तमध्यात्ममधिलोकमधिवेदमधियज्ञं स्तनयित्वादिकं च किंञ्चिन्माध्यन्दिनपाठप्राप्तम्। सर्वान्तरत्वस्य परमेश्वरधर्मत्वं क्व प्रसिद्धमित्याकाङ्क्षायामाह-**अथर्वशिरसीति।** अमृतशब्दोक्तमनादिमुक्तत्वं सर्वान्तरत्वादीत्यादिशब्दग्राह्यमिति दर्शयति-**स त आत्मेति।** विश्वाधिकस्य हेयप्रपञ्चानुप्रवेशो विरुद्ध इत्याशङ्क्य विश्वाधिकत्ववदेव विश्वरूपत्वमपि श्रुतिप्राप्तमङ्गीकरणीयमित्याह-**यथा विश्वाधिक इति।** विरोधपरिहारस्त्वमृतशब्देनैव विकारदोषास्पर्शपरेण सूचित इत्याह-**तद्विकारेति। प्रतिपर्यायमिति।** तत्तदनुप्रवेशप्रयुक्ततत्तद्दोषसंस्पर्शशङ्कापरिहारार्थमेव यत्नेन प्रतिपर्यायममृतशब्दप्रयोगः कृत इत्यर्थः। अथर्वशिरस्यपि 'सोऽन्तरादन्तरं प्रविश' दिति सर्वानुप्रवेशमभिधाय 'यो वै रुद्रस्स भगवा' नित्यादिविबुधकृतपरमेश्वरस्तुतिमुखेन सर्वानुप्रवेशप्रयुक्तसार्वात्म्यप्रपञ्चेन ब्रह्मविष्ण्वादिपर्यायेषु सर्वेष्वपि तत्तदनुप्रवेशप्रयुक्ततत्तद्दोषसंस्पर्शशङ्कापरिहारार्थमेव प्रतिपर्यायमैश्वर्यादिषाड्गुण्यसाम्ग्रयप्रतिपादको भगवच्छब्द इत्याह-**अथर्वशिरसि चेति।** अन्तर्यामिब्राह्मणे अमृतशब्देन प्रपञ्चानुप्रवेशप्रयुक्ततत्तद्दोषासंस्पर्शमात्रमुक्तम्। तदुपपादकमैश्वर्यमथर्वशिरसि

भगवच्छब्देनोक्तम्। तथाच शरीराभावेऽपि स्वतस्सिद्धैश्वर्यवशान्नियन्तृत्वमुपपद्यते। नियमनशक्तिरूपैश्वर्याभिव्यक्तये हि शरीरविशेषापेक्षा। स्वतस्सिद्धे तस्मिन् किं शरीरेण। तत्रतत्र तत्तन्नियमनोपयोगिशरीरविशेषसद्भावेऽपि शक्तिविशेषात्तस्य प्रपञ्चानुप्रवेशप्रयुक्तसुखदुःखानाश्रयणम्। स्वशरीरादिसम्बन्धितया दुःखजनकत्वेन हि प्रपञ्चस्य हेयत्वम्। शक्तिविशेषवन्तं प्रति तज्जननाशक्तस्य तस्य हेयत्वमेवासिद्धम्। एवं च तत्तन्नियमनशक्तिविशेषोपधानेन शरीरविशेषोपधानेन वा तत्रतत्र परमेश्वरस्य स्थितिरप्युपपद्यते। 'अदृष्टो द्रष्टे'त्यादिकं त्वित्थं व्याख्येयम्। 'श्रवणायापि बहुभिर्यो न लभ्यः श्रुतवन्तोऽपि वहवो यं न विद्युः। आश्चर्यो वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलोऽनुशिष्टः'इतिश्रुत्यन्तरदर्शनान्मन्दानां श्रवणमननविज्ञानसाक्षात्काराविषयो भवति। ये धीराः श्रोतृमन्तृविज्ञातृद्रष्टारस्तच्छरीरकस्तन्नियन्तापि भवति। अतोऽन्यः कश्चन श्रवणादिकर्तृशरीरकः स्वतन्त्रस्तन्नियन्ता नास्ति। इति तत्सङ्कल्पोपज्ञैव तद्विषयश्रवणादिसिद्धिरिति। यद्वा। दर्शनादिशब्दाश्चाक्षुषादिज्ञानपराः। अदृष्टादिशब्दाः बहुव्रीहिसमासाः। ततश्च स्वयं चक्षुरादिकरणकज्ञानविषयीकृतार्थरहितश्चक्षुराद्यभावेन तत्करणकज्ञानरहितत्वात्। अथापि द्रष्टा श्रोता मन्ता विज्ञाता च चाक्षुषादिज्ञानगोचरत्वार्हसकलनियमनोपयोग्यशेषविशेषगोचरस्वतस्सिद्धसाक्षात्कारवानन्यस्तथाभूतसाक्षात्कारवान्नास्तीति। यद्वा। अदृष्टादिशब्दास्तत्पुरुषाः। स्वनियम्यदेवमनुष्यपशुपक्षिसरीसृपादिदर्शनश्रवणमननबुद्ध्यविषय एव सन् स्वयं दर्शनादिमान्भवति। स्वनियम्यैस्तैर्ये बहिरिन्द्रियैर्दृश्यन्ते द्रष्टुमशक्या ये शब्देन ज्ञायन्ते तद्गोचरशब्दस्याप्यप्रवृत्त्या ये बुद्ध्या परं निश्चीयन्ते तथा निश्चेतुमप्यशक्याः ये मनःकृत्यसंशयमात्रगोचरा भवन्ति सर्वानापि स्वातन्त्र्येण नियमनार्थं साक्षात्करोति एवंभूतोऽन्यः कश्चिद्दर्शनादिमान्नास्तीति। ननु सर्वत्राप्यस्मिन्व्याख्याने केनचिदवच्छेदेन द्रष्ट्रन्तरादिनिषेधो वैवक्षिको न मुख्यः। स चान्तर्यामिणो जीवत्वाभ्युपगमेन द्रष्ट्रादिशब्दानां चाक्षुषज्ञानादिमत्परत्वाभ्युपगमेन चक्षुष्यत्वनिर्वाहे सम्भवति न युक्त इति चेदुच्यते। असङ्कुचितसर्वप्रपञ्चनियन्तृत्वममृतशब्दोक्तमनादिमुक्तत्वममृतश्रुतिरित्येतत्सर्वं परमेश्वरादन्यत्र न सम्भवतीति तद्वशादन्तर्यामी परमेश्वर इति सिद्धावयं 'नान्योतोऽस्तीत्यादिवाकयशेषस्तत्रैव सङ्गमयितव्यः। तत्सङ्गतिस्सर्वनियन्तृत्वविशिष्टद्रष्ट्रन्तरनिषेधादिपरत्वकल्पन एव लभ्यते। किंचायं वाक्यशेषः प्रकृतस्यान्तर्यामिणस्स्तुत्यर्थतया तदुत्कर्षपर्यवसायी व्याख्येयः। न चान्तर्यामी जीव इत्याङ्गीकृत्यास्य वाक्यशेषस्य जीवादन्यश्चक्षुरादिकरणाधीनज्ञानो नास्तीत्यर्थकल्पने कश्चिदुत्कर्षो वर्णितः पर्यवस्यति। तेन ततोऽन्यस्य परमेश्वरस्य स्वतस्सिद्धसर्वविषयज्ञानसिद्ध्या तदपकर्षस्यैव पर्यवसानात्। तस्मात्प्रस्तुतसकलप्रपञ्चनियन्तृत्वविशिष्टद्रष्ट्रन्तरनिषेधादिपरतयैव व्याख्यानमुचितम्। तस्य समाभ्यधिकराहित्यरूपोत्कर्षपर्यवसायित्वात्। अपि च 'नान्योऽतोऽस्ती'त्य- नन्यशब्दव्युत्पत्त्यनुसारादपि प्रदर्शितव्याख्यानौचित्य-

मनुसन्धेयम्। अन्येतरादिशब्दानां हि प्रतियोगिसदृशे तद्भिन्ने व्युत्पत्तिः। न तु तद्भिन्नमात्रे। अत एव खल्विषुनामके क्रतौ विष्टुतिं प्रकृतिं विधाय श्रुते 'समानमितरत् श्येनेने'ति वाक्य इतरशब्दस्य प्रस्तुतविष्टुतिविकाररूपवैशेषिकाङ्गसदृशपरत्वात्तद्वाक्यं सदृशानां श्येनवैशेषिकाङ्गानां लोहितोष्णीषत्वादीनामतिदेशकम्। न तु श्येने इषौ च साम्येन चोदकप्राप्तानां वैकृताङ्गानामनुवादकमिति पूर्वतन्त्रे वचनातिदेशविचारे सिद्धान्तितम्। यद्यपि वार्तिककारपक्षे विष्टुतिरूपप्राकृताङ्गादिषु 'विष्टुतिं करोती'त्यत्रोद्देश्यत्वेन प्रकृतादितरस्य चोदकसन्निहितस्य प्राकृताङ्गजातस्यानुवादक इतरशब्दो न तु तत्र विधेयत्वेन प्रकृतादिष्वाकार-रूपादिषुवैशेषिकाङ्गादितरस्य लोहितोष्णीषत्वादेः श्येनवैशेषिकाङ्गस्य निर्देशकः। इषौ लोहितोष्णीषत्वादिप्राप्तिस्तु विष्टुतेरन्यस्य ऋत्विगादेः प्राकृताङ्गजातस्य। श्येनसादृश्यविधानेन त्वितरपदार्थानुप्रविष्टतया तत्पक्षे श्येनगतः स्वतन्त्रः। वैशेषिकाङ्गानां कण्टकवितोदनादीनां त्विषौ न प्राप्तिरिष्यते। तथापि प्राकृतविष्टुतिसादृश्यं प्राकृतस्य ऋत्विगादेरस्तीति तत्पक्षेऽपि नेतरशब्दस्य सादृश्यार्थकत्वहानिः। अत एव वार्तिककारैरपि 'स्विष्टकृतोभक्षप्रतिषेधस्स्या'दिति (जै० १०) दाशमिकाधिकरणे गृहमेधीयेष्टावाज्यभागौ यजतीत्येतल्लक्षणया तदितरपरिसङ्ख्यार्थमिति गृहमेधीयाधिकरणपञ्चमपक्षे तद्वाक्यमाज्यभागसदृशयागान्तरमात्रपरिसङ्ख्यापकमित्यङ्गीकृत्य तत्रा'ग्निं स्विष्टकृतं यजती'ति वाक्यस्य स्विष्टकृतस्सदृशशेषकार्यान्तरे परिसङ्ख्यार्थत्वं व्यवस्थापितम्। यस्मा'ददृष्टो द्रष्टे'त्यादिवाक्यशेषानाञ्जस्याभावादप्यन्तर्यामी परमेश्वर इति।। अथोत्तरसूत्रं प्रधानादिपूर्वपक्षत्रयनिराकरणार्थत्वेनावतारयति-**यदुक्तमिति**।।सू०।। **न च स्मार्तमतद्धर्माभिलापाच्छारीरश्च**।।२०।।

इति शिवार्कमणि दीपिका पञ्चममन्तर्याभ्यधिकरणम् समाप्तम्

अथ अदृश्यत्वाधिकरणम्। सू॰ २१–२३ ॥

शाङ्करभाष्यम्

अदृश्यत्वादिगुणको धर्मोक्तेः।।२१।। ''अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुः श्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं तद् भूतयोनिं परिपश्यन्ति धीराः'' (मुण्ड॰ १/१/५/६) इति श्रूयते। तत्र संशयः–किमयमद्रेश्यत्वादिगुणको भूतयोनिः प्रधानं स्यात्, उत शारीरः, आहोस्वित्परमेश्वर इति।।

तत्र प्रधानमचेतनं भूतयोनिरिति युक्तम्; अचेतनानामेव तद्दृष्टान्तत्वेनोपादानात्– ''यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः संभवन्ति। यथा सतः पुरुषात्केशलोमानि तथाऽक्षरात्संभवतीह विश्वम्'' (मुण्ड॰ १/१/७) इति।।

ननु–ऊर्णनाभिः पुरुषश्च चेतनाविह दृष्टान्तत्वेनोपात्तौ, नेति ब्रूमः ; न हि केवलस्य चेतनस्य तत्र सूत्रयोनित्वं केशलोमयोनित्वं चास्ति। चेतनाधिष्ठितं ह्यचेतनमूर्णनाभिशरीरं सूत्रस्य योनिः, पुरुषशरीरं च केशलोम्नामिति प्रसिद्धम्। अपि च पूर्वत्रादृष्टत्वाद्यभिलापसंभवेऽपि द्रष्टृत्वाद्यभिलापासम्भवान्न प्रधानमभ्युपगतम्, इह त्वदृश्यत्वादयो धर्माः प्रधाने संभवन्ति। न चात्र विरुध्यमानो धर्मः कश्चिदभिलप्यते।।

ननु–''यः सर्वज्ञः सर्वविदित्'' (मुण्ड॰ १/१/९) इत्ययं वाक्यशेषोऽचेतने प्रधाने न सम्भवति, कथं प्रधानं भूतयोनिः प्रतिज्ञायते–इति? अत्रोच्यते–''यया तदक्षरमधिगम्यते यत्तदद्रेश्यम्'' इत्यक्षरशब्देनादृश्यत्वादिगुणकं भूतयोनिं श्रावयित्वा पुनरन्ते श्रावयिष्यति–''अक्षरात्परतः परः'', (मुण्ड॰ २/१/२) इति। तत्र यः परोऽक्षराच्छ्रुतः, स सर्वज्ञः सर्ववित्सम्भविष्यति। प्रधानमेव त्वक्षरशब्दनिर्दिष्टं भूतयोनिः। यदा तु योनिशब्दो निमित्तवाची, तदा शारीरोऽपि भूतयोनिः स्यात्; धर्माधर्माभ्यां भूतजातस्योपार्जनादिति।।

एवं प्राप्तेऽभिधीयते–योऽयमदृश्यत्वादिगुणको भूतयोनिः, स परमेश्वर एव स्यात्, नान्य इति। कथमेतदवगम्यते? *धर्मोक्तेः*।। परमेश्वरस्य हि धर्म इहोच्यमानो दृश्यते–"यः सर्वज्ञः सर्वविदि" ति। न हि प्रधानस्याचेतनस्य शारीरस्य वोपाधिपरिच्छिन्नदृष्टेः सर्वज्ञत्वं सर्ववित्त्वं वा संभवति। ननु–अक्षरशब्दनिर्दिष्टाद् भूतयोनेः परस्यैव तत्सर्वज्ञत्वं सर्ववित्त्वं च, न भूतयोनिविषयमित्युक्तम्? अत्रोच्यते–नैवं सम्भवति। यत्कारणम् "अक्षरात्सम्भवतीह विश्वम्" इति प्रकृत भूतयोनिमिह जायमानप्रकृतित्वेन निर्दिश्यानन्तरमपि जायमानप्रकृतित्वेनैव सर्वज्ञं निर्दिशति–"यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायत" इति। तस्मान्निर्देशसाम्येन प्रत्यभिज्ञायमानत्वात् प्रकृतस्यैवाक्षरस्य भूतयोनेः सर्वज्ञत्वं सर्ववित्त्वं च धर्म उच्यत इति गम्यते।।

"अक्षरात्परतः पर" इत्यत्रापि न प्रकृताद् भूतयोनेरक्षरात्परः कश्चिदभिधीयते। कथमेतदवगम्यते? "येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्" (१/२/१३) इति प्रकृत्य तस्यैवाक्षरस्य भूतयोनेरदृश्यत्वादिगुणकस्य वक्तव्यत्वेन प्रतिज्ञातत्वात्। कथं तर्हि "अक्षरात्परतः पर" इति व्यपदिश्यत इति? उत्तरसूत्रे तद्वक्ष्यामः।।

अपि चात्र द्वें विद्ये वेदितव्ये उक्ते–"परा चैवापरा चे" ति। तत्रापरामृग्वेदादिलक्षणां विद्यामुक्त्वा ब्रवीति–"अथ परा यया तदक्षरमधिगम्यत" इत्यादि। तत्र परस्या विद्याया विषयत्वेनाक्षरं श्रुतम्। यदि पुनः परमेश्वरादन्यददृश्यत्वादिगुणकमक्षरं परिकल्प्येत, नेयं परा विद्या स्यात्। परापरविभागो ह्ययं विद्ययोरभ्युदयनिः श्रेयसफलतया परिकल्प्यते। न च प्रधानविद्या निःश्रेयसफला केनचिदभ्युपगम्यते। तिस्त्रश्च विद्याः प्रतिज्ञायेरंस्त्वत्पक्षे; न अक्षराद् भूतयोनेः परस्य परमात्मनः प्रतिपाद्यमानत्वात्। द्वे एव तु विद्ये वेदितव्ये इह निर्दिष्टे।।

"कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवती" (मुण्ड० १/१/३) ति चैकविज्ञानेन सर्वविज्ञानापेक्षणं सर्वात्मके ब्रह्मणि विवक्ष्यमाणेऽवकल्प्यते, नाचेतनमात्रैकायतने प्रधाने, भोग्यव्यतिरिक्ते वा भोक्तरि। अपिच "स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह"-(मुण्ड० १/१/१) इति ब्रह्मविद्यां प्राधान्येनोपक्रम्य परापरविभागेन परां विद्यामक्षराधिगमनीं दर्शयंस्तस्या ब्रह्मविद्यात्वं दर्शयति। सा च ब्रह्मविद्यासमाख्या तदधिगम्यस्याक्षरस्याब्रह्मत्वे बाधिता स्यात्। अपरर्ग्वेदादिलक्षणा कर्मविद्या ब्रह्मविद्योपक्रम उपन्यस्यते ब्रह्मविद्याप्रशंसायै। "प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म। एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्यु ते पुनरेवापियन्ती" (मुण्ड० १/२/७) त्येवमादिनिन्दावचनात्। निन्दित्वा चापरां विद्यां ततो विरक्तस्य

परविद्याधिकारं दर्शयति–''परीक्ष्य लोकान् कर्मचितान्ब्रह्मणो निर्वेदमायान्नास्त्यकृत: कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणि: श्रोत्रियं ब्रह्मनिष्ठम्'' (मुण्ड० १/२/१२) इति।।

यत्तूक्तम्–अचेतनानां पृथिव्यादीनां दृष्टान्तत्वेनोपादानाद् दार्ष्टान्तिकेनाप्यचेतनेन भूतयोनिना भवितव्यम्–इति, तदयुक्तम्; न हि दृष्टान्तदार्ष्टान्तिकयोरत्यन्तसाम्येन भवितव्यमिति नियमोऽस्ति। अपिच स्थूला: पृथिव्यादयो दृष्टान्तत्वेनोपात्ता:, इति न स्थूल एव दार्ष्टान्तिको भूतयोनिरभ्युपगम्यते। तस्माददृश्यत्वादिगुणको भूतयोनि: परमेश्वर एव।।२१।।

विशेषणभेदव्यपदेशाभ्यां च नेतरो।।२२।। इतश्च परमेश्वर एव भूतयोनि:, नेतरौ शारीर:, प्रधानं वा। कस्मात्? *विशेषणभेदव्यपदेशाभ्याम्*।। विशिनिष्टि हि प्रकृतं भूतयोनिं शारीराद्विलक्षणत्वेन–''दिव्यो ह्यमूर्त: पुरुष: स बाह्याभ्यन्तरो ह्यज:। अप्राणो ह्यमना: शुभ्र'' (मुण्ड० २/१/२) इति। न ह्येतद्दिव्यत्वादिविशेषणमविद्याप्रत्युपस्थापितनामरूपपरिच्छेदाभिमानिनस्तद्धर्मान्स्वात्मनि कल्पयत: शारीरस्योपपद्यते। तस्मात्साक्षादौपनिषद: पुरुष इहोच्यते। तथा प्रधानादिपि प्रकृतं भूतयोनिं भेदेन व्यपदिशति–''अक्षरात्परत: पर:'' इति। अक्षरमव्याकृतं नामरूपबीजशक्तिरूपं भूतसूक्ष्ममीश्वराश्रयम् तस्यैवोपाधिभूतं सर्वस्माद्विकारात्परो योऽविकार:तस्मात्परत: पर इति भेदेन व्यपदेशात्परमात्मानमिह विवक्षितं दर्शयति।। नात्र प्रधानं नाम किञ्चित्स्वतन्त्रं तत्त्वमभ्युपगम्य तस्माद् भेदव्यपदेश उच्यते, किं तर्हि? यदि प्रधानमपि कल्प्यमानं श्रुत्यविरोधेनाव्याकृतादिशब्दवाच्यं भूतसूक्ष्मं परिकल्प्येत, परिकल्प्यताम्। तस्माद्भेदव्यपदेशात्परमेश्वरो भूतयोनिरित्येतदिह प्रतिपाद्यते।।२२।।

कुतश्च परमेश्वरो भूतयोनि:? *रूपोपन्यासाच्च*।।२३।। अपि च ''अक्षरात्परत: पर'' इत्यस्यानन्तरम् ''एतस्माज्जायते प्राण'' इति प्राणप्रभृतीनां पृथिवीपर्यन्तानां तत्त्वानां सर्गमुक्त्वा तस्यैव भूतयोने: सर्वविकारात्मकं रूपमुपन्यस्यमानं पश्याम:–''अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिश: श्रोत्रे वाग्विवृताश्च वेदा:। वायु: प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मे'' (मुण्ड० २/१/४) ति। तच्च परमेश्वरस्यैवोचितम्; सर्वविकारकारणत्वात्, न शारीरस्य तनुमहिम्न। नापि प्रधानस्यायं रूपोपन्यास: सम्भवति; सर्वभूतान्तरात्मत्वासंभवात्। तस्मात् परमेश्वर एव भूतयोनि: नेतराविति गम्यते।। कथं पुनर्भूतयोनेरयं रूपोपन्यास इति गम्यते? प्रकरणात्। ''एष'' इति च प्रकृतानुकर्षणात्। भूतयोनिं हि प्रकृत्य–''एतस्माज्जायते प्राण:'' ''एष सर्वभूतान्तरात्मे'' इति वचनं भूतयोनिविषयमेव भवति; यथोपाध्यायं प्रकृत्यैतस्मादधीष्वैष वेदवेदाङ्गपारग इति वचनमुपाध्यायविषयं भवति।। कथं पुनरदृश्यत्वादिगुणकस्य भूतयोनेर्विग्रहवद्रूपं सम्भवति?

सर्वात्मत्वविवक्षयेदमुच्यते, न तु विग्रहवत्त्वविवक्षयेत्यदोषः ''अहमन्नमहमन्नाद'' (तै० ३/१०/६) इत्यादिवत्।।

अन्ये पुनर्मन्यन्ते—नायं भूतयोने रूपोपन्यासः ; जायमानत्वेनोपन्यासात्। ''एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी'' ति हि पूर्वत्र प्राणादि पृथिव्यन्तं तत्त्वजातं जायमानत्वेन निरदिक्षत्, उत्तरत्रापि च ''तस्मादग्निः समिधो यश्च सूर्य'' इत्येवमादि ''अतश्च सर्वा ओषधयो रसाश्चे'' इत्येवमन्तं जायमानत्वेनैव निर्देक्ष्यति, इहैव कथमकस्मादन्तराले भूतयोने रूपमुपन्यसेत्? सर्वात्मत्वमपि सृष्टिं परिसमाप्योपदेक्ष्यति—''पुरुष एवेदं विश्वं कर्मे'' (मुण्ड० २/१/१०) त्यादिना। श्रुतिस्मृत्योश्च त्रैलोक्यशरीरस्य प्रजापतेर्जन्मादि निर्दिश्यमानमुपलभामहे—''हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम'' (ऋ० सं० १०/१२१/१) ति। *समवर्ततेति*।। अजायतेत्यर्थः। तथा ''स वै शरीरी प्रथमः स वै पुरुष उच्यते। आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तते'' ति च। विकारपुरुषस्यापि सर्वभूतान्तरात्मत्वं सम्भवति; प्राणात्मना सर्वभूतानामध्यात्ममवस्थानात्। अस्मिन् पक्षे ''पुरुष एवेदं विश्वं कर्मे'' त्यादिसर्वरूपोपन्यासः परमेश्वरप्रतिपत्तिहेतुरिति व्याख्येयम्।।२३।।

इति शाङ्करभाष्यम् षष्ठमदृश्यत्वाधिकरणम् समाप्तम्

वार्तिकम्

अदृश्यत्वादिगुणको धर्मोक्तेः॥२१॥ "द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवापरा च॥४॥ तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यत" इत्युक्तवा किं तत् पराविषयोऽक्षरम्? इत्यपेक्षायां मुण्डके पठयते–"यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं तद् भूतयोनिं परिपश्यन्ति धीरा"–इति। तत्र अद्रेश्यम्=ज्ञानेन्द्रियाविषय इति यावत्। अग्राह्यम्=कर्मेन्द्रियाविषयः। अगोत्रम्=काश्यपादिगोत्रशून्यम्, कारणरहितमिति वा। अवर्णम्=ब्राह्मणत्वादिजातिहीनम्। न केवलमिन्द्रियाणामविषयः, तान्यप्यस्य न सन्तीत्याह–*अचक्षुःश्रोत्रमिति*॥ अनेन बुद्धीन्द्रियाणि सर्वाणि निषिद्धयन्ते; चक्षुः श्रोत्रयोस्तदुपलक्षणार्थत्वात्। एवमपादमिति कर्मेन्द्रियाणि। नित्यम्=अविनाशि। विभुम्=व्यापकम्, प्रभुमिति वा। व्यापकत्वे हेतुः–सर्वगतम्; सर्वकारणत्वात्। सुसूक्ष्मम्=आकाशादि लोके सूक्ष्ममिति व्यवह्रियते; इन्द्रियाविषयत्वात्, तदपेक्षयेदमतिसूक्ष्मम्; दुर्विज्ञानत्वादित्यर्थः। किं तत् परिणामिनित्यम्? नेत्याह–तदव्ययम्=कूटस्थनित्यमित्यर्थः। यदेवम्, तद् भूतयोनिम्=भूतानामाकाशादीनां कारणम्। अक्षरम्। धीराः=विवेकिनः परिपश्यन्ति=साक्षात्कुर्वन्ति। तदनेन प्रमाणमप्यक्षरे दर्शितं भवति॥

तत्र सन्देहः–किमयमदृश्यत्वादिगुणको भूतयोनिः परपरिकल्पितं प्रधानं स्यात्, किं वाऽव्याकृतम्, अथवा जीवः, आहोस्वित् परं ब्रह्म–इति। तदर्थं चायं विचारः–किं "यः सर्वज्ञः सर्वविदि" ति वाक्यशेषेणाक्षरस्य धर्म उच्यते, उत ततोऽन्यस्य–इति। तदर्थमप्येतद्विचारणीयम्–कि "मक्षरात् परतः पर" इत्यत्र परस्मादक्षरात् परं प्रकृतमक्षरमुच्यते, किं वाऽन्यत्–इति॥

ननु–"ईक्षतेर्नाशब्दमि" त्यत्र भूतयोनेश्चेतनत्वं साधितम्, तत् कुतोऽत्र तस्य प्रधानत्वशङ्का? नैष दोषः ; तस्याप्यत्राक्षेपात्। यद्यत्र दृष्टान्तसारूप्येणाचेतनो भूतयोनिः सेत्स्यति, तदा "सर्वशाखाप्रत्ययं चोदनाद्यविशेषादि" ति न्यायेनैतदनुसारेण तदर्थं निर्णयादौपचारिकमेव

तत्रेक्षणश्रवणमिति पूर्वपक्षयितुराशयः। तसमादुपपन्नः संशयः।। ननु–तथापि नोपपन्नः ; जीवस्य भूतयोनित्वानुपपत्तेरिति–चेत्, नैष दोषः ; योनिशब्दस्योपादाननिमित्तसाधारणप्रयोगदर्शनात्, जीवस्य तु स्वादृष्टद्वारा भूतनिमित्तत्वात्। ''यत् सप्तान्नानि मेधया प्रजयाऽजनयत्पिते'' त्यादिश्रुतेः संभवत्यत्र जीवस्यापि भूतयोनित्वमिति।।

किं प्राप्तम्? प्रधानमिह भूतयोनिरिति प्राप्तम्। कुतः? तद्धर्माभिलापात्। अन्तर्यामिवाक्ये हि द्रष्टृत्वाद्यतद्धर्माभिलापाद् न प्रधानं परिग्रहीतम्, इह तु नास्त्यतद्धर्माभिलापः, प्रत्युतादृश्यत्वादिलक्षणतद्धर्माभिलापोऽस्ति ननु–इदमदृश्यत्वादि न प्रधानधर्मत्वेन विनिगन्तुं शक्यते. ब्रह्मण्यपि तस्य संभवादिति–चेत्, न; ऊर्णनाभ्यादिदृष्टान्तसारूप्यस्यैव प्रधाने तदनुगमकस्य सत्त्वात्। तदिदमुक्तम्–*अचेतनानामेव तस्य दृष्टान्तत्वेनोपदेशादिति*।। ननु–ऊर्णनाभ्यादेश्चेतनत्वाद् ब्रह्मसारूप्यमेव तद्दृष्टान्तेऽस्ति, नैष दोषः ; तत्र चेतनांशस्य तन्त्वादिनिमित्तत्वेऽप्युपादानत्वाभावात्, ''सन्दिग्धे च वाक्यशेषादि'' ति न्यायात्। तदिदमभिप्रेत्योक्तम्–*न हि केवलस्येत्यादि*।। तस्मात् दृष्टान्तसारूप्येण भूतयोनेरचेतनत्वोपस्थितौ तद्धर्माभिलापात् प्रधानत्वमध्यवसीयते। यदि च परपरिकल्पितप्रधानस्याप्रामाणिकत्वान्नह भूतयोनित्वेन परिग्रहः कर्तुं शक्यत इत्याग्रहः, तर्हि श्रुत्यन्तरपठितमव्याकृतमेवास्तु भूतयानिः ; ''तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियते'' ति च श्रुत्यन्तरम्। यदि चात्र योनिशब्दो निमित्तवाची यथाकथञ्चित् व्याख्यायेत, अस्तु तर्हि जीव एव भूतयोनिः ; तत्र तेषां स्तुत्यर्थत्वेन ब्रह्मभावविक्षयोपपत्तेः।।

ननु–''यस्सर्वज्ञः सर्वविदि'' ति वाक्यशेष एतेषु पक्षेषु नोपपद्यते, भवेदनुपपत्तिः ; यद्यक्षरस्य धर्मास्तेनोच्येरन्। न चैतदस्ति। किं तर्हि? ''अक्षरात् परतः पर'' इत्युत्तरमन्त्रेऽक्षरात् भूतयोनेः परतया श्रुतो यः, तस्य धर्मा उच्यन्ते। तस्य च ब्रह्मत्वादुपपन्नाः सर्वज्ञत्वादयो धर्माः। तस्माद् नादृश्यत्वादिगुणकमिह परं ब्रह्मेति।।

एवं प्राप्ते पठति–*अदृश्यत्वादिगुणको धर्मोक्तेरिति*।। योऽयमदृश्यत्वादिगुणको भूतयोनिरक्षरत्वेनाभिहितः, स परमात्मैव; नान्यः। कुतः? धर्मोक्तेः=''यः सर्वज्ञ'' इत्यादिवाक्यशेषेण सर्वज्ञत्वादेस्तद्धर्मस्योक्तत्वादित्यर्थः। न हि प्रधानाव्याकृतयोर्जीवस्य वा किञ्चिज्ज्ञस्य सर्वज्ञत्वादिरुपपद्यते। ननु–अक्षरशब्दनिर्दिष्टाद् भूतयोनेः परस्यैव सर्वज्ञत्वादिगुण उच्यते–इत्युक्तम्, सत्यमुक्तम्, न तद् युक्तम्; यतः–''यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः संभवन्ति। यथा सतः पुरुषात् केशलोमानि तथाऽक्षरात् संभवतीह विश्वम्'' इति प्रकृतमक्षरं दृष्टान्तपूर्वकं

भूतयोनित्वसिद्धये जायमानविश्वप्रकृतित्वेन निर्दिश्यानन्तरं पुनस्तमेव जायमानहिरण्यगर्भादिप्रकृतित्वेन सर्वज्ञं निर्दिशति श्रुतिः–"यः सर्वज्ञ" इत्यादिना। तस्माद् जायमानप्रकृतित्वनिर्देशसामान्येन भूतयोनेरत्र प्रत्यभिज्ञानात् तस्यैव सर्वज्ञत्वादिधर्म उच्यत इति युक्तम्। अपिच यच्छब्दो हि संनिहित पूर्वप्रकृतपरामर्शी। सनिहितः पूर्वप्रकृतश्चाक्षरो तयोनिः, अतोऽपि स एव सर्वज्ञ इत्यभिधीयते। तदयमर्थोऽस्य मन्त्रस्य–योऽयं प्रकृतः संनिहितो विश्वप्रकृतित्वेनोपन्यस्तो भूतयोनिः, यस्य च भूतयोनेर्ज्ञानमयं तपः=ज्ञानविकाररूपमालोचनम्; "तदैक्षत बहु स्यां प्रजायेये" ति श्रुत्यन्तरात्, स सर्वज्ञः सामान्यतः, सर्वविच्च विशेषत इत्यर्थः। न ह्यसर्वज्ञस्य सृज्यमानसर्वविषयं ज्ञानमयमालोचनमुपपद्यत इत्याशयः। इतोऽपि स सर्वज्ञः, यतस्तस्मादेवाक्षरादपञ्चीकृतपञ्चमहाभूतद्वारा तद् ब्रह्म सर्वभूतगुहाशयं हिरण्यगर्भाख्यं सर्वज्ञम्,–"ज्ञानमप्रतिघं यस्ये" ति स्मरणात्, जायते=उत्पद्यते। न केवलं हिरण्यगर्भ एव तत उत्पद्यते, किं तर्हि? नामरूपमपन्नं च। नाम=नामधेयम्, रूपम्=रूपधेयम्, नामरूपात्मकविश्वमिति यावत्; अन्नम्=विराट्; भोग्यत्वात्, जायत इति चेनानुषज्यते। तस्मात् प्रकृतभूतयोनिरेव सर्वज्ञत्वादिधर्मकः, नान्य इत्यध्यवसीयते। एवं च सति भूतयोनिरेव परं ब्रह्म–"अक्षरात् परतः पर" इत्यत्राकाशादिकार्यात् परतोऽक्षरादविद्याशक्तेरव्याकृतात् परतयाऽभिधीयते, नान्यत्; प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गात्। तदिदमुक्तम्–*"अक्षरात् परतः पर" इत्यत्रापि न प्रकृताद् भूतयोनेरक्षरात् परतः कश्चिदभिधीयत इति*।। कथमेतदवगम्यत इति? यथा देवदत्तादयं विष्णुमित्रः पर इत्युक्तं देवदत्ताद् विष्णुमित्रो भिन्न इत्यध्यवसीयते। तत् कस्य हेतोः? एकस्यैवावध्यवधिमद्भावविरोधात्, एवं प्रकृतेऽपि "अक्षरात् परतः पर" इति नाक्षरात् परतया भूतयोनिरध्यवसांतु शक्यते; अक्षरस्यैव भूतयोनित्वेन प्रकृतत्वात्, तत्परस्य ततो भिन्नत्वादिति प्रष्टुरभिप्रायः। अक्षरात् परस्य भूतयोनेरन्यत्वे प्रकृतहानाप्रकृतप्रक्रिये प्रसज्येयातामित्यभिप्रायेणोत्तरमाह–*येनाक्षरमिति*।। प्रोवाच=प्रब्रूयादित्यर्थः। छन्दसि कालनियमाभावात्। पूर्वोक्तव्याख्यानप्रकारमविद्वान् स्वाशयमुद्भावयति–*कथं तर्हीति*।। प्रकरणाद् वाक्यस्य बलवत्त्वादित्यभिप्रायः। अत्राविद्याशक्तैरेवाव्याकृतावस्थाया अवधित्वेन निर्देशः, न प्रकृतभूतयोनेः ; तद्वत्वेनैव तत्परतया तस्य निर्देशात्। अतो न वाक्यविरोध इत्याह–*उत्तरसूत्रे तद्वक्ष्याम इति*।। अपिच यदि भूतयोनिरुक्तलक्षणः प्रधाना द्यन्यतमः, न ब्रह्म तदा 'परे' ति तद्विषयविद्यायाः समाख्या बाध्येत; निःश्रेयसफलत्वेन तस्याः परत्वस्य विवक्षितत्वात्, अभ्युदयनिःश्रेयसफलभेदेन विद्ययोः परापरविभागकल्पनात्, "अन्यत् श्रेयोऽन्यदुतैव प्रेयस्ते उभे नानार्थे" इत्यादि श्रुतेः, ब्रह्मविद्यायाश्चान्यत्र निःश्रेयससाधनत्वाभावात्, "तमेव विदित्वे" तिश्रुतेः। न च–भूतयोनिविद्याया

अब्रह्मविषयत्वेन साक्षान्निःश्रेयसासाधनत्वेऽपि परात् परब्रह्मविद्याहेतुत्वेन परम्परयाऽस्ति तत्साधनत्वम्; एवं सति परापरविद्याविभागो नोपपद्यते–''द्वे विद्ये वेदितव्ये परा चैवापरा चे'' ति; अपराया अपि निःश्रेयससाधनत्वेन परविद्यात्वसंभवात्। न च–एवं सत्यक्षरात् परस्य ब्रह्मण एवास्तु परविद्याविधानविषयत्वम्, अक्षरस्य तु भूतयोनेरपरविद्याविषयत्वमेवेति–वाच्यम्; ''अथ परा यया तदक्षरमधिगम्यत'' इत्यक्षरविषयत्वेनैव तस्यां परत्वावधारणात्।।

एतेन–परापरविलक्षणत्वमक्षरविद्यायाः–प्रत्युक्तम्; ''द्वे विद्ये वेदितव्ये'' इति प्रतिज्ञाविरोधाच्च, तिस्रो विद्या वेदितव्या इति प्रतिज्ञाप्रसङ्गाच्च। न च–हविरुभयत्ववद् द्वित्वमविवक्षितमिति–वाच्यम्; ''दण्डी प्रैषवानन्वाहे'' मिवदत्र विद्याविशेषणस्य द्वित्वस्यैव विधेयतया विवक्षितत्वेन तद्वैलक्षण्यात् निमित्तस्यार्तेर्हविर्मात्रेण विशेषणेन व्यवच्छेदसिद्धेर्निराकाङ्क्षत्वेन पुनरुभयत्वेन विशेष्टुमशक्यत्वात्। ''रक्तः पटो भवती'' त्यत्र रक्तत्ववदार्तेरनाकाङ्क्षेत्वेऽपि उभयत्वं तामाकाङ्क्षतीति चेत्, न; क्रियानुवादेनानेकगुणविधानानुपपत्तेः, व्यापारभेदे च वाक्यभेदापत्तेः। एतेन–उभयत्वस्य हविषो विशेषणत्वमपि–प्रत्युक्तम्; वाक्यभेदापत्तेः, रक्तपटस्थले तु भावनाया विधेयत्वस्य क्रयभावनावदनेकगुणविशिष्टतद्विधानसंभवाद् युक्तमुत्थाप्याकाङ्क्षयाऽपि तत्रान्वय इति। तस्माद् युक्तोभयत्वस्य विशेषणत्वेन वाक्यार्थेऽन्तर्भावितो ग्रहैकत्ववत् छत्रिवद्वोभयानुभयोपलक्षणत्वेनाविवक्षा। तदेव हि विवक्षितमित्युच्यते–यत् स्वात्मानं वाक्यार्थेऽन्तर्भावयत् तं विशिनष्टि, यथा–''अग्नीषोमीयं पशुमालभेते'' त्यत्र पश्वेकत्वम्, उभयत्वं तु न तथेत्युक्तम्। अत्र तु 'द्वे' इति विशेषणस्यावधारणार्थत्वात्, अन्यथा तद्वैयर्थ्यात्, वाक्यस्य तन्मात्रपरत्वादित्युक्तत्वाच्च नोभयत्वतुल्यता। तस्माद् विषमो दृष्टान्तः।।

न च–ब्रह्मविवक्षैवास्मिन् प्रकरणे नास्तीति–वाच्यम्; ''कस्मिन्न भगवो विज्ञाते सर्वमिदं विज्ञातं भवती'' ति प्रश्नस्य सर्वात्मके ब्रह्मणि विवक्ष्यमाणेऽवकल्पनात्, प्रधानाव्यक्तयोरचेतनमात्रात्मकत्वात्, जीवस्य च भोक्तुर्भोग्यव्यतिरिक्तत्वात् तद्विज्ञानेन सर्वविज्ञानासंभवात्। अपि च मुण्डकादौ ''ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य कर्ता भुवनस्य गोप्ता। स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह।।१।। अथर्वणे यां प्रवदेत ब्रह्माऽथर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम्; स भरद्वाजाय सत्यवाहाय प्राहे'' त्यादिना ब्रह्मविद्यास्तुतये तत्संप्रदायकथनपुरस्सरं प्राधान्येन ब्रह्मविद्यामेवोपक्रम्य परापरविभागेन परविद्यामक्षरविषयां दर्शयन् तस्यात्र ब्रह्मविद्यात्वं दर्शयति। तत्र यदि तद्विषयस्याक्षरस्याब्रह्मत्वं स्यात्, तदा 'ब्रह्मविद्या' इति तस्याः समाख्यानं बाध्येत।।

ननु–यथा ब्रह्मविद्योपक्रमेऽपि ऋग्वेगादिलक्षणा कर्मविषयाऽपराऽपि विद्या ततो भिन्ना कथ्यते,

एवमपरापि तद्भिन्नाऽस्तु; तथाच न समाख्याविरोध इति–चेत्, न; ब्रह्मविद्यास्तुत्यर्थतयैवापरविद्याया अत्रोपन्यासात्, "प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म। एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति" इत्यादिप्रबन्धेन तन्निन्दादर्शनात्। न च–अपरविद्यावत् परविद्यापि ब्रह्मविद्यास्तुतयेऽस्त्विति–वाच्यम्; अपरविद्यातत्साधनफलेभ्यो विरक्तं प्रति–"परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायाद् नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" इत्यनेन परविद्याधिकारस्यैव दर्शितत्वात। द्वितीयमुण्डकादावपि (कठोपनिषदि द्वितीयवल्ल्यामपि) अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुषं सिनीतः। तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते।।१।। श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ संपरीत्य विविनक्ति धीरः। श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते" इत्यादिना च पुनरपरविद्यानिन्दापुरस्सरं परविद्याया एव स्तुत्वात् तस्या एवाधिकारनिश्चयात्, 'यद्धि स्तूयते, तद्विधीयत' इति न्यायात्। तस्माद् ब्रह्मविद्यैव परविद्या, न ततोऽन्येति सिद्धम्। यदप्युक्तम्–अचेतनस्य भूतयोनित्वे पृथिव्यादिदृष्टान्तसारूप्यं लभ्यते–इति, तदयुक्तम्; दृष्टान्तदार्ष्टान्तिकयोः सर्वसारूप्यस्याविवक्षितत्वात्, तथा सति तयोरैक्यप्रसङ्गेन तद्भावोच्छेदापत्तेः, अनुच्छेदे भूतयोनेरचेतनत्ववत् स्थौल्याद्यापत्तेश्च। तच्चानिष्टम्; प्रधानादेरपि तदनभ्युपगमात्। यत्किञ्चित्सारूप्यविविवक्षायां तु ब्रह्मण्यपि तदस्त्येवेति न काचिदनुपपत्तिः। तस्माददृश्यत्वादिगुणको भूतयोनिः परमेश्वर एव।।२१।।

विशेषणभेदव्यपदेशभ्यां च नेतरौ।।२२।। आभ्यां च हेतुभ्यां पर ब्रह्मैव भूतयोनिः, नाव्याकृतजीवौ। काभ्याम् विशेषणभेदव्यपदेशाभ्याम्। जीवाव्याकृताभ्यां विलक्षणत्वेन हि प्रकृतं भूतयोनिं विशिनष्टि शास्त्रम्–"दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः। अप्राणो ह्यमनाः शुभ्रोऽक्षरात् परतः पर" इति। न हि शारीरस्य दित्वत्वादिविशेषणमुपपद्यते, न वाऽव्याकृतस्य पुरुषत्वमक्षरात् परत्वं च। न हि स्वयमेव स्वस्मात् परः ; अक्षरपदेनाव्याकृताभिधानाद् ब्रह्मज्ञानमन्तरेण कारणान्तरादविनाशित्वात्, अन्यस्याक्षरस्यात्रासंभवात्। अयमेव च भेदेन व्यपदेशः; स्वस्मात् स्वस्य परत्वासंभवादित्युक्तत्वात्। शारीरात्तु भेदेन व्यपदेशः=दिव्यत्वादितद्भेदकधर्मव्यपदेश एव। ननु–एवं तर्हि हेतुद्वयाभिधानं व्यर्थम्; एकतराभिधानेनान्यतरलाभात्। विशेषणं हि व्यावर्त्यभेदनियतम्। व्यावर्त्यभेदश्च विशेषणनियत इति–चेत्, सत्यम्; तथापि सुखप्रतिपत्तय उभयोपन्यासः। यद्वा–जीवाव्याकृतयोर्निराकरणाय यथासङ्ख्यं हेतुद्वयम्। तथा व्याख्यातं भाष्ये। तत् किं पराभिमतं स्वतन्त्रं प्रधानमक्षरपदाभिधेयम्। तथाच सति न तस्याशब्दत्वमिति, नेत्याह–*नात्र प्रधानं नाम किञ्चिदिति*।।२२।।

रूपोपन्यासाच्च।।२३।। अत्र वृत्तिकारीयव्याख्यानमुपन्यस्यति– *अपिचेत्यादि*।। तत्र दोषाभिधानपुरस्सरं स्वमतमाह– *अन्ये पुनरेवं मन्यन्त इत्यादिना*।। *इहैव कथमकस्मादिति*।। तथाच जायमानसंनिधानात्–''तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायत'' इति जायमानत्वेनोपन्यस्तस्यैव हिरण्यगर्भाख्यस्य ब्रह्मण एतद्रूपमुपदिश्यते–''अग्निर्मूर्धे'' त्यादि, न परस्य ब्रह्मणो भूतयोनेरित्याशयः। ननु–संनिधानात् प्रकरणं बलवत्, तच्च भूतयोनेः, इति तस्यैव प्रकरणेन संनिधापितत्वाद् रूपोपन्यासो युक्तः। न च–विग्रहवत्ताश्रुतेः परमात्मन्यनुपपन्नत्वात् तया प्रकरणबाधे सति निष्प्रत्यूहं संनिधानेन जायमानरूपसमर्पणमिति–वाच्यम्; विग्रहवत्ताश्रुतेः परमात्मनः सर्वात्मकत्वोपदेशपरत्वेन स्वार्थपरत्वाभावात् तया प्रकरणबाधानुपपत्तेरिति–चेत्, तत्राह– *सर्वात्मत्वमपीति*।। तथाच ''अग्निर्मूर्धे'' त्यादिविग्रहवत्ताश्रुतेरनुवादत्वप्रसङ्गेन सर्वात्मत्वपरत्वासंभवात्, श्रुत्यर्थे सम्भवति लक्षणाया अन्याय्यत्वाच्च युक्तस्तया प्रकरणस्य बाध इत्याशयः। ननु–त्रैलोक्यशरीरस्य प्रजापतेरस्य स्वयंभूत्वप्रसिद्धेर्जायमानत्वमसिद्धमिति, नेत्याह– *श्रुतिस्मृत्योश्चेति*।। तथाचायोनिजत्वमात्रेण स्वयंभूत्वप्रसिद्धिरित्याशयः। ननु–प्रजापतिरूपोपन्यासोपक्षेपे मन्त्रस्य तुरीयपादो न यथार्थः स्यात्। तथाच श्रुतिबाधस्यावश्यकत्वे प्रकरणानुग्रह एव न्याय्य इति, नेत्याह– *विकारपुरुषस्यापीति*।। का तर्हि सूत्रस्य गतिः? तत्राह– *अस्मिन् पक्ष इति*।।

किं भवति प्रयोजनम्? उच्यते; यदा पूर्वः पक्षः, तदाऽव्याकृतं जीवो वा वेदोक्तगुणको महते फलायोपास्यतया निर्दिश्यते, तदन्यतरदुपास्यम्। अथ सिद्धान्तः, ब्रह्मैव ज्ञेयत्वेन निर्दिश्यते, इति, तदेव ज्ञेयमिति।।

इति वार्तिकम् षष्ठमदृश्यत्वाधिकरणम् समाप्तम्

प्रदीपः

अदृश्यत्वादिगुणको धर्मोक्तेः।।२१।। अदृश्यत्वादिगुणकः, परमात्मा, उच्यमानपरमात्मधर्मवत्त्वादिति सौत्रयोजना।।

पूर्वाधिकरणेऽतद्धर्माभिलापेन प्रधानात्मवादे निरस्ते यत्र नातद्धर्माभिलापः, तत्राक्षरविद्यायामक्षरपदेन प्रधानस्यैव ग्रहणं स्यादित्याक्षेपसङ्गत्येदमधिकरणं प्रवर्तते। अत्र निर्णयवाक्यगतब्रह्मलिङ्गेन तद्वाक्यशेषगतब्रह्मलिङ्गानां तिरोभावादस्पष्टब्रह्मलिङ्गत्वम्। इदमपि निर्गुणब्रह्मपरमेवाधिकरणम्। सर्वत्रप्रसिद्धाधिकरणे ह्युपक्रमगतब्रह्मशब्देन यौगिकमनोमयादिपदार्थनिर्णयः कृतः, अत्र तु स्ववाक्य एव भूतयोनिपदेन प्रधाननिर्णयाद् न तेन गतार्थता। अत्त्रधिकरणे तु स्ववाक्यैकदेशान्वयानुपपत्त्यैव ब्रह्मपरत्वं निर्धारितम्, अत्र तु न स्ववाक्ये ब्रह्मासाधारणधर्मा दृश्यन्ते, इति न तेनापि गतार्थत्वम्। एतेन–गुहाधिकरणमपि–व्याख्यातम्; उपक्रमानुसारेण तत्रोपसंहारनयनात्। अत्र तूपक्रमोऽपि प्रधानवादानुगुण एवेति पूर्वपक्षानुगुण्यमेव तस्याधिकरणस्य भवेत्। अन्तराधिकरणमप्यत एव व्याख्यातम्; ब्रह्मासाधारणधर्माणां बहूनामत्राभावात्। अन्तर्याम्यधिकरणं तु तद्धर्माभिलापसहकृतातद्धर्माभिलापस्थल एव ब्रह्मपरत्वं व्यवस्थापयति, न चात्र तथा। अस्पष्टब्रह्मलिङ्गात्वात्तु न पूर्वपादगतेनाधिकरणेन केनापि गतार्थताशङ्कावसर इति युक्तोऽधिकरणान्तरारम्भः। अत्रापि–"यः सर्वज्ञः सर्वविदि" त्यादिनाऽक्षरवाक्यस्य भिन्नवाक्यत्वं वैकवाक्यत्वं वेति संशयो वर्तते। तत्र च भिन्नवाक्यत्वपक्ष एव युक्तः ; अक्षरात् परतः परस्यैव सर्वज्ञत्वस्य स्पष्टमवगमादित्यधिकाशङ्कापि वर्तत एवेति मन्तव्यम्।।

अत्रानुसन्धेयानि विषयवाक्यानि मुण्डके श्रूयमाणानीमानि–शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ। कस्मिन्न भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति। तस्मै स होवाच। द्वे विद्ये वेदितव्ये परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते। यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुः

श्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं तद्भूतयोनिं परिपश्यन्ति धीराः। यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यमोषधयः संभवन्ति। यथा सतः पुरुषात् केशलोमानि तथाऽक्षरात् संभवतीह विश्वम्। तपसा चीयते ब्रह्म ततोऽन्नमभिजायते। अन्नात् प्राणो मनः सत्यं लोकाः कर्मसु चामृतम्। यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते।। इति प्रथममुण्डके प्रथमः खण्डः।। "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन।। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्।।१२।। तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय।। येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्।।१३।। इति प्रथममुण्डके द्वितीयः खण्डः।। तदेतत्सत्यं यथा प्रदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः। तथाऽक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति।।१।। दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः। अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः।।२।। एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च।। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी।।३।।९।।............पुरुष एवेदं विश्वं कर्म तपो ब्रह्मपरामृतम्। एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य।।१०।। इति द्वितीयमुण्डके प्रथमः खण्डः।। आविः संनिहितं गुहाचरं नाम महत्पदमत्रैतत्समर्पितम्। एजत्प्राणन्निमिषच्च यदेतज्जानथ सदसद्वरेण्यं परविज्ञानाद्यद्वरिष्ठम् प्रजानाम्।।१।। यदर्चिमद्यदणुभ्योऽणु च यस्मिन् लोका निहिता लोकिनश्च।। तदेतदक्षरं ब्रह्म स प्राणस्तदु वाङ् मनः।। तदेतत्सत्यं तदमृतं तद्वेद्धव्यं सोम्य विद्धि।।२।। धनुर्गृहीत्वौपनिषदं सहास्त्रं शरं ह्युपासानिशितं सन्दधीत।। आयम्य तद्भावगतेन चेतसा लक्ष्यं तदेवाक्षरं सोम्य विद्धि।।४।। प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते। अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेदि" ति।।

अत्राक्षरपदम्–(१) "अथ परा यया तदक्षरम्" (२) "अक्षरात् संभवतीह विश्वम्" (३) "येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्" (४) "तथाऽक्षराद्विविधाः सोम्य भावाः" (५) "अक्षरात् परतः परः" (६) "तदेतदक्षरं ब्रह्म स प्राणः" (७) "लक्ष्यं तदेवाक्षरं सोम्ये" ति वाक्येषु दृश्यते। तत्र यदि सर्वाण्यक्षरपदान्येकार्थानि, तर्हि विरुद्धमिदम्; "यतोऽक्षरात् परतः पर" इत्यत्राक्षरपदं न ब्रह्मपरमिति तु सिद्धान्तिनामपि संमतम्। सति चैवमक्षरादित्यात्रोभयसंमताक्षरपदार्थ एव सर्वेषु वाक्येष्वक्षरपदार्थ इति पूर्वपक्षः। तत्र प्रथमद्वितीयवाक्ययोश्चतुर्थपञ्चमवाक्ययोश्चाक्षरपदस्य प्रधानपरत्वे न कापि बाधा, तृतीयषष्ठसप्तमेषु त्रिषु वाक्येषु पुरुषपदसामानाधिकरण्यान्न प्रधानपरत्वं युक्तमिति प्रतीयते। तत्र च विप्रतिषेधे भूयसां स्यात् स्वधर्मत्वमिति न्यायेनैकवाक्यतापक्षेऽपि प्रधानपरत्वमेव युक्तम्,

भिन्नवाक्यतायां तु न कापि हानिरिति पूर्वपक्षाशयः। "यः सर्वज्ञ" इत्यादिवाक्यानां तु अक्षरात् परतः पर एव विषयः ; यतः–"तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायत" इति वाक्यस्य सर्वज्ञवाक्यानन्तरस्य "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चे" ति "अक्षरात् परतः पर" इत्येतदमन्तरस्य चैकवाक्यताप्रत्यभिज्ञानादवगम्यते प्रधानेऽपि पुरुषोपकारकत्वेन पुरुषपदं लाङ्गुलं जीवनमितिवद् व्यापकत्वाद् ब्रह्मपदं च न विरुद्धम्। "द्वे विद्ये" इति विद्याद्वयस्यैव प्रतिज्ञाऽपि "अक्षरात् परतः पर" इतिप्रतिपाद्यमानपरविद्याशेषतयैवाक्षरवाक्यानां प्रवृत्तत्वाद् न विरुद्धा। अत एव परविद्येत्येव समाख्या, नाक्षरविद्येति। अक्षरविद्याया ब्रह्मविद्यात्वेन व्यपदेशोऽपि तत्साधनत्वनिबन्धनैवेति न कोऽपि दोष इति पूर्वपक्षरीत्या प्रकरणसंशुद्धिः। तदेतत्सर्वं विषयवाक्यनिर्देशपूर्वकं संगृह्णाति–*अथ परेत्यादिना–भूतजातस्योपार्जनादित्यन्तेन*।। न केवलं स्ववाक्यतः, किन्तु वाक्यशेषतोऽप्यक्षरपदं प्रधानपरमित्याह–*अचेतनानामित्यादिना–प्रसिद्धमित्यन्तेन*।। अन्तर्याम्यधिकरणेन गतार्थत्वाशङ्कां निरस्यति–*अपि चेति*।। अनेनाक्षेपसङ्गतिः सूच्यते। "यः सर्वज्ञ" इत्यस्य पूर्वोक्तविधया पूर्वपक्षेऽविरोधमाह–*नन्वित्यादिना–भूतयोनिरित्यन्तेन*।। अक्षरपदेन शारीर एव ग्रह्यत इति पक्षान्तरमाह–*यदा त्विति*।। अयमत्र सिद्धान्तिनामाशयः–अक्षरपदेन ज्ञेयतया निर्दिष्टमक्षरं परमात्मैव, न तु प्रधानम्, शारीरो वा; "येनाक्षरं पुरुषं वेद सत्यम्" "तदेतदक्षरं ब्रह्म" "लक्ष्यं तदेवाक्षरम्" इत्येतेषु वाक्येषु ज्ञेयाक्षरपरेषु तस्य ब्रह्मपदसामानाधिकरण्यात्। अक्षरविद्यायाः परविद्यात्वेन समाख्यानमपि प्रकरणेऽत्र परतया निर्दिश्यमानमक्षरमिति गमयति। तथाच–"अक्षरात् परतः पर" इत्यत्र पञ्चम्यन्तनिर्दिष्टाक्षरात् परतः परमप्यक्षरमेवेति ज्ञायते, इति तस्मिन् वाक्ये ज्ञेयं ज्ञेयशेषतया विवक्षितं चाक्षरं द्वयं विवक्षितम्। तत्र च ज्ञेयोपसर्जनस्य ब्रह्मेतरत्वेऽविवादेऽपि ज्ञयस्याक्षरस्य ब्रह्मत्वं दुर्वारम्। "यः सर्वज्ञ" इत्यादिकं च ज्ञेयाक्षरपरमेव। अत एव–"यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व तद् ब्रह्मे" ति वाक्यैकवाक्यतापि तस्य सिद्ध्यति। "न ह्यक्षरात् परतः पर" इत्यत्रत्याक्षरस्याद्यस्या "क्षरात् संभवतीह विश्वमि" त्यादौ परामर्शः संभवति; ज्ञेयस्यैवाक्षरस्य पूर्वत्र प्रस्तुतत्वात्। अत एव–"तपसा चीयते ब्रह्मे" ति "अक्षरात्संभवतीह विश्वमि" त्यस्यैवोपपादनं वाक्यशेषणोपपद्यते। "दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यज" इत्यत्र सपदेनाक्षरं परामृश्य तस्यामनस्त्वशुभ्रत्वनिर्देशपूर्वकं ह्क्षरात परतः पर इति वाक्यं प्रवृत्तम्। तत्र दिव्यत्वपुरुषत्वादिविशिष्टाक्षरपरो ज्ञेयाक्षरपदार्थ इति हि वस्तुस्थितिः, इति न कथमपि ज्ञेयमक्षरमपि प्राधानं भवितुमर्हति। अद्रेश्यत्वादिकं तु न प्रधानासाधारणम्; किन्तु

ब्रह्मणोऽपि साधारणम्। सर्वज्ञत्वादिकं तु ब्रह्मासाधारणधर्मः। तथाचान्तर्यामिब्रह्मणं इवात्रापि अतद्धर्माभिलापस्यापि विद्यमानत्वाद् न प्रधानपरत्वं युक्तमिति फलति। अथ परेति वाक्यं हि–''येनाक्षरं परमं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यामि'' ति मध्यपरामर्शात् ''तदेतदक्षरं ब्रह्म स प्राणस्तदु वाङ्मनः। तदेतत्सत्यं तदमृतं तद्वेद्धव्यम् सोम्य विद्धि।'' इत्युपसंहाराच्च तदन्तेनैकवाक्यभूतमिति न परविद्यामध्येऽन्यस्य ज्ञेयस्याक्षरस्य निर्देश उपपद्यते; विद्याद्वयविरोधात्। तदेतत्सर्वमभिप्रेत्याह–*योऽयमदृश्यत्वादिगुणक इति*।। धर्मोक्तेरिति सौत्रांशं व्याचष्टे–*परमेश्वरस्येत्यादिना*।। सर्वज्ञत्वस्य प्रधानाधर्मत्वमाह–*न हीति*।। ''अक्षरात् परतः पर'' इत्यत्र पूर्वोक्तविधया परपदार्थोऽप्यक्षरमिति निरूप्यते–*अक्षरादिति*।। विद्याद्वयप्रतिज्ञाविरोधं पूर्वपक्षे प्रदर्शयति–*अपि चात्रेति*।। एक विज्ञानेन सर्वविज्ञानोपक्षेपोऽपि प्रधानपरिग्रहे विरुद्ध इत्याह–*कस्मिन्न्वित्यादिना–भोक्तरीत्यन्तेम*।। अन्यत् सुगमम्।।२१।।

विशेषणभेदव्यपदेशाभ्यां च नेतरौ।।२२।। विशेषणाद् व्यावर्तकधर्मात् साक्षाद् भेदव्यपदेशाच्च न जीवः, प्रधानं वाऽक्षरमिति सूत्रार्थः। दिव्यत्वादिविशेषणं शारीरविलक्षणत्वम्, अक्षरात् पर इति साक्षात् प्रधानभेदव्यपदेशात् प्रधानविलक्षणत्वमिति भावः। तदेतदाह–*इतश्चेत्यादिना*।। भूतयोनेर्विशेषणात् शारीरभेदं दर्शयति–*तथा प्रधानादपीति*।। ननु–अक्षरशब्दस्याव्याकृतपरत्वात् कथं प्रधानपरत्वम्? न हि प्रधानमौपनिषदा अपि साङ्ख्या इव मन्यन्ते, इत्यत आह–*अक्षरमव्याकृतमित्यादिना*।। ईश्वराश्रयम्=शुद्धचैतन्याश्रयम्, जीवत्वोपलक्षितचैतन्याश्रयं वा। तेन प्रस्थानद्वयानुग्रहः। अव्याकृतस्य प्रधानसमाख्यापि न सूत्रकारविरुद्धेति न दोष इत्याह–*नात्रेत्यादिना–परिकल्प्यतामित्यन्तेन*।।२२।।

न केवलं विशेषणभेदव्यपदेशाभ्यामक्षरं ब्रह्मैव, न प्रधानादि, किन्तु ब्रह्मरूपोपन्यासादपि। तच्च रूपं सार्वात्म्यमेव, न विग्रहवत्त्वमिति निरूपणार्थम्–*रूपोपन्यासाच्चेति सूत्रम्*।।२३।। सर्वज्ञत्वादिकं तटस्थलक्षणं सार्वात्म्यं स्वरूपलक्षणमिति ''धर्मोक्तेः'' ''रूपोपन्यासादि'' ति च पृथक् सूत्रणम्। येषां तु मते सगुणं ब्रह्मैवाक्षरम्, तेषां धर्मोक्तेः रूपोपन्यासः–अग्निर्मूर्धेत्यादिवाक्येनेत्येकं मतम्, अपरं तु–''पुरुष एवेदं कर्मे'' तिवाक्येनेति। फलतस्तु न विशेषः। अत्राधिकरणे पूर्वपक्षः–न सांख्यानां कापिलानां मतेन, तन्मतेऽक्षरात् परस्य सर्वज्ञस्यानङ्गीकारात्, किन्तु योगिनां मतेन। अथवा–ये किल प्रधानं परिणामिकारणम्, ब्रह्म तु वस्तुगत्या केवलनिमित्तकारणमपि प्रधानशरीरकत्वेनोपादानमपीत्यभिन्ननिमित्तोपादानमिति मन्यन्ते, तेषां मतेन। सिद्धान्तस्तु

ब्रह्मोपादानमपि निमित्तमपीत्यभिन्ननिमित्तोपादानतावादेनाद्वैताभिमतेन; अन्यथा—अक्षरपदेन सर्वत्र प्रधानस्य प्रकृतेर्वा ग्रहणम्, ''यः सर्वज्ञ'' इति वाक्येन तु विशेष्यांशमात्रस्य ग्रहणमिति संभवाद् व्यर्थमक्षरस्य प्रधानत्वनिराकरणमनेनाधिकरणेन समापतेत्। तथाच पूर्वेणान्तर्याम्यधिकरणेन विवक्षितं शरीरत्वं काल्पनिकमेव, न तु पारमार्थिकम्; अक्षरात् परत इत्युक्तत्वादिति सूचनार्थमेव तदनन्तरमक्षरवाक्यस्य विचारः। यत्र तु प्रकृतिब्रह्मणोः शरीरशरीरिभावः, तत्र कथं व्यपदेशभेदेन भेदसाधनं सूत्रकाराणामुपपद्यते॥२३॥

इति प्रदीपः षष्ठमदृश्यत्वाधिकरणम् समाप्तम्

भामती

"अथ परा यया तदक्षरमधिगम्यते"। "यत्तदद्रेश्यं" बुद्धीन्द्रियाविषयः। "अग्राह्यं" कर्मेन्द्रियागोचरः। "अगोत्रं" कारणरहितम्। "अवर्णं" ब्राह्मणत्वादिहीनम्। न केवलमिन्द्रियाणामविषयः, इन्द्रियाण्यप्यस्य न सन्तीत्याह "अचक्षुरश्रोत्रम्" इति बुद्धोन्द्रियाण्युयलक्षयति। "अपाणिपादम्" इति कर्मेन्द्रियाणि। "नित्यं विभुं सर्वगतं सुसूक्ष्मं" दुर्विज्ञानत्वात्। स्यादेतत्–नित्यं सत्कि परिणामि नित्त्यं? नेत्याह "अव्ययं" कूटस्थनित्यमित्यर्थः।

परिणामो विवर्तो वा सरूपस्योपलभ्यते।
चिदात्मना तु सारूप्यं जडानां नोपपद्यते॥

जर्ड प्रधानमेवातो जगद्योनिः प्रतीयताम्।
योनिशब्दो निमित्तं चेत् कुतो जीवनिराक्रिया॥

परिणममानसरूपा एव हि परिणामा दृष्टाः, यथोर्णनाभिलालापरिणामा लूतातन्तवस्तत्सरूपाः। तथा विवर्ता अपि विवर्तमानसरूपा एव, न विरूपाः। यथा रज्जुविवर्ता धारोरगादयो रज्जुसरूपाः। न जातु रज्ज्वां कुञ्जर इति विपर्यस्यन्ति। न च हेमपिण्डपरिणामो भवति लूतातन्तुः, तत् कस्य हेतोः? अत्यन्तवैरूप्यात्। तस्मात्प्रधानमेव जडं जडस्य जगतो योनिरिति युज्यते। स्वविकारानश्नुत इति तदक्षरम्। यः सर्वज्ञः सर्वविदिति चाक्षरात् परात्परस्याख्यानम्, 'अक्षरात् परतः परः' इति श्रुतेः। न हि परस्मादात्मनोऽर्वाग्विकारजातस्य च परस्तात् प्रधानादृतेऽन्यदक्षरं सम्भवति। अतो यः प्रधानात्परः परमात्मा स सर्ववित्, भूतयोनिस्त्वक्षरं प्रधानमेंव तच्च सांख्याभिमतमेवास्तु। अथ तस्याप्रामाणिक्तवान्न तत्र परितुष्यति, अस्तु तर्हि नामरूपवीजशक्तिभूतमव्याकृतं भूतसूक्ष्मं, प्रधीयते हि तेन विकारजातमिति प्रधानं, तत् खलु जडमनिर्वाच्यमनिर्वाच्यस्य जडस्य नामरूपप्रपञ्चस्योपादानं युज्यते, सारूप्यात्। न तु चिदात्मा निर्वाच्यः, विरूपो हि सः। अचेतनानामिति भाष्यं सारूप्यप्रतिपादनपरम्। स्यादेतत्–स्मार्तप्रधाननिराकरणेनैवेतदपि निराकृतप्रायं तत् कुतोऽस्य शङ्केत्यत आह–*अपि च पूर्वत्रादृष्टत्वादि इति*। सति बाधकेऽस्यानाश्रयणमिह तु

बाधकं नास्तीत्यर्थः। तेन तदैक्षतेत्यादावुपचर्यतां ब्रह्मणो जगद्योनिताऽविद्याशक्त्याश्रयत्वेन। इह त्वविद्याशक्तेरेव जगद्योनित्वसम्भवे न द्वारद्वारिभावो युक्त इति प्रधानमेवात्र वाक्ये जगद्योनिरुच्यत इति पूर्वः पक्षः। अथ योनिशब्दो निमित्तकारणपरस्तथापि ब्रह्मैव निमित्तं न तु जीवात्मेति विनिगमनायां न हेतुरस्तीति संशयेन पूर्वः पक्षः।

अत्रोच्यते—

अक्षरस्य जगद्योनिभावमुक्त्वा ह्यनन्तरम्।
यः सर्वज्ञ इति श्रुत्या सर्वज्ञस्य स उच्यते॥१॥

तेन निर्देशसामान्यात्प्रत्यभिज्ञानतः स्फुटम्।
अक्षरं सर्वविद्विश्वयोनिर्नाचेतनं भवेत्॥२॥

अक्षरात्परत इति श्रुतिस्त्वव्याकृते मता।
अश्नुते यत् स्वकार्य्याणि ततोऽव्याकृतमक्षरम॥३॥

नेह तिरोहितमिवास्ति किञ्चित्॥ यत्तु सारूप्याभावान्न चिदात्मनः परिणामः प्रपञ्च इति। अद्धा

विवर्त्तस्तु प्रपञ्चोऽयं ब्रह्मणोऽपरिणामिनः।
अनादिवासनोद्भूतो न सारूप्यमपेक्षते॥

न खलु वाह्यसारूप्यनिबन्धन एव सर्वो विभ्रम इति नियमनिमित्तमस्ति, आन्तरादपि कामक्रोधभयोन्मादस्वप्नादेर्मानसादपराधात्सारूप्यानपेक्षात्तस्य तस्य विभ्रमस्य दर्शनात्। अपि च हेतुमति विभ्रमे तदभावादनुयोगो युज्यते। अनाद्यविद्यावासनाप्रवाहपतितस्तु नानुयोममर्हति। तस्मात् परमात्मविवर्त्ततया प्रपञ्चस्तद्योनिर्भुजङ्ग इव रज्जुविवर्त्ततया तद्योनिर्न तु तत्परिणामतया। तस्मात्तद्धर्मसर्ववित्त्वोक्तेर्लिङ्गाद् यत्तदद्रेश्यमित्यत्र ब्रह्मैवोपदिश्यते ज्ञेयत्वेन, न तु प्रधानं जीवात्मा वौपास्यत्वेनेति सिद्धम्। न केवलं लिङ्गादपि तु परा विद्येति समाख्यानादप्येतदेव प्रतिपत्तव्यमित्याह *भपि चात्र द्वे विद्य इति*। लिङ्गान्तरमाह ''कस्मिन् नु भगवः'' इति। भोगा भोग्यास्तेभ्यो व्यतिरिक्ते भोक्तरि। अवच्छिन्नो हि जीवात्मा भोग्येभ्यो विषयेभ्यो व्यक्तिरिक्त इति तज्ज्ञानेन न सर्वं ज्ञातं भवति। समाख्यान्तरमाह *अपि च स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठाम् इति*। *प्लवा ह्येतेऽदृढा यज्ञरूपा अष्टादश इति*। प्लवन्ते अस्थायिन इति प्लवाः। अत एवादृढाः। के ते यारूपाः। रूप्यन्तेऽनेनेति रूपं, यज्ञो रूपमुपाधिर्येषां ते यज्ञरूपाः। तत्र षोडशर्त्विजः। ऋतुयजनेनोपाधिना

ऋत्विक्शब्दः प्रवृत्त इति यज्ञोपाधय ऋत्विजः। एवं यजमानोऽपि यज्ञोपाधिरेव। एवं पत्नी, 'पत्युर्नो यज्ञसंयोगेः' इति स्मरणात्। त एतेऽष्टावश यज्ञरूपाः, येष्वृत्विगादिषूक्तं कर्म यज्ञः, यदाश्रयो यज्ञ इत्यर्थः। तच्च कर्मावरं, स्वर्गाद्यवरफलत्वात्। अपियन्ति प्राप्नुवन्ति। *न हि दृष्टान्तदार्ष्टान्तिकयोः* इत्युक्ताभिप्रायम्।।२१।।

विशेषणं हेतु व्याचष्टे *निशिनष्टि हि इति*। शारीरादित्युपलक्षणं, प्रधानादित्यपि द्रष्टव्यम्। भेवव्यपदेशं व्याचष्टे *तथा प्रधानादपि इति*। स्यादेतत्–किमागमिकं सांख्याभिमतं प्रधानम्? तथा च वहुसमञ्जसं स्यादित्यत आह *नात्र प्रधानं नाम किञ्चित् इति*।।२२।।

तदेतत् परमतेनाक्षेपसमाधानाभ्यां व्याख्याय स्वमतेन व्याचष्टे *अन्ये पुनर्मन्यन्ते इति*। पुनः शब्दोऽपि पूर्वस्माद्विशेर्ष द्योतयन्नस्येष्टतां सूचयति। जायमानवर्गमध्यपतितस्याग्निमूर्धादिरूपवतः सति जायमानत्वसम्भवे नाकस्माज्जनकत्वकल्पनं युक्तम्। प्रकरणं खल्वेतद्विश्वयोनेः, सन्निधिश्च जायमानानां, सन्निधेश्च प्रकरणं बलीय इति जायमानपरित्यागेन विश्वयोनेरेव प्रकरणिनो रूपाभिधानमिति चेत्। न, प्रकरिणः शरीरेन्द्रियादिरहितस्य विग्रहवत्त्वविरोधात्। न चैतावता मूर्धादिश्रुतयः प्रकरणविरोधात् स्वार्थत्यागेन सर्वात्मतामात्रपरा इति युक्तम्, श्रुतेरत्यन्तविप्रकृष्टार्थात्प्रकरणाद्बलीयस्त्वात्। सिद्धे च प्रकरणिनाऽसम्बन्धे जायमानमध्यपातित्वं जायमानग्रहणे कारणमुपन्यस्तं भाष्यकृता। तस्मद्धिरण्यगर्भ एव भगवान् प्राणात्मना सर्वभूतान्तरः कार्यो निर्दिश्यत इति साम्प्रतम्। तत्किमिदानीं सूत्रमनवधेयमेव? नेत्याह *अस्मिन् पक्षे इति* प्रकरणात्।

इति भामती षष्ठदृश्यत्वाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

जीवश्च न भवतीत्याह-

॥सू०॥ **उभयेऽपि हि भेदेनैनमधीयते॥२१॥**

उभये काण्वा माध्यन्दिनशाखिनश्च'यो विज्ञाने तिष्ठन्' 'य आत्मनि तिष्ठन्' (बृह० ५.७.) इत्यादिना जीवादन्तर्यामिण भेदेनाधीयते। ततः परमेश्वरस्यैव सकलान्तर्यामित्वं, न प्रधानविराट्पुरुषजीवानामिति सिद्धम्॥

इत्यन्तर्याम्यधिकरणम्॥७॥

अथ अदृश्यत्वाधिकरणम.॥८॥

इह प्रत्यक्षपृथिव्यादिरूपत्वेन प्रतिपादितस्य परमेश्वरस्य तद्वदृश्यत्वादिकं नास्तीति प्रतिपादयितुमिदमधिकरणमवतार्यते-

॥सू०॥ **अदृश्यत्वादिगुणको धर्मोक्तेः॥२२॥**

'अथ परा यया तदक्षरमधिगम्यते, यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुः - श्रोत्रं तदपाणिपादं नित्यं विश्रुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः' (मु० १.१.) इत्यादि श्रूयतेऽस्य विषयः॥ अत्राक्षरं प्रधानं जीवः परमेश्वरो वेति संशयः। प्रधानमत्राक्षरं, तस्य महदादिपरिणामिनो भूतयोनित्वसंभवात्। अथवा जीवः, तस्य हि 'क्षरं प्रधानममृताक्षरम्' (श्वेताश्व० १.१०) इति श्रुतेरक्षरशब्दवाच्यत्वमुचितं, स्वकर्मवशेन महाश्रूतयोनित्वं च। अतस्तयोरन्यतरदक्षरम्॥ इति प्राप्ते ब्रूमः - परमेश्वर एवाक्षरं, 'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः' इत्यादिना तद्धर्मोक्तेः। न हि परमेश्वरादन्यस्मिन् सर्वज्ञत्वादिकं सम्भवति। यदुक्तं श्रूतयोनित्वं जीवप्रधानयोः संभवतीति, तदयुक्तं, तयोरचेतनासर्वज्ञयोस्तत्सामर्थ्याश्रावात्॥

पुनरत्र जीवप्रधानयोरनुपपत्तिमाह-

॥सू०॥ **विशेषणभेदव्यपदेशाभ्यां च नेतरौ॥२३॥**

अत्रैकविज्ञानेन सर्वविज्ञानं प्रतिज्ञायते 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' (मुण्ड० १.१.) इति। तच्चान्यज्ञैवंरूपं विशेषणम्। तद्व्यपदेशाच्च न प्रधानमक्षरम्। 'अक्षरात्परतः परः' (मुण्ड० २.१) इति जीवाद्भेदव्यपदेशाच्च न जीवः॥

इति श्रीकण्ठभाष्य षष्ठदृश्यत्वाधिकरणम् समाप्तम्

तस्य विकारजडत्वादिधर्मानभिलापादिति। अयमाशयः। सर्वाणि भूतानि योऽन्तरोयमयति'इत्यारभ्य अन्तर्यामिणो ये धर्मास्सर्वभूतनियन्तृत्वादयः श्रुताः ते सर्वे न प्रधानधर्माः। कथञ्चित्प्रधाने योजनीयाः। तथा हि-भूतशब्दः कार्यपर इति सर्वस्य कार्यस्य कारणाधीनत्वात् सर्वभूतनियन्तृत्व 'यः पृथिव्यां तिष्ठ' न्नित्यादिकम्। कार्यवर्गे कारणस्यानुगतत्वात्। 'यं पृथिवी न वेदे'त्यादि प्रधानस्य पृथिवीदेवतादिवेद्यत्वसम्भवेऽपि तस्या' प्रतर्क्यमविज्ञेय'मित्यादिप्रसिद्ध्यनुसारात्। 'यस्य पृथिवी शरीर'मित्यादि कार्यकारणयोर्वस्तुतो भेदाभावात्। पूर्वपक्षशरीरमित्यादौ स्वरूपेऽपि शरीरशब्दप्रयोगदर्शनात्'एष त आत्मे'ति जीवस्य सर्वनिर्वाहके तस्मि'न्ममात्मा भद्रसेन' इत्यादिवदात्मत्वोपचारात्। 'अदृष्टो द्रष्टे'त्यादावदृष्टत्वाश्रुतत्वे रूपादिहीनत्वात्। अमतत्वाविज्ञातत्वे अविज्ञेयप्रसिद्ध्यनुसारात्। द्रष्टृत्वादि तत्प्रकृतिकत्वेन तदभिन्नानां चक्षुरादीनां दर्शनादिसाधनत्वात्। 'रूपग्राहकं चक्षु'रित्यादौ करणे कर्तृत्वोपचारदर्शनादिति सर्वे धर्माः क्लेशेन प्रधाने योजनीयाः। तथा क्लेशेनापि प्रधाने योज्येरन् यदि विकारत्वजडत्वादयोऽनन्यथासिद्धास्तद्धर्मा **इहाभिलप्येरन्।** न च तेषामिहाभिलापोऽस्तीति। **तस्य सकलनियामकत्वाद्यनुपपत्तेरिति।** 'सर्वाणि भूतानि योऽन्तरो यमयती' त्यादिषु सर्वकल्पानुयायिसकलप्रपञ्चनियन्तृत्वमसङ्कुचितं प्रतीयते। 'नान्योऽतोऽस्ति द्रष्टे'त्यादौ प्राग्वर्णितरूपनियन्तृत्वविशिष्टद्रष्ट्रन्तरादिनिषेधेन च तत् स्थिरीक्रियते। तत्तावत्प्रतिकल्पं भिन्नस्य मूर्त्यात्मनो हिरण्यगर्भस्य नारायणस्य च न सम्भवति। ननु सुबालोपनिषदि पृथिव्याद्यन्तर्यामिणि नारायणपदप्रयोगान्नारायणस्यासङ्कुचितसकलनियन्तृत्वमुपपद्यत इति भाति। उच्यते। सुबालोपनिषदुपक्रमे 'तदाहुः किं तदासी'दिति प्रश्नपूर्वकं निर्विकल्पकं परमात्मस्वरूपं प्रथममासीत् ततस्तमस्ततो भूतादिस्तत आकाशादिक्रमेण भूतपञ्चकं तेन ब्रह्माण्डमुत्पादितं तन्मध्ये 'दिव्यस्सहस्रशीर्षा सहस्राक्षः सहस्रपात् सहस्रबाहुःपुरुषोऽजायत' इत्युक्त्वा 'ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृत'इत्यादिना पुरुषसूक्तप्रक्रियया तस्य मुखादिभ्यः ब्राह्मणादीनां हृदयाद्यवयवान्तरेभ्योऽन्येषां च केषाञ्चिच्चेतनाचेतनानामुत्पत्तिः ललाटात्क्रोधजस्य रुद्रस्य निश्वासेभ्यो वेदादिशब्दजालप्रादुर्भावं चाभिधाय तस्मादेवार्धेन स्त्रीभावमर्धेन पुरुषभावं च प्राप्तात् देवर्षियक्षराक्षसादीनां तिरश्चां च तत्तज्जननोचितस्त्रीपुंसविग्रहपरिग्रहेण मिथुनीभावभापन्नादुत्पत्तिं वर्णयित्वा उपसंहारकाले तेन क्रियमाणत्रैलोक्यभस्मीभावमुपक्रम्य 'पृथिव्यप्सु लीयत' इत्यादिना

'तमः परस्मिन्नेकीभवती'त्यन्तेन पृथिव्यादेः प्रथमकार्यतमःपर्यन्तस्य प्रपञ्चस्य परमात्मनि लयो दर्शितः। एवं तावत्सुबालोपनिषदि प्रथमानुशासने जगदादिकारणभूतः परमात्मा तेन ब्रह्मांडमध्ये सृष्टः तन्मध्यगतदेवमनुष्याद्यवान्तरसृष्टिसंहारकारी सहस्रशीर्षत्वादिविशिष्टपुरुषश्चेति द्वौ वर्णितौ। तत्र 'तदण्डं हिरणमयं समभव'दिति प्रक्रम्य मध्ये 'दिव्यः सहस्रशीर्षा सहस्राक्षः सहस्रपात् सहस्रबाहुः पुरुषोऽजायत'इति ब्रह्माण्डमध्ये परमात्मना सृष्टो यः पुरुषो वर्णितः तमेव ब्राह्मणादिसकलप्रजास्रष्टारं दिव्यपुरुषं 'नैवेह किञ्चनाग्र आसीदमूलमनाधार इमाः प्रजाः प्रजायन्त'इति प्रवृत्ते तृतीयानुशासने 'दिव्यो देव एको नारायण' इति प्रस्तुत्य 'चक्षुश्च द्रष्टव्यं च नारायण' इत्यादिना तस्य सर्वोपादानत्वप्रयुक्तं सार्वात्म्यमुक्त्वा तस्यैव चतुर्थानुशासने 'यस्य पृथिवी शरीर'मित्यादिना 'स एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायण' इत्यन्तेन सर्वान्तर्यामित्वमुक्तम्। न च तत्परमात्मसृज्यत्वेन दिव्यविशेषणावृत्त्या दिवि परमाकाशरूपायां चिच्छक्तौ भवत्वेन च प्रकृतस्य श्रुत्यन्तरप्रसिद्धमहाजलौघमध्यसृष्टब्रह्मांडरूपगर्भगोलकमध्यनिवासलब्धनारायणसंज्ञस्य स्वरूपेणो-पपद्यते। अतः शारीराधिकरणन्यायेन परमात्माभेददृष्टया तदुपपादनीयम्। तथोपपादनं सूचयितुं 'अनुपपत्तेस्तु न शारीर'इति (ब्र॰ १.२.३.) शारीराधिकरणे नारायणविषयतया प्रयुक्तं शारीरपदमिहापि तद्विषयतया प्रयुक्तम्।। जीवपूर्वपक्षनिराकरणार्थत्वेनोत्तरसूत्रमवतारयति-**जीवश्चेति**।।सू।। **उभयेऽपि हि भेदेनैनमधीयते**।।२१।। 'यो विज्ञान'इति स्थाने 'य आत्मनी'तिमाध्यन्दिनपाठदर्शनात् स्थानप्रमाणेन विज्ञानशब्दस्य जीवपरत्वमवसीयते। न चात्मशब्दस्यैव स्थानप्रमाणेन ज्ञप्तिपरत्वं कल्प्यतामिति वाच्यम्। तत्र तस्य प्रयोगादर्शनात्। 'विज्ञानं यज्ञं तनुत' इत्यादिश्रुतिषु विज्ञानशब्दस्य जीवे दृष्टप्रयोगत्वादित्यभिप्रेत्यं सूत्रं व्याचष्टेउभय इति। पूर्वसूत्राच्छारीर इत्यस्यानुवृतिं प्रकृतेर्जीवार्थत्वं प्रत्ययस्य पञ्चम्यर्थत्वं च परिगृह्य तल्लब्धमर्थमाह-**जीवादिति**। इदं त्विह वक्तव्यम्। जीवपूर्वपक्षे कः खलु जीवोऽन्तर्यामी स्यात्। न तावत्तत्तदुपासकजीवः। परिच्छिन्ने तत्र पृथिव्यादिस्थितितन्नियन्तृत्वयोरसम्भवात् 'किमन्तर्यामिणं वेत्थे'ति गन्धर्वेण पृष्टस्य काप्यस्य 'नाहं तं भगवन्वेदे' ति उत्तरासामञ्जस्यप्रसङ्गाच्च यज्ञविद्याविदः काप्यस्य कर्मफलभोक्तृदेहातिरिक्तजीवज्ञानावश्यंभावात्। नापि पृथिव्याद्यभिमानिजीवः। श्रोतारमुद्दालकं प्रति पराभूते तस्मिन् 'एष त आत्मे'ति तदात्मत्वोपदेशायोगात् पृथिव्यादिष्वप्यभिमानिजीवस्य प्रत्येकं भिन्नतया सर्वाणि भूतानि योऽन्तरो यमयती'त्युपक्रान्तायाः एकस्य सर्वनियन्तृताया अनन्वयप्रसङ्गाच्च। नापि जीवसमुदायः। तस्य पृथिव्यादिस्थत्वतन्नियन्तृत्वयोरभावेन 'यः पृथिव्यां तिष्ठ'न्नित्यादेरनन्वयात्। न च सर्वभूतवाक्ये जीवसमुदायः पृथिव्यादिवाक्ये तत्तदभिमानिजीव इति वैरूप्यकल्पनं युक्तम्। न वा तदपि निर्वोढुं शक्यम्। 'एष त आत्मे' त्युपदेशायोगस्योक्तत्वात्। अपि चोपासकजीव इति पृथिव्याद्यभिमानिजीव

इति सर्वजीवसमुदाय इति पक्षत्रयमपि 'भेदव्यपदेशाच्चान्य' इति (ब्र० १.१.२२.) सूत्रेणैव निरस्तम्। 'एष त आत्मा यं पृथिवी न वेद यं सर्वाणि भूतानि न विदु'रित्यादिभेदव्यपदेशसत्त्वात्। तस्मान्निरालम्बनो जीवपूर्वपक्षः। 'नान्योऽतोऽस्ति द्रष्टे'त्यादिकं तूपपादितम्। प्रदर्शितसिद्धान्तोऽप्ययुक्तः। विज्ञानशब्दानुसारेणात्मशब्दः परमेश्वरचिच्छत्तिपर इति वैपरीत्यस्यापि वक्तुं शक्यत्वात्। तस्यात्मशब्दस्यानन्दमयाधिकरणभाष्ये भट्टभास्करीये तैत्तिरीयाण्यकभाष्ये च सुप्रसिद्धत्वात्। तस्मादिदं सूत्रं चिच्छक्तिरन्तर्यामित्वेन प्रतिपाद्यत इति पूर्वपक्षान्तरनिराकरणार्थमिति युक्तम्। उपपद्यते हि तस्यां 'तस्य भासा सर्वमिदं विभाती' तिश्रुत्यनुसारेण सर्वस्फूर्तिप्रदायां 'नान्योऽतोऽस्ति द्रष्टे'त्यादिविशेषणम्। अन्यदपि सर्वं विशेषणं तत्रोपपद्यत इति स्पष्टमेव। सिद्धान्तस्तु 'यो विज्ञानेतिष्ठ' 'न्य आत्मनि तिष्ठ'न्निति चिच्छक्तितोऽन्तर्यामिणं भेदेनाधीयते। न चात्मविज्ञानशब्दयोर्जीवपरत्वं शङ्कनीयम्। 'यस्सर्वेषु भूतेषु तिष्ठ'न्निति पर्याये भूतशब्दोदितानां ब्रह्मादिस्तंबपर्यन्तानां सर्वेषां जीवानां पृथगन्तर्यामिनियम्यत्वस्य वर्णितत्वात्। न च तत्र भूतशब्दो जननरूपभवनवत्सु कार्येषु वर्तत इति शङ्कनीयम्। कार्ययोगतः प्राणिरूढेर्बलवत्त्वात्। न च महाभूतरूढेः प्राणिरूढेश्च विनिगमनाविरहेण परस्परविरोधोन्मेषः शङ्कनीयः। 'पृथिव्यां तिष्ठ'न्नित्यादिपर्यायेषु पृथिव्यादिमहाभूतानामन्तर्यामिनियम्यत्वस्योक्तत्वेनात्र प्राणिरूढेरेवोन्मेषात्। तस्मान्न चिच्छक्तिरन्तर्यामित्वेन प्रतिपाद्येति। यदि तु सर्वभूतपर्याये जीववर्गादन्तर्यामिणं भेदेनाधीयत इति जीवपूर्वपक्षनिराकरणमप्यत्र विवक्षितं स्यात् अस्तु न कापि हानिरिति॥

इति अन्तर्याम्यधिकरणम्॥७॥

सङ्गति प्रदर्शयन्नुत्तराधिकरणमवतारयति इहेति। पुरोवर्तिया प्रत्यक्षतो दृश्यमानं यत् पृथिव्यादिकं तत्परमेश्वरस्य नियम्यत्वेन रूपमिति तदनुप्रविश्य तत्रावस्थितस्य गृहस्थितस्य चैत्रस्येव दृश्यता स्यादिति शङ्कानिराकरणार्थं सर्वत्र तन्नियम्यानुरूपशरीरवत्तया स्थितस्यापि दृश्यत्वाभावप्रतिपादकं वेदान्तवाक्यमन्यपरत्वनिराकरणेन तद्विषयत्वं प्रतिपादयदधिकरणं प्रवर्त्यत इत्यर्थः। इह पूर्वाधिकरणसङ्गतिवत्पादसङ्गतिरपि प्रदर्शिता। 'न चक्षुषा पश्यति कश्चनैन' मित्यादि श्रुतिप्रसिद्धब्रह्मलिङ्गभावस्याप्यदृश्यत्वस्य प्रदर्शिततया दृश्यत्वप्रसक्त्यानतिस्पष्ट ब्रह्मलिङ्गभावत्वात्।।सू०।। **अदृश्यत्वादिगुणको धर्मोक्तेः**।।२२।। सर्वज्ञत्वादेरक्षरानन्वयेन पूर्वपक्षकोटिद्वयं तदन्वयेन सिद्धान्तकोटिं चाभिप्रेत्य संशयं दर्शयति-**अत्राक्षरमिति**। नन्विहाक्षरं प्रधानं जीवो वेति पूर्वपक्षो न सम्भवति। इह 'तपसा चीयते ब्रह्म ततोऽन्नमभिजायते। अन्नात्प्राणा मनस्सत्यं लोकाः कर्मसु चामृतम्। यस्सर्वज्ञस्सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेव ब्रह्म नामरूपमन्नं च जायत'इत्यादिमन्त्रेषु ब्रह्मश्रुतिसर्वज्ञत्वलिङ्गादिकमाम्नायते। उपक्रमेऽपि 'कस्मिन्नु भगवो विज्ञाते

सर्वमिदं विज्ञात'मित्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञानं ब्रह्मलिङ्गमाम्नायते। परमोपक्रमे' स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राहे 'ति ब्रह्मविद्यासामाख्या दृश्यते। तथा 'द्वे विद्ये वेदितव्ये परा चैवापरा चे'ति विद्ययोः परापरविभागं कृत्वा तयोरपरामृग्वेदादिलक्षणामुक्त्वा 'अथ परा यया तदक्षरमधिगम्यत'इति वक्ष्यमाणाक्षरविद्यायाः परविद्यासमाख्या कृत दृश्यते। अपि च सद्विद्यावाक्यानामीक्षत्यधिकरणे साङ्ख्याभिमतप्रधानपरत्वं निरस्तम्। तदुपदर्शिता युक्तयोऽत्रापि प्रवर्तन्त एव। अस्तिखल्वीक्षापूर्वकस्त्रष्टृत्वश्रवणमत्रापि। 'तपसा चीयते ब्रह्मे'ति यतस्तपःशब्दोऽत्र 'तप आलोचन'इति धातोर्निष्पन्नः स्त्रष्टव्यालोचनरूपज्ञानवाची। 'यस्य ज्ञानमयं तप'इत्यग्रे विवरणात्। आत्मशब्दश्चास्ति 'यस्सर्वज्ञस्सर्वविद्यस्यैष महिमा भुवि। दिव्ये ब्रह्मपुरे ह्येष व्योमन्यात्मा प्रतिष्ठित' इत्यादिमन्त्रेषु। तन्निष्ठस्य मोक्षोपदेशोऽप्यस्ति 'यदापश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्। तदाविद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैती' त्यादिषु। हेयत्वं च तस्य नोच्यते। प्रतिज्ञाविरोधोऽप्यस्तीति प्राग्दर्शितम्। साक्षाच्च परमेश्वरस्य कर्तृत्वमुपादानत्वं च श्रूयते 'यदा पश्य' इत्यादिमन्त्रेष्वित्याशङ्क्य प्रधानपूर्वपक्षं तावदुपपादयति-**प्रधानमन्त्रेति।** ननु यदि भूतयोनित्वं योनिशब्दस्य स्थानवाचित्वेन भूताधारत्वं तदा तत् सर्वाधारे ब्रह्मण्युपपद्यते। यदि च तस्योपादानवाचितया भूतोपादानत्वं तदपि तस्योपपद्यते। प्रकृत्यधिकरणे तस्य सर्वोपादानतायाः स्थापयिष्यमाणत्वादित्याशङ्क्य **विशेषयति महदादिपरिणामिन** इति। भूतयोनिशब्देन परिणामितया भूतोपादानत्वमुच्यते न तु भूताधारत्वं भूतोपादानत्वसामान्यं वा। भूतयोनित्वविवरणार्थं प्रवृत्ते 'यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयस्सम्भवन्ति। यथा सतः पुरुषात्केशलोमानि तथाक्षरात्सम्भवतीह विश्व'मिति समनन्तरमन्त्रे परिणाम्युपादानरूपोर्णनाभ्यादिदृष्टान्तोपादानेन 'यथा सुदीप्तात्पावकाद्विस्फुलिङ्गास्सहस्त्रशः प्रभवन्ते सरूपाः। तथाक्षराद्विविधास्सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ती'त्युपरितनमन्त्रान्तरप्रदर्शितादचेतनप्राणादिवक्ष्यमाणकार्यसारूप्यश्रवणाच्च तथावगतेः। तत्तु निर्विकारे परमेश्वरे न सम्भवतीति भावः। तदभिप्रायेणैवात्रा'क्षरं प्रधान'मित्यक्षरशब्देन धर्मिनिर्देशः कृतः। अत्र भूतयोनिशब्देन धर्मिनिर्देशः कर्तुमुचितः। 'अदृश्यत्वादिगुणक' इति सूत्रानुरोधात्। यतस्तत्रादृश्यत्वादिकं भूतयोनिर्विशेषणम्। न त्वक्षरस्य। भूतयोनिवाक्ये श्रवणात्। 'यया तदक्षरमधिगम्यत' इति अक्षरवाक्ये श्रवणाभावात्। न च भूतयोनिवाक्येऽपि 'तद्भूतयोनि'मिति नपुंसकलिङ्गेन तत्पदेनाक्षरपरामर्शात्तद्विशेषणमदृश्यत्वादिकं स्यादिति वाच्यम्। 'नित्यं विभुं सर्वगतं सुसूक्ष्म'मित्यत्र विभुविशेषणस्य पुल्लिङ्गतया भूतयोनिविशेषणत्वेन तत्समभिव्याहृतानामदृश्यत्वादीनामपि तद्विशेषणत्वावगमात्। अत एवा'दृश्यत्वादिगुणक' इति सूत्रे पुल्लिङ्गनिर्देशः। अक्षरविशेषणत्वे हि नपुंसकलिङ्गनिर्देशस्स्यात्। एवं सूत्रानुरोधात् भूतयोनिशब्देन धर्मिनिर्देशे कर्तव्येऽपि यदक्षरशब्देन धर्मिनिर्देशः कृतः तदक्षरशब्दनिर्दिष्टान्वयिपरिणाम्युपादा-

नत्वरूपप्रधानलिङ्गप्रतिपत्तिसौकर्याय। भूतयोनिः प्रधानम् अक्षरस्य परिणाम्युपादानत्वश्रवणादित्युक्ते हि वस्तुतोऽक्षरभूतयोन्योरभेदेऽप्यापाततो वैयधिकरण्यस्फुरणं भवेत्। सूत्रकृता तु सर्वज्ञत्वादिपरमेश्वरलिङ्गानामन्यान्वयशङ्कानिराकरणेन भूतयोन्यन्वयप्रतिपत्तिसौकर्यार्थमदृश्यत्वादिगुणक इति धर्मिनिर्देशः कृतः। तदेतदग्रे स्फुटीभविष्यति। ननु, परिणाम्युपादानत्वरूपैकलिङ्गापेक्षया ब्रह्मात्मश्रुतिसर्वज्ञत्वादिलिङ्गब्रह्मविद्यादिसमाख्यारूपं प्रमाणजातं भूयस्त्वात्प्रबलमिति चेदुच्यते। इहाक्षरप्रतिपादनानन्तरं 'दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः। अप्राणो ह्यमनाश्शुभ्रो ह्यक्षरात्परतः परः।।' इति ततः परस्य पुरुषस्य प्रतिपादनं दृश्यते स पुरुषो ब्रह्मेति। तत्र ब्रह्मश्रुत्यादिसमन्वयः। 'तथाक्षरात्सम्भवतीह विश्व'मिति अक्षरकार्यत्वेन वर्णिताद्विश्वस्मात्परतोऽक्षरादपि परत्वेन ब्रह्मण एव 'महतः परमव्यक्तमव्यक्तात्पुरुषः पर' इति कठवल्लीष्विव प्रतिपादयितुमुचितत्वात्। यत्तु 'यया तदक्षरमधिगम्यत'इति परविद्याविषयत्वमक्षरस्योक्तं तदुपक्रान्तसर्वविज्ञानप्रतिज्ञानिर्वाहार्थं प्रतिपिपादयिषितम्। 'तपसा चीयते ब्रह्मे'त्यादिमन्त्रेषु प्रतिपाद्यमानं ब्रह्मणस्सर्वोपादानत्वं ब्रह्मशक्तिरूपेण प्रधानेन घटनीयमिति तस्याप्यत्राक्षरभूतयोनशिब्दगृहीतस्य सर्वोपादानत्वेनात्र प्रतिपादनीयत्वमित्यभिप्रेत्य न तु स्वातन्त्र्येण तदेव प्रतिपादनीयमित्यभिप्रेत्य। 'अक्षरात्परतः पर'इत्यग्रे तत्प्रतिपादनपारार्थ्यस्य स्फुटत्वात्। एवं ब्रह्मश्रुतिलिङ्गसमाख्यानामक्षरात्परतः परेऽन्वयात् नाक्षरस्य प्रधानत्वे ब्रह्मश्रुत्यादिविरोध इति पूर्वपक्षे युक्तिप्रतिपत्तिसौकर्यार्थमप्यक्षरशब्देन धर्मिनिर्देशः कृतः। ननु'येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्वतो ब्रह्मविद्या'मित्यक्षरात्परत्वेन वर्णनीये पुरुषे अक्षरशब्दश्रुतेः तेन स एव प्राधान्येन प्रतिपद्यमानो भूतयोन्यक्षरमक्षरात्परत इति पुरुषात्परत्वेन श्रुतमक्षरमेव केवलं प्रधानमिति चेन्मैवम्। उभयथाप्युपपत्तौ परिणाम्युपादानत्वरूपप्रधानलिङ्गानुरोधस्योचितत्वात् असति विरोधे तद्बाधायोगात्'यथा सुदीप्ता'दिति मन्त्रानन्तरमेव 'दिव्यो ह्यमूर्त'इति मन्त्रस्य प्रवृत्तत्वेन पूर्वमन्त्रे यस्मादक्षरात्सरूपकार्यनिष्पत्तिरुक्ता तस्मादेव परत्वमनन्तरमन्त्रे पुरुषस्य वर्ण्यत इति प्रतीतेश्च। ननु तर्हि 'यथा सुदीप्ता'दिति मन्त्रोक्तं सरूपकार्यप्रभवाक्षरं ततः प्राक्'यथोर्णनाभि'रिति मन्त्रोक्तं विश्वसम्भवोपादानाक्षरं च 'अक्षरात्परतः पर'इत्युक्तं परत्वावध्यक्षरमेवास्तु। तथा च परिणाम्युपादानत्वस्यान्यसङ्क्रान्तत्वात्परविद्याविषयत्वेनोक्तभूतयोन्यक्षरं ब्रह्मैव स्यादिति चेन्न। भूतयोन्यक्षरप्रतिपादनानन्तरमेव 'यथोर्णनाभि'रिति मन्त्रस्य प्रवृत्तत्वेन तस्य तदीयभूतयोनित्वप्रकारनिरूपणार्थत्वस्य 'यथा सुदीप्ता' दितिमन्त्रस्याक्षरपरापादानपञ्चम्या तदेकविषयत्वस्य च प्रतीयमानत्वेन परिणाम्युपादानत्वस्यान्यसङ्क्रमणायोगात्। एवं तर्हि 'तपसा चीयते ब्रह्म ततोऽन्नमभिजायत'इति मन्त्रस्याप्यपादानपञ्चम्याक्षरपरमन्त्रद्वयैकविषयत्वस्यप्रतीयमानत्वात् तस्य मन्त्रद्वयस्य भूतयोन्यक्षरविषयतायास्त्वयैवोक्तत्वाच्च भूतयोन्यक्षरं ब्रह्मैव स्यात्। परत्वावध्यक्षरमेव केवलं प्रधानं भवेत्। न च

ब्रह्मणि परिणाम्युपादानत्वासम्भवो दोषः। अपादानपञ्चमीनामैकरूप्येण ब्रह्मैव भूतयोन्यक्षरमिति सिद्धौ दृष्टान्तगतसर्वसादृश्यविवक्षायां नियमाभावादुपादानत्वमात्रे परमूर्णनाभ्यादिदृष्टान्तः। सरूपकार्यप्रभवत्वं जीवोपादानत्वाभिप्रायमिति कल्पनोपपत्तेरिति चेन्न। परिणामितया परिणाम्यधिष्ठानतया च प्रधानस्य ब्रह्मणश्चोभयोरप्युपादानस्य सम्प्रतिपन्नस्य सद्भावेन सर्वविज्ञान-प्रतिज्ञानिर्वाहकब्रह्मजगदुपादानत्वघटकतया प्रधानगतजगदुपादानत्वप्रतिपादनस्यापि सङ्गतिसत्त्वेन चान्यथासिद्धेनापादानपञ्चम्यैकरूप्येण प्रथमश्रुतोर्णनाभ्यादिदृष्टान्तप्राप्तस्य प्राणमनःप्रभृत्यचेतन-पर्यवसितसरूपकार्यप्रभवत्वप्राप्तस्य च परिणाम्युपादानत्वस्य त्यागायोगात्। नन्वेवं सति 'तथाक्षरात्सम्भवतीह विश्व'मित्यन्तं प्रधानपरम्। तदनन्तरं 'तपसा चीयत'इत्यारभ्य 'प्रोवाच तां तत्वतो ब्रह्मविद्या'मित्यन्तं ब्रह्मपरम्। ततो'यथा सुदीप्ता'दित्यादि प्रधानपरम्। पुनश्च 'दिव्यो ह्यमूर्त'इत्यादि ब्रह्मपरमिति स्यादिति चेदस्तु को दोषः। अर्थसम्बन्धानुसारेण वाक्यान्वयोपपत्तेः। उक्तं हि जैमिनिना विश्वजिदधिकरणे-अर्थतो ह्यसमर्थानामानन्तर्येऽप्यसम्बन्ध इति। उक्तं च वार्तिककृता-'यस्य येनार्थसम्बन्धो दूरस्थेनापि तेन सः। अर्थतो ह्यसमर्थानामानन्तर्यमकारणम्' इति। एवमुपपादितः प्रधानपूर्वपक्षः। अथ जीवपूर्वपक्षमुपपादयति-**अथवेति**। नन्वक्षरशब्द एव तावज्जीवे नोपपद्यते। न हि प्रधाने स्वकार्याण्यश्नुते व्याप्नोतीति व्युत्पत्त्येव ब्रह्मणि न क्षरतीति व्युत्पत्त्येव जीवे कया चिद्व्युत्पत्त्या तदुपपद्यत इत्याह-**तस्य हीति**। 'क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः'इति श्वेताश्वरतरोपनिषदि परब्रह्मणः पशुपाशपतित्वामाम्नायते। तत्र 'क्षरं प्रधान'मिति प्रधाने क्षरशब्दवदमृताक्षरमित्यमृतशब्दनिर्दिष्टजीवेऽक्षरशब्दः प्रयुक्तः। 'अमृते'ति 'सुपांसुलु'गित्यादिना छान्दसो विभक्तिलोपः। अमृतमक्षरमित्ययं जीवनिर्देश इत्येतच्च 'हर एको देवः क्षरात्मानावीष्ट' इत्युत्तरवाक्ये आत्मशब्दप्रतिनिर्देशादवगम्यते। 'यच्चेदं क्षरमव्यक्तं यदप्यमृतमक्षरम्। ताबुभौ यः क्षरात्मानावेको देवः स्वयं हरः॥' ईशते तदभिध्यानाद्योजनात्तत्वभावत'इत्यादिशिवपुराणवचनैश्चास्य मत्रस्यैवमेवार्थो दर्शितः। तस्मादक्षरशब्दो जीवे नानुपपन्नः। जीवस्य जननमरणवत्त्वेऽपि न क्षरति स्वरूपेण न परिणमत इति स्वरूपान्यथाभावाभावपरतया तत्राक्षरशब्दस्य व्युत्पत्तिरपि सम्भवतीति भावः। ननु तथापि परिणाम्युपादानत्वरूपं भूतयोनित्वं जीवस्य न सम्भवतीत्यत आह-**स्वकर्मवशेनेति**। अयमाशयः। 'अगोत्रमवर्णमचक्षुरश्रोत्रमपाणिपाद'मिति जीवे प्रसिद्धानां गोत्रादीनां निषेध्यजातस्याधिकरणविशेषाकाङ्क्षायां तस्यैतस्यैव जीवस्याधिकरणत्वोपपत्तौ नाधिकरणान्तरमपेक्षणीयम्। बुद्धिगौरवापत्तेः। उपपद्यते च शरीरद्वारा गोत्रवर्णादिमतोऽपि जीवस्य साक्षात्संबन्धेन गोत्रादिमत्तया भ्रान्तिप्रतीतस्य रजतात्मना भ्रान्तिप्रतीतस्य रङ्गस्य रजतत्वनिषधं प्रतीव गोत्रादिनिषेधं प्रत्यधिकरणत्वम्। दृष्टं च बाल्यकार्श्याद्यधिकरणस्यैवावस्थाभेदेन तन्निषेधं प्रत्यधिकरणत्वम्। नन्वक्षरशब्देन जीवसाधारणेन तद्ग्रहणप्रसक्तौ तव्द्यावर्तनेनैवागोत्रमित्यादिकं

सफलं स्यान्नान्यथेति चेन्न। जीवे गोत्रसम्बन्धादिप्रतीतिकाले तदभावायोगप्रसक्तौ तद्व्यवच्छेदकत्वेनापि तस्य साफल्योपपत्तेः। उभयविधकफलसम्भवेऽप्ययोगव्यवच्छेदस्यैव फलस्य ग्रहणं युक्तम्। अधिकरणान्तरकल्पनालाघवात् अयोगव्यवच्छेदफलस्यागोत्रत्वादिरूपोपात्तधर्मिगतत्वेन प्रत्यासन्नत्वाच्च। अन्ययोगव्यवच्छेदस्य तु फलस्य ग्रहणं न युक्तम्। गोत्राद्यधिकरणव्यतिरेकेण तन्निषेधं प्रत्यधिकरणान्वेषणगौरवापत्तेः। अन्ययोगव्यवच्छेदस्यागोत्रपदानुपात्तजीवगताक्षरपदग्राह्यत्वयोगव्यवच्छेदात्मकत्वेन विप्रकृष्टत्वाच्च। उपात्तधर्मिगतफले लभ्ये हि नानुपात्तधर्मिगतं फलं ग्राह्यम्। अत एवावहननविधेरुपात्तावहननगताप्राप्तांशपरिपूरणरूपस्तदयोगव्यवच्छेद एव फलं न त्वनुपात्तनखविदलननिवृत्तिरूपस्तदयोगव्यवच्छेद इति नियमस्य परिसङ्ख्यातो भेद इष्यते। तस्मादगोत्रत्वादिविशेषणं जीव इव न ब्रह्मणि स्वारस्येनान्वेति। प्रधाने त्वचेतने गोत्रादिप्रसक्त्यभावात् नान्वेतीति स्पष्टमेव। ननु यथैवागोत्रत्वादिकं जीव एव स्वरसतोऽन्वेति न ब्रह्मणि प्रधाने वा। एवमदृश्यत्वममग्राह्यत्वं च दृश्यग्राह्यप्रपञ्चभिन्ने दर्शनादिप्रसक्तिमति च प्रधान एवान्वेति। न तु जीवे ब्रह्मणि वा। ततश्चोपक्रमगतादृश्यत्वाग्राह्यत्वानुसारेणागोत्रत्वादिकं प्रधाने नेतुं युक्तमिति चेन्न। उपक्रमगतादपि लिङ्गद्वयादुपरितनानामनेकलिङ्गानां प्रबलतया तदनुसारेणैवादृश्यत्वाग्राह्यत्वयोर्नेतव्यत्वात्। एवं चागोत्रत्वाद्यनुसारेण प्रधानमेवाक्षरमिति व्यवस्थितौ तदनुसारेण भूतयोनित्वमदृष्टद्वारा जगत्कारणत्वमिति योजनीयम्। ततश्चाक्षरात् परतः पराज्जीवात्परः परमेश्वर इति तत्रामूर्तत्वमप्राणत्वममनस्त्वं च निषेधस्य प्रतियोग्यधिकरणानधिकरणत्वलाघवमयागव्यवच्छेदफललाभलाघवं चानादृत्य परमेश्वर एव चेतनत्वेन प्रसक्तस्य मूर्तिमत्त्वादेर्व्यावर्तनार्थमिति योजनीयम्। न चाक्षरात्परतः परोऽपि जीव इत्येव पूर्वपक्षोऽस्तु, तत्रत्याक्षरशब्दस्य प्रधानपरत्वोपपत्तेरिति शङ्कनीयम्। तथा सति ब्रह्मश्रुतिलिङ्गसमाख्यानामनवकाशत्वापत्तेरतः परमेश्वर एवाक्षरमिति। अक्षरं प्रधानं जीवो वेति पूर्वपक्षस्य प्रवृत्तत्वाददृश्यत्वादिगुणक इति सौत्रं धर्मिनिर्देशमननुरुध्याक्षरमिति धर्मिनिर्देशः कृतः-**यस्सर्वज्ञ इति**। अयमाशयः। यत्पदस्य प्रकृताक्षरपरामर्शित्वात् सर्वज्ञत्वं सर्ववित्त्वं स्रष्टव्यालोचनरूपज्ञानवत्त्वं च प्रकृतस्याक्षरस्यैव धर्मः। न तु प्रकरिष्यमाणस्याक्षरात्परस्य। सर्वनाम्नः प्रकृतपरत्वसम्भवे प्रकरिष्यमाणपरत्वकल्पनानौचित्यात्। मुण्डके प्रथमखण्डान्ते 'यस्सर्वज्ञ' इति मन्त्रः। तत्रैव खण्डे भूतयोनिः प्राक्प्रकृतः। अक्षरात्परस्य तु तृतीयखण्डे प्रस्ताव इति सन्निहितपरामर्शसम्भवेऽत्यन्तव्यवहितपरामर्शानौचित्याच्च। न च प्रकृतपरत्वेऽपि 'तपसा चीयते ब्रह्मे'त्यव्यवहितपूर्वमन्त्रप्रकृतब्रह्मपरत्वमेव स्यात् न तु व्यवहितप्रकृताक्षरपरत्वमिति वाच्यम्। पुल्लिङ्गेन यत्पदेन नपुंसकलिङ्गब्रह्मपदोक्तपरामर्शायोगात्। अक्षरस्य तु भूतयोनिशब्देनापि प्रकृतत्वात्तदभिप्रायेण पुल्लिङ्गत्वमुपपद्यते। न च 'तपसा चीयते ब्रह्मे'ति

मन्त्रस्थिततपःशब्दविवरणार्थत्वा'द्यः सर्वज्ञ'इति मत्रस्य तन्मन्त्रोक्तब्रह्मपरत्वमावश्यकमिति वाच्यम्। तस्यापि मन्त्रस्य 'तथाक्षरात्सम्भवतीह विश्व'मिति तत्पूर्वमत्रोक्त-विश्वसम्भवप्रकारविशेषविवरणार्थत्वेन त्वदुक्तरीत्यैव तन्मन्त्रोक्तब्रह्मणोऽपि तत्पूर्वमत्रोक्त-भूतयोन्यक्षररूपत्वावश्यम्भावात्। तस्माद्भूतयोन्यभिप्रायेणैव पुल्लिङ्गनिर्देशः। एवं च भूतयोनित्वविवरणार्थं 'तथाक्षरात्सम्भवतीह विश्व' मित्यन्तो मन्त्रः तन्मन्त्रोक्तविश्वसम्भव-प्रकारविशेषनिरूपणार्थं 'तपसा चीयते ब्रह्मे'ति मन्त्रः तन्मन्त्रोक्ततपश्शब्दविवरणार्थं 'यस्सर्वज्ञ' इति मन्त्र इतिमन्त्राणामाकाङ्क्षाक्रमेणावतरणमुपपद्यते। मन्त्रत्रयाम्नातस्याक्षरात्ततस्तस्मादित्यपादान-पञ्चमीत्रयस्यैकार्थ्येनावतरणमप्युपपद्यते। प्रञ्चमीत्रयस्याप्यपादानपरस्यैकविषयत्वसम्भवे ह्यक्षरादित्यस्यैवापादानान्तरपरत्वं ततस्तस्मादित्यनयोरुपादानान्तरपरत्वमिति कल्पनं न युक्तम्। न च तथाक्षरात्ततस्तस्मादित्यपादानपञ्चमीनामर्थैकरूप्यकृतप्रत्यभिज्ञानतस्तथाक्षरादक्षरात्परतः पर इति पञ्चम्योः शब्दैकरूप्यकृतं प्रत्यभिज्ञानं प्रथमोपस्थितिविषयत्वात्प्रबलमिति तदनुसारेण परत्वावध्याक्षरमेव भूतयोन्यक्षरं स्यात् न ब्रह्मेति वाच्यम्। 'अक्षरात्परतः पर' इत्यतः ततस्तस्मादित्यनयोः प्राक्पठितत्वेन तद्गतशब्दैकरूप्यकृतप्रत्यभिज्ञानादप्यत्रत्यार्थैकरूप्यकृत-प्रत्यभिज्ञानस्यैव प्राथमिकत्वादिति। ननु यदि प्राथमिकत्वमाद्रियेत तदोर्णनाभिदृष्टान्तस्वारस्यप्राप्तं परिणाम्युपादानत्वं प्रधानलिङ्गमगोत्रत्वादिकं जीवलिङ्गं च सर्वज्ञत्वादितः प्रबलमिति तदनुसारेण प्रधानं जीवो वा भूतयोन्यक्षरमिति निश्चिते तत्रानन्वयि सर्वज्ञत्वादिकमगत्याक्षरात्परतः परं योजनीयमित्याशङ्कामनुवदति-**यदुक्तमिति**। **अचेतनासर्वज्ञयोरिति**। अयं भावः। ऊर्णनाभ्यादिदृष्टान्तैः प्रधाने सम्भवत्परिणाम्युपादानत्वं न लभ्यते किं तु प्रधानादिव्यावृत्तं सकलप्रपञ्चसृष्टिपालनसंहारकर्तृत्वमभिन्ननिमित्तोपादानत्वं तथात्वेऽपि प्रपञ्चदोषैरस्पृष्टत्वं चेत्येतत्सर्वं लभ्यते। तथा हि-प्रथमदृष्टान्तेन तावदूर्णनाभिः स्वशरीरैकदेशभूतया लालया तंतुमिव परमेश्वरः स्वशक्तिशकलेन प्रपञ्चं सृजति संहरति चेति लभ्यते। तथासत्यूर्णनाभिवियोगेन तल्लालासृष्टतन्तोरिव परमेश्वरपृथग्भावेनापि प्रपञ्चस्य कदाचिदवस्थितिः स्यादिति शङ्कायां द्वितीयदृष्टान्तः। तेनौषधीनां पृथिव्यपृथक्सिद्ध्या पृथिव्येकदेशत्ववत्प्रपञ्चस्य परमेश्वरापृथग्भावसिद्ध्या तदेकदेशत्वमिति तस्य सर्वोपादानत्वं लभ्यते। तर्हि यथा पुरुषस्य स्वशरीरैकदेशो हस्तपादादिर्यत्नेन परिपालनीयः तस्मिन्कदाचिदुपहन्यमाने तदुपादानसृजिवतः पुरुषस्य दुःखित्वं च तथा परमेश्वरस्य स्वशरीरभूतशक्त्येकदेशः प्रपञ्चोऽवश्यं परिपालनीयः तस्मिन्कदाचिदुपहन्यमाने तस्य दुःखित्वं च स्यादिति शङ्कायां तृतीयदृष्टान्तः। तेन यथा जीवतः पुरुषादुद्भूते तच्छरीरैकदेशे केशनखादौ तेन परिपाल्यमाने कदाचिदुपहन्यमानेऽपि पुरुषस्य दुःखास्पर्शः तथा प्रपञ्चे परमेश्वरादुद्भूते तेन परिपाल्यमाने कदाचिदुपहन्यमानेऽपि न तस्य दुःखस्पर्श इति

परमेश्वरस्य प्रपञ्चपालयितृत्वं प्रपञ्चप्रयुक्तदोषास्पृष्टत्वं च लभ्यते। एतत्सिद्धमभिन्ननिमित्तोपादानत्वादिकं प्रपञ्चयितुमेव 'तपसा चीयते ब्रह्मे' त्यादिमत्रैस्तस्य स्त्रष्टव्यालोचनादिकं प्रपञ्च्यते। न चैवंभूतमभिन्ननिमित्तोपादानत्वरूपं भूतयोनित्वमचेतनस्य प्रधानस्यासर्वज्ञस्य जीवस्य वोपपद्यते। एवं चा' गोत्रमवर्ण 'मित्यादिकममूर्तत्वाप्राणत्वादिवत् ब्रह्मण्येव चेतनत्वसामान्यप्रसक्तजीवधर्मव्ययावर्तकतया योजनीयम्। 'यथा सुदीप्ता' दितिमत्रे सरूपग्रहणमपि जीवरूपकार्याभिप्रायेण योजनीयम्। नत्वे' तस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चे' ति व्यवहितानन्तरमत्रे वक्ष्यमाणप्राणमनःप्रभृत्यचेतनकार्याभिप्रायेण योजनीयमिति। सूत्रे 'अदृश्यत्वादिगुणक' इति पुल्लिङ्गनिर्देशो भूतयोन्यभिप्राय इति प्रागेवोक्तम्। यद्यपि विषयवाक्ये 'यया तदक्षर'मित्यक्षरशब्दस्य प्रथमनिर्दिष्टत्वाल्लघुत्वाच्च तेनैव सूत्रेऽपि धर्मिनिर्देशः कर्तुमुचितः। तथापि 'धर्मोक्ते'रित्यनेन गृहीतसर्वज्ञत्वादिधर्मोऽक्षरात्पर एवान्वेति न त्वक्षरे पुल्लिङ्गनिर्दिष्टत्वादिति शङ्कानिराकरणार्थं भूतयोन्यभिप्रायो 'यस्सर्वज्ञ' इत्यादिपुल्लिङ्गनिर्देश इति द्योतयितुं विशेषणीभूतादृश्यत्वादिगुणमुखेन प्रकृताक्षररूपो भूयोनिर्धर्मित्वेन निर्दिष्टः। नन्वेवं सति लाघवाद्भूतयोनिरित्येव धर्मिनिर्देशः कर्तुमुचितः। सत्यम्। अधिकरणवैफल्यशङ्कापरिहारार्थमित्थं धर्मिनिर्देशः कृतः। अत्र ह्येवमाशङ्कोदेति। मुण्डकोपनिषदः परमोपक्रमप्रभृति समाप्तिपर्यन्तमक्षरात्परे परब्रह्मणि महातात्पर्येण समन्वयः पूर्वपक्षिणोऽपि सम्प्रतिपन्न एव। तस्यां कियतः प्रदेशस्य परत्वावध्यक्षरप्रतिपादनार्थत्वमात्रमधिकं पूर्वपक्षिणेष्यते। किं तेन सर्वेषां वेदान्तानां महातात्पर्येण ब्रह्मणि समन्वयं व्यवस्थापयितुं प्रवृत्तस्य सिद्धान्तिनः प्रहीयते। मुण्डक एव हि द्वितीयखण्डे 'काली कराली न मनोजवा चे' ति मत्रे ब्रह्मविद्याप्रस्तावे अत्यन्तदवीयस्तयोपयुक्तमग्निजिह्वानिरूपणमपि दृश्यते। तस्माद्विफलमिदमधिकरणमितीयमाशङ्केत्थमनेन धर्मिनिर्देशेन निराक्रियते। यद्यदृश्यत्वादिगुणको भूतयोनिः . परं ब्रह्मेत्यनेनाधिकरणेन सिद्ध्यति तदानीमस्यामक्षरविद्यायामदृश्यत्वादिगुणवैशिष्ट्येन परं ब्रह्मोपासनीयमिति न सिद्ध्यति। 'अक्षरधियां त्ववरोध' (ब्र० ३.३.३३. सू.) इत्यधिकरणरीत्यास्यामक्षरविद्यायां परब्रह्मगुणत्वेन सम्प्रतिपन्नमदृश्यत्वादिगुणजातं सर्वासु ब्रह्मविद्यासूपसंहरणीयमित्येतदपि सिध्यति। पूर्वपक्षे त्वदृश्यत्वादिगुणकादक्षरात्परत्वेनैवात्र ब्रह्मोपासना सिद्ध्येत् न त्वदृश्यत्वादिगुणकत्वेनेति सिद्धान्ते पूर्वपक्षे च फलभेदसद्भावान्नाधिकरणवैफल्यमिति। अपि चाधिकरणावतारिकाभाष्योक्तरीत्या परमेश्वरस्य पृथिव्यादिनियमनार्थेन शरीरेण पृथिव्यादिवद्दर्शनस्पर्शनविषयत्वप्रसक्त्या 'न चक्षुषा पश्यति कश्चनैन'मित्यादिश्रुतिप्रसिद्धस्यादृश्यत्वादेस्तद्धर्मानुपपत्तिशङ्कानिराकरणार्थत्वेनास्याधिकरणस्यानतिस्पष्टब्रह्मलिङ्गकवाक्यचिन्तनार्थेन पादेन सङ्गत्युपपादनार्थमप्यदृश्यत्वादिगुणक इति धर्मिनिर्देशः कृतः। तेनादृश्यत्वादिः परमेश्वरगुणो भवितुमर्हत्येव। 'अदृश्यमग्राह्य'मित्यादिश्रवणात्।

पृथिव्यादिनियामकेन शरीरेण पृथिव्यादिषु परमेश्वरस्य दृश्यत्वं स्पृश्यत्वं च प्रसज्येतेति शङ्कावारणार्थमेव खल्वदृश्यमग्राह्यमित्युच्यते। रूपस्पर्शहीने स्वरूपे दर्शनादिप्रसक्त्यभावेन तत्रादृश्यत्वाग्राह्यत्वयोरवक्तव्यत्वात्। श्रुतोपपत्त्यर्थं पृथिव्यादिनियामकशरीरस्यास्मदादिदर्शनाद्ययोग्यत्वादि कल्पनीयम्। अपाणिपादादिश्रवणमपि दर्शनादियोग्यपाणिपादाद्यभावाभिप्रायमित्युपपत्तिः सूचिता भवति। नन्वधिकरणान्तरेषु सूत्रे पादसङ्गतिसूचनार्थं विशेषणं नास्ति किमर्थमस्मिन्नधिकरणे तत्कृतम्। उच्यते। पूर्वपक्षे स्पष्टानां ब्रह्मश्रुतिलिङ्गवाक्यानामक्षरान्तरेऽन्वयोऽभिमतः। तेन स्पष्टास्पष्टब्रह्मलिङ्गवाक्यचिन्तनार्थे तृतीयपाद एवास्याधिकरणस्य सङ्गतिः न द्वितीयपाद इति शङ्कोन्मिषति तन्निराकरणाय द्वितीयपादेऽप्यस्य सङ्गतिसूचनार्थं तद्विशेषणं कृतम्। तेनोभयत्र सङ्गतमप्येतदधिकरणमुभयत्र न प्रवर्तनीयमित्येकत्र प्रवर्तनीयं सत्प्रथमातिक्रमे कारणाभावादत्रैव प्रवर्तितमिति सङ्गतिरुपपादिता भवति। स्यादेतत्। 'यथा सुदीप्ता' दितिमत्रोक्तमक्षरं तावद्भूतयोन्यक्षरमिति सम्प्रतिपन्नम्। अतस्तदन्तरमन्त्रे ब्रह्मगतपरत्वावधितया निर्दिष्टमक्षरमपि तदेवेत्येतदप्रत्याख्येयम्। तथा च भूतयोन्यक्षरस्य ब्रह्मपरत्वासिद्धौ तत्प्रधानं जीवो वेत्येवाङ्गीकर्तव्यमिति तदनुसारेण यथोर्णनाभिरित्यादिकं प्रधाने जीवे वा यथाकथञ्चिद्योजनीयमित्याशङ्कानिराकरणार्थं तस्य प्रधानत्वजीवत्वपक्षयोरनुपपत्त्यन्तरप्रदर्शनपरत्वेनोत्तरसूत्रमवतारयति-**पुनरिति**।।सू॰।। **विशेषणभेदव्यपदेशाभ्यां च नेतरौ**।।२३।।

इति शिवार्कमणिदीपिका षष्ठदृश्यत्वाधिकरणम् समाप्तम्

अथ वैश्वानराधिकरणम्। सू॰ २४–३२ ॥

शाङ्करभाष्यम्

वैश्वानरः साधारणशब्दविशेषात्॥२४॥ "को न आत्मा किं ब्रह्म" ति, "आत्मानमेवेमं संप्रत्यध्येषि तमेव नो ब्रूही" (छा॰ ५/११/१/६) ति चोपक्रम्य द्युसूर्यवाय्वाकाशवारिपृथिवीनां सुतेजस्त्वादिगुणयोगमेकैकोपासननिन्दया च वैश्वानरं प्रत्येषां मूर्धादिभावमुपदिश्याम्नायते –"यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेष्वात्मस्वन्नमत्ति तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्माऽऽत्मा संदेहो बहुलो वस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीय" (छा॰ ५/१८/२) इत्यादि॥

तत्र संशयः–किं वैश्वानरशब्देन जाठरोऽग्निरुपदिश्यते, उत भूताग्निः, अथ तदभिमानिनी देवता, अथवा शारीरः, आहोस्वित्परमेश्वर इति। किं पुनरत्र संशयकारणम्? वैश्वानर इति जाठरभूताग्निदेवतानां साधारणशब्दप्रयोगातात्मेति च शारीरपरमेश्वरयोः। तत्र कस्योपादानं न्याय्यम्, कस्य वा हानमिति भवति संशयः।

किं तावत्प्राप्तम्? जाठरोऽग्निरिति। कुतः? तत्र हि विशेषेण कचित्प्रयोगो दृश्यते–"अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते यदिदमद्यत" (बृह॰ ५/९) इत्यादौ। अग्निमात्रं वा स्यात्; सामान्येनापि प्रयोगदर्शनात्–"विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्" (ऋ॰ सं॰ १०/८८/१) इत्यादौ। अग्निशरीरा वा देवता स्यात्; तस्यामपि प्रयोगदर्शनात्, "वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः (ऋ॰ सं॰ १/९८/१) इत्येवमाद्यायाः श्रुतेर्देवतायामैश्वर्याद्युपेतायां सम्भवात्। अथात्मशब्दसामानाधिकरण्यादुपक्रमे च "को न आत्मा किं ब्रह्म" ति केवलात्मशब्दप्रयोगादात्मशब्दवशेन च वैश्वानरशब्दः परिणेय इत्युच्यते, तथापि शारीर आत्मा स्यात्; तस्य भोक्तृत्वेन वैश्वानरसंनिकर्षात्, प्रादेशमात्रमिति च विशेषणस्य तस्मिन्नुपाधिपरिच्छिन्ने सम्भवात्। तस्मान्नेश्वरो वैश्वानर इति॥

एवं प्राप्ते तत इदमुच्यते–वैश्वानरः परमात्मा भवितुमर्हतीति। कुतः? साधारणशब्दविशेषात्।

साधारणशब्दयोर्विशेष:। यद्यप्येतावुभावप्यात्मवैश्वानरशब्दौ साधारणशब्दौ–वैश्वनरशब्दस्तु त्रयस्य साधारण:, आत्मशब्दश्च द्वयस्य; तथापि विशेषो दृश्यते, येन परमेश्वरपरत्वं तयोरभ्युपगम्यते, –''तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजा'' इत्यादि:। अत्र हि परमेश्वर एव द्युभूर्धत्वादिविशिष्टोऽवस्थान्तरगत: प्रत्यगात्मत्वेनोपन्यस्त आध्यानायेति गम्यते; कारणत्वात्। कारणस्य हि सर्वाभि: कार्यगताभिरवस्थाभिरवस्थावत्त्वाद् द्युलोकाद्यवयवत्वमुपपद्यते। ''स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ती'' ति च सर्वलोकाद्याश्रयं फलं श्रूयमाणं परमकारणपरिग्रहे सम्भवति। ''एवं हास्य सर्वे पाप्मान: प्रदूयन्ते'' (छा० ५/२४/३) इति च तद्विद: सर्वपाप्मप्रदाहश्रवणम्, ''को न आत्मा किं ब्रह्मे'' ति चात्मब्रह्मशब्दाभ्यामुपक्रम इत्येवमेतानि लिङ्गानि परमेश्वरमेवावगमयन्ति। तस्मात्परमेश्वर एव वैश्वानर:।।२४।।

स्मर्यमाणमनुमानं स्यादिति।।२५।। इतश्च परमेश्वर एव वैश्वानर:, यस्मात्परमेश्वरस्यैवाग्निरास्यं द्यौर्मूर्धेतीदृशं त्रैलोक्यात्मकं रूपं स्मर्यते–''यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षिति:। सूर्यश्चक्षुर्दिश: श्रोत्रं तस्मै लोकात्मने नम:।'' इति। तत् स्मर्यमाणं रूपं मूलभूतां श्रुतिमनुमापयदस्य वैश्वानरशब्दस्य परमेश्वरपरत्वेऽनुमानम्=लिङ्गम् गमकम् स्यादित्यर्थ:। इतिशब्दो हेत्वर्थ:। यस्मादिदं गमकम्, तस्मादपि वैश्वानर: परमात्मैवेत्यर्थ:। यद्यपि स्तुतिरियं–''तस्मै लोकात्मने नम:'' इति। स्तुतित्वमपि नासति मूलभूते वेदवाक्ये सम्यगीदृशेन रूपेण सम्भवति। ''द्यां मूर्धानं यस्य विप्रा वदन्ति खं वै नाभिं चन्द्रसूर्यौ च नेत्रे। दिश: श्रोत्रे विद्धि पादौ क्षितिं च सोऽचिन्त्यात्मा सर्वभूतप्रणेता।'' इत्येवञ्जातीयका च स्मृतिरिहोदाहर्तव्या।।२५।।

शब्दादिभ्योऽन्त: प्रतिष्ठानाच्च नेति चेन्न तथादृष्टयुपदेशादसंभवात्पुरुषमपि चैनमधीयते।।२६।।

अत्राह–न परमेश्वरो वैश्वानरो भवितुमर्हति। कुत:? शब्दादिभ्योऽन्त:प्रतिष्ठानाच्च। शब्दस्तावत् वैश्वानरशब्दो न परमेश्वरे सम्भवति; अर्थान्तरे केवलजाठरपरिग्रहे पुरुषेऽन्त: प्रतिष्ठितत्वं केवलं स्याद्, न पुरुषविधत्वम्। पुरुषविधमपि चैनमधीयते वाजसनेयिन:–''पुरुषेऽन्त:प्रतिष्ठितं वेदे'' ति। पुरुषविधत्वं च प्रकरणाद्यदधिदैवतं द्युभूर्धत्वादि पृथिवीप्रतिष्ठितत्वान्तम्, यच्चाध्यात्मं प्रसिद्धमूर्धत्वादि चुबुकप्रतिष्ठितत्वान्तम्, तत्परिगृह्यते।।२६।।

*अत एव न देवता भूतं च।।२७।। यत्पुनरुक्तम्–भूताग्नेरपि मन्त्रवर्णे द्युलोकादिसम्बन्ध-दर्शनान्मूर्धैव सुतेजा इत्याद्यवयवकल्पनं तस्यैव भविष्यतीति, तच्छरीराया देवताया वैश्वर्ययोगात्–इति, तत्परिहर्तव्यम्? अत्रोच्यते–अत एव=उक्तेभ्यो हेतुभ्यो न देवता वैश्वानर:। तथा भूताग्निरपि न वैश्वानर:। न हि भूताग्नेरौष्ण्यप्रकाशमात्रात्मकस्य द्युमूर्धत्वादिकल्पनोपपद्यते;

विकारस्य विकारान्तरात्मत्वासम्भवात्। तथा देवतायाः सत्यप्यैश्वर्ययोगे न द्युमूर्धत्वादिकल्पना सम्भवति; अकारणत्वात्- परमेश्वराधीनैश्वर्यत्वाच्च। आत्मशब्दासंभवश्च सर्वेष्वेषु पक्षेषु स्थित एव।।२७।।

*साक्षादप्यविरोधं जैमिनिः।।२८।। पूर्वं जाठराग्निप्रतीको जाठराग्न्युपाधिको वा परमेश्वर उपास्य इत्युक्तमन्तः प्रतिष्ठितत्वाद्यनुरोधेन, इदानीं तु विनैव प्रतीकोपाधिकल्पनाभ्यां साक्षादपि परमेश्वरोपासनपरिग्रहे न कश्चिद्विरोध इति जैमिनिराचार्यो मन्यते।। ननु–जाठराग्न्यपरिग्रहेऽन्तः प्रतिष्ठितत्ववचनं शब्दादीनि च कारणानि विरुध्येरन्–इति? अत्रोच्यते–अन्तःप्रतिष्ठितत्ववचनं तावन्न विरुध्यते। न हीह "पुरुषविधं पुरुषेऽन्तप्रतिष्ठिंतं वेद" ति जाठराग्न्यभिप्रायेणेदमुच्यते; तस्याप्रकृतत्वात्,। असंशब्दितत्वाच्च।।

कथं तर्हि? यत्प्रकृतं मूर्धादिचुबुकान्तेषु पुरुषावयवेषु पुरुषविधत्वं कल्पितम्, तदभिप्रायेणेदमुच्यते–"पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदे" ति यथा वृक्षे शाखां प्रतिष्ठितां पश्यतीति तद्वत्।।

अथवा–यः प्रकृतः परमात्माध्यात्ममधिदैवतं च पुरुषविधत्वोपाधिः तस्य यत्केवलं साक्षिरूपं तदभिप्रायेणेदमुच्यते–"पुरुषेऽन्तःप्रतिष्ठितं वेदे" ति। निश्चिते च पूर्वापरालोचनवशेन परमात्मपरिग्रहे तद्विषय एव वैश्वानरशब्दः केनचिद्योगेन वर्तिष्यते। विश्वश्चायं नरश्चेति, विश्वेषां वाऽयं नरः, विश्वे वा नरा अस्येति विश्वानरः परमात्मा; सर्वात्मत्वात्। विश्वानर एव वैश्वानरः। तद्धितोऽनन्यार्थो राक्षसवायसादिवत्। अग्निशब्दोऽपयग्रणीत्वादियोगाश्रयणेन परमात्मविषय एव भविष्यति। गार्हपत्यादिकल्पनं प्राणहुत्यधिकरणत्वं च परमात्मनोऽपि सर्वात्मत्वादुपपद्यते।।२८।।

कथं पुनः परमेश्वरपरिग्रहे प्रादेशमात्रश्रुतिरुपपद्यते? इति तां व्याख्यातुमारभते–*अभिव्यक्तेरित्याश्मरथ्यः*।।२९।। अतिमात्रस्यापि परमेश्वरस्य प्रादेशमात्रत्वमभिव्यक्तिनिमित्तं स्यात्। अभिव्यज्यते किल प्रादेशमात्रपरिमाणः परमेश्वर उपासकानां कृते। प्रदेशेषु वा हृदयादिषूपलब्धिस्थानेषु विशेषेणाभिव्यज्यते। अतः परमेश्वरेऽपि प्रादेशमात्रश्रुतिरभिव्यक्तेरुपपद्यत इत्याश्मरथ्य आचार्यो मन्यते।।२९।।

अनुस्मृतेर्बादरिः।।३०।। प्रादेशमात्रहृदयप्रतिष्ठेन वाऽयं मनसानुस्मर्यते तेन प्रादेशमात्र इत्युच्यते; यथा प्रस्थमित यवाः प्रस्था इत्युच्यन्ते तद्वत्। यद्यपि च यवेषु स्वगतमेव परिमाणं प्रस्थसंबन्धाद्व्यज्यते। न चेह परमेश्वरगतं किञ्चित्परिमाणमस्ति, यद् हृदयसम्बन्धाद्व्यज्यते; तथापि प्रयुक्तायाः प्रादेशमात्रश्रुतेः सम्भवति यथाकथञ्चिदनुस्मरणमालम्बनमित्युच्यते। प्रादेशमात्रत्वेन

वाऽयमप्रादेशमात्रोऽप्यनुस्मरणीय: प्रादेशमात्रश्रुत्यर्थवत्तायै। एवमनुस्मृतिनिमित्ता परमेश्वरे प्रादेशमात्रश्रुतिरिति बादरिराचार्य्यो मन्यते।।३०।।

संपत्तेरिति जैमिनिस्तथाहि दर्शयति।।३१।। संपत्तिनिमित्ता वा स्यात्प्रादेशमात्रश्रुति:। कुत:? तथाहि–समानप्रकरणं वाजसनेयिब्राह्मणंद्युप्रभृतीन् पृथिवीपर्यन्तांस्त्रैलोक्यात्मनो वैश्वानरस्यावयवान-ध्यात्ममूर्धप्रभृतिषु चुबुकपर्यन्तेषु देहावयवेषु संपादयत्प्रादेशमात्रसम्पत्तिं परमेश्वरस्य दर्शयति–''प्रादेशमात्रमिव ह वै देवा: सुविदिता अभिसंपन्नास्तथा नु व एतानवक्ष्यामि यथा प्रादेशमात्रमेवाभिसंपादयिप्यामीति। स होवाच मूर्धानमुपदिशन्नुवाचैष वा अतिष्ठा वैश्वानर इति। चक्षुषी उपदिशन्नुवाचैष वै सुतेजा वैश्वानर इति। नासिके उपदिशन्नुवाचैष वै पृथग्वर्त्मात्मा वैश्वानर इति। मुख्यमाकाशमुपदिशन्नुवाचैष बहुलो वैश्वानर इति। मुख्या अप उपदिशन्नुवाचैष वै रयिर्वैश्वानर इति। चुबुकमुपदिशन्नुवाचैष वै प्रतिष्ठा वैश्वानर इति। चुबुकमित्यधरं मुखफलकमुच्यते। यद्यपि वाजसनेयके द्यौरतिष्ठात्वगुणा समाम्नायते, आदित्यश्च सुतेजस्त्वगुण:, छान्दोग्ये पुनर्द्यौ: सुतेजस्त्वगुणा समाम्नायते, आदित्यश्च विश्वरूपत्वगुण: तथापि नैतावता:। किञ्चिद्धीयते; प्रादेशमात्रश्रुतेरविशेषात्, सर्वशाखाप्रत्ययत्वाच्च। संपत्तिनिमित्तां प्रादेशमात्रश्रुतिं युक्ततरां जैमिनिराचार्यो मन्यते।।३१।।

आमनन्ति चैनमस्मिन्।।३२।। आमनन्ति चैनं परमेश्वरमस्मिन्मूर्धचुबुकान्तराले जाबाला:–''य एषोऽनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठित इति। वरणायां नास्यां च मध्ये प्रतिष्ठित इति। का वै वरणा का च नासी'' ति। तत्र चेमामेव नासिकां वरणा नासीति निरुच्य या सर्वाणीन्द्रियकृतानि पापानि वारयतीति सा वरणा, सर्वाणीन्द्रियकृतानि पापानि नाशयतीति सा नासीति। पुनरामनन्ति–''कतमच्चास्य स्थानं भवतीति। भ्रुवोर्घ्राणस्य च य: सन्धि: स एष द्यूलोकस्य परस्य च सन्धिर्भवती''ति (जाबा०१)। तस्मादुपपन्ना परमेश्वरे प्रादेशमात्रश्रुति:। अभिविमानश्रुति: प्रत्यगात्मत्वाभिप्राया। प्रत्यगात्मतया सर्वै: प्राणिभिरभिविमीयत इत्यभिविमान:। अभिगतो वायं प्रत्यगात्मत्वाद्विनामश्च मानवियोगादित्यभिविमान:। अभिविमिमीते वा सर्वं जगत्कारणत्वादित्यभिविमान:। तस्मात्परमेश्वरो वैश्वानर इति सिद्धम्।।३२।। इति सप्तमं वैश्वानराधिकरणम्।।

इति श्रीमच्छङ्करभगवत्पादिवकृतौ शाङ्करभाष्यम् शारीरकमीमांसाभाष्ये प्रथमाध्यायस्य द्वितीय: पाद: समाप्तम्

वार्तिकम्

वैश्वानरः साधारणशब्दविशेषात्।।२४।। यदुक्तम्–सार्वात्म्यरूपोपन्यासाद् ब्रह्माभ्युपगन्तव्यमिति, तन्न; वैश्वानरवाक्ये जाठराग्न्यादौ तस्यानैकान्त्यात्, इति पूर्वोत्तराधिकरणयोराक्षेपसङ्गतिः। छान्दोग्ये–"को न आत्मा किं ब्रह्मे" ति प्राचीनशाल-सत्ययज्ञेन्द्रद्युम्न-जन-बुडिलाः समेत्य मीमांसां चक्रुः। "को न आत्मे" त्युक्ते जीवात्मनो मीमांसाविषयतया परिग्रहः स्यात्, तद् मा भूदित्यत उक्तम्–किं ब्रह्मेति। तावत्युक्ते मा भूद् ब्रह्मणोऽनात्मत्वं परोक्षत्वं चेत्यत उक्तम्–को न आत्मेति। ते च मीमांसमानाः वैश्वानरस्य भगवतः परमात्मनो मूर्धाद्येकैकावयवमात्मत्वेन प्रतिपद्यमानाः सन्तः परस्परविरुद्धपक्षं जल्पन्तो निश्चयमनधिगच्छन्तस्तन्निश्चयायोद्दालकमभ्याजग्मुः। तत उद्दालकोक्त्या सहोद्दालकेन वैश्वानरविद्याविदं कैकयराजमुपसद्योचुः–"आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूही"ति। अध्येषि=स्मरसीत्यर्थः ; इङ् स्मरण इत्यस्माद् धातोरध्येपीति रूपनिष्पत्तेः। "तान् होवाच प्रातर्वः प्रतिवक्तास्मीति। ते ह समित्पाणयः पूर्वाह्णे प्रतिचक्रमिरे। तान् हानुपनीयैवैतदुवाच ह"। तत्र तेषां कस्मिन्नंशेऽज्ञानमिति विदित्वैतानुपदेक्ष्यामीत्यभिप्रेत्य राजा क्रमेण तानृषीन् पृच्छति–"औपमन्यव कं त्वमात्मानमुपास्स" इति। एवं पृष्टः प्राचीनशाल औपमन्यवो दिवमेव भगवो राजन्निति होवाच। एतच्छ्रुत्वा–"एष वै सुतेजा आत्मा वैश्वानरो यं त्वमात्मानमुपास्से। तस्मात् तव सुतम् वसन्तादिकाले सुत्याहनि सोमः सुतः, प्रसुतम्=प्रकर्षेण सुतः, आसुतम्=आ=सम्यक् सुतः कुले दृश्यते अत्सि अन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते। परन्तु मूर्धा त्वेष आत्मनः, न त्वात्मा सर्वावयव इति होवाच राजाऽथ परमप्युवाच मूर्धा ते व्यपतिष्यद् यन्मां नागमिष्य इति। अथानन्तरं सत्ययज्ञमुवाच प्राचीनयोग्य कं त्वमात्मानमुपास्स इति, आदित्यमेव भगवो राजन्निति होवाच प्राचीनयोग्यः। एवं तद्वाक्यं श्रुत्वा एष वै विश्वरूप आत्मा वैश्वानरो यं त्वमात्मानमुपास्स इत्यनेन तत्र विश्वरूपगुणमुपदिश्य तस्मात् तव बहु विश्वरूपं कुले दृश्यत इत्यादिफलकीर्तनेन तत् स्तुत्वा चक्षुष्टवेतदात्मन इति चक्षुष्टवमभिधायोवाच राजाऽन्धोऽभविष्यो

यन्मां नागमिष्य इति। अथ होवाचेन्द्रद्युम्नं कं त्वमात्मानमुपास्स इति। वायुमेव भगवो राजन्निती‍न्द्रद्युम्न उवाच। एवमुक्तो राजा एष वै पृथग्वर्त्माऽऽत्मा यं त्वमात्मानमुपास्से। तस्मात् त्वां पृथग्बलय आयन्ति....प्राणस्त्वेष आत्मन इति प्राणस्तु उदक्रमिष्यत् यन्मां नागमिष्यः—इति। अथ होवाच जनं कं त्वमात्मानमुपास्स इति। स होवाचाऽऽकाशमेव भगवो राजन्निति। तं प्रत्याह राजा एष वै बहुल आत्मा वैश्वानरस्तस्मात् त्वं बहुलोऽसि प्रज्ञया धनेन च। संदेहस्त्वेष आत्मन इति संदेहस्ते व्यशीर्यत् यन्मां नागमिष्य इति। संदेहः=देहमध्यभागः। अथ होवाच बुडिलं कं त्वमात्मानमुपास्स इति। अप एव भगवो राजन्निति होवाच। तं प्रत्याह राजा एष वै रयिरात्मा वैश्वानरः। तस्मात् त्वं रयिमान्। रयिः=धनम्; वस्तिस्त्वेष आत्मन इति। वस्तिस्ते व्यभेत्स्यत् यन्मां नागमिष्य इति। अथ होवाचौद्दलकं कं त्वमात्मानमुपास्स इति। स होवाच पृथिवीमेव भगवो राजन्निति। तं प्रत्याह राजा एष वै प्रतिष्ठाऽऽत्मा वैश्वानरस्तस्मात् त्वं प्रतिष्ठितोऽसि पादौ त्वेतावात्मन इति पादौ ते व्यम्लास्येतां यन्मां नागमिष्य इति। एवं प्रत्येकं मूर्धाद्यवयव आत्मग्रहं निन्दित्वाऽवयविनि वैश्वानर आत्मभावमुपदिशन् तानृषीन् होवाच राजा एते वै खलु यूयं पृथगिवेममात्मानं वैश्वानरं विद्वांसोऽन्नम्=अल्पमात्थ "यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति। तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मा संदेहो बहुलो वस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽनवाहार्यपचन आस्यमाहवनीय" इति। तदेतद् वाक्यसंक्षेपेणोदाहरति स्म भाष्यकारः—*को न आत्मा किं ब्रह्मेत्यादिना*।।

तत्र सन्दिह्यते—किं वैश्वानरशब्देनात्माऽभिधीयते, किं वाऽनात्मेति। तदर्थमयं विचारः—किमयं वैश्वानरशब्दो योगेनात्र प्रयुज्यते, किं वा रूढयेति। यदा च रूढिः, आनात्मवचनश्च वैश्वानरशब्दः, तदाऽपि किं जाठराग्निस्तेनाभिधीयते, किं वा भूताग्निः, आहो तदभिमानी देवतात्मेति; त्रिष्वप्यविशेषेण प्रयोगदर्शनेन वैश्वानरशब्दसाधारण्यात्। यदा योगः, तदाऽऽत्मशब्दसामानाधिकरण्यादात्मवचनत्वेऽपि भवति सन्देहः—किं जीवात्मवचनः, किं वा परात्मवचन इति।।

ननु—"सर्वत्र प्रसिद्धोपदेशादि"ति न्यायेनोपक्रमे श्रूयमाणात्मब्रह्मशब्दयोः परमात्मनि प्रसिद्धत्वाद् उपसंहारे च सुतेजस्त्वादिब्रह्मगुणश्रवणात् ताभ्यां वाक्यस्य ब्रह्मपरत्वे सिद्धे मध्ये तत्र श्रूयमाणस्य वैश्वानरपदस्य तदनुरोधेन मनोमयादिवत् कथञ्चिद् योगेनापि वक्ष्यमाणरीत्या व्याख्यातुं शक्यत्वात् साधारणशब्दवशेनापि संशयासिद्धेर्न पृथगधिकरणारम्भो युक्तः, नैष दोषः।।

अस्त्यत्राप्यधिका शङ्का—तत्र हि मनोमयादिपदं ब्रह्मणीव जीवेऽपि योगेनैव वर्तते, न रूढया,

अत्र तु वैश्वानरशब्दोऽग्नावेव रूढः, न ब्रह्मणि। रूढिस्तु योगाद् बलीयसी। न च –"आत्मानमेववैश्वानरं संप्रत्यध्येषी" त्यात्मशब्दसामानाधिकरण्यबलाद् रूढिबाधेन योगार्थत्वाध्यवसानमिति–वाच्यम्; "स एषोऽग्निर्वैश्वानर" इत्यग्निशब्दसामानाधिकरण्यस्यापि दृष्टत्वात् तद्बलेन रूढिपरिग्रहस्यैव युक्तत्वात्। न ह्यग्निशब्दस्य ब्रह्मणि प्रयोगः कथञ्चिदुपपद्यते। अपि च "हृदयं गार्हपत्य" इत्यादित्रेताप्रकल्पनम्, तथा–"तद्यद् भक्तं प्रथममागच्छेत् तद्धोमीयमि" त्यादिना च प्राणाहुत्यधिकरणतासङ्कीर्तनमग्निपरिग्रहे घटते, पुरुषेऽन्तःप्रतिष्ठितत्वश्रवणं च। आत्मशब्दश्च तत्र भूतात्मेन्द्रियात्मेतिवत् स्वरूपवचनत्वेनाप्युपपद्यते। ब्रह्मशब्दोऽपि महत्त्वयोगात्। न चोपक्रमानुरोधेनोपसंहारो व्याख्येयः ; वाजसनेयिनां वैश्वानरविद्योपक्रमे "वैश्वानरं वै भगवन् प्रतिवेद तं नो ब्रूही" ति वैश्वानरशब्देनैवोपक्रमात् तदनुसारेण छान्दोग्योपक्रमस्य व्याख्येयत्वात्। आत्मपक्षेऽपि जीवः संभवति; "यस्त्वेतमेव प्रादेशमात्रमभिविमानं वैश्वानरमुपास्त" इति प्रादेशमात्रत्वेन विशेषितत्वात्। तस्मात् संशयकारणसत्त्वादुपपन्नः पृथगधिकरणारम्भ इति।।

किं प्राप्तम्? "स एषोऽग्निर्वैश्वानर" इति सर्वत्र प्रसिद्धस्येहोपदेशादनात्माऽग्निरग्निवैश्वानर-पदाभ्यामभिधीयते–इति; आत्मब्रह्मशब्दयोस्तु पूर्वोक्तरीत्या तत्र संभवात्, आत्मनि तु अग्निवैश्वानरशब्दयोरसंभवात्, रूढिपरित्यागे कारणाभावेन योगस्य ग्रहीतुमशक्यत्वात्। अग्नित्वेऽपि जाठराग्निरेव ग्राह्यः ; "अग्निर्वैश्वानरः" "योऽयमन्तः पुरुषे" "येनेदं पच्यत" इत्यादौ तत्र तयोः प्रयोगदर्शनादत्रापि तल्लिङ्गेन तत्रैव तयोः प्रयोगावधारणात्। किं तस्यात्र तल्लिङ्गं भवति? उच्यते; प्राणाहुत्यधिकरणत्वम्, अन्तःप्रतिष्ठितत्वं च। यदि चाध्यात्माग्नेर्द्युमूर्धादिसम्बन्धो नोपपद्यत इति ब्रूषे, अस्तु तर्हि बहिरन्तश्चावतिष्ठमानस्य भूताग्नेरयं निर्देश इति। तस्य च द्युलोकादिसम्बन्धो मन्त्रवर्णादवगम्यते। "यो भानुना पृथिवीं द्यामाततान रोदसि अन्तरिक्षम्" इत्यादि च मन्त्रवर्णः। यदि च तस्याप्यञ्जसा न द्युलोकाद्यवयवत्वं संभवति, अस्तु तर्हि तच्छरीराय अग्निदेवताया निर्देशः, संभवति च तस्या ऐश्वर्ययोगाद् द्युलोकाद्यवयवत्वमिति; "वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीरि" त्येवमादिश्रुतेः। यदि चात्मशब्दसामानाधिकरण्यदर्शनाद् नानात्मपरिग्रह इति मन्यसे, तर्हि जीव एव वैश्वानरोऽग्निः ; "अग्निरधीतेऽनुवाकम्" इतिवत् सहावस्थितत्वादिगुणयोगेन तत्र तच्छब्दप्रयोगोपपत्तेः, प्रादेशमात्रत्वगुणस्य तस्मिन्नुपाधिपरिच्छिन्न उपपन्नतरत्वात्, सुतेजस्त्वादिगुणस्य तस्मिन् ब्रह्माभेदेन स्तुत्योपपत्तेश्च, न ब्रह्म; वैश्वानरशब्दादिभ्यो व्याख्यातेभ्यो हेतुभ्य इति। एवं प्राप्ते ब्रूमः– *वैश्वानरः साधारणशब्दविशेषात्*।। वैश्वानरोऽत्र परमात्मा भवितुमर्हति, नानात्मा, न वा जीव इति। कुतः? साधारणशब्दविशेषात्=सत्यपि "को न

आत्मा किं ब्रह्मे'' त्यत्रात्मशब्दे जीवब्रह्मसाधारणे, सत्यपि च ''आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषी'' त्यादौ वैश्वानरशब्दे रूढियोगाभ्यां जाठरादित्रितयसाधारणे, तयोर्विशेष उपलभ्यते। कोऽत्र साधारणात्मवैश्वानरशब्दयोर्विशेषः? पदान्तरसमभिव्याहार इति वदामः। किं तत् पदान्तरम्? उच्यते; ''को न आत्मा किं ब्रह्मे'' त्यत्र ब्रह्मपदम्। तेन हि समभिव्याहृतं सदात्मपदं जीवात्मनो व्यावर्तते घटपदमिव शुक्लपदसमभिव्याहृतं नीलघटादित्युक्तं पुरस्तात्। तथा ''ऽऽत्मानमेवेमं वैश्वानरमि'' त्यत्र वैश्वानरपदमात्मपदसमभिव्याहृतं सदनात्मभ्यो व्यावर्तते सिंहपदमिव देवदत्तपदसमभिव्याहृतं केसरादिमतो मण्डपपदमिव पुरुषपदसमभिव्याहृतं गृहात्। तस्माद् ब्रह्माभिधायकपदान्तरेण विशेषितत्वाद् आत्मवैश्वानरशब्दाविह ब्रह्माभिधायकावित्यध्यवस्यामः। अपरोऽप्यस्ति विशेषः-''तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजा'' इत्यादिः। सर्वकारणस्यैव हि परमात्मनः सर्वात्मकत्वाद् द्युमूर्धत्वाद्युपपद्यते, नान्यस्य; असंभवात्। ''तथा-स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ती'' ति सर्वलोकाद्याश्रयफलं श्रूयमाणं सर्वात्मकपरमेश्वरपरिग्रहे घटते। ''एवं हास्य सर्वे पाप्मानः प्रदूयन्त'' इति तद्विदः सर्वपापप्रहाणं च, ''को न आत्मा किं ब्रह्मे'' त्यात्मशब्दब्रह्मशब्दाभ्यामुपक्रमश्चेत्येतेऽपि लिङ्गविशेषाः परमेश्वरमेव वैश्वानरं गमयन्ति। तस्मात् परमेश्वर एव वैश्वानर इति।।२४।।

ननु-उक्तं द्युमूर्धादिलिंङ्गविशेषो-भूताग्न्यादावप्युपपद्यते-इति; ''विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्'' इत्यादिश्रुतेस्तस्यापि द्युलोकादिसम्बन्धावगतेरिति, नेत्याह सूत्रकारः-

स्मर्यमाणमनुमानं स्यादिति।।२५।। इतिशब्दो हेतौ। यस्मादिदं द्युमूर्धादिरूपं परमेश्वरस्यैव ''यस्याग्निरास्यं द्यौर्मूर्धे'' त्यादिस्मृतौ स्मर्यमाणं दृश्यते, नान्यस्य; तस्मात् तदेवेह प्रत्यभिज्ञायमानं वैश्वानरस्य परमेश्वरत्वेऽनुमानं भवतीत्यर्थः। अस्याः श्रुतेस्तन्मूलत्वादित्यभिप्रायः। तदिदमुक्तं भाष्यकृता-*मूलभूतां श्रुतिमनुमनुमापयदिति*।। ननु-''अग्निर्मर्धा चक्षुषी चन्द्रसूर्या'' वित्यादिश्रुत्यन्तरमस्ति तत्स्मृतेर्मूलम्, सत्यम्, ''सर्वशाखाप्रत्ययं चोदनाद्यविशेषादि'' तिन्यायेनेयमपि श्रुतिस्तन्मूलम्; अविशेषादिति निरवद्यम्। शेषं भाष्ये।।२५।।

शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च नेति चेन्न तथादृष्ट्यु पदेशादसंभवात् पुरुषमपि चैनमधीयते।।२६।। ननु-सन्त्यनात्मन्यपि वैश्वानरे शब्दादयो विशेषाः। शब्दस्तावद् उदाहृतोऽग्निशब्दो वैश्वानरशब्दश्च। आदिशब्दात् ''हृदयं गार्हपत्यमि'' त्यादित्रेतापरिकल्पनम्, प्राणाहुत्यधिकरणतासंकीर्तनं च। अयं च जाठराग्नेर्विशेषो यत् ''पुरुषेऽन्तः प्रतिष्ठितं वेदे''

त्यन्त:प्रतिष्ठानम्। अत एवास्य सूत्रकृता पृथग् योग: कृत:। तथाच यदि साधारणशब्दविशेषात् परमेश्वर: परिगृह्यते, किमिति तर्हि तस्मादेव हेतोर्न जाठराग्नि: परिगृह्यते? न ह्युभयत्र विशेषे सत्येकस्य विशेषो गमक:, नान्यस्येति विनिगमके कारणमस्ति। तस्माद् न वैश्वानर: परमेश्वर इति–चेद् भवान् मन्यते, तन्न; न शब्दादिभ्यो हेतुभ्य: परमेश्वर: जाठराग्ने: पुरुषेऽन्त:प्रतिष्ठितत्वे सत्यपि पुरुषत्वमस्ति; ब्रह्मणस्तु सर्वात्मकत्वात् पुरुषेऽन्त:प्रतिष्ठितत्वं पुरुषत्वं चेत्युभयमप्युपपद्यते। ये त्वित्यादि भाष्यं निगदव्याख्यातम्।।२६।।

अत एव न देवता भूतं च।।२७।। अत एवोक्तविशेषाणामसंभवादेव न भूताग्निस्तदभिमानिनी देवता वा वैश्वानरो भवितुमर्हति। चकाराद् न शारीरोऽपीति मन्तव्यम्। उक्तविशेषहेतूनामसंभवं भाष्यकारो भूतादिषु दर्शयति–*न हि भूताग्नेरित्यादिना*।। आत्मशब्दासम्भवश्चेति चकाराद् ब्रह्मशब्दासंभव:, पुरुषशब्दासंभवश्च समुच्चीयते; असति बाधके सति च विपक्षबाधके प्रसिद्धे: परित्यागस्यायुक्तत्वादित्याशय:।।२७।।

पूर्वं जाठराग्निं ब्रह्मप्रतीकत्वेन तदुपाधित्वेन वाऽङ्गीकृत्य तद्वारेण ब्रह्मण: शब्दादीनि कारणानि संभवन्तीत्युक्तम्, संप्रत्यवच्छेदकतया प्रतीति: संभावयितुं शक्यत इत्याह–*साक्षादप्यविरोधं जैमिनि*।।२८।। विनैव जाठराग्निप्रतीकोपाधित्वकल्पनाभ्यां साक्षादपि परमेश्वर उपास्यमाने शब्दादीनामविरोधं जैमिनिराचार्यो मन्यते स्म। अविरोधं दर्शयितुमुक्तविरोधं स्मारयति–*नन्विति*।। यत् प्रकृतं मूर्धादिचुबुकान्तेषु पुरुषावयवेषु पुरुषविधत्वं कल्पितमिति*।। ननु मूर्धादिचुबुकान्तपुरुषावयवेषु कथं पुरुषविधत्वं स्यात्? मूर्धादिचुबुकान्तानां पुरुषैकदेशत्वादिति–चेत्, नैष दोष: ; त्रैलोक्यात्मनो महापुरुषस्य भगवतो वैश्वानरस्य मूर्धादिपादान्तावयवानां द्युप्रभृतिपृथिवीपर्यन्तानामेषु संपादनात् तेषां पुरुषैकदेशत्वेऽपि कल्पनया पुरुषसारूप्योपपत्ते:। तदिदमुक्तम्–*कल्पितमिति*।। ननु–भवतु नामोक्तकल्पनया मूर्धादिचिबुकान्तस्य पुरुषैकदशस्य पुरुषविधत्वम् तथापि कथं तस्य ''पुरुषेऽन्त:प्रतिष्ठितं वेदे'' तिव्यपदेश: स्यात? कार्यकारणसमुदायस्य पुरुषत्वात तन्मध्ये मूर्धादिचुबुकान्तावयवस्याप्यन्तर्भावात्। न हि स्वयमेव स्वस्यान्तर्भवति; विरोधादिति–चेत्, नेत्याह–*यथा वृक्षे शाखां प्रतिष्ठितां पश्यतीति, तद्वदिति*।। यथा हि लोके शाखा-काण्ड-मूल-स्कन्धसमुदायात्मकेऽपि वृक्षे 'वृक्षे शाखां पश्यती' ति व्यपदेशो न विरुद्धयते, तत्कस्य हेतो:? वने वृक्ष इतिवत् समुदाये समुदायिन: प्रतिष्ठितत्वस्य दृष्टत्वात्, ''पुरुषेऽन्त:प्रतिष्ठितं वेदे'' ति तत्र व्यपदेशो न विरुद्धयत इत्यर्थ:।

ननु–मूर्धादिचुबुकान्तस्य पुरुषप्रतिष्ठितत्वदर्शनेऽपि तदन्त:प्रतिष्ठित्वं न दृष्टमित्यस्वरसेन पक्षान्तरमाह– *अथवेति*।। अन्त:प्रतिष्ठा=मध्यस्थता। तथाच साक्षितां लक्षयति। तथाच चराचरत्मकपुरुषसाक्षिणं वैश्वानरं वेदेत्युक्तं भवति। ननु– उपपद्यतामुक्तप्रकारेण पुरुषविधत्वं पुरुषेऽन्त: प्रतिष्ठितत्वं च परमात्मन: ; तथापि तत्र वैश्वानराग्निशब्दौ नोपपद्येयाताम्, न च–योगात् तदुपपत्तिरिति–वाच्यम्; अवयवप्रसिद्धे: समुदायप्रसिद्धिबलवत्त्वस्योक्तत्वादिति–चेत्, नेत्याह– *निश्चिते चेति*।। न पदार्थानां स्मृतये पदान्युच्चार्यन्ते; स्वतस्तेषां निष्प्रयोजनत्वात्, किं तर्हि? विशिष्टैकार्थ लक्षणवाक्यार्थप्रतिपत्तये; तस्य प्रयोजनत्वात। न च पदार्थस्मरणव्यापारमन्तरेण पदानां वाक्यार्थप्रतिपादनमुपपद्यते, इति नान्तरीयकतया तदनुगुणत्वेन पदार्थास्तै: स्मार्यन्त इत्युक्तमधस्तात्। तत्र य उपक्रमोसंहारादिवशेन प्रतीयमानो विशिष्टार्थ:, स वाक्यार्थ:, इति वाक्यतात्पर्यविदां समय:। तदनुगुणाश्च पदार्था: पदै: समरणीया: समुदाय प्रसिद्ध्याऽवयवप्रसिद्ध्या वा, लक्षणया वा, गुणेन वेति तत्र पूर्वपूर्वपदार्थे तदनुगुणे संभवति नोत्तरोत्तर उपादीयते; उत्तरोत्तरापेक्षया पूर्वपूर्वस्याविलम्बेनोपस्थिततया तदनुगुणतरत्वेन बलवत्त्वात्, बलवता च विरोधे दुर्बलस्य बाधात्। तत्रैवायं न्याय: प्रवर्तते–रूढिर्योगमपहरतीति। अवयवार्थोपस्थितिद्वारकस्य योगार्थस्य समुदायार्थापेक्षया विलम्बोपस्थितिकत्वात्। तद्यथा–''तिस्त्र: साह्स्योपसदो द्वादशाहीनस्ये'' त्यत्राहीनशब्दस्य समुदायप्रसिद्ध्याऽवयवप्रसिद्धिबाध:। यत्र तु पूर्वपूर्वार्थो ने तदनुगुण:, प्रत्युत विरोधी, तत्रायोग्यतया तस्मिन् बाधिते उत्तरोत्तर एवोपादीयते। तद्यथा–सोमो महेश्वर:'' 'छत्रिणो गच्छन्ति' 'सिंहो देवदत्त' इति लोके, वेदे च–''आज्यै: स्तुवते'' ''सोमेन यजेत'' ''यजमान: प्रस्तर'' इति। अत्र तु वैश्वानराग्निशब्दयो: समुदायार्थो वाक्यार्थान्वियायोग्य इत्युपपादितम्। तथाच बाधिते तस्मिन् योगार्थ एव परिगृह्यत इति। तदिदमुक्तम्– *निश्चिते च पूर्वापरालोचनवशेन परमात्मपरिग्रहे तद्विषय एव वैश्वानरशब्द: केनचिद्योगेन वर्तिष्यत इति*।। योगं दर्शयति– *विश्वश्चायमिति*।। प्रथमव्युत्पत्त्या वैश्वानरस्य भगवतो विराडात्मकत्वम्, द्वितीयव्युत्पत्त्या च सूत्रात्मत्वम्, तृतीयया च सर्वकारणत्वं सर्वात्मकत्वं वा दर्शितं भवतीति द्रष्टव्यम्। अतिरोहितार्थमन्यत्।।२८।।

अभिव्यक्तेरित्याश्मरथ्य:।।२९।। *अनुस्मृतेर्बादरि:*।।३०।। *संपत्तेरिति जैमिनिस्तथाहि दर्शयति*।।३१।। *आमनन्ति चैनमस्मिन्*।।३२।। इति चतुर्भिस्सूत्रैराचार्येण प्रादेशमात्रत्वं श्रुतं व्याख्यायोपपादितम्। तानि सूत्राण्यवतारयितुमाकाङ्क्षामुत्थापयति– *कथं पुन: परमेश्वरपरिग्रहे प्रादेशमात्रश्रुतिरुपपद्यत इति*।। तस्यातिमात्रत्वप्रतिपादकश्रुतिशतविरोधादित्याशय:।

ताम्=प्रादेशमात्ररुतिमित्यर्थः। एतानि च सूत्राणि निगदव्याख्यातेन भाष्येण व्याख्यातानि, इति न व्याख्यायन्ते पदशः। प्रयोजनं चास्याधिकरणस्य न पृथग् वाच्यम्; आक्षेपसमाधानस्यैव प्रयोजनत्वात्; पूर्वाधिकरणाक्षेपेणैवैतस्य प्रवर्तनादित्युक्तत्वात्। तथाचोक्तमभियुक्तैः–''आक्षेपे चापवादे च प्राप्त्यां लक्षणकर्मणि। प्रयोजनं न वक्तव्यं यश्च कृत्वा प्रवर्तत'' इति।।२९।। ३०।। ३१।। ३२।।, इति सप्तमं वैश्वानराधिकरणम्।।

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीगोविन्दानन्दसरस्वतीपूज्यपादशिष्य नारायणसरस्वतीकृतौ भगवत्पादशारीरकमीमांसाभाष्यवार्तिके प्रथमाध्यायस्य द्वितीयः पादः समाप्तः।।

प्रदीपः

वैश्वानरः साधारणशब्दविशेषात्।।२४।। ''आकाशस्तल्लिङ्गादि'' त्यत्रैकत्र रूढस्याकाशपदस्यैकस्य केवलब्रह्मलिङ्गवशेनान्यथा नयनं कृतम्, अत्र तु द्व शब्दौ वैश्वानरात्मशब्दावर्थत्रयेऽर्थद्वये च रूढौ, तत्र साधारणलिङ्गानि च दृश्यन्त इति स्थितौ कस्यानुसारेण कस्य नयनमित्यनिर्णयात्, उपक्रमगतात्मशब्देन जीवपरत्वं भवतु, जीवलिङ्गानामपि प्रादेशमात्रत्वाभिविमानत्वादीनां दर्शनात् अथवा वैश्वानरशब्देन जाठराग्न्यादिपरत्वम्, तल्लिङ्गानामपि प्राणाहुत्यधिकरणत्वपुरुषान्तःप्रतिष्ठितत्वादीनां दर्शनादिति। वैश्वानरपदार्थनिर्णयार्थमिद-मधिकरणान्तरम्। तथाच श्रुत्युपष्टब्धब्रह्मेतरलिङ्गैर्ब्रह्मलिङ्गाभिभवाद् अस्पष्टब्रह्मलिङ्गकत्वम्। अत्र सूत्रे साधारणपदप्रयोग उक्तार्थसूचनार्थमेव। तथाच वैश्वानरः, परमात्मा, द्युमूर्धत्वादिविशेषधर्मवत्त्वादिति सूत्रार्थः। अत्र विशेषपदप्रयोगेण सूत्रकारेण जाठरादिधर्मत्वेन प्रतीयमाना धर्मा अपि साधारणा एव, न विशेषा इति सूचनाद् अन्यथासिद्धब्रह्मलिङ्गेनाब्रह्मलिङ्गानामभिभवात् श्रुतेरपि साधारणत्वेनानर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायेनाग्न्यादिपराया बाधाद् वैश्वानरब्रह्मत्वव्यवस्थेति फलति। तत्र जाठराग्नेर्द्युमूर्ध्वत्वादिकं बाधितमेव। भूताग्नेर्देवताया अपि तदसंभवीति-''अत एव न देवता भूतं चे'' ति सुत्र एव व्यक्तम्।।२४।।

जाठराग्निधर्माणां जीवधर्माणां च ब्रह्मसाधारण्यमपि-''शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च नेति चेन्न, तथा दृष्ट्युपदेशादसंभवात् पुरुषमपि चैनमधीयते'' ''अभिव्यक्तेरित्याश्मरथ्यः'' ''अनुस्मृतेर्बादरिः'' ''संपत्तेरिति जमिनिस्तथाहिं दर्शयति'' ''आमनन्ति चैनमस्मिन्'' इति सूत्रेषु व्यक्तमेव। तथाचात्र नव सूत्राणि। तत्र प्रथमद्वितोये द्युमूर्धत्वादिब्रह्मासाधारणधर्मैः सिद्धान्तव्यवस्थापनार्थे, तृतीयसूत्रं जीवधर्माणां जाठरादिधर्माणां च ब्रह्मसाधारण्योपपादनार्थम्। तुरीयसूत्रं देवतात्मभूताग्निपक्षयोर्निरासार्थम्। पञ्चमसूत्रं तु जीवधर्माणां ब्रह्मसाधारण्यं प्रकारान्तरोणोपपादयितुम्। षष्ठसप्तमाष्टमनवमानि तु जीवधर्मस्य प्रादेशमात्रस्य ब्रह्मणि

भिन्नाभिन्नरूपैर्व्यवस्थापनार्थमिति विवेकः। अधिकं प्रकृतोपयुक्तवाक्यार्थसंग्रहः, अधिकरणान्तरेण गतार्थत्वशङ्कातत्परिहारादिकं च वार्तिके व्यक्तम्।।

अत्र प्रथमपादे जगत्कारणत्वस्यासंभववारणम्, द्वितीयादिषु पादेष्वतिव्याप्तिवारणम् तथाच–आनन्दमयाधिकरणादौ जीवान्यत्वस्य साध्यत्वम्, द्वितीयादिपादेषु ''त्रिपादीमध्यमपादमध्याधिकरणात् ''ईक्षतिकर्मव्यपदेशात् स'' इत्यतः स इत्यध्याहारेण परमात्मा साध्य इति श्रीभाष्यमतम्। तत्र प्रथमाध्यायतृतीयपादे द्वितीयादित्रिपादीमध्यमे श्रीभाष्यमतरीत्या दशाधिकरणानि वर्तन्ते, ईक्षतिकर्माधिकरणं च तेषु तुरीयमेवाधिकरणमिति न तस्य त्रिपादीमध्यमपादमध्यमाधिकरणत्वम्। देवताधिकरणादीनां त्रयाणां प्रासङ्गिकानामपरिगणनायां तु संपूर्णाध्यायस्य शुभाशीः संख्यातत्वम् षट्पञ्चाशदुत्तरशतिसङ्ख्याकत्वं बाधितम्। ईक्षत्यधिकरणे सद्विद्याया ब्रह्मपरत्वव्यवस्थापनाद् जीवादौ प्रथमपादेऽतिव्याप्तिनिरास एव स्यात्, न त्वसंभवः, इति सर्वब्रह्मपरत्वमेवेति भगवत्पादा मन्यन्ते। यत्र ''प्रथमसूत्रात् ब्रह्मपदानुषङ्गो मन्यत इति दिक्।।

अत्र '' ईक्षतिकर्मव्यपदेशात् स'' इति सूत्रे सपदं तूपक्रमे परापरब्रह्मद्वयनिर्देशाद् ध्येयत्वस्योभयसाधारण्येऽपीक्षणयत्वस्य परासाधारण्यात् परस्यैव ग्रहणव्यवस्थापनार्थम् अन्यथा तु ''अपरभिन्नतया तत्प्रतिज्ञानमनुपपन्नं स्यादिति 'संपदमावश्यकम्। मतान्तरे ध्येयातिरिक्तकेवलेक्षणीयस्य परब्रह्मणोऽनङ्गीकारात् सपदवैयर्थ्यापत्तिः। सर्वथा तु प्रथमपाद इव द्वितीयादित्रिपाद्यामपि जीवान्यत्वव्यवस्थापनेनैवेष्टसिद्धया सपदमत्र वितथमेव। तत्तदधिकरणविषयवाक्येषु संशयदशायां विषयवाक्यान्तरेषु भाविषु विचारितपूर्वेषु च ब्रह्मपरत्वाभावानिर्णयात् कथमसम्भवशङ्कापि।।

''आनन्दमयोऽभ्यासादि'' त्यादौ–''भेदव्यपदेशाच्चान्य'' इति सूत्रादन्यपदानुषङ्गेण जीवान्यत्वमेव साध्यते, न ब्रह्मत्वमिति कल्पनायां हि गुणसूत्रात् साध्याध्याहारः, इति सूत्रशैलीविरोधः, सूत्रेषु कुत्रापि गुणसूत्रेण प्रतिज्ञाया अनिर्देशात्। ''नाणुरतच्छ्रुतेरि'' त्यत्र तु अणुपदं न साध्यनिर्देशपरम्, किन्तु पूर्वप्रकृतसाध्यप्रतिषेधपरमेवेति न विरोधः। अभ्यासात्, अन्तस्तद्धर्मोपदेशात्, आकाशस्तल्लिङ्गात्, ज्योतिश्चरणाभिधानात्, प्राणस्तथानुगमादित्यादौ तदादिशब्देन साक्षाद् ब्रह्मपरामर्शिना जीवान्यत्वापरामर्शेन साक्षाद्धेत्वनन्वयः, ''नेतरोऽनुपपत्तेः'' इति सूत्रे पुनरपि नेतर इति निर्देशवयर्थ्यम्, जीवान्यत्वनिषेधपरतापत्तिर्वा।।

एतेन–द्वितीयपादे स इति परामर्शोऽपि–व्याख्यातः ; श्रीभाष्यमते ''सर्वत्र ब्रह्मे'' ति वाक्ये ब्रह्मपक्षकरपमात्मतासाधनस्यैव विवक्षणाद् ब्रह्मपदेन परमात्मन स्यादिति

द्वितीयपादस्याप्यसंभववारणार्थत्वापत्तिः। एतेन–''अत एव च स ब्रह्मे'' ति अन्तराधिकरणे सूत्रान्तरपाठोऽऽपि वितथ इति–व्याख्यातम्; अनेन तु ज्ञायते–जीवन्यत्वमेव मुख्योऽर्थो विवक्षित इति। अद्वैतमते तु सर्वत्र सिद्धान्तसूत्रेषु–''अथातो ब्रह्मजिज्ञासे'' ति प्रस्तुतब्रह्मानुषङ्गेणैव विवरणात्, ''नेतरोऽनुपपत्तेः'' ''भेदव्यपदेशाच्चान्य'' इत्यादिपूर्वपक्षनिरासार्थानि गुणसूत्राणि, न स्वतन्त्रप्रतिज्ञापराणीति सर्वमुपपद्यते। ''अत एव च स ब्रह्मे'' ति तु सूत्रं नाद्वैतिनः पठन्ति। अतस्तन्मते तद्वैयर्थ्यं भूषणमेव, न तु दूषणम्। ''आकाशोऽर्थान्तरत्वादिव्यपदेशात्'' ''अत एव प्राणः'' ''ज्योतिश्चरणाभिधानादि'' त्यादिषु जीवान्यत्वं तु न पूर्वपक्षिणापि स्वीक्रियत इति तस्य ब्रह्मपरत्वमेव स्वीकर्तव्यम्। तथाच तत्र ब्रह्मोपस्थितिः कथमिति वर्णनीयम्। तथाच सर्वत्रेतरनिषेधपूर्वककस्वपक्षस्यैव समर्थने तुल्येऽसम्भवातिव्याप्तिवारणार्थतया पादार्थविभागो नोपपद्यते।।

एतेन–जगद्वाचित्वाधिकरणं वाक्यान्वयाधिकरणम्, किं बहुना सर्वाण्येव प्रथमतुरीयपादाधिकरणानि जीवान्यत्वमेव तत्तद्विषयवाक्ये व्यवस्थापयन्तीति कुतो वा प्रथमपादार्थवैलक्षण्यम्? एतेन–''ईक्षतिकर्मव्यपदेशात् स'' इति सूत्रस्य त्रिपादीसम्बन्धाय, सशब्दघटितत्वकल्पनापि–परास्ता; त्रिपाद्यामपि सर्वत्र सशब्दान्वयस्यास्वीकारात्। किञ्चासम्भवनिरासकत्वं ब्रह्मवाक्येषु सर्वेषु कारणत्वानन्वशङ्कया, अतिव्याप्तिनिरासकत्वं च जीवादिवाक्येषु सम्प्रतिपन्नेषु लक्षणस्याभावनिरूपणेन चेति खलु वक्तव्यम्। तत्र चानन्दमयादिवाक्यानां ब्रह्मपरत्वं स्वीकृत्य जगत्कारणत्वानन्वय उच्यते, उत तदस्वीकृत्येति वक्तव्यम्। तत्राद्ये–''सोऽकामयते'' त्यादीनामानन्दमयब्रह्मतावादे तेनैवान्वयात् कथमसम्भवः? द्वितीये त्वानन्दमयपदार्थस्यालक्ष्यत्वात् कथमसम्भवसङ्गतिः? एतेन–द्वितीयादित्रिपाद्यर्थोऽपि व्याख्यातः ; अलक्ष्ये लक्षणसत्त्वेन खल्वतिव्याप्तिः। न च सर्वत्रप्रसिद्धादिवाक्यार्थेऽब्रह्मत्वेन निर्धारिते लक्षणसत्त्वेनाक्षेपस्तत्रेति केनापि मन्यते। लक्ष्यत्वभ्रमेणालक्ष्यत्वभ्रमेण वाऽसम्भवातिव्याप्त्यादिशङ्का हि कथमपि न युज्यत इति समन्वयाध्यायार्थः कुत्र जीवादिपरत्वम्, कुत्र वा ब्रह्मपरत्वमिति संशयनिरास इत्येव युक्तम्।।

अत्र पादे समालोचिता महाविद्याः–(१) शाण्डिल्यविद्या, (२) नाचिकेतविद्या, (३) उपकोसलविद्या, (४) अन्तर्यामिविद्या, (५) अक्षरविद्या, पराविद्या वा, (६) वैश्वानरविद्या चेति षड्विद्याः। तत्रोपक्रमे शाण्डिल्यविद्या, मध्य उपकोसलविद्या, उपसंहारे वैश्वानरविद्या च सगुणविद्येति सगुणप्रधान्यमस्य पादस्य। तेन नाचिकेतविद्यापरयोरत्तृधिकरणगुहाधिकरणयोः,

अक्षरविद्याऽन्तर्यामिविद्याविषययोरदृश्यत्वाधिकरणान्तर्याम्यधिकरणयोश्च चतुर्णां निर्गुणपरत्वेऽपि न विरोधः।।

तृतीये तु पादे त्रयोदशाधिकरणेषु (१) भूमविद्या, (२) गार्ग्यक्षरविद्या, (३) त्रिमात्रप्रणविद्या, (४) दहरविद्या, (५) ज्योतिषां ज्योतिर्विद्या, (६) अङ्गुष्ठप्रमितविद्या, (७) मधुविद्या, (८) आकाशविद्या च समालोचिताः। अत्र तु–द्युभ्वाद्यधिकरण उपक्रमे प्रतिमाधिकरणे मध्यमे सुषुप्त्युत्क्रान्त्यधिकरण उपसंहारे च निर्गुणस्यैव व्यवस्थापनात् निर्गुणप्राधान्यम्।।

प्रथमपाद आलोचिता महाविद्यास्तु–(१) सद्विद्या, (२) आनन्दमयविद्या, (३) अन्तरादित्यविद्या, (४) आकाशविद्या, (५) परं ज्योतिर्विद्या, (६) प्रतर्दनविद्या च। अत्र तु–विस्तृतविचार आनन्दमयाधिकरणमारभ्येति जीवद्वारा ब्रह्मोपदेशोपक्रमः, तथैव प्रतर्दनाधिकरणेन तदुगदेशोपसंहारश्च वर्तत इति तैत्तिरीयोपनिषत्प्राधान्यमवलम्ब्य प्रवृत्तस्य जिज्ञासासूत्रस्यापि प्रत्यगभिन्नब्रह्मपरत्वमेव योग्यम्।।

सद्विद्यायास्तु छान्दोग्यगताया ''गौणश्चेन्नात्मशब्दादि'' त्यादावात्मशब्दस्यापि हेतुतया निर्देशसामर्थ्यात् प्रत्यगभिन्नब्रह्मपरत्वं व्यवस्थाप्यते, इत्युपक्रमपरामर्शयोस्तद्विषयत्वव्यवस्थापनेन सद्विद्याविचारस्य समापनात् ''तत्त्वमसी'' ति महावाक्यमधिकृत्य विचारान्तराप्रवर्तनाच्चाद्वैतवादे पर्यवसानमेव सूत्रस्यावगम्यते। अद्वैतमते हि कार्यब्रह्मभावोऽपि गौणमुक्तिरिति स्वीकारात् सगुणवाक्यविचारोऽपि ब्रह्मविचार एव। सत्यपि चाभेदसाम्ये जीवभावस्तु बन्ध एवेति सिद्धान्ताद् जीवविचारस्तु न ब्रह्मविचारः। अत एव जीवपरतानिरासो वाक्यविशेषेषु मन्यते। एतेन–अद्वैतमते सगुणब्रह्मणोऽपि जीववन्मिथ्यात्वे समाने जीवपरतानिरासः, सगुणब्रह्मपरताव्यवस्था च विहन्यत इति शङ्कापि–परास्ता।।

एतेन–तुरीयपादोऽपि–व्याख्यातः। तत्र तु–*बालाकिविद्यामैत्रेयीविद्ये समालोचिते*।।

तथा चाध्यायः सर्वोऽपि–आनन्दमयविद्यामुपक्रम्य, अक्षरविद्यां परामृश्य मैत्रेयीविद्यामुपसंहृत्य च प्रवर्तमानः प्रत्यगभिन्नं परमात्मानमेव निर्विशेषं प्रतिपादयति। कारणवाक्यानि तु तटस्थलक्षणविधयैव प्रवर्तमानानि न तत्प्रधानानीति गम्यते। तदेवं द्वात्रिंशत्सु महाविद्यासूनविंशतिर्विद्या एव सन्देहविषयत्वाद्विचार्य निर्णीताः।।

तत्र सगुणब्रह्मण्येव वेदान्तानां न तात्पर्यम्, किन्तु तस्याप्यधिष्ठानं निर्गुणं ब्रह्मावश्यं स्वीकर्तव्यमित्यत्रात्रधिकरणं प्रथमाध्यायगतं प्रमाणम्। अन्यथा तु–अत्तुर्जीवत्वेऽपि तस्याधिष्ठानं ''क इत्था वेद यत्र स'' इति यत्रशब्दवाच्यं ब्रह्म प्रकृतं विवक्षितुं शक्यत इति न प्रयोजनभेदः

पूर्वोत्तरयोः पक्षयोः स्यात्। अत्रात्मन आत्मान्तरमधिष्ठानमसम्भवीति शङ्कावारणार्थमेव गुहाधिकरणम्। तथाच जीवात्मन इव सगुणब्रह्मणोऽप्यन्तर्यामितया चैतन्यमात्रं व्यष्टिसमष्टिप्रत्यगभिन्नं ब्रह्मैव सर्वत्र प्रसिद्धमिति प्रकरणशुद्धिः फलति; अन्यथा तु–जीवमात्रप्रश्ने ईश्वरमात्रप्रश्ने वाऽऽत्मद्वयोपन्यासः, तत्राप्येकस्याधिष्ठातृतया निर्देशश्च नोपपद्येत।।

एतावता च–सद्विद्याप्रसङ्गेन छान्दोग्यस्य, आनन्दमयविद्याप्रसङ्गेन तैत्तिरीयस्य, नाचिकेतविद्याप्रसङ्गेन कठबल्ल्याः, अक्षरविद्याप्रसङ्गेन मुण्डकस्य, मैत्रियीविद्यान्तर्यामिविद्याप्रसङ्गेन बृहदारण्यकस्य च निर्विशेषब्रह्मपरत्वं विवेचितम्। अत्र बालाकिविद्या कौषीतकिब्राह्मण इव बृहदारण्यकेऽपि वर्तते, इति तयोरकवाक्यताऽप्यर्थतः साध्यते। जीवब्रह्माभेदेनैवानन्दमयविद्यायाः प्रवृत्तत्वादहंपदेनापि ब्रह्मोपदेशो न विरुद्ध्यत इति सूचनार्थ तु प्रतर्दनविद्याविचारः प्रथमे पाद इति दिक्।। २५।। २६।। २७।। २८।। २९।। ३०।। ३१।। ३२।। इति सप्तमं वैश्वानराधिकरणम्।।

इति श्रीशारीरकमीमांसाभाष्यटिप्पणे प्रदीपाख्ये प्रथमाध्यायस्य द्वितीयः पादः समाप्तम्

भामती

प्राचीनशालसत्ययज्ञेन्द्रद्युम्नजनकबुडिलाः समेत्य मीमांसा चक्रुः *को न आत्मा किं ब्रह्म इति*। आत्मेत्युक्ते जीवात्मनि प्रत्ययो मा भूद्, अत उक्तं किं ब्रह्मेति। ते च मीमांसमाना निश्चयमनधिगच्छन्तः कैकेयराजं वैश्वानरविद्याविदमुपसेदुः। उपसद्य चोचुः *आत्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषि*। स्मरसि *तमेव नो ब्रूहीत्युपक्रम्य द्युसूर्य्यवाय्वाकाशवारिपृथिवीनाम् इति*। अयमर्थः—वैश्वानरस्य भगवतो द्यौः *मूर्धा सुतेजाः*। *चक्षुर्विश्वरूपः सूर्यः*। *प्राणः वायुः*। *पृथग्वर्त्मात्मा*। पृथक् वर्त्म यस्य वायोः स पृथग्वग्वर्त्मा, स एवात्मा स्वभावो यस्य स पृथग्वर्त्मात्मा। सन्देहः देहस्य मध्यभागः स आकाशो *बहुलः* सर्वगतत्वात्। *वस्तिरेव रयिः* आपः, यतोऽद्भ्योऽन्नमन्नाच्च रयिर्धनं तस्मादापो रयिरुक्तास्तासाञ्च मूत्रीभूतानां वस्तिः स्थानमिति वस्तिरेव रयिरित्युक्तम्। "पादौ" "पृथिवी" तत्र प्रतिष्ठानात्। तदेवं वैश्वानरावयवेषु द्युसूर्य्यानिलाकाशजलावनिषु मूर्धचक्षुःप्राणसन्देहवस्तिपादेष्वैकेकस्मिन् वैश्वानरबुद्ध्या विपरीततयोपासकानां प्राचीनशालादीनां मूर्द्धपातान्धत्वाप्राणोत्क्रण मदेहशीर्णतावस्तिभेद-पादश्लथीभावदूषणैरुपासनानां निन्दया मूर्धादिसमस्तभावमुपदिश्याम्नायते *यस्त्वेतमेवं प्रादेशमात्रमभिविमानम् इति*। स सर्वेषु लोकेषु द्युप्रभृतिषु भृतेषु स्थावरजङ्गमेषु सर्वेष्वात्मसु देहेन्द्रियमनोबुद्धिजीवेष्वन्नमत्ति सर्वसम्बन्धिफलमाप्नोतीत्यर्थः। अथास्य वैश्वानरस्य भोक्तुर्भोजनस्याग्निहोत्रतासम्पिपादयिषयाऽऽह श्रुतिः— "उर एव वेदिः" वेदिमारूप्यात्। "लोमानि बर्हिः" आस्तीर्णवर्हिः- सारूप्यात्। "हृदयं गार्हपत्यः"। हृदयानन्तरं "मनोऽन्वाहार्य्यपचनः"। "आस्यमाहवनीयः" तत्र हि तदन्नं हूयते।।२४।।

ननु को न आत्मा किं ब्रह्मैत्युपक्रमे आत्मब्रह्मशब्दयोः परमात्मनि रूढत्वेन तदुपरक्तायां बुद्धौ वेश्वानराग्न्यादयः शब्दास्तदनुरोधेन परमात्मन्येव कथञ्चिन्नेतुं युज्यन्ते, न तु प्रथमावगतौ ब्रह्मात्मशब्दौ चरमावगतवैश्वानरादिपदानुरोधेनान्यथयितुं युज्येते। यद्यपि च वाजसनेयिनां वैश्वानरविद्योपक्रमे वैश्वानरं ह वै भगवान् सम्प्रति वेद तं नो ब्रूहीत्यत्र नात्मब्रह्मशब्दौ स्तस्तथापि तत्समानार्थ छान्दोग्यवाक्यं तदुपक्रममिति तेन निश्चितार्थेन तदविरोधेन वाजसनेयिवाक्यार्थो निश्चीयते। निश्चितार्थेन ह्यनिश्चितार्थ व्यवस्थाप्यते, नानिश्चितार्थेन निश्चितार्थम्। कर्मवच्च

ब्रह्मापि सर्वंशाखाप्रत्ययमेकमेव। न च द्युमूर्द्धत्वादिकं जाठरभूताग्निदेवताजीवात्मनामन्यतमस्यापि सम्भवति? न च सर्वलोकाश्रयफलभागिता। न च सर्वपाप्मप्रदाह इति पारिशेष्यात्परमात्मैव वैश्वानर इति निश्चिते कुतः पुनरियमाशङ्का–शब्दादिभ्योऽन्तः-प्रतिष्ठानान्नेति चेत् इति? उच्यते तदेवोपक्रमानुरोधेनान्यथा नीयते, यन्नेतुं शक्यम्। अशक्यौ च वैंश्वानराग्निशब्दावन्यथा नेतुमिति शङ्कितुरभिमानः। अपि चान्तः प्रतिष्ठितत्वं प्रादेशमात्रत्वं च न सर्वव्यापिनोऽपरिमाणस्य च परब्रह्मणः सम्भवतः। न च प्राणाहुत्यधिकरणताऽन्यत्र जठराग्नेर्युज्यते। न च गार्हपत्यादिहृदयादिता ब्रह्मणः सम्भविनी। तस्मात् यथायोगं जाठरभूताग्निदेवताजीवानामन्यतमो वैश्ंवानरः, न तु ब्रह्म। तथा च ब्रह्मात्मशब्दावुपक्रमगतावप्यन्यथा नेतव्यौ। द्युमूर्द्धत्वादयश्च स्तुतिमात्रम्। अथ वा अग्निशरीराया देवताया ऐश्वर्य्ययोगाद् द्युमूर्द्धत्वादय उपपद्यन्त इति शङ्कितुरभिसन्धिः।

अत्रोरत्तम्–न, कुतः? तथा दृष्ट्युपदेशात्। अद्धा चरममनन्यथा सिद्धं प्रथमावगतमन्यथयति। न त्वत्र चरमस्यानन्यथासिद्धिः प्रतीक पदेशेन वा मनो ब्रह्मेतिवत्। तदुपाध्यपदेशेन वा मनोमयः प्राणशरीरो भारूप इतिवद् उपपत्तेः। व्युत्पत्त्या वा वैश्वानराग्निशब्दयोर्ब्रह्मवचनत्वान्नान्यथासिद्धिः। तथा च ब्रह्माश्रयस्य प्रत्ययस्याश्रयान्तरे जाठरवैश्वानराह्वये क्षेपेण वा जाठरवैश्वानरोपाधिनि वा ब्रह्मण्युपास्ये वैश्वानरधर्माणां ब्रह्मधर्माणां च समावेश उपपद्यते। असम्भवाविति सूत्रावयवं व्याचष्टे *यदि चेह परमेश्वरो न विवक्ष्येत इति*। पुरुषयपि चैनमधीयत इति सूत्रावयवं व्याचष्टे *यदि केवल एव इति*। ब्रह्मोपाधितया नापि प्रतीकतयेत्यर्थः। न केवलसन्त प्रतिष्ठं पुरुषमपीत्यपेरर्थः। अत एव यत् पुरुष इति पुरूषमनुद्य न वैश्वानरो विधीयते। तथा सति पुरुषे वैश्वानरदृष्टिरूपदिश्येत। एवं च परमेश्वरट्टष्टिर्हि जाठरे वैश्वानर इहोपदिश्यत इति भाष्यं विरुध्येत। श्रुतिविरोधश्च–"स यो हैतमेवमग्निं वैश्वानरं पुरुषं पुरुषेऽन्तःप्रतिष्ठितं वेद" इति वैश्वानरस्य हि पुरुषत्ववेदनमत्रानूद्यते, न तु पुरुषस्य वैश्वानरत्ववेदनम्। तस्मात् स एषोऽग्निवैंश्वानरो यदिति यदः पूर्वेण सम्बन्धः, पुरुष इति तत्र पुरुषदृष्टेरुपदेश इति युक्तम्।।२५, २६।।

अत एवैतेभ्यः श्रुतिस्मृत्यवगतद्युमूर्द्धत्वादिसम्बन्धसर्वलोकाश्रयफलभागित्वसर्वपाप्मप्रदाहात्म-ब्रह्मपदोपक्रमेभ्यो हेतुभ्य इत्यर्थः। 'यो भानुना पृथिवीं द्यामुतेमाम्' इति मन्त्रवर्णोऽपि न केंवलौष्ण्यप्रकाशविभवमात्रस्य भूताग्नेरिममीदृशं महिमानमाहापि त् ब्रह्मविकारतया ताद्रूप्येणेति भावः।।२७।।

यदेतत्प्रकृतं मूर्द्धादिषु चुबुकान्तेषु पुरुपावयवेषु द्युप्रभृतीन् पृथिवीपर्य्यन्तांस्त्रैलोक्यात्मनो वैश्वानरस्यावयवान् सम्पाद्य पुरुषविधत्दं तदभिप्रायेणेदमुच्यते *पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेद

इति*। अत्रावयवसम्पत्त्या पुरुषविधत्वं कार्य्यकारणसमुदायरूपपुरुषावयवमूर्द्धादिचुबुकान्तः- प्रतिष्ठानाच्च पुरुषेऽन्तःप्रतिष्ठितत्वं समुदायमध्यपतितत्वात्तदवयवानां समुदायिनाम्। अत्रैव निदर्शनमाह *यथा वृक्षे शाखाम् इति*। शाखाकाण्डमूलस्कन्धसमुदाये प्रतिष्ठिता शाखा तन्मध्यपतिता भवतीत्यर्थः। समाधानान्तरमाह *अथवा इति*। अन्तः प्रतिष्ठत्वं माध्यस्थ्यं तेन साक्षित्वं लक्षयति। एतदुक्तं भवति वैश्वानरः परमात्मा चराचरसाक्षीति। पूर्वपक्षिणोऽनुशयमुन्मूलयति *निश्चिते च इति*। विश्वात्मकत्वाद् वैश्वानर; प्रत्यगात्मा, विश्वेषां वायं नरस्तद्विकारत्वाद्विश्वप्रपञ्चस्य विश्वे नरा जीवा वाऽऽत्मानोऽस्य तादात्म्येनेति।।२८।।

साकल्येनोपलम्भासम्भवादुपासकानामनुग्रहायानन्तोऽपि परमेश्वरः प्रादेशमात्रमात्मानमभि- व्यनक्तीत्याह *अतिमात्रस्यापि इति*। अतिक्रान्तो मात्रां परिमाणमतिमात्रः। *उपासकानां कृते* उपासकार्थमिति यावत्। व्याख्यान्तरमाह *प्रदेशविशेषेषु वा इति*।।२९, ३०।।

मूर्द्धानमृपक्रम्य चुबुकान्तो हि कायप्रदेशः प्रदेशमात्रः। तत्रैव त्रैलाक्यात्मनो वैश्वानरस्यावयवान् सम्पादयन् प्रादेशमात्रं वैश्वानरं दर्शयति।।३१।।

अत्रैव जाबालश्रुतिसंवादमाह सूत्रकारः- *आत्मनन्ति चैनमस्मिन् अविमुक्ते* अविद्योपाधिकल्पितावच्छेदे जीवात्मनि स खल्वविसुक्तः, तस्मिन् प्रतिष्ठितः परमात्मा तादात्म्यात्। अत एव हि श्रुतिः-अनेन जीवेनात्मनेति। अविद्याकल्पितत्वेन भेदमाश्रित्याधाराधेयभावः। वरणा भ्रूः। शेषमतिरोहितार्थम्।।३२।।

इति श्रीवाचस्पतिमिश्रविरचिते शारीरकमीमांसाभाषविभागे भामत्यां प्रथमाध्यायस्य द्वितीयः पादः समाप्तम्

श्री कण्ठभाष्य

॥सू०॥ रूपोपन्यासाच्च॥२४॥

'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः। वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा॥' (मुण्ड० २.१.) इत्यक्षरस्य त्रैलोक्यरूपत्वमुपन्यस्यते। अतश्च सकलात्मा परमेश्वर एवात्राक्षरपदाभिधेयः॥

इत्यदृश्यत्वाधिकरणम्॥८॥

अथ वैश्वानराधिकरणम्॥९॥

प्राणाधारत्वेन पूर्वमुपास्यतयोक्तस्य पुनर्जाठराग्निरूपेणोपास्यत्वमाह–

॥सू०॥ **वैश्वानरः साधारणशब्दविशेषात्**॥२५॥

'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति' इत्यादि छान्दोग्येऽस्य विषयः श्रूयते॥ अत्रोपास्यतयोक्तो वैश्वानरः परमेश्वरोऽन्यो वेति सन्देहः॥ पूर्वपक्षन्यायस्तु– वैश्वानरशब्देन जाठराग्निरुच्यते; 'अयमग्निर्वैश्वानरो येनेदमन्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति यमेतत्कर्णावपिधाय श्रृणोति, स यदोत्क्रमिष्यन् भवति नैनं घोषं श्रृणोति' (बृह० ७.९) इति जाठराग्नौ प्रयोगदर्शनात्। महाभूततृतीयोऽग्निर्वा स्यात् 'एष वा अग्निर्वैश्वानरः' (तै० सं० ३.३.८.) इत्यादौ वैश्वानरशब्दस्याग्नौ प्रसिद्धत्वात्। अग्निर्देवता वा स्यात्; 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते' (तै० सं० २.२.५) इत्यादिष्विष्टिदेवतात्वेन फलदातृत्वश्रवणात्। न तु परमेश्वरः, 'प्रादेशमात्रम्' इति परिच्छेदावगमादिति॥ अत्रोच्यते–परमेश्वर एव वैश्वानरः। कथं? वैश्वानरशब्दस्य साधारण्येऽप्यस्मिन् प्रकरणे 'को न आत्मा? किं ब्रह्म?' 'आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहि' (छा० ५. ११.) इत्यादिषु परमेश्वरासाधारणब्रह्मशब्दादिभिर्विशेष्यमाणत्वान्न जाठराग्न्यादिषु तद्विशेषणं संभवति। अतः परमेश्वर एव वैश्वानरः॥

परमेश्वरपक्षे प्रमाणान्तरमाह-

।।सू०।। **स्मर्यमाणमनुमानं स्यादिति।।२६।।**

'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यो' (मुण्ड० २.१) इत्यादिषु परमेश्वरस्य द्युलोकादिपृथिव्यन्तरूपत्वमुक्तम्। तदित्थंश्रूतरूपमिह 'तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मा संदेहो बहुलो वस्तिरेव रयिः पृथिव्येव पादौ' (छा० ५.१९) इत्यत्र प्रत्यभिज्ञायमानं तस्य परमेश्वरत्वे लिङ्गम्।।

।।सू०।। शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च नेति चेन्न, तथा दृष्ट्युपदेशादसंभवात् पुरुषमपि चैनमधीयते।।२७।।

'स एषोऽग्निर्वैश्वानरः हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः, तद्यत् भक्तं प्रथममागच्छेत् तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात् (छा०) इत्यादिषु प्रतिपन्नेभ्योऽग्निशब्दाग्नित्रयकल्पनप्राणाहुत्याधारत्वेभ्यः, 'स यो हैनमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तः प्रतिष्ठितं वेद' इति श्रुतात् पुरुषान्तःप्रतिष्ठितत्वलिङ्गाच्च जाठरोऽग्निरेव, नासो परमेश्वर इति चेत्-न, जाठराग्निरूपतयोपास्यत्वेनोपदेशात्, केवलम्य जाठराग्नेस्त्रैलोक्यशरीरत्वाद्यसंभवाच्च। किंच 'स एषोऽग्निर्वैश्वानरो यत् पुरुषः' इत्येनं वैश्वानरं पुरुषमप्यधीयते वाजसनेयिनः। निरुपाधिकपुरुषशब्दवाच्यस्तु परमेश्वर एव, 'तेनेदं पूर्णं पुरुषेण सर्वम्' (महाना० १.) इति श्रवणात्। अतः परमेश्वर इति युक्तम्।।

।।सू०।। **अत एव न देवता भूतं च।।२८।।**

यतोऽयं वैश्वानरस्त्रैलोक्यशरीरकः पुरुषशब्दवाच्यश्च अत एव न देवताऽग्निः, न तृतीयं भूतं वा।।

इह जाठराग्निरूपतयोपास्यत्वे सिद्धे परमेश्वरस्याग्निशब्दवाच्यत्वे तद्योजनाभेदमाचार्यान्तराणां दर्शयति-

।।सू०।। **साक्षादप्यविरोधं जैमिनिः।।२९।।**

नावश्यमग्निरूपतयोपास्यत्वादेवेदमग्निशब्दसामानाधिकरण्यम्। अग्रनयनादियोगेन परमेश्वर एवाग्निशब्दस्य साक्षाद्वृत्तित्वसंभवादिति सामानाधिकरण्याविरोधं जैमिनिरुवाच।।

।।सू०।। **अभिव्यक्तेरित्याश्मरथ्यः**।।३०।।

'यस्त्वेतमेवं प्रादेशमात्रम्' (छा० ६.१८.) इत्यपरिच्छिन्नस्य द्युप्रभृतिपृथिव्यन्तप्रदेशसंबन्धिन्या मात्रया परिच्छिन्नत्वमुपासकाभिव्यक्तये इत्याश्मरथ्यमुनिः।।

।।सू०।। **अनुस्मृतेरिति बादरिः**।।३१।।

द्युप्रभृतिपृथिव्यन्तस्य मूर्धादिपादान्तावयवत्वकल्पनमनुस्मृतये ब्रह्मप्राप्त्यर्थमिति बादरिः।।

।।सू०।। **संपत्तेरिति जैमिनिस्तथा हि दर्शयति**।।३२।।

'उर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः' (छा० ५.१८) इत्युपासकस्योरः प्रभृतीनां वेद्यादित्वकल्पनं विद्याङ्गभूतायाः प्राणाहुतेरग्निहोत्रत्वकल्पनार्थमिति जैमिनिः। तथा हि दर्शयति श्रुतिः– '**अथ य एतदेवं विद्वानग्निहोत्रं जुहोति**' (छा० ५.२४.) इति।।

।।सू०।। **आमनन्ति चैनमस्मिन्**।।३३।।

तेत्तिरीया एनं परमेश्वरमस्मिन्नुपासकशरीरे प्राणाहुतिवेलायां भोक्तृतया '**शिवो मा विशाप्रदाहाय**' इति (महाना० ३३) '**प्रभुः प्रीणाति विश्वभुक्**' (महाना० ३६) इति चामनन्ति। अतः सकलाचार्यमतेन न्यायेन च जाठराग्निरूपेण परमेश्वर एवाराध्यः प्राणाग्निहोत्रेणेति समीचीनम्।।

इति वैश्वानराधिकरणम्।।९।।

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये प्रथमस्याध्यायस्य द्वितीयः पादः समाप्तम्

शिवार्कमणिदीपिका

'न च स्मार्त'मिति पूर्वाधिकरणसूत्रे प्रकृतौ प्रधानशारीरावितरशब्देन परामृश्येते। तत्र प्रधानपक्षनिराकरणार्थतया विशेषणव्यपदेशं व्याचष्टे-**अत्रेति। तच्चान्यच्चेति।** तत्सामान्यतः प्रतिपाद्यविशेषणत्वेन श्रुतं सर्वविज्ञानप्रतिज्ञादिकम् अन्यच्चाक्षरात्परस्य पुरुषस्य साक्षाद्विशेषणत्वेन श्रुतम् एवंरूपं प्रधानव्यावर्तनक्षममिह सूत्रे विशेषणशब्देनोक्तमित्यर्थः। 'स बाह्याभ्यन्तर' इत्यत्र 'स' इति पुरुषविशेषणं 'यथा सुदीप्ता' दितिमन्त्रप्रकृतभूतयोन्यक्षरपरामर्शि साक्षादक्षरात्परस्य विशेषणम्। न च बाह्याभ्यन्तरसहित इत्यर्थकं तदेकपदत्वेन योजनीयम्। वैयर्थ्यात्। बाह्याभ्यन्तर इति सर्वगतत्वोक्त्यैव बाह्याभ्यन्तरसकलवस्तुसंसर्गसिद्धेः। भिन्नपदत्वे च अक्षरात्परतः पुरुष एव प्रकृतभूतयोन्यक्षरं न तु परत्वावधिभूतमक्षरमिति प्रत्यायनेन सार्थकत्वात्। एवं च भूतयोन्यक्षरपरामर्शितत्पदसमानाधिकरण्येनाक्षरात्परतइत्यतः प्राचीनेन 'येनाक्षर'मित्यक्षरपुरुषपद-सामानाधिकरण्यानुगृहीतेनाक्षरात्परतः पुरुषो भूतयोन्यक्षरमिति स्थिते तदवरतया ततो भेदेन व्यपदिश्यमानमक्षरं प्रधानमिति न तद्भूतयोन्यक्षरमिति सिद्ध्यतीति भावः। 'अक्षरात्परत'इति पूर्वपक्ष्युक्तरीत्या न समानाधिकरणे पञ्चम्यौ। कारणस्य कार्यवर्गापेक्षया पूर्ववर्तित्वादिरूपस्य परत्वस्य प्रसिद्धत्वात्। किं तु व्यधिकरणे। तेन प्रधानात्परो जीवो लभ्यत इति तदपेक्षयापरत्वरूपभेदव्यपदेशादक्षरं न जीवश्चेत्याह-**अक्षरादिति।** एवं 'यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीश'मिति कर्तृकर्मभावेन जन्यजनकभावेन नियम्यनियामकभावेन च भेदव्यपदेशोऽपि सूत्रार्थतया द्रष्टव्यः। प्रधानजीवव्यावृत्तत्रैलोक्यशरीरत्वश्रवणादपि न प्रधानं जीवो वाक्षरमिति प्रतिपादयितुं सूत्रम्-सू०।। **रूपोपन्यासाच्च**।।२४।। न'न्वग्निमूर्धे'त्यादिमन्त्रे अस्येति सर्वनाम्ना 'दिव्यो ह्यमूर्तः पुरुष'इति मन्त्रवर्णितमक्षरात्परं पुरुषं परामृश्य तस्यैव त्रैलोक्यशरीरत्वमुच्यते नाक्षरस्येत्याशङ्क्याह-**अक्षरस्येति।** 'अग्निर्मूर्धे'त्येतस्मादव्यवहितपूर्वपठिते 'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि चे'ति मन्त्रे एतस्मादित्यस्य प्रकृताक्षरपरत्वेन 'अग्निमूर्धे'ति मन्त्रपठितस्यात्येतिपदस्यापि तत्परत्वमेवोचितम्। 'एतस्मा'दिति पदमपि तदव्यवहितपूर्वमन्त्रपठितमक्षरात्परं परामृशेदिति चेत् यद्येवं तस्मिन्मन्त्रेऽक्षरात्परतः परे प्रयुक्तं 'स बाह्याभ्यन्तर'इत्यत्र श्रुतं स इति सर्वनामापि'यथा सुदीप्ता'दिति तदव्यवहितमन्त्रश्रुतं भूतयोन्यक्षरमेव

परामृशेदिति तत्प्रणाडिकया 'अग्निर्मूर्धे' तिमन्त्रश्रुतमस्येतिपदमपि तदेव परामृशेदिति भाव:।। ।।**इति अदृश्यत्वाधिकरणम्**।।८।।

सङ्गतिं प्रदर्शयन्नुत्तराधिकरणमवतारयति-**प्राणाधारत्वेनेति**। ननु यद्येवमस्य वैश्वानराधिकरणस्य अङ्गुष्ठाधिकरणेन सङ्गतिः तदा तदनन्तरमेवेदं प्रवर्तनीयम्। अस्यापि प्रवर्तनेनोपासकनेदिष्ठस्थाननिरूपणं समाप्य सर्वत्रावस्थानमन्तर्यामयधिकरणे निरूपयितुमुचितमिति चेत् सत्यम्। सङ्गत्यन्तरवशादन्तर्याम्यधिकरणं पूर्वं प्रवर्तितम्। अङ्गुष्ठाधिकरणे हि परमेश्वरस्याङ्गुष्ठसमाश्रयणेनोपासकनेदिष्ठत्वमुक्तम्। तत्रेयं शङ्कोन्मिषति। नमस्कर्तुरिवापकर्षावहं पराङ्गुष्ठसमाश्रयणं परमेश्वरस्यानुपपन्नमिति इमां शङ्कां नियन्तृतया रेतोमूत्रपुरीषादिसाधारण्येन सकलप्रपञ्चसमाश्रयणेऽपि न तत्प्रयुक्तदोषस्पर्शइति सामान्यतस्समर्थनेन परिहर्तुमन्तर्याम्यधिकरणं प्रवर्तितम्। तदनन्तरं पृथिव्यादिषु रूपविशेषमास्थायावस्थितस्य पुरोदेशावस्थितचैत्रवद्दृश्यता स्यादिति शङ्कां परिहर्तुं भूतयोन्यधिकरणं प्रवर्तितम्। इत्थमङ्गुष्ठाधिकरणमुखागत-शङ्काद्वयनिराकरणानन्तरं पूर्ववदुपासकनेदिष्ठस्थानान्तरमुच्यत इति युक्तैवेयं सङ्गतिः। यद्यप्युपकोसल-विद्याधिकरणप्रवर्तनानन्तरमेवास्याधिकरणस्य प्रवर्तनेन शरीरान्तर्वर्तितयोपासकनेदिष्ठत्वे कात्स्न्येन प्रतिपादिते तदनन्तरमन्तर्याम्यधिकरणं प्रवर्तयितुं शक्यं तथाप्यङ्गुष्ठाधिकरणपूर्वपक्षप्रवृत्ति-प्रकारप्रदर्शितदृष्टान्तप्रत्युदाहरणसङ्गतिवशात्तदधिकरणं पूर्वं प्रवर्तितमिति न किञ्चिदसाङ्गत्यम्।।सू।। **वैश्वानरः साधारणशब्दविशेषात्**।।२५।। विषयवाक्यमुदाहृत्य, ब्रह्मवैश्वानरश्रुतिभ्यां संशयमाह-**यस्त्वेतमिति**। 'तदन्यो वे'त्यनेन जाठराग्न्यादिपूर्वपक्षत्रयं क्रोडीकृतम्। तत्र वैश्वानरशब्दस्य जाठरादिविषयप्रयोगदर्शनेन पूर्वपक्षत्रयं क्रमेणोपपादयति-**वैश्वानरशब्देनेति**। वैश्वानरश्रुत्युदाहरणं 'शब्दादिभ्य' इति (ब्र॰ १.२.२७) सूत्रे प्रदर्शयिष्यमाणानामग्निश्रुतित्रेताग्निकल्पनप्राणाहुत्याधारत्वादिलिङ्गानामप्युपलक्षणम्। छान्दोग्ये 'को न आत्मा किं ब्रह्मे'ति ब्रह्मात्मश्रुतिभ्यामुपक्रमेऽपि वाजसनेयिशाखायां 'वैश्वान रं वै भगवन्सम्प्रति वेद तन्नो ब्रूही'ति वैश्वानरशब्देनोपक्रमदर्शनादुपक्रमो न विनिगमक। 'सर्वेषु लोके'ष्वित्यादिनोक्तमन्नादत्वफलमब्रह्मोपासनयाप्युपपद्यते। 'एतयान्नाद्यकामं याजये' दित्यादौ कर्मप्राप्यत्वेनापि हि तदाम्नायते। इह तु तदन्नादत्वं भूरादिषु यं कञ्चिल्लोकं पृथिव्यादिषु यत्किञ्चिद्भूतप्रधानं शरीरं देवमनुष्याद्यात्मसु यत्किञ्चिदात्मतां गतेनापि प्राप्यत इति विशेषो दर्शित इति भेदः। सर्वपापप्रदाहस्तु न वैश्वानरोपासनस्य फलं किंतु तदनन्तरमाम्नातस्य प्राणाग्निहोत्रस्य। तद्विधानानन्तरं हि य एवं विद्वानग्निहोत्रं जुहोती' त्युपक्रम्यतद्यथैषीकातूलमग्नौ प्रोतं प्रदूयते एवं हास्य सर्वे पाप्मानः प्रदूयन्त'इति श्रूयते। ततश्चवचनबलात्कर्मण एव तत्फलमिति सिद्धान्तिनापि

स्वीकरणीयम्। 'यक्ष्यमाणो ह वै भगवन्तोऽहमस्मि यावदेकैकस्मा ऋत्विजे धनं दास्यामि तावद्भगवद्भ्यो दास्यामि वसन्तु भगवन्त' इति प्रार्थितवन्तं केकयराजं प्रत्या' त्मानंमेवेमं वैश्वानरं सम्प्रत्यध्येषि तमेव नो ब्रूही'ति धनलिप्सां विना वैश्वानरविद्याप्रकारस्यैव प्रश्नस्तस्य पूर्णायु:प्राप्तिफलकत्वादुपपद्यते। वाजसनेयशाखायां ह्यस्यास्तत्फलकत्वमुक्तम् 'अपपुनर्मृत्युं जयति सर्वमायुरेती'ति। द्युमूर्धत्वादिकं द्युवैश्वानरत्वादिवत् कल्पनामात्ररूपं जाठराग्नावपि सम्भवति। एवं ह्युपाख्यायते। औपमन्यवादय: पञ्च महर्षय: 'को न आत्मा किं ब्रह्मे'ति मीमांसित्वा निश्चयमलभमाना वैश्वानरोपासनापरमुद्दालकं गत्वा तेनापि तस्यामकृत्स्नवेदिना अश्वपति: केकयो वैश्वानरमुपास्ते तमभ्यागच्छामेत्युक्ता: उद्दालकषष्ठास्तमभिजग्मु:। स च तेषां ज्ञानं परीक्ष्य ततो वक्तव्यशेषं वक्ष्यामीत्यभिसन्धाय 'औपमन्यव कं त्वमात्मानमुपास्से' इत्यादिना तान्षडपि ऋषीन् क्रमेण पृष्ट्वा तै 'र्दिवमेव भगवो राज' न्नित्यादिभि: यथाक्रमं द्युसूर्यानिलाकाशजलावनीषु वैश्वानरबुद्ध्या तैरुपास्यमानतयोक्तासु दिवादयो वैश्वानरं प्रति मूर्धचक्षु:प्राणमध्यमूत्र-स्थानपादावयवत्वेनोपास्या: न तु वैश्वानरत्वेनेति व्यस्तोपासना: प्रतिषिध्य समस्तोपासनाविषयस्य वैश्वानरस्य प्रागुपक्षिप्तं द्युमूर्धत्वादिविशिष्टरूपमेकीकृत्योपदिदेश 'मूर्धैव सुतेजा' इत्यादिनेति। एवं च द्युप्रभृतिषु यथा वैश्वानरत्वं कल्पितं तथा वैश्वानरमूर्धत्वादिकमपीत्ये व युक्तम्। तच्च जाठराग्नावपि सम्भवति। ब्रह्मश्रुतिरपि द्युमूर्धत्वादिसादृश्यात् गौणतयोपपद्यते। ब्रह्मणोऽपि हि द्युमूर्धत्वादिक 'मग्निर्मूर्धा चक्षुषी चन्द्रसूर्या'वित्यादिमन्त्रे श्रूयते। एतेनात्मपुरुषश्रुत्योरपि गौणत्वं व्याख्यातम्। तस्माज्जाठराग्निरेव वैश्वानर:। यदि तु द्युमूर्धत्वादिकं कल्प्यमानमपि द्युप्रदेशादिव्यापक एव कल्पनीयम्। तदा तृतीयमहाभूतरूपोऽग्निर्वैश्वानरोऽस्तु। 'यो भानुना पृथिवीं द्यामुतेमामाततान रोदसी अन्तरिक्ष' मिति तस्यैव त्रैलोक्यव्याप्तिश्रवणात् जाठररूपेण तस्य पुरुषान्त:प्रतिष्ठितत्वाच्च। यदि त्वात्मब्रह्मपुरुषश्रुतीनामब्रह्मण्यपि चेतनत्वेन संनिकृष्ट एव गौणी वृत्ति: कल्पनीया तदा तृतीयभूताभिमानिदेवता वैश्वानरोऽस्तु। 'विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्व'न्नित्यादिषु तृतीयमहाभूत इव 'वैश्वानरं द्वादशकपालं निर्वपे' दित्यादिषु फलदात्र्यां तदभिमानिदेवतायामपि वैश्वानरशब्दप्रयोगदर्शनात्। कथञ्चिदपि वैश्वानरो न परमेश्वर: परिच्छिन्नपरिमाणश्रवणादिति पूर्वपक्षसङ्क्षेप:। सिद्धान्तस्तु-परमेश्वर एव वैश्वानर:। जाठराग्न्यादिश्रुतित्वेनाभिमतयोरग्निवैश्वानरशब्दयोरन्तर्यामिणि परमेश्वरेऽपि वृत्त्या तत्साधारण्यात् साक्षात्प्रवृत्तिनिमित्ताश्रयवृत्तित्वस्यौत्सर्गिकत्वेऽपि शब्दशक्ते: परमेश्वरसाधारण्यानपायात्। इत्थं तयोस्साधारण्येऽपि नात्मादिश्रुतीनां कथञ्चिदपि जाठराग्न्यादिसाधारण्यं सम्भवतीति साधारणयोरग्निवैश्वानरशब्दयो: परमेश्वरासाधारणै: आत्मब्रह्मपुरुषशब्दै: विशेषणात्तत्सम-भिव्याहृतयास्तयोरौत्सर्गिकं साक्षात्त्वमनादृत्य परम्परया प्रवृत्तिनिमित्ताश्रये परमेश्वरे

पर्यवसानौचित्यादिति सूत्रे विशेषशब्दो विशेषणपरः। साधारणशब्दयोरसाधारण-शब्दैस्समभिव्याहृतैर्विशेष्यमाणत्वादिति सूत्रार्थः। निगदव्याख्यानमस्य भाष्यम्॥ परमेश्वरपक्षे श्रुतयः प्रमाणत्वेन दर्शिताः। लिङ्गदर्शनार्थत्वेनोत्तरसूत्रमवतारयति-**परमेश्वरेति**।।सू।। **स्मर्यमाणमनुमानं स्यादिति**।।२६।। **द्युलोकादीति**। अग्निशब्दो मन्त्रे द्युलोकपरः। 'असौ वाव लोको गौतमाग्नि'रिति श्रुतावग्निशब्दस्य तत्र प्रयोगदर्शनादिति भावः। 'सुतेजाः विश्वरूपः पृथग्वर्त्मात्मा बहुलो रयि'रिति शब्दैः पूर्ववाक्ये सुतेजस्त्वादिगुणयोगितया वर्णितानि द्युसूर्यवाय्वाकाशजलान्युक्तानि। पूर्ववाक्ये प्रतिष्ठात्वगुणयोगितयोक्ता पृथिवी स्वशब्देनैवानूदिता। सन्देहस्सम्यगुपचितो देहः नाभिकण्ठमध्यदेशः। एवं च द्युमूर्धत्वादिकल्पनस्य परमेश्वर इव जाठरादिष्वपि सम्भवेऽपि परमेश्वर एव श्रुत्यन्तरे प्रसिद्धत्वात्तदिह प्रत्यभिज्ञायमानं तमेव गमयेदिति भावः।।सू।। **शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न तथादृष्ट्युपदेशादसम्भवात्पुरुषमपि चैनमधीयते**।।२७।। अयमत्र शङ्काभिप्रायः। 'को न आत्मा किं ब्रह्मे' त्यत्रात्मश्रुतिर्व्याप्तचेतनस्य परब्रह्मणो वाचिका चेतनसामान्यवाचिन्यपि 'न' इति विशेषणात् सकलजीवान्तर्यामिणि तस्मिन्पर्यवसिता। ब्रह्मश्रुतिस्साक्षादेव तद्वाचिनी। पुरुषश्रुतिश्च पूर्णत्वयोगेन तद्वाचिनी। एतत्समभिव्याहारादग्निवैश्वानरशब्दावग्नेरन्तर्यामिणि तस्मिन्पर्यवस्यत इति यदुक्तं तन्न युक्तम्। 'स एषोऽग्निर्वैश्वानरो यत्पुरुष'इत्येतदनन्तरं हि 'स यो हैनमवमग्नि'मित्यादिवाक्ये पुरुषशब्देनोक्तस्य पुरुषविधशब्देन पुरुषसादृश्यमुच्यते। न च पुरुषस्य सतः पुरुषसादृश्योक्तिस्सङ्गच्छते। अतः केन निमित्तेनायमपुरुषे जाठरे पुरुषशब्दः प्रयुक्त इत्याकाङ्क्षायां मूर्धचक्षुराद्यवयवकल्पनालब्धेन शरीरवत्त्वरूपेण पुरुषसादृश्येनेति दर्शयितु जाठरस्येयं पुरुषसादृश्योक्तिरित्येव सङ्गच्छते। एवं च तत्समानविषययोरात्मब्रह्मश्रुत्योरपि तत्र गौणत्वमनिवार्यम्। किं च तयोरन्यथापि गौणत्वमभ्युपगन्तव्यम्। कथं 'प्राचीनकाल औपमन्यवस्सत्ययज्ञः पौलुषिरिन्द्रद्युम्नो भाल्लवेयोजनशार्कराक्ष्यो बुडिल आश्वतराश्विस्तेहैते महाशाला महाश्रोत्रियाः समेत्य मीमांसांचक्रुः को न आत्मा किं ब्रह्मे'त्यादिविद्योपक्रमे प्राचीनशालादीनामग्रे 'औपमन्यव कं त्वमात्मानमुपास्से' 'प्राचीनयोग्य कं त्वमात्मानमुपास्से' इत्यादिषु केकयराजस्य प्रश्नेषु 'दिवमेव भगवो राजन्नादित्यमेव भगवो राज'न्नित्यादितत्तदुत्तरवाक्यैर्द्युसूर्यप्रभृतीनात्मबुद्ध्योपासीनत्वेन वक्ष्यमाणानां क्वचित्समवेतानां वैश्वानरोपासकत्वेनैकविद्यत्वाभिमानिनामन्योन्यसम्भावितविशेषग्रहणाय स्वस्वोपासनाप्रकारा-विष्करणे कृते अन्योन्यमुपासनाप्रकारविरोधं दृष्ट्वा क एषां द्युसूर्यप्रभृतीनामस्मदादिभिः वैश्वानरबुद्ध्योपास्यमानानां मध्ये अस्मदन्तर्यामिपरब्रह्मभूतवैश्वानरबुद्ध्या ग्राह्य इत्येतदर्थकं 'को न आत्मा किं ब्रह्मे'ति विमर्शवाक्यं व्याख्यातव्यम्। अग्रिमप्रश्नोत्तरवाक्यानुसारात्। तथा च तत्रात्मब्रह्मशब्दयोरात्मब्रह्मबुद्धिविषयीकर्तव्येऽर्थे गौणत्वमवश्यमेवाभ्युपेयम्। एवमात्मब्रह्मपुरुष-

श्रुतिभिः गौणत्वेनावश्याभ्युगन्तव्याभिरनपोदितस्यौत्सर्गिकस्य साक्षात्त्वस्य त्यागायोगात्। साक्षात्प्रवृत्तिनिमित्ताश्रयविषयाभ्यामग्निवैश्वानरशब्दाभ्यां त्रेताग्निकल्पनप्राणाहुत्याधारत्वपुरुषान्तः-प्रतिष्ठितत्वलिङ्गैश्च जाठर एव वैश्वानर इति युक्तम्। बहुश्रुतिलिङ्गविरोधे द्युमूर्धत्वादिप्रत्यभिज्ञानस्याकिञ्चित्करत्वात् द्युमूर्धत्वादिकल्पनस्य पुराणेषु हिरण्यगर्भेऽपि दर्शनेन तस्यानियतत्वाच्च। तथापि द्युप्रदेशाद्यव्यापके जाठरे द्युमूर्धत्वादिकल्पना निरालम्बना स्यादिति चेन्न। वाजसनेयके ''सहोवाच मूर्धानमुपदिशन्नुवाच एष वा अतिष्ठा वैश्वानर इति चक्षुषी उपदिशन्नुवाच एष वैसुतेजा वैश्वानर इति नासिके उपदिशन्नुवाच एष वै पृथग्वर्त्मा वैश्वानर इति मुख्यमाकाशमुपदिशन्नुवाच एष वै बहुलो वैश्वानर इति मुख्या आप उपदिशन्नुवाच एष वै रयिर्वैश्वानर इति चुबुकमुपदिशन्नुवाच एष वै प्रतिष्ठा वैश्वानर'' इत्युपासकमूर्धादीनामतिष्ठासुतेजश्शब्दाद्युक्तद्युलोकसूर्यादिरूवैश्वानरमूर्धचक्षुराद्यात्मना सम्पादना-त्तव्यापिनस्तदीयजाठराग्नेर्द्युमूर्धत्वादिकल्पनोपपत्तेः। एवं च पुरुषान्तःप्रतिष्ठितत्वोक्तिरप्युपपद्यते। ततो हि स्वरसतः पुरुषान्तःपर्याप्तवृत्तित्वं प्रतीयते। न च प्रसिद्धद्युप्रदेशादिव्यापकस्य तत्सम्भवतीति। एवमन्तःप्रतिष्ठितत्वोक्त्यनुरोधेन उपासकमूर्धादिचुबुकान्तावयवसम्पादितमेव द्युमूर्धत्वादिकमत्र ग्राह्यम्। न तु प्रसिद्धद्युप्रदेशादिव्याप्त्यापादकमिति जाठरे द्युमूर्धत्वाद्यसम्भवपरिहारं द्योतयितुमेव 'शब्दादिभ्य' इत्यादिशब्देन ग्रहीतुं शक्योऽपि पुरुषान्तःप्रतिष्ठितत्वहेतुस्सूत्रे पृथङ्निर्दिष्टः। परिहाराभिप्रायस्त्वयं, न केवलपरमेश्वरोपासनेहोपदिश्यत इत्यभ्युपगम्यते किं तु जाठरावच्छिन्नतदुपासनोपदिश्यत इति। अतो न जाठरश्रुतिलिङ्गविरोधः। न च केवलजाठरोपासनोपदिश्यत इत्यभ्युपगमयतां तदीयश्रुतिलिङ्गस्वारस्यानुरोधादिति वाच्यम्। द्युमूर्धत्वादेस्तस्मिन्नसम्भवात्। वैश्वानरमूर्धादिरूपेण कल्पितैः प्रसिद्धैर्द्युप्रभृतिभिः खल्वतिष्ठासुतेजःप्रभृति शब्दोक्तभूम्याद्यधरलोकातीतस्थितिकत्वोत्कृष्टतेजस्त्वादिगुणमुखेनो-पात्तैरुपासकमूर्धादीनामभेदो वाजसनेयिशाखायामाम्नायते न तु तत्रोपासकमूर्धादिषु वैश्वानरमूर्धादिकल्पना क्रियते। अतो जाठरे प्रसिद्धद्युमूर्धत्वादिकल्पनालम्बनस्य त्रैलोक्यव्यापित्वस्याभावात्तत्र द्युमूर्धत्वादिव्यपदेशो न सम्भवति। द्युप्रभृतीनां मूर्धत्वादिव्यपदेशश्च तन्नियमनशक्तं प्रति समञ्जसो भवति। अत एव 'सहस्रशीर्षा पुरुषः' 'सर्वाननशिरोग्रीवः' 'सर्वतः पाणिपादं तदि'त्यादिश्रुतिषु सुरनरतिर्यगादीनां शीर्षादीन्नियच्छन्तं प्रत्येव तेषां शीर्षादिरूपत्वं व्यपदिश्यते। जाठरस्तूपासकमूर्धादिचुबुकान्तावयवरूपाणामपि द्युप्रभृतीनां न नियमने शक्तः। अतस्तत्र द्युमूर्धत्वादिकं समञ्जसं न भवति। परमेश्वरे तु सर्वनियन्तरि तत्समञ्जसम्। प्रसिद्धं च मुण्डकोपनिषदि 'दिव्यो ह्यमूर्तः पुरुष' इति मन्त्रे सकलप्रपञ्चबहिरन्तःप्रदेशव्याप्त्युक्त्युन्मेषित-पूर्णत्वप्रवृत्तिनिमित्तत्वेन पुरुषशब्देन प्रस्तुतस्य परमेश्वरस्याग्निमूर्धेति वर्णितं द्युमूर्धत्वादिकम्। स एव

द्युमूर्धत्वादिशाली पुरुषोऽत्र वैश्वानरशब्देनोक्त इति प्रतिपादयितुमेव 'स एषोऽग्निर्वैश्वानरो यत्पुरुष' इति पुरुषमप्येनं वैश्वानरमभिधीयते वाजसनेयिन:। अत्र हि द्युमूर्धत्वादिव्यपदेशानन्तरं यत्पुरुष इति प्रसिद्धानुवाद:। तथात्वेन श्रुत्यन्तरव्यपदिष्टस्यैव पुरुषस्यानुवाद इति युक्तम्। न चास्य वाक्यस्य द्युमूर्धत्वादिना श्रुत्यन्तरप्रसिद्धो य: पुरुष: स एवायं वैश्वानर इति प्रकरणप्रतिपाद्यस्य वैश्वानरस्य तदभेदप्रतिपादकत्वेऽपि द्युमूर्धत्वादिसादृश्यनिमित्तक औपचारिकस्तदभेदव्यपदेश इत्येव युक्तम्। पुरुषविधमित्यग्रे तत्सादृश्यप्रतिपादनात्। पूर्वोत्तरभाष्यवाक्यगतयो: पुरुषशब्दयोरैकार्थ्यस्यैवोचितत्वादिति वाच्यम्। उत्तरवाक्ये पुरुषेऽन्त:प्रतिष्ठितमिति पुरुषशब्दस्य मनुष्यादिजीवपरत्वेन तदेकवाक्यपठितस्य पुरुषशब्दान्तरस्यापि तद्विषयत्वोपपत्ते:। सम्भवति हि मूर्धाद्यवयवत्वमात्रेण मनुष्यादिसादृश्यम्। एवमर्थाभ्युपगमेन पुरुषात्मब्रह्मश्रुतीनां मुख्यार्थत्वस्य व्यवस्थापनसम्भवेऽर्थान्तराभ्युपगमेन तासामौपचारिकत्वकल्पनं न युज्यते। न चास्मिन्पक्षेऽग्निवैश्वानरश्रुत्योर्मुख्यार्थत्याग:। परम्परया प्रवृत्तिनिमित्ताश्रयेऽपि शक्तिसद्भावात्। ननु तथापि जाठरलिङ्गानि परमेश्वरे न सङ्गच्छन्ते। तथाहि-प्राणाहुत्याधारत्वं तावत्प्राणाहुतिद्रव्यस्थान्नस्य पाचके जाठराग्नावेव सङ्गच्छते। 'अवाढ्ढव्यानि सुरभीणि कृत्वे'ति श्रुतित: प्रत्यक्षतश्चाहुतिद्रव्याधारस्यैवाग्नेस्तत्पाचकत्वदर्शनात्। ततश्च गार्हपत्याद्यायतनकल्पनमपि जाठरं प्रत्येव युज्यते, य आहुत्याधारस्तत्पाचकश्च तं प्रत्येवायतनकल्पनौचित्यात्। पुरुषान्त:प्रतिष्ठित्वमपि पुरुषे पर्याप्तवृत्तौ तत्रैवस्वारसिकम्। 'इदं वाव तदिदमस्मिन्नन्त:पुरुषे ज्योति'रितिश्रुत्यन्तरप्रसिद्ध्यनुसारि च। तस्मादग्निवैश्वानरश्रुत्यो: प्रवृत्तिनिमित्तसाक्षादाश्रयविषयत्वरूपौत्सर्गिकार्थलाभेनानुगृहीतस्य बहुलिङ्गानुग्रहस्य लाभाय पुरुषात्मब्रह्मश्रुतीनां गौणत्वाङ्गीकारो न दोषायेति चेन्न। 'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रित:। प्राणापानसमायुक्त: पचाम्यन्नं चतुर्विध' मिति प्राणाहुतिद्रव्यपक्तृत्वस्य जाठरान्तर्यामिणि परमेश्वरेऽपि प्रसिद्धतया जाठरान्तर्यामिरूपेण प्राणाहुतिद्रव्याधारत्वस्यायतनत्रयकल्पनस्य पुरुषेऽन्त:प्रतिष्ठितत्वस्य च तत्राप्युपपत्ते:। 'यदिदमस्मिन्नन्त: पुरुषे ज्योति'रिति विद्यान्तरे पुरुषशब्दस्य 'स वा एषपुरुषोऽन्नरसमय' इत्यत्रेव शरीरपरतया अत्र 'पुरुषेऽन्त:प्रतिष्ठि'मिति पुरुषशब्दस्य पुरुषविधमिति शरीरवत्परपुरुषशब्दसमभिव्याहारेण शरीरवत्त्वपरतया च भिन्नार्थत्वेन तत्र प्रसिद्धेरत्रानुपयुक्तत्वाच्च। तस्मान्न जाठरो वैश्वानर इति।।सू।। **अत एव न देवताभूतं च॥२८॥ भूतदेवतयोस्त्रैलोक्यव्यापित्वमस्ति।** देवतायां पुरुषश्रुतिरप्युपपद्यते। उभयोरपि वाभिमानिदेवतारूपेण जाठररूपेण च पुरुषेऽन्त:प्रतिष्ठितत्वमप्युपपद्यत इत्यधिकाशङ्कानिराकरणार्थं सूत्रम्। तथाहि-भूते द्युप्रभृतिनियमनशक्ते: पुरुषश्रुत्यन्वयस्य चासम्भवात् देवतायां हेत्वनपेक्षितनियमनशक्तिपूर्णत्वप्रवृत्तिनिमित्तकपुरुषश्रुत्यन्वययोरसम्भवाच्च देवता भूतं च न वैश्वानर इति

तन्निराकरणाभिप्रायः।।सू।। **साक्षादप्यविरोधं जैमिनिः।।२९।।** पूर्वमग्निवैश्वानरशब्दप्रवृत्तिनिमित्तं प्रति साक्षादग्निवत्तद्द्वावारा परमेश्वरस्याप्याश्रयत्वेन उभयोरपि प्रवृत्तिनिमित्ताश्रयत्वाविशेषादग्निवैश्वानरशब्दयोस्तदुभयसाधारण्यमुक्तम्। इदानीं परमेश्वरस्य साक्षात्प्रवृत्तिनिमित्ताश्रयतयापि तयोस्तत्साधारण्यमुच्यते। अग्रमुत्कृष्टफलं नयत्याराधकानिति नैरुक्तप्रसिद्धमग्निशब्दस्य निर्वचन 'मग्निः कस्मादग्रं नयती'ति। तदेव महाभारतेऽपि प्रदर्शितम्–'यस्माच्चायं नयत्यग्रां गतिं विप्रान्सुपूजितः। तस्माच्च नयनाद्राजन्वेदेष्वग्निरितीर्यत' इति। तन्निर्वचनमग्न्यपेक्षयापि परमेश्वरे समञ्जसतरम्। तथा अङ्गति गच्छत्यूर्ध्वदेशमित्य'गिगता' वितिधातोरौणादिकेन निप्रत्ययेन नलोपेन च तस्य निर्वचनं प्रसिद्धम्। तदपि निरुपाधिकोर्ध्वदेशरूपदिव्यस्थानप्राप्तिमति परमेश्वरेऽग्न्यपेक्षयापि समञ्जसतरम्। वैश्वानरशब्दस्य निर्वचनमग्नौ वैश्वानरस्य ऋषैरपत्यमित्यपत्यार्थतद्धितान्ततया प्रसिद्धस्य तस्य विश्वेषु नरेष्वन्तर्यामितया सति परमेश्वरे भवतार्थद्धितान्ततया तदुपपद्यते। 'वैश्वानरः कस्माद्विश्वानर एव वैश्वानरः राक्षसो वायस इतिवत्। रक्ष एव हि राक्षसः वय एव वायस' इति नैरुक्तमपि तन्निर्वचनं सर्वजीवात्भूते परमेश्वर एवोपपद्यत इति भाष्येऽग्निशब्दस्य साक्षाद्वृत्तेस्सम्भवप्रदर्शनं वैश्वानरशब्दस्यापि तत्सम्भवस्योपलक्षणम्। न्यायतौल्यात्। न च 'साधारणशब्दविशेषा' दिति सूत्रखण्डभाष्ये 'वैश्वानरशब्दस्य साधारण्येऽपी'ति विशिष्य वैश्वानरशब्दस्य जाठरमहाभूततद्देवतापरमेश्वरसाधारण्यस्योक्तत्वात् 'शब्दादिभ्य' इति सूत्रभाष्ये वैश्वानर शब्दस्य परमेश्वरसाधारण्यं मत्वा तं विहायाग्निशब्दस्यैव पूर्वपक्षावलम्बनत्वेनोपन्यस्तत्वाच्च। 'तथादृष्ट्युपदेशा'दिति परम्परया प्रवृत्तिनिमित्ताश्रयविषयत्वेन शब्दगतिप्रदर्शनमग्निशब्दमात्रविषयम्। अतस्साक्षात्प्रवृत्तिनिमित्ताश्रयविषयत्वेन गत्यन्तरप्रदर्शनमपि तन्मात्रविषयमित्येव युक्तमिति भ्रमः कार्यः। न्यायतौल्येन आद्यसूत्रभाष्ये वैश्वानरशब्दसाधारण्योक्तेरग्निशब्दसाधारण्यस्याप्युपलक्षणत्वात् 'शब्दादिभ्य'इति सूत्रभाष्ये पूर्वपक्षावलम्बनतयाग्निशब्दोदाहृतेर्वैश्वानरशब्दस्याप्युपलक्षणत्वाच्च। न ह्यग्निशब्दाव्द्यावृत्तौ वैश्वानरशब्दमात्रस्य परमेश्वरसाधारण्यापादकः कश्चिन्न्यायो दृश्यते। 'तदात्मन्येव हृदय्येऽग्नौ वैश्वानरे प्रास्य'दिति 'स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयत' इति च श्रुत्यन्तरे परमेश्वरे वैश्वानरशब्दवदग्निशब्दस्यापि प्रयोगदर्शनमविशिष्टम्। ननु 'तथादृष्ट्युपदेशा'दिति दर्शितं मतमपेक्ष्य मतान्तरमस्मिन्सूत्रे प्रदर्श्यते। तत्र च सूत्रे वैश्वानरशब्दस्य साक्षाद्वृत्तिमुपेत्य अग्निशब्दमात्रस्याग्निशरीरके परमेश्वरे परम्परयाऽग्नित्वरूपप्रवृत्तिनिमित्ताश्रयविषयतया गतिः प्रदर्शिता। ननु वैश्वानरशब्दस्यापि तथा गतिः प्रदर्शिता। तथात्वे पौनरुक्त्यप्रसङ्गात्। ततश्च तन्मतमातिष्ठानं प्रति तत्सम्प्रतिपन्नं वैश्वानरशब्दमपहायाग्निशब्दमात्रे साक्षाद्वृत्तिरुपपादनीयेति चेन्न। 'एष वा अग्निर्वैश्वानरः' अयमग्निर्वैश्वानरो येनेदमन्नं पच्यत'

इत्यादिभूतजाठरविषयप्रयोगेष्विव परमेश्वरविषयप्रयोगेऽपि तयोः प्रवृत्तिनिमित्तभेदेनापौनरुक्त्योपपत्तेः। अन्यथा अग्निशब्दस्य साक्षाद्वृत्तिमभ्युपगम्य वैश्वानरशब्दस्य वृत्तौ मतभेदः प्रदर्शित इति वैपरीत्यस्यापि कल्पनापत्तेः। द्यूप्रभृतिपृथिव्यन्तप्रदेशसम्बन्धिन्या मात्रया परिच्छिन्नत्वरूपं प्रादेशमात्रत्वमपरिच्छिन्ने ब्रह्मणि न सम्भवतीति शङ्कानिराकरणार्थं सूत्रम्-सू॥ **अभिव्यक्तेरित्याश्मरथ्यः**॥३०॥ **परिच्छिन्नत्वमिति।** उच्यत इति शेषः। **उपासकाभिव्यक्तय इति।** उपासकबुद्ध्यारोहार्थमित्यर्थः। अन्नाद्धेतोर्वसतीतिवत् फलस्य हेतुत्वविवक्षाया सूत्रे पञ्चमीनिर्देशः। प्रादेशमात्रमित्येतदनन्तरमभिविमानमित्यभितो विगतमानत्वोक्तेः प्रादेशविशेषपरिच्छिन्नत्वोक्तिरुपासकबुद्ध्यारोहफलावसीयत इति भावः। यदितु वाजसनेयशखोक्तप्रकारेण मूर्धचुबुकान्तरालप्रमाणतारूपं प्रादेशाख्यपरिमाणविशेषशालित्वं छान्दोग्येऽपि प्रादेशमात्रमित्यनेनोच्यत इति अभ्युपगम्येत तथाप्ययमेव परिहारः। भाष्ये तु प्रसिद्धद्युप्रभृतिपृथिव्यन्तावयवकल्पनानन्तरमेवंशब्दपरामृष्टेन तेन प्रकारेण प्रादेशमात्रत्वकथनं यौगिकार्थकथन एव घटत इति तत्स्वारस्यानुसारेण प्रादेशशब्दस्य यौगिकार्थं परिगृह्य............ विष्कृतः। वस्तुतस्तु रूढ्यर्थपरिग्रहेऽपि नैवंशब्दस्वारस्यविरोधः। वाजसनेयिशाखायां द्युप्रभृतिपृथिव्यन्तानां वैश्वानरावयवत्वकल्पनामपहाय स्वातन्त्र्येणोपासकमूर्धादीनामेव तदवयवत्वं कल्पितं चेत्खलु तद्विरोधस्स्यात्। न तथा तत्र कल्पनम्। किं तु छान्दोग्य इव द्युप्रभृतिषु ऋषिभिर्वैश्वानरबुद्ध्या स्वस्वोपास्यत्वेन कथ्यमानेषु तेषां वैश्वानरद्युमूर्धादित्कल्पनानन्तरं 'प्रादेशमात्रमिति ह वै देवास्सुविदिता अभिसम्पन्ना' इत्युक्तरूपं वैश्वानरं देवाः प्रादेशपरिमाणमुपास्य कृतार्था अभूवन्नित्युक्तत्वात्। कथं द्युप्रभृतिपृथिव्यन्तलोकसंस्थानावयवः प्रादेशमात्रः स्यादित्याकाङ्क्षायां 'तथा नु व एनान्वक्ष्यामि यथा प्रादेशमात्रमेवाभिसम्पादयिष्यामी' ति तदुपपादनं प्रतिज्ञाय पूर्वं प्रतिष्ठादिशब्दोक्तगुणविशेषयुक्तत्वेन वर्णितानां वैश्वानरमूर्धादिरूपेण कल्पितानां द्युप्रभृतीनामेवोपासकमूर्धादिषु कल्पना कृता। तदभिप्रायेण छान्दोग्येऽपि द्युप्रभृतिपृथिव्यन्तावयवत्वप्रकारेणैव प्रादेशमात्रत्वोक्तेः। अत एव हि छान्दोग्येऽपि त्रैलोक्यशरीरत्वेन वैश्वानरोक्त्यनन्तरमुपासकमूर्धचुबुकान्तरालगतमास्यमाहवनीयत्वेन कल्पितम्॥ नन्वपरिच्छिन्नस्य परमेश्वरस्य बुद्ध्यारोहसौकर्यार्थं द्युप्रभृतिप्रादेशपरिच्छिन्नत्वमात्रमुच्यतां किं द्युप्रभृतीनां मूर्धादित्वकल्पनयेति शङ्कानिराकरणार्थं सूत्रम्-सू॥ **अनुस्मृतेरिति बादरिः**॥३१॥ न केवलं परमेश्वरस्य कदाचिद्बुद्ध्यारोहत्वमात्रमपेक्षितं किं त्वाप्रायणमहरहरनुवर्तनीया ध्यानरूपा स्मृतिर्ब्रह्मप्राप्त्यर्थमपेक्षिता। तथा स्मृतिसन्तानानुवृत्तिर्बुद्ध्यारोहदार्ढ्ये सत्येव भवतीति तद्दार्ढ्यसौकर्यार्थं द्युमूर्धत्वादिकल्पनेति सूत्राशयमाह-**द्युप्रभृतीति।** तथापि द्युमूर्धत्वादिकल्पनानन्तरं कर्माङ्गवेदिबर्हिस्त्रेताग्निकल्पनमिहानुपयोगीति शङ्कानिराकरणार्थं सूत्रम्-सू॥ **सम्पत्तेरिति**

जैमिनिस्तथा हि दर्शयति।।३२।। ननु प्राणाहुतेः प्राणवायुदेवत्यस्याग्निहोत्रवकल्पनायां प्राणवायुं प्रत्येव वेद्यादिकल्पनं कार्यं व वैश्वानरं प्रति। न च प्राणाग्निहोत्रस्य वैश्वानरब्रह्मविद्याङ्गत्वात्तद्देवत्यत्वं वाच्यमिति शङ्कनीयम्। गार्हपत्यादिविद्यान्यायेनान्यदेवत्यत्वेऽपि ब्रह्मविद्याङ्गत्वोपपत्तेरित्याशङ्कानिराकरणार्थं सूत्रम्–**आमनन्ति चैनमस्मिन्**।।३३।। तैत्तिरीयशाखायां पुरुषार्थं प्राणाग्निहोत्रं परमेश्वरदेवत्यमिति प्रागङ्गुष्ठाधिकरणे प्रसाधितम्। तत्सामान्यादिदमपि तथेति सूत्राशयमाविष्करोति–**तैत्तिरीया इति**। एतदुपयोगितयैवकर्मदेवताविचारात्मकमपि तदधिकरणमिह शास्त्रे प्रवर्तितम् ननु तैत्तिरीयशाखायां स्वतन्त्रं प्राणाग्निहोत्रमाम्नातम्। छान्दोग्ये तु वैश्वानरविद्याङ्गम्। अतो यथा नैमित्तिकविकारयुक्तदर्शरूपाया अभ्युदयेष्टेः पशुकामेष्टिविशेषस्य च समानश्रुतित्वेऽपि क्वचित्पयसि प्रदेय....नान्यत्र। एवं क्वचित्परमेश्वरदेवत्यत्वं नान्यत्रेति विशेषस्सम्भवति। किं च द्वयोरपि परमेश्वरदेवत्यत्वाभ्युपगमेऽपि तत्र प्राणरूपः परमेश्वरो देवता इह जाठराग्निरूप इति विशेषोऽभ्युपगतः। तथा तत्र परमेश्वरस्य अङ्गुष्ठे सन्निधानमुक्तम्। इह तु मुखे। अतः पुरुषविद्याधिकरणन्यायेनात्र किञ्चिद्विषयं समानश्रुतित्वमप्रयोजकमिति चेत्सत्यम्। तथापि छान्दोग्ये श्रुतः प्राणाहुत्याराध्यत्वेनोपासकशरीरे सन्निहितः परमेश्वरः प्राणाग्निहोत्रान्तरविषये श्रुत्यन्तरे तस्य तथात्वेनोपासक शरीरे सन्निधानाम्नानदर्शनादित्येतावदिह लिङ्गमुपन्यस्यते। 'आमनन्ति चैनमस्मि' न्निति सूत्रमपि तावदेव प्रतिपादयतीति स्पष्टमेव। ननु तथाप्यत्र जाठराग्निरूपेणोपास्ये वैश्वानरे कथं प्राणापानादिशब्दवाच्येन प्राणवायुरूपेणाहुत्युद्देश्यता सङ्गच्छतामिति चेदुच्यते। इह ज्योतिर्विद्यायामिव जाठराग्निरूपेणो पासनं न सूत्रकाराभिमतम्। अत एव 'तथादृष्ट्युपदेशा' दित्युक्तयनन्तरं 'साक्षादप्यविरोधं जैमिनि'रिति पक्षान्तरमुक्तम्। अन्यथा पूर्वं ब्रह्मपरतया निर्णीतेषु प्राणाकाशादिशब्देष्वपि सम्भवन्ती साक्षाद्वृत्तिरिहैव किमर्थं विशिष्य प्रदर्श्येत। अतोऽत्र जैमिनिग्रहणं नानभिमतिसूचनार्थं किं 'त्वन्यार्थं तु जैमिनि'रिति सूत्र इव शिष्यप्रौढिप्रख्यापनार्थम्। न च वैश्वानरस्याग्निरूपत्वाभावे तं प्रति गार्हपत्याद्यायतनकल्पनं न सङ्गच्छेतेति। वाच्यम् 'हृदयं गार्हपत्य' इत्यादिषु श्रुतानां गार्हप्रत्यादिशब्दानामग्निविशेषवाचिनामग्न्याधारेषु लक्षणाकल्पनायोगात्। तेषां हृदयादिषु वैश्वानरोद्देश्यकाहुत्याधाराग्नित्वकल्पनार्थतया स्ववच्यविषयत्वोपपत्तेः। तस्माद्युज्यत एवैतद्वैश्वानरोद्देश्यकत्वं प्राणाग्निहोत्रस्य। अत एव 'तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्त' इति फलनिर्देशानन्तरं 'तस्मादु हैवंविद्यदपि चण्डालायोच्छिष्टं प्रयच्छेदात्मनि हैवास्य तद्वैश्वानरे हुतं स्या' दिति वचनेन वैश्वानरोद्देश्यत्वं प्राणाग्निहोत्रस्य व्यञ्जितम्। तत्र वैश्वानर इति सप्तमी 'समं ब्राह्मणे दान' मितिवदुद्देश्यार्था। 'चण्डालाये'ति चतुर्थ्योपक्रमात्। न'त्वाहवनीये जुहोती'ति सप्तमीवदाधारार्थेति न विरोधः। एवं स्वप्रकरणाम्नातसाधकान्तरसमुच्चयार्थस्सूत्रे चकार इति सर्वमनवद्यम्।।

इति वैश्वानराधिकरणम्।।९।।

इति श्रीशिवातिवादिमूर्धन्यशिवदर्शनस्थापनधुरंधरसकलदेव भूदेवप्रतिष्ठापकश्रीमच्चिन्नबोम्म शूपालहृदयकमलकुहरविहरमाणश्रीसाम्बशिवप्रेरितस्य श्रीमद्भरद्वाजकुलजलधिकौस्तु भश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोप्पयदीक्षितस्य कृतौ श्रीकण्ठाचार्यविरचितब्रह्ममीमांसाभाष्यव्याख्यायां शिवादित्यमणिदीपिकाख्यायां प्रथमस्याध्यायस्य द्वितीयः पादः समाप्तम्

जन्म — ६-११-१९३७

जन्मस्थानम् — ग्रामः — रोहटः, मण्डलम् सोनीपतः (हरियाणा)।

शिक्षा — शास्त्री १९५३, पञ्जाबविश्वविद्यालये सर्वप्रथमः, एम.ए. १९६३ दिल्ली विश्वविद्यालयः, पी.एच.डी. १९७० दिल्ली विश्वविद्यालयः।

अध्ययनक्षेत्रम् — साहित्यशास्त्रम्, व्याकरणम् च।

प्रकाशितानि शोधपत्राणि — दिल्ली विश्वविद्यालयदक्षिणपरिसरे समवेतानां परिचर्चानां पुस्तकाकारेषु प्रकाशनेषु बहवो लेखाः।

प्रकाशितो ग्रन्थः — अभिधाविमर्शः, दिल्ली १९८० आचार्यो दण्डी (राष्ट्रियसंस्कृतसंस्थानेन प्रकाशितः)

कार्यक्षेत्रम् — दिल्ली विश्वविद्यालयस्थे, हिन्दूमहाविद्यालये,

प्राध्यापकः — १९६९-१९८६

प्रवाचकः — १९८७-१९८८

गुरुकुलकांगड़ी विश्वविद्यालये प्राचार्यो विभागाध्यक्षश्च — १९८८-१९८९

वर्तमाने हिन्दूमहाविद्यालये प्रवाचकः।

ALL MAHAPURANAS

Text with Shloka Index & Introduction

Agni Mahapurana
664 pp 450.00

Bhagavata Mahapurana-
4vols 2304 pp Set 1500.00

Bhavishya Mahapurana
3vols 1400 pp Set 1200.00

Brahma Mahapurana
728 pp 450.00

Devi Bhagavata Mahapurana
1154 pp 800.00

Ganesha Purana
832 pp 1993 450.00

Garuda Mahapurana
668 pp 400.00

Harivansha Purana
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
1802 pp 2vols set 900.00

Kurma Mahapuran
298 pp 300.00

Linga Mahapurana
774 pp 400.00

Markandeya Mahapurana
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
828 pp 450.00

Narada Mahapurana
932 pp 600.00

Padma Mahapurana
2381pp 4vols set 1600.00

Shiva Mahapurana
1504 pp 2vols set 900.00

Shiva Mahapurana (Small Type)
412 pp 400.00

Skanda Mahapurana
5600 pp 8 vols set 4000.00

Skanda Mahapurana (small type)
1452 pp 3vols set 1500.00

Vamana Mahapurana
472 pp 400.00

Vayu Mahapurana
540 pp 400.00

Vishnudharmottara Mahapurana
1246 pp 900.00

Vishnu Mahapurana-with two commentaries
680 pp 500.00

विष्णुमहापुराण
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
—डा० श्रद्धा शुक्ला
2 vols Press

Maha Bhagavat Devipurana
Press

Ekamara Purana
490 pp 150.00

Kalki Purana
316pp 120.00

Kuber Purana (Text With Study) Press

Narasimha Purana
380 pp 100.00

Saura Purana
290 pp 100.00

Srimadbhargavopapuranam
—Brijesh Kumar Shukla
pp 348 Rs. 124.00

Vasuki Purana
260 pp 100.00

Ashtadasha Purana Darpana Contents of 18 Puranas
432 pp 180.00

PURANAS WITH TEXT, TRANS & NOTES IN ENGLISH VERSWISE

Vishnu Purana – *H.H. Wilson*
1065 pp 2 vols Set 500.00

Matsya Purana – *N.S. Singh*
1252 pp 2 vols 500.00

Narasimha Purana —*Dr.S.Jena*
750 pp 400.00

Kalika Purana
Prof. Biswanarayan Shastri
1770 pp 3vols set 900.00

NAG PUBLISHERS
11/A (UA) Jawahar Nagar, Delhi - 110007 (INDIA)